पंन्यास पदने धारण करवानी योग्यता आवी गई छे. आथी मारे तेमने पंन्यासपद अर्पण करवु जोईओ. पूज्यश्रीना आ विचारनी आ बंने मुनिपुंगवोने खबर पडता तुरत तेओओ पूज्यश्रीने विनंती करीके– गुरुदेव ! आ पद माटे अमारी कोई योग्यता नथी. क्यां आपना जेवा महापुरुषोनुं गंभीरता, विद्वत्ता, वात्सल्यभाव वगेरे गुणोनी सुवासथी मघमघतुं जीवन अने क्यां अनेक दोषोथी दूषित अमारुं जीवन. कागनी डोकमां मोतीनी माला न शोभे तेम आ पद अमारा जेवाथी नहि शोभे. अमने आपनी कृपा सिवाय अन्य कंई ज न जोईओ. आपनी कृपा अमारा माटे सर्वस्व छे.

पण पूज्यपादश्री क्यां समजता न हता के गुणवान मनुष्यो पोताने कदी गुणवान कहे नहि. तेमणे उक्त मुनिवर्योने पंन्यासपद प्रदान करवानी पोतानी इच्छाने मूर्त स्वरूप बनाववा प्रयत्नो शरू करी दीधा. परिणामे वि० सं० १९९० मां फागण सुद चोथना दिवसे शुभ मुहूर्ते जैन विद्याशालाना विशाल होलमां जंगी मानवमेदनीनी वच्चे पू० वयोवृद्ध संयस्थविर आचार्यदेव श्रीसिद्धिसूरीश्वरजी महाराजना पुण्यहस्ते आ बंने मुनिपुंगवोने पंन्यासपदथी अलंकृत करवामां आव्या. आ समये पू० आचार्य श्रीदानसूरिजी महाराजे तथा महोपाध्याय श्रीप्रेमविजयजी महाराजे तेमना मस्तके वासक्षेप नाख्यो अने पदनी सफलताना आशीर्वाद आप्या.

## मुंबईना आंगणे

पू० पंन्यास श्रीक्षमा वि० म० पू० श्रीदानसूरीश्वरजी म० नी आज्ञाना चीले ज चालता हता. आथी पूज्यश्री तरफथी मुंबई जवानी आज्ञा थतां तेमणे अमदावादथी मुंबई तरफ विहार कर्यो. १९९० नुं चातुर्मास तेमणे मुंबई लालबाग कर्युं. मुंबई लालबाग उपाश्रयमां आवनार भाविकोने आ प्रथम वार ज पू० पं० श्री क्षमा वि० गणिवर्यनी वाणीनुं अमृत पीवा मल्युं हतुं. ओमनी वैराग्यना रंगथी रंगायेली वाणीनी असर जनता उपर घणीज सुंदर पडी हती. त्यांना श्रावको अनेक महिनाओ सुधी तेमना वचनामृतनुं पान करवा छतां अतृप्त ज रह्या. आथी तेमना आग्रहथी तथा पूज्योनी आज्ञाथी १९९१ नुं चातुर्मास पण तेमणे मुंबई-लालबाग ज कर्युं.

आ बे चातुर्मास दरमीयान लालबागना संघे जोयुं हतुं के–पू० पं० श्रीक्षमा वि० म०नी निःस्पृहता अजब कोटिनी हती. विद्वत्ता पण असाधारण हती. वक्तृत्व शक्ति पण प्रबळ हती. संयमनुं पालन अप्रमत्तपणे करता हता. तेमनी दरेक प्रवृत्तिमां संयमनी झलक जणाती हती. स्वभाव पण मध जेवो मीठो हतो. तेमना अेक अेक वचनमां वात्सल्य भर्युं हतुं. ब्रह्मचर्य व्रत विषे तेओ बहु सावध रहेता हता. उपाश्रयमां कवेळाओ कदी स्त्रीओनो संचार थतो न हतो. पू० साध्वीजी म० साथे पण तेओ बहु परिचय राखता न हता.

आ वारसो तेमने पू० श्रीदानसूरीश्वरजी म० तथा पू० उपाध्याय श्रीप्रेमविजयजी गणिवर्यनी पासेथी मल्यो हतो. अे वारसो आजे पण सुसंयमीओने मळतो रह्यो छे. अे बंने पूज्यो साधुओना ब्रह्मचर्यमां जरा पण आंच न आवे अे माटे सतत काळजी राखता हता. तेओ दरेक स्थळे स्त्रीओने अकाळे उपाश्रयमां आववानो कडक निषेध करता. कारण के पांच महाव्रतोमां ब्रह्मचर्य व्रतनुं निरतिचार पालन करवुं घणुं ज दुष्कर छे. स्त्रीओनो परिचय व्रतना पालनमां बाधक बने छे. स्त्रीनी मोहिनीओ झेरने पीनारा अने श्मशानमां रहेनारा नीलकंठ शंकरने पण नचाव्या हता. जंगलना जोगी विश्वामित्र पण मेनकाना रूपना निरीक्षणथी मुग्ध बनी गया हता. अरणिक मुनिवर जेवा महापुरुष पण स्त्रीकटाक्षनी जंजीरमां जकडाई गया हता. तो पछी आजना साधुओओ पण ब्रह्मचर्यनी रक्षा माटे पूरे पूरी तकेदारी राखवी जोईओ.

पूज्य पं० श्री क्षमावि. जी महाराजे आ बे चातुर्मासमां प्राचीन ग्रन्थोना संपादन-संशोधननुं कार्य हाथ धर्युं हतुं. आ अवसरे हैमप्रकाश पूर्वार्ध, सावचूरि हैमलिंगानुशासन, स्वोपज्ञविवरणादियुक्त हैमलिंगानुशासन, मध्यमवृत्त्यवचूरियुक्तसिद्धहेमशब्दानुशासन वगेरे ग्रन्थोनुं संपादन-संशोधन चालतुं हतुं.

साथे साथे महोत्सवो वगेरे शासनप्रभावनाना अद्‌भूत प्रसंगो पण बन्या हता.

आ उपरथी वांचको समजी शकशे के प्राचीन उपयोगी साहित्यनु संपादन संशोधन करवानी तेमने केटली धगश हती. हवे तेओ संपादन-संशोधननी कलामां सिद्धहस्त बनी गया हता.

## अेक कारमो दिवस

चातुर्मास बाद पू० पंन्यासजी म० मुंबई-गोडीजीना उपाश्रये पधार्या.संपादन-संशोधननी प्रवृत्ति चालु ज हती. अहीं तेमना माटे अेक कारमो दिवस आवी गयो के जे दिवसथी तेमने सदाने माटे अेक उपकारी पूज्यनो असह्य वियोग थयो. अे अमंगल दिवस हतो वि० सं० १९९२ नी महा सुद बीजनो. आ दिवसे पाटडी मुकामे सकलागमरहस्यवेदी परमपूज्य आचार्य श्रीदानसूरीश्वरजी म० समाधि पूर्वक कालधर्म पाम्या हता. आ समाचार पंन्यासजी म० ने मळतां तेमणे सख्त आघात अनुभव्यो. आ समये मुंबईना भाविक भक्तवर्गने पण दुःख कम न थयु हतु.

कारण के तेमने वि०सं० १९८७ मां स्वर्गस्थ पू० आचार्य भगवंतना जीवननो पूर्ण परिचय थयो हतो. तेमना परिचयमां आवनार सर्व कोईअे जोयु हतु के तेमनी वाणी अद्‌भूत संजीवनी हती. अेमना त्यागे सौना मन गळगळां करी नाख्या हता. अेमनी सहनशीलताअे सर्वना मुखमां आंगळा घलाव्या हता. अेमनी निःस्पृहताअे अनेकने अचंबो पमाड्यो हतो. अेमना देह उपर चमकारा मारतु संयमनु लावण्य सर्वने प्रसन्नतानी अने त्यागनी भव्य प्रेरणा आपतु हतु. आभना तारलिया जेवी अेमनी आंखोमांथी सदाय करुणाना किरणो प्रसरी रह्या हता. आवा महापुरुषनो सदा माटेनो वियोग मुंबईनी धर्मप्रेमी जनता माटे असह्य बनी गयो.

## हृदयद्रावक प्रवचन

आ महापुरुषना स्वर्गवास निमित्ते मुंबईमां अनेक स्थळे महोत्सवो उजववामां आव्या हता. तेमां पू० पंन्यासश्रीक्षमाविजयजी गणिवर्यनी सान्निध्यमां गोडीजीना जिनमंदिरमां उजवायेल महोत्सव अपूर्व हतो. आ भव्य महोत्सवमां लाभ लेनार जनतानी प्रचुरता अने प्रसन्नता जोईने त्यांनो बुझर्ग वर्ग कहेतो हतो के– मुंबई शहेरमां छेल्ला पचाश वर्षमां आवो महोत्सव अमारा जोवामां नथी आव्यो. आ महोत्सवनी आटली महत्तानो यश पू० दानसूरीश्वरजी म० ना स्वर्गवास अंगे हृदयद्रावक प्रवचन करनार पू० पं० श्रीक्षमा विजयजी गणिवर्यने मल्यो हतो. पू० पंन्यासजी महाराजने श्रीदानसूरीश्वरजी म० ना स्वर्गवासथी अत्यंत दुःख थयु हतु. आथी तेमणे स्वर्गस्थ सूरीश्वरजीना स्वर्गवास अंगे जे प्रवचन आप्यु हतु, तेमां अेके अेक वाक्यमां, अेके अेक वचनमां आघातनी लागणीनो अनुभव थतो हतो. आथी ज तेमनु आ प्रवचन खरेखर असाधारण हृदयद्रावक बन्यु हतु. तेमनु अेके अेक वाक्य श्रोताना हृदयमां झणझणाटी पेदा करतु हतु. तेमना आ प्रवचननी असरथी अने तेमनी प्रेमभरी प्रेरणाथी गोडीजीनी जनताअे आ भव्य महोत्सव उजव्यो हतो.

## मुंबईमां प्रवेशोत्सव

वि० सं० १९९२ नी चैत्रवद ६ नु मंगल प्रभात खील्यु. पूर्व आकाशमां ऊषानु हास्य खीली उठ्यु. थोडी ज वारमां सूर्यनारायणे मुंबई बंदर उपर डोकियु कर्यु. मुंबईनु शान्त बनेलु वातावरण पुनः धमालियु बनी गयु. आ समये मुंबईनी धर्मप्रेमी जनताना हृदय सागरमां उत्साहनी ऊर्मिओ उछळी रही हती. सर्वे अेक महापुरुषना स्वागत माटे अधीरा बनी रह्या हता. आज सिद्धान्तमहोदधि परमकारुणिक आचार्य-श्रीमद्विजय प्रेमसूरिजी म० पोताना शिष्यरत्न प्रखर वक्ता उपाध्याय श्रीरामविजयजी गणिवर्य आदि मुनिमंडल साथे मुंबई-लालबागमां प्रवेश करवाना हता. पू० पं० श्रीक्षमाविजयजी गणिवर्य पण तेमनी साथे ज हता. तेओ मुंबई आजुबाजुना पराओमां विहार करतां करतां मलाड मुकामे पूज्यश्रीनी साथे थई गया हता. प्रवशेनो समय थतां मुंबईनी तथा जुदा जुदा पराओनी जनता अेकत्रित थई गई. प्रवेश समये तेमना स्वागत माटे कीडीओनी जेम मुंबईनी प्रजा उभराणी हती. गगनचुंबी महोमहेलोनी अटारीओ

अने झरुखाओ मानव मेदनीथी संकीर्ण बनी गया हता. अे अटारीओमांथी अने झरुखाओमांथी नारीवर्ग पूज्यश्रीने सोना रूपाना फुलडे वधावतो हतो. आम अंतरना आनंदथी अने बाह्य शणगारथी अे अणगार नायकनो मुंबईमां प्रवेशोत्सव थयो.

## मुंबईमां पदप्रदान

आ प्रवेशोत्सवना पडघाओ शम्या न शम्या त्यां तो बीजा महोत्सवनी तडामार तैयारीओ थवा मांडी. आ उत्सव हतो प्रसिद्धवक्ता उपा० श्रीरामविजयजी गणिवर्यनी आचार्य पदवी तथा पू० पं० श्रीक्षमाविजयजी गणिवर्यनी अने पू० पं० श्री जम्बूविजयजी गणिवर्यनी उपाध्याय पदवी निमित्ते. आ प्रसंगे श्रीशत्रुंजयतीर्थादि विविध रचनाओ तथा ध्वजा पताकाओ वगेरेथी लालबागना विशाळ मंडपने देवविमान तुल्य बनावी देवामां आव्यो हतो. जोतजोतामां महोत्सवनी शरूआत थई, अने सातदिवस पूर्ण पण थई गया. हवे आव्यो पदप्रदाननो सोहामणो आठमो दिवस वैशाख सुद ६ नो.

पदार्पणनी क्रियानी शरूआत करवानो समय थता पहेलां ज आ प्रसंगने वधाववा साकरनो कणीयो जमीन उपर पडे अने कीडीओनी कतार आववा लागे तेम मंडपमां जनता आववा लागी. थोडी ज वारमां पदप्रदाननिमित्ते शणगारेल माधवबागनो भव्य मंडप गीचोगीच भराई गयो. क्रियानो समय थतां संयमना लावण्यथी सवने आकर्षता पू० आचार्य भगवंत श्रीमद्विजयप्रेमसूरीश्वरजी महाराज पधार्या अने साथे लाव्या पू० उपाध्यायश्री रामविजयजी म० ने, पू० पं० श्री क्षमा वि० म० ने, अने पू० पं० श्री जम्बू वि० म० ने. पाछळ आव्युं मुनिमंडल. आ समये हर्षनी किकियारीओथी तथा सिद्धान्तमहोदधि श्रीमद्विजयप्रेमसूरीश्वरजी म० नी जयना मंगलनादथी गगनगाजी रह्युं अने आनंदथी नाची रह्यो जनतानो हृदयमयूर. पूज्यपादश्रीअे क्रियानो प्रारंभ कराव्यो. समय थतां पूज्यपादश्रीअे पू० उपाध्यायजी म० ने आचार्यपदथी अलंकृत कर्या. क्षण पहेलानां उपाध्याय श्री रामविजयजी गणिवर्य आचार्य श्रीरामचन्द्रसूरिजी बनी गया. पू० पं० श्री क्षमा वि० म० ने तथा पू० पं० श्री जंबू वि० म० ने उपाध्याय पदथी विभूषित कर्या.

सिद्धांतमहोदधि पू० आचार्यश्रीमद्विजयप्रेमसूरीश्वरजी म० तथा प्रखरवक्ता आचार्यश्रीरामचन्द्रसूरिजी म० अने पू० उपा० श्री जंबू वि० गणिवर्य आदि मुनिमंडलनुं चातुर्मास मुंबई लालबागमां थयुं. पू० उपा० श्रीक्षमा वि० म० नुं चातुर्मास गोडीजीना उपाश्रयमां थयुं.

चातुर्मास बाद पू० उपाध्यायजी महाराजे गुजरात तरफ विहार कर्यो. १९९३ नुं चातुर्मास सूरत नेमुभाईनी वाडीना उपाश्रयमां कर्युं. १९९६ नुं चातुर्मास स्तंभनतीर्थमां कर्युं. अहीं चातुर्मास बाद तेमनी निश्रामां श्रीमद्विजयानंदसूरीश्वरजी म०, श्रीमद्विजयकमलसूरीश्वरजी म० तथा श्रीमद्विजयदानसूरीश्वरजी म० अे त्रण स्वर्गीय पू० गुरुदेवोनी प्रतिष्ठा निमित्ते महोत्सव थयो.

## आचार्य पद

अत्यार सुधीमां आपणे जोई आव्या के पू० उपा० श्रीक्षमा वि० महाराजे स्वगुरुदेवनी अखंड सेवा बजावी हती. अहर्निश तेमनी आज्ञाना पालन माटे तत्पर रहेता हता. 'गुरु आज्ञा तहत्ति' अे अेमनो जीवनमंत्र हतो. स्वगुरुने देव तुल्य मानता हता. स्वगुरुदेवना स्वर्गवास बाद तेमणे पू० आ० श्रीमद्विजयदानसूरीश्वरजी म० नी छत्र छाया स्वीकारी हती. आथी तेमने पण देवतुल्य मानता हता अने उछळता हैये तेमनी सेवा बजावता हता.

बाद तेमनी जीवननौकानुं संचालन आचार्य श्रीमद्विजयप्रेमसूरीश्वरजी म० ना हाथमां आव्युं. तेमणे आ पूज्यश्रीनी पण आज्ञा अने सेवामां कमीना राखी न हती. आ प्रमाणे तेमणे उक्त त्रणे पूज्योनी आज्ञा अने सेवा अखंड बजावीने त्रणे पूज्योना हृदयोने जीती लीधा हता. त्रणे पूज्यो अेमना प्रत्ये असाधारण ममतानी दृष्टिअे निहाळता हता. तेमणे त्रणे पूज्योनी पूर्ण कृपादृष्टि प्राप्त करी हती.

पूज्य गुरुदेवश्रीनी कृपाथी तेओ प्रव्रज्याना प्रारंभथीज सिद्धहेम व्याकरण जेवा गहन विषयना अभ्यासनो प्रारंभ करी शक्या हता. परिणामे वैयाकरणोनी श्रेणिमां दाखल थया.

पूज्याचार्य श्रीमद्विजयदानसूरीश्वरजी म० नी कृपाथी शास्त्रबोधनो विकास कर्यो अने पंन्यासोनी पंक्तिमां प्रवेश कर्यो.

पूज्याचार्य श्रीमद्विजयप्रेमसूरीश्वरजी म० नी कृपाथी त्याग वैराग्य अने संयमने विकसावीने पंचपरमेष्ठीमां चतुर्थपदे बिराजमान थया. दिन प्रतिदिन तेमनी आज्ञापालननी अने सेवानी भावना वधती ज जती हती. तेमणे अनेकवार पूज्योनी सेवाना अवसरो प्राप्त कर्या हता, छतां तेमनु हृदय अतृप्त ज रहेतु हतु. जेम जेम सूर्यनु तेज वधतु जाय तेम तेम कमलनो विकास, वृद्धि पामतो जाय छे, अेज प्रमाणे पू० उपा० श्री क्षमा वि० म० नो सिद्धांतमहोदधि श्रीमद्विजय प्रेमसूरीश्वरजी म० प्रत्येनो सेवाभाव जेम जेम वधतो जतो हतो तेम तेम तेमना प्रत्ये आचार्य देवश्रीनी कृपादृष्टि पण वृद्धि पामती हती. आथी अेक अेवो दिवस आवी पहोंच्यो के जे दिवसे आचार्यदेवश्रीमद्विजय प्रेमसूरीश्वरजी म० ना हृदयसागरमां पू० उपा० श्री क्षमाविजयजी म० ने आचार्यपदथी अलंकृत करवानी भावनानु अेक मोजु उछळी आव्यु.

आ समये पू० आचार्यदेवेश मोहमयी मुंबईनी भूमिने संयमना संस्कारोथी सिंची रह्या हता, ज्यारे पू० उपाध्यायजी महाराज स्तंभनतीर्थनी भूमिमां धर्मवृक्षने नवपल्लवित करी रह्या हता. तेमने पू० आचार्य भगवंतनी मुंबई आववानी आज्ञा थतां कशो विचार कर्या विना तेमणे तुरत मुंबई तरफ विहार कर्यो. अल्पसमयमां पूज्यपादश्रीनी सेवामां हाजर थई गया.

वि० सं० १९९५ नी महा सुद सातमना दिवसे मंगल मुहूर्त्ते मुंबईनी विशाळ मानवमेदनीनी वच्चे पूज्याचार्य श्रीमद्विजय प्रेमसूरीश्वरजी महाराजे उपाध्याय श्रीक्षमा वि० म० ने आचार्यपदे बिराजमान कर्या. आ समये नाम निर्देश करतां पूज्यपादश्रीअे मंगलशब्दो उच्चार्या– आचार्य श्रीक्षमाभद्रसूरि. पूज्यपादश्रीना आ शब्दोने उपस्थित जनताअे जयध्वनिथी वधावी लीधा.

नूतन आचार्यश्रीना वात्सल्यनीरना भर्या प्रसन्न नयनो, संयमना लावण्यथी ओपतु मुख, शासन माटे सदा वफादार रहेनारा बाहु जोईने सर्वना मनोमंदिरमां प्रसन्नताना प्रदीपो प्रगट्या.

पूज्याचार्य श्रीक्षमाभद्रसूरिजी महाराजे १९९५ नु चातुर्मास वापी कर्यु. आ चातुर्मासमां तेओअे सटीक **'गौतमीय महाकाव्यनु'** संपादन कार्य प्रारंभ्यु हतु. पण आ काव्यनु प्रिन्टींग ( छपाई ) मुंबई-निर्णय सागर प्रेसमां थतु होवाथी टपाल द्वारा प्रूफ आवतां समय घणोज लागी जतो हतो. आथी तेमणे आ कार्य मुंबई बिराजमान विद्वान मुनिवर्य श्रीकनक विजयजी म० ( हाल पंन्यास )ने सोंप्यु. मुनिवर्यश्रीअे पण वडिलोनी आज्ञाथी आ कार्य संभाळी लीधु.

चातुर्मास बाद तेमणे राजस्थान ( मारवाड ) तरफ विहार कर्यो. पूनमचन्दजी गोमाजी वगेरे श्रावकोनी विनंतीथी तेमणे मारवाडमां बेडा मुकामे स्थिरता करी. आ समये त्यां पूनमचन्दजी गोमाजीनी आर्थिक सहायथी तैयार थयेल ज्ञानमंदिरमां न्याय, व्याकरण, ज्योतिष, आगम वगेरे विविध साहित्यना अनेक पुस्तको वसाववामां आव्या. तेओश्रीना पुण्य हस्ते वैशाख सुद ६ ना तेरमा तीर्थंकर श्री विमलनाथ स्वामी वगेरे जिनबिंबोनी अंजनशलाका-प्रतिष्ठा तथा स्वगुरुदेव श्रीअमी वि० म० नी मूर्तिनी प्रतिष्ठा करवामां आवी. वैशाख सुद बीजना दिवसे शुभमुहूर्त्ते तपस्वीरत्न पू० पंन्यास श्रीकपूर वि० गणिवर्यने उपाध्याय पदनु प्रदान कर्यु. १९९६ नु चातुर्मास लुणावा, १९९७ नु चातुर्मास रतलाम, १९९८ नु चातुर्मास ईन्दोर कर्यु. आ त्रण चातुर्मास दरमीयान उपधान, तीर्थयात्राना संघो, प्रतिष्ठा, दीक्षा, महोत्सवो वगेरे अनेक शासन प्रभावनाना कार्यो थया हता. १९९९ नु चातुर्मास पुनः खंभात कर्यु.

चातुर्मास बाद सिद्धगिरिनी नवाणु यात्रा करवाना भावथी तेओ पालीताणा पधार्या. अहीं तेओ दररोज सवारना सिद्धगिरिनी यात्रा करता अने बपोरना "श्रीशत्रुंजयमाहात्म्य" उपर प्रवचन आपता हता.

## अन्तिम चातुर्मासप्रवेश

समय पोतानी काळखंजरी बजावतो चाल्यो जतो हतो. जोत जोतामां वि० सं० २००० नी जेठ वद दशमनी रात्रि पसार थई गई. जेठ वद ११ नो प्रभात खीलवानी तैयारी हती. नीरव बनेली शान्तिनो धीमे धीमे भंग थतो गयो. आ समये वढ़वाण केम्पमां अेक तरफ वृक्षो उपर बेठेला पक्षीओ ऊषादेवीना स्वागतनी तैयारी करवा लाग्या, अने बीजी तरफ जैन जनता अेक सूरिदेवना स्वागतनी तैयारी करवा लागी. प्रभात खील्यु अने थोडी ज वारमां सूर्यनारायण पण रथमां बेशीने आवी गया. सूरिदेवना स्वागत माटे शणगारवामां आवेल सुरेन्द्रनगर सुरेन्द्रनगरनी स्मृति करावतु हतु. समय थतां लोको चातुर्मास माटे पधारता पू० आचार्य श्रीक्षमाभद्रसूरिजी म० नु स्वागत करवा माटे चाल्या. उत्साह पूर्वक पूज्य आचार्यश्रीनो नगर प्रवेश थयो. बाद पूज्यश्रीअे प्रवचन आप्यु. दररोजना व्याख्यान माटे जाहेरात थई गई.

## जीवनज्योत बुझाई गई

जगतना जन्तुओ उपर यम राजा पोतानी कारमी सत्ता चलावी रह्यो छे. अे नथी जोतो तवंगरने के नथी जोतो गरीबने. अे नथी गणकारतो राजाने के नथी गणकारतो राजेन्द्रने. अे नथी ख्याल राखतो वयनो के नथी ख्याल राखतो आजुबाजुनी परिस्थितिनो. अे नथी छोडतो सेवकने के नथी छोडतो स्वामीने. सर्वना उपर अेक सरखी पोतानी अफर आण प्रवर्तावी रह्यो छे. आ यम राजाअे जाणे पू० आ० श्रीक्षमाभद्रसूरिजी म० नी कीर्ति-प्रतिष्ठा तेनाथी सहन न थई शकी होय तेम तेमना उपर दृष्टिपात कर्यो.

अषाड सुद अेकमनु प्रभात थयु. प्रातःकालनी प्रतिलेखनादि आवश्यक क्रियाओ करीने पू० आ० श्रीक्षमाभद्रसूरिजी म. मुनिवर्य श्रीलाभ वि० म. ने साथे लईने स्थंडिल भूमिअे गया. स्थंडिल भूमिथी पाछा फरता हजो तो मात्र अर्धो ज पंथ पसार थयो हतो, तेटलामां अचानक तेमना संयमदेहे तकलीफ खडी थई. छातीमां दुःखावो शरू थई गयो. सहवर्ती मुनिराज चकोर हता. तेमणे पूज्यनी अस्वस्थता तुरत कळी लीधी. तेमणे सूरिजीने आग्रह करीने आराम लेवा अेक वृक्ष नीचे बेसाड्या. आराम करवाथी पण छातीनो दुःखावो शान्त न थयो. बल्के वधतो ज रह्यो. सूरिजीअे जल्दी उपाश्रये पहोंचवा आत्मबळथी चालवा मांड्यु. जेम तेम करीने उपाश्रयना बजार बाजुना ओटला सुधी तेओ आवी पहोंच्या. छातीनो दुःखावो वधतो ज रह्यो. उपाश्रयमां रहेला मुनिओने खबर पडतां तेओ तुरत त्यां आवी पहोंच्या. सेवाभावी मुनिओअे त्यां ओटला उपर ज शय्या पाथरीने पूज्यश्रीने सुवाड्या. आ वात गाममां वायुवेगे प्रसरी गई. श्रावकवर्ग घणा प्रमाणमां हाजर थई गयो. पू० पं०श्री धर्मविजयजी गणिवर (हाल उपाध्याय) तथा पू. माणेक वि० म. वगेरे मुनिपुंगवोअे औषध माटे व्यवस्था करावी. आ मुनियोनी तेम ज श्रावकवर्गनी विनंतिथी पूज्यश्रीअे डोक्टरे आपेल औषधनु सेवन कर्यु.

छतां आराम थवानी वात दूर रही, पण छातीनो दुःखावो वधतो ज गयो. शरीर धीमे धीमे ठंडु पडवा लाग्यु. आथी संघना हैयामां चिंतानी चिनगारी प्रगटी. पूज्यश्रीअे चिंतातुर बनेल संघने पोतानु स्वास्थ्य थोडीज वारमा शान्त थशे अेम कहीने निश्चिंत रहेवा माटे जणाव्यु. खरेखर ! महापुरुषोनी संयमसाधना प्रबळ होय छे. तेथी ज ज्यारे मनुष्यलोकमांथी विदाय थवानी यमराजानी घंटडी वागती होय छे त्यारे पण अे महापुरुषो निश्चिंततानी मधुर बंसरी बजावता होय छे. पूज्याचार्यश्रीनी अद्भूत धैर्यता अने निश्चिंतता "**महापुरुषोने मृत्यु महोत्सवरूप बने छे**" अे वाणीनी स्मृति करावती हती. आ वखते तेमनो आत्मा **नमो अरिहंताणं**............ ...................**चत्तारि मंगलं**.................. **खामेमि सव्वजीवे**............वगेरेनी मंगल ध्वनिना श्रवणमां अने ध्यानमां लीन बनी गयो. दीपक छेल्ली वार झबकारो मारी बुझाई जाय तेम अे **जीवनपति** महापुरुषनी आंखो छेल्लीवार चमकीने सदाने माटे मींचाई गई. आम अेकाअेक अे महापुरुषनी जीवन ज्योत बुझाई गई. अेमनो आत्मा स्वर्गमां पहोंची गयो.

**अमर रहो अे जीवनपति महापुरुष !!!**

**कोटि कोटि वंदन हो अे जीवनपति महापुरुषने !!!**

॥ अर्हम् ॥

सिद्धान्तमहोदधिपूज्याचार्यश्रीमद्विजयप्रेमसूरीश्वरेभ्यो नमः।

# कलिकालसर्वज्ञश्रीमद्धेमचन्द्राचार्यविरचितं श्रीसिद्धहेमशब्दानुशासनम्।

मध्यमवृत्त्यवचूरिभ्यां संवलितम्।

# ❀ तृतीयोऽध्यायः ❀

## ( तृतीयः पादः )

ॐ

अर्हं

### वृद्धिरारैदौत् ।३।३।१॥

वृत्तिः—आकार, आर्, ऐकार, औकारश्चैते वृद्धिसंज्ञा भवन्ति। [आ] दाक्षिः, [आर्] आर्षम्, ऋषीणामिदम्, 'तस्येदम्'(६।३।१६०) अण्, [ऐ] नायकः, [औ] औपगवः ॥१॥

### गुणोऽरेदोत् ।३।३।२॥ [अर्–एत्–ओत्]

अर्, एत्, ओत्, एते गुणसंज्ञाः स्युः। करोति, चेता, स्तोता ॥२॥

### [1]क्रियार्थो धातुः ।३।३।३॥

वृत्तिः–कृतिः, क्रिया, प्रवृत्तिर्व्यापार इत्येकार्थाः। पूर्वापरीभूता [2]साध्यमानरूपा सा [क्रिया] अर्थो वाच्यं यस्य स शब्दो धातुसंज्ञः स्यात्। भवति, अत्ति, दीव्यति, सुनोति, तुदति, रुणद्धि, तनोति, क्रीणाति, सहति। आयादिप्रत्ययान्तानामपि क्रियार्थत्वाद् [3]धातुत्वम्, [4]गोपायति, [5]कामयते, ऋतीयते, [6]जुगुप्सते, [7]कण्डूयति, [8]पापच्यते, चोरयति, कारयति, चिकीर्षति, पुत्रीयति, अश्वति, [9]श्येनायते, हस्तयते। एवं जुहुतम्भूचुलुम्पादीनामपि। शिष्टप्रयोगानुसारित्वाल्लक्षणस्याऽऽणपयत्यादिनिवृत्तिः, शिष्टज्ञापनाय चेदं लक्षणम्। ननु कृतिः करोत्यर्थः क्रिया, तत्र युक्तं पचादीनां किं करोति? पचति, किं करोति? पठतीति करोत्यर्थमिश्रत्वात् क्रियात्वम्। [13]विद्यतेऽस्तिभवतीनां न युक्तम्। नहि भवति किं करोति? अस्ति भवति वेति। तदयुक्तम्, करोत्यर्थः क्रियाशब्दस्य न प्रवृत्तिनिमित्तं किन्तु कारकव्यापारविशेषः, [10]व्यापारश्च व्यापारान्तराद्भिद्यते, [11]इत्यस्त्याद्यर्थोऽपि क्रियैव। करोत्यर्थस्तु क्रियाशब्दस्य व्युत्पत्तिमात्रनिमित्तमेव। एवं सति कृभ्वस्तयः क्रियासामान्यवचनाः, पचादयस्तु क्रियाविशेषवचना इति सिद्धम्। [12]"यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात्क्रियेति प्रतीयते" ॥३॥

---

अवचूरिः—[1]क्रिया, कृतिः, प्रवृत्तिः, व्यापार इत्येकार्थाः। '[2]साध्यमानं' कोर्थः? साधनायत्तं 'रूपं' स्वरूपं यस्याः सा क्रिया इत्यर्थः। यथा पचति, कः? चैत्रः, किम्? ओदनम्, कैः? काष्ठैः, क्व? स्थाल्याम्, कस्मात्? कुशूलात्, कस्मै? मैत्रायेति भावना। [3]धातुत्वात् त्यादयः प्रत्ययाः परतो भवन्ति। [4]गोपायतीत्यत्र "गुपौधूपविच्छिपणिपनेरायः" (३।४।१)। [5]कामयतेऽत्र "कमेर्णिङ्" (३।४।२)। [6]जुगुप्सते "गुप्तिजोगर्हाक्षान्तौ सन्" (३।४।५)। [7]कण्डूयति "धातोः कण्ड्वादेर्यक्" (३।४।८)। [8]पापच्यते "व्यञ्जनादेरेकस्वरा०" इति (३।४।९) यङ्। पचति, पाक इत्यादौ

प्रकृतिप्रत्ययसमुदाये प्रकृतेः पच् इत्यस्यैव क्रियार्थत्वाऽवगमः । कथमिदम् ? उच्यते अन्वयव्यतिरेकाभ्यां च धातोरेव प्रकृतेः क्रियार्थत्वाऽगमः । तथाहि-अन्वयव्यतिरेकयोर्भावनामाह, पचतीतिप्रयोगे द्वयं श्रूयते-पच् इति प्रकृतिः अतिरिति च प्रत्ययः, अर्थोऽपि विक्लित्तिः, कर्तृत्वमेकत्वमित्यादिकः कोऽपि कोऽपि प्रतीयते इति एकत्रान्वयभावना। पठतीत्युक्ते कश्चिच्छब्दो हीयते, कोऽप्युपजायते, कश्चिदन्वयी । पच्शब्दो हीयते, पठ इति उपजायते, अतिप्रत्ययोऽन्वयी । अर्थोऽपि कोऽपि हीयते, कोऽपि जायते, कोप्यन्वयी । विक्लित्तिर्हीयते, पठिर्जायते; कर्तृत्वमेकत्वं चान्वयि; इति अन्वयव्यतिरेकयोर्द्वयोरप्यवतार इति युक्त्या सर्वत्र पचस्त्यादीनां क्रियार्थत्वाऽवगम ऊहनीयः । [९]श्येन इवाचरति "क्यङ्" (३।४।२६।) इति क्यङ् । [१०]व्यापारश्चेति-चैत्रः पचतीति व्यापारतत्परो न पठति, न याति इति व्यापारान्तरं किमपि न करोति । एवं मंत्रोऽस्तीति मैत्रस्य सत्ता व्यापारो, न चलति, न नश्यतीत्यादि व्यापारान्तराभावः । [११]कारकव्यापारविशेषादेव सर्वस्यापि धातोः क्रियात्वं कल्पनीयम् । [१२]अथ यदि साध्यमानरूपा क्रियेत्युच्यते तर्हि जायतेप्रभृतीनामभूतप्रादुर्भावाद्यर्थानां साध्यमानत्वाभावादनाश्रितक्रमरूपत्वाच्च कथं क्रियात्वमित्याह । यथा पचतीत्यत्र पूर्वापरीभावस्तथा जायतेऽस्ति, भवति, विपरिणमते, वर्द्धते, क्षीयते, विद्यते, संयुज्यते, समवैति, लज्जते, शेते, तिष्ठति, इत्यादिषु आख्यातिकपदाश्रयत्वासाध्यत्वाभिधानेन क्रमरूपाश्रयणात्क्रियात्वं सिद्धयति । ,यावत् सिद्धेत्यत्र विशेषावचूरिः-सिद्धं सत्तादि, असिद्धं घटादि, कारकाश्रयत्वात् इति शेषः । [१३]भवतीनां न युक्तम् इति कोर्थः ? अस्तिभवत्यादिषु सत्ताया नित्यत्वेन साध्यमानत्वाऽभावात् साध्यमानाभावे च पूर्वापरविभगाभावात् पूर्वापरविभागाभावेन क्रियार्थत्वाभावे सति धातुसंज्ञा न प्राप्नोति । सत्यम्, आधेयभेदेन सत्तापि पूर्वापरीभूता साध्यमानरूपा । यथा-सैव देवदत्तसत्ता क्वचिद् गमनयुक्ता, क्वचिद् भोजनयुक्ता, क्वापि पठनयुक्ता । नन्वेवं तर्हि सत्तायाः कया युक्त्या साध्यमानता भविष्यति ? उच्यते, यथा एकस्मिन् स्थाने कस्तूरी पाषाणखण्डमपि विद्यते, ततः कस्तुरीमाहात्म्यात् पाषाणखण्डमपि सुगन्धि भवत्येव । एवमत्राप्येकस्मिन् कस्मिंश्चित् पिण्डे पाकक्रिया सत्ता च पूर्वापरीभूता ततस्तस्या माहात्म्यात् सत्तापि पूर्वापरीभूता भवति इति साध्यमानत्वं भावनीयं सत्तायाः । किं बहुना, आख्यातपदेन उच्यमानः सिद्धभावोऽपि साध्यरूपतां भजति तन्माहात्म्यात् ॥३॥

## न प्रादिरप्रत्ययः ।३।३।४॥

**वृत्तिः**–[१]प्रादिर्धातुर्न स्यात् । *प्रादेः पर एव धातुः । अप्रत्ययः न चेत्ततः प्रत्ययः स्यात् । [२]अभ्यमनायत, [३]प्रासादीयत् । प्रादिरितिकिम् ? [४]अमहापुत्रीयत् । अप्रत्यय इति किम् ? [५]औत्सुकायत । अभिमनाय्यादिः [६]प्रत्ययान्तः [७]सप्रादिः समुदायः क्रियार्थ इति तस्मिन् धातुसंज्ञे प्राप्ते ततः प्रादिनिषेधेन बहिष्क्रियते । [८]ततश्च [९]तत उत्तर एव धातुरिति [१०]तस्या[११]ऽट् [१२]द्वित्वं च भवति ॥४॥

---

अवचूरिः—[१]प्राद्युपसर्गो धातोः प्रागपि न धातुसंज्ञो भवति, कोर्थः? धातोरवयवो न भवतीत्यर्थः । *प्रादेः परेत्यादि-प्राद्युपसर्गेभ्यः परतो भ्वादिः केवल एव सन् धातुसंज्ञो भवति, न प्रादिसहित इति यावत् । [२]अभ्यमनायत-अभिमनस्, अनभिमना अभिमना भवति अभिमनायते "च्व्यर्थे भृशादेः स्तोः" (३।४।२९।) इत्यनेन क्यङ्, अनेनैव सूत्रेण सलुप्यतो "दीर्घश्चियङ्०"(४।३।१०८।) इति दीर्घः, अभिमनाय,ह्यस्तनी–त, ततः "कर्त्तर्यनद्भ्यः शव्" (३।४।७१।) इति धातोः पूर्वम् 'अट्', "लुगस्यादे०" (२।१।११३।) इति अलोपः । [३]प्रासादमैच्छत्, क्यन् ह्यस्तनी । [४]महापुत्रमैच्छत्, क्यन् । [५]औत्सुकायतेति उत्सुकः, अनुत्सुकः उत्सुकोऽभवत् "च्व्यर्थे भृशादेः स्तोः" (३।४।२९।) क्यङ्, ह्यस्तनी-त, "स्वरादेस्तासु" (४।४।३१) इति वृद्धिः, उकारस्य औ, औत्सुकायतेति सिद्धम्, एवं उत्सुकायित्वा । [६]क्यङ्क्यनादिप्रत्ययान्तः । [७]सोपसर्गः । [८]बहिष्करणात् । [९]प्रादेः परत एव । [१०]मूलधातोरेव । [११]अभ्यमनायत इत्यत्र अट् । [१२]अभिमिमनायिषते, अत्र द्विर्वचनं सिद्धम् । तर्हि प्रादेः किं फलम् ? इत्याह-प्रादेश्च उत्तरेण क्त्वाप्रत्ययान्तेन धातुना सह समासो भवति । समासे सति क्त्वास्थाने यप् इति फलम् ॥४॥

[1]अवौ दाधौ दा ।३।३।५।।

वृत्तिः–[2]दा धा इति रूपौ धातू अवानुबन्धौ दासंज्ञौ भवतः। दारूपाश्चत्वारः। धारूपौ द्वौ। दाम्, प्रणिदाता।[3]देंङ्, प्रणिदयते।[4]डुदांग्क्, प्रणिददाति। दोंच्, प्रणिद्यति। ट्धें, प्रणिधयति। प्रणिदधाति। अवाविति किम्? दातम्, अवदातम् ।।५।।

---

अवचूरिः—[1]न विद्यते वोऽनुबंधो ययोस्तौ अवौ। [2]दाम् दाने इति भौवादिकः, १ [3]देंङ् त्रेंङ् पालने इति भौवादिकः,२ [4]डुदांग्क् दाने इत्यदादिः,३ दोंच् छोंच् छेदने इति दिवादिः, एते दासंज्ञा धातवः। तथा 'ट्धें पाने' इति भ्वादिः, 'डुधांग्क् धारणे' इत्यदादिः, एतौ दासंज्ञौ। एवं धातुषट्वृन्दं दासंज्ञं ज्ञेयम्। सूत्रे दाधारूपोपलक्षितस्य दासंज्ञावचनाद् दों, दें, ट्धें इत्येतेषां शिति प्रत्यये परे, दाधारूपाऽभावेऽपि दासंज्ञा सिद्धा। तथा निर्निमित्तत्वेनान्तरङ्गत्वाद् दासंज्ञायां विधेयायां दीङ् धातोरविकरप्रत्ययापेक्षया क्रियमाणे आत्वे दारूपत्वेऽपि बहिरङ्गस्य ओत्वस्य असिद्धत्वान्न दासंज्ञाप्रसंगस्तेनोपावास्तेत्यत्र "इश्च स्थादः" (४-३-४१) इति इत्वं न भवतीत्यर्थः। प्रणिदाता इत्यादिषु प्रणिदधातीतिपर्यन्तेषु दापतपदेत्यनेन(२-३-७९)णत्वम्। देङ् डुदांग् दोंगद् धे? ।।५।।

वर्त्तमाना-तिव् तस् अन्ति, सिव् थस् थ, मिव् वस् मस्; ते आते अन्ते, से आथे ध्वे, एवहे महे ।३।३।६।।

वृत्तिः—इमानि वचनानि वर्तमानासंज्ञानि। वित्करणं "शिदवित्" (४-३-२०) इत्यत्र विशेषणार्थम्। एवमन्यत्रापि। वर्त्तमानाप्रदेशाः "स्मे च वर्त्तमाना" (५-२-१६) इत्यादयः ।।६।।

सप्तमी-यात् याताम् युस्, यास् यातम् यात, याम् याव याम; ईत ईयाताम् ईरन्, ईथास् ईयाथाम् ईध्वम्, ईय ईवहि ईमहि ।३।३।७।।

वृत्तिः—इमानि वचनानि सप्तमीसंज्ञानि स्युः ।। ७ ।।

पञ्चमी–तुव् ताम् अन्तु, हि तम् त, आनिव् आवव् आमव्; ताम् आताम् अन्ताम्, स्व आथाम् ध्वम्, ऐव् आवहैव् आमहैव् ।३।३।८।।

वृत्तिः—इमानि वचनानि पञ्चमीसंज्ञानि स्युः ।। ८ ।।

ह्यस्तनी-दिव् ताम् अन्, सिव् तम् त, अम्व् व म; त आताम् अन्त, थास् आथाम् ध्वम्, इ वहि महि ।३।३।९।।

वृत्तिः—इमानि वचनानि ह्यस्तनीसंज्ञानि स्युः ।। ९ ।।

एताः शितः ।३।३।१०।।

वृत्तिः—एता वर्त्तमानासप्तमीपञ्चमीह्यस्तन्यः शितः शानुबंधा ज्ञेयाः। भवति, भवेत्, भवतु, अभवत् ।। १० ।।

---

अवचूरिः–सर्वत्र "कर्त्तर्यनद्भ्यः शव्" (३-४-७१) इत्यनेन शव् प्रत्ययः। वर्त्तमाना, सप्तमी, पञ्चमी, ह्यस्तनीति एतेषां शानुबंधत्वादिति फलम् ।।१०।।

अद्यतनी-दि ताम् अन्, सि तम् त, अम् व म; त आताम् अन्त, थास् आथाम् ध्वम्, इ वहि महि ।३।३।११।।

वृत्तिः—इमानि वचनान्यद्यतनीसंज्ञानि स्युः ।। ११ ।।

परोक्षा-णव् अतुस् उस्, थव् अथुस् अ, णव् व म; ए आते इरे, से आथे ध्वे, ए वहे महे ।३।३।१२।।

वृत्तिः—इमानि वचनानि परोक्षासंज्ञानि स्युः ।। १२ ।।

आशीः-क्यात् क्यास्ताम् क्यासुस्, क्यास् क्यास्तम् क्यास्त, क्यासम् क्यास्व क्यास्म; सीष्ट सीयास्ताम् सीरन्, सीष्ठास् सीयास्थाम् सीध्वम्, सीय सीवहि सीमहि ।३।३।१३।।

वृत्तिः-इमानि वचनान्याशीःसंज्ञानि स्युः॥१३॥

अवचूरिः-ककारानुबन्धकरणम् 'नामिनो गुणो०' इत्यादिषु विशेषणार्थम् ॥१३॥

**श्वस्तनी-ता तारौ तारस्, तासि तास्थस् तास्थ,तास्मि तास्वस् तास्मस्; ता तारौ तारस्, तासे तासाथे ताध्वे, ताहे तास्वहे तास्महे ।३।३।१४॥**

वृत्तिः—इमानि वचनानि श्वस्तनीसंज्ञानि स्युः ॥१४॥

**भविष्यन्ती–स्यति स्यतस् स्यन्ति, स्यसि स्यथस् स्यथ,स्यामि स्यावस् स्यामस्; स्यते स्येते स्यन्ते,स्यसे स्येथे स्यध्वे,स्ये स्यावहे स्यामहे ।३।३।१५॥**

वृत्तिः—इमानि वचनानि भविष्यन्तीसंज्ञानि स्युः ॥१५॥

**क्रियातिपत्तिः-स्यत् स्यताम् स्यन्, स्यस् स्यतम् स्यत; स्यम् स्याव स्याम; स्यत स्येताम् स्यन्त, स्यथास् स्येथाम् स्यध्वम्, स्ये स्यावहि स्यामहि ।३।३।१६॥**

वृत्तिः—इमानि वचनानि क्रियातिपत्तिसंज्ञानि भवन्ति। क्रियातिपत्तिप्रदेशाः "सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः" (५-४-९-) इत्यादयः॥१६॥

**[1]त्रीणि त्रीण्यन्ययुष्मदस्मदि ।३।३।१७॥**

वृत्तिः—सर्वासां विभक्तीनां त्रीणि त्रीणि वचनान्यन्य[2]स्मिन्नर्थे[3]युष्मदर्थे[4]ऽस्मदर्थे वा वाच्ये यथाक्रमं भवन्ति। अन्यत्वं युष्मदस्मदपेक्षं सन्निधानात्। युष्मच्छब्दोप[5]सृष्टोऽर्थो युष्मदर्थः। तेन भवच्छब्देनोच्यमानो (अर्थः) न युष्मदर्थः। स पचति, तौ पचतः, ते पचन्ति। पचति, पचतः, पचन्ति। स [6]पचते,तौ पचेते,ते पचन्ते। एवं भवान् पचति [7]इत्यादि। युष्मदि त्वं पचसि, युवां पचथः, यूयं पचथ। एवं पचसीत्यादि। एवं त्वं पचसे, युवां पचेथे, यूयं पचध्वे। अस्मदि अहं पचामि, आवां पचावः, वयं पचामः। पचे, पचावहे, पचामहे। एवं सर्वासु। तथा द्वययोगे त्रययोगे च शब्दस्पर्द्धात् पराश्रयमेव वचनं भवति। स च त्वं च पचथ, स चाहं च पचावः, स च त्वं चाहं च पचामः। [9]एहि मन्ये रथेन यास्यसि, नहि यास्यसि यातस्ते पितेति यथाप्राप्तमेव ॥१७॥

अवचूरिः—[1]"वीप्सायाम्" (७-४-८०-) इत्यनेन द्वित्वम्। [2]अन्यस्मिन्नर्थे इत्युक्ते त्यदादिगणः सर्वोऽपि युष्मदस्मदी वर्जयित्वा देवदत्तेत्यादिनामशब्दाश्च ज्ञातव्याः, ततस्त्यदादिभ्यः सर्वेभ्यो वाच्येषु(सत्सु)धातोः परस्त्यादिविभक्तेराद्यं वचनं भवति। [3]युष्मदर्थे वाच्ये सति धातोर्द्वितीयं वचनम्। [4]अस्मदर्थे वाच्ये सति धातोस्तृतीयं वचनं भवतीत्यर्थः। [5]उपसृष्टः संमिलितः। [6]आत्मनेपदं दर्शयति। [7]भवन्तौ पचतः, भवन्तः पचन्ति, पचथः, पचथ। पचामि,पचावः,पचामः। [8]यः परो भवति तत्सम्बन्धि वचनं भवतीति अतिदिश्यते। कथमत्वं त्वं सम्पद्यते त्वद्भवति, अनहमहं संपद्यते मद्भवति, अत्र युष्मदर्थेऽस्मदर्थे वा द्वितीयं तृतीयं वचनं प्राप्नोतीति परपृच्छा। अत्राह-युस्मदस्मच्छब्दयोर्गौणत्वात्। त्वमादेशौ तु शब्दमात्राश्रयत्वाद् भवत एव इति विशेषः पचाम इत्यस्याग्रे ज्ञातव्यः। अत्वं त्वं संपद्यते इति वाक्यमर्थकथनमात्रमिदम्। अन्यथा कृभ्वस्तियोगाभावात् च्विर्न स्यात्। [9]एहि मन्ये इत्यत्र यथाप्राप्तं वचनं युज्यते। तथाहि–प्रहासे परिहासे गम्यमानेऽस्मदर्थस्य प्रतिपत्तिः, अहमेवं मन्ये यत् त्वं रथेन यास्यसि इति लोकप्रसिद्धार्थविषयः प्रकटोऽनुभूयत इत्यस्मदर्थवचनमत्र भवति। रथेन यास्यसि इति साभिप्रायं रथगमनाभिधानात् प्रहासो गम्यते। नहि यास्यसि इत्यनेन परिहासकर्त्रा बहिर्गमनं प्रतिषिध्यते। तथा अनेकस्मिन्नपि परिहासकजने प्रायेणैकमेव प्रति लोकरूढ्या परिहासवचने प्रयोक्तृभावो दृश्यत इति हेतोरस्मदर्थवचनस्यैकवचनमेव घटते। इति युक्त्या मन्ये यास्यसि इति सिद्धम् ॥१७॥

**एकद्विबहुषु ।३।३।१८॥**

वृत्तिः—अन्ययुष्मदस्मदि यानि त्रीणि त्रीणि

वचनान्युक्तानि तान्येकस्मिन्नर्थे एकवचनम्, द्वयोरर्थयोर्द्विवचनम्, बहुष्वर्थेषु बहुवचनमिति युक्त्या भवन्ति। स पचति, तौ पचतः, ते पचन्ति[1]इत्यादि॥१८॥

अवचूरिः—[1]आदिशब्दात् त्वं पचसि, युवां पचथः, यूयं पचथ इति युष्मदर्थे वचनत्रयम्। अहं पचामि, आवां पचावः, वयं पचामः इत्यस्मदर्थे वचनत्रिकम् ॥१८॥

## नवाद्यानि शतृक्वसू च परस्मैपदम् ।३।३।१९॥

वृत्तिः—सर्वविभक्तीनामाद्यानि [1]नव नववचनानि शतृक्वसू च प्रत्ययौ परस्मैपदसंज्ञानि भवन्ति। तिव् तस् अन्ति, सिव् थस् थ, मिव् वस् मस्, इति ६। एवं सर्वासु विभक्तिषु ॥१९॥

अवचूरिः—[1]नवन्शब्दः नकारान्तः। संज्ञिनां बहुत्वादगृहीतवीप्सोपि सूत्रे नवन् शब्दो वीप्सां गमयति एवमुत्तरसूत्रेण (सूत्रेऽपि) इत्यत्र ॥१९॥

## पराणि कानानशौ चात्मनेपदम् ।३।३।२०॥

वृत्तिः—सर्वविभक्तीनां पराणि नव नव वचनानि कानानश्प्रत्ययौ चात्मनेपदसंज्ञानि स्युः। ते आते अन्ते, से आथे ध्वे, ए वहे महे। एवं सर्वविभक्तिषु ॥२०॥

## तत्साप्यानाप्यात्कर्म्मभावे कृत्यक्तखलर्थाश्च ।३।३।२१॥

वृत्तिः—तत्-आत्मनेपदं कृत्यक्तखलर्थाश्च-प्रत्ययाः साप्यात्-सकर्म्मकाद्धातोः कर्म्मणि अनाप्याद्-अकर्मकादविवक्षितकर्मकाच्च धातोर्भावे भवन्ति। कर्म्मणि-क्रियते कटश्चैत्रेण, [1]क्रियमाणः, [2]चक्राणः। भावे-भूयते भवता, भूयमानं (भूयते) भवता। सकर्म्मका धातव अपि अविवक्षितकर्म्माणः [3]कर्त्रैकनिष्ठव्यापारा अकर्म्मका भवन्ति। तेनैषां भावेपि प्रयोगः। [4]क्रियते भवता (भावे)। कृत्यः, कार्यः कटो भवता (कर्मणि) इत्यादि। कार्यं भवता (भावे)। क्त—कृतः कटो भवता(कर्मणि)। खलर्थः—सुकरः कटो भवता (कर्मणि)। सुकरं भवता (भावे)। सुकटंकराणि वीरणानि। सुज्ञानं तत्त्वं मुनिना ॥२१॥

अवचूरिः-[1]क्रियते इति क्रियमाणः, "शत्रानशावेष्यति तु सस्यौ (५।२।२०।) इत्यनेन आनश्, "क्यः शिति (३।४।७०) (इति क्यः,) रिःशक्याशीर्ये (४।३।११०।) इति रिः, "अतो म आने" (४।४।११४) इति मोन्तः, क्रियमाण इति सिद्धम्। तथा [2]चक्रे (इति) चक्राणः। "तत्र क्वसुकानौ तद्वत्' (५।२।२।)इत्यनेन कानप्रत्ययः, 'द्विर्धातुः परोक्षा०'(४।१।१।)इति द्विर्वचनं, ऋतोत् (४।१।३८।) (इतिअत्) कङश्चञ् (४।१।४६।) इति च। अत्र आत्मनेपदमित्युक्ते आनश्कानौ ज्ञेयाविति तयोः प्रयोगः। [3]एकत्र निष्ठा पर्यवसानं यस्य व्यापारस्य स एकनिष्ठः, कर्त्रा कृत्वा एकनिष्टः कर्त्रैकनिष्टः, कर्त्रैकनिष्टो व्यापारो येषां धातूनां ते। [4]मृदु पच्यते भवता इत्यपि ज्ञेयं, पञ्चवारान् भुज्यते भवता इत्यपि। क्रियते स्म (इति) कृतः कटो भवता इति कर्मणि। अथ भावे कृतं भवता, शयितं भवता। तथा केचिद् वैयाकरणाः सकर्मकादपि धातोः क्लीबे भावे क्तप्रत्ययमिच्छन्ति तन्मते ग्रामं गतं भवता, ओदनं भुक्तं भवता इति। कुर्यादिति कार्यः, "ऋवर्णव्यञ्जनाद् ध्यण्"। एवं कर्त्तव्यः कटो भवता, करणीयः कटो भवता, कृत्यः कटो भवता, देयः कटो भवता, सर्वत्र कुर्यादिति वाक्यम्। एवं शयितव्यं भवता, शयनीयं भवता, शेयं भवता, कार्यं भवतेत्यादिप्रयोगाः भावे। अविवक्षितकर्मत्वाद् भावे प्रयोगाः कार्यम्, कर्त्तव्यम्, करणीयमित्यादयः। सुखेन क्रियत इति सुकरः, "दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल्" (५।३।१३९।) इत्यनेन भावकर्मणोः खल्। सुखेनानायासेन अकटः कटः क्रियन्त इति सुकटंकराणि, "च्व्यर्थे कर्त्राप्याद् भूकृगः" (५।३।१४०) इत्यनेन खल्, "खित्यनव्ययारूषो मोन्तश्च" (३।२।११) इति मोन्तः। तथा सुज्ञायते इति सुज्ञानम्, "शासयुधदृशिधृषिमृषातोऽनः" (५।३।१४१।) इति अनप्रत्ययो भावे कर्मणि च ॥२१॥

## [2]इङितः [1]कर्त्तरि ।३।३।२२॥

वृत्तिः—इदितो ङितश्च धातोः कर्त्तर्यात्मनेपदं स्यात्। इदित्-(एधि वृद्धौ) एधते, एधमानः। ङित्-(शीङ् शये) शेते, [3]महीयते, महीयमानः, कामयते, (कर्मणिङ् ३-४-२) पापच्यते। एभ्य एव कर्त्तरीति [4]नियमार्थमिदम् ॥२२॥

अवचूरिः—[1]कर्त्तरीत्यधिकारः पादान्तं यावत् सर्वसूत्रेषु ज्ञातव्यः । [2]इदित इकारानुबन्धात्, ङितो ङकारानुबन्धात् । "[3]महीङ् पूजायां वृद्धौ च" महीधातोः "कण्ड्वादेर्यक्" (३-४-८-) इति यक् प्रत्ययः । [4]वक्ष्यमाण"सति" (५-२-१९-) इत्यादिसूत्रैः परस्मैपदात्मनेपदविशेषरहितानां सामान्येन वर्त्तमानादिविभक्तीनां विधानादात्मनेपदे सिद्धेऽपि "इङित" इति नियमार्थं कृतम् । प्रत्ययनियमश्चायम् । इङित एव कर्त्तर्यात्मनेपदं भवति । एभ्यः-इङित्धातुभ्य आत्मनेपदमेव न प्रत्ययान्तरं स्यादिति विपरीतनियमो न भवति, "इङितो व्यञ्जनाद्यन्तात्" (५-२-४४-)इत्यादिना सूत्रेण अनप्रत्ययस्य करणात् । तथा इङित्धातोः कर्त्तर्येव आत्मनेपदमित्यपि विपरीतनियमो न कल्पनीयः, तत्साप्यानाप्येऽस्यनेन व्यक्त्यात्मनेपदप्रवृत्तेः ॥२२॥

## क्रियाव्यतिहारेऽगतिहिंसाशब्दार्थहसो—ह्रुवहश्चानन्योन्यार्थे ।३।३।२३॥

वृत्तिः—क्रियाव्यतिहारेऽर्थे वर्त्तमानाद् गतिहिंसाशब्दार्थहसवर्जिताद्धातोर्ह्रवहिभ्यां च "कर्त्तर्यात्मनेपदं" स्यात्, न त्वन्योन्येतरेतरपरस्परशब्दयोगे। व्यतिलुनते, व्यतिहरन्ते, व्यतिवहन्ते भारं, संप्रहरन्ते राजानः, संविवहन्ते वर्गैः । व्यतिहार इति किम् ? लुनन्ति। क्रियेति किम् ? द्रव्यव्यतिहारे मा भूत्, चैत्रस्य धान्यं व्यतिलुनन्ति, चैत्रेण यद् गृहीतं धान्यं पुरस्तात् तल्लवनेनोपसंगृह्णन्तीत्यर्थः । गत्यादिवर्जनं किम् ? व्यतिगच्छन्ति,व्यतिहिंसन्ति, व्यतिपठन्ति, व्यतिजल्पन्ति, व्यतिहसन्ति । अनन्योन्यार्थ इति किम् ? अन्योन्यस्य व्यतिलुनन्ति । एवं इतरेतरस्य, परस्परस्य लुनन्ति । क्रियाव्यतिहारो व्यतिनैव द्योतित इत्यन्योन्यादिभिस्तत्कर्माभिसम्बद्ध्यते,यथान्योन्यस्य केदारं व्यतिलुनन्तीति। कर्त्तरीत्येव- तेन भावकर्मणोः [1]पूर्वेणैवात्मनेपदं स्यादने[2]न मा भूत् ॥२३॥

अवचूरिः—केनापि कर्तुं वाञ्छितायाः क्रियाया अन्येन करणं क्रियाव्यतिहार उच्यते । व्यतिलुनते, कोऽर्थः ? केनापि लवनादिकं वाञ्छितमपरो लवनादिकमुद्यमतया करोतीत्यर्थः । एवं व्यतिहरन्ते, व्यतिवहन्ते इत्यस्याप्यर्थः । "प्वादेर्ह्रस्वः" (४-२-१०५-) अनेन लू इत्यस्य लु, "श्नश्चातः" (४-२-९६) इत्यनेन श्नाआकारस्य लुक् । क्रियाव्यतिहारः प्रायेण व्यतिपूर्वकेनैव धातुना द्योत्यते । क्वापि अन्योपसर्गायाम् । अत एव संप्रहरन्ते संविवहन्त इत्यत्र समृद्र० (?) समतिउपसर्गाभ्यामुदाहृदयतेऽत्र शिष्टप्रयोगानुसारो हेतुः । अनेकार्थत्वाद् धातूनां वहिरत्र गत्यर्थो ज्ञेयः । व्यावृत्तौ व्यतिलुनन्ति अत्र लुनातिरुपसंग्रहात्मके लवने वर्तते, उपसंग्रहस्य लवनपूर्वकलाभस्य आत्मा यस्मात् लवनात्, कोऽर्थः ? लवनपूर्वकमादानमित्यर्थः । इत्यस्या व्यावृत्याः परमार्थो वृत्तिकारेण चैत्रेण यद् गृहीतमित्याद्यक्षरैर्दर्श्यते । विअतिउपसर्गाभ्यां क्रियाव्यतिहारो व्यतिनैव प्रद्योतितः ततोऽन्योऽन्यादिशब्दाः क्व प्रयुज्यन्ते ? इत्याह अन्योन्यादिभिरिति । तत्कर्म कोर्थः ? क्रियाव्यतिहारे कर्मकेदारे लवनं व्यापारमभिसंबध्यते, संयोज्यते इत्यर्थः । [1]"तत् साप्यानाप्याद्०"(३-३-२१-)इत्यनेन । [2]अनेन मा भूत् इत्यक्षराग्रे यदि हि क्रियाव्यतिहारेऽगतीत्यनेनात्मनेपदं भावकर्म्मणोरपि स्यात् तदा व्यतिगम्यते ग्रामः, व्यतिहन्यन्ते दस्यवः इत्यत्र"(अ)गतिहिंसाशब्दार्थहस०" इति प्रतिषेधबलादात्मनेपदं न स्यादित्यक्षराणि ज्ञातव्यानि ॥२३॥

## निविशः ।३।३।२४॥

वृत्तिः—निपूर्वाद्विशः"कर्त्तर्यात्मनेपदं" भवति। निविशते, न्यविशत इत्यटो (अडागमस्य) धात्ववयवत्वान्न व्यवधायकत्वम् । [1]मधुनि विशन्ति भृङ्गा अत्र निविशोरसंबन्धादनर्थकत्वाच्च नात्मनेपदम् ॥२४॥

अवचूरिः—नेः [1]परो विश् निविश्, तस्मात्, नि इत्यस्य विश् इत्यस्य चोभयोः सम्बन्धाभावात् ॥२४॥

## उपसर्गादस्योहो वा ।३।३।२५॥

वृत्तिः—उपसर्गात्पराभ्यामस्यत्यहिभ्यामात्मनेपदं वा स्यात् । विपर्यस्यते,विपर्यस्यति,समूहते,समूहति । अस्यतेरप्राप्ते ऊहेश्च नित्यं प्राप्ते उभयत्र विभाषेयम् ॥२५॥

अवचूरिः—उपसर्गादस्यचेतिसूत्रेऽस्यति दैवादिकः 'असूच् क्षेपणे' इति गृह्यते,"दिवादेः श्यः"(३-४-६२-)इति श्यनिर्देशात् । तेन 'असक् भुवि' इत्यदादिः, 'असी असी गत्यादानयोश्च' इति भ्वादिर्न गृह्यते ॥२५॥

## उत्स्वराद्युजेरयज्ञतत्पात्रे ।३।३।२६॥

वृत्तिः—उदः स्वरान्ताच्चोपसर्गात्परात् युनक्तेरात्मनेपदं स्यात्, यदि यज्ञे यत्तत्पात्रं तद्विषयो युज्यर्थो न स्यात्। उद्युङ्क्ते उपयुङ्क्ते। उत्स्वरादिति किम् ? द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति ॥२६॥

अवचूरिः—उत्स्वराद्युजेरितिसूत्रे 'युजृंपी योगे' इति रुधादिधातुर्गृह्यते, न 'युंजिच् समाधौ' इति दैवादिकोऽस्य इदित्त्वादात्मनेपदं सिद्धमेवास्ति। युजृंपी योगेऽस्य ईदित्त्वात् फलवति कर्त्तरि आत्मनेपदे सिद्धेऽपि अफलवति कर्त्तरि आत्मनेपदसिद्ध्यर्थमुत्स्वरादिति सूत्रं कृतम्। "युजृंपी योगे" उद्युङ्क्ते इत्यादिषु "श्नास्त्योर्लुक्" (४-२-९०-) इत्यनेन श्नसम्बन्धिनोऽकारस्य लुक् ॥२६॥

## परिव्यवात् [1]क्रियः ।३।३।२७॥

वृत्तिः—परि, वि, अव (इत्येतेभ्य) उपसर्गेभ्यः परात् क्रीणातेरात्मनेपदं स्यात्। परिक्रीणीते, [2]विक्रीणीते, अवक्रीणीते। उपसर्गादित्येव उपरि क्रीणाति,[3]बहुवि क्रीणाति वनम्, [4]अपचाव क्रीणीवः ॥२७॥

अवचूरिः—[1]परिव्यवात्क्रियः, अत्र इयादेशविषये युक्तिर्लिख्यते— क्रीइत्यनुकरणमनुकार्येणार्थेन कृत्वाऽर्थवत् सार्थकम्"अधातुविभक्तिवाक्यमर्थवन्नाम"(१।१।२७) इति वचनादर्थवच्छब्दो नामसंज्ञं भवति। नामसंज्ञत्वात् क्रीरूपानुकरणात् स्यादिङसिः, "प्रकृतिवदनुकरणम् इति न्यायाद्धातुकार्यम् इयादेशः सिद्धः। वत् करणात् सर्वथा धातुत्वाभावादनुकरणान्न त्यादयः। प्रकृतिवदनुकरणमिति ज्ञापकादेव अनुकरणे प्रकृतिवत् कार्यं भवति। तेन मुनी इत्याह द्विःपचतीत्याह इत्यादौ"ईदूदेद् द्विवचनम्" (१।२।३३।) इत्यनेन प्रकृतिभावः (असन्धिरित्यर्थः)। "सुचो वा"(२।३।१०१)इत्यनेन षत्व-विकल्पः,'घुटस्तृतीयः' (२।१।७६।) इति षस्य डत्वमपि न भवति, विधानसामर्थ्यात्। सर्वत्र 'ईगितः' (३।३।९५।) इत्यनेन ईगितो धातोः फलवति कर्त्तर्यात्मनेपदं सिद्धमेवास्ति परमफलवत्यर्थे आत्मनेपद-सिद्धये योगोऽयम्। अत एव व्यावृत्त्युदाहरणेषु सर्वत्र परस्मैपदम्। "[2]क्र्यादेः"(३।४।७९।) इत्यनेन श्ना। एषामीर्व्यञ्जनेऽदः (४।२।९७।) इति ईकारः। [3]बहवो वयः पक्षिणो यत्र वने तद् बहुवि वनम्। [4]अपचाव- ह्यस्तनी, "मव्यस्याः" (४।२।११३।) इति अकारस्य आ ॥२७॥

## पराव्रेर्जेः ।३।३।२८॥

वृत्तिः—पराविपराज्जयतेः "कर्त्तर्यात्मनेपदं" स्यात्। पराजयते, विजयते। उपसर्गादित्येव सेना परा जयति, बहुवि जयति वनम् ॥२८॥

## [1]समः क्ष्णोः ।३।३।२९॥

वृत्तिः—समः परात् क्ष्णोतेरात्मनेपदं स्यात्। संक्ष्णुते शस्त्रम् ॥२९॥

अवचूरिः—[1]ननु "समोगमृच्छि०" (३-३-८४-) इत्यत्र क्ष्णुग्रहणं क्रियतां किमत्र पृथगारम्भेण ? नैवं, समोगमी(मि)त्यत्र कर्मण्यसति आत्मनेपदविधिः,इह तु सकर्मणोऽपि भवति इति भावः ॥२९॥

## अपस्किरः ।३।३।३०॥

वृत्तिः-अपपूर्वात् किरतेः सस्सट्कात्कर्त्तर्यात्मनेपदं स्यात्। अपस्किरते वृषभो हृष्टः,अपस्किरते कुक्कुटो भक्ष्यार्थी,अपस्किरते श्वा आश्रयार्थी। सस्सटादित्येव अपकिरति वृषभः ॥३०॥

अवचूरिः-"अपाच्चतुष्पात्पक्षिशुनि हृष्टान्नाश्रयार्थे" (४।४।९५।) इति स्सट्। स्त्रियमाणः सन् (?) ॥३०॥

## उदश्चरः साप्यात् ।३।३।३१॥

वृत्ति —उत्पूर्वाच्चरतेः साप्यात् (कोऽर्थः ?) सकर्मकात्कर्त्तर्यात्मनेपदं स्यात्। मार्गमुच्चरते,व्युत्क्रम्य गच्छतीत्यर्थः। [1]ग्रासमुच्चरते, उद इति किम् ? चारं चरति। साप्यादिति किम ? धूम उच्चरति–ऊर्ध्वं गच्छतीत्यर्थः ॥३१॥

अवचूरिः— ग्रासमुच्चरते भक्षयतीत्यर्थः, पशुभक्ष्यं गतिविशेषं वा ।।३१।।

## समस्तृतीयया ।३।३।३२।।

वृत्तिः—समः पराच्चरतेस्तृतीयान्तेन योगे सति कर्त्तर्यात्मनेपदं स्यात् । अश्वेन संचरते,रथेन सञ्चरते तृतीययेति किम् ?"[1]उभौ लोकौ सञ्चरसि[2] इमं[3] चामुं च देवल[4]" (देवल=नारद) ।।३२।।

अवचूरिः—[1]मनुष्यस्वर्गलोकौ।[2]अयं लोकः।[3]परलोकः। [4]हे नारद ! ।।३२।।

## क्रीडोऽकूजने ।३।३।३३।।

वृत्तिः—कूजनमव्यक्तशब्दस्ततोऽन्यस्मिन्नर्थे संपूर्वात् क्रीडेः कर्त्तर्यात्मनेपदं स्यात् । संक्रीडते, संक्रीडमानः, रमते इत्यर्थ । अकूजन इति किम् ? संक्रीडन्ति शकटानि, अव्यक्तं शब्दं कुर्वन्तीत्यर्थः ।।३३।।

अवचूरिः—व्यक्तशब्देर्थे (?) ।।३३।।

## अन्वाङ्परेः ।३।३।३४।।

वृतिः—अन्वाङ्परिपरात् क्रीडेः कर्त्तर्यात्मनेपदं स्यात् । अनुक्रीडते , आक्रीडते,परिक्रीडते। उपसर्गेभ्य इति किम् ? माणवकमनुक्रीडति [ 'हेतुसहार्थेऽनुना' (२-२-३८) इति द्वितीया ] माणवकेन सह क्रीडतीत्यर्थः ।।३४।।

## शप उपलम्भने ।३।३।३५।।

वृत्तिः—[1]उपलम्भनेऽर्थे शपतेः कर्त्तर्यात्मनेपदं स्यात् । मैत्राय शपते । उपलम्भन इति किम् मैत्रं शपति, आक्रोशतीत्यर्थः ।।३५।।

[1]उपलम्भनं–प्रकाशनं, ज्ञापनमित्यर्थः । मैत्राय शपते ['श्लाघ-ह्नु-स्था-शपा प्रयोज्ये' (२-२-६०) इति चतुर्थी] इति कोर्थः ? मैत्रं मैत्रस्य वा किंचिदर्थं बोधयति ज्ञापयतीत्यर्थः। अथवा स्वाभिप्रायस्य परस्याग्रे आविष्करणं प्रकटनमुपलम्भनमुच्यते । शपथः कृत्वा परप्रत्यायनमिति यावत् । मैत्राय शपते इति कोऽर्थः ? वाचा शरीराङ्गस्पर्शनेन वा मैत्रं स्वाभिप्रायं संबोधयति । गुरुं शपथामि इति वाचा । तवाङ्गमिदं पादौ वा स्पृशामि यदहं अमुकं कार्यं करोमि करिष्यामीतिशपथैः परं प्रत्याययतीति द्वितीयोऽर्थः । अथवा प्रोषितस्य देशान्तरगतस्य भावाभावोपलब्धौ कस्यचिदर्थस्यानुरूपस्य यद् विधानं तत् उपलम्भनमुच्यते । मैत्राय शपते इति कोर्थः? प्रोषितमैत्रस्य भावेऽभावे वा स्वरूपे ज्ञाते सति भावाभावविषयानुरूपां कामपि चेष्टां परस्याग्रे दर्शयतीत्यर्थः । इति तृतीयोऽर्थः। उपलम्भनं-प्रकाशनं, शपथो वा इति ।।३५।।

## आशिषि नाथः ।३।३।३६।।

वृत्तिः—आशिष्येवार्थे नाथतेः कर्त्तर्यात्मनेपदं स्यात् । सर्पिषो नाथते, सर्पिर्मे भूयादित्याशास्ते इत्यर्थः । आशिष्येवेति नियमः किम् ? याञ्चायां मा भूत् , मधु नाथति ।।३६।।

अवचूरिः— नाथृङ् उपतापैश्वर्याशीःषु च इत्यत्र ङितः *करणमनप्रत्ययस्य विधानार्थम् ।।३६।।

## भुनजोऽत्राणे ।३।३।३७।।

वृत्तिः—त्राणात् पालनादन्यस्मिन्नर्थे भुनक्तेः कर्त्तर्यात्मनेपदं भवति । ओदनं भुङ्क्ते,उपभुङ्क्ते। अत्राण इति किम् ? पृथिवीं भुनक्ति ।।३७।।

अवचूरिः—सूत्रे भुनज् इति श्ननिर्देशो "भुजोंत् कौटिल्ये" इति तौदादिकभुजधातोर्निवृत्त्यर्थः । ननु "निरनुबन्धग्रहणे न सानुबन्धस्ये" तिन्यायादेव तुदादिभुजो (ग्रहणं) न भविष्यति ? सत्यम्, व्यक्तिव्याख्याने स्यात्, अथवा न्यायानामप्यनित्यत्वात् । भुजतौदादिकस्य ओष्ठौ निर्भुजति कुटिलयतीत्यर्थः । परिभागेऽर्थे(?) "रुधां स्वराच्श्नो न लुक् च" (३-४-८२-) इत्यनेन धातुविचाले (?) श्न श्नास्त्योर्लुक् (४-२-९०-) इत्यनेन श्न इत्यस्याकारलोपः । पालयतीत्यर्थः ।।३७।।

## हृगो [1]गतताच्छील्ये ।३।३।३८।।

वृत्तिः—हृतेर्गतताच्छील्येर्थे प्रकारताच्छील्येऽर्थे कर्त्तर्यात्मानेपदं स्यात् । पैतृ[3]कमश्वा अनुहरन्ते, "क्रियाविशेषणाद्" (२-२-४१-) इत्यनेन

*"ङितो व्यञ्जनाद्यन्तात्" [ १।२।४४ ]इत्यनेन सूत्रेण ।

श्रम, मातृकं गावोऽनुहरन्ते, एवं पितुरनुहरते, [१]मातुरनुहरते, पितरमनुहरते, मातरमनुहरते । यद्वा[४] गतेन गमेन ताच्छील्यम् गतताच्छील्यम्, गतताच्छील्ये वर्त्तमानाद्धरतेरात्मनेपदं ( भवति ) । पैतृकमश्वा [५]अनुहरन्ते, पितुरागतं गमनमविच्छेदेन शीलयन्तीत्यर्थः । अथवागते-गमने ताच्छील्ये च वर्त्तमानाद्धरतेरात्मनेपदं, पैतृकमश्वा अनुहरन्ते, [६]तद्वद् गच्छन्ति । गतग्रहणं किम् ? [७]पितुर्हरति । ताच्छील्यमिति किम्? [८]नटो राममनुहरति ॥३८॥

अवचूरिः– [१]गम्यते-ज्ञायते सदृशतया कर्म(इति) व्युत्पत्त्या सादृश्यं-गतम् । गतं च तद् गतेन वा ताच्छील्यं गतताच्छील्यं, तस्मिन् । गतं, प्रकारः, सादृश्यमनुकरणमित्येकोऽर्थः । तत् शीलमस्य तच्छीलः, तच्छीलस्य भावस्ताच्छील्यम्, कोऽर्थः? उत्पत्तेः प्रभृत्याविनाशात् तत्स्वभावत्वेत्यर्थः। यद्वा[४]इत्यादि-गमनं गतमुच्यते । तस्य पित्रादेः शीलमस्य तच्छीलः, तच्छीलस्य भावस्ताच्छील्यम् । ततो गतेन-गमनेन कृत्वा ताच्छील्यं, तस्मिन् । [२]एवं पितुरनुहरते, पितरमनुहरते इत्यपि ज्ञातव्यम् । शब्दशक्तिस्वाभाव्यादनूपसर्गपूर्वक एव हरतिधातुर्गतताच्छील्येऽर्थे वर्त्तत इति उदाहरणे "अनुहरते" इति दर्शितम् । [३]पितुरागतं पैतृकम्, मातुरागतं मातृकं, "ऋत इकण्" ( ६-३-१५२- ) इति इकण्, "ऋवर्णोवर्णदोसिसुसशश्वदकस्मात्त इकस्येतो लुक्" ( ७-४-७१ ) इत्यनेन इकण इकारलोपः कोऽर्थः ? पितुरागतं, मातुरागतं गुणविषयं क्रियाविषयं वा सादृश्यमविकलमश्वा गावः ( वा ) शीलयन्ति, प्रकटयन्तीत्यर्थः । तथा "[१]मातुरनुहरते, पितुरनुहरते' अत्र कथं षष्ठी ? उच्यते, प्रकारानुकारसादृश्यानामेकार्थ्येऽपि शब्दशक्तिस्वाभाव्यात् सादृश्ये कर्म नास्ति इति हेतोः पितुरनुहरते, मातुरनुहरते अत्र संबन्धे षष्ठी भवति । यत्र तु पैतृकं, मातृकमिति द्वितीया तत्र प्रकारानुकारार्थो विवक्षित इति भावः । एवं पितुरनुहरते, पितरमनुहरते, इत्यपि ज्ञेयम् । [६]तद्वद् गच्छन्ति, कोऽर्थः ? पितुरागतं यथा भवत्येवं गच्छन्ति, पितृवद् गच्छन्तीत्यर्थः । अथवा तद्वच्छीलन्तीत्यर्थः । पितृवदाचरन्ते सैर्वमिति भावः । व्यावृत्त्युदाहरणे [७]पितुर्हरति, कोऽर्थः ? चोरयतीत्यर्थः । ताच्छील्यमात्रमत्राप्यस्ति चोरस्वभावात्तस्यातत्सादृश्यगतं वहिः (?) । [८]नटो हि किञ्चिदेव (कञ्चिदेव) कालं राममनुहरति-राममनुकरोति, न सर्वकालमिति न भवति ॥३८॥

## पूजाचार्यकभृत्युत्क्षेपज्ञानविगणनव्यये नियः ।३।३।३९॥

वृत्तिः—पूजाचार्यकादिषु गम्यमानेषु नयतेः कर्त्तर्यात्मनेपदं स्यात् । पूजा, [१]नयते विद्वान् स्याद्वादे । [२]आचार्यकम्, [३]माणवकमुपनयते । [४]भृतिर्वेतनम्, कर्मकरानुपनयते ।[५]उत्क्षेप ऊर्ध्वं नयनम्,शिशुमुदानयते, उत्क्षिपतीत्यर्थः, उत्पाटयति वा । [७]ज्ञानम्, नयते तत्त्वार्थे।[८]विगणनम्,मद्राः कारं विनयन्ते ।[९]व्ययः, शतं विनयते । [१०]णित्वादफलवदर्थ आरंभः ॥३९॥

अवचूरिः–"[१]नयते विद्वान् स्याद्वादे," कोऽर्थः? विद्वान् प्रमाणव्यापारवित् स्याद्वादे—जिनशासनविषये जीवादीन् पदार्थान् युक्तिभिः स्थिरीकृत्य शिष्यबुद्धिं प्रापयति, शिष्या युक्तिभिः स्थिरीकृताः पूजिता भवन्तीति पूजा गम्यते । [२]तथा "आचार्यस्य भावः कर्म वा आचार्यकम्", "योपान्त्याद्गुरूपोत्तमादसुप्रख्यादकञ्" ( ७-१-७२ ) इति सूत्रेण अकञ् । [३]माणवकमुपनयतेऽस्य कोऽर्थः ? स्वयमाचार्यो भवन्माणवकं छात्रमध्ययनायात्मसमीपं प्रापयतीत्यर्थः । [४]तथा भृतिर्वेतनं, कर्मकरानुपनयते, वेतनेनात्मसमीपं प्रापयतीत्यर्थः । [५]उत्क्षेपः ऊर्ध्वं नयनम्, शिशुमुदानयते, उत्क्षिपतीत्यर्थः, उत्पाटयति वा । तथा [७]ज्ञानं ज्ञेयपदार्थनिश्चयः, नयते तत्वार्थे, तत्वार्थविषये ज्ञानं प्रकाशयतीत्यर्थः । [८]विगणनमृणादेः शोधनं, मद्राः कारेति ( कारं विनयन्ते इति ) मद्राः-मद्रदेशजा नरा राजग्राह्यं भागं दानेन शोधयन्तीत्यर्थः । [९]व्ययो धर्मादिषु द्रव्यव्यापारणम्, शतं विनयते, धर्मादिकार्ये तीर्थादिषु शतसहस्रद्रव्याणि व्यापारयतीत्यर्थः [१०]णीधातोर्णकारानुबन्धत्वादात्मनेपदे ★ सिद्धेऽपि ॥३९॥

## कर्तृस्थामूर्त्ताप्यात् ।३।३।४०॥

वृत्तिः–कर्तृस्थममूर्त्तमाप्यं कर्म यस्य नयतेः तस्मान्नयतेः कर्त्तर्यात्मनेपदं स्यात् । श्रमं विनयते, क्रोधं-

★ णीधातोर्णकारानुबन्धत्वादात्मनेपदे सिद्धेऽपि "पूजाचार्य" इत्यादि सूत्रारम्भोऽफलवदर्थं इत्यर्थः ।

विनयते, शमयतीत्यर्थः । कर्तृस्थ इति किम् । चैत्रो मैत्रस्य मन्युं शोकं वा विनयति । अमूर्तेति किम् ? गडुं विनयति । आप्येति किम् ? बुद्धया विनयति ॥४०॥

## शदेः शिति ।३।३।४१॥

वृत्तिः—शदेः शिद्विषयात्कर्त्तर्यात्मनेपदं स्यात् । शीयते । शितीति किम् ? शत्स्यति ॥४१॥

अवचूरिः-'शीयते',शद्लृं शातने, वर्त्तमाना, शव्, श्रौतिकृधु. ( ४-२-१०८ ) इत्यादिना शीय इत्यादेशः ॥४१॥

## म्रियतेरद्यतन्याशिषि च ।३।३।४२॥

वृत्तिः—म्रियतेरद्यतन्याशीर्विषयात्शिद्विषयाच्च कर्त्तर्यात्मनेपदं स्यात् । [1]अमृत, मृषीष्ट, म्रियते । तिव्निर्देशाद् यङ्लुपि न भवति, मर्म्मर्त्ति ॥४२॥

अवचूरिः—मृंङ् प्राणत्यागे, [1]मृ, अद्यतनीत, सिच्, 'धुड्ह्रस्वाल्लुगनिटस्तथोः' ( ४-३-७० ) इति सिच् लुप्यते, म्रियतेऽत्र वर्त्तमानाते, "तुदादेः शः" ( ३।४।८१ ) इति शः, "रिः शक्याशीर्ये"( ४।३।११० ) इति ऋकारस्य रिः, 'धातोरिवर्णो०' ( २।१।५० ) इति इय्, एवं म्रियते, म्रियताम्, अम्रियत ॥४२॥

## क्यङ्षो नवा ।३।३।४३॥

वृत्तिः—क्यङ्षन्ताद्धातोः कर्त्तर्यात्मनेपदं वा स्यात् । पटपटायते, पटपटायति, निद्रायते, निद्रायति ॥४३॥

अवचूरिः—पटत (?) अपटत् पटद्भवति ( इति- पटपटायते ) "अव्यक्तानुकरणादनेकस्वरात् कृभ्वस्तिनानितौ द्विश्च" (७।२।१४५) इति सूत्रेण डाच् द्विर्वचनं च, 'पटत्-पटत्, 'डाच्यादौ' (७।२।१४९) इत्यनेनाभ्यासेऽत् लुप्यते , 'डित्यन्त्यस्वरादेः' ( २।१।११४ ) इति अन्त्यस्वरादिलोपः, 'डाच्लोहितादिभ्यः षित्' ( ३।४।३० ) इति क्यङ्, स च 'षित्' । अनिद्रा निद्रा भवति, अत्राप्यनेन क्यङ् ॥४३॥

## द्युद्भ्योऽद्यतन्याम् ।३।३।४४॥

वृत्तिः—द्युतादिधातुभ्योऽद्यतनीविषये कर्त्तर्यात्मनेपदं वा स्यात् । व्यद्युतत्, व्यद्योतिष्ट, अरुचत्, अरोचिष्ट ॥४४॥

अवचूरिः—बहुवचनं गणार्थम् । द्युति[1] रुचि[2] घुटि[3] रुटि[4] लुटि[5] लुठि[6] श्विताङ्[7] ञिमिदाङ्[8] ञिक्ष्विदाङ्[9] ञिष्विदाङ्[10] शुभि[11] क्षुभि[12] णभि[13] तुभि[14] स्रम्भूङ्[15] भ्रंशूङ्[16] ध्वंसूङ्[17] ध्वसूङ्[18] वृतूङ्[19] स्यन्दौङ्[20] वृधूङ्[21] शृधूङ्[22] कृपौङ्[23] एते द्युतादिधातवः । द्युतादिगणप्रान्ते वृतादिधातुपञ्चकः ( ? कं )ज्ञातव्यम् । द्युतादिभ्य आत्मनेपदे प्राप्तेऽपि विभाषेयम् व्यद्युतत् ( इति ) अत्र "लृदिद्युतादिपुष्यादेः परस्मै" ( ३।४।६४ ) इति अङ्, एवमरुचत् ॥४४॥

## वृद्भ्यः स्यसनोः ।३।३।४५॥

वृत्तिः—वृतादेः पञ्चतः स्यकारादिप्रत्ययविषये सन्प्रत्ययविषये च कर्त्तर्यात्मनेपदं वा स्यात् । वर्त्स्यति, वर्तिष्यते, विवृत्सति, विवर्तिषते ॥४५॥

अवचूरिः—बहुवचनं गणार्थम् ।(वृद्भ्यः)स्यसनोः (इति) इदम् नित्यमेवात्मनेपदे प्राप्तेऽपि, विभाषार्थं कृतम् । वृतूङ्, वर्त्स्यति, वर्तिष्यते, अवर्त्स्यत्, अवर्तिष्यत, वर्त्स्यन्, वर्तिष्यमाणः,विवृत्सति,विवर्तिषते । एवं स्यन्दौङ्,स्यन्त्स्यति, स्यन्दिष्यते सिस्यन्त्सति, सिस्यन्दिषते । वृधूङ्, वर्त्स्यति, वर्द्धिष्यते, विवृत्सति, विवर्द्धिषते । तथा शृधूङ्, शर्त्स्यति, शर्द्धिष्यते, शिशृत्सति, शिशर्द्धिषते । कृपौङ्, कल्प्स्यति, कल्पिष्यते, चिक्लृप्सति, चिकल्पिषते । इति वृताद्युदाहरणावली ॥४५॥

## कृपः श्वस्तन्याम् ।३।३।४६॥

वृत्तिः—कृपेः श्वस्तनीविषये कर्त्तर्यात्मनेपदं वा स्यात् । कल्प्तासि, कल्पितासे ॥४६॥

## क्रमोऽनुपसर्गात् ।३।३।४७॥

वृत्तिः—उपसर्गवर्जितात् क्रमेः कर्त्तर्यात्मनेपदं वा स्यात् । क्रमते, क्रामति, "क्रमो दीर्घः परस्मै" ( ४ २।१०९ ॥ इति दीर्घः ) अनुपसर्गादिति किम् ? संक्रामति ॥४७॥

अवचूरिः—वक्ष्यमाणवृत्तिसर्गतायिसूत्रपञ्चकप्राप्ति-

विषयादन्यत्र "क्रमोऽनुपसर्गात्" इति सूत्रं प्रवर्त्तते। सोपसर्गक्रमेर्वृत्त्यादिसूत्रपञ्चकैरात्मनेपदम्, निरुपसर्गाच्च क्रमेः क्रमोऽनुपसर्ग (गात्) इत्यनेनैव विकल्पेनात्मनेपदं भवति। अप्राप्ते विभाषा ॥४७॥

## वृत्तिसर्गतायने ।३।३।४८॥

वृत्तिः — [1]वेति निवृत्तम्। वृत्त्यादिष्वर्थेषु क्रमेः कर्त्तर्यात्मनेपदं स्यात्। वृत्तिः अप्रतिबन्धः आत्मयापनं वा, शास्त्रेऽस्य क्रमते बुद्धिः, शास्त्रे न प्रतिहन्यते आत्मानं यापयति वेत्यर्थः। [2]सर्गः–उत्साहः चेष्टागम्यः, तात्पर्यं क्रियागम्यं वा, सूत्राय क्रमते, तत्परो वा अनुज्ञातो वा सूत्रार्थमुत्सहते। तायनं–स्फीतता,संतानः पालनं वा, [3]क्रमन्तेऽस्मिन् योगाः समाधयः। [4]वृत्त्यादिष्विति किम्? क्रामति ॥४८॥

अवचूरिः—[1]व्यावृत्तेर्व्यवच्छेद्याभावात् अर्थविशेषोपादानाद्वा वा इति निवृत्तम्। "[2]भामा सत्यभामा" "भीमो भीमसेनः" इतिवत् सर्गेणाऽतिसर्गशब्दस्य लक्षणादनुज्ञा वोच्यते, अनेकार्थत्वाद्धातूनाम्। [3]क्रमन्तेऽस्मिन् योगाः, कोऽर्थः? स्फीता भवन्ति योगाः, ( यद्वा ) संतन्यन्ते-संतानेन प्रवर्त्तन्ते, अथवा पाल्यन्तेऽस्मिन् विषये गुरुणा योगाः, रक्ष्यन्ते इत्यर्थः। [4]वृत्त्यादिष्वित्येव-पराक्रामति-परावृत्त्या क्रामति,शौर्यं वा कुरुते समीपे गच्छति वेत्यर्थः ॥४८॥

## परोपात् ।३।३।४९॥

वृत्तिः—परोपाभ्यामेव परात्क्रमेर्वृत्त्याद्यर्थेषु कर्त्तर्यात्मनेपदं स्यात्। पराक्रमते, उपक्रमते। परोपादिति किम्? अनुक्रामति। वृत्त्यादिषु त्वन्योपसर्गपूर्वादपि पूर्वेण सूत्रेण मन्यन्ते। निष्क्रमते, प्रतिक्रमते, न प्रतिहन्यते इत्यर्थः ॥४९॥

अवचूरिः—पूर्वेण सिद्धेऽपि नियमार्थमित्याह-परोपाभ्यामेव ॥४९॥

## वेः स्वार्थे ।३।३।५०॥

वृत्तिः—स्वार्थः पादविक्षेपः। स्वार्थे विपूर्वात् क्रमेः कर्त्तर्यात्मनेपदं स्यात्। साधु विक्रमते गजः। [1]स्वार्थ इति किम्? अश्वेन [2]विक्रामति ॥५०॥

अवचूरिः–[1]स्वार्थे इति किम्? इत्यस्यायं भावः- कर्तृकृते स्वार्थयात्मनेपदं भवति, न करणकृते परकृते स्वार्थयात्मनेपदं भवति। नन्वश्वेन विक्रामतीत्यत्र पादविक्षेप एव क्रमिर्वर्त्तते, स च पादविक्षेपः कर्तृकृतः करणकृतो वा भवतु? सत्यम्, "गौणमुख्ययोर्मुख्ये कार्य" मिति न्यायात् सर्वकारकप्रधानभूतकर्तृकृत एव गृह्यते। अत्र तु करणकृतः पादविक्षेप इति नात्रात्मनेपदम्। [2]तथा विक्रामति राजा, उत्सहते इत्यर्थः। अत्र परोपादेवेति नियमात् वृत्तिसर्गेत्यादिनाप्यात्मनेपदं न भवति ॥५०॥

## प्रोपादारम्भे ।३।३।५१॥

वृत्तिः— [1]आरम्भार्थात् प्रोपाभ्यां परात् क्रमेः कर्त्तर्यात्मनेपदं स्यात्। प्रक्रमते, उपक्रमते भोक्तुं, प्रारभते अङ्गीकरोति वेत्यर्थः। आरम्भ इति किम्? प्रक्रामति, यातीत्यर्थः। [2]उपक्रामति समीपं यातीत्यर्थः ॥५१॥

अवचूरिः–[1]बहूनां क्रियाणामाद्यमनुष्ठानमादौ कर्त्तव्यमारम्भ उच्यते, आदिकर्म इति पर्यायः, आदिकर्मार्थे वर्त्तमानात्क्रमेर्कर्त्तरि (आत्मनेपदं भवतीत्यर्थः)। [2]उपक्रामतीत्यत्र परोपादित्यनेनापि नात्मनेपदं, वृत्त्यादेरर्थस्याऽविवक्षितत्वात् ॥५१॥

## आङो ज्योतिरुद्गमे ।३।३।५२॥

वृत्तिः–आङः परात्क्रमेः ज्योतिषां चन्द्रादीनामुद्गमे (उदये) वर्त्तमानात्कर्त्तर्यात्मनेपदं स्यात्। आक्रमते चन्द्रः सूर्यो वा, उदयते इत्यर्थः, ● अयि वयि धातुः। ज्योतिरुद्गम इति किम्? आक्रामति माणवकः कुतुपम्, ( दर्भम् ) अवष्टभ्नातीत्यर्थः। धूम आक्रामति, हर्म्यतलमुद्गच्छन् व्याप्नोतीत्यर्थः ॥५२॥

अवचूरिः—तलशब्दः स्वरूपार्थः, यथा नभस्तलं तथा हर्म्यमेव (हर्म्यतलम्) ॥५२॥

● 'उदयते' इत्यत्र अयिवयीत्यादिगणप्रविष्टः अयि धातुरित्यर्थः।

## दागोऽस्वास्यप्रसारविकासे ।३।३।५३॥

वृत्तिः–स्वास्यप्रसारविकासाभ्यामन्यार्थादाङ्पूर्वाद्दातेः कर्त्तर्यात्मनेपदं स्यात् । विद्यामादत्ते, धनमादत्ते, स्वास्यादिवर्जनं किम् ? उष्ट्रो मुखं व्याददाति प्रसारयतीत्यर्थः । ★विपादिका व्याददाति, विकसतीत्यर्थः। फलवतोऽन्यत्रायं विधिः॥५३॥

अवचूरिः—प्रसारः ( इति ) कोऽर्थः ? प्रसारणं, प्रयोजकव्यापारः, प्रसरन्तं प्रयुङ्क्ते इति परिणा (हः) विकासश्च कर्तृव्यापार इत्यनयोर्भेदोऽयम् । स्वग्रहणं किम्? व्याददते पिपीलिकाः पतङ्गस्य मुखम् ॥५३॥

## नुप्रच्छः।३।३।५४॥

वृत्तिः—आङ्पूर्वान्नौतेः प्रच्छेश्च कर्त्तर्यात्मनेपदं स्यात् । आनुते शृगालः,आपृच्छते गुरून् ॥५४॥

अवचूरिः—आनुते शृगालः ( इति ) कोऽर्थः ? शृगालो जन्तुक उत्कण्ठितः सन् शब्दं करोतीत्यर्थः । उत्कण्ठापूर्वके संशब्दने नौतेरयं विधिः, न सर्वत्र । प्रच्छिधातोरपि संबन्धिनो गुरोरेव प्रश्ने सत्यात्मनेपदविधिः, न प्रवाहतः सर्वत्र । एवमापृच्छस्व प्रियसखम् ॥५४॥

## गमेः क्षान्तौ ।३।३।५५॥

वृत्तिः—क्षान्तिः कालहरणम् । क्षान्त्यर्थे सामर्थ्यादाङ्पूर्वाद् गमयतेः कर्त्तर्यात्मनेपदं स्यात् ।आगमयते गुरून्, कञ्चित्कालं प्रतीक्षते ( एवम् आगमयस्व तावत् । क्षान्ताविति किम्? आगमयति विद्यां, गृह्णातीत्यर्थः ॥५५॥

अवचूरिः—क्षान्तावर्थे स्वभावात् गमिधातुः आङ्पूर्वो ण्यन्त एव वर्तते, अत एव उदाहरणे आङ्पूर्वण्यन्तगमेः प्रयोगो दर्शितः । आगच्छन्तं प्रयुङ्क्ते आगमयति, अथवा-"णिज् बहुलं नाम्नः कृगादिषु" ( ३-४-४२ इति सूत्रेण) आगमं गृह्णाति (इति) णिच् ॥५५॥

## ह्वः स्पर्द्धे ।३।३।५६॥

वृत्तिः–आङ्पूर्वाद् ह्वयतेः कर्त्तर्यात्मनेपदं स्यात्, [1]स्पर्द्धे गम्यमाने । मल्लो मल्लमाह्वयते, स्पर्द्धमान आकारयतीत्यर्थः । स्पर्द्ध इति किम् ? गामाह्वयति ॥५६॥

अवचूरिः—[1]स्पर्द्धः-संघर्षः, पराभिभवः, पराभवकरणे वाञ्छा वा,स स्पर्द्धो धात्वर्थस्य विशेषणम्, धात्वर्थश्च स्वभावादाङ्पूर्वकस्य ह्वयतेः शब्द एव । ( अतः ) स्पर्द्धापूर्वकेन शब्देन आकारणम् ( स्पर्द्धः ), तस्मिन् गम्यमाने । ह्वेंग् स्पर्द्धाशब्दयोरितिपाठे सत्यपि आङ्पूर्वकस्यैव ह्वयतेः स्वभावात् शब्द एव वृत्तिरिति स्पर्द्धः शब्दस्यैव धात्वर्थस्य विशेषणं घटते इति भावः ॥५६॥

## संनिवेः ।३।३।५७॥

वृत्तिः—संनिविभ्यः परात् ह्वयतेः कर्त्तर्यात्मनेपदं स्यात् । संह्वयते, निह्वयते, विह्वयते ॥५७॥

## उपात् ।३।३।५८॥

वृत्तिः—उपपराद् ह्वयतेः कर्त्तर्यात्मनेपदं स्यात् । उपह्वयते । योगविभाग उत्तरार्थः ॥५८॥

## यमः स्वीकारे ।३।३।५९॥

वृत्तिः–यमं उपरमे, उपाद्यमेः स्वीकारेऽर्थे वर्त्तमानात् कर्त्तर्यात्मनेपदं स्यात् । कन्यामुपयच्छते-अङ्गीकरोति, उपायंस्त महास्त्राणि । च्विनिर्देशः किम् ? शाटकानुपयच्छति। ५९॥

अवचूरिः—'उपायंस्त',अत्राद्यतनी, आत्मनेपदं, त, सिच् । ✿"यमः स्वीकारे" इत्यत्र अस्वं स्वं क्रियत इति

---

★पादसञ्जातो गण्डः, तथा चोक्तमभिधानचिन्तामणौ–'पादस्फोटो विपादिका' इति ।

✿अत्र "यमः स्वीकारे" इत्यादिपाठोऽसंगतः प्रतिभाति । अत्र हि 'आत्मीयत्वेन निर्ज्ञातस्य यद्ग्रहणं तत्स्वीकार इत्युच्यते" इत्युक्तं, परं तदयुक्तं, यतो यदि स्वत्वेन निर्ज्ञातस्य यद्ग्रहणं तत्स्वीकार इत्युच्येत

स्वीकार शब्दस्य नेयं व्युत्पत्तिः, किन्त्वात्मीयत्वेन स्वत्वेन निर्ज्ञातस्य च (य) द्ग्रहणं तत्स्वीकार इत्युच्यते इति शाटकानुपयच्छति (इति) अत्र नात्मनेपदम् ॥५९॥

## देवार्चा–मैत्री–संगम-पथिक-कर्तृक-मन्त्रकरणे स्थः ।३।३।६०॥

वृत्तिः—एष्वर्थेषु ( वर्तमानात् ) उपपूर्वात्-तिष्ठतेः कर्त्तर्यात्मनेपदं स्यात् । देवार्चायां,-जिनेन्द्र-मुपतिष्ठते । *[1]मैत्र्याम्,-महामात्रान् ( प्रधानपुरु-षान् ) उपतिष्ठते । संगमे ( सम्बन्धे ), यमुना गङ्गामुपतिष्ठते । पन्थाः कर्ता यस्यार्थस्य स पथि-कर्तृकः, अयं पन्थाः स्रुघ्नमुपतिष्ठते । [2]मन्त्रकरणे,-सावित्र्या सूर्यमुपतिष्ठते, आराधयतीत्यर्थः ॥६०॥

अवचूरिः—[1]मित्रतया मित्रं वा कर्तुमाचरणं संश्ले-षेण विनापि हि मैत्र्युच्यते, (सा) उपस्थापनस्य-आरा-धनस्य हेतु फलं वा । महामात्रानुपतिष्ठते ( इति ) कोऽर्थः ? मैत्र्या हेतुना फलेन वाऽऽराधयतीत्यर्थः । *उप-तिष्ठते इत्यस्यायं विशेषः—

'बहूनामप्यचित्तानामेको भवति चित्तवान् ।
पश्य वानरसंघेऽस्मिन् यदर्कमुपतिष्ठते' ॥१॥

यदा तु नेयं देवपूजाऽपि तु चापलमिति विवक्षितं तदा नात्मनेपदं भवति ।

"मैवं मंस्थाः सचित्तोऽयमेषोऽपि हि यथा वयम् ।
एतदप्यस्य कापेयं यदर्कमुपतिष्ठति" ॥२॥

कपेर्भावः कापेयः,(यम्) "कपिज्ञातेरेयण्"(७-१-६५) ( इति 'एयण्'-प्रत्ययः ) [2]मन्त्रः करणं यस्य अर्थस्य स मन्त्रकरणः ॥६०॥

## वा लिप्सायाम् ।३।३।६१॥

वृत्तिः—उपात् तिष्ठतेर्लिप्सायां गम्यमानायाम् कर्त्तर्यात्मनेपदं वा स्यात् । भिक्षुर्दातृकुलमुपतिष्ठते उपतिष्ठति वा भिक्षां लभेयेति ॥६१॥

अवचूरिः—अथवा भिक्षुको दातृकुलमुपतिष्ठते उपतिष्ठति वा, तत्र भिक्षुरेव भिक्षुकः, 'यावादिभ्यः कः' ( ७-३-१५ इत्यनेन स्वार्थे कप्रत्ययः ) ॥६१॥

## उदोऽनूर्ध्वेहे ।३।३।६२॥

वृत्तिः—अनूर्ध्वा यः इहश्चेष्टा तत्र वर्त्तमा-नादुदः परात्तिष्ठतेः कर्त्तर्यात्मनेपदं स्यात् । मुक्ता-वुत्तिष्ठते, मुक्त्यर्थं चेष्टत इत्यर्थः । अनूर्ध्व इति किम् ? आसनादुत्तिष्ठति । ईह इति किम् ? ग्रामा-च्छतमुत्तिष्ठति, उत्पद्यते इत्यर्थः ॥६२॥

अवचूरिः—न ऊर्ध्वः अनूर्ध्वः, अनूर्ध्वश्चासावीह-श्चानूर्ध्वेहः-प्राणिधर्मः, तस्मिन् ॥६२॥

## संविप्रावात् ।३।३।६३॥

वृत्तिः—एभ्यः परात्तिष्ठतेः कर्त्तर्यात्मनेपदं स्यात् । संतिष्ठते, वितिष्ठते, प्रतिष्ठते, अवति-ष्ठते ॥६३॥

## ज्ञीप्सास्थेये ।३।३।६४॥

वृत्तिः—ज्ञीप्सायां स्थेयार्थे च वर्तमानात् स्थः कर्त्तर्यात्मनेपदं स्यात् । तिष्ठते कन्या च्छात्रेभ्यः,

---

तदा शाटकानुपयच्छतीत्यत्रात्मनेपदप्रसङ्गः, शाटकानां स्वत्वेन निर्ज्ञातत्वाद् । कन्यामुपयच्छते इत्यत्र च परस्मैपदप्रसंगः, कन्यायाः स्वत्वेन निर्ज्ञातत्वाभावाद् ।

अत्र संगतपाठस्त्वस्माकमयं प्रतिभाति, तद्यथा—यमः स्वीकारे इत्यत्रास्वं स्वं क्रियते इति स्वीकारशब्दस्य व्युत्पत्तिः । ततः शाटकानुपयच्छतीत्यत्र नात्मनेपदम्, अत्र नास्वं स्वं क्रियते किन्तु स्वत्वेन निर्ज्ञातस्य ग्रहणम् । अस्मिन् विषये बृहद्वृत्तिपाठ एवम्—"च्विनिर्देशः किम् ? शाटकानुपयच्छति । नाऽत्रास्वं स्वं क्रियते, स्वत्वेन निर्ज्ञातस्य तु ग्रहणमिति न भवति" । यदि शेमुषीधनानां निर्दिष्टावचूरिपाठः संगतः प्रतिभायात् तर्हि संसूचनीयोऽहम् । संशोधकः—मुनि-राजशेखरविजयः ।

स्वाभिप्रायप्रकाशनेन कन्यात्मानं रोचयतीत्यर्थः । त्वयि तिष्ठते विवादः ॥६४॥

अवचूरिः—परपरितोषार्थमात्मरूपादिप्रकाशनं ज्ञीप्सोच्यते । तिष्ठत्यस्मिन्निति स्थेयः, बाहुलकादधिकरणेपि "य एचातः" ( ५।१।२८ इत्यनेन यप्रत्यय आत एच ) लोकरूढिवशाद् विवादपदे निर्णेता प्रमाणभूतः सत्यपुरुषः स्थेय इत्युच्यते । ततो ज्ञीप्सायां स्थेयविषयायां च क्रियायां वर्त्तमानात्तिष्ठतेः (कर्त्तर्यात्मनेपदं भवति इ) ति सूत्रार्थः । "श्लाघ ह्नु स्थाशपा प्रयोज्ये" (२।२।६०) इत्यनेन *चतुर्थी । स्थेयविषये,-"त्वयि तिष्ठये ( ते ) विवादः", एकमिदमुदाहरणं द्वितीयं चेदं-"संशय्य कर्णादिषु, तिस्ठते यः," कोऽर्थः ? कर्णादिसम्यस्थेयोपदिष्टं दुर्योधनो निर्णयतीत्यर्थः ॥६४॥

## प्रतिज्ञायाम् ।३।३।६५॥

वृत्तिः—प्रतिज्ञाऽर्थे तिष्ठतेः कर्त्तर्यात्मनेपदं स्यात् । स्वभावादाङ् पूर्व एव स्थाधातुः प्रतिज्ञायां वर्त्तते । नित्यं शब्दमातिष्ठते ॥६५॥

अवचूरिः—प्रतिज्ञाऽभ्युपगम उच्यते । योगविभाग उत्तरार्थः ॥६५॥

## समो गिरः ।३।३।६६॥

वृत्तिः—सम्पूर्वाद् गिरतेः प्रतिज्ञार्थे कर्त्तर्यात्मनेपदं स्यात् । स्याद्वाद [1]संगिरते, अङ्गीकरोतीत्यर्थः । प्रतिज्ञायामित्येव-*संगिरति ग्रासम् ॥६६॥

अवचूरिः—[1]प्रतिजानीते इत्यर्थः । सूत्रे गिर इति निर्देशाद् गृणातेर्न भवतीति विशेषः ॥६६॥

## अवात् ।३।३।६७॥

वृत्तिः—पृथग्योगात्प्रतिज्ञेति निवृत्तम् । अवपूर्वाद्गिरतेः कर्त्तर्यात्मनेपदं भवति । अवगिरते ॥६७॥

अवचूरिः—गिर इत्येव-अवगृणाति ॥६७॥

## निह्नवे ज्ञः ।३।३।६८॥

वृत्तिः—निह्नवे वर्त्तमानाज्ज्ञाधातोः कर्त्तर्यात्मनेपदं स्यात् । शतमपजानीते, अपह्नुते इत्यर्थः । स्वभावादपपूर्व एव ज्ञाधातुर्निह्नवेऽभिव्यज्यते । निह्नवे इति किम् ? तत्त्वं जानाति ॥६८॥

अवचूरिः—निह्नवोऽपलाप उच्यते । 'जा ज्ञाजनोऽत्यादौ' (४।२।१०४) इति ज्ञास्थाने जा, "एषामीर्व्यञ्जनेऽदः" ( ४।२।९७ ) इति ईः ॥६८॥

## सम्प्रतेरस्मृतौ ।३।३।६९॥

वृत्तिः—सम्प्रतिभ्यां पराज्जानातेरस्मृतावर्थे कर्त्तर्यात्मनेपदं स्यात् । शतं संजानीते, *शतेन संजानीते, अवेक्षत इत्यर्थः। शतं प्रतिजानीते, अभ्युपगच्छतीत्यर्थः । अस्मृताविति किम् ? मातुः संजानाति,मातरं संजानाति, स्मरतीत्यर्थः ॥६९॥

अवचूरिः—*"समो ज्ञोऽस्मृतौ वा" (२।२।५१) इत्यनेन विकल्पेन तृतीया, प्रत्युदाहरणे "स्मृत्यर्थदयेशः" ( २।२।११ ) इत्यनेन विकल्पेन षष्ठी ॥६९॥

## अननोः सनः ।३।३।७०॥

वृत्तिः—अनूपसर्गवर्जिताज्जानातेः सन्नन्तात्कर्त्तर्यात्मनेपदं स्यात् । धर्म्मं जिज्ञासते । अननोरिति किम् ? धर्म्ममनुजिज्ञासति ॥७०॥

## श्रुवोऽनाङ्प्रतेः ।३।३।७१॥

वृत्तिः—आङ्प्रतिवर्जिताच्छृणोतेः सन्नन्तात्कर्त्तर्यात्मनेपदं स्यात् । शुश्रूषते गुरून् , संशुश्रूषते शब्दान् । अनाङ्प्रतेरिति किम् ? आशुश्रूषति, प्रतिशुश्रूषति ॥७१॥

अवचूरिः—"श्रुवोऽनाङ्प्रतेः" अत्र सूत्रे विशेषोऽयं-कथं चैत्रं प्रति शुश्रूषते ? सूरिराह-धातोः प्रतिना शब्देन

*छात्रेभ्य इत्यत्र ।  *ग्रासमत्ति इत्यर्थः ।

सह संबन्धाभावात् आत्मनेपदं भवति, चैत्रेण सह प्रतिशब्दस्य सम्बन्धोऽस्ति ।७१॥

## स्मृदृशः ।३।३।७२॥

वृत्तिः – सन्नन्तस्मृदृशीभ्यां कर्त्तर्यात्मनेपदं स्यात् । सुस्मूर्षते पूर्ववृराम्, दिदृक्षते देवम् ॥७२॥

## शको जिज्ञासायाम् ।३।३।७३॥

वृत्तिः—[1]स्वभावादन्यधात्वर्थानुसहितः शकिः प्रवर्त्तते, शक्नोति [3]भोक्तुमत्रअन्यद्वेति । ततो ज्ञानानुसंहितार्थात् सन्नन्तादात्मनेपदं स्यात् । [2]विद्याः [4]शिक्षते, विद्यासु शिक्षते, ज्ञातुं शक्नुयामितीच्छतीत्यर्थः । जिज्ञासायामिति किम् ? शक्तुमिच्छति-शिक्षति ॥७३॥

## प्राग्वत् ।३।३।७४॥

वृत्तिः—सनः प्राक्-पूर्वो यो धातुस्तस्मादिव सन्नन्तादात्मनेपदं स्यात् । यत्पूर्वस्य धातोरनुबन्धेन वा उपपदेन वा अर्थविशेषेण वात्मनेपदं दृष्टं तत् आत्मनेपदम् सन्नन्तादतिदिश्यते । अनुबन्धेन–[“इङितः कर्तरि” ( ३।३। २२ ) इत्यनेन ] शीङ्-शेते, शिशयिषते, लोलूयते, लोलूयिषते, श्येनायते, शिश्येनायिषते । उपपदेन- [ “निविशः” ( ।३।३।२४ ) इत्यनेन ] निविशते, निविविक्षते । [ ‘समस्तृतीयया’ ( ३।३।३२। ) इत्यनेन ] अश्वेन संचिचरिषते । अर्थविशेषेण– [ वृत्तिसर्गतायने (३।३।४८।) इत्यनेन] शास्त्रेऽस्य क्रमते बुद्धिः, चिक्रंसते ॥७४॥

---

अवचूरिः—[1]अन्यस्य धातोरर्थेन युक्तः सन् शकिः प्रवर्त्तते इत्यर्थः, यथा शक्नोति भोक्तुमित्यत्र भुज्यर्थेन युक्तः । [2]तथा विद्याः शिक्षते, अत्रात्मनेपदेनैव जिज्ञासायाः परिज्ञानात् विद्याः शिक्षते जिज्ञासितुमिति न प्रयुज्यते । [3]अन्यद्वेति कोऽर्थः ? यथा शक्नोति भोक्तुं तथा शक्नोति पतितुं, पक्तुं गन्तुं वा इति परिणा(हः) अन्यक्रियार्थाध्याहारः कर्त्तव्यः । [4]शिक्षते, अत्र “शक्लृट् शक्तौ” शक् . शक्तुमिच्छति, “तुमर्हादिच्छायां सन्नतत्सनः” (३ ४।२१) इति सन्, “रभलभशकपतपदामिः” (४।१।२१)इति सूत्रेण धातोरकारस्य इकारः द्विर्वचनाभावश्च, ‘नाम्यन्तस्था.’ (३।३।१५) इति सस्य षत्वम् । ननु ‘शिक्षि विद्योपादाने’ इत्यनेनैव शिक्षते इति सेत्स्यति किमर्थं “शको जिज्ञासाया” मिति वचनं कृतम्? सूरिराह–आमोऽनुप्रयोगार्थं, यदि चेदं “शको जिज्ञासाया” मितिवचनं नाकरिष्यत् तदा शकेर्धातोः सन्नन्तस्य ‘आम कृगः’ (३।३।७५) इति सूत्रेण आमः परात् कृगो (ग) आत्मनेपदं नाभविष्येत, ( ष्यत् ) धातोः परस्मैपदित्वात् । ततः शिक्षाञ्चक्रे इति न सिध्येत् । शिक्षिधातुनापि शिक्षाञ्चक्रे इति न स्यात्, शिक्षेरेकस्वरत्वात् आमः प्रतिषेधात् । अनेकस्वरधातूनां हि आमविधिः । अयं विशेषः शको जिज्ञेति सूत्रान्ते ज्ञातव्या ( यः ) ॥७३॥

अवचूरिः–‘प्राग्वत्’ इति सूत्रे विशेषोऽयं लिख्यते–उभयेन आत्मनेपदं भवति । उभयेन कोऽर्थः ? उपपदेन, अर्थविशेषेण इति उभयम्, तेन आक्रमते चन्द्रः, आचिक्रंसते अत्र ‘आङो ज्योति०” ( ३।३।५२। ) इत्यनेनात्मनेपदम् । यत्पुनः सप्रत्ययधातुनिमित्तमात्मनेपदं तत् सन्नन्तान्नातिदिश्यते, यथा-शिशत्सति, मुमूर्षति । अत्र हि शदिमृधातू नात्मनेपदनिमित्तौ, किं तर्हि ? ‘शदेः शिति’ ( ३।३।४१। ) “म्रियतेरद्यतन्याशिषि च” ( ३।३।४२। ) इति शिदाशीरद्यतन्य ( याः ) प्रत्ययाः । ( अतः ) शदिमृधातू नात्मनेपदनिमित्तम् ( त्तौ ) इति सन्नन्तादपि नात्मनेपदम् । तथा अनुबन्धशेषात्, उपसर्गशेषात्, अर्थशेषात्, उपपदशेषात्, प्रत्ययशेषादिति ( इत्यादि) निमित्तमाश्रित्य यदात्मनेपदनिषेधः कृतः परस्मैपदं च कृतं तत्रापि आत्मनेपदं नातिदिश्यते । यथा-अनुकरोति, अनुचिकीर्षति, पराकरोति, पराचिकीर्षति, अत्र सन्नन्तान्नात्मनेपदम् । अनुबन्धशेषादिस्वरूपं “शेषात् परस्मै” ( ३ ३।१००। ) ‘परानोः कृगः’ (३।३।१०१ इति)अत्र वक्ष्यते। परस्मैपदविधिः आत्मनेपदप्रतिषेधः “शेषात् परस्मै” ( ३।३।१००। ) इत्यतो ( इत्यादितो ) ज्ञातव्यः। तथा तिजादीनां त्वर्थविशेषेषु केवलानां (अप्रयोगात्) कोऽर्थः ? सन्नन्तरहितानामप्रयो-

गात् सन्नन्तसमुदायार्थमेवानुबन्धविधानम्, तेन तितिक्षिते, जुगुप्सते, मीमांसते इत्यादौ प्रागदृष्टमप्यात्मनेपदमनुबन्धसामर्थ्याद्भवति, यथा-चिन्रीयते, महीयते । इयमवचूरिः 'प्राग्वत्' इति सूत्रान्ते चिक्रंसते इत्यस्याग्रे ज्ञातव्या ॥७४॥

## आमः कृगः ।३।३।७५॥

वृत्तिः—आमः परात् (-पश्चात्) अनुप्रयुज्यमानात्करोतेराम एव प्राग् यो धातुस्तस्मादिव कर्त्तर्यात्मनेपदं स्यात् । भवति न भवति चेति विधिप्रतिषेधावतिदिश्येते । [1]ईहांचक्रे, ईक्षांचक्रे, इत्यफलवत्यपि [6]आत्मनेपदम् । [2]बिभयाञ्चकार, [3]जागराञ्चकारेति फलवत्यपि नात्मनेपदम्, भीधातोः जागृधातोश्च परस्मैपदित्वात् । [4]यत्र तु पूर्वस्मादुभयम् तत्र फलवत्यफलवति चोभयम्, बिभराञ्चक्रे, [5]बिभराञ्चकार । कृग इति किम् ? करोतेरेव यथा स्यात् । इह मा भूत्—ईक्षामास, ईक्षाम्बभूव ॥७५॥

अवचूरिः—[1]ईहाञ्चक्रे इत्यत्र "गुरुनाम्यादेरनृच्छूर्णोः" ( ३-४-४८ ) इति सूत्रेण आम् । [6]आमपूर्वस्य धातोरात्मनेपदित्वात् इत्यर्थः । [2]बिभयाञ्चकारेत्यत्र ञिभीक् भये, भी, परस्मैपदी परोक्षाणव्, "भीह्रीभृहोस्तिव्वत्" (३-४-५०) इत्यनेन आम्, "हवः [*]शिति" ( ४-१-१२ ) इति द्वित्वं-द्विर्वचनम् । [3]जागराञ्चकारेत्यत्र "जागुषसमिन्धेर्नवा" ( ३-३-४९ ) इत्यनेन आम्, जागृक् निद्राक्षये, परस्मैपदम् । [4]यत्र तु इत्यक्षराणां भावोऽयम्-यत्र धातौ उभयपदं-यो धातुरुभयपदी तत्र उभयपदी(दि)धातुविषये फलवत्यात्मनेपदं भवति, अफलवति परस्मैपदं भवति, इति परिणा (हः)उभयं-परस्मैपदात्मनेपदम् । "[5]डुडुभृंग्क् पोषणे च", भृ, "पृभृमाहाङामिः" ( ४-१-५८ ) इत्यनेनाभ्यासे इकारः, "भीह्रीभृहोस्तिव्वत्" ( ३-४-५० ) इति आम् । एवं पाचयाञ्चक्रे, पाचयाञ्चकार इत्यपि । णिलोपापवादः "आमन्ताल्वाय्येत्नावय्" ( ४-३-८५ ) इत्यय् ॥७५॥

## गन्धनावक्षेपसेवासाहसप्रतियत्नप्रकथनोपयोगे ।३।३।७६॥

वृत्तिः—गन्धनाद्यर्थेषु करोतेः कर्त्तर्यात्मनेपदं स्यात् । गन्धनं-द्रोहाभिप्रायेण परदोषोद्घट्टनम्, [1]उत्कुरुते । अवक्षेपः-कुत्सनम् (निन्दा) । दुर्वृत्तानवकुरुते-निन्दयति, कुत्सयतीत्यर्थः । सेवा-अनुवृत्तिः महामात्रानुपकुरुते* । साहसम्-अविमृश्य:(य)प्रवृत्तिः, परदारान् प्रकुरुते (५) प्रतियत्नः-सतो ( विद्यमानस्य) गुणान्तराधानम्, [2]एधोदकस्योपस्कुरुते । [3]प्रकथने,-जनापवादान् प्रकुरुते । [4]उपयोगः-धर्मादौ द्रव्यव्ययः, शतं प्रकुरुते । अफलवत्कर्त्रर्थ आरम्भः ॥७६॥

अवचूरिः—● [1]उदाकुरुते माम्, अध्याकुरुते, उत्कुरुते इत्यादीनामयमर्थः-जिघांसुरपकर्त्रे कथयतीत्यर्थः । "परदारान् प्रकुरुते (इति) कोऽर्थः? स्वस्य विनाशमविभाव्य पराङ्गनां रमते । [2]एधोदकमुपस्कुरुते ( इति ) कोऽर्थः ? तत्र गुणान्तरं रचयति, "उपाद्भूषासमवायप्रतियत्नविकारवाक्याध्याहारे" (४-४-९२) इति स्सट् । [3]प्रकथनं-कथनारम्भः प्रकर्षेण कथनं वा, जनदोषान् कथयितुमारभते, प्रकर्षेण वा कथयति । [4]धर्म्मादिकार्ये व्यापारयति ॥७६॥

## अधेः प्रसहने ।३।३।७७॥

वृत्तिः—अधेः परात्कृगः-करोतेः प्रसहने वर्त्तमानात्कर्त्तर्यात्मनेपदं स्यात् । प्रसहनं-पराभिभवः परेणापराजयो वा, तं ह्यऽधिचक्रे, तमभिभूतवानित्यर्थः, तेन वा न पराजितः । प्रसहने इति किम् ?

[*]न चात्र परोक्षाया अशित्वात् कथं ? "हवः शिति" इत्यनेन द्विर्वचनमित्याशङ्कनीयम्, "भीह्रीभृहोस्तिव्वत्" इत्यनेनामस्तिव्वत्करणात् तिवश्च शित्वात् ।

*सेवते इत्यर्थः । ●उदाकुरुते माम्, अध्याकुरुते इत्युदाहरणद्वयं वृत्तौ नास्ति । लेखकदोषवशादलिखितमिति सम्भाव्यते ।

तमधिकरोति-नियुङ्क्ते ।।७७।।

अवचूरिः---अथवा सहनम्- क्षमा, तितिक्षा, उपेक्षा इति यावत् । प्रकर्षेण सहनं–प्रसहनं, तच्च प्रसहनं द्विधा,- शक्तस्य अशक्तस्य च ।

"पुरःसरा धामवतां यशोधनाः, सुदुःसहं प्राप्य निकारमीदृशम् । भवादृशाश्चे'दधिकुर्वते' पराश्निराश्रया हन्त हता मनस्विता" ।। (किराता.प्र.स. श्लोक-४३, अत्रोत्तरार्धव्याख्यैवम्-) यदि भवादृशाः समर्था अपि शत्रूनुपेक्षन्ते तदा, हन्त इति खेदे, मनस्विता निराश्रया-आधारं विना हता, प्रलयं गता इत्यर्थः । स प्रसेहे जनं- जनेन स पुरुषो न जितः ।।७७।।

## दीप्तिज्ञानयत्नविमत्युपसंभाषोपमन्त्रणे वदः ।३।३।७८।।

वृत्तिः—दीप्त्याद्यर्थे वर्त्तमानाद्वदतेः कर्त्तर्यात्मनेपदं स्यात् । वदते विद्वान् स्याद्वादे, (उदाहरणार्थोऽयम्-) सम्यग्ज्ञानादनाकुलकथनाच्च विकसितमुखत्वाद्दीप्यमानो विद्वान्वदति, अथवा ★वदन् दीप्यत इति, दीप्यत एवेति वा । वदते धीमांस्तत्त्वार्थे, उदाहरणार्थोयं-ज्ञात्वा वदति, वदितुं जानाति वा, वदन् फलं जानाति वा, जानात्येवेति वेत्यर्थः । तपसि वदते,श्रुते वदते = तपोविषयं, श्रुतविषयमुत्साहं वाचाऽऽविष्करोति, श्रुते तपसि वा उत्सहते । धर्मे विवदन्ते, उदाहरणार्थोयं-विमतिपूर्वकं विचित्रं नानाप्रकारं भाषन्ते, विविधं मन्यन्त इति वा । कर्मकरानुपवदते, उपसान्त्वयति उपालभते वेत्यर्थः । कुलभार्यामुपवदते, परदारानुपवदते; रहसि (एकान्ते) उपलोभयतीत्यर्थः ।।७८।।

अवचूरिः—दीप्तिर्भासनमुच्यते । सा च दीप्तिः कर्तृविशेषणम्,(१)अथवा ★वदनक्रियासहचारिणी सती दीप्तिर्धात्वर्थः;(२)यद्वा केवलैव दीप्तिर्धात्वर्थ उच्यते(३)। अत्र वदते विद्वान् स्याद्वादे इति उदाहरणम् । अनुक्रमेण त्रिधा दीप्त्यर्थोऽयम्-सम्यग्ज्ञानादनाकुलकथनाच्च विकसितमुखत्वाद् गुरुः कर्त्ता दीप्यमानो वदति,(१)गुरुर्वदन् दीप्यते इति वा;(२) गुरुर्दीप्यते एव इति वा(३)। ज्ञानमवबोधः, तच्च ज्ञानं वदिक्रियाया हेतुः, (१) विषयि वा, (२) फलं वा,(३) केवलमेव वा धात्वर्थः (४) । अत्र वदते धीमांस्तत्त्वार्थे, अस्यार्थोयम्-ज्ञात्वा वदतीति वा, (१) जानाति वदितुमिति वा, (२) वदन् जानाति वा (३) जानात्येव (४) । यत्नः-उत्साहः, स चोत्साहो धात्वर्थस्य विषयः धात्वर्थ एव वा । अत्र श्रुते वदते, तपसि वदते, (इत्युदाहरणे)। नानामतिः - विमतिः, सा च विमतिर्धात्वर्थस्य हेतुः धात्वर्थ एव वा । अत्र धर्मे विवदन्ते इत्युदाहरणम् । उपसंभाषा- उपसान्त्वनमुपालम्भो वोच्यते, धात्वर्थ एव वोपसंभाषः । अत्र कर्मकरानुपवदते इत्युदाहरणम् । उपमन्त्रणं-रहस्युपच्छन्दनम्, उपलोभनं, दानादिना आवर्जनमित्यभिप्रायः । अत्र कुलभार्येत्यादि(क)-मुदाहरणद्वयम् ।।७८।।

## व्यक्तवाचां सहोक्तौ ।३।३।७९।।

वृत्तिः–व्यक्तवाचां मनुष्यादीनां सहोक्तौ, कोऽर्थः? संभूयोच्चारणे वर्त्तमानाद्वदेः कर्त्तर्यात्मनेपदं स्यात् । संप्रवदन्ते ग्राम्याः, संप्रवदन्ते पिशाचाः; संभूय–मिलित्वा भाषन्ते इत्यर्थः । व्यक्तवाचामिति किम् ? संप्रवदन्ते शुकाः । सहोक्ताविति किम् ? चैत्रेणोक्ते मैत्रो वदति ।।७९।।

अवचूरिः-व्यक्ता, कोऽर्थः ? व्यक्ताक्षरा=स्पष्टवर्णा वाग् येषां- ते व्यक्तवाचः, लोकरूढ्या व्यक्तवाचो मनुष्यादय एवोच्यन्ते । संप्रवदन्ति सारिकाः कुक्कुटा वा ।।७९।।

## [1] विवादे वा ।३।३।८०।।

वृत्तिः—व्यक्तवाचां सहोक्तौ विवादरूपायां सत्यां वदेः कर्त्तर्यात्मनेपदं वा स्यात् । विप्रवदन्ते मौहूर्त्ताः, विप्रवदन्ति (वा) । उदाहरणार्थोयम्-[2]पर-

★'वावदन्' इति बृहद्वृत्तौ ।

स्परप्रतिषेधेन युगपद्विरुद्धं वदन्तीत्यर्थः । विवाद इति किम् ? संप्रवदन्ति वैयाकरणाः, सह वदन्तीत्यर्थः ॥८०॥

---

अवचूरिः—[1]विरुद्धार्थो वादो विवाद उच्यते । "विवादे वा" अत्र सूत्रे सहोक्तावित्येव-मौहूर्त्तो मौहूर्त्तेन सह क्रमेण विप्रवदति । विरुद्धाभिधानमात्रमिह विवक्षितं, न तु विमतिपूर्वकम्; तेन-दीप्तिज्ञानयत्नविमत्यु० (३।३।७८) इत्यनेनाप्यत्र नात्मनेपदमिति विशेषो ज्ञातव्यः । [2]एको वादी अन्यम् ( अन्यस्तं ) प्रतिषेधयति-निवारयति इति परस्परप्रतिषेधेन । सहशब्देनाऽपि सहोक्तावुक्तायां गम्यमानायां वा व्यक्तवाचां सहोक्तावित्यनेनाप्यात्मनेपदं न भवत्यत्र ॥८०॥

## अनोः कर्मण्यसति ।३।३।८१॥

वृत्तिः—व्यक्तवाचामर्थे वर्त्तमानादनुपूर्वाद्वदेः कर्मण्यसति कर्त्तर्यात्मनेपदं स्यात् । सादृश्ये-अनुवदते चैत्रो मैत्रस्य, यथा मैत्रो वदति तथा चैत्रो वदतीत्यर्थः; पश्चादर्थे-अनुवदते गुरोः शिष्यः, गुरुणोक्ते पूर्वम् ( -आचार्येण पूर्वं भणिते सति ) पश्चाच्छिष्यो वदतीत्यर्थः । कर्मण्यसतीति किम् ? उक्तमनुवदति ॥८१॥

---

अवचूरिः—अनोः कर्मण्यसतीति सूत्रे अकर्मकाविति अनुक्त्वा कर्मण्यसतीति निर्देश उत्तरत्र "आङो यमहनः स्वेङ्गे च" ( ३।३।८६ ) इत्यादिसूत्रेषु "स्वेङ्गे च कर्मणि" इति सुखेन प्रतिपत्त्यर्थः। अत्र व्यक्तवाचामित्येवानुवर्त्तते, न तु सहोक्तौ (इत्यपि) । अनुशब्दः सादृश्ये पश्चादर्थे वा ज्ञातव्यः । सादृश्यपश्चादर्थयोर्वर्त्तमानो वदिरकर्मको भवति । उदाहरणद्वयं तथैव दर्शयति ॥८१॥

## ज्ञः ।३।३।८२॥

वृत्तिः—जानातेः कर्मण्यसति कर्त्तर्यात्मनेपदं स्यात् । [1]सर्पिषो जानीते, "जा ज्ञाजनोऽत्यादौ" (४-२-१०४) इति जादेशः । कर्मण्यसतीत्येव-[2]तैलं सर्पिषो जानाति, तैलं सर्पिष्ट्वया जानातीत्यर्थः ॥८२॥

---

अवचूरिः—[1]सर्पिषो जानीते, मधुनो जानीते; अत्र जानातिः कथमकर्मकोऽस्ति ? उच्यते, अत्रोदाहरणद्वये सर्पिर्मधु च ज्ञेयत्वेन न विवक्षितं, किं तर्हि ? प्रवृत्तौ करणत्वेन विवक्षितम्, जानातेरर्थः प्रवृत्तिरूपः ततः कोऽर्थः? सर्पिषा मधुना वा करणभूतेन प्रवर्त्तते, सर्पिषा, मधुना करणेन भोक्तुं प्रवर्त्तत इत्यर्थः; अत एवात्रोदाहरणे "अज्ञाने ज्ञः षष्ठी" ( २।२।८० ) इत्यनेन षष्ठी भवति । अथवा मिथ्याज्ञानार्थोऽत्र जानातिः, सर्पिषि रक्तो विरक्तो वा चित्तभ्रान्त्या सर्वं जलादिकं सर्पीरूपेण प्रतिपद्यते, इत्थं मिथ्याज्ञानवचनोऽत्र जानातिः, मिथ्याज्ञानं च तत्त्वतोऽज्ञानमेवेत्यज्ञानार्थत्वे सति पूर्ववत् षष्ठी । अथवा सर्पिःसम्बन्धिज्ञानं करोतीति विवक्षायां ज्ञानार्थोऽपि जानातिरकर्मको ज्ञेयः, तदा संबन्धेऽत्र षष्ठी माषाणामश्नीयादित्यादिवत् ज्ञातव्या । यद्वा सर्पिषो जानीते इति कोऽर्थः ? ज्ञानमुत्पादयति, धात्वर्थे न्यग्भूतं कर्म, यथा लज्जते इत्यकर्मकः । [2]सर्पीरूपेण प्रतिपद्यते इत्यर्थः । एवं स्वरेण पुत्रं जानाति ॥८२॥

## उपात् स्थः ।३।३।८३॥

वृत्तिः—उपपूर्वात्तिष्ठतेः कर्मण्यसति कर्त्तर्यात्मनेपदं स्यात् । योगे योग उपतिष्ठते, भोजनकाल उपतिष्ठते, ज्ञानमस्य जनस्य ज्ञेयेषूपतिष्ठते, सन्निधीयते इत्यर्थः । कर्मण्यसतीत्येव-राजानमुपतिष्ठति ॥८३॥

---

अवचूरिः—संनिधीयते इति रूपं 'धीङच् अनादरे' इत्यस्य वा *कर्मकर्त्तरि ॥८३॥

## समो गमृच्छि-प्रच्छि*-श्रु•-वित्-▪स्व रत्यर्त्ति५-दृशः ।३।३।८४।

वृत्तिः—समः परेभ्यो गमादिभ्यः कर्मण्यसति

---

*अथ लघुन्यासे पाठ एवम्—संनिधीयत इति कर्मकर्त्तरि 'धीङच् अनादरे' इत्यस्य वा रूपमिदम्।

कर्त्तर्यात्मनेपदं स्यात् । संगच्छते, [1]समृच्छिष्यते संपृच्छते, संशृणुते, संवित्ते, संस्वरते, समृच्छते, समियृते, संपश्यते । कर्मण्यसतीत्येव– संगच्छति मित्रम् ।।८४।।

अवचूरिः— [1]सम्पूर्वऋच्छेरर्तेश्च रूप्प ( रूप ) साम्य भवति, अत ऋच्छेरभिव्यक्त्यर्थं समृच्छिष्यत इति परिणा(हे न)उदाहरणं दर्शितम् । [2]गमादिभिर्नित्यपरस्मैपदिभिः साहचर्याज्ज्ञानार्थस्यैव विदेर्ग्रहणं, दिवादितुदादिरुधादिसंबन्धिविदेर्न ग्रहणं, तेषामात्मनेपदित्वात् । [3]अर्तीति सामान्यनिर्देशात् "ऋ प्रापणे च" इति भ्वादिः, "ऋंक् गतौ" इत्यदादौ जुहोत्यादिः(इति)द्वावपि धातू गृह्येते । परमयं विशेषः-भ्वादिअर्त्तेः "श्रौतिकृवु०" ( ४-२-१०८ ) इत्यादिना "ऋच्छ्" आदेशः, तत्र समृच्छते इति प्रयोग , "ऋंक् गतौ', अदादौ ऋ, ते, "हवः शिति" ( ४-१-१२ ) इति द्वित्वं, "पृऋभृमाहाङामिः" ( ४-१-५८ इत्यनेन ) अभ्यासे इत्वं, "पूर्वस्यास्वे स्वरे य्वोरियुव्"(४-१-३७ इत्यनेन) अभ्यासे "इय्" आदेशः । *"श्रौतिकृवुधिवुपाघ्राध्मास्थाम्नादाम्दृश्यर्त्तिशदसदः शृकृधिपिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छशीयसीदम्" ( ४-२-१०८ ) इत्यनेन शृणोतेः 'शृ' आदेशः । [4]समो गमृ० इति सूत्रे स्वरत्यर्त्योस्तिव्निर्देशो यङ्लुपि सति आत्मनेपदनिवृत्त्यर्थः कृतः । तेन स्वरतेः संसरिस्वर्त्ति, अर्तेस्तु "रिरीआगमे" "पूर्वस्यास्वे०" (४-१-३७) इति इयादेशे समरियर्त्ति,समरियरीति; 'र्' आगमे च 'समरर्त्ति' इति भवति । किचित (केचित्) तु यङ्लुप्यपि संजंगते, संपरीपृष्टे, संशोश्रुते, संवेवित्ते, संदे(द)रीदृष्टे इत्यात्मनेपदमिच्छन्ति । ऋच्छेस्तु यङोऽसंभवः ।।८४।।

## वेः कृगः शब्दे चानाशे ।३।३।८५।।

वृत्तिः—विपूर्वात् करोतेरनाशार्थात् कर्मण्यसति शब्दे च कर्मणि कर्त्तर्यात्मनेपदं स्यात् । कर्मण्यसति-[1]विकुर्वते सैन्धवाः, साधु दान्ताः शोभनं वल्गन्तीत्यर्थः । ओदनस्य पूर्णच्छात्रा विकुर्वते, (सम्बन्धषष्ठी) निष्फलं चेष्टन्ते इत्यर्थः । शब्दे कर्मणि-क्रोष्टा ( शृगालः ) विकुरुते स्वरान्, नानाबहुविध ( धान् ) उत्पादयतीत्यर्थः । अनाश इति किम् ? विकरोत्यध्यायं, विकरोति शब्दं; विनाशयतीत्यर्थः ।।८५।।

अवचूरि—"औस्वृ शब्दोपतापयोः"। [1]विकुर्वते ( इत्यत्र ) कृ विपूर्वः, वर्त्तमाना,अन्ते, "कृगतनादेरुः" ( ३-४-८३- इत्यनेन उप्रत्ययः,) 'उश्नोः' ( ४-३-२ ) इति गुणः, "अतः शित्युत्"( ४-३-८९ ) इत्यनेन कृगोऽकारस्य उकारः, "अनतोऽन्तोऽदात्मने" ( ४-२-११४ ) इति अतो ( अन्तो ) 'न्' लुप्यते इत्यर्थः ।।८५।।

## आङो यमहनः स्वेङ्गे च ।३।३।८६।।

वृत्तिः—आङः पराभ्यां यमिहनिभ्यां कर्मण्यसति कर्तुः स्वेङ्गे च कर्मणि कर्त्तर्यात्मनेपदं स्यात् । आयच्छते, आहते । स्वेङ्गे–[1]आयच्छते पादम्, [2]आहते शिरः । स्वेङ्गे चेति किम् ?आयच्छति रज्जुम् , आहन्ति दासम् । स्व इति किम् ? आयच्छति पादौ मैत्रस्य । अङ्ग इति किम् ? स्वं पुत्रमाहन्ति ।।८६।।

अवचूरि–[1]आयच्छते इत्यत्र 'यमू उपरमे' यम्, "गमिषद्यमश्छः" ( ४-२-१०६ ) इति मस्य छत्वम् । [2]आहते इत्यत्र हन् आङ्पूर्वः, वर्त्तमाना, ते, "शिदवित्" ( ४।३।२० ) इति सूत्रेण शित् प्रत्ययो ङिद्वत् भवति, ङित्वात् "यमिरमिनमिगमिहनिमनिवनतितनादेः० (४।२।५५ ) इत्यादिना ( धुटि ) ङिति प्रत्यये परेऽन्तस्य लुक् ।।८६।।

## व्युदस्तपः ।३।३।८७।।

वृत्तिः—व्युत्परात्तपेः कर्मण्यसति स्वेङ्गे च कर्मणि कर्त्तर्यात्मनेपदं स्यात् । वितपते,उत्तपते रविः; दीप्यत इत्यर्थः । स्वेङ्गे -वितपते, उत्तपते पाणिं; तापयतीत्यर्थः । व्युद इति किम् ? निष्टपति । स्वेङ्गे चेत्येव- वितपति पृथ्वीं रविः, संतापयतीत्यर्थः ; उत्तपति-द्रवीकरोति स्वर्णं स्वर्णकारः ।।८७।।

अवचूरिः—व्युदस्तप इति सूत्रे विशेषोऽयम्-इह दीप्यते, ज्वलति, भासते, रोचते इत्येतेष्वर्थेषु तपिधातुमकर्मकं वृद्धा वदन्ति । वितपते-सामान्येन दीप्तो भवति, ज्वालावान् भवति, उद्भूतरूपो भवति, किरणवान् भवति । एवम् उत्तरपते ( उत्तपते ) इत्यस्याप्यर्थचतुष्टयम् । यथा वहधातुः प्रापणार्थे सकर्मकः, (यथा-) वहति भारं, स्यन्दनार्थे तु वहोऽकर्मकः, ( यथा- ) वहति नदी, कोऽर्थः ? स्यन्दन्त इत्यर्थः, एवं तप् धातुरपि ।८७॥

## अणिक्कर्मणिक्कर्तृकाण्णिगोऽस्मृतौ ।३।३।८८॥

वृत्तिः—अणिगवस्थायां यत्कर्म तदेव णिगवस्थायां कर्त्ता यस्य=सोऽणिक्कर्मणिक्कर्तृकः, तस्माण्णिगन्ताद्धातोरस्मृतौ वर्त्तमानात्कर्त्तर्यात्मनेपदं भवति । [1]आरोहयते हस्ती हस्तिपकान्, आस्कन्दयत इत्यर्थः; [2]दर्शयते राजा भृत्यान् भृत्यैर्वा । अणिगिति किम् ? [4]आरोहयति हस्तिपकान्महामात्रः, आरोहयन्ति महामात्रेण हस्तिपकाः । णितकरणं किम् ? [5]गणयते गणो गोपालकम् । कर्मेति किम् ? करणादेः कर्तृत्वे मा भूत्-,[3]दर्शयति प्रदीपो भृत्यान् । [6]णिगिति किम् ? यस्याणिगन्तस्यैव कर्म कर्त्ता भवति ततो णिगन्तान्मा भूत्,-लावयति केदारं चैत्रः । कर्त्तेति किम् ? आरोहन्ति हस्तिनं हस्तिपकाः, तान् हस्तिपकानेनमारोहयति महामात्रः । [7]णिग इति किम् ? आरोहन्ति हस्तिनं हस्तिपकाः, तानारोहयते हस्तीत्यणिगवस्थायामात्मनेपदं मा भूत् । अस्मृताविति किम् ? उत्कमेवापूर्वकं [ ? ] स्मरति वनगुल्मं कोकिलः, स्मरयति कोकिलं वनगुल्मः । [8]कथं ? हन्त्यात्मानं, घातयत्यात्मा,अत्र ह्यात्मनोऽणिक्कर्मणो णिक्कर्तृत्वमस्ति । नैवं, द्वावात्मानौ, बाह्यात्मा ( शरीररूपात्मा ) अन्तरात्मा च । तत्र भेदेनैव लोके नित्यमयं प्रयोगः । हन्त्यात्मानमिति बाह्यात्मनोऽन्तरात्मनो वा कर्मत्वम् । घातयत्यात्मानमित्यपि तस्यैव कर्मत्वं, न कर्तृत्वमिति ।।८८।।

अवचूरिः- [1]आरोहन्ति हस्तिनं हस्ति(प)काः, हस्तिपकान् आरोहतो हस्ती *प्रयुङ्क्ते, "प्रयोक्तृव्यापारे णिग्" (३-४-२०) इति परिणा (हेन) वाक्यम् । आस्कन्दयते इत्यत्रापि हस्तिन उपरि हस्तिपका आगच्छन्ति, तान् हस्तिपकान् हस्ती उपरि आगमयति; आक्रमयते इत्यर्थः । इति युक्त्याऽणिक्कर्मत्वेनैवात्मनेपदं भवतीत्यर्थः । [2]कर्मविकल्पपक्षे तु भृत्यैरित्यत्र प्रयोज्यकर्तरि तृतीया भवति । पश्यन्ति भृत्या राजानं, तान् भृत्यान् राजं वानुकूलाचरणेन, कोऽर्थः? प्रसादकरणेन प्रयुङ्क्ते-व्यापारयति इति वाक्यम् । [3]पश्यन्ति भृत्याः प्रदीपेन, तान् भृत्यान् पश्यतः प्रदीपः प्रयुङ्क्ते इति वाक्यम् । [4]आरोहन्ति हस्तिनं हस्तिपकाः, आरोहयति हस्तिपकान्महामात्रः, आरोहयन्तं महामात्रं हस्तिपकाः प्रयुञ्जते, ( महामात्रेण हस्तिपकाः) आरोहयन्तीत्यत्र प्रथमणिगन्तकर्मणि द्वितीयणिगन्तकर्तर्यपि आत्मने( पदं )मा भूदिति एतदर्थमणिगिति किम् ? इत्युक्तम् । [5]"गणण् संख्याने' गण, "चुरादिभ्यो णिच्" ( ३।४।१७ इति णिच् प्रत्ययः) "अतः" ( ४-३-८२ ) इति सूत्रेण गणोऽकारो लुप्यते । गणयति गणं गोपालकः, तं गणयन्तं गोपालकं गणः प्रयुङ्क्ते, "प्रयोक्तृव्यापारे णिग्" ( ३।४।२०। ) अत्र णिजन्तकर्मणिक्कर्तृकादपि णिगन्तादात्मनेपदप्रतिषेधो मा भूत् । [6]लुनाति केदारं चैत्रः, ●लूयते केदारः स्वयमेव, तं केदारं चैत्रः प्रयुङ्क्ते इति वाक्यम्, अत्र आत्मनेपदं मा भूदित्यर्थः । [7]तानारोहयते हस्तीत्यस्मिन्नर्थे विवक्षिते सति आरोहन्तीत्यत्रात्मनेपदं प्राप्तम्, तत् आत्मनेपदं णिग इति किम् ? इति व्यावृत्त्या निषिध्यते इति

*पादार्पणशिरोऽधूननप्रमुखानुकूलाचरणेन ।

●ननु'लूयते केदारः' इत्यादाविव 'आरोहयते हस्ती हस्तिपकान्' इत्यादावपि यदेव पूर्वं कर्म, तदेव कर्तेति 'एकधातौ'..........इत्यनेन कर्मकर्तर्येवात्मनेपदं भविष्यति किमनेन ? । सत्यम्, अकर्मक्रियत्वाभावात् । अत्र कर्मणः प्रयोजकव्यापारात् कर्तृत्वम्, एकधाताविल्यत्र तु सौकर्यादित्यनयोर्भेदः ।

भावः । ⁴कथं हन्त्यात्मेत्यादि, य एवात्माऽणिक्कर्म वर्त्तते, स एव णिक्कर्त्ताऽस्ति इत्यात्मनेपदमत्र प्राप्नोतीति पराशयः। सूरिराह-द्वावात्मानौ इत्यादि, हन्ति राजान्तरात्मानं बाह्यं वा चौरसत्कं, तमेकमात्मानं घ्नन्तमपरो बाह्यात्मा वा अन्तरात्मा वा प्रयुङ्क्ते इति घातयतीत्यस्य वाक्यस्य युक्त्या आत्मनः कर्मत्वमेव घटते, न कर्तृत्वमिति नात्मनेपदं घातयतीत्यस्य भवतीत्यर्थः। अत्र पुनः परः प्राह-ननु यदि अणिक्कर्मणो णिक्कर्तृतायां णिगन्तादात्मनेपदमिष्यते, तर्हि शुष्यन्त्यातपे व्रीहयः, शोषयते व्रीहीनातपः इत्यादावधिकरणादेः कर्तृतायामात्मनेपदं न प्राप्नोति । न, अत्र फलवत्कर्त्तरि आत्मनेपदं भविष्यति । अहो कीदृक् तीव्र आतप इति कृषीवलादिजनस्य या प्रशंसा, सैव आतपकर्तुः फलमिति फलवत्कर्त्तरीति भावना ॥८८॥

## प्रलम्भे गृधिवञ्चेः¹ ।३।३।८९॥

वृत्तिः—गृधिवञ्चिभ्यां णिगन्ताभ्यां प्रलम्भे, कोऽर्थः? वञ्चने वर्त्तमानाभ्यां कर्त्तर्यात्मनेपदं स्यात्। ²बटुं गर्धयते, बटुं वञ्चयते। प्रलम्भ इति किम्? ³श्वानं गर्धयति, प्रलोभयतीत्यर्थः; अहिं वञ्चयति,⁴ गमयतीत्यर्थः । णिग आत्मनेपदविधानं सर्वत्र (-सर्वसूत्रेषु ) अफलवदर्थम् ॥८९॥

अवचूरिः—¹"वञ्चिण् प्रलम्भने" इति चुरादिनापि सिद्ध्यति, परं णिगन्तस्य विध्यर्थम् । "²बटुं गर्धयते, बटुं वञ्चयते," कोर्थः ? विप्रतारयति इत्यर्थः। ³श्वानं गर्धयति, अत्र फलवत्त्वेपि सत्यात्मनेपदं न भवति, "अणिगि प्राणिकर्तृकानाप्याण्णिगः" ( ३।३।१०७ ) इति वक्ष्यमाणसूत्रप्रतिषेधात्। ⁴अहिं वञ्चयतीत्यत्र वञ्चेरकर्मकत्वे अणिगि प्राणीत्यनेनात्मनेपदनिषेधः । सकर्मकत्वे तु फलवत्यात्मनेपदं भवत्येव॥८९॥

## लीङलिनोऽर्चाभिभवे चाचाकर्त्तर्यपि ।३।३।९०॥

वृत्तिः—लीयतिलिनातिभ्यां णिगन्ताभ्यामर्चाभिभवयोः प्रलम्भे चार्थे वर्त्तमानाभ्यां कर्त्तर्यात्मनेपदं स्यात्, अनयोश्चान्त्यस्य-लिङ्लिन (नो) धातोरन्त्यस्य अकर्त्तर्यप्याकारः स्यात्। अर्चायां-जटाभिरालापयते,¹ परैरात्मानं पूजयतीत्यर्थः। अभिभवे,-•श्येनो *वर्त्तिकामपलापयते, चटिका अभिभवतीत्यर्थः। प्रलम्भे-कस्त्वामुल्लापयते, वञ्चयते इत्यर्थः। अकर्त्तर्यपीति किम्? जटाभिः²आलाप्यते जटिलेन। एष्विति किम्? बालकमुल्लापयति, उत्क्षिपतीत्यर्थः ॥९०॥

अवचूरिः—¹"लीङ्च् श्लेषणे" इति दिवादिः। "लीश् श्लेषणे" इति क्र्यादिः । आलीयमानमथवा आलिनन्तं प्रयुङ्क्ते, "लिङ्लिनोर्वा" ( ४।२।९। ) इत्यात्वम्, "अर्त्तिरीव्लीह्री०" ( ४।२।२१ ) इत्यादिना पोन्तः। ²अत्र "तत्साप्यानाप्य०" ( ३।३।२१ ) इत्यात्मनेपदम्, "लीङ्लिनोर्वा" ( ४।२।९। ) इति वक्ष्यमाणसूत्रेण आकारः, "अर्त्तिरीव्लीह्री०" ( ४।२।२१ ) इत्यनेन पोन्तश्च। तथा सूत्रे लीङ् इति ङित्निर्देशः, लिन इति श्नानिर्देशश्चौरादिक'लीण् द्रवीकरणे' इति यौजादिक-धातुनिवृत्त्यर्थः कृत इति भावः ॥९०॥

## स्मिङः प्रयोक्तुः स्वार्थे ।३।३।९१॥

वृत्तिः—प्रयोक्तुः सकाशाद् यः स्वार्थः स्मयस्तत्र वर्त्तमानाण्णिगन्तात् स्मयतेः कर्त्तर्यात्मनेपदं धातोरन्तस्याकारश्चाकर्त्तर्यपि स्यात् । ¹जटिलो विस्मापयते। प्रयोक्तुः स्वार्थे इति किम्? ²रूपेण विस्माययति । अकर्त्तर्यपीत्येव-विस्मापनम् ॥९१॥

अवचूरिः-¹जटा अस्य सन्तीति जटिलः, 'काला-जटाघटात्क्षेपे' ( ७।२।२३ ) इति सूत्रेण इलप्रत्ययः। ²अत्र करणात् स्वार्थे मा भूदात्मनेपदम्। सूत्रे स्मिङ् इति ङिन्निर्देशात् यङ्लुप्यात्मनेपदं न भवति- सेष्माययति, सेष्मियन्तं प्रयुङ्क्ते ( इति वाक्यम् )॥९१॥

## बिभी(भे)तेर्भीष¹ च ।३।३।९२॥

वृत्तिः—प्रयोक्तुः सकाशात् स्वार्थे ण्यन्ताद् बि-

---

•'बाजपक्षी' इति भाषायाम्। *'चकली' इति भाषायाम्।

भेतेः कर्त्तर्यात्मनेपदं स्यात्, धातोर्भीषादेशः; [2]पक्षे आत्वं चाकर्त्तर्यपि स्यात्। मुण्डो भीषयते [3]भापयते वा। 'ञिभींक् भये' (इति धातुः)। प्रयोक्तुः स्वार्थे इत्येव- कुञ्चिकया भाययति। अकर्त्तर्यपीत्येव-[4]भीषा, [5]भापनम् ॥६२॥

अवचूरिः–[1]सूत्रत्वात् षस्य डत्वं न भवति। 'ञिभींक् भये' भी, बिभ्यन्तं प्रयुङ्क्ते, णिग्, "बिभेतेर्भीष् च" इति भीष् आकारश्च। [2]पक्षे,-पक्षे (इति) कोऽर्थः? यत्र भीषादेशस्ततोऽन्यत्रात्वमधिकारागतं च भवतीत्यर्थः। [3]बिभ्यन्तं प्रयुङ्क्ते, "अर्त्तिरीव्ली०" (४।२।२१) इति पोन्तः। [4]भीषणं-भीषा, "भीषिभूषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यः" (५।३।१०९।) इत्यनेन 'अङ्'। [5]भापनम्, अत्र 'अनट्'। "बिभेतेर्भीष् च" इति सूत्रे तिव्निर्देशात् यङ्लुपि नात्मनेपदम्, तेन मुण्डो बेभाययतीति प्रयोगः। अत्र बेभ्यन्तं प्रयुङ्क्ते इति वाक्यम्। भीषा, भापनमित्यस्य भीषणमित्याद्यवचूरिः ॥९२॥

## मिथ्याकृगोऽभ्यासे● ।३।३।९३॥

वृत्तिः—[1]मिथ्यायुक्तारण्यन्तादभ्यासार्थात्[2] कृगः कर्तर्यात्मनेपदं स्यात्। पदं मिथ्या कारयते। मिथ्येति किम्? पदं साधु कारयति। अभ्यास इति किम्? [3]सकृत्पदं मिथ्या कारयति ॥६३॥

अवचूरिः— ●अभ्यासः पुनः पुनः क्रियाभ्यावृत्तिरुच्यते। [1]मिथ्याशब्दयुक्तात्। [2]अभ्यासेऽर्थे वर्त्तमानात्। मिथ्या (इत्यत्र) द्वितीयाऽम्, अव्ययस्य (३।२।७) इति लुक्। पदं मिथ्या कारयत इति कोर्थः? स्वरादिदोषदुष्टं पदमसकृद्-वारंवारमुच्चारयति-पाठयतीत्यर्थः। [3]एकवारम् ॥९३॥

## परिमुहायमायसपाट्धेवदवसदमादरुचनृतः फलवति ।३।३।९४॥

वृत्तिः—प्रधानफलवति कर्त्तरि विवक्षिते सति परिपूर्वान्मुहेः, आङ्पूर्वयमियसिभ्यां पिबतिट्धेवदवसतिदमादरुचनृतिभ्यश्च णिगन्तेभ्यः कर्त्तर्यात्मनेपदं स्यात्। परिमोहयते चैत्रम्। आयामयते सर्पम्। आयासयते मैत्रम्। पाययते बटुम्। धापयते शिशुम्। वादयते जनम्। वासयते पान्थम्। दमयतेऽश्वम्। आदयते चैत्रेण। रोचयते मैत्रम्। नर्त्तयते नटम्। ट्धेसाहचर्यात् पा इति पिबतेर्ग्रहणम्, न पातेः। वदसाहचर्याच्च वस इति वसतेर्ग्रहणं, न वस्तेः ॥६४॥

अवचूरिः—पिबत्यत्तिट्धे इति धातुत्रयस्याहारार्थत्वात् औदासीन्यनिवृत्त्यर्थतायां, कोऽर्थः? औदासीन्यं = निःक्रियत्वम्, तस्य निवृत्तिः - औदासीन्यनिवृत्तिरर्थो यस्य धातोः, तस्य भावः - (औदासीन्यनिवृत्त्यर्थता) तस्यामकर्मकत्वान्नृतेश्चलनार्थत्वाच्च शेषाणां स्वरूपतो विवक्षातो वाऽकर्मकत्वात् "चल्याहारार्थेङ्बुधयुधप्रुद्रुस्नुनशजनः" (३।३।१०८) "अणिगि प्राणिकर्त्तृकानाप्याण्णिगः" (३।३।१०७) इति सूत्रद्वयेन सर्वत्र परस्मैपदे प्राप्ते परिमुहायमायसेति सूत्रं कृतमिति भावः। 'न पातेः' इति-पातेरयं प्रयोगः-पांक् रक्षणे, पान्तं प्रयुङ्क्ते, णिग्, "पातेः" (४।२।१७) इति सूत्रेण लोऽन्तः, "अणिगिप्राणि०" (३।३।१०७।) इत्यनेन परस्मैपदं भवति, पालयति चैत्रं मैत्रः। तथा "न वस्तेः" (इति-वस्तेरयं प्रयोगः–) "वसिक् आच्छादने", वस्ते मैत्रः, न नग्नः, तं मैत्रं वसन्तं देवदत्तः प्रयुङ्क्ते, णिग्, वासयति मैत्रमित्येव भवति। पिबतेः पाययते इति प्रयोगः। वसतेर्वासयते, वस्तेस्तु वासयति इति प्रयोगः ॥९४॥

## ईगितः ।३।३।९५॥

वृत्तिः–ईकारेतः (ईकारानुबन्धेतः) गकारेतश्च (गकारानुबन्धेतश्च) धातोः फलवति कर्त्तर्यात्मनेपदं स्यात्। [1]यजते, [2]पचते, [3]कुरुते, कण्डूग्-कण्डूयते, णिगन्त(धातोः-)गमयते। फलवतीत्येव- पचन्ति पाचकाः, कुर्वन्ति भृत्याः; अत्रौदनादि प्रधानं फलं कर्त्रा सह न संबध्यते, यच्च दक्षिणावेतनादि संबध्यते तत् क्रियाया न प्रधानं फलम्, तच्च तत्[4]स्वार्थे-

लक्षणं फलं सदसद्वा विवक्षानिबन्धनमेव ग्राह्यम्, तथैव लोके व्यवहारात् ॥९५॥

अवचूरिः–[1]यजीं देवपूजासङ्गतिकरणदानेषु । [2]डुपचींष् पाके । [3]डुकृंग् करणे । [4]अर्थ्यते इत्यर्थः-अर्थनीयः, स्वस्यार्थः = स्वार्थः-स्वर्गादिः, स स्वार्थः लक्षणं यस्य फलस्य-तत् ॥९५॥

## ज्ञोऽनुपसर्गात् ।३।३।९६॥

वृत्तिः–उपसर्गरहितज्जानातेः फलवति कर्त्तर्यात्मनेपदं भवति । गां *जानीते । अनुपसर्गादिति किम् ? स्वर्गं प्रजानाति । फलवतीत्येव– परस्य गां जानाति । अकर्मकाज्ज्ञाधातोः परतः "ज्ञ" ( ३।३।८२ ) इत्यनेन सिद्धे सकर्मकार्थं वचनम् ॥९६॥

अवचूरिः—*"एषामीर्व्यञ्जनेऽदः" ( ४।२।९७ ) इत्यनेन ईकारः ॥९६॥

## वदोऽपात् ।३।३।९७॥

वृत्तिः–अपपूर्वाद्वदतेः फलवति कर्त्तर्यात्मनेपदं स्यात् । एकान्तमपवदते, निराकरोतीत्यर्थः । फलवतीत्येव- अपवदति, परं स्वभावतः ॥९७॥

## समुदाङो यमेरग्रन्थे ।३।३।९८॥

वृत्तिः–समुदाङ्परात् यमेरग्रन्थविषये फलवत्कर्त्तर्यात्मनेपदं स्यात् । [1]संयच्छते व्रीहीन्, [2]उद्यच्छते भारम्, आयच्छते भारम् । अग्रन्थे इति किम् ? [3]वैद्यश्चिकित्सामुद्यच्छति ॥९८॥

अवचूरिः—[1]सम्बध्नातीत्यर्थः । [2]उत्पाटयतीत्यर्थः । समुदाङो यमेरिति सूत्रे फलवतीति किम् ? संयच्छति, उद्यच्छति, आयच्छति परस्य वस्त्रम् । तथा आङ्पूर्वात् अकर्मकात् स्वाङ्गकर्मकाच्च "आङो यमहनः०" ( ३।३।८६ ) इत्यनेनात्मनेपदे सिद्धेऽन्यकर्मकार्थं "समुदाङो०" इति वचनं कृतमित्यर्थः । [3]वैद्यश्चिकित्साग्रन्थे उद्यमं करोतीत्यर्थः ॥९८॥

## [1]दाप्यन्तरगम्ये वा ।३।३।९९॥

वृत्तिः —[2]अनन्तरसूत्रपञ्चकेन यदात्मनेपदमुक्तं तत् पदान्तरगम्ये [3]फलवत्कर्त्तरि वा स्यात् । स्वं शत्रुं परिमोहयते, परिमोहयति; स्वं कटं कुरुते, करोति [4]इत्यादि ॥९९॥

अवचूरिः—■[1]पदं च तत् अन्तरं च = पदान्तरं, पदान्तराद् गम्यो-ज्ञातव्यः = पदान्तरगम्यः, तस्मिन् सतीत्यर्थः । [2]अनन्तरैः – पाश्चात्त्यैः "परिमुहायमायस०, ईङ्गितः, ज्ञोऽनुपसर्गात्, वदोऽपात्, समुदाङोयमे०" इति पञ्चभिः सूत्रैः फलवत्कर्त्तर्यात्मनेपदं विहितं तत् आत्मनेपदं पदान्तरेणापि कर्तुः फलवत्त्वे गम्ये -प्रतीयमाने सति पक्षे यथा स्यादित्याह-"अनन्तर" इत्यादि, अन्यथा कर्त्तुः फलवत्त्वस्य शब्दान्तरेणाभिहितत्वात् आत्मनेपदं न स्यात् इति भावः । [3]प्रतीयमाने सति । [4]आदिशब्दात् स्वमश्वं गमयते गमयति वा, स्वं शिरः कण्डूयते कण्डूयति वा, स्वां गां जानीते जानाति वा, स्वं शत्रुमपवदते अपवदति वा, स्वान् व्रीहीन् संयच्छते संयच्छति वा ॥९९॥

## शेषात्परस्मै ।३।३।१००॥

वृत्तिः—उपयुक्तात्-प्रोक्ताद् अन्यः शेषः । येभ्यो धातुभ्यो येन विशेषेणात्मनेपदमुक्तं, ततोऽन्यस्माद्धातोः कर्त्तरि परस्मैपदं भवति । अनुबन्धोपसर्गार्थोपपदप्रत्ययभेदाच्चानेकधा शेषः । अनुबन्धशेषात्,-भवति, अत्ति, बोभवीति इत्यादि । उपसर्गशेषात्,-प्रविशति । अर्थशेषात्,-करोति, नयति । उपपदशेषात्-साधुभ्यः संप्रयच्छति, गृहे संचरति, साधु पदं कारयति । प्रत्ययशेषात्,-शत्स्यति ॥१००॥

अवचूरिः–पूर्वप्रकरणेनात्मनेपदनियमः कृतः, परस्मैपदं त्वनियतम्, अतस्तन्नियमार्थं "शेषात्परस्मै" इदं वचनं कृतम् । "इङितः कर्त्तरि" (३।३।२२) इत्यनेना-

■अयं विग्रहश्चिन्त्यः, अन्यद् मतं मतान्तरमित्यादिवदत्रान्यत् पदं पदान्तरमिति विग्रहस्वरूपत्वाद् ।

त्मनेपदविधिः । "ईगितः" (३।३।९५) इत्यनेन फलवत्कर्त्र्यात्मनेपदविधिः । इतोऽन्ये धातवो निरनुबन्धा भ्वादयोऽनुबन्धशेषा इत्युच्यन्ते । भवति, अत्ति, दीव्यति, गोपायति, पणायति, पुत्रीयति, पुत्रकाम्यति, अश्वति इमेऽनुबन्धशेषस्योदाहरणानि । अथोपसर्गशेषोदाहरणानि,- "निविशः" ( ३।३।२४ इत्यनेन ) निपूर्वविश आत्मनेपदविधिः, इतोऽन्योपसर्ग उपसर्गशेष उच्यते, यथा- प्रविशति, ( एवम् ) अधितिष्ठति, आगच्छति । अथार्थशेषः,- गन्धनार्थे करोतेरात्मनेपदमन्यत्र परस्मैपदं- करोति, एवं नयति, वदति । अथोपपदशेषः,-"समस्तृतीयया" (३।३।३२) इत्यनेन तृतीयान्तोपपदयोगे सति चरतेरात्मनेपदम्, यत्र तु उपपदं तृतीयान्तं नहि स उपपदशेष उच्यते, तत्र परस्मैपदम् । "साधुभ्यः संप्रयच्छति" इत्यत्रेयं योजना-"क्रियाहेतुः कारकम्" (२।२।१) इति पादे "दामः संप्रदानेऽधर्म्ये आत्मने च" ( २।२।५२ ) इति सूत्रम् । अस्यार्थः-संपूर्वदामः संप्रदानेऽधर्मरूपे वर्त्तमानान्नाम्नस्तृतीया, तृतीयायोगे च दामः परत आत्मनेपदं भवति । दास्याः संप्रयच्छते । अधर्म्य इति किम् ? पत्न्यै संप्रयच्छति इत्युक्तम् । इति अत्र ( साधुभ्यः संप्रयच्छतीति ) उदाहरणे अधर्म्मी ( मि ) पदमुपपदं नहि, धर्म्मी (मि) पदं साधुरूपमस्तीति तृतीयोपपदाभावादात्मनेपदं ( न ) भवतीत्यर्थः । अथ प्रत्ययशेषः,-"शदेः शिति" ( ३।३।४१ ) इत्यादिना प्रत्ययनियमः, अतोऽन्यः प्रत्ययशेषः ॥१००॥

## परानोः कृगः ।३।३।१०१॥

वृत्तिः—परानुपूर्वात्करोतेः कर्त्तरि परस्मैपदं स्यात् । पराकरोति, अनुकरोति । गङ्गामनु कुरुते तप इत्यत्र करोतिरनुना सह न सम्बध्यते ॥१०१॥

---

अवचूरिः—गन्धनादावर्थे तथा गित्वात् फलवति च प्राप्तस्यात्मनेपदस्यापवादोऽयं "परानोः कृगः" इति कृतः ॥१०१॥

## प्रत्यभ्यतेः क्षिपः ।३।३।१०२॥

वृत्तिः—प्रत्यभ्यतिभ्यः परात् क्षिपेः कर्त्तरि परस्मैपदं स्यात् । प्रतिक्षिपति, अभिक्षिपति । ईदित्वात्फलवति प्राप्तस्यात्मनेपदस्यापवादोऽयम् । एवमुत्तरसूत्रद्वयमपि ॥१०२॥

---

अवचूरिः—"प्रत्यभ्यतेः क्षिपः, अत्र सूत्रे बटुं प्रति क्षिपते भिक्षाम् इत्यत्र क्षिपधातुः प्रतिना सह संबद्धो नहि । तथा इह सूत्रे ( क्षिप् धातुः ) "क्षिपींत् प्रेरणे" इति तौदादिः ईदित् गृह्यते, न तु दैवादिकः, तस्य "शेषात्परस्मै" ( ३।३।१०० ) इत्यनेनानुबन्धशेषत्वेन परस्मैपदस्य सिद्धत्वात् ॥१०२॥

## प्राद्वहः ।३।३।१०३॥

वृत्तिः—प्रपूर्वाद्वहतेः कर्त्तरि परस्मैपदं स्यात् । प्रवहति ॥१०३॥

## परेर्मृषश्च ।३।३।१०४॥

वृत्तिः—परिपूर्वान्मृषेर्वहेश्च कर्त्तरि परस्मैपदं स्यात् । परिमृष्यति, परिवहति ॥१०४॥

---

अवचूरिः—मैत्रं परि मृष्यते, धनं परि वहते इत्यत्र मृषिवहिभ्यां सह परिर्न सम्बध्यत इति न परस्मैपदम् ॥१०४॥

## व्याऽऽङ्परे रमः ।३।३।१०५॥

वृत्तिः—व्याङ्परिभ्यः पराद् रमेः "कर्त्तरि परस्मैपदं" स्यात् । विरमति, आरमति, परिरमति । इदित्त्वादात्मनेपदस्यापवादः ॥१०५॥

## वोपात् ।३।३।१०६॥

वृत्तिः—उपपूर्वाद्रमेः परस्मैपदं वा स्यात् । भार्यामुपरमति उपरमते वा । उपसंप्राप्तिपूर्विकायां रतौ वर्त्तमानोऽन्तर्भूतणिगर्थो वा रमिः सकर्मकः । उपरमति उपरमते वा संतापः, उपरमति उपरमते वाऽवद्यात् ( पापात् ) ॥१०६॥

---

अवचूरिः—ननु रमिधातुरकर्मकस्तत्कथं भार्यामुपरमते

इति सकर्मकोदाहरणं दर्शितमित्याह-उपसंप्राप्तोऽन्यादि, अयमभिप्राय:-अकर्मका अपि धातव: सोपसर्गा: सकर्मका भवन्ति। उपपूर्वकस्तु रमिरकर्मकोऽपि स्यादिति "उपरमते संताप:, उपरमत्यवद्यात्" इति अकर्मकपरिणा (?मं) दर्शितमित्यर्थ: ॥१०६॥

## अणिगि प्राणिकर्तृकानाप्याण्णिगः

।३।३।१०७॥

वृत्तिः—अणिगवस्थायां यः प्राणिकर्तृकोऽकर्मकश्च धातुस्तस्माण्णिगन्तात् "कर्तरि परस्मैपदं" स्यात्। [1]आसयति चैत्रम्। अणिगिति गकारः किम्? णिजवस्थायां प्राणिकर्तृकानाप्याण्णिगन्ताद् यथा परस्मैपदं स्यात्- चेतयमानं प्रयुङ्क्ते=चेतयति। प्राणिकर्तृकादिति किम्? शोषयते व्रीहीनातपः। अनाप्यादिति किम्? कटं कुर्वाणं प्रयुङ्क्ते = कटं कारयते ॥१०७॥

अवचूरिः—[1]आस्ते चैत्रः, आसीनं चैत्रं मैत्रः प्रयुङ्क्ते,-णिग्। एवं शेते चैत्रः, चैत्रं शयानं मैत्रः प्रयुङ्क्ते=शाययति चैत्रम्। [2]शुष्यन्ति व्रीहयः, तान् व्रीहीन् शुष्यत आतपः प्रयुङ्क्ते, शोषयते व्रीहीनातपः। "प्राण्यौषधिवृक्षेभ्योऽवयवे च" (६।२।३१) इति सूत्रे प्राणिन औषधिवृक्षाः पृथग्-विभावे(गे)न दर्शिताः। तथाहि-इह शास्त्रे लोकप्रतीता एव त्रसरूपाः प्राणिनो गृह्यन्ते, न स्थावरा औषधिवृक्षाः, इति व्रीह्यादय औषधयः प्राणीति न प्रसिद्धाः। णिग् इत्यत्र गकारः किम्? अणिगवस्थायां प्राणिकर्तृकानाप्यात् णिजन्तात् परस्मैपदं मा भूत्, एतदर्थं गकारः कृतः, तेन चेतयते, नात्र परस्मैपदम्। ईगित् (३।३।९५) इत्यात्मनेपदस्यापवादोऽयमणिगि प्राणि० इति योगः ॥१०७॥

## [1]चल्याहारार्थेङ्[2]बुधयुधप्रद्रुस्रुनशजनः

।३।३।१०८॥

वृत्तिः—चल्यर्थेभ्यः, (कम्पनार्थेभ्यः) आहारार्थेभ्यः इङ्बुधयुधादिभ्यश्च णिगन्तेभ्यः "कर्तरि परस्मैपदं" स्यात्। चल्यर्थः,-चलयति, कम्पयति। आहारार्थः,-भोजयति, आशयति चैत्रमन्नम् (अश- भोजने)। इङ्,-सूत्रमध्यापयति[3] शिष्यम्। बुध्,-बोधयति पद्मं रविः, बोधयति शिष्यं धर्म्मम्। युध्,-योधयति काष्ठानि। प्रु,-प्रावयति राज्यं, प्रापयतीत्यर्थः। द्रु,-द्रावयत्ययः(लोहः)। स्रु,-स्रावयति तैलं, स्यन्दतीत्यर्थः। नश्,-नाशयति पापम्। जन्,-जनयति पुण्यम् ॥१०८॥ इति तृतीयस्याध्यायस्य तृतीयः पादः। ग्रन्थाग्रम्-२५५।

अवचूरिः—[1]चलिश्च आहारश्च, तयोरर्थश्चल्याहारार्थः, चल्याहारार्थश्च इङ् चेत्यादि। [2]"बुध अवगमने," "बुधृग् बोधने" इति भ्वादिकौ, "बुधि मनि च ज्ञाने" इति दिवादिः इति त्रयोऽपि बुधा गृह्यन्ते। [3]"णौ क्रीजीङः" (४।२।१०) इति आत्वम्। "च्युङ् ज्युङ् जुङ् प्रुङ् प्लुङ् गतौ," "इं दुं द्रुं शुं स्रुं गतौ" इति "प्रु द्रु स्रूणामचलनार्थार्थं, शेषाणां धातूनां सकर्म्मकार्थमप्राणिकर्तृकार्थं च चल्याहारेति वचनं कृतम् ॥१०८॥ अत्र सूत्रेऽवचूरिश्लोक-४४०, अक्षर-२३ (?)।

इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने तृतीयाध्यायस्य तृतीयः पादः समाप्तः

# ❋ तृतीयोऽध्यायः ❋

## ( चतुर्थः पादः )

### गुपौ-धूप-विच्छि-पणि-पनेरायः ।३।४।१॥

वृत्तिः—गुपादिधातुभ्यः "स्वार्थे आयप्रत्ययः" स्यात्। गोपायति, धूपायति, विच्छायति, [1]पणायति, पनायति। [2]अनुबन्धस्याशव्यायप्रत्ययाऽभावपक्षे चरितार्थत्वादायप्रत्ययान्ताभ्यां पणिपनिभ्यामात्मनेपदं न भवति। [3]गुपावित्यौकारो 'गुपि गोपने' इत्यस्य निवृत्त्यर्थो यङ्लुब्निवृत्त्यर्थश्च ॥ १ ॥

---

अवचूरिः—सूत्रे विशेषः कोऽपि न निर्दिष्ट इति स्वार्थे वृत्तावुक्तम्। गुपौ रक्षणे, तपं धूप संतापे, विच्छत् गतौ, पणि व्यवहारस्तुत्योः, पनि स्तुतौ। [1]पणायति-व्यवहरति, स्तौति वा, विलायतीत्यर्थः (?)। [2]आत्मनेपदस्य। [3]पणिपनी इदनुबन्धौ, इत्त्वात् ( इदित्त्वात् ) आत्मनेपदं प्रसिद्धमेवास्ति, परमशव्विषये पणिपनेः परत आत्मनेपदं भवति। यदि पणिपनेः परतः शव्विषयः तत्र परस्मैपदमेव भवति। यथा-पणायति, पनायति। ननु यङ्प्रत्ययस्य प्राप्तिरेव नास्ति, आय प्रत्यये सति धातोरनेकस्वरत्वात्; तत्कथं यङ्लुपि निवृत्त्यर्थश्चेत्युक्तम् ? सत्यम्, "अशवि ते वा" ( ३।४।४ ) इति वक्ष्यमाणसूत्रेणाऽशव्विषये विकल्पितस्याऽऽयस्य प्रथमं यङि कृते "प्रकृतिग्रहणे यङ्लुबन्तस्य ग्रहणम्" इति न्यायात् यङ्लोपानन्तरमायप्राप्तिरस्ति ॥ १ ॥

### कमेर्णिङ् ।३।४।२॥

वृत्तिः—कमेः "स्वार्थे णिङ्" स्यात्। कामयते ॥ २ ॥

---

अवचूरिः—णकारो वृद्ध्यर्थः। ङकारे ( ङकारः ) आत्मनेपदार्थः ॥ २ ॥

### ऋतेर्ङीयः ।३।४।३॥

वृत्तिः—ऋतः धातोः "स्वार्थे ङीयः" स्यात्। ऋतीयते। ङकार आत्मनेपदगुणाभावार्थः ॥३॥

---

अवचूरिः—'ऋत् घृणागतिस्पर्द्धेषु' इति ऋत् धातुः ॥३॥

### अशवि ते वा ।३।४।४॥

वृत्तिः—गुपादिभ्योऽशव्विषये "ते- आयादिप्रत्यया वा" स्युः। गोपायिता, गोप्ता; कामयिता, कमिता; ऋतीयिता, अर्त्तिता ॥४॥

---

अवचूरिः—धूपायिता, धूपिता; विच्छायिता, विच्छिता; पणायिता, पणिता; पनायिता, पनिता इयमुदाहरणावली गोप्ता-अग्रे ज्ञातव्या। गोपायिता, धूपायिता,

पणायिता, पनायिता, कामयिता, ऋतीयिता इत्यत्र विकल्पेनाऽऽये कृते स्वस्तनीता, "स्ताद्यशितोऽत्रोणादेरिट्" ( ४।४।३२ ) इति इट्, "अतः" ( ४।३।८२ ) इति सूत्रेण यकारसम्बन्ध्यकारो लुप्यते ॥४॥

## गुप्तिजो गर्हा-क्षान्तौ सन् ।३।४।५॥

वृत्तिः—"गुपो गर्हार्थे, तिजः [1]क्षान्त्यर्थे वर्तमानात् स्वार्थे सन् प्रत्ययः" स्यात्। जुगुप्सते, गर्हते इत्यर्थः; तितिक्षते, सहत इत्यर्थः। गर्हाक्षान्ताविति किम्? [2]गोपनं, गोपयति; तेजनं, तेजयति। अनयोरर्थान्तरेऽपि त्यादयो नोच्यन्ते-न विधीयन्ते इत्येत्यादिना प्रत्युदाहृतम्। एवमुत्तरसूत्रद्वयेऽपि प्रायेण ज्ञेयम् ॥५॥

अवचूरिः—'सन्' इत्यत्राऽकारोच्चारणं सन्ग्रहणसूत्रेषु, कोऽर्थः? सनाश्रितविधिषु सामान्येन स्वार्थसन इच्छासनश्च द्वयोरपि सनोर्ग्रहणार्थं कृतम्, नकारश्च 'सन्यङश्च' (४।१।३) इत्यत्र विशेषणार्थः कृतः। [1]सहनार्थे। गुपि गोपनकुत्सनयोः, तिजि क्षमानिशानयोः। [2]रक्ष्यत इति गोपनम्, अनट्। रक्षन्तं प्रयुङ्क्ते-गोपयति। तथा निशाय्यत इति तेजनम्। निश्यन्तं प्रयुङ्क्ते-तेजयति। 'त्यादयो नोच्यन्ते' इत्याद्यक्षराणामयं भावार्थः-प्रायेण गुप्तिजो *गेत्यादयः, त्यादिसमानार्थत्वाच्छत्रानशावपि न भवतः। केचिच्छत्रानशाविच्छन्ति, तन्मते गोपमानं, तेजमानं प्रयुङ्क्ते इत्यपि। तथा प्रायेणेति भणनात् गोपते, तेजते, केतति, बधते इत्याद्यपि भवन्ति। अत एव रसवाचकतिक्तशब्दसिद्धये तेजते इति वाक्यं कर्त्तव्यम् ॥५॥

## कितः संशय-प्रतिकारे ।३।४।६॥

वृत्तिः—"कितः संशये प्रतीकारे च वर्त्तमानात् स्वार्थे सन्" स्यात्। [1]विचिकित्सति, व्याधिं चिकित्सति, प्रतिकरोतीत्यर्थः। संशयप्रतीकार इति किम्? [2]केतनं, केतयति ॥६॥

अवचूरिः—कित निवासे। [1]संशयं करोतीत्यर्थः। निग्रहविनाशौ प्रतिकारस्यैव भेदौ, तेन क्षेत्रे चिकित्स्यः पारदारिकः, निग्राह्य इत्यर्थः, चिकित्स्यानि क्षेत्रे तृणानि, विनाशयितव्यानीत्यर्थः; अत्रापि सन् सिद्धः। [2]निवसत्यस्मिन्निति केतनं, निवसन्तं प्रयुङ्क्ते=केतयति ॥६॥

## शान्-दान्-मान्-बधान्निशाना-ऽऽर्जव-विचार-वैरूप्ये दीर्घश्चेतः ।३।४।७॥

वृत्तिः—"शानादिधातुभ्यो यथासंख्यं निशाने, आर्जवे, विचारे, वैरूप्ये ( च ) वर्त्तमानेभ्यः स्वार्थे सन्" स्यात्, एषां [1]द्वित्वे सति पूर्वस्येकारस्य दीर्घश्च। शीशांसति, शीशांसते; दीदांसते, दीदांसति; मीमांसते, बीभत्सते। अर्थनिर्देशः किम्? अर्थान्तरे मा भूत्,- निशानम्, अवदानं, मानयति,(मानण्-पूजायाम्) बाधयति ( बन्धण् संयमने ॥७॥

अवचूरिः—शान्दान्साहचर्यात् मानिधातुर्भ्वादिरेव ग्राह्यः, न तु चुरादिः। [1]द्विर्वचने कृते सति। शानी तेजने-शान्, दानी अवखण्डने-दान्, मानि पूजायाम्-मान्, बधि बन्धने-बध्, सन्, "सन्यङश्च" (४।१।३)इति द्वित्वं, "ह्रस्वः" ( ४।१।३९ ) इति दीर्घस्य ह्रस्वः, "सन्यस्य" ( ४।१।५९ ) इति अकारस्य इत्वं, ततः शान्दान्० सूत्रेण ईकारः। 'बीभत्सते' इत्यत्र "गडदबादे०" ( २।१।७७ ) इत्यादिना धातुबकारस्य भः, "प्राग्वत्" ( ३।३।४४) इत्यनेन आत्मनेपदम्। निशानम्, अवदानमित्यत्र 'शानी तेजने, दानी अवखण्डने;' परं धात्वन्तरेण वाक्यं, निश्यतीति निशानम्, अवद्यतीति अवदानम्, ●'अच्' ★"शोंच् तक्षणे, दों छोंच् छेदने" ॥७॥

---

*अत्र 'गेत्यादयः' इति पाठोऽशुद्धश्च्युतकियदंशश्च प्रतीयते। तत्स्थाने "उग्रे त्यादयो न भवन्ति" इति पाठः साधु प्रतिभाति।

●निशानम्, अवदानमित्यत्र 'अच्' ( ५।१। ४९ ) इति सूत्रेण 'अच्' प्रत्यय इत्यर्थः।

★'निश्यति' इत्यत्र 'शोंच् तक्षणे' इति शोधातुः, एवम् 'अवद्यति' इत्यत्र 'दों छोंच् छेदने' इति दोधातुरित्यर्थः।

## धातोः कण्ड्वादेर्यक् ।३।४।८॥

वृत्तिः-कण्ड्वादिधातुभ्यः "स्वार्थे यक् प्रत्ययः" स्यात् । कण्डूयति, कण्डूयते; महीयते, मन्तूयति । धातोरिति किम् ? कण्डूः । धातुग्रहणमुत्तरार्थमिह सुखार्थं च । कण्डूग्, गकारः फलवति "ईगितः" ( ३।३।९५ ) इत्यात्मनेपदार्थः ॥८॥

अवचूरिः—कण्डूग् गात्रविघर्षणे, महीङ् पूजायां वृद्धौ च, मन्तु रोषवैमनस्ययोः, "दीर्घश्च्वियङ्यक्क्येषु च" ( ४।३।१०८ ) इति दीर्घः । द्विविधाः कण्ड्वादयः, धातवो नामानि च; परमत्र प्रायेण धातवो गृह्यन्ते इत्युक्तं "कण्ड्वादिधातुभ्यः" । कण्डूग्, महीङ्, हृणीङ्, वेङ्, लाङ्, ङकार आत्मनेपदार्थः, मन्तु, वल्गु, असु, वेट्, लाट्, लिट्, लोट्, उरस्, उषस्, इरस्, अस्, तिरस्, इयेस्, इमस्, पयस् संभूयस्, दुवस्, दुरज्, भिषज्, भिष्णुक्, रेखा, लेखा, एला, वेला, केला, खेला, गोधा, मेधा, मगध, इरध, इषुध, कुषुम, सुख, दुःख, अगद, गद्गद, तरण, चरण, ( वरण् ) उरण, तुरण, पुरण, चुरण, ( वुरण् ) भरण, तन्तस्, ( तम्पस् ) पम्पस्, अरर, समर, सपर इति कण्ड्वादिगणः ॥८॥

## व्यञ्जनादेरेकस्वराद् भृशा-ऽऽभीक्ष्ण्ये यङ् वा ।३।४।९॥

वृत्तिः-"भृशाभीक्ष्ण्ये वर्त्तमानाद्धातोर्व्यञ्जनादेरेकस्वराद् यङ् प्रत्ययो वा" भवति । भृशं *पुनः पुनर्वा पचति=पापच्यते । धातोरित्येव– तेन सोपसर्गान्न यङ्,- भृशं प्राप्ति । व्यञ्जनादेरिति किम्? भृशमीक्षते । एकस्वरादिति किम् ? भृशं चकास्ति । भृशाभीक्ष्ण्य इति किम् ? पचति । वेति किम् ? लुनीहि लुनीहीत्येवायं लुनातीत्यादि यथा स्यात् ॥९॥

अवचूरिः—गुणक्रियानामधिश्रयणादीनां, कोऽर्थः ? अधिश्रयणं-चुल्युपरि स्थाल्यादिरोपणमादिर्येषां तृणकाष्ठक्षेपणादीनां-ते, तेषां क्रियान्तरैर्विरोधिग्रामगमनादिभिरव्यवहितानां साकल्येन संपत्तिः-निष्पत्तिर्भृशत्वमुच्यते, फलातिरेको वा, कोऽर्थः ? अधिश्रयणादीनां यत् साध्यं फलं कर्तुं विवक्षितं, तस्मात् अतिरेकः-आधिक्यम्, अत्यर्थता इति यावत्, फलस्य समाप्तावपि क्रियाया अनुपरतिर्वा, स ईदृग् फलातिरेको भृशत्वमुच्यते । तथा प्रधानक्रियाया विश्लेदादेः क्रियान्तराऽव्यवधानेनावृत्तिराभीक्ष्ण्यमुच्यते ॥९॥

## अट्यर्तिसूत्रिमूत्रिसूच्यशूर्णोः ।३।४।१०॥

वृत्तिः-–"एभ्यो भृशाभीक्ष्ण्यार्थवृत्तिभ्यो यङ्" स्यात् । भृशं पुनः पुनर्वाऽटति-अटाट्यते, एवं इयर्त्ति ऋच्छति वा-[१]अरार्यते, सोसूत्र्यते, मोमूत्र्यते सोसूच्यते, अश्नुते अश्नाति वा-अशाश्यते, [२]प्रोर्णोनूयते ॥१०॥

अवचूरिः—[१]ऋक् गतौ, भृशं पुनः पुनर्वा इयर्त्ति- 'अरार्यते,' यङ्, "क्ययङाशीर्ये" ( ४।३।१० ) इति गुणः-ऋस्थाने अर्, अर्य, "स्वरादेर्द्वितीयः" ( ४।१।४ ) इति द्वित्वम्, ( अर्यर्य ) "व्यञ्जनस्यानादेर्लुक्" (४।१।४४। इति) आद्ययकारलोपः, "आगुणावन्यादेः" ( ४।१।४८ ) इति आकारः । एवमटाट्यते । सूत्रण् विमोचने, मूत्रण् प्रस्रवणे, सूचण् पैशुन्ये, अशूटि ( अशौटि ) व्याप्तौ, अशस् भोजने, ऊर्णुग्क् आच्छादने । [२]प्र ( प्रपूर्वः ), भृशं पुनः पुनर्वा प्रोर्णोति- यङ्, स्वरादेर्द्वितीयः" ( ४।१।४४ ) इति तथा "अयि रः" ( ४।१।६ ) इति 'न्नु' विश्लिष्य "नवमसत्परे स्यादिविधौ च" ( २।१।६० ) इति सूत्रेण द्वित्वरूपे परे विधौ कर्तव्ये णत्वशास्त्रस्यासिद्धत्वात् 'नु' इत्यस्य द्वित्वम् । अट्यर्त्यशामव्यञ्जनादित्वात्, सूत्रिमूत्रिसूचीनामनेकस्वरात्, ऊर्णोतेरव्यञ्जनाद्यनेकस्वरत्वात् "व्यञ्जनादेः०" ( ३।४।९ ) इति सूत्रेणाऽप्राप्ते सति अट्यर्त्तिसूत्रि० इति सूत्रं कृतमित्यर्थः ॥१०॥

*'पुनः पुनः इत्याभीक्ष्ण्यार्थः ।

## गत्यर्थात् कुटिले ।३।४।११॥

वृत्तिः-व्यञ्जनादेरेकस्वराद् गत्यर्थात् "कुटिल एवार्थे वर्त्तमानाद्धातोर्यङ्" स्यात्, न भृशाभीक्ष्ण्ये। कुटिलं क्रामति=[1]चंक्रम्यते, (एवं) दंद्रम्यते। कुटिल इति किम्? भृशमभीक्ष्णं वा क्रामति। धात्वर्थविशेषणं किम्? साधने कुटिले मा भूत्,- कुटिलं पन्थानं गच्छति। [2]कथं जङ्गमः? रूढिशब्दोऽयम्, [3]लक्षणया स्थावरप्रतिपक्षमात्रे वर्त्तते ॥११॥

अवचूरिः—[1]"मुरतोऽनुनासिकस्य" (४।१।५१) इति मोऽन्तः। [2]"जङ्गमः" इत्यत्र कुटिलार्थाभावात्कथं यङ् इति पराऽऽशङ्का, तत्राह-रूढीति, गम्धातुः, गच्छतीति जङ्गमः, "गमेर्जम् च वा" (१३) इत्युणादिसूत्रेण अप्रत्ययः, (द्वित्वे) धातोः पूर्वं 'जम्' इत्यादेशश्च, (इत्येवं) जङ्गमः इति सिद्धम्। [3]यन्मुख्यं प्रवृत्तिनिमित्तं शब्दस्य तत्प्रत्यासत्त्या तदुपलक्षितं धर्मान्तरमुपादाय प्रवृत्तिर्लक्षणा उच्यते, तया ॥११॥

## गॄ-लुप-सद-चर-जप-जभ-दश-दहो गर्ह्ये ।३।४।१२॥

वृत्तिः—"गर्ह्य एवार्थे वर्त्तमानेभ्यो गॄप्रभृतिधातुभ्यो यङ्" स्यात्। गर्हितं-निन्द्यं निगिरति—निजेगिल्यते, (एवं) लोलुप्यते, सासद्यते, [2]चञ्चूर्यते, जञ्जप्यते, दन्दश्यते, दंदह्यते। दंशेः कृतनलोपस्य निर्देशो यङो लुप्यपि नलोपार्थः, तेन [3]दंदशीति। गर्ह्य इति किम्? साधु जपति। धात्वर्थविशेषणं किम्? साधने गर्ह्ये मा भूत्,- जपति वृषलः। नियमः किम्? भृशं पुनः पुनर्वा निगिरति, कुटिलं चरतीत्यत्र न यङ् ॥१२॥

अवचूरिः—न भृशादिष्वित्येवकारार्थः। [1]गॄत् निगरणे, गर्हितं-निन्द्यं निगिरति इति यङ्, "ॠतां क्ङितीर्" (४।४।११६) इति ईर्, "सन्यङश्च" (४।१।३) इति द्वित्वं, "गहोर्जः" (४।१।४० इति पूर्वस्य गस्य जः,) "आगुणावन्यादेः" (४।१।४८) इति गुणः, "ग्रो यङि" (२।३।१०१) इति रस्य लत्वम्। [2]"चरफलाम्" (४।१।५३) इत्यभ्यासे मोन्तः, "ति चोपान्त्यातोऽनोदुः" (४।१।५४) इति धातोः अतः उः, "भ्वादेर्नामिनो दीर्घो" इत्यादिना (२।१।६३ सूत्रेण) दीर्घः, (इत्येवं) चञ्चूर्यते (इति सिद्धम्) [3]"जपजभदहदशभञ्जपशः" (४।१।५२) इत्यनेनाभ्यासे मोऽन्तः, "अन्तरङ्गानपि विधीन्बहिरङ्गा लुब् बाधते" इति न्यायात्प्रथमं यङो लोपे कृते "नो व्यञ्जनस्य०" (४।२।४५) इत्यनेन नकारस्य लोपो न भवेदित्येतदर्थम् ॥१२॥

## न गृणा-शुभ-रुचः ।३।४।१३॥

वृत्तिः-गृणातिशुभिरुचिभ्यो [1]भृशादौ "यङ् न" स्यात्। गर्हितं गृणाति, भृशं शोभते, [2]रोचते ॥१३॥

अवचूरिः—[1]आदिशब्दाद् गृणातेर्गर्ह्योऽप्यर्थे न यङ्। [2]भृशं पुनः पुनर्वा रोचते। गॄश् शब्दे, शुभि दीप्तौ (रुचि अभिप्रीत्यां च) ॥१३॥

## बहुलं लुप् ।३।४।१४॥

वृत्तिः-"यङो [1]बहुलं लुप्" स्यात्। बोभूयते, [3]बोभवीति, बोभोति। बहुलग्रहणं प्रयोगानुसरणार्थम्, तेन क्वचिद् यङ् न लुप्यते,-[1]लोलूया, पोपूया ॥१४॥

अवचूरिः—[1]बहुङ् महुङ् वृद्धौ, बह्, "उदितः स्वरान्नोऽन्तः" (४।४।९८। इति) बंह्, बंहतेऽस्मात्कार्यंजातमिति "बहुलम्," "स्यावङ्किवंहितन्दिभ्यः किन्नलुक्"★ (४८६) इत्युणादिसूत्रेण "उल" (प्रत्ययस्तथा) नोऽन्तलोपः। [2]लोलूयनं-लोलूया, पोपूयनं-पोपूया, "शंसिप्रत्ययात्" (५।३।१०५) इत्यनेन अप्रत्ययः, "आत्" (२।४।१८) इत्यनेन आप्। [3]भृशं

★इदं सूत्रमशुद्धं प्रतीयते, बृहद्वृत्तौ "स्यावङ्किबंहिबन्दिभ्यः किन्नलुक् च" इत्याकारकसूत्रस्य दर्शनात्।

पुनः पुनर्वा भवति-यङ्, "द्वितीयतुर्ययोः पूर्वौ" ( ४।१।४२ ) इति भस्य बः, "आगुणावन्यादेः" ( ४।१।४८। इति द्वित्वे पूर्वस्य गुणः,) "बहुलं लुप्" इति यङो लोपः, यङ्लोपानन्तरं "यङ्तुरुस्तोर्बहुलम्" ( ४।३।६४ ) इत्यनेन ईत्, ( इत्येवं ) बोभवीतीति सिद्धम्। बोभोतीत्यत्र बहुलबलात् क्वचिद् ( ईत् ,विकल्पः ॥१४॥

## अचि ।३।४।१५॥

वृत्तिः—"अचिप्रत्यये परे यङो लुप्" स्यात्। लोलुवः, पोपुवः, नेन्यः ॥१५॥

अवचूरिः—नित्यार्थं वचनमिदम्। लोलूयत इति लोलुवः, एवं पोपुवः इति वाक्ये यङन्तात् "अच्" ( ५।१।४६ )इति अच्,"अचि"इति सूत्रेण यङ् लुप्यते,"धातोरिवर्णोवर्णस्य०" ( २।१।५० ) इत्यनेन 'उव्' आदेशः। 'नेन्यः' इत्यत्र अचि कृते "योऽनेकस्वरस्य" ( २।१।५६ ) इति सूत्रेण 'य्' आदेशः ॥१५॥

## नोतः ।३।४।१६॥

वृत्तिः—"उकारान्तधातोर्विहितस्य यङोऽचि परे लुप् न" स्यात्। योयूयः, रोरूयः ॥१६॥

अवचूरिः—योयूयः, रोरूय इत्यत्र "बहुलं लुप्" ( ३।४।१४ ) इत्यनेनापि यङ् न लुप्यते, पृथग्योगकरणात्, अन्यथा "अचि नोतः" इत्येकमेव योगं कुर्यात् ॥१६॥

## चुरादिभ्यो णिच् ।३।४।१७॥

वृत्तिः—'णितश्चुरादयः। चुरादिधातुभ्यः "स्वार्थे णिच् प्रत्ययः" स्यात्। चोरयति, नाटयति। णकारो वृद्ध्यर्थः, णिग्रहणसूत्रेषु सामान्यग्रहणार्थश्च। "अनित्यो हि णिच् चुरादीनां" "घुषेरविशब्दे" ( ४।४।६६ ) इत्यत्र ज्ञापयिष्यते। बहुवचनमाकृतिगणार्थम्, तेन संवाहयतीत्यादि सिद्धम् ॥१७॥

अवचूरिः—'णकारानुबन्धाः चुरादयः। "चुरादिभ्यो णिच्" इति सूत्रे विशेषोऽयं लिख्यते-चुरादिगणे 'इतोऽदन्ताः' इत्युक्तमस्ति, इतोऽङ्कणादयो धातवोऽदन्ता ज्ञातव्याः। अदन्तत्वं च •सुखादिधातूनां णिच् संयोगे एव द्रष्टव्यम्, तेन णिजभावे "जगणतुः, जगणिथ" इत्यत्र परोक्षायां सत्यामनेकस्वरत्वाभावात् 'आम्' प्रत्ययो न भवति, द्विर्वचने कृते अनेकस्वरत्वेपि संनिपातेतिन्यायान्न 'आम्'। 'संवाहयति,' कोऽर्थः? अङ्गानि मृद्नाति, विश्रामणां करोतीत्यर्थः ॥१७॥

## युजादेर्नवा ।३।४।१८॥

वृत्तिः—चुरादिप्रान्ते गणे युजादिः। युजादिधातुभ्यः "स्वार्थे वा णिच्" स्यात्। योजयति, योजति; साहयति, सहति ॥१८॥

अवचूरिः—

नदीवप्रान् भित्त्वा कुवलयमिवोत्पाट्य च तरून्,
मदोन्मत्तान् हत्वा करचरणदन्तैः प्रतिगजान्।
जरां प्राप्यानार्यां तरुणजनविद्वेषजननीं,

•नन्वदन्तधातूनामादौ अङ्कधातुर्वर्तते, सुखधातुस्तु तृतीयः, ततोऽत्रादन्तत्वं च "अङ्कादीना"मिति वक्तव्ये कथमदन्तत्वं च "सुखादीना" मित्युक्तम्? सत्यम्, अङ्कादीनामिति वक्तव्येऽप्यङ्कक्लेष्कयोः फलाभावात् सुखादीनामित्युक्तम्। इदमुक्तं भवति—धातूनामदन्तत्वस्य फलं यथासम्भवं वृद्ध्यादेरभावः, परमङ्कक्लेष्कधातू मध्येऽदन्तधातु न पठेत् तथापि वृद्ध्यादेः प्राप्तिरेव नास्ति, वृद्ध्यादियोग्यान्त्योपान्त्यस्वराद्यभावात्, इत्यङ्कक्लेष्कयोरदन्तत्वे वृद्ध्याद्यभावरूपफलाभावादङ्कादीनामित्यनुक्त्वा सुखादीनामित्युक्तम्। ननु तर्हि कथमन्तरदन्तं पठति? इति चेद्, पूर्वाचार्यानुरोधात्, पूर्वाचार्यैः स्वव्याकरणेऽङ्कक्लेष्कधात्वदन्तमध्ये पठिताविति श्री हेमचन्द्रसूरिर्भगवानपि तथैव पठति। एवमेवंविधान्यधातुष्वपि ज्ञातव्यम्।

स एवायं नागः सहति कलभेभ्यः परिभवम्॥१॥(शिखरिणी)
इति चुरादिसहधातुप्रयोगे पूर्वकविप्रयोगोऽयं, भ्वादिना तु 'सहते' इति स्यात् ॥१८॥

## भूङः प्राप्तौ णिङ् ।३।४।१९॥

वृत्तिः—"भूधातोः प्राप्तावर्थे वर्त्तमानात् णिङ् प्रत्ययो वा" स्यात् । भावयते, भवते; प्राप्नोतीत्यर्थः । प्राप्तावित्येव- भवति । णिङिति ङकार आत्मनेपदार्थः । भूङ इति ङकारनिर्देशो णिङभावेऽप्यात्मनेपदार्थः । प्राप्त्यर्थाभावेऽपि क्वचिदात्मनेपदमिष्यते, यथा—

"याचितारश्च नः सन्तु, दातारश्च भवामहे।
आक्रोष्टारश्च नः सन्तु, क्षन्तारश्च भवामहे" ॥१॥
( अनुष्टुब् )

प्राप्त्यर्थेऽपि परस्मैपदमित्यन्ये, यथा-सर्वं भवति, सर्वं प्राप्नोतीत्यर्थः । ( अवकल्कनाऽर्थे तु ) 'भूण् अवकल्कने' इति चुरादिपाठात् भावयतीत्येव ॥ १९ ॥

## प्रयोक्तृव्यापारे णिग् ।३।४।२०॥

वृत्तिः—कर्त्तारं यः प्रयुङ्क्ते प्रेरयति, व्यापारयतीत्यर्थः, सः प्रयोक्ता, "तद्व्यापारे वाच्ये धातोर्वा णिग् प्रत्ययो" भवति । व्यापारश्च प्रेषणाध्येषणानिमित्तभावाख्यानाभिनयज्ञानप्राप्तिभेदैरनेकधा भवति। कुर्वन्तं प्रयुङ्क्ते = कारयति, अत्र प्रेषणाध्येषणे णिग्; एवं वसन्तं प्रयुङ्क्ते = वासयति,अत्र निमित्ते णिग्; भिक्षा राजानमागमयति, रात्रिं विवासयति कथकः, कंसं घातयति, बलिं बन्धयति नटः, पुष्येण चन्द्रं योजयति गणकः–ज्योतिष्कः, उज्जयिन्याः प्रदोषे प्रस्थितो माहिष्मत्यां नगर्यां सूर्यमुद्गमयति, उज्जयन्तात्(-रैवतकात्) प्रातः प्रस्थितः शत्रुञ्जये सूर्यं पातयति। ननु कर्त्ताऽपि करणादीनां प्रयोजक इति तद्व्यापारेऽपि णिग् प्राप्नोति । नैव, प्रयोक्तृग्रहणसामर्थ्यात् । तथा क्रियां कुर्वन्नेव कर्त्तोच्यते, तेन तूष्णीमासीने प्रयोज्ये "अनुयुङ्क्तां मा भवान्" इत्यत्र न णिग् ॥२०॥

अवचूरिः—"युजादेर्नवा" ( ३।४।१८ ) इति सूत्रादारभ्य नवा इत्यधिकारो……………… ( "भूङः ) प्राप्तौ ………………( णिङ्," ) "प्रयोक्तृव्यापारे णिग्" इत्यादिसूत्रेषु २३* "णिज् बहुलं नाम्नः कृगादिषु" इति सूत्रे यावज्ज्ञातव्यः । एकत्र सूत्रैः प्रत्यया भवन्ति, पक्षे वाक्यं तिष्ठति; यथा-कारयति, कुर्वन्तं प्रयुङ्क्ते इति । पराभिभवपूर्वको व्यापारः प्रेषणमुच्यते, सत्कारपूर्वको व्यापारोऽध्येषणमुच्यते; एतयोरुदाहरणमेकमेव, यथा-'कारयति,' अत्र प्रेषणेन वा अध्येषणेन वा यथासंभवं प्रयोक्तृत्वम् । तथा निमित्तभावेन-कारणसंभवे प्रयोक्तृत्वम्, यथा-"वासयति भिक्षा, कारीषाऽग्निरध्यापयति; ' अत्र भिक्षाप्राप्त्यग्निप्रज्वलने निमित्तं कारणम् । "राजानमाग ( म ) यति, रात्रिं विवासयति कथकः;" अत्र आख्यानेन प्रयोक्तृव्यापारः, कथककथानकरसविस्तारेण श्रोतृजनचित्तवर्त्तमाना राजादयः प्रयुक्ताः-प्रवर्तिताः प्रतीयन्ते । तथा "कंसं घातयति, बलिं बन्धयति नटः;" अत्राभिनयेन । तथा "पुष्येण चन्द्रं योजयति गणकः" इत्यत्र ज्ञानेन । "उज्जयिन्याः प्रदोषे प्रस्थितः उज्जयन्तात् प्रातः प्रस्थितः" इत्यत्र प्राप्त्या । प्रयोक्तृव्यापारकेन* सप्तधा प्रयोक्तृव्यापारविधिः । राजानमागच्छन्तं प्रयुङ्क्ते,-णिग्, "ञ्णिति" ( ४।३।५० इति ) वृद्धिः, "अमोऽकम्यमिचमः" ( ४।२।२६ ) इति ह्रस्वः । तथा विपूर्वो वस् धातुरतिक्रमेऽर्थे वर्त्तते, तेन "विवासयति," कोऽर्थः ? अतिक्रमयति । कथको व्यासस्तथा कथानकरसं कथयति,

*त्रयोविंशतिसूत्रेष्वित्यर्थः । इयं गणना 'प्रयोक्तृ०' इति प्रकृतसूत्रादारभ्य 'णिज् बहुलम्०' इति सूत्रं यावद् विधेया, 'युजादेर्नवा' इति सूत्रं सूत्राद् "णिज् बहुलम्०" इति सूत्रं यावत्तु पञ्चविंशतिसूत्राणि भवन्ति ।

*व्यापार एव व्यापारक इति स्वार्थे कप्रत्ययः ।

यथा श्रोतॄणां रात्रिः सुखेन परिगलति, अत्र आख्यानेन णिग् । कंसं घ्नन्तं प्रयुङ्क्ते-कंसं घातयति, हनः परो णिग्, "ञ्णिति घात्" ( ४।३।१०० ) इति सूत्रेण हन्-स्थाने 'घात्' इत्यादेशः । बन्धश् बन्धने, बध्नन्तं प्रयुङ्क्ते,-णिग्, अत्र अभिनयेन, नटो नाटकरङ्गं तथाऽनुभवं दर्शयति, यथा जनो जानाति कंसो मारितो, बलिर्बन्धापितः ( उत्पलमतेनान्त्याऽकारस्य वृद्धिः ✒ ) । "पुष्येण युञ्जन्तं प्रयुङ्क्ते," अत्र ज्ञानेन-ज्योतिर्विद्यया । उद्गच्छन्तं प्रयुङ्क्ते पान्थः, *तथा सूर्योदयस्तमनकारयतीति प्राप्तौ अस्तमयति (?) । "ननु कर्त्ताऽपि"(इति)- एतस्य भावार्थोऽयं लिख्यते-कटं करोतीत्यादौ मुख्यकर्तृव्यापारेऽपि णिग् प्राप्नोति, अत्रापि प्रयोगव्यापारस्य विद्यमानत्वात्; तथापि (तथाहि)- कटं करोतीति कोऽर्थः ? जायमानं कटं जनयतीत्यर्थः, इति पराशङ्कायामाह- प्रयोक्तृग्रहणसामर्थ्यात् । सूत्रे "प्रयोक्तृ" इति किं कृति ( कृतं ) ? तस्य प्रयोक्तुर्यद्ग्रहणं, कोऽर्थः? "प्रयोक्तृ" इत्यक्षरकरणं, तत्सामर्थ्यात् कर्त्तारं यः प्रयुक्ते-व्यापारयति, स हि प्रयोक्ता; यदि च व्यापारमात्रे णिग् स्यात्, तदा "व्यापारे णिग्" इत्येव सूत्रं कुर्वीत । "तूष्णीम्" इत्यादि, प्रयोज्ये च्छात्रे-पृच्छ्ये शिष्ये तूष्णीमासीने-मौनं कृतवति प्रयोजकः-प्रच्छिक्रियायाः कारयिता प्राह-मां पृच्छतु भवान्, अनुयुङ्क्तां मां भवान् इति व्यापारमात्रे प्रयोगे णिग् न भवति । १ "मां पृच्छतु भवान्" इत्यपि ज्ञेयम् ॥२०॥

## तुमर्हादिच्छायां सन्नतत्सनः ।३।४।२१॥

वृत्तिः-यो धातुरिषेः कर्म इषिणैव सह(च)समानकर्तृकः स तुमर्हो धातुः, "तस्माद् तुमर्हात् धातोः इच्छायामर्थे सन् वा" स्यात् ; अतत्सनः, कोऽर्थः ? इच्छासनन्तात्पुनरपि न सन् । कर्तुमिच्छति-चिकीर्षति । तुमर्हादिति किम् ? अकर्मणोऽसमानकर्तृकाच्च सन् मा भूत्,-[1]गमनेनेच्छति, [2]भोजनमिच्छति मैत्रस्य । इच्छायामिति किम् ? भोक्तुं याति । अतत्सन इति किम् ?[3]चिकीर्षितुमिच्छति । तद्ग्रहणं किम् ? जुगुप्सिषते । सनोऽकारः किम् ? अर्थान् प्रतीषिषति । नकारः सनग्रहणेषु विशेषणार्थः ॥२१॥

अवचूरिः-[1]गमधातुपरतः। [2]भुजिधातुपरतः। [3]चिकीर्षणं- चिकीर्षितुं, "शकधृषज्ञारभलभसहार्हग्लाघटास्तिसमर्थार्थे च तुम्" ( ५।४।९० ) इत्यनेन तुम् । ★'अट पट इट किट कट कटु कटै' इ गतौ, इ प्रतिपूर्वकं, प्रत्येतुमिच्छति,-'सन्,' "स्वरादेर्द्वितीयः" ( ४।१।३ ) इत्यनेन सनो द्वित्वम्, इति सनोऽकारविधानफलम् । कथं नदीकूलं पिपतिषति ?, श्वा मुमूर्षत ?; अत्रोत्तरम्, पतितुमिच्छति, मर्तुमिच्छतीति वाक्यवदुपमानादत्रापि सन् भविष्यतीत्यर्थः । एषाऽवचूरिस्तुमर्हा० इति सूत्रप्रान्ते ज्ञेया ॥२१॥

## द्वितीयायाः काम्यः ।३।४।२२॥

वृत्तिः-"द्वितीयान्तान्नाम्न इच्छाऽर्थे काम्यप्रत्ययो वा" स्यात् ।पुत्रमिच्छति (इति) वाक्यं, पुत्रकाम्यति; इदमिच्छति-इदं काम्यति, स्वरिच्छति-स्वःकाम्यति द्वितीयाया इति किम् ? इष्यते पुत्रः, तथा भ्रातुः पुत्रमिच्छति, आत्मनः पुत्रमिच्छति; अत्र कथं न काम्यः ? ( इति ) पृच्छा, उत्तरम्- [1]सापेक्षत्वात् । [2]भ्रातुष्पुत्रकाम्यतीत्यत्र समर्थत्वात्काम्यः ॥२२॥

अवचूरिः—"द्वितीयायाः काम्यः" इति सूत्रे काम्येनैव कर्मण उक्तत्वात् भावकर्त्रोरेव काम्यप्रयोगः, यथा-पुत्रकाम्यत्यसौ । तथा काम्यप्रत्ययस्य सस्वरस्य फलम्

---

✒'बन्धापितः' इत्यत्र ।

*'तथा' इत्यतः 'अस्तमयति' इति यावत् पाठेऽशुद्धिः प्रतिभाति ।

★"अट" इत्यतः 'कटै' इति यावद् धातुपाठः प्रस्तुतेऽसंगतः प्रतीयते ।

@'अजघटकाम्यत्,' ℅'तत्काम्याञ्चकार' इत्यादौ ज्ञातव्यम् । [1]"सापेक्षत्वात्" इति- नह्यन्यमपेक्ष्यमाणोऽन्येन सहैकार्थीभावमनुभवितुं शक्नोतीत्यर्थः, तथा "अघमिच्छति, दुःखमिच्छति" इत्यत्रापि नहि कोऽप्यात्मनोऽघं दुखं वा इच्छति इति परस्यैवेत्यु (य) पेक्षितत्वात् सापेक्षत्वमस्ति, इति काम्यो न भवति । कथं तर्हि पुत्रकाम्यतीत्यत्र पुत्रस्यात्मीयता गम्यते ? अत्राह—अन्यस्याऽश्रुतेः इच्छायाश्च प्रायेणात्मविषयत्वात् । [2]"ऋतां विद्यायोनिसम्बन्धे" ( ३।२।३७ ) इत्यलुक् समासः, "भ्रातुष्पुत्रकस्कादयः" ( २।३।१४ ) इति षत्वम् ॥२२॥

## अमाऽव्ययात् [1]क्यन् च ।३।४।२३॥

वृत्तिः—अमकारान्तादनव्ययाच्च "द्वितीयान्तान्नाम्न इच्छार्थे क्यन् वा स्यात्, काम्यश्च" । [2]पुत्रीयति, पुत्रकाम्यति । चकारः काम्यार्थः, [3]अन्यथा मान्ताऽव्यययोः सावकाशः स क्यना बाध्येत । अमाव्ययादिति किम् ? इदमिच्छति, स्वरिच्छति । नकारः "क्यनि" ( ४।३।११२ ) इत्यत्र विशेषणार्थः । [4]ककारः क्यग्रहणे सामान्यग्रहणार्थः ॥२३॥

अवचूरिः—"अमाव्ययात् क्यन्च"इति सूत्रे क्यन्प्रत्यये यकारः सस्वर एव, सस्वरत्वे सति "कीयाञ्चकार" इत्यादौ आम् प्रत्ययः सिद्धः । कमियेष—क्यन्, "क्यनि" इति दीर्घः 'ई,' ततः परो……………( "धातोरनेकस्वरादाम् परोक्षायाः, कृभ्वस्ति चानु तदन्तम्" ( ३।४।४६। इति परो) क्षादिकं विधेयम् । मश्च-मकारोऽव्ययं च-माऽव्ययं,न माऽव्ययम्-अमाऽव्ययं, तस्मात् । 'म' इति मकारान्तशब्दपरिग्रहः । [2]पुत्रमिच्छति । [3]चकारं विना ( इदमिच्छति, स्वरिच्छतीत्यादौ ) मान्ताव्ययाभ्यां परतः काम्यः सावकाशः सन् क्यना काम्यो बाध्येत, ●तत इदं काम्यति, स्वःकाम्यति इति न सिध्येत्, परं मान्ताव्ययाभ्यां काम्य इष्टोऽस्ति, "द्वितीयायाः काम्यः" इति सूत्रे । [4]"नं क्ये"(१।१।२२)"क्यो वा"(४।३।८१) "दीर्घश्च्वियङ्यक्क्येषु च ( ४।३।१०८ ) इत्यादि सूत्रेषु ॥२३॥

## आधाराच्चोपमानादाचारे ।३।४।२४॥

वृत्तिः—"अमाऽव्ययादुपमानभूतात् द्वितीयान्तादाधाराच्चाचारे क्यन् वा" स्यात् । द्वितीयान्तात्,-पुत्रमिवाचरति (इति) वाक्यम्, पुत्रीयति छात्रम्; आधारात्-प्रसाद इवाचरति (इति) वाक्यम्, प्रासादीयति कुट्याम् । उपमानादिति किम् ? छात्रादेर्मा भूत् । आधाराच्चेति किम् ? परशुना दात्रेणेवाचरति । अमाऽव्ययादित्येव- इदमिवाचरति ॥२४॥

@घटमिच्छति-घटकाम्यति, घटकाम्यन्तं प्रायुङ्क्त इत्यत्र ङपरे णौ सस्वरस्य काम्यस्य—स्वरान्तकाम्यस्य सत्वात् "अतः" ( ४।३।८२ ) इत्यनेनान्त्याकारलोपे समानलोपित्वाद् "असमानलोपे सनवल्लघुनि ङे" ( ४।१।६३ ) इत्यनेनाभ्यासे पूर्वस्य सन्वद्भावो न प्रवर्तते, एवं "लघोर्दीर्घोऽस्वरादेः" ( ४।१।६४ ) इत्यस्याप्यप्रवृत्तिः, ततः 'अजघटकाम्यत्' इति भवति । अन्यथा—स्वरान्तकाम्यस्यासत्त्वे समानलोपित्वाऽभावाद् 'असमानलोपे०' इत्यादिना "अजीघटकाम्यत्" इति स्यात्, तच्चानिष्टम् ।

℅अत्र पाठाशुद्धिः, 'त्काम्याञ्चकार' इति पाठः शुद्धः । तकारमियेष = त्काम्याञ्चकार, 'तकारम्' इत्यस्य केवलं 'त्' इति वर्णमित्यर्थः । अत्रायमाशयः—'काम्य्' इति व्यञ्जनान्तप्रत्ययविधाने 'तकारमियेष' इत्यत्र 'त्काम्य्' इत्येकस्वर एव धातुरिति 'परोक्षायाः स्थाने आमादेशाभावः' स्यात्, स चानभिमतः । 'काम्य' इति स्वरान्तप्रत्ययविधाने तु 'त्काम्य' इति धातोरनेकस्वरत्वादामादेशो भवति ।

●अत्र "ततः" इत्यत आरभ्य "सूत्रे" इति यावत् पाठोऽशुद्ध आभाति । अत्रायं पाठः समुचितः प्रतिभाति, तद्यथा—"ततः पुत्रमिच्छतीत्यादावमान्ताव्ययेभ्यः परतः "क्यन् एव" प्रवर्तेत, ततश्च पुत्रकाम्यतीत्यादि सिद्धिपथं नेयात्, परं "द्वितीयायाः काम्यः" इति सूत्रेणामान्ताव्ययेभ्योऽपि काम्यप्रत्यय इष्टः, अतोऽत्र काम्यस्य कृते चकारः पठितः ।

## कर्तुः क्विप्, गल्भक्लीबहोडात्तु ङित् ।३।४।२५।।

वृत्तिः–"कर्तुरुपमानान्नाम्न आचारार्थे क्विप् प्रत्ययो' वा स्यात्, गल्भक्लीबहोडेभ्यस्तु क्विप् ङित्" । अश्व इवाचरति ( इति ) वाक्यम्, अश्वति; राजेवाचरति ( इति ) वाक्यम्; राजनति गल्भते, क्लीबते, होडते, गल्भाञ्चक्रे ।।२५।।

अवचूरिः—"अश्वति' इति- अश्व इवाचरति। एवं गर्दभति, वधयति । गौरिवाचरति, नौरिवाचरति,–क्विप्, ( गवति, नावति; ) गवनं नावनम्; "शंसिप्रत्ययात्" (५।३।१०५ ) इति अप्रत्यये गवा, नावा इत्यपि ज्ञेयाऽवचूरिः । "राजनति," अत्र क्विप्प्रत्ययस्य व्यञ्जनादिफलं नेष्यते, तेन "नाम सिदय्व्यञ्जने" (१।१।२१) इति सूत्रेण पदसंज्ञाया अभावेन राजन्शब्दस्य नकारलोपाभावः सिद्धः । 'गल्भाञ्चक्रे,' गल्भ इवाचरति, "कर्तुः क्विप्०" इति क्विप्, "अप्रयोगीत्" (१।१।३७: इति क्विपो लुप् ) ततः परोक्षा ए, "धातोरनेकस्वरादाम् परोक्षायाः, कृभ्वस्ति चानु तदन्तम्" ( ३।४ ४६ ) इत्यादिना परोक्षास्थाने आम् प्रत्ययः, चक्रे इत्यनुप्रयोगः कार्यः । विशेषोऽत्रायं ज्ञेयः- गल्भते, क्लीबते, होडत इत्यादि प्रयोगाः, 'गल्भि धार्ष्ट्ये, क्लीबृङ् मदे, हेडृङ् अनादरे' इति धातुभिर्गल्भते, क्लीबते, होडत एव सिध्यन्ति, परं "गल्भाश्चक्रे" इति ( न सिध्यति, ) गल्भधातु(तुः) मण्डने, (?) अग्रे परोक्षा, तदनन्तरमाम् न स्यात्, अनेकस्वरधात्वऽभावात्; इति हेतोः गल्भशब्दः, गल्भ इवाचरतीति वाक्ये क्विप् ; एवं नामधातोः परतोऽनेकस्वरत्वात् आम् सिद्धः। सूत्रे गल्भादिशब्दा एव दर्शिताः, न धातुरूपं दर्शितम् । गल्भ इति शब्दः, एवं क्लीबशब्दः, होडशब्दः । गल्भ इवाचरति, एवं क्लीब इवाचरति,होड इवाचरतीति वाक्ये कर्तुः क्विप्, स च ङित्, ङित्त्वाद् आत्मनेपदं भवति ।।२५।।

## क्यङ् ।३।४।२६।।

वृत्तिः–"कर्तुरुपमानादाचारार्थे क्यङ् प्रत्ययो वा' स्यात्। श्येन इवाचरति (इति) वाक्यम्,श्येनायते, हंसायते, अश्वायते, एवं गल्भायते, क्लीबायते। क्विप्क्यङोस्तुल्यविषयत्वादस्त्युत्सर्गापवादत्वे पर्यायेण प्रयोगः । ककारः सामान्यग्रहणार्थः। ङकार आत्मनेपदार्थः ।।२६।।

## सो वा लुक् च ।३।४।२७।।

वृत्तिः—स इत्यावृत्त्या पञ्चम्यन्तं षष्ठयन्तं च सम्बध्यते । "सकारान्तात्कर्तुरुपमानादाचारार्थे क्यङ् वा" स्यात् ,अन्त्यसकारस्य च वा लुक्। पय इवाचरति ( इति ) वाक्यम, पयायते, पयस्यते; सरायते, सरस्यते ।।२७।।

अवचूरिः—क्यङ् सिद्ध एवास्ति, लुगर्थं "सो वा लुक् च"इति सूत्रं कृतम् । अन्ये त्वप्सरस एव सलोपविकल्पं, नान्यस्य; तन्मते- अप्सरायते, एवमप्सरस्यते, किन्त्वन्यत्र प्रयस्यते इत्याद्येव ।।२७।।

## ओजोऽप्सरसः ।३।४।२८।।

वृत्तिः—ओज शब्दादप्सरःशब्दाच्च कर्तुरुपमानभूतादाचारार्थे क्यङ्, सलोपश्च वा" स्यात् । ओजस्वीवाचरति-ओजायते, अप्सरायते ।।२८।।

अवचूरिः—नित्यं सकारलोपार्थं ओजो० इति सूत्रं कृतम् । ओजःशब्दः स्वभावात् वृत्तिविषये, कोर्थः ? वाक्याभावे मत्वर्थीयप्रत्ययान्त एव प्रवर्तते, यथा-ओजस्वीवाचरति इति वाक्यम्, ओज इवाचरतीति वाक्यं न कार्यमिति भावः ।।२८।।

## च्व्यर्थे भृशादेः स्तोः ।३।४।२९।।

वृत्तिः—भृशादिभ्यः कर्तृभ्यः "च्व्यर्थे क्यङ् स्याद्वा, सकारतकारयोर्यथासंभवं लुक् च" । अभृशो भृशो भवति इति वाक्यम्, भृशायते, एवं उन्मनायते, वेहायते, अनोजस्वी ओजस्वी भवति-'ओजायते, अत्र तद्वद्वृत्तेरेव च्व्यर्थ इति धर्ममात्रे न

क्यङ् - अनोज ओजो भवति । कर्तु रित्येव- अभृशं भृशं करोति । प्रागतत्तत्त्वमात्रे च्वेर्विधानात् क्यङश्च्विर्न बाध्यते- भृशीभवति ॥२६॥

अवचूरिः—भृश, उत्सुक, शीघ्र, चपल, पण्डित, अण्डर, ⁶⁶कम्बर, फेन, शुचि, नील, हरित, मन्द, मद्र, भद्र, संभ्रत्, ★तपत्, रेफत्, रेहत्, वेहत्, वर्चस्, ओजस् उन्मनस् दुर्मनस् सुमनस्, अभिमनस् इति भृशादिगणः । शब्दान्तरसाधनाय नाकृतिगणः । आचार्यस्येयं शैली— यत्र शब्दा नियतास्तत्रैकवचनमेवाचार्यः सूत्रे निर्दिशति, यत्र बहुवचनं तत्राकृतिगण इति ज्ञापयति । [1]'ओजायते' इत्यत्र तदवृत्तेः- ( तद्वद्वृत्तेः- ) मत्वर्थीयवृत्तेः परत एव । कलापकव्याकरणेऽभूतततद्भावः, हेमव्याकरणेऽभूततद्भावस्य प्रागतत्तत्त्वमिति संज्ञा । प्रागतत्तत्त्वे=अभूततद्भावेऽर्थे ॥२९॥

## डाज्-लोहितादिभ्यः षित् ३।४।३०॥

वृत्तिः—"डाजन्तेभ्यो लोहितादिभ्यश्च कर्तृभ्यश्च्व्यर्थे क्यङ् स्यात् , स च षित्" । डाच् -अपटत् पटद्भवति ( इति ) वाक्यम् , पटपटायति, पटपटायते । डाजन्तात् क्यङ्ष्प्रत्ययविधानात्कृभ्वस्तिभिरिव क्यङ्षापि योगे डाच् भवति । अलोहितो लोहितो भवति-लोहितायते, लोहितायति । कर्तु रित्येव- अपटपटा पटपटा करोति, अलोहितं लोहितं करोति । षकारः "क्यङ्षो नवा" (३।३।४३ ) इति विशेषणार्थः ॥३०॥

अवचूरिः—लोहित, जिह्म, श्याम, धूम, चर्मन्, हर्ष, गर्व, सुख, दुःख, मूर्छा, निद्रा, कृपा, करुणा इति लोहितादिगणः । बहुवचनमाकृतिगणार्थम्, तेन—"अमृतं यस्य विषायति" इत्यादि सिद्धम् । 'पटपटायते' इत्यस्य साधनिकाऽख्यातप्रथमपादे "क्यङ्षो नवा" ( ३।३।४३) इति सूत्रे लिखितास्ति, (इति) ततो ज्ञातव्या । 'क्यङ्षो नवा' सूत्रेण सर्वत्र विकल्पेनात्मनेपदं ज्ञातव्यम् । ननु भवत्यर्थविशिष्टे च्व्यर्थे क्यङ्ष् प्रत्ययो विहितः, ततश्च क्यङ्ष्प्रत्ययेन भवत्यर्थस्योक्तत्वात् भवत्यर्थाभावे 'निमित्ताभावे ( नैमित्तिकस्याप्यभावः" ) इति न्यायात् डाच्-प्रत्ययस्यापि निवृत्तिः प्राप्नोतीत्याशङ्क्याह'–'डाजन्ताद्" इति, क्यङ्ष्विधानसामर्थ्यात् कृभ्वस्तिभावेऽपि डाच् न निवर्तते ॥३०॥

## कष्ट-कक्ष-कृच्छ्र-सत्र-गहनाय पापे क्रमणे ।३।४।३१॥

वृत्तिः—[1]"कष्टादिभ्यश्चतुर्थ्यन्तेभ्यः पापे वर्त्तमानेभ्यः क्रमणेऽर्थे क्यङ् वा" स्यात् । [2]कष्टाय कर्मणे क्रामति-कष्टायते, [3]कक्षायते, कृच्छ्रायते, सत्रायते, गहनायते । चतुर्थ्यन्त इति किम् ? रिपुः कष्टं क्रामति । पाप इति किम् ? [4]कष्टाय तपसे क्रामति● ॥३१॥

अवचूरिः—[1]सूत्रे निर्देशवशात् । [2]वाक्यमिदं, विकल्पोदाहरणमपीदं ज्ञेयम्; एवमग्रेऽपि सर्वत्र । [3]कक्षाय कर्मणे क्रामति । [4]पापम् = अनार्जवाचारः, स इह नास्तीति न क्यङ् ।.३१॥

## रोमन्थाद् व्याप्यादुच्चर्वणे ।३।४।३२॥

वृत्तिः–[1]रोमन्थात्कर्मण [2]"उच्चर्वणेऽर्थे क्यङ् वा" स्यात् । रोमन्थम् [3]उच्चर्वयति-रोमन्थायते गौः, उद्गीर्य चर्वयतीत्यर्थः। उच्चर्वण इति किम् ? [4]कीटो रोमन्थं वर्तयति ॥३२॥

अवचूरिः—[1]अभ्यवहृतं द्रव्यं-रोमन्थः ।[2]उद्गीर्य चर्वणमुच्चर्वणम् । [3]बहुलमेतन्निदर्शनमिति चुरादित्वम् ।

⁶⁶'कण्डर' इति तत्त्वप्रकाशिकाभिधबृहद्वृत्तौ ।

★'तृपद्' इति बृहद्वृत्तौ ।

●अत्र क्रमणं न पादविन्यासः, किन्तु प्रवृत्तिमात्रम् । अन्यथा यथेह पापं नास्ति तथैव क्रमणमपि पादविक्षेपो नास्तीति द्व्यङ्गवैकल्यं स्याद् ।

[४]कीटो रोमन्थं वर्त्तयतीत्यस्यायमर्थः-उद्गीर्य बहिस्त्यक्तमथवा पृष्ठान्तेन-गुदेन निर्गतं द्रव्यं गुटिकां कीटः करोतीत्यर्थः ॥३२॥

## फेनोष्म-बाष्प-धूमादुद्वमने ।३।४।३३॥

वृत्तिः–फेनादिभ्यः कर्मभ्य "उद्वमनेऽर्थे क्यङ् वा" स्याद् । फेनमुद्वमति-फेनायते, उष्मायते बाष्पायते, धूमायते ॥३३॥

अवचूरिः—उष्माणमुद्वमति । धूममुद्वमति ॥३३।

## सुखादेरनुभवे ।३।४।३४॥

वृत्तिः—[१]"सुखादिभ्योऽनुभवेऽर्थे[२] क्यङ् वा" स्यात् । सुखमनुभवति-सुखायते, [३]दुःखायते । अनुभव इति किम्? सुखं वेदयते मैत्रस्य साधकः। सुख, दुःख, तृप्र, कृच्छ्र, [■]अस्र, आस्र, अलीक, करुण, कृपण, सोढ, प्रतीप इति सुखादिगणः, एकादशैत्र शब्दाः ॥३४॥

अवचूरिः— [१]कर्मभ्यः । [२]साक्षात्कारेऽर्थे । [३]दुःखमनुभवति । "सुखं वेदयते मैत्रस्य साधकः" इत्यस्यार्थोऽयं- मुखनेत्रादिचेष्टाविकाराकारैरनुमानतो वा साधकश्च- ................. (तुरो मैत्रसुखं निश्चिनोति) ॥३४।

## शब्दादेः कृतौ वा ।३।४ ३५॥

वृत्तिः–शब्दादिभ्यः कर्मभ्यः "करोत्यर्थे क्यङ् वा" स्यात् । णिजपवादः । शब्दं करोति-शब्दायते[१]। वा शब्दो [२]व्यवस्थितविभाषार्थः, तेन यथादर्शनं णिजपि[३] भवति-शब्दयति[४] । [५]वाऽधिकारस्तु वाक्यार्थः ॥३५॥

अवचूरिः—शब्द, वैर, कलह, ओघ, वेग, युद्ध, अभ्र, कण्व, मम, मेघ, अट, अट्या, अटाट्या, सीका, सोका, ( बृहद्वृत्तौ सोटा ) कोटा, पोटा,पुष्टा, ( बृहद्वृत्तौ प्लुष्टा, ) सुदिन, दुर्दिन, नीहार इति शब्दादिगणः । (सर्वे) शब्दाः२१, नाधिकाः । आचार्यस्य शैलीयं यत्र शब्दबाहुल्यं तत्र एकवचनमेव प्रयुङ्क्ते, बहुवचने आकृतिगणः । [१]एवं वैरायते, कलहायते । [२]व्यवस्थितं-प्रयोगारूढं विधिप्रतिषेधादिकार्यं विशेषेण भाषते इति व्यवस्थितविभाषार्थो वा शब्दोऽयं ज्ञातव्य इत्यर्थः । [३]णिच् प्रत्ययोऽपि । [४]एवं-वैरायति । [५]प्रत्ययविकल्पार्थे वा शब्दो न ज्ञातव्य इति शेषः ।।३५।।

## तपसः क्यन् ।३।४।३६॥

वृत्तिः—"तपःशब्दात्करोत्यर्थे क्यन् वा" स्यात् । तप करोति-तपस्यति ॥३६॥

अवचूरिः—कर्मण इति सर्वत्र ज्ञेयम् । तपस्यतीत्यत्र यदा व्रतपर्यायस्तपःशब्दः तदा क्यन्कर्मणो वृत्तौ-समासे अन्तर्भूतत्वादकर्मकत्वम्, यदा पुनस्तपःशब्दः सन्तापक्रियावचनस्तदापि क्यन्कर्मणो वृत्तावन्तर्भावेऽपि स्वकर्मणा तपःशब्दः सकर्मक एव; यथा-शत्रूणां तपः = सन्तापं करोति इति वाक्ये तपस्यति शत्रूनिति प्रयोगो भवति । "अतपसस्यंत्" इत्यत्र "अन्यस्य" ( ४।१।८ ) इति सूत्रेण तृतीयावयवस्य "स्य" इति द्विर्वचनेऽवन्तक्यनः फलम् ।३६॥

## नमो-वरिवश्चित्रङोऽर्चा सेवाऽऽश्चर्ये ।३।४।३७॥

वृत्तिः–"नमस्-वरिवस्-चित्रङ्शब्देभ्यः कर्मभ्यो यथासंख्यं पूजासेवाऽऽश्चर्यार्थेषु करोत्यर्थे क्यन् वा" स्यात् । [१]नमः करोति ( इति ) वाक्यम् , नमस्यति देवान् ; गुरूणां वरिवः करोति ( इति ) वाक्यम् , वरिवस्यति गुरून्; [३]चित्रं करोति ( इति ) वाक्यम्, चित्रीयते । अर्चादिष्विति किम् ? नमः करोति, वरिवः करोति; नमो वरिव इति शब्दमुच्चारयतीत्यर्थ , चित्रं करोति, नानात्वमालेख्यं वा करोतीत्यर्थः ॥३७॥

अवचूरिः—[१]चित्रङ् इत्यत्र ङकार 'आत्मनेपदार्थः' ।

[■]बृहद्वृत्तौ न ।

नेनु "नमस्यति देवान्" इत्यत्र नमःशब्दयोगे चतुर्थी कथं न भवति ? उच्यते, नामधातूनामविवक्षितप्रकृति-प्रत्ययभेदानां धातुत्वादत्र नमःशब्दोऽनर्थकः । अथवा "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" । एवं च नमस्करोति देवानिति वाक्यमध्येऽपि द्वितीया विभक्तिः सिद्धा । यद्येवं "नमस्करोति देवेभ्य" इति प्रयोगेण सर्वथाऽपि न भवितव्यं ? नैवं, करोतेर्नमःशब्दसम्बन्धेन देवपदेन सह संबन्धाभावात् । (अयंभावः-करोतेः सम्बन्धाभावात्, केन सह ? देवपदेन. किं भूतेन ? नमः शब्देन सह संबन्धो यस्य-तेन, अनया युक्त्या कारकविभक्तेः प्राप्तिरेव नास्ति) कस्मै नम इति त्वाकाङ्क्षायां सत्यां देवेभ्य इति युक्त्या सम्बन्धोऽपि घटते, इति संप्रदाने चतुर्थी भवत्येव; इत्यदोषः । "कस्य [3]चित्रीयते न धीः" इतिवत् "चित्रीयते" इत्यकर्मकः प्रयोगः । चित्रम्-आश्चर्यं करोति जनस्य इति विवक्षायां "चित्रीयते जनम्" इति सकर्मकोऽपि प्रयोगो ज्ञातव्यः, यथा— व्याकरणस्य सूत्रं करोति इत्यर्थे व्याकरणं सूत्रयतीति प्रयोगः ॥३७॥

## अङ्गान्निरसने णिङ् ।३।४।३८।

वृत्तिः—[1]"अङ्ग[2]वाचिशब्दान्निरसनेऽर्थे [1] णिङ्[3] वा" स्यात् । हस्तौ [2]निरस्यति-हस्तयते, एवं [4]पादयते । निरसन इति किम् ? हस्तं करोति-हस्तयति

अवचूरिः—[1]कर्मणः । [2]क्षेपणार्थे । [2]क्षिपति-लङ्घते ( ? लङ्घति ) [3]णिङ् इत्यत्र ङकार आत्मनेपदार्थः । [4]पादौ क्षिपति । रोमन्थाद्० ( ३।४।३२ ) इति सूत्रात् कर्मण इत्यनुवर्तनात्कर्मण इति किम् ? हस्तेन निरस्यतीति व्यावृत्तिर्ज्ञातव्या । ३८॥

## पुच्छादुत्परिव्यसने ।३।४।३९।।

वृत्तिः— कर्मणः पुच्छशब्दाद् "उदसनेऽर्थे, पर्यसनेऽर्थे, व्यसनेऽर्थे असने चार्थे णिङ् वा" स्यात् । पुच्छमुदस्यति-उत्पुच्छयते, एवं परिपुच्छयते, विपुच्छयते, पुच्छयते ।।३६॥

अवचूरिः—उश्च परिश्च विश्च-उत्परिवि ( वयः), उत्परिविभ्योऽसनम् — उत्परिव्यसनम्, उत्परिव्यसनं चाऽसनं च ( इति उत्परिव्यसनं, तस्मिन् ) सूत्रत्वात् एकस्य असनशब्दस्य लोपः कार्यः । "पुच्छमुदस्यति," कोऽर्थः ? ऊर्ध्वं क्षिपति पुच्छम् अत्र ऊर्ध्वार्थे उत्शब्दः । एवं पुच्छं पर्यस्यति( इति ) वाक्यम्, कोऽर्थः? पुच्छं परितः क्षिपति, अत्र परिशब्दः परितोऽर्थे । ( पुच्छं ) व्यस्यति इति वाक्यम्, 'विपुच्छयते' ( इति ) उदाहरणम्, अत्र विशेषेण पुच्छं क्षिपति इत्यर्थः, विशब्दः विशेषेण इत्यर्थे । तथा 'पुच्छयते' इत्यस्य पुच्छमस्यति इति वाक्यम्, अत्र सामान्येन क्षेपणम् । उदादयः शब्दास्तत्तदर्थस्य द्योतका ज्ञातव्याः ॥३९॥

## भाण्डात् समाचितौ ।३।४।४०॥

वृत्तिः— भाण्डात् समाचयनेऽर्थे "णिङ् वा" स्यात् । भाण्डानि समाचिनोति-संभाण्डयते,[1] [2]परिभाण्डयते ॥४०॥

अवचूरिः— वाक्यं भाण्ड खडकइ कुम्भाभ इत्यर्थः* । [2]भाण्डानि परिचिनोति ॥४०॥

## चीवरात्परिधानार्जने ।३।४।४१॥

वृत्तिः— चीवरात्परिधानेऽर्जने चार्थे "णिङ् वा" स्यात् । चीवरं परिधत्ते-परिचीवरयते, एवं सञ्चीवरयते, चीवरमर्जयति-चीवरयते ॥४१॥

अवचूरिः— परिधानं, समाच्छादनमिति पर्यायः; ततो यथा चीवरं परिधत्ते इति वाक्ये परिचीवरयते, तथा चीवरं समाच्छादयति इति वाक्ये संचीवरयते इत्यप्युदाहरणानि ( ? म् ) ॥४१॥

## णिज् बहुलं नाम्नः कृगादिषु ।३।४।४२॥

वृत्तिः— कृगादीनां धातूनामर्थे नाम्नः परतो "णिच् प्रत्ययो भवति, बहुलम्" । बहुलग्रहणं प्रयो-

*अयं पाठोऽशुद्धो वर्त्तते ।

गानुसरणार्थम् , तेन यस्मान्नाम्नो यद्विभक्त्यन्ताद्यस्मिन् धात्वर्थे दृश्यते, तस्मात्तद्विभक्त्यन्तात्तद्धात्वर्थे एव णिच् स्यादिति लभ्यते । मुण्डं करोति ( इति ) वाक्यम्, [१]मुण्डयति च्छात्रम्; एवं लघु करोति ( इति ) वाक्यम् , लघयति; एवं [२]छिद्रयति, [३]दण्डयति, अन्धयति, [४]व्याकरणस्य सूत्रं करोति व्याकरणं सूत्रयति, [५]द्वारमुद्घाटयति, [६]त्रिलोकीं तिलकयति, पटुमाचष्टे करोति वा-पटयति, एवं [७]स्थवयति, दवयति, यवयति, [८]प्रापयति, [९]स्थापयति, वृक्षमाचष्टे रोपयति वा इति) वाक्यम्, वृक्षयति; कृतं गृह्णाति ( इति ) वाक्यम् , कृतयति; एवं वर्णं गृह्णाति-वर्णयति, [१०]त्वचयति; रूपं दर्शयति ( इति ) वाक्यम् , रूपयति; रूपं निध्यायति ( इति ) वाक्यम् , निरूपयति; वस्त्रं वस्त्रेण वा समाच्छादयति ( इति ) वाक्यम् , संवस्त्रयति; वस्त्रं परिदधाति ( इति ) वाक्यम्, परिवस्त्रयति; हस्तिनाऽतिक्रामति ( इति ) वाक्यम्, अतिहस्तयति; अश्वेनातिक्रामति-अत्यश्वयति, वीणया उपगायति (इति) वाक्यम् , उपवीणयति; सेनया अभियाति ( इति ) वाक्यम् , अभिषेणयति; वास्या च्छिनत्ति ( इति ) वाक्यम् , वासयति; [११]एवं परशयति, [१२]असयति; श्लोकैरुपस्तौति ( इति ) वाक्यम् , उपश्लोकयति; हस्तेनापक्षिपति ( इति ) वाक्यम्, अपहस्तयति; गन्धेनार्चयति ( इति ) वाक्यम्, गन्धयति; एवं [१३]पुष्पयति, बलेन सहते बलयति, शीलेनाचरति-शीलयति, एवं [१४]सामयति, पाशेन संयच्छति-संपाशयति, [१५]विपाशयति, शूरो भवति ( इति ) वाक्यम् , शूरयति; वीर उत्सहते-वीरयति, कूलमुल्लङ्घयति - उत्कूलयति, कूलमनुगच्छति-अनुकूलयति, कूलं प्रतीपं गच्छति-प्रतिकूलयति, लोष्टानवमर्दयति-अवलोष्टयति, पुत्रं सूते-पुत्रयति । 'इन्द्रियाणां जयम्' [१६]इत्यादिषु बहुलवचनान्न णिच् ॥४२॥

अवचूरिः-[१]एवं मिश्रयति ओदनम् ।[२]छिद्रं करोति । [३]दण्डं करोति । [४]ननु व्याकरणशब्दात् वाक्ये षष्ठी दृश्यते, उत्पन्ने च प्रत्यये कथं द्वितीया ? उच्यते, सूत्रव्याकरणयोर्यः सम्बन्धः स उत्पन्ने प्रत्यये निवर्तते, सूत्रयतिक्रियासम्बन्धात्तु द्वितीयैव भवति । [५]एवं द्वारस्योद्घाटं करोति । [६]त्रिलोक्यास्तिलकं करोति । [७]स्थवयतीत्यादिषु स्थूलमाचष्टे करोति वा, दूरमाचष्टे करोति वा, युवानमाचष्टे करोति वा, "णिच् बहुलम्०" इति णिच् प्रत्ययः,"स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः" ( ७।४।४२ ) इति सूत्रेणान्तस्थाद्यवयवस्य लुक्, नाम्यन्तस्य च गुणः, ततः स्थव्, दव्, यव् इति प्रकृतिः । [८]तथा प्रियमाचष्टे करोति वा-प्रापयति, [९]स्थिरमाचष्टे, "णिच् बहुलम्०" इति णिच्, "प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध-वृन्दारकस्येमनि च प्रा-स्था-स्फा-वर-गर-बंह-त्रप-द्राघ-वर्ष-वृन्दम्" ( ७।४।३८ ) इति सूत्रेण प्रियस्य प्रा, स्थिरस्य स्था आदेशः; "अर्त्ति-री-व्ली-ह्री-क्नूयि-क्ष्माय्यातां पुः" (४।२।२१) इत्यनेन पोऽन्तः, (इत्येवं) प्रापयति, स्थापयतीतिसिद्धम् । एवं क्षिप्रमाचष्टे करोति वा क्षेपयति, क्षुद्रमाचष्टे करोति वा, 'स्थूल०'इत्यादिना(सूत्रेण)अन्त्यलोपो गुणश्च, क्षोदयति इत्यपि प्रयोगा ज्ञेयाः । [१०]'त्वच्' शब्दो व्यञ्जनान्तः, 'त्वच' इति अकारान्तोऽप्यस्ति, परं व्यञ्जनान्तपक्षे त्वचं गृह्णाति, णिच्, "नैकस्वरस्य" ( ७।४।४४ ) इति सूत्रेणान्त्यस्वरादिर्न लुप्यते, ततो वृद्धिः, 'त्वाचयति' इति प्रयोगः, अकारान्तपक्षे तु त्वचं गृह्णाति, णिच्, "अन्त्यस्वरादेः" ( ७।४।४३ ) इत्यन्तस्वरादिलोपः, त्वचयतीति प्रयोगः । विशेषप्रयोगाश्चेमे-लोमान्यनुमार्ष्टि-अनुलोमयति, तूस्तानि विहन्ति- वितूस्तयति, तूस्तानि उद्धन्ति-उत्तूस्तयति, केशान् विजटीकरोतीत्यर्थः; तृणान्युत्लुत्य शातयति-उत्तृणयति, वर्मणा-सन्नाहेन संनह्यति-संवर्मयति, चूर्णैरवध्वंसयति अवकिरति वा, कोऽर्थः ? पत्त्यादिकं विनाशयति - अवचूर्णयति; तूलैरनुकुष्णाति अनुगृह्णाति वा-अनुतूलयति, तथा वास्या परिछिनत्ति-परिवासयति वासयति चेति एकार्थाः, वास (?) वाससा उन्मोचयति-उद्वासयति, अश्वेन संयुनक्ति- समश्वयति, छन्दसोपचरति उपमन्त्रयते वा- उपच्छन्दयतीत्यादि । [११]परशुना छिनत्ति । [१२]असिना छिनत्ति । [१३]पुष्पे-

णार्चयति । [14]साम्ना आचरति । [15]पाशं पाशाद्वा विमोचयति इति वाक्यम्, विपाशयति इति प्रयोगः । [14]एवं सान्त्वयति । [16]आदिशब्दात् क्षीरस्य पानं, देवस्य यागं, धान्यस्य क्रयं, धनस्य त्यागम्, ओदनस्य पाकं करोत्यर्थे, तथा नलोपाख्यानं, कंसवधं, सीताहरणं, रामप्रव्रजनं, राजागमनं, मृगरमणम्, आरात्रिविवासमाचष्टेऽर्थे णिच् प्रत्ययो न भवति । इन्द्रियाणां जयम्-इन्द्रियजयम्, इन्द्रियजयं करोतीत्येवं सर्वत्र वाक्ये कृतेऽपि बहुलवचनान्न णिच् ॥४२॥

## व्रताद् भुजि-तन्निवृत्त्योः ३।४।४३॥

वृत्तिः—व्रतं = शास्त्रविहितो नियमः, व्रताद्भोजने [1]तन्निवृत्तौ च वर्तमानात्कृगाद्यर्थेषु "णिच् स्याद्, बहुलम्" । [2]पयो व्रतयति, [3] सावद्यान्नं व्रतयति ॥४३।

अवचूरिः—[1]भोजननिवृत्तौ-भोजननिषेधे । [2]पय एव मया भोक्तव्यमिति व्रतं करोति, व्रतं गृह्णाति वा इति वाक्यम्, पयो व्रतयति । [3]सावद्यान्नं मया न भोक्तव्यमिति व्रतं करोति, गृह्णाति वा इति वाक्यम्, सावद्यान्नं व्रतयति इत्युदाहरणम् ॥४३॥

## सत्यार्थवेदस्याः ।३।४।४४॥

वृत्तिः—"सत्यार्थवेद" इत्येषां "णिच् संयोगे (-णिचि सति) 'आ' इत्यन्तादेशः" स्यात् । [1]सत्यापयति, [2]अर्थापयति, [3]वेदापयति ॥४४॥

अवचूरिः—[1]सत्यमाचष्टे सत्यं करोति वा । [2]एवमर्थमाचष्टे करोति वा । [3]वेदमाचष्टे करोति वा । "णिज् बहुलम्०" ( ३।४।४२। इति ) णिच् । अत्रोदाहरणेषु "अन्त्यस्वरादेः" ( ७।४।४३ ) इत्यनेनाऽऽकारस्य न लोपः, 'आ' इति विधानसामर्थ्यात् ॥४४॥

## श्वेताऽश्वा-ऽश्वतर-गालोडिता-ऽऽह्वरक-

## स्याऽश्व-तरेत-कलुक् ।३।४।४५॥

वृत्तिः—"श्वेताश्व, अश्वतर, गालोडित, आह्वरक इत्येषां णिज्योगे यथासंख्यमश्व, तर, इत, क इत्येषां लुक्" स्यात् । [1]श्वेतयति, [2]अश्वयति, [3]गालोडयति, [4]आह्वरयति ॥४५॥

अवचूरिः—श्वेतोऽश्वो यस्य = स श्वेताश्व इति, श्वेतश्चासावश्वश्चेति वा कर्मधारयः, श्वेताश्वमाचष्टे, श्वेताश्वं वा करोति, अथवा श्वेताश्वेनाऽतिक्रामतीति वाक्येषु "णिज् बहुलम्०" ( इति सूत्रेण णिचि सति ) श्वेतयति । [2]एवमश्वतरमाचष्टे करोति वा अश्वयति । [3]गालोडितमाचष्टे करोति वा । आह्वरको देशविशेषः, आह्वरकमाचष्टे करोति वा । सर्वत्र "णिज्बहुलम्०" इत्यनेन णिच् सिद्ध एव, परं लुगर्थं सूत्रमिदम् ॥४५॥

## धातोरनेकस्वरादाम् परोक्षायाः, कृभ्वस्ति चानु तदन्तम् ।३।४।४६॥

वृत्ति — अनेकस्वराद्धातोः परस्याः "परोक्षायाः स्थाने आम् इत्यादेशः स्यात्, आमन्ताच्च परे कृभ्वस्तयो धातवः परोक्षान्ता अनु=पश्चात् प्रयुज्यन्ते" । [1]चकासाञ्चकार, चकासाम्बभूव, चकासामास; एवं [2]लोलूयाञ्चक्रे लोलूयाम्बभूव, ( लोलूयामास ) । *अस्तेर्भू न भवति, विधानबलात् । अनेकस्वरादिति किम् ? [3]पपाच । उपसर्गस्य तु क्रियाविशेषकत्वाद् व्यवधायकत्वं नास्ति, तेन उक्षाम्प्रचक्रुः[4] ॥४६॥

अवचूरिः— 'तदन्तम्' इति पदस्य 'परोक्षान्ता'

*ननु "अस्तिब्रुवोर्भूवचावशिति" ( ४।४।१ ) इत्यनेनात्रास्तेः 'भू' इत्यादेशो भविष्यतीत्याम: परतः परोक्षान्तास्तेरनुविधानं निरर्थकमित्याह- अस्तेरित्यादि ।

इत्यर्थौ ज्ञातव्यः। सूत्र★…………………( सूत्रे 'अनु' इति कोऽर्थः ? पूर्वमनेकस्वराद् धातोः परत आम्, तदनन्तरं कृभ्वस्तयो धातवः, ततः ) परोक्षासम्बन्धि 'ए णव्' इत्येवं ( कृभ्वस्तयो धातवः ) आमः परतः प्रयुज्यन्ते। तदनन्तरं द्विर्वचनादिकं सर्वं कर्त्तव्यम्। यत्र च…………………(भूधातोः परतः)णव् तत्र 卐नामिनो ( क ) लि० ( ४।३।५१ ) इति वृद्धिः- औ, "ओदौतोऽवाव्" ( १।२।२४ ) इति अ…………… ( अनेन आव्, ) ततो[ द्विर्धातुः० (४।१।१) इति] 卐द्विर्वचनम्, ………………………[ 'भाव् भाव्,' "व्यञ्जनस्यानादेर्लुक्" ( ४।१।४४ ) इत्यनेन वलुकि 'भाभाव्,' "ह्रस्वः" ( ४।१।३९ ) इत्यनेन ह्रस्वे कृते 'भभाव्,' "द्वितीयतुर्ययोः पूर्वौ" ( ४।१।४२ ) इत्यनेन पूर्वभकारस्य ब, 'बभाव्, ] "भुवो वः परोक्षाद्यतन्योः ( ४।२।४३ ) इत्यनेन 'आ' स्थाने 'ऊ,' ( इत्येवं ) 'बभूव' इति सिद्धम्।

[1]चकासृक् दीप्तौ इत्यदादौ परस्मैपदी, चकासाञ्चकार, एवं कारयाञ्चकार, कृ, कुर्वन्तं प्रयुङ्क्ते- णिच्, वृद्धिः, परोक्षाया णव्, "धातोरनेकस्वरा०" इत्यनेन आम्, "आमन्ताऽऽल्वाऽऽय्येत्नावय्" ( ४।३।८५ ) इति सूत्रेण णिस्थाने "अय्" इत्यादेशः, ( "कारयाम्" इति जातम् ) तदनन्तरं कृ, णव्, वृद्धिः। ( इत्येवं कारयाञ्चकार इति सिद्धम् ) एवं चुलुम्पाञ्चकार, चुलुम्पाम्बभूव, चुलुम्पामास। [2]यत्र आमः परतः कृगोऽनुप्रयोगः तत्र "आमः कृगः" ( ३।३।७५ ) इत्यनेनात्मनेपदम्, इति कृगः परतः परोक्षायाः ए, यत्र च भू, अस् ( इत्यनयोः ) अनुप्रयोगः तत्र परस्मैपदमेव, भू-असोः परस्मैपदित्वात्। [3]पपाचेत्यत्र द्विर्वचने कृतेऽनेकस्वरत्वात् 'आम्' कथं न भवति ? अत्राह- परोक्षानिमित्तं द्विर्वचनं जातमिति "सन्निपातन्यायाद्" आम् न भवति। णवाश्रितं द्विर्वचनं त्वेक( त्वनेक )स्वरमपि णव्विघाताय न भवति। अथवा सूत्रार्थेऽनेकस्वरस्य धातोर्विहितायाः परस्याः परोक्षायाः स्थाने इति विशेषणाद् आम् न भवतीत्यर्थः। [4]"गुरुनाम्यादे०" ( ३।४।४८ ) इति आम्, 'उक्षाम्प्रचक्रुर्नगरस्य मार्गान्' इति (भट्टि) काव्यपदम् ॥४६॥

## दया-ऽया-ऽऽस्-कासः ।३।४।४७॥

वृत्तिः दय, अय, आस्, कास् इत्येभ्यः धातुभ्यः परस्याः "परोक्षायाः स्थाने आम् स्यात्, आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनु- पश्चात् प्रयुज्यन्ते"। दयाञ्चक्रे, दयाम्बभूव, दयामास; [1]पलायाञ्चक्रे, पलायाम्बभूव, पलायामास; एवमासाञ्चक्रे, कासाञ्चक्रे इत्यादयः[2] ॥४७॥

अवचूरिः— "दयि दानगतिहिंसादहनेषु च, अयि वयि पयि मयि नयि चयि रयि गतौ, कासृङ् शब्दकुत्सायाम्" एते भ्वादय आत्मनेपदिनः, 'आसिक्

★अत्र हस्तलिखितप्रतौ पाठः त्रुटितोऽस्ति, पूर्वापरसम्बन्धमुपजीव्य यथामत्यनुसन्धाय ( ) इति चिह्नान्तो दर्शितः। एवमग्रेऽप्येतादृशस्थले बोध्यम्।

卐सूक्ष्मेक्षिकयाऽवलोकनेन स्पष्टं प्रतीयते, यदवचूरिकारैरत्र "नामिनोऽकलि०……………ततो द्विर्वचनम्" इति वचनेन स्वरादौ णवि प्रत्यये द्विर्वचनात् पूर्वमेव वृद्धिरूपं कार्यं कृतम्; परं तथाकरणेन द्विर्धातुः परोक्षाङे प्राक् तु स्वरे स्वरविधेः ( ४।१।१ ) इति सूत्रेण सह विसंवादः समापतति, तत्सूत्रे वृद्ध्यादेः स्वरविधेः पूर्वमेव द्वित्वं भवतीत्युक्तत्वाद्। अत एव हैमप्रकाशे द्विर्धातुः परोक्षा० इति सूत्रमनुसृत्य 'बभूव' इत्यस्य साधनिकैवं कृता—'भू + णव्,' "द्विर्धातुः०" ( ४।१।१ ) इत्यनेन द्विर्वचनं, 'भूभू + णव्,' ततः 'भूस्वपोरदुतौ' ( ४।१।७० ) इत्यनेन द्वित्वे पूर्वस्य 'अत्,' 'भभू + णव्,' द्वितीयतुर्ययोः पूर्वौ ( ४।१।४२ ) इत्यनेन भस्य 'ब,' बभू + णव्, नामिनोऽकलिहलेः ( ४।३।५१ ) इत्यनेन वृद्धिः, 'बभौ + णव्,' ततः ओदौतोऽवाव् ( १।२।२४ ) इत्यनेनौकारस्य आव्, 'बभाव् + णव्,' भुवो वः परोक्षाद्यतन्योः ( ४।२।४३ ) इत्यनेन आकारस्य 'ऊत्वे' 'बभूव' इति सिद्धम्।

उपवेशने' इत्यदादिः आत्मनेपदी । [1]परापूर्वोऽयं धातुः, उपसर्गस्यायौ'' ( २।३।१०० ) इति रकारस्य लत्वम् । [2]आसाम्बभूव, आसामास; कासाम्बभूव, कासामास ॥४७॥

## गुरुनाम्यादेरनृच्छूर्णोः ।३।४।४८॥

वृत्तिः— गुरुर्नामी आदिर्यस्य धातोः तस्माद्धातोः ऋच्छूर्णु वर्जितात्परस्याः "परोक्षायाः स्थाने आम् स्यात्, आमन्तादित्यादि" । ईहाञ्चक्रे उञ्जाञ्चकार । गुर्विति किम् ? इयेष । नामीति किम् ? [1]आनर्च । आदीति किम् ? निनाय । अनृच्छूर्णोरिति किम् ? [2]आनर्च्छ, [3]प्रोर्णुनाव; अत एव ऋच्छप्रतिषेधात् संयोगे परे पूर्वो गुरुरिति विज्ञायते ॥४८॥

अवचूरिः—ईहि चेष्टायाम्, ईहाम्बभूव, ईहामास । [1]आनर्च, अर्च पूजायाम्, परोक्षाणव्, द्विर्धातुः० ( ४।१।१। इति ) द्वित्वम्, 'अनातो नश्चान्त ऋदाद्यशौसंयोगस्य' ( ४।१।६९ ) इति सूत्रेण पूर्वस्याकारस्य आकारः, नोन्तश्च । [2]ऋच्छत् गतौ, ऋच्छ्, परोक्षाणव्, स्कृच्छतोऽकि परोक्षायाम्'' ( ४।३।८ ) इति सूत्रेण गुणः, ततो द्वित्वम्, "अनातो नश्चान्त ऋदाद्यशौसंयोगस्य'' ( ४।१।६९ ) इत्यनेन अकारस्य आत्वं, नोन्तश्च । [3]ऊर्णुंक् आच्छादने प्रपूर्वः, परोक्षाणव्, 'ऊर' विश्लिष्य "स्वरादेर्द्वितीयः'' ( ४।१।४ ) इति 'नु' द्विरुच्यते ॥४८॥

## जागुष-समिन्धेर्नवा ।३।४।४९॥

वृत्तिः—जागृ, उष, समूपूर्व इन्ध ( इत्येभ्यः) धातुभ्यः "परोक्षास्थाने आम् वा स्यात्, आमन्ताच्चेत्यादि" । जागराञ्चकार, जागराम्बभूव, जागरामास, [1]जजागार; उषाञ्चकार, उवोष; समिन्धाञ्चक्रे, [2]समीधे ॥४९॥

अवचूरिः—[1]"जागुर्ञिणवि'' ( ४।३।५२ ) इति वृद्धिः । [2]ञिइन्धेपि कीत्वौ, "नो व्यञ्जनस्यानुदितः'' ( ४।२।४५ ) इति नकारस्य लोपः ॥४९॥

## भी-ह्री-भृ-ह्रोस्तिव्वत् ।३।४।५०॥

वृत्तिः—भीह्रीभृहुधातुभ्यः "परोक्षास्थाने आम् वा स्यात्, स आम् च [1]तिव्वत्'' । बिभयाञ्चकार, बिभयाम्बभूव, बिभयामास, बिभाय; जिह्रयाञ्चकार, जिह्राय; [2]बिभराञ्चकार, बभार; [3]जुहवाञ्चकार, जुहाव । तिव्वद्भावाद् द्वित्वमित्वं च भवति ॥५०॥

अवचूरिः—'ञिभींक् भये, ह्रींक् लज्जायाम्, डुडुभृंञ् पोषणे च, हुंक् दानादनयोः' एतेऽदादिजुहोत्यादयः । [1]तिव् इव = तिव्वत्, वर्त्तमानातिव्सदृशो भवति । [2]"पृभृमाहाङामिः'' ( ४।१।५८ ) इति इत्वमभ्यासे । [3]गहोर्जः ( ४।१।४० ) इत्यनेन हस्य जत्वम् ॥५०॥

## वेत्तेः कित् ।३।४।५१॥

वृत्तिः—विद्धातोः "परोक्षास्थाने आम् वा स्यात्, स च कित्, [1]आमन्तेत्यादि'' । विदाञ्चकार, विदाम्बभूव, विदामास । [2]कित्त्वान्न गुणः । पक्षे- विवेद ॥५१॥

अवचूरिः—वेत्तेरित्यत्र 'विदंक् ज्ञाने' इत्यदादिपरिग्रहार्थं यङ्लुपि आम्निवृत्त्यर्थं च तिव्निर्देशः कृतः, तेन यङ्लुपि "वेविदाञ्चकार'' इति सिद्धम् । अत्र "धातोरनेकस्वरा०'' ( ३।४।४६ ) इत्यनेन आम्, न "वेत्तेः कित्'' इत्यनेन । [1]आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनु प्रयुज्यन्ते इत्यर्थः । [2]"कित्त्वान्न गुणः'' इत्यक्षरस्याग्रे इदं ज्ञेयम्-"वेत्तेरवित्''इति सूत्रे कृतेऽपि "इन्ध्यसंयोगा०'' ( ४।३।२१ ) इति सूत्रेण आमः स्थानिवद्भावेन कित्वे सिद्धेऽपि विदो धातोः कित्त्वविधानमामः परोक्षावद्भावनिवृत्तिज्ञापनार्थम्, तेन परोक्षावद्भावेन कित्त्वद्विर्वचनादिकं न भवति । तथाहि 'जुहवाञ्चक्रे' इत्यत्र कित्वाऽभावात् 'गुणः' सिद्धः, विदाञ्चकार, अत्र त्वपरोक्षाभावात् 'द्विर्व-

'षत्वाभावः' संपन्नः । द्विर्वचनादिकम् (इति) आदि-शब्दाद् 'दयाञ्चक्रे' इत्यत्र 'अनादेशादेः०' ( ४।१।२४ ) इत्यनेन 'एत्वाभावः' सिद्धः ॥५१॥

## पञ्चम्याः कृग् ।३।४।५२॥

वृत्तिः—वेत्तेः परस्याः "पञ्चम्याः स्थाने आम् वा, स च कित्, आमन्ताच्च परः 'पञ्चम्यन्तः कृग् अनु- पश्चात्प्रयुज्यते" । विदाङ्करोतु, वेत्तु; विदाङ्कुरु, विद्धि; विदाङ्करवाणि, वेदानि । कृग्ग्रहणं भ्वस्तिव्युदासार्थम् ॥५२॥

## सिजद्यतन्याम् ।३।४।५३॥

वृत्तिः—धातोरद्यतन्यां परभूतायां [1]"सिच् प्रत्ययः" स्यात् । [2]वेति निवृत्तम् । अनैषीत्, अकृषातां कटौ चैत्रेण ॥५३॥

अवचूरिः–[1]इकारचकारौ विशेषणार्थौ । [2]आमोऽधिकारनिवृत्तेः, तत्सम्बद्धत्वात् । "अनैषीदि"- त्यत्र "सः सिजस्तेर्दिस्योः" ( ४।३।६५ ) इत्यनेन ईत् । "सिचि परस्मै समानस्याङिति" ( ४।३।४४ ) इति वृद्धिः ॥५३॥

## स्पृश–मृश–कृष–तृप–दृपो वा ।३।४।५४॥

वृत्तिः—स्पृशादिधातुभ्योऽद्यतन्यां परभूतायां "वा सिच्" स्यात् । [1]अस्प्राक्षीत्, अस्पार्क्षीत्, [2]अस्पृक्षत्; [3]अम्राक्षीत्, अमार्क्षीत्, अमृक्षत्; [4]अक्राक्षीत्, अकार्क्षीत्, अकृक्षत्; [5]अत्राप्सीत्, अतार्प्सीत्, अतृपत्; [6]अद्राप्सीत्, अदार्प्सीत्, अदृपत् ॥५४॥

अवचूरिः–[1]स्पृशंत् संस्पर्शे, स्पृश्, (सिच्) अद्यतन्याः परस्मैपदं,............... ( दिव्, ) "सः सिजस्ते०" ( ४।३।६५ ) इति ईत्, "स्पृशादि सृपो वा" ( ४।४।११२ ) इत्यनेन स्पृशो विचालेऽकारः, "व्यञ्जनानामनिटि" (४।३।४५) इति वृद्धिः,एकत्र आकारः, अन्यत्र आर्, "यजसृजमृजराजभ्राज०" ( २।१।८७ ) इत्यनेन शकारस्य षत्वम्, "षढोः कः सि" ( २।१।६२ ) इति सूत्रेण षस्य ककारः; "नाम्यन्तस्था०" ( २।३।१५ ) इति ( प्रत्ययस्य ) सस्य षत्वम् । [2]हशिटः० ( ३।४।५५ ) इत्यनेन सक् । [3]मृशंत् आमर्शने । [4]कृषींत् विलेखने । [5]तृपौच् प्रीतौ । [6]दृपौ च हर्षमोहनयोः । "अतृपत्, अदृपत्;" उभयत्र "लृदिद्द्युतादिपुष्यादेः परस्मै" (३।४।६४) इत्यनेन अङ् प्रत्ययः । तृपदृपोः पुष्यादित्वादङि प्राप्ते, शेषाणां तु हशिटः० ( ३।४।५५ ) इत्यनेन सकि प्राप्ते "स्पृशमृशकृष०" इति सूत्रं कृतम् । इयमवचूरिः स्पृशमृशेति सूत्रे प्राप्ते अदृपत् इत्यस्याग्रे बोद्धव्या ॥५४॥

## हशिटो नाम्युपान्त्याददृशोऽनिटः सक् ।३।४।५५॥

वृत्तिः—[1]हशिडन्तान्नाम्युपान्त्याद् दृशिवर्जितादनिटो धातोरद्यतन्यां परभूतायां "सक् प्रत्ययः" स्यात् । सिचोऽपवादः । दुह्,- [2]अधुक्षत्, विशअविक्षत्, लिह्लिशोः [3]अलिक्षत्, द्विष,- अद्विक्षत् । नाम्युपान्त्यादिति किम्? [4]अधाक्षीत् । अदृश इति किम्? अद्राक्षीत् । विकल्पितेटोऽपि धातोः परः पक्षेऽनिट्त्वात् सक्- न्यघुक्षत्, अन्यत्र इटि सति न सक्- न्यगूहीत् ॥५५॥

अवचूरिः–[1]हशिडन्ताद्धातोः परः सक् भवतीति सम्बन्धः, कीदृशात् हशिडन्तात्? नाम्युपान्त्यात्, पुनः कीदृशात्? अनिटः, इति योजना । [2]"अधुक्षत्," अत्र दुहींक् क्षरणे, दि, सक्, "हो धुट्पदान्ते" ( २।१।८२ ) इति हस्य ढः, "ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये" (२।१।७७) इति दस्य धकारः, "षढोः कः सि" ( २।१।६२ ) इति ढस्य कः, 'नाम्यन्तस्थाकवर्गात् पदान्तः०"(२।३।१५) इति सस्य षत्वम् । [3]"अलिक्षत्," लिहींक् आस्वादने, अथवा लिशं ऋषैत् गतौ, लिह लिश वा, अत्र "हो धुट्०" ( २।१।८२ ) इति हस्य ढः, अन्यत्र यजसृज०

(२।१।८७) इति शस्य षः, उभयत्र "षढोः कः सि" (२।१।६२। इति कः, इत्येवम्) अलिक्षत् इति सिद्धम् । [४]दहं भस्मीकरणे । "न्यधुक्षत्," गुहौंग् संवरणे, गुह, सक्, "हो धुट्०" (२।१।८२) इति हस्य ढः, "गडदबादे०" (२।१।७७) इति गस्य घकारः । "न्यगूहीत्," [ गुह्, अद्यतनीदि, सिजद्यतन्याम्" (३।४।५३) इति सिच्, ] अत्र च "धूगौदितः" (४।४।३८) इत्यनेन इट्, ["लघोरुपान्त्यस्य" (४।३।४) इति गुणः, ] "गोहः स्वरे" (४।२।४२) इति सूत्रेण गुहेरोकारस्य ऊकारः, "सः सिच्०" (४।३।६५) इति ईत्, "इट ईति" (४।३।७१) इत्यनेन सिच् लुप्यते ॥५५॥

## श्लिषः ।३।४।५६॥

वृत्तिः—श्लिषोऽनिटोऽद्यतन्यां "सक्" स्यात् । आश्लिक्षत् कन्यां मैत्रः । अनिट इत्येव-'श्लिषू दाहे' इति सेटः परो न सक्- अश्लेषीत्, अधाक्षीदित्यर्थः ॥५६॥

अवचूरिः—"श्लिषंच् आलिङ्गने," 'श्लिषः' इति सूत्रे पुष्यादित्वाद्ङि प्राप्ते 'श्लिषः' इति वचनं । तथा "पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्" इत्यङ एव बाधः, न ञिचः- आश्लेषि कन्या मैत्रेण ॥५६॥

## नासत्त्वाश्लेषे ।३।४।५७॥

वृत्तिः—श्लिषोऽप्राण्याश्लेषे वर्त्तमानात् "सक् न" स्यात् । उपाश्लिषज्जतु च काष्ठं च । असत्त्वाश्लेष इति किम् ? व्यत्यश्लिक्षन्त मिथुनानि ॥५७॥

अवचूरिः—"नासत्त्वाश्लेषे" इति पृथग्योगकरणात् पूर्वेणापि प्राप्तः सक् प्रतिषिध्यते ॥५७॥

## णि-श्रि-द्रु-स्रु-कमः[३] कर्त्तरि ङः ।३।४।५८॥

वृत्तिः— ण्यन्तात् श्र्यादिधातुभ्यश्चाद्यतन्यां कर्त्तरि "ङप्रत्ययः" स्यात् । णि,- अचीकरत्[१], औजढत्[२]; श्रि,- अशिश्रियत्, अदुद्रुवत्, असुस्रुवत्, अचकमत । कर्त्तरीति किम् ? अकारयिषातां कटौ मैत्रेण ॥५८॥

अवचूरिः—[१]कृ, करोति कश्चित्, तमन्यः प्रायुङ्क्त, "प्रयोक्तृ०" (३।४।२०) इति णिग्, "नामिनोऽकलिहलेः" (४।३।५१) इति वृद्धिः, कार्, अद्य० दि, "णि-श्रि-द्रु-स्रु०" इत्यनेन (प्रस्तुतसूत्रेण) ङप्रत्ययः, "उपान्त्यस्यासमानलोपि०" (४।२।३५) इत्यनेन धातोराकारस्य ह्रस्वः, कर्, तदनन्तरं "द्विर्धातुः०" (४।१।१। इति) द्विर्वचनम्, "असमानलोपे सन्वल्लघुनि ङे" (४।१।६३) इत्यनेनाभ्यासे सन्वत् कार्यम् "इत्वम्," "लघोर्दीर्घोऽस्वरादेः" (४।१।६४) इत्यनेनाभ्यासे दीर्घः ईत्वम्, "कङश्चञ्" (४।१।४६) इति कस्य चोऽभ्यासे, "णेरनिटि" (४।३।८३) इति णिग् लुप्यते, (इत्येवम्) अचीकरदिति सिद्धम् । [२]"औजढत्," वहीं प्रापणे, वह, उह्यते स्म, 'क्त,' (वह् + क्त) "यजादिवचेः किति" (४।१।७९) इति य्वृत् वस्य उ, (उह् + त) हो धुट्पदान्ते (२।१।८२) इति धातुहस्य ढः, (उढ् + त) "अधश्चतुर्थात्तथोर्धः" (२।१।७९) इति प्रत्ययतकारस्य धः, (उढ् + ध) "तवर्गस्य श्चवर्गष्टवर्गाभ्यां योगे चटवर्गौ" (१।३।६०) इति धस्य ढः, (उढ् + ढ) "ढस्तड्ढे (१।३।४२) इति दीर्घः ऊ, प्रकृतिढस्य च लोपः, (ऊढ) ऊढमाख्यत्, "प्रयोक्तृव्यापारे णिग्" (३।४।२०) इति णिग्, (ऊढ + णि) "अन्त्यस्वरादेः" (७।४।४३) इति ढस्य अकारलोपः, (ऊढ् + णि) "स्वरादेस्तासु" (४।४।३१) इति वृद्धिः औ, (औढ् + णि) अत्र द्विर्वचने परे कर्त्तव्ये "हो धुट्पदान्ते" इति (२।१।८२) कृतढत्वस्यासत्त्वे, तदाश्रितस्य "अधश्चतुर्थात्तथोर्धः" (२।१।७९) इत्यनेन कृतधत्वस्याप्यासत्त्वे, "णौ यत्कृतं कार्यं तत् सर्वं स्थानिवद्" इति न्यायात् अन्त्याऽकारलोपस्य स्थानित्वे सति, "नाम्नो द्वितीयाद् यथेष्टम्" (४।१।७)इत्यनेन 'ह् त' इति द्विर्वचनम्, "व्यञ्जनस्यानादेर्लुक्" (४।१।४४) इति तकारलोपे, गहोर्जः (४।१।४०)

इत्यभ्यासे ह्रस्व जे कृते, "हो धुट् पदान्ते" ( २।१।८२) इति शास्त्रस्यासिद्धिराश्रीयते तदा पुनरपि "हो धुट्-पदान्ते" ( २।१।८२ ) इति प्रक्रिया क्रियते, ततः "ढस्त-ड्ढे" ( १।३।४२ ) इति ढलोपे, पूर्वजकाराऽकारस्य दीर्घत्वे, "ह्रस्वः" ( ४।१।३९ ) इत्यनेन ह्रस्वः, इति 'औजढत्' इति सिद्धम् । [3]णिश्रिद्रु० इति सूत्रे कमिग्रहणम् "अशवि ते वा" ( ३।४।४ ) इति यदा णिङ् ……………(ना) स्ति तदा कमि ग्रहणं स………… (सार्थ)कम्, को…………………… (ऽर्थः ? णिङ् प्रत्य) यः ……………… (यदाक) मेः पर…… ………(रो भवति )तदा णिद्वारेण ङप्रत्ययः,……… ("अची)कमत" इति प्रयोगः, यत्र च न णिङ् तत्र "अचकमत" इति प्रयोगः। इयमवचूरिः कटौ मैत्रेण इत्यस्याग्रे ज्ञातव्या ॥५८॥

## ट्धे-श्वेर्वा ।३।४।५९॥

वृत्तिः—ट्धे-श्विभ्यां "कर्त्तर्यद्यतन्यां ङो वा" स्यात् । [1]अदधत्, [2]अधात्, [2]अधासीत्; अशिश्वियत्, अश्वयीत्, [3]अश्वत् ॥५९॥

अवचूरिः—"[1]इडेत्पुसि चातो लुक्" ( ४।३।९४ ) इति आकारलोपः । [2]ट्धेघ्राशाच्छासो वा ( ४।३।६७ ) इत्यनेन सिचो लोपो विकल्पेन । [3]"श्वयत्यसूवचपतः श्वास्थवोचपप्तम्" ( ४।३।१०३ ) इत्यनेन श्विस्थाने 'श्व' आदेशः ॥५९॥

## शास्त्यसू-वक्ति-ख्यातेरङ् ।३।४।६०॥

वृत्तिः—एभ्यः "कर्त्तर्यद्यतन्यामङ् प्रत्ययः" स्यात् । [1]अशिषत्, [2]आस्थत्, [3]अवोचत्, आख्यत् । कर्त्तरीत्येव—अशासिषातां शिष्यौ गुरुणा । तिवूनिर्देशो यङ्लुबन्तनिवृत्त्यर्थः; अशाशासीत्, अवावाचीत्, अचाख्यासीत् ॥६०॥

अवचूरिः—[1]"अशिषत्," शासूक् अनुशिष्टौ, शास्, ( अद्यतन्याः ) दि, शास्त्यसू० इति ( प्रस्तुतसूत्रेण ) अङ्, "इसासः शासोऽङ् व्यञ्जने" ( ४।४।११८ ) इति सूत्रेण 'इस्' आदेशः । [2]'आस्थत्,' असूच् क्षेपणे, अस्, ( अद्यतन्याः ) दि, "शास्त्यसूवक्ति०" इति ( प्रस्तुतसूत्रेण ) 'अङ्,' "श्वयत्यसूवचपतः श्वास्थवोचपप्तम्" ( ४।३।१०३ ) इति असूस्थानेषु 'अस्थ' आदेशः । [3]'अवोचत्' अत्र वच्स्थाने "श्वयत्य०" इति वोच् । शास्त्यसूवक्ति० इति ( प्रस्तुत ) सूत्रे 'असू' इत्ययमूकारः "असक् भुवि' 'असी असो' ( गत्यादानयोश्च ) इति धातुद्वयप्रतिषेधार्थः, "असूच् क्षेपणे" इति दिवादिर्ग्राह्यः तथाऽस्यतेः पुष्यादित्वादङि सिद्धेऽपि, यदत्र "शास्त्यसू०" इति पाठः स आत्मनेपदार्थः । तर्हि परस्मैपदेऽपि आत्मनेपदेऽपि "शास्त्यसू" इत्यनेनैव सिद्धः, किं पुष्यादिपाठेन ? सत्यम्, पुष्यादिगणेऽस्यतेः पाठो नियमार्थ एव कृतः, तेनास्यतेः परतोऽवश्यम् "अङ्" भवति, अन्येषां पुष्यादीनां तु कारणवशात् क्वचित्……………………(चारोऽपि, तेन "भगवन् मा) कोपीः" इत्यादि (? इति) बालरामायणे प्रयोगः सिद्धः ॥६०॥

## सर्त्यर्तेर्वा ।३।४।६१॥

वृत्तिः—सृऋधातुभ्यां "कर्त्तर्यद्यतन्यामङ् वा" स्यात् । [1]असरत्, असार्षीत्; आरत्, आर्षीत् । तिवूनिर्देशो यङ्लुबन्तनिवृत्त्यर्थः, असरिसारीत्, आरारीत् ॥६१॥

अवचूरिः—[1]"ऋवर्णदृशोऽङि" ( ४।३।७ ) इत्यनेन सृधातोर्गुणः । "असरिसारीत्, आरारीत्," भृशं पुनः पुनर्वा सरति, इयर्ति ऋच्छति वा "व्यञ्जनादे०" ( ३।४।९ ) इति सृधातोः यङ्, अन्यत्र ( =ऋधातोः ) "अट्यर्तिसूत्रि०" ( ३।४।१० ) इति यङ्, द्विर्वचनम्, "ऋतोऽत्" ( ४।१।३८ ) इति सूत्रेणाभ्यासे ऋकारस्य अः, 'रि-रौ च लुपि' ( ४।१।५६ ) इत्यनेनाभ्यासे ( सृधातौ ऋधातौ चानुक्रमेण) "री, र्" आगमः, "बहुलं लुप्" ( ३।४।१४ ) इति यङ् लुप्यते । यङो लोपे कृते एव द्वित्वम्, ऋतोऽत्, रिरौ च लुपीत्यादिकं कार्यम्, न यङि सति । तथा यङि लुप्ते सति अनुस्वारे-

तोऽपि धातोरिट् भवत्येव, "एकस्वर..................... [रावनुस्वारेतः" (४।४।५६) इति "एकस्वरत्वेन" इट् प्रतिषेधविहितत्वात्● ] । अद्यसनीदि, सिच्, "सः सिज०" ( ४।३।६५ ) इति ईत्, तत इट्, "इट ईति" ( ४।३।७१ ) इति सिचो लोपः, "सिचि परस्मै०" ( ४।३।४४ ) इति वृद्धिः आर्, आरारीवित्यत्र "स्वरादेस्तासु" (४।४।३१) इत्यभ्यासेऽकारस्य आकारो वृद्धिः ॥६१॥

## ह्वा-लिप् सिचः ।३।४।६२॥

वृत्तिः—ह्वादिभ्यः "कर्त्तर्यद्यतन्यामङ्" स्यात् । आह्वत्, अलिपत्, असिचत् ॥६२॥

## वात्मने ।३।४।६३॥

वृत्तिः—ह्वादिभ्यो "कर्त्तर्यद्यतन्यामात्मनेपदे परे वाऽङ्" स्यात् । आह्वत, आह्वास्त; अलिपत, अलिप्त; असिचत, असिक्त ॥६३॥

## लृदिद्-द्युतादि-पुष्यादेः परस्मै ।३।४।६४॥

वृत्तिः—लृदितो द्युतादिभ्यः पुष्यादिभ्यश्च "कर्त्तर्यद्यतन्यां परस्मैपदे परेऽङ्" स्यात् । लृदित्,- अगमत्, द्युतादि,- अद्युतत्, पुष्यादि,- अपुषत्, अश्लिषज्जतु च काष्ठं च । परस्मै इति किम् ? समगंस्त ॥६४॥

अवचूरिः—द्युतादयो धातवः २३ भ्वादौ, पुष्यादिधातवः ६७......................(दिवादौ ज्ञातव्याः)। पुष्य इति 'श्य' निर्देशात् पोषतिपुष्णात्यादि............ (भ्योऽङ् न भवति, किन्तु सिजेव- अपोषी)त् । लृकारानुबन्धधातुभ्यः- असृपत्, अशकत् । ( द्युतादिभ्यः- ) अरुचत्, "द्युद्भ्योऽद्यतन्याम्" ( ३।३।४४ ) इत्यनेन विकल्पेनात्मनेपदम् ॥६४॥

## ऋदिच्छ्वि-स्तम्भू-म्रुचू-म्लुचू-ग्रुचू-ग्लुचू-ग्लुञ्चू-ज्रो वा ।३।४।६५॥

वृत्तिः—ऋदिद्धातोः श्विप्रभृतिभ्यश्च "कर्त्तर्यद्यतन्यां परस्मैपदे परे वाऽङ्" स्यात् । अरुधत्, अरौत्सीत्; अभिदत्, अभैत्सीत्; अश्वत्, अश्वयीत्, [1]अशिश्वियत्; अस्तभत्, अस्तम्भीत्; अम्रुचत्, अम्रोचीत्; अम्लुचत्, अम्लोचीत्; अग्रुचत्, अग्रोचीत् अग्लुचत्, अग्लोचीत्; अग्लुचत्, अग्लुञ्चीत्; अजरत्, अजारीत् ॥६५॥

अवचूरिः—[1]"ट्वेश्वेर्वा ( ३।४।५९ ) इति ङः । स्तभू इति सौत्रो धातुः । 'वञ्चू चञ्चू तञ्चू त्वञ्चू मञ्चू मुञ्चू म्रुञ्चू म्रुचू म्लुचू ग्लुञ्चू षस्च गतौ,' 'ग्रुचू ग्लुचू स्तेये' इति भ्वादौ, 'जॄश् वयोहानौ' इति क्र्यादिः, 'जॄष् जॄष्च् जरसि' इति दिवादिः, द्वावपि ज्ञेयौ ॥६५॥

## ञिच् ते पदस्तलुक् च ।३।४।६६॥

वृत्तिः—पद्यतेर्धातोः कर्त्तर्यद्यतन्यास्तकारे परे "ञिच् प्रत्ययः" स्यात् । निमित्तभूतस्य तकारस्य लुक् च । उदपादि । त इति किम् ? उदपत्साताम् ॥६६॥

अवचूरिः—"ञिच् ते पद०" इति सूत्रे पदिधातोरात्मनेपदित्वात् निमित्ततकारोऽद्यतन्या आत्मनेप–

●तिवा शवानुबन्धेन, निर्दिष्टं यद् गणेन च ।
एकस्वरनिमित्तं च, पञ्चैतानि न यङ्लुपि ॥१॥

इति न्यायादेकस्वरत्वेन निर्दिष्टानि कार्याणि यङ्लुपि न भवितुमर्हन्ति, प्रकृते इट्प्रतिषेधः एकस्वरत्वेन निर्दिष्ट इति यङ्लुपि न भवति; ततः 'स्ताद्य०' (४।४।३२) इत्यनेनेड् भवत्येवेति भावः ।

बस्य प्रथमत्रिकसम्बन्ध्येकवचनतकारो गृह्यते, परस्मैपदमध्यमत्रिकस्य बहुवचनतकारो न ग्राह्यः। एवमुत्तरत्र। ञिच्प्रत्यये ञकारो "ञ्णिति" ( ४।३।५० ) इति सूत्रे विशेषणार्थः। चकारो "न कर्मणा ञिच्" ( ३।४।८८ ) इति विशेषणार्थः ॥६६॥

## दीप-जन-बुधि-पूरि-तायि-प्यायो वा ।३।४।६७॥

वृत्तिः—दीपादिधातुभ्यः कर्त्तर्यद्यतन्यास्ते परे "ञिच् वा स्यात्, तलुक् च"। अदीपि, अदीपिष्ट; अजनि, अजनिष्ट; अबोधि, अबुद्ध; अपूरि, अपूरिष्ट; अतायि, अतायिष्ट; अप्यायि, अप्यायिष्ट। त इत्येव- अदीपिषाताम् ॥६७॥

अवचूरिः—बुधीति इकारो दैवादिकस्य बुधेरात्मनेपदिनः परिग्रहार्थः ॥६७॥

## भाव-कर्म्मणोः ।३।४।६८॥

वृत्तिः—सर्वस्माद्धातोर्भावकर्म्मविहितेऽद्यतनीते परे "ञिच् तलुक् च" स्यात्। आसि त्वया, अकारि कटः चैत्रेण ॥६८॥

## स्वर-ग्रह-दृश-हन्भ्यः स्य-सिजाऽऽशीः-श्वस्तन्यां ञिट् वा ।३।४।६९॥

वृत्तिः—स्वरान्ताद्धातोर्ग्रहादिभ्यश्च विहितासु भावकर्मविषयासु स्य-सिजा-ऽऽशीः- श्वस्तनीषु "ञिट् प्रत्ययो वा" स्यात्। [1]दायिष्यते, दास्यते; अदायिषाताम् [2]अदिषाताम्; [3]दायिषीष्ट, दासीष्ट; दायिता, दाता; ग्राहिष्यते, "ञ्णिति" ( ४।३।५० ) इति वृद्धिः, [4]ग्रहीष्यते; अग्राहिषाताम्, अग्रहीषाताम्; ग्राहिषीष्ट, ग्रहीषीष्ट; ग्राहिता, ग्रहीता; दर्शिष्यते, द्रक्ष्यते; अदर्शिषाताम्, अदृक्षाताम्; दर्शिषिष्ट, दृक्षीष्ट; दर्शिता, द्रष्टा; घानिष्यते, हनिष्यते; अघानिषाताम्, अवधिषाताम्, अहसाताम्; घानिषीष्ट, "ञ्णिति घन्" ( ४।३।१०१ ) इति घनादेशः, वधिषीष्ट; घानिता, हन्ता ॥६९॥

अवचूरिः—प्रकृतिप्रत्यययोर्वचनवैषम्यान्न यथासंख्यं भवति। [1]"आत ऐः कृञ्ञौ" ( ४।३।५३ ) इति सूत्रेण आकारस्यैकारः। [2]"इश्च स्थादः" ( ४।३।४१ ) इत्यनेन इकारः। [3]"आत ऐः कृञ्ञौ" ( ४।३।५३ ) इति ऐः। दायिता, दाता इत्यस्याग्रे शमिष्यते, शामिष्यते, शमयिष्यते इत्यप्युदाहरणानि ज्ञेयानि। अत्र शम, शाम्यन्तं प्रयुङ्क्ते- णिग्, 'ञ्णिति' ( ४।३।५० ) ( इत्यनेन वृद्धिः ) आ, ( शामि )ष्यते, "स्वर-ग्रह०" इति ( प्रस्तुतसूत्रेण ) वा ञिट्, (अतः) "शमयिष्यते" अत्र न ञिट्। घटादेर्ह्रस्वो० ( ४।२।२४ ) इत्यनेन सर्वत्र ह्रस्वः। यत्र ञिट् तत्र विकल्पेन दीर्घः। ( अतः ञिटि सति शामिष्यते, शमिष्यते इति रूपद्वयम् )। एवमशमिष्यत, अशामि……………( ष्यत, ) अशमयिष्यत; अशमिषाताम्, अशामिषाताम्, अशमयिषाताम्; शमिषीष्ट, ( शामिषीष्ट, ) शमयिषीष्ट; शमिता, शामिता, शमयिता; एवं चायिष्यते, चेष्यते; शायिष्यते, शयिष्यते; स्ताविष्यते, स्तोष्यते; कारिष्यते, करिष्यते; तारिष्यते, तरिष्यते, तरीष्यते। भावकर्मणोरिति किम्? दास्यति। [4]"ग्रहीष्यते" इत्यादौ यत्र ञिट् नास्ति, तत्र सर्वत्र "तेर्ग्रहादिभ्यः" ( ४।४।३३ ) इति सूत्रेण इट्, "गृह्णोऽपरोक्षायां दीर्घः ( ४।४।३४ ) इति सूत्रेण इटो दीर्घः सर्वत्र, यत्र च स्वरग्रहेत्यादिना ञिट् तत्र सर्वत्र 'ञ्णिति" ( ४।३।५० ) इति सूत्रेण वृद्धिः, धातोरकारस्य आकारो वृद्धिः कार्या। 'द्रक्ष्यते' इत्यत्र "अः सृजिदृशोऽकिति" (४।४।१११) इति सूत्रेण धातुविचाले अकारागमः। 'घानिष्यते' इत्यत्र स्वरेत्यादिना ञिट् प्रत्यये कृते सति "ञ्णिति घन्" (४।३।१०१ ) इति सूत्रेण हनो "घन्" इत्यादेशः। 'हनिष्यते,' अत्र च "हनृतः स्यस्य" ( ४।४।४९ ) इति सूत्रेण 'इट्'। 'अघानिषाताम्' इत्यत्र ञिटि कृते "ञिणवि घन्" ( ४।३।१०१ ) इति घन् आदेशः। "अवधिषाताम्," अत्र च ञिटि कृते "अद्यतन्यां वा त्वात्मने"

( ४।४।२२ ) इति सूत्रेणात्मनेपदे विकल्पेन "वध इति सस्वर" आदेशः, 'अतः' ( ४।३।८२ ) इति सूत्रेण वधस्यान्त्यास्वरलोपः । "अहसाताम्" इत्यत्र "हनः सिच्" ( ४।३।३८ ) इति सूत्रेण "सिच् किद्वत्," तदनन्तरं = सिचः कित्वे सति "यमि-रमिनमिगमिहनिमनिवनतितनादेर्धुटि क्ङिति" ( ४।२।५५ ) इति सूत्रेण हनो "नकारस्य लोपः" । "वधिषीष्ट," अत्र "हनो वध आशिष्यञौ" ( ४।४।२१ ) इति सूत्रेण 'वध,' "अतः" ( ४।३।८२ ) इति सूत्रेणाकारलोपः ।।६९।।

## क्यः शिति ।३।४।७०।।

वृत्तिः—"धातोर्भावकर्मविहिते [1]शिति क्य-प्रत्ययः" स्यात् । [2]शक्यते त्वया, शक्येत, शक्यताम्, अशक्यत त्वया; [3]क्रियते, क्रियेत, क्रियताम्, अक्रियत कटस्त्वया; अक्रियेतां कटौ, अक्रियन्त कटाः, [4]क्रिया । [5]शितीति किम् ? अभावि ।।७०।।

अवचूरिः—[1]शकारानुबन्धे प्रत्यये । [2]"शक्यते" इत्यादिषु "क्ङिति यि शय्" ( ४।३।१०५ ) इति सूत्रेण 'शय्' आदेशः । [3]'क्रियते' इत्यत्र "रिः शक्याशीर्ये" (४।३।११०) इति सूत्रेण ऋकारस्य स्थाने 'रि' आदेशः। [4]कृ, क्रियते इति क्रिया, "कृगः श च वा" ( ५।३।१००) इति सूत्रेण शप्रत्ययः, क्यः, "रिः शक्याशीर्ये" ( ४।३।११० ) प्रत्ययः( ? इति ऋकारस्य स्थाने 'रिः' आदेशः ) । [5]शितीति किम् ? अभावि, बभूवे; अत्र भू, (परोक्षायाः) ए, द्वित्वम्, "भूस्वपोरदुतौ" ( ४।१।७० ) इति अकारोऽभ्यासे, "धातोरिवर्णोवर्ण०" ( २।१।५० ) इत्यनेन उवादेशः, "भुवो वः परोक्षा०" ( ४।२।४३ ) इत्यनेन ऊकारः । एवं भविषीष्ट, भविता, भविष्यते, अभविष्यत भवता; एवमकारि कटस्त्वया ।।७०।।

## कर्त्तर्यनद्भ्यः शव् ।३।४।७१।।

वृत्तिः—धातोरदादिवर्जितात् "कर्त्तरि विहिते शिति शव् प्रत्ययो" भवति । भवति, चोरयति, पचन्, धारयः, जनमेजयः राजा । कर्त्तरीत्येव-पच्यते । अनद्भ्यः इति किम् ? अत्ति ।।७१।।

अवचूरिः—अनद्भ्य इति अदादिवर्जनात् इति "अदं प्सांक् भक्षणे" इत्यादयः ककारानुबन्धा ज्ञेयाः । शकारवकारौ शिद्वित्कार्यार्थौ । "धारयः," धृ, धरन्तं प्रयुङ्क्ते, "प्रयोक्तृव्यापारे णिग्" ( ३।४।२० ) इति णिग्, "नामिनोऽकलि० ( ४।३।५१ ) इति वृद्धिः, धारयतीति धारयः, "साहि-साति-वेद्युदेजि-धारि-पारि-चेतेरनुपसर्गात्" ( ५।१।५९ ) इति सूत्रेण 'शः' प्रत्ययः, "कर्त्तर्यनद्भ्यः शव्" [ इति प्रस्तुतसूत्रेण धातोः परः शव्प्रत्ययः, "नामिनो गुणोऽक्ङिति" इत्यनेन इकारस्य गुणः 'ए,' "एदैतोऽयाय्" इत्यनेन-एकारस्य 'अय्,' "लुगस्यादेत्यपदे" (२।१।११३) इत्यकारलुकि धारयः इति सिद्धम् ] एजृ कम्पने, एज्, एजन्तमेजमानं वा प्रयुङ्क्ते, णिग्, जनमेजयतीति 'एजेः' ( ५।१।११८ ) इति सूत्रेण ख..................( श् ), "कर्त्तर्य० शव्," खित्यनव्यया० ( ३।२।१११ ) इति मोन्तः, ( शेषप्रक्रिया धारयवत् ) ।।७१।।

## दिवादेः श्यः ।३।४।७२।।

वृत्तिः—दिवादिधातोः "कर्त्तरि शिति श्यप्रत्ययः" स्यात् । शकारः शित्कार्यार्थः । दीव्यति । श्यादिप्रत्ययाः शवोऽपवादाः ।।७२।।

अवचूरिः—दिवादयः दिवूच् क्रीडाजयेच्छापणीत्यादयश्चकारानुबन्धा मन्तव्याः ।।७२।।

## भ्रास-भ्लास-भ्रम-क्रम-क्लम-त्रसि-त्रुटि-लषि-यसि-संयसेर्वा ।३।४।७३।।

वृत्तिः—एभ्यः "कर्त्तरि शिति श्यो वा" स्यात् । भ्रास्यते, भ्रासते; भ्लास्यते, भ्लासते; [1]भ्राम्यति, भ्रमति; भौवादिकस्य भ्रम्यति, "भ्रमू चलने" इति भ्वादौ परस्मैपदी; क्राम्यति, क्रामति; क्लाम्यति,

क्लामति; त्रस्यति, त्रसति; त्रुट्यति, त्रुटति; लष्यति, लषति; यस्यति, यसति; संयस्यति, संयसति। प्राप्ताप्राप्तविभाषेयम् ॥७३॥

अवचूरिः—'भ्रमूक्लमूत्रसंयस्' इत्येषा (इत्येषां) प्राप्ते, भ्रासम्लासक्रमूत्रुट्लषीनम् ( लषीनाम् ) अप्राप्ते, उभयत्रापि विकल्पेन श्यप्रत्ययः । "भासि टुभ्रासि टुम्लासृङ् दीप्तौ" इति ( भ्रासम्लासधातू ) भ्वादौ आत्मनेपदी ( पठितौ ) । [1]"भ्रमूच् अनवस्थाने" इति दिवादौ शमादिसप्तके परस्मैपदी, श्ये सति "शम्-सप्तकस्य श्ये" (४।२।१११) इति सूत्रेण दीर्घः, 'भ्राम्यति' इति सिद्धम् । "क्रमू पादविक्षेपे" इति भ्वादौ परस्मैपदी, "क्रमो दीर्घः परस्मै ( ४।२।१०९ ) इति दीर्घः । "क्लमूच् ग्लानौ" इति दिवादौ परस्मैपदी, 'ष्ठिवू-क्लम्वाऽऽचमः' ( ४।२।११० ) इति दीर्घः । 'त्रसैच् भये' इति दिवादौ परस्मैपदी । "चुट छुट त्रुटत् च्छेदने" तुदादौ । "लषी कान्तौ" इति भ्वादावुभयपदी । यसूच् प्रयत्ने इति दिवादौ । यसिनैव सिद्धे सम्पूर्वयसेर्ग्रहणमुपसर्गान्तरपूर्वकस्य यसेर्निवृत्त्यर्थं, तेन 'आयस्यति' इत्यादिषु नित्यं श्यः ॥७३॥

## कुषिरञ्जेर्व्याप्ये वा परस्मै च ।३।४।७४॥

वृत्तिः—कुषिरञ्जिभ्यां "व्याप्ये [1]कर्त्तरि शिद्विषये परस्मैपदं वा" स्यात्, [2]"तद्योगे श्यश्च । क्यात्मनेपदापवादौ । [3]कुष्णाति पादं मैत्रः, कुष्यति पादः स्वयमेव, कुष्यते पादः स्वयमेव, रजति वस्त्रं रजकः, रज्यति वस्त्रं स्वयमेव, रज्यते वस्त्रं स्वयमेव । व्याप्ये कर्त्तरीति किम् ? कुष्णाति पादं रोगः। [4]क्यात् परस्मैपदविकल्पविधानेनैव सिद्धे श्यविधानं 'कुष्यन्ती, रज्यन्ती-' त्यत्र "श्यशवः" ( २।१।११६ ) इति नित्यमन्तादेशार्थम् ॥७४॥

अवचूरिः—[1]कर्त्तरि कीदृशे ? व्याप्ये-कर्मरूपे, यत् कर्म प्रथमं, पश्चात् तदेव कर्म कर्त्तृरूपं भवति; एवंविधे कर्त्तरि सति । [2]परस्मैपदयोगे । [3]"कुष्णाति," कोऽर्थः ? बर्हिनिः ( ?बर्हिनिः) कुष्टान्तरवयवं करोति, अथवा कुष्णाति = देशान्तरं प्रापयति । कुष्णाति पादं मैत्र इति वाक्यं, वाक्ये 'पादम्' इति कर्म, कुष्णाति पादः स्वयमेव इति प्रयोगे 'पादः' इति कर्त्ता । कुष्यन् पादः स्वयमेव, कुष्यमाणः पादः स्वयमेव इत्यपि । रज्यद् वस्त्रं, रज्यमानं वस्त्रं स्वयमेव इत्यपि ज्ञेयम् । कुष्णाति पादं मैत्र इति परिणयात्रावाक्यं ( ? ) रजति वस्त्रं रजक इत्यम……………………( त्र वाक्यम् ) । परस्मैपदसन्नियोगे श्यप्रत्ययस्य विज्ञानादिह न श्यप्रत्ययः, यथा- ( "कतीह 'कुष्णानाः' पादाः ? ) कतीह 'रजमानानि' वस्त्राणि ? " अत्र "वयःशक्तिशीले" ( ५।२।२४) इति सूत्रेण शानप्रत्ययः, शानप्रत्ययोऽपि न परस्मैपदी, नापि आत्मनेपदी इति हेतोरत्र न श्यः। अयं विशेषः 'कुष्णाति पादं रोगः" इत्यस्याग्रे ज्ञातव्यः । [4]यदि कुषिरञ्जेः परः क्याऽऽत्मनेपदौ ( ? क्यात्परस्मैपदं ) विकल्पेन कुर्यात्, तदा "कुष्यन्ती, रज्यन्ती" इति ( नित्यं ) न सिध्येत्, इति श्यपरस्मैपदविधानं कृतं, येन "श्यशवः" ( २।१।११६ ) इत्यनेन "अतृस्थाने अन्तृ" इत्यादेशः ( नित्यं ) स्यात् ॥७४॥

## [1]स्वादेः श्नुः ।३।४।७५॥

वृत्तिः—स्वादिगणात् "कर्त्तरि- कर्तृविहिते शिति श्नुः प्रत्ययः" स्यात् । शकारः शित्कार्यार्थः । [2]सुनोति, सुनुते ॥७५॥

अवचूरिः—[1]'स्वादेः' = 'षुंग्ट् अभिषवे' इत्यादिधातोः परः । [2]"उ-श्नोः" ( ४।३।२ ) इत्यनेन 'श्नु'इत्यस्य गुणः ॥७५॥

## वाऽक्षः । ३।४।७६॥

वृत्तिः—अक्षात् "कर्त्तरि शिति श्नुर्वा" स्यात् । अक्ष्णोति, अक्षति ॥७६॥

अवचूरिः—"अक्षौ व्याप्तौ च" इति भ्वादौ परस्मैपदी, इत्यस्माद्धातोः ॥७६॥

## तक्षः स्वार्थे वा ।३।४।७७॥

वृत्तिः- स्वार्थे = तनूकरणेऽर्थे 'तक्षौ' इत्यस्मात् "कर्त्तरि शिति श्नुर्वा" स्यात्। तक्ष्णोति, तक्षति काष्ठम्। स्वार्थ इति किम्? [1]संतक्षति वाग्भिः शिष्यम् ।।७७।।

अवचूरिः—"तक्षौ त्वक्षौ तनूकरणे" इति भ्वादौ परस्मैपदी, इत्यस्य धातोरर्थः तनूकरणं=स्वार्थं इत्युच्यते। तक्ष्णुवानः, तक्षमाणः ( इत्यपि ज्ञेयम् )। [1]निर्भर्त्संयतीत्यर्थः ।।७७।।

## स्तम्भू–स्तुम्भू–स्कम्भू–स्कुम्भू–स्कोः श्ना च ।३।४।७८।।

वृत्तिः— स्तम्भादिसौत्रधातुभ्यः स्कुगश्च [1]"शिति [2]श्नाप्रत्ययः श्नुश्च" स्यात्। स्तभ्नाति, स्तभ्नोति; स्तुभ्नाति, स्तुभ्नोति; स्कभ्नाति, स्कभ्नोति; स्कुभ्नाति, स्कुभ्नोति; [3]स्कुनाति, स्कुनोति ।।७८।।

अवचूरिः- [1]कर्तृविहिते। [2]शकारः शित्कार्यार्थः। स्तभ्नानः, स्तभ्नुवानः; ( अत्र ) अनिर्दिष्टानुबन्धानां सौत्रधातूनां प्रायेण परस्मैपदित्वात् ["वयःशक्तिशिले" ( ५।२।२४ ) इति ] शानादिप्रत्ययः। एवं [3]स्कुनीते, स्कुनुते (इत्यपि ज्ञेयम्)। स्कुनातीत्यादौ "स्कुंग्श् आप्रवणे" इति क्र्यादौ ।।७८।।

## क्र्यादेः ।३।४।७९।।

वृत्तिः—क्र्यादेर्गणात् "कर्तृविहिते शिति श्ना" स्यात्। क्रीणाति, प्रीणाति ।।७९।।

अवचूरिः—क्र्यादयो "डुक्रींग्श् द्रव्यविनिमये" इत्यादयोऽत्र शकारानुबन्धा ज्ञातव्याः ।।७९।।

## व्यञ्जनाच्छ्नाहेरानः ।३।४।८०।।

वृत्तिः—"व्यञ्जनान्तात्क्र्यादेः परस्य श्नायुक्तस्य 'हेः' स्थाने 'आन' इत्यादेशः" स्यात्। पुषाण। व्यञ्जनान्तादिति किम्? लुनीहि। श्नाहेरित्येव- अश्नाति ।।८०।।

## तुदादेः शः ।३।४।८१।।

वृत्तिः—[1]तुदादिधातोः [2]"शिति [3]शप्रत्ययः" स्यात्। तुदति, तुदते ।।८१।।

अवचूरिः—[1]"तुदींत् व्यथने" इत्यादिकाद्धातोः। [2]कर्तृविहिते। [3]शकारः शित्कार्यार्थः ।।८१।।

## रुधां स्वराच्छ्नो नलुक् च ।३।४।८२।।

वृत्तिः—रुधादिधातोः "स्वरात्परः श्नप्रत्ययः" स्यात्, कर्तृविहिते शिति, [1]तद्योगे च "प्रकृतिनकारस्य लुक् च," प्रत्ययनकारस्य तु विधानसामर्थ्यान्न लुक्- रुणद्धि, हिनस्ति ।।८२।।

अवचूरिः—[1]"तद्योगे च प्रकृतिनकारस्य" इत्यस्यायं भावार्थः संभाव्यते,- यत्र "उदितः स्वराान्नोऽन्तः" ( ४।४।९८ ) इत्यनेन नोऽन्तः क्रियते, तस्य नः = अन्तस्थ नकारस्य लुक् भवति, यथा- 'हिनस्ति' इत्यत्र। 'रुणद्धि' इत्यत्र "अधश्चतुर्थात्तथोर्धः" ( २।१।७९ ) इति प्रत्ययतकारस्य धकारः। एवं 'रुन्द्धे' इत्यत्र "श्नास्त्योर्लुक्" ( ४।२।९० ) इति असम्बन्धिनकारस्याकारलोपः। 'हिनस्ति' इत्यत्र 'हिसु,' "उदितः स्वराान्नोऽन्तः" ( ४।४। ९८।इति नोऽन्तः ), ततो 'रुधां स्वरा०' ( इत्यनेन ) अ,रुधाम्०इत्यनेनैव नः = अन्तनकारस्य लुप्(क्) ।।८२।।

## कृग्–तनादेरुः ३।४।८३।।

वृत्तिः—कृगः [1]तनादिधातोश्च "कर्तृविहिते शिति उप्रत्ययः" स्यात्। [2]करोति, तनोति ।।८३।।

अवचूरिः—[1]"तनूयी विस्तारे" इत्यादिकधातोः। [2]"उश्नोः" ( ४।३।२ ) इत्यनेन उकारस्य गुणः। तनादिगणेऽपठित्वा भ्वादिमध्ये 'कृग्' इत्यस्य पाठः 'करति' इति प्रयोगे शवर्थम्, येषां मते तु कृगस्तनादौ पाठः, तन्मते "तन्भ्यो वा तथासि न्वोश्च" ( ४।३।

६८ ) इत्यनेन रूपद्वयम् "अकृत, अकृष्ट" इति प्राप्नेत्, (प्राप्येत) शब् च न सिध्येत्, स्वमते तु "अकृत,अकृथाः" इति नित्यमेव, "धुड्ह्रस्वाल्लुगनिटस्तथोः (४।३।७०) इत्यनेन सिचो लुक् ॥८३॥

## सृजः श्राद्धे ञि-क्या-ऽऽत्मने तथा ।३।४।८४॥

वृत्तिः—सृज्धातोः पराणि "ञिक्याऽऽत्मनेपदानि श्रद्धावति कर्त्तरि भवन्ति, तथा=यथाविहितानि"। असर्जि मालां धार्मिकः, सृज्यते मालां धार्मिकः, स्रक्ष्यते मालां धार्मिकः श्राद्धे इति किम् ? व्यत्यसृष्ट माले मिथुसृनम्, जति मालां मालिकः ॥८४॥

अवचूरिः—'सृजः श्राद्धे०' इति सूत्रे 'तथा' इति वचनात् यथा विहितानि ञिच्क्याऽऽत्मनेपदानि भवन्ति, तथाहि- "भावकर्मणोः" (३।४।६८) इति सूत्रेण "ञिच् तलुक्" च, "क्यः शिति" (३।४।७०) इति 'क्यः,' भावे कर्मणि (च) ञिच्क्याऽऽत्मनेपदानि, अत्र तु कर्तरि ञिक्यादयो भवन्ति, तथेति वचनादद्यतन्यामात्मनेपदते (परे) 'ञिच्,' 'तलुक्,' शिति च'क्य' इति सिद्धमिति भावार्थः॥८४॥

## तपेस्तपःकर्मकात् ।३।४।८५॥

वृत्तिः—तपिधातोः ( *अर्थान्तरवृत्तित्वेन[१] ) तपःकर्मकात् "कर्त्तरि ञिक्यात्मनेपदानि स्युः, [२]तथा"। तप्यते साधुस्तपः, तेपे तपांसि साधुः। तपिरत्र करोत्यर्थः। तपेरिति किम् ? कुरुते तपांसि साधुः। तप इति किम् ? उत्तपति स्वर्णं स्वर्णकारः। कर्मेति किम् ? तपांसि [ कर्तृपदं ] साधुं तपन्ति ॥८५॥

अवचूरिः—[१]"अर्थान्तरवृत्तित्वेन," कोऽर्थः ? करोत्यर्थेन। [२]यथा विहितानि करोतीत्यर्थः ( ? यथा विहितानीत्यर्थः )। अग्रे वक्ष्यमाणेन "तपः कर्त्रनुतापे च" ( ३।४।९१ ) इत्यनेन प्रतिषेधात् तपेः परो ञिच् न भवति, इति ञिच्प्रयोगो न दर्शित उदाहरणे ॥८५॥

## [१]एकधातौ [२]कर्मक्रिययैकाऽकर्मक्रिये[३] ।३।४।८६॥

वृत्ति.—एकस्मिन् धातौ कर्मस्थक्रियया [५]पूर्वदृष्टया एका=ऽभिन्ना संप्रत्यकर्मिका क्रिया यस्य, तस्मिन् [४]कर्त्तरि कर्मकर्तृरूपे "धातोर्ञिक्यात्मनेपदानि" स्युः। [६]अकारि कटः स्वयमेव, क्रियते कटः स्वयमेव, करिष्यते कटः स्वयमेव; एवमभेदि, भिद्यते, बिभिदे कुशूलः स्वयमेव। एकधाताविति किम् ? पचत्योदनं चैत्रः, सिध्यत्योदनः स्वयमेव। कर्मक्रिययेति किम् ? [७]साध्वसिश्छिनत्ति। एकक्रिय इति किम् ? [८]स्रवत्युदकं कुण्डिका, [९]स्रवत्युदकं कुण्डिकायाः। अकर्मक्रिय इति किम् ? भिद्यमानः कुशूलः पात्राणि भिनत्ति, हन्त्यात्मानमात्मा ॥८६॥

अवचूरिः—[१]एकश्चासौ धातुश्च=एकधातुस्तस्मिन्। [२]कर्मणि क्रिया=कर्मक्रिया, तया। [३]न विद्यते कर्म यस्याः क्रियायाः=सा अकर्मा, एका अकर्मा क्रिया यस्य कर्तुः=स एकाकर्मक्रियः, तस्मिन्, एवंविधे कर्त्तरि सति। [४]पुनः कर्त्तरि कीदृशे ? कर्मकर्तृरूपे, इत्याह- कर्त्तरि कर्मकर्तृरूपे। [५]पूर्वस्मिन् काले दृष्टा=पूर्वदृष्टा, तया, अत्र 'सहार्थे' ( २।२।४५। इति ) तृतीया। [६]"अकारि कटः स्वयमेव" इत्यादीनां भावार्थोऽयम्- अत्र करोति कटं मैत्रः, भिनत्ति कुशूलं चैत्रः इत्यादौ यैव क्रिया कटादिकर्मणां निष्पत्तिविदारणादिका, सैव क्रिया सुकरत्वेनाविवक्षते कर्तृव्यापारे स्वातन्त्र्यविवक्षायां तस्मिन्नेव धातावऽकर्मिका च, एवं चाकर्मकत्वाद्भावेऽप्यात्मनेपदं भवति- क्रियते कटेनेत्यादि, एवं क्रियमाणः कटः, चक्रे कटः स्वयमेव। [७]साध्वसिश्छिनत्ति, एवं साधु स्थाली ..........( पचति, ) अत्र असिना कृत्वा

*इदं पदं हस्तलिखितप्रतौ न विद्यते, बृहद्वृत्तौ सत्त्वादत्र तदीयावचूरेरपि सद्भावाच्च (          ) इति चिह्नान्तोऽस्माभिः प्रक्षिप्तम्।

साधु छिनत्ति, स्थाल्यां साधु पचा भवति, एवं करणाधिकरणक्रियर्यैकक्रिये कर्त्तरि मा भूत् । अत्र 'स्रवति,' कोऽर्थः ? विसृजति, निष्क्रामति इत्येवं क्रियाभेदः, इति नैकक्रियत्वम् । [१]"स्रवत्युदकं कुण्डिकायाः" इत्यस्याग्रे "गलन्त्युदकं वलीकानि, कोऽर्थः ? छविप्रान्तं, 'छाननि' इति प्रसिद्धिः, गलत्युदकं वलीकेभ्यः, अत्रापि मुञ्चति, पतति इति क्रियाभेदात् नैकक्रियत्वम्," इत्यक्षराणि ज्ञेयानि "हन्त्यात्मानमात्मा" इत्यस्याग्रे ( इदं ) ज्ञेयम्- एकस्यैव कर्मत्वं कर्त्तृत्वं च कथम्? इति चेत्, उच्यते,-सर्वमपि ( कर्म स्वातन्त्र्यमनुभूय ) कर्तृव्यापारेण न्यक्कृतं सत् कर्म्मतामनुभवति, कर्तृव्यापाराविवक्षायां तु स्वव्यापारे स्वातन्त्र्यात् कर्त्तृत्वमस्याव्यावृत्तमेव★ ॥८६॥

## पचिदुहेः ।३।४।८७॥

वृत्तिः–पचिदुहिभ्यामेकधातौ कर्मस्थक्रियया-ऽकर्म्मिकया[१] सकर्मिकया वा, एकक्रिये कर्त्तरि कर्मकर्तृरूपे, "ञिक्यात्मनेपदानि" [२]स्युः । अपाच्योदनः स्वयमेव, एवं [३]पच्यते; अदोहि गौः स्वयमेव, दुग्धे गौः स्वयमेव, [४]अदुग्ध ॥८७॥

अवचूरिः—अकर्मकस्येह पूर्वेणैव सिद्धे सकर्मकार्थं "पचिदुहेः" इति वचनं कृतम् । [१]पूर्वदृष्टयाकर्मत्वे पूर्वेण सिद्धमपि पुनरनूद्यते, सूत्रारम्भात् । [२]अपवादविषयं मुक्त्वा । [३]पच्यते ओदनः स्वयमेव, पक्ष्यते ओदनः स्वयमेव । [४]अदुग्ध गौः स्वयमेव । "उदुम्बरं फलं पचति वायुः" इति मूलप्रयोगः, पचिरन्तर्भूतण्यर्थो द्विकर्मकः, उदुम्बरः फलं पच्यते स्वयमेव, ( अपक्तोदुम्बरः फलं स्वयमेव, ) एवं "गां दोग्धि पयो गोपालकः" इति मूलप्रयोगः, दुग्धे गौः पयः स्वयमेव, अदुग्ध गौः पयः स्वयमेव, अधुक्षत गौः पयः स्वयमेव, ( इति ) दुहिपच्योः कर्मणि प्रयोगः । तथा दुहिपच्योः कर्मणि प्रयोगः ( ो ) उत्तरसूत्रेण "न कर्मणा ञिच्" इत्यनेन ञिचो निषेधं वक्ष्यति इति ञिचः प्रयोगो न दर्शितः । तथा अविशेषेण दुहेर्ञिचो विकल्पं क्यस्य च प्रतिषेधं वक्ष्यति इति न क्यप्रयोगो दर्शितः ॥८७॥

## न कर्मणा ञिच् ।३।४।८८॥

वृत्तिः—पचिदुहेः "कर्मणा योगेऽनन्तरोक्ते[१] ●कर्त्तरि ञिच् न" स्यात् । अपक्तोदुम्बरः फलं स्वयमेव, अदुग्ध गौः पयः स्वयमेव । कर्मणेति किम् ? अपाच्योदनः स्वयमेव, अदोहि गौः स्वयमेव । [१]अनन्तरोक्ते कर्त्तरीत्येव - अपाच्युदुम्बरः फलं वायुना[२] ॥८८॥

अवचूरिः—····[१]"(अ)नन्तरोक्ते," एक·······(क्रिये) कर्मकर्तृरूपे ···· ( इ ) त्यर्थः । [२]एवमदोहि गौः पयो गोपालकेन ॥८८॥

## रुधः ।३।४।८९॥

वृत्तिः—"रुधोऽनन्तरोक्ते कर्त्तरि ञिच् न" स्यात् । अरुद्ध गौः स्वयमेव ॥८९॥

अवचूरिः—अनन्तरोक्ते कर्त्तरीत्येव— अरोधि गौर्गोपालकेन ॥८९॥

★यदाहुः— निर्वृत्त्यादिषु तत्पूर्वमनुभूय स्वतन्त्रताम् ।
कर्त्रन्तराणां व्यापारे कर्म संपद्यते ततः ॥१॥
निवृत्तप्रेषणं चैतत्स्वक्रियावयवे स्थितम् ।
निवर्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते ॥२॥

●अत्र कनकप्रभसूरीणामाक्षेपपरिहारवचनविलास एवम्-"अनेन तु कर्मणि विधीयते, तर्ह्यत्र ( वृत्तौ ) कर्मणीत्युच्यताम् ? न, एवं कृते पचिदुह्योस्तक्रकौण्डिन्यन्यायेन सत्येव कर्मणि स्यात्, ततश्च कर्मण्यसति पूर्वेणापि न स्यात् ।

## स्वरदुहो वा ।३।४।९०॥

वृत्तिः—"स्वरान्ताद् धातोर्दुहेश्चानन्तरोक्ते कर्त्तरि ञिच् वा न" स्यात् । अकृत, अकारि कटः स्वयमेव; अदुग्ध, अदोहि गौः स्वयमेव ॥९०॥

अवचूरिः—[1]"धुड्ह्रस्वाल्लुगनिटस्तथोः" ( ४।३।७० ) इति सिच्लोपः । अनन्तरोक्ते कर्त्तरीत्येव-अकारि कटश्चैत्रेण, अदोहि गौर्बल्लवेन=गोपालेन ॥९०॥

## तपः कर्त्रनुतापे च ।३।४।९१॥

वृत्तिः—"तपिधातोः कर्मकर्त्तरि, कर्त्तर्यनुतापे [1]चार्थे ञिच् न" स्यात् । ( कर्मकर्त्तरि,- ) [2]अन्ववातप्त कितवः स्वयमेव, कर्त्तरि,- अतप्त तपांसि साधुः । (अनुतापे,-) *अन्वतप्त चैत्रेण,[3] ★अन्ववातप्त पापः पापेन कर्मणा[4] । कर्त्रनुतापे चेति किम् ? अतापि पृथ्वी राज्ञा ॥९१॥

अवचूरिः—[1]कर्तुरनुतापे = सन्तापे सतीत्यर्थे च विवक्ष्यमाणे इत्यर्थः । अनुतापग्रहणाद् भावे कर्मणि च ञिच् ( न भवति ) । [2]कर्मकर्त्तरीदमुदाहरणम् । [3]भावे इदमुदाहरणम् । [4]कर्मणीदमुदाहरणम् ॥९१॥

## णि-स्नु-श्र्यात्मनेपदाऽकर्मकात् ।३।४।९२॥

वृत्तिः—"ण्यन्तात् स्नुश्रिभ्यां [1]चात्मनेपदविधायकर्मकेभ्यश्च कर्मकर्त्तरि ञिच् न" स्यात् । ण्यन्तात्,- [2]अपीपचदोदनं चैत्रेण मैत्रः, [3]पुनरोदनस्य सुकरत्वेन कर्तृत्वे सति अपीपचतौदनः स्वयमेव । स्नु,-[4]प्रास्नोष्टः गौः स्वयमेव, श्रि,-[5]उदशिश्रियत दण्डः स्वयमेव, आत्मनेपदाकर्मक,-[6]व्यकृत सैन्धवः स्वयमेव । ञिच्निषेधात् [7]ञिट् स्यादेव,- पाचिता, पाचिषीष्टौदनः स्वयमेव; एवं प्रास्नाविष्ट, प्रस्नाविषीष्ट गौः स्वयमेव; उच्छ्रायिता उच्छ्रायिषीष्ट दण्डः स्वयमेव; अघानिष्ट, अघानिषीष्ट गौः स्वयमेव; ञिणवि घन् (४।३।१०१। इति हन्धातोः "घन्" आदेशः ) । पृथग्योगादुत्तरसूत्रेण न ञिट्निषेधः ॥९२॥

अवचूरिः—[1]येभ्यः कर्मण्यसत्यात्मनेपदं विधीयते, त आत्मनेपदाकर्मका धातवः । [2]पचत्योदनं चैत्रः, तं चैत्रं पचन्तं प्रायुङ्क्त इति वाक्ये णिग्, ततोऽपीपचदोदनं चैत्रेण मैत्र इत्येकः प्रयोगः, [3]पुनरोदनस्येत्यादि,- अपीपचतौदनः स्वयमेव इति सूत्रोक्तं मूलोदाहरणं ज्ञातव्यम् । यदि वा स्वयं पच्यमान ओदनः स्वम्-आत्मानं प्रायुङ्क्त, तत्रापि अपीपचतौदनः स्वयमेव । उभयत्रोदाहरणे "स्वयमेवौदनोऽपाचि" इत्यर्थो ज्ञातव्यः। [4]प्रास्नावीत् गां देवदत्तः ( इति वाक्यम् ), प्रास्नोष्ट गौः स्वयमेवेति मूलोदाहरणम् ।[5]उदशिश्रियद्दण्डं दण्डो इति वाक्यम्, उदशिश्रियत दण्डः स्वयमेवेति उदाहरणं ज्ञातव्यम् । [6]तथा व्यकार्षीत् सैन्धवं चैत्रः इति वाक्यम्, व्यकार्षीत् (इति) कोऽर्थः ?वल्गयति स्म, गतिं शिक्षयति स्मेत्यर्थः, व्यकृत सैन्धवः स्वयमेवेति मूलोदाहरणम्, विपूर्वकरोतिर्वल्गनेऽर्थेऽन्तर्भूतण्यर्थः कर्मस्थक्रियः । आत्मनेपदाकर्मकविषये शेषोदाहरणावलीयं ज्ञेया,– ······ ( अव )धीद्गां गोप इति वाक्ये अ········( हत ) गौः स्वयमेव, व्यतापसीत् पृथ्वीं रविरिति वाक्ये व्यतप्त पृथ्वी स्वयमेव । [7]"स्वरग्रहदृशहन्भ्यः" (३।४।६९ ) इत्यनेन ञिट् भवत्येव ॥९२॥

## भूषार्थ-सन्-किरादिभ्यश्च ञिक्यौ ।३।४।९३॥

वृत्तिः—"भूषार्थेभ्यः, सन्नन्तेभ्यः, किरादिभ्यः, चकाराण्णिस्नुश्र्यात्मनेपदाकर्मकेभ्यश्च धातुभ्यः कर्मकर्त्तरि [1]ञिक्यौ न" भवतः । [2]भूषार्थ,-अलमकार्षीत्कन्यां चैत्रः, अलमकृत कन्या स्वयमेव; एवमलंकरिष्यते कन्या स्वयमेव, अलंकुरुते कन्या स्वयमेव; सन्नन्त,-अचिकीर्षीत्कटं चैत्रः, अचिकीर्षिष्ट चिकीर्षते वा कटः स्वयमेव; [3]किरादि,- अकारीत् पांसुं करी, अकीर्ष्ट, कीर्षीष्ट, किरते पांशुः स्वयमेव; [4]ण्यन्त,- कारयते कटः स्वयमेव, स्नु,-प्रस्नुते

*पश्चात्तापः कृत इत्यर्थः । ★पश्चात्तापं कारित इत्यर्थः ।

गौः स्वयमेव, श्रि,- उच्छ्रयते दण्डः स्वयमेव, आत्मनेपदाकर्मक,- विकुर्वते सैन्धवाः स्वयमेव ॥९३॥

अवचूरिः-- [1]ञि इत्युक्ते 'ञिच्, ञिट्' इति द्वयोरपि प्रत्यययोर्ग्रहणं भवति। [2]भूषार्थाः अलंपूर्वकृ, भूष, मण्डण् इत्यादयः। पर्यस्कार्षीत् कन्यां चैत्र इति वाक्ये पर्यस्कृत, परिस्करिष्यते, परिस्कुरुते कन्या स्वयमेव; एवमबूभुषत्कन्यां छात्रः, अबूभुषत भूषयिष्यते, भूषयते कन्या स्वयमेव, अममण्डत्; मण्डयिष्यते, मण्डयते कन्या स्वयमेव । [3]किरादिः,- कृ, गृ, दुह्, ब्रू, श्रन्थ, ग्रन्थ, नमि (नम्) इति सप्तकिरादयः; अवपूर्वकृ, अवाकीर्ष्ट, अवकीर्षीष्ट, अवकिरते पांशुः स्वयमेव; अगारीत् ग्रासं चैत्रः, अगीर्ष्ट, गीर्षीष्ट, गिरते ग्रासः स्वयमेव; एवं न्यगीर्ष्ट, ( निगीर्षीष्ट, निगिरते ग्रासः स्वयमेव; ) दोग्धि गां पयो गोपः इति वाक्ये दुग्धे गौः स्वयमेव; अवोचत्कथां चैत्रः, अवोचत, ब्रूते कथा स्वयमेव; अश्रन्थीत् मालां मालिक' इति वाक्ये अश्रन्थिष्ट, श्रन्थीते, श्रन्यते माला स्वयमेव; अग्रन्थीद् ग्रन्थं विद्वान्, अग्रन्थिष्ट, ग्रन्थीते, ग्रन्थते ग्रन्थः स्वयमेव; श्रन्थिग्रन्थौ क्र्यादौ, चुरादौ युजादौ वा पठ्येते, ( पठ्येते ) अनंसीद् दण्डं दण्डी, अनंस्त, नमते दण्डः स्वयमेव; किरादिभ्य इति बहुवचनं शिष्टप्रयोगानुसरणार्थम् । [4]णिस्नुश्र्यात्मनेपदा० ( ३।४।९२ ) इति पूर्वसूत्रेण णिस्नुश्र्यात्मनेपदाकर्मणां 'ञिच्' निषिद्धोऽस्ति, परं ण्यन्तस्नुश्र्यात्मनेपदाऽकर्मणां 'ञिट्' भवत्येव, पृथग्योगात्, इत्ययं विशेषः णिस्नुश्र्येति(३।४।९२)पूर्वसूत्रे भणितोऽस्ति इति भूषार्थसन्० इति सूत्रे ण्यन्तस्नुश्र्यात्मनेपदाकर्मणां क्यप्रत्ययप्रतिषेध उदाह्रियते इत्याह- ण्यन्तेत्यादि ॥९३॥ अत्र सूत्रे ( पादे )ऽवचूरिश्लोक-४४९ । अक्षर- २४॥

## करणक्रियया क्वचित् ।३।४।९४।।

वृत्तिः-"एकधातौ पूर्वदृष्टया करणस्थया क्रियया एकाकर्मक्रिये कर्त्तरि ञिक्यात्मनेपदानि क्वचिद्भवन्ति"। परिवारयन्ति कण्टकैः पुरुषा वृक्षम्, परिवारयन्ते कण्टका वृक्षं स्वयमेव । क्वचिन्न भवति,- साध्वसिश्छिनत्ति॥९४॥ग्रन्थाग्रम् -२२१॥

इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने तृतीयाध्यायस्य चतुर्थः पादः समाप्तः।

॥ इति तृतीयोऽध्यायः समाप्तः ॥

॥ शुभं भवतु ॥

ॐ

❀ अर्हं ❀

# ❀ चतुर्थोऽध्यायः ❀

## [ प्रथमः पादः ]

[1]द्विर्धातुः परोक्षा-ङे प्राक्तु स्वरे स्वरविधेः

।४।१।१॥

वृत्तिः-परोक्षायां ङे च प्रत्यये परे [2]"धातुर्द्विर्भवति, [3]स्वरादौ तु द्विर्वचननिमित्ते प्रत्यये परे स्वरस्य कार्यात् प्रागेव द्वित्वं" स्यात्। पपाच, अचकमत। धातुरिति किम्? [4]प्राशिश्रियत्। विदाञ्चकार; अत्र "वेत्तेः कित्" (३।४।५१) इति वचनादामि परोक्षाकार्यं न भवति। प्रागिति किम्? [5]निनाय, [6]पपौ; एवमादिषु वृद्धयादेः स्वरविधेः प्रागेव द्वित्वं सिद्धम्। स्वर इति किम्? [7]जेघ्रीयते। स्वरविधेरिति किम्? श्वि-[8]शुशाव। "प्राक्तु स्वरे (स्वरविधेः)" इति आद्विर्वचनमधिकारः[9] ॥१॥

अवचूरिः—[1]द्वौ वारौ (अस्य) = द्विः, "द्वित्रिचतुरः सुच्" (७।२।११०) इति स्। [2]धातोर्द्विर्वचनं भवतीत्यर्थः। [3]स्वरादिप्रत्यये परे पूर्वं धातोर्द्विर्वचनं भवति, पश्चात्तु धातोः स्वरस्य गुणवृद्धयादिककार्यं क्रियते इत्यर्थः। [4]प्रोपसर्गस्य न द्विर्वचनमित्यर्थः। [5]'निनाय,' अत्र नी, णव्, स्वरादौ प्रत्यये परे पूर्वं द्विर्वचनम्, पश्चात् "नामिनोऽकलिहलेः (४।३।५१) इत्यनेन वृद्धिः, यदि पश्चाद् द्विर्वचनं (क्रियेत), तदा 'निनाय' इति न सिद्धयेत्; [6]एवं पपावित्यत्र "आतो णव औः" (४।२।१२०) इत्यनेन 'णवः' स्थाने 'औ'। [7]'जेघ्रीयते,' "घ्रां गन्धोपादाने," भृशं पुनः पुनर्वा जिघ्रति (इति) "व्यञ्जनादे०" (३।४।९) इति यङ्; यङ् प्रत्ययो न स्वरादिः इति (पूर्वं) "घ्राध्मोर्यङि" (४।३।९८) इति सूत्रेण धातोराकारस्य ईकारः, पश्चाद् द्विर्वचनम्; एवं 'जेगीयते,' "ईर्व्यञ्जनेऽयपि" (४।३।९७) इति ईः। [8]'शुशाव' इत्यत्र 'टुओश्वि गतिवृद्धयोः' (इति)श्वि, णव्,"वा परोक्षायङि" (४।१।९०) इति सूत्रेण इकारसहितवकारस्य य्वृत् - उकारः, 'शु',

तदनन्तरं शु इत्यस्य द्विर्वचनम्, "नामिनोऽकलि०" (४।३।५१) इति वृद्धिः, 'शौ,' "ओदौतोऽवाव्"(१।२।२४। इत्यौकारस्याऽऽव् ) । स्वरविधेरयमर्थः- 'यत्र केवलस्य स्वरस्य' कार्यं भवति तत्र पूर्वं द्विर्वचनम्, पश्चात् स्वरस्य कार्यं =स्वरविधिः; 'शुशाव' इत्यत्र च स्वरव्यञ्जनयोरुभययोरपि कार्यमुपस्थितं ग्वृत्, इति पूर्वं ग्वृत्, पश्चात् 'शु' इति द्विर्वचनम्; तदनन्तरं स्वरकार्यं वृद्धिः संजाता इति परमार्थः । [१]अन्यथा हि 'आटिटत्' इत्यादि न सिध्यति, यदि प्रागेव णेर्लोपः, पश्चाद् द्वित्वं कृतं स्यात्; परन्त्वेवं न, पूर्वं टिरिति ( 'टि' इति ) द्वित्वं, पश्चात् णेर्लोपः कर्त्तव्यः । "द्विर्धातुः०" इति प्रथमसूत्रादारभ्य "ह्वः शिति" ( ४।१।१२। इति ) सूत्रं यावत् द्वित्वाधिकारे सूत्राणि १२ ॥१॥

## आद्योऽश एकस्वरः ।४।१।२॥

वृत्तिः—"अनेकस्वरस्य धातोराद्य एकस्वरोऽवयवः परोक्षायां ङे च परे द्विः" स्यात् । जजागार ॥२॥

अवचूरिः—अंशपर्यायोऽवयव उच्यते । पूर्वेण सर्वस्य धातोर्द्वित्वे प्राप्ते 'आद्योऽशः०' इति वचनं कृतम् । जाग् इति द्विर्वचनम्, अनु जागृ इति* ॥२॥

## [१]सन्-यङश्च ।४।१।३॥

वृत्तिः—"सन्नन्तस्य यङन्तस्य च "आद्य एकस्वरोऽशः=अवयवः द्विः" स्यात् । [२]तितिक्षते, [३]चिकीर्षति, [४]पापच्यते । चकारः पूर्वोक्तनिमित्तसमुच्चयार्थ उत्तरार्थ एव, तेन उत्तरत्र परोक्षाङे सन्नन्तयङन्तानां यथासंभवं द्वित्वं भवति ॥३॥

अवचूरिः—[१]सन्यङश्चेत्यत्र षष्ठीनिर्देश उत्तरार्थः, तेन 'प्रतीषिषति' इत्यादावुत्तरसूत्रेण सनो द्वित्वं सिद्धम् । [२]"तिजि क्षमानिशानयोः," "गुप्तिजोगर्हा०" ( ३।४।५ ) इति सन्, अत्र 'तिज्,' [३]'चिकीर्ष' इत्यत्र 'कीर्' इति द्विर्वचनम्; एवं [४]पच् इति ॥३॥

## स्वरादेर्द्वितीयः ।४।१।४॥

वृत्तिः—स्वरादेर्धातोर्द्विर्वचनभाजो [१]"द्वितीयोऽश एकस्वरो द्विः" स्यात्, [२]न त्वाद्यः । अटिटिषति, अटाट्यते । प्राक्तु स्वरे स्वरविधेरित्येव-[३]आटिटत्, [४]प्रोर्णुनाव, [५]अरिरिषति ॥४॥

अवचूरिः—[१]द्वितीयोऽवयवः । [२]'नत्वाद्यः,' आद्योऽवयवो न द्विरुच्यते इत्यर्थः । [३]आटिटत्, "अट पट इट किट कट कटु कटै गतौ,"अटति कश्चित्,तमन्यः प्रायुङ्क्त, णिग्,' ञ्णिति' ( ४।३।५०। इति ) वृद्धिः आ, अद्यतनीत्, 'णिश्रि०' (३।४।५८) इति ङप्रत्ययः, प्राक्तु स्वरे स्वरविधेरिति वचनात्पूर्वं 'टि' इति द्वित्वम्, तदनन्तरं णेरनिटि ( ४।३।८३ ) इत्यनेन णिग्लोपः । [४]'प्रोर्णुनाव' इत्यत्र प्र, उर्णु, णव्, अत्राऽपि प्राक्तु स्वरे इति वचनात् 'ऊर्' विश्लिष्य 'नु' इति द्विरुच्यते, पश्चात् "नामिनोऽकलिहलेः" ( ४।३।५१। इति ) वृद्धिः । [५]अरिरिषति, अत्र 'ऋ प्रापणे च' इति स्वादिः, अथवा 'ऋक् गतौ' इत्यदादौ ह्वादिः जुहोत्यादिः, अथवा 'ऋश् गतौ' इति क्यादिः, ऋ, अर्तुमिच्छति, "तुमर्हादिच्छायां सन्नतत्सनः" ( ३।४।२१ ) इति सन्, ऋस्मिपूङञ्जशौकगृदृधप्रच्छः" ( ४ । ४ । ४८ ) इति सूत्रेण इट्, "नामिनो गुणो." ( ४।३।१। इति ) अर्, 'रि' द्विरुच्यते, अत्र च इटः कार्यित्वं,न निमित्तत्वम्; ततो द्वित्वनिमित्तस्य स्वरादिप्रत्ययस्याऽभावात् प्राक्स्वरविधिर्गुण एव भवति, पश्चात् 'रि' इति द्वित्वम् ॥४॥

## न बदनं [१]संयोगादिः ।४।१।५

वृत्तिः—स्वरादिधातोर्द्वितीयांशस्य = द्वितीयस्यावयवस्य एकस्वरस्य "बकारदकारनकाराः संयोगस्याद्या न द्विर्भवन्ति" । [२]उब्जिजिषति,

*अत्र पाठोऽशुद्धश्च्युतकियदंशश्च प्रतीयते ।

[3]अड्डिडिषति, [4]उन्दिदिषति । संयोगादिरिति किम् ? [5]प्राणिणिषति ॥५॥

अवचूरिः– [1]संयोगादिरिति शब्दस्य 'वदनम्' इत्यस्य विशेषणत्वान्नपुंसकत्वप्राप्तावपि "पुंलिङ्गं कटणथपमय" इति लिङ्गे ( लिङ्गानुशासनप्रथमश्लोके ) "किर्मषि" इति पाठबलात् पुंलिङ्गत्वमेव, न क्लीबत्वमिति। [2]'उब्जत् आर्जवे, [3]अड्डङ् अभियोगे, [4]उन्दैप् क्लेदने' [5]"प्राणिणिषति,'अत्र 'अन श्वसक् प्राणने' (इति) अन्, प्राणितुमिच्छति (इति) सन्, "द्वित्वेप्यन्तेऽप्यनितेः परेस्तु वा" (२।३।८१) इत्यनेन नकारद्वयस्यापि णत्वम् ॥५॥

## अयि रः ।४।१।६॥

वृत्तिः-स्वरादिधातोर्द्वितीयांशस्यैकस्वरस्य "रेफः रकारः संयोगादिर्न द्विः" स्यात्, अयि = यदि रेफात्पर आनन्तर्येण यकारो न स्यात्। अर्चिचिषति, प्रोर्णुनाव। अयीति किम् ? [1]अरार्यते ॥६॥

अवचूरिः—"अरार्यते," [1]'ऋंक् गतौ' भृशं पुनः पुनर्वा इयर्ति = ऋच्छति, "अट्यर्तिसूत्रिमू०" (३।४।१०) इत्यादिना यङ्, "क्ययङाशीर्ये" (४।३।१०) इत्यनेन गुणः अर्, "स्वरादेर्द्वितीयः" (४।१।४) इति 'र्य' इति द्वित्वम्, 'आगुणावन्यादेः' (४।१।४८) इति दीर्घः आ ॥६॥

## नाम्नो द्वितीयाद् यथेष्टम् ।४।१।७॥

वृत्तिः – स्वरादिनामधातोर्द्विर्वचनभाजो "द्वितीयादारभ्य एकस्वरोंऽशो यथेष्टं द्विरुच्यते"। अशिश्वीयिषति, अश्वीयियिषति, अश्वीयिषिषति। ७॥

अवचूरिः— अश्वमिच्छति (इति) "अमाव्ययात् क्यन् च" (३।४।२३। इति) क्यन्, 'क्यनि' (४।३।११२) इति सूत्रेण ईकारः; अश्वीयितुमिच्छति, [ तुमर्हादि० (३।४।२१) इति ] सन्, ["स्ताद्यशितोऽत्रोणादेरिट्" (४।४।३२। )इति ] इट् ॥७॥

## अन्यस्य ।४।१।८॥

वृत्तिः—स्वरादेरन्यस्य व्यञ्जनादेर्नामधातोः "एकस्वरोंऽशः प्रथमो द्वितीयस्तृतीयादिर्वा यथेष्टं द्विरुच्यते"। पुपुत्रीयिषति, पुतित्रीयिषति, पुत्रीयियिषति, पुत्रीयिषिषति ॥८॥

अवचूरिः—आदिशब्दाच्चतुर्थोऽवयवोऽपि ॥८॥

## कण्ड्वादेस्तृतीयः ।४।१।९॥

वृत्तिः-कण्ड्वादिधातोरेकस्वर- "स्तृतीय एवांशो द्विः" स्यात्। कण्डूयियिषति ॥९॥

अवचूरिः—'कण्डूग् गात्रविघर्षणे' (इति) कण्डू, "धातोः कण्ड्वादेर्यक्" (३।४।८। इति यक्) कण्डूयितुमिच्छति ॥९॥

## पुनरेकेषां ।४।१।१०॥

वृत्तिः—[1]एकेषां मते "द्वित्वे कृते पुनर्द्वित्वं" स्यात्। सुसोषुपिषते, बुबोभूयिषते। एकेषामिति किम् ? सोषुपिषते ॥१०॥

अवचूरिः—[1]एकेषामाचार्याणां मते। 'सुसोषुपिषते,' 'ञिष्वपंक् शये' (इति) स्वप्, भृशं स्वपिति, यङ्, "स्वपेर्यङ्ङे च (४।१।८०) इति सूत्रेण ष्वृत् उकारः, ततो द्वित्वम्, "आगुणावन्यादेः" (४।१।४८। इति) अभ्यासे ओत्वम्, ( एवं 'सोषुप्य' इति स्थिते ) सोषुपितुमिच्छति (इति) सन्,'अतः'(४।३।८२)इति सूत्रेण यकारस्याकारलोपः, 'योऽशिति' (४।३।८०) इति सूत्रेण य् लुप्यते, पुनर्द्वित्वम् 'सो' इति, 'ह्रस्वः' (४।१।३९) इति 'सो' इत्यस्य ह्रस्वः सु। एवं 'बुबोभूयिषते,' भू, यङ्, द्विः, "आगुणा०" (४।१।४८। इति) गुणः, "द्वितीयतुर्ययोः पूर्वौ" (४।१।४२) इति सूत्रेण भकारस्य बकारः, शेषं प्राग्वत्, नवरम् 'अतः' (४।३।८२)

इति अकारो लुप्यते, न यकारलोपोऽप्राप्तेः• ॥१०॥

## यिः सन् वेर्ष्यः ।४।१।११॥

वृत्तिः—"ईर्ष्यधातोर्यिः सन् वा द्विः" स्यात् । ईर्ष्यियिषति, ईर्ष्यिषिषति ॥११॥

अवचूरिः—सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः ॥११॥

## हवः शिति ।४।१।१२॥

वृत्तिः—जुहोत्यादयः "शिति द्विर्भवन्ति" । जुहोति, ददाति ॥१२॥

अवचूरिः—अदादिधातुप्रान्ते 'हुं क् दानादनयोः' इत्यादयो 'विष्लृं की व्याप्तौ इति पर्यन्ताः "जुहोत्यादय" इति संज्ञाधातवः १४ ज्ञातव्याः ॥१२॥

## चराचर-चलाचल-पतापत-वदावद-घनाघन-पाटूपटं वा ।४।१।१३॥

वृत्तिः—एते शब्दा अचि "कृतद्विर्वचना वा" निपात्यन्ते । चरतीति चराचरः, चलतीति चलाचलः, पतापतः, वदावदः. [1]घनाघनः, [2]पाटयतीति पाटूपटः; पक्षे- चरः, चलः, पतः, वदः, हनः, पाटः ॥१३॥

अवचूरिः—'चराचर०' (४।१।१३। इति प्रस्तुत) सूत्रादारभ्य 'दाश्वत्०' ( ४।१।१५ ) इति सूत्रपर्यन्तं द्वित्वनिपातसूत्राणि- ३ । चरिचलिपतिवदिहन्तीनां अजन्तानां निपातनात् द्विर्वचनम्, अभ्यासे दीर्घः । [1]हन्तेर्हकारस्य घकारः, सर्वं निपातनात् । [2]तथा णिगन्तपाटयतेरजन्तस्य द्वित्वं, ह्रस्वत्वं, पूर्वस्य च ऊकारान्तता च निपात्यते ॥१३॥

## चिक्लिद-चक्नसम् ।४।१।१४॥

वृत्तिः—एतौ निपात्येते । [1]चिक्लिदः, चक्नसः ॥१४॥

अवचूरिः—[1]'क्लिदौच् आर्द्रभावे,' क्लिद्, क्लिद्यतीति "नाम्युपान्त्यप्रीकृगज्ञः कः" ( ५।१।५४ ) इति कः । तथा 'क्नसूच् ह्वृतिदीप्त्योः', क्नस्, क्नस्यतीति [ 'अच्' ( ५।१।४९ ) इति सूत्रेण ] अच् । अथवा उभयत्रापि क्लेदनं-चिक्लिदः, क्नसनं-चक्नसः इति वाक्ये 'स्थादिभ्यः कः' ( ५।३।८२ ) इति सूत्रेण कप्रत्ययः, निपातनादुभयत्र द्विर्वचनम्, 'कङश्चञ्' ( ४।१।४६ । इति ककारस्य चकारः ) ॥१४॥

## दाश्वत्साह्वत्मीढ्वत् ।४।१।१५॥

वृत्तिः—एते "क्वसन्ता" निपात्यन्ते । [1]दाश्वान्, [2]साह्वान्, [3]मीढ्वान् ॥१५॥

अवचूरिः—[1]'दाशृग् दाने, ददाश (इति) दाश्वान्, "तत्र क्वसुकानौ तद्वत्" ( ५।२।२ ) इति क्वसुः, निपातनादत्र न द्वित्वं, न इट् च । [2]'षहि मर्षणे,' "षः सोऽष्ट्यैष्ठिवष्वष्कः" ( २।३।९८। इति षस्य सः ) सह् भ्वादौ आत्मनेपदी, परं निपातनबलात् कानप्राप्तावपि क्वसुः कार्यः, निपातनाच्च द्वित्वम्, न इट्, उपान्त्यदीर्घश्च कार्यः । [3]'मिहं सेचने,' मिह्, क्वसुः, अत्र निपातनादुपान्त्यदीर्घः, हस्य ढः, न द्वित्वं, न इट् ॥१५॥

## ज्ञप्यापो ज्ञीपीप् न च द्विः सि सनि ।४।१।१६॥

वृत्तिः—ज्ञपेरापेश्च सकारादौ सनि परे यथासंख्यम् "ज्ञीप् ईप्" इत्यादेशौ भवतः, "अनयोरेकस्वरांशो न द्विः" स्यात् । ज्ञीप्सति, ईप्सति । सीति किम् ? जिज्ञपयिषति ॥१६॥

अवचूरिः—धातोः सन्प्रत्ययस्य ( च ) विचाले न इट्, नान्यः प्रत्ययः । सि ( ? स् ) सकारादिसन्

•"व्यञ्जनान्ताद् धातोः परस्य" यकारस्य लुग् भवति, भूधातुः स्वरान्त इत्यत्र तस्याप्राप्तिः ।

उच्यते। "ज्ञप्यापो ज्ञीपी०" इति (प्रकृत) सूत्रादारभ्य 'ङे पिबः पीप्य' (४।१।३३) इति सूत्रपर्यन्तं धातोरादेशविधाने द्विर्वचनाभावे च सूत्राणि १०। 'ज्ञांश् अवबोधने,' जानन्तं प्रयुङ्क्ते, णिग्, "अर्तिरीव्लीह्रीक्नूयिक्ष्माय्यातां पुः" (४।२।२१) इति सूत्रेण पोन्तः, "मारणतोषणनिशाने ज्ञश्च" (४।२।३०) इत्यनेन ह्रस्वः, पश्चात् ज्ञीप्। एवम् 'आप्लृंट् व्याप्तौ,' आप्, णिग्, सन्, ईपादेशे·····(कृ)ते द्वित्वं प्राप्तमपि, न च द्विरिति वचनात् प्रतिषिध्यते द्वित्वम् ॥१६॥

## ऋध ईत् ।४।१।१७।

वृत्तिः—ऋधः सकारादौ सनि परे 'ईत्' आदेशः स्यात्, "न चास्य द्विः"। ईर्त्सति। सीत्येव- [1]अर्दिधिषति। इवृध. (४।४।४७। (इति इट्) ॥१७॥

अवचूरिः—[1]"इवृधभ्रस्जदम्भश्रियूर्णुभरज्ञपिसनितनिपतिवृद्दरिद्रः सनः" (४।४।४७) इति सूत्रेण विकल्पेन इट्, अत्र धातुसन्विचाले इट् जात इति सकारादिसनत्र नास्ति। "ऋधंच् वृद्धौ" इति दिवादौ, "ऋधंट् वृद्धौ" इति स्वादौ; उभावपि गृह्येते; 'ऋध' इति सामान्यनिर्देशात्। ऋध्, अर्धितुमिच्छति, सन् ॥१७॥

## दम्भो धिप् धीप् ।४।१।१८॥

वृत्तिः—दम्भेः सादौ सनि परे 'धिप्, धीप्' आदेशौ भवतः, न चास्य द्विः। धिप्सति, धीप्सति ॥१८॥

## अव्याप्यस्य मुचेर्मोग्वा ।४।१।१९॥

वृत्तिः—अकर्मकस्य मुचेः सादौ सनि परे 'मोक्' स्याद्वा, न चास्य द्विः। मोक्षति, मुमुक्षति चैत्रः, [1]मोक्षते, [2]मुमुक्षते वत्सः स्वयमेव। अव्याप्यस्येति किम्? मुमुक्षति वत्सं चैत्रः ॥१९॥

अवचूरिः—[1]"भूषार्थसन्किरादिभ्यश्च ञिक्यौ" (३।४।९३) इत्यनेन क्यप्रत्ययनिषेधः ॥१९॥

## [1]मि-मी-मा-दामित् स्वरस्य[2] ।४।१।२०॥

वृत्तिः—मिमीमादासंज्ञकानां स्वरस्य सादौ सनि परे 'इत्' आदेशः स्यात्, "न चैषां द्विः"। [3]मित्सति, [4]मित्सते, [5]प्रमित्सति, (एवं प्रमित्सते)। [6]मित्सति, [7]प्रमित्सते भूमिम्, [8]अपमित्सते यवान्, [9]दासंज्ञा,- दित्सति, धित्सति ॥२०॥

अवचूरिः—[1]"मिमीमादाम्" इत्यत्र बहुवचनं व्याप्त्यर्थम्, तेन "निरनुबन्धग्रहणे न सानुबन्धग्रहणम्" अयं न्यायोऽत्र नाश्रीयते। [2]तथा सूत्रे यत् 'स्वरस्य' इति तत् "सर्वस्य धातोर्मा भूत् इत् आदेश." इति ज्ञापयितुं कृतमित्यर्थः। [3]'डुमिग्ट् प्रक्षेपणे,' मातुमिच्छति, (एवं मित्सते)। [4]मित्सते,' अत्र 'मीङ्च् हिंसायाम्' इति दिवादावात्मनेपदी, मेतुमिच्छति मित्सते। [5]प्रमित्सति,' अत्र 'मींग्श् हिंसायाम्' इति क्र्यादावुभयपदी, प्रमातुमिच्छति। 'मी' इति ('मींग्श् मींङ्च्' इति) उभयोरपि ग्रहणम्। [6]मांक् माने। [7]मांङ्क् मानशब्दयोः। [8]मेङ् प्रतिदाने। 'मा' इति मांमांङ्क्मेङां ग्रहणम्। [9]दासंज्ञका इमे-"दां दाने, देङ् त्रैङ् पालने, डुदांग्क् दाने, दों छोंच् छेदने" इति(दा। रूपाः) ४, "ट्धें पाने, डुधांग्क् धारणे" (इति धारूपौ द्वौ;) दारूपाणां 'दित्सति,' दासंज्ञयोः ('ट्धें, डुधांग्क्' इत्यनयोर्धारूपयोः) 'धित्सति' इति रूपं सिद्धम्। दासंज्ञानां चतुर्णां यथाक्रममेते प्रयोगाः, तथाहि-दाम्, प्रदित्सति दानं; ।१। देङ्, दित्सते पुत्रम्; ।२। डुदांग्क्, दित्सति, दित्सते वस्त्रम्; ।३। दोंच्, दित्सति दण्डम्; ।४। अथ धासंज्ञ (धारूपौ) २ ट्धें,- धित्सति स्तनम्; ।१। डुधांग्क्- धित्सति, धित्सते श्रुतम् ।२। वृत्तावेकैक एव प्रयोगो लिखितोऽस्ति,- दित्सति, धित्सति (इति) ॥२०॥

## रभलभशकपतपदामिः ।४।१।२१॥

वृत्तिः—एषां स्वरस्य सादौ सनि परे 'इकारः' आदेशः स्यात्, "न चैषां द्विः।" आरब्धुमिच्छति = आरिप्सते, लिप्सते, शिक्षति, पित्सति, पित्सते। सीत्येव-पिपतिषति ॥२१॥

### राधेर्वधे ।४।१।२२॥

वृत्तिः—राधेर्वधे = हिंसायां वर्त्तमानस्य सादौ सनि स्वरस्य 'इकारः' स्यात्, "न चास्य द्विः" प्रतिरित्सते (?ति), अपरित्सते (?ति)। वध इति किम्? आरिरात्सति गुरुन् ॥२२॥

अवचूरिः—'प्रतिरित्सते ति', राधंच् वृद्धौ. प्रतिराद्धुमिच्छति, एवमपरित्सति। आङ्पूर्वो राध आराधनार्थे वर्तते ॥२२॥

### अविति परोक्षासेट्थवोरेः ।४।१।२३।

वृत्तिः—राधेर्हिंसार्थस्याविति परोक्षायां थवि च सेटि स्वरस्य 'एकारः' स्यात्, 'न च द्विः'। रेधतुः, रेधुः. रेधिथ, अपरेधतुः, अपरेधिथ। अविदिति किम्? अपरराध। वध,-इत्येव आरराधुः, आरराधिथ ॥२३॥

अवचूरिः—एवं प्रतिरेधुः, प्रतिरेधिथ; "स्कसृवृभृस्तुद्रुश्रुस्रोर्व्यञ्जनादेः परोक्षायाः" (४।४।८१) इत्यनेन इट् ॥२३॥

### [1]अनादेशादेरेकव्यञ्जनमध्ये[2]ऽतः ।४।१।२४॥

वृत्तिः—अवित्परोक्षासेट्थवोः परयोर्योऽनादेशादिर्धातुस्तत्सम्बन्धिनः स्वरस्यातः = अकारस्य [3]असहायव्यञ्जनयोर्मध्यगतस्य 'ए' इत्यादेशः स्यात्; 'न च द्विः' पेचतुः, पेचुः, पेचिवान्, पेचुषी, पेचिथ, नेमुः, नेमिथ। अविदित्येव,-अहं पपच। अनादेशादेरिति किम्? बभणुः। एकव्यञ्जनमध्ये इति किम्? ततक्षिथ। अत इति किम्? दिदिवुः ॥२४॥

अवचूरिः—[1]येषां धातूनां परोक्षाविनिमित्तमाश्रित्याभ्यासे आदेशो = वर्ण ...... यः (?वर्णविकारः) क्रियते, ते आदेशादयो धातव उच्यन्ते; यथा-बभणुः, चकणुः इत्यादयः। येषां तु परोक्षाविनिमित्तेऽपि सति आदेशो न स्यात्, तेऽनादेशादयो धातवः; यथा-पेचुः, रेणुः। तथा "णम्, षहि" इत्यादीनां नत्व-सत्वविधिः परोक्षाद्यालम्बनं नाश्रयति, निरालम्बौ नत्वसत्वौ = निमित्तं विना नकारसकारौ, इति तेऽपि नमिसहिप्रभृतिधातवोऽनादेशादयः,। अत एव नेमतुः, नेमुः, नेमिथ; सेहे. सेहाते, सेहिरे, सेहिथ इत्यादयोऽपि दर्शिता एकारविधौ, युजादौ ग्रहण्। [2]एके च = असहाये च ते व्यञ्जने च इति एकव्यञ्जने, एकव्यञ्जनयोर्मध्यम् = एकव्यञ्जनमध्यम्, तस्मिन्। [3]केवलयोरेव, न संयोगाक्षरयोः ॥२४॥

### तॄ-त्रप-फल-भजाम् ।४।१।२५॥

वृत्तिः—एषां 'स्वरस्यात एत्वं' स्यादवित्परोक्षासेट्थवोः,-'न च द्विः'। [1]तेरुः, तेरिथ; त्रेपे, त्रेपाते, त्रेपिरे; [2]फेलुः, फेलिथ; भेजुः, भेजिथ। तरतेरतो [3]गुणरूपात्, त्रपेरनेकव्यञ्जनमध्यत्वात्, फलभजोरादेशादित्वान्न प्राप्नोतीति वचनम् ॥२५॥

अवचूरिः—"[1]स्कृच्छृतोऽकि परोक्षायाम्" (४।३।८) इति सूत्रेण गुणः। "[2]फल निष्पत्तौ, ञिफला विशरणे" उभयोरपि ग्रहणम्। '[3]गुणरूपत्वात्', कोऽर्थः? वक्ष्यमाणेन "न शशददवादिगुणिनः" (४।१।३०) इति सूत्रेण गुणवतां धातूनामेत्वप्रतिषेध उक्तोऽस्ति इत्यत्र तरतिग्रहणं कृतमित्यर्थः ॥२५॥

### जॄभ्रमवमत्रसफणस्यमस्वनराजभ्राजभ्रासभ्लासो वा ।४।१।२६॥

वृत्तिः— एषां "स्वरस्यातोऽवित्परोक्षासेट्थवोरेत्वं वा स्यात्, न च द्विः"। [1]जेरुः, जजरुः; जेरिथ, जजरिथ; भ्रेमुः, बभ्रमुः; भ्रेमिथ, बभ्रमिथ; एवं वेमुः, ववमुः [2]इत्यादयः। २६॥

अवचूरिः—[1]जेरुरित्यत्र "स्कृच्छृतोऽकि परोक्षायाम्" (४।३।८) इति सूत्रेण गुणः। [2]आदिशब्दादेवं प्रयोगावली ज्ञातव्या,-वमिथ, ववमिथ; त्रेसुः, तत्रसुः; त्रेसिथ, तत्रसिथ; फेणतुः, पफणतुः;

फेणिथ, पफणिथ; स्येमुः, सस्यमुः; स्येमिथ, सस्यमिथः; स्वेनतुः सस्वनतुः; स्वेनिथ, सस्वनिथ; रेजुः, रराजुः; रेजिथ, रराजिथ; भ्रेजे, बभ्राजे; भ्रेसे, बभ्रासे; भ्लेसे, बभ्लासे ॥२६॥

## वा [१]श्रन्थ-ग्रन्थो न लुक् च ॥४।१।२७॥

वृत्तिः—श्रन्थग्रन्थोः स्वरस्याबित्परोक्षासेट्थवोः 'एकारो वा स्यात्, 'तद्योगे च नकारस्य लुक्; न च द्विः'। [२]श्रेथुः, शश्रन्थुः; श्रेथिथ, शश्रन्थिथ; [३]ग्रेथुः, जग्रन्थुः; ग्रेथिथ, जग्रन्थिथ ॥२७॥

अवचूरिः—[१]"श्रन्थग्रन्थः" इत्युक्ते श्रन्थग्रन्थधातू क्र्यादिकौ चौरादिकौ वा ग्राह्यौ । 'श्रथुङ् शैथिल्ये', 'ग्रथुङ् कौटिल्ये' इति अनयोर्न ग्रहणम्, (" उदितः स्वरान्नोऽन्तः" (४।४।६८) इत्यनेन) नोन्तविधिरिति लाक्षणिकत्वादनयोर्न एत्वमिति विशेषः । [२]श्रन्थश् मोचनप्रतिहर्षयोः । [३]ग्रन्थश् संदर्भे ॥२७॥

## दम्भः ॥४।१।२८॥

वृत्तिः—दम्भेः स्वरस्याबित्परोक्षायाम् 'एत्वं' स्यात्, 'न लुक् च; न च द्विः'। देभुः । अविदित्येव-ददम्भ ॥२८॥

## थे वा ॥४।१।२९॥

वृत्तिः—दम्भेः 'स्वरस्यैत्वं वा' स्यात् थपरे, 'तद्योगे न लुक्; न च द्विः'। देभिथ, ददम्भिथ ॥२९॥

## न शसददवादिगुणिनः ॥४।१।३०॥

वृत्तिः—शसिदद्योः, वकारादीनां गुणिनां च धातूनां स्वरस्य [१]"एत्वं न' स्यात् । [२]विशशसुः, विशशसिथ; [३]ददद, [४]ववले, [५]विशशरुः, विशशरिथ ॥३०॥

अवचूरिः—··········[ "न शसददवादिगुणिनः"] इति सूत्रे 'एत्वं' नि·····[षिध्य] ते, द्विर्वचनं भवत्येव । ··· ·········(यत्र) एत्वविधिः तत्र द्विर्वच ········(नं प्र) तिषिध्यते इति भावः । [२]"शसू हिंसायाम्' । [३]दद दाने' । "[४]वलि वल्लि संवरणे' । "[५]कॄ मॄ शॄ हिंसायां, "स्कृच्छ्रतोऽकि परोक्षायाम्" (४।३।८) इति गुणः ॥३०॥

## हौ दः ॥४।१।३१॥

वृत्तिः—दासंज्ञधातोर्हौ परे-'ऽन्तस्यैत्वं स्यान्न [१]च द्विः'। देहि, धेहि । हाविति व्यक्तिनिर्देशादिह नैत्वं,-[२]दत्तात्, धत्तात् ।.३१॥

अवचूरिः—[१]"न च द्विः' इति वचनात्कृतमपि द्वित्वं निवर्तते, तेन यङ्लुप्यपि "देहि" इत्येव भवति । "आशिषि तुह्योस्तातङ्" (४।२।११९) इति सूत्रेण हिस्थाने 'तातङ्' ॥३१॥

## देर्दिगिः परोक्षायाम् ॥४।१।३२॥

वृत्तिः—[१]देङः परोक्षायां दिगिरादेशः' स्यात्, 'न च द्विः'। [२]दिग्ये, अवदिग्यिरे ॥३२॥

अवचूरिः—[१]"देङ् त्रैङ् पालने'। [२]"योऽनेकस्वरस्य" ( २।१।५६ ) इति य आदेशः इवर्णस्थाने ॥३२॥

## ङे [१]पिबः पीप्य ॥४।१।३३॥

वृत्तिः—णयन्तस्य पिबतेर्ङे परे 'पीप्य' आदेशः स्यात्, 'न द्विः'। [१]अपीप्यत् । पिबतिनिर्देशात्पातेर्न पीप्य,-[२]अपीपलत् । लुप्तविप्निर्देशाद् यङ्लुप्यपि न पीप्य,—अपापयत् ।।३३॥

अवचूरिः—[१]"पां पाने' इति भ्वादिः, *पान्तं प्रयुङ्क्ते, णिग्, अद्यतनीदि, "णिश्रिद्रु०" (३।४।५८। इति) ङप्रत्ययः । [२]पांक् रक्षणे, पान्तं प्रयुङ्क्ते, णिग्, "पातेः" (४।२।१७) इति सूत्रेण लोऽन्तः, अद्यतनीदि, ' णिश्रिद्रु० (३।४ ५८। इति) ङः, ततः ··· ·········ङपरे णौ "उपान्त्यस्यासमानलोपिशास्वृदितो ङे" (४।२।३५) इत्यनेन धातोरुपान्त्यस्य ह्रस्वः, पश्चात् 'पल्' इति द्विर्वचनम्, "असमान-

* अत्र वैयाकरणैः 'पान्तम्' इति प्रयोगश्चिन्त्यः, अत्र 'पिबन्तम्' इति प्रयोगः प्रसिद्धः ।

लोपे०" (४।१।६३) इति सूत्रेण इकारोऽभ्यासे, 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४। इति इकारः) 'णेरनिटि' (४।३।८३। इति सूत्रेण) णिग्लोपः, अपीपलदिति सिद्धम् ॥३३॥

## अङे हिहनो हो घः पूर्वात् ।४।१।३४॥

वृत्तिः—हिहन्धात्वोर्ङ वर्जिते प्रत्यये परे 'द्वित्वे सति पूर्वस्मात्परस्य हकारस्य घः' स्यात् । हि-प्रजिघाय, [1]प्रजिघीषति, [2]प्रजेघेति; हन्—जिघांसति, [3]जंघन्यते । अङ इति किम् ? प्राजीहयत् पूर्वादिति वचनान्न च द्विरिति निवृत्तम् ॥३४॥

अवचूरिः—[1]स्वरहन्गमोः सनि धुटि (४।१।१०४) इति दीर्घः । [2](बहुलं लुप् ३।४।१४ इति सूत्रेण) यङ् लोपः । (एवं) जघनीति । [3]मुरतोऽनुनासिकस्य (४।१।५१) इत्यभ्यासे मोऽन्तः ॥३४॥

## जेर्गिः सन्परोक्षयोः ।४।१।३५॥

वृत्तिः—जयतेः सन्परोक्षयोर्द्वित्वे सति पूर्वस्मात्परस्य 'जि' इत्यस्य 'गि' इत्यादेशः स्यात् । [1]जिगीषति, जिगाय । सन्परोक्षयोरिति किम् ? जेजीयते ।३५॥

अवचूरिः—(एवं) विजिगीषते । [1]"जिगीषति', अत्र 'जिं ज्रि अभिभवे' इत्ययं जिर्गृह्यते, 'ज्यांश् वयोहानौ' इत्यस्यापि 'ज्याव्यधः क्ङिति' (४।१।८१) इत्यनेन य्वृति कृते जिरूपं (जिरूपस्य) 'गि' (इत्यादेशः) प्राप्नोति, परं स जिः 'लाक्षणिकः' इति "जिज्यतुः" इति रूपं भवति; अत्र ('गि' इति) आदेशो न भवति ॥३५॥

## चेः किर्वा ।४।१।३६।

वृत्तिः—चिनोतेः सन्परोक्षयोर्द्वित्वे सति पूर्वस्मात्परस्य 'किर्वा' स्यात् । चिक्ये, चिच्ये; चिकाय, चिचाय ॥३६॥

## पूर्वस्यास्वे स्वरे [1]योरियुव् ।४।१।३७॥

वृत्तिः—धातोर्द्वित्वे सति यः पूर्वस्तस्य संबन्धिनो योः = इकारस्योकारस्य चास्वे स्वरे परे 'इय, उव्' आदेशौ भवतः । इयेष, [2]इयर्त्ति [3]अरियर्ति, [4]अरियरीति, उवोष । अस्व इति किम् ? ईषतुः, ऊषतुः । स्वर इति किम् ? [5]इयाज ॥३७॥

अवचूरिः-[1]योः,-'इ उ' इति मण्डनिका, सन्धौ कृते (? कृतायां) षष्ठीङस् । [2]इयर्त्ति, 'ऋ कगतौ', वर्त्तमानातिव्, 'हवः शिति' (४।१।१२) इत्यनेन 'ऋ ऋ' इति द्विर्वचनम्। 'पृभृमाहाङामिः' (४।१।५८) इति सूत्रेण पूर्वस्य ऋकारस्य इकारः, "पूर्वस्यास्वे०" (४।१ ३७) इति (प्रस्तुतसूत्रेण) इय्, ततो (ऋकारस्य) गुणः, इयर्त्ति इति सिद्धम् । [3]"अरियर्त्ति, [4]अरियरीति";—अत्र 'ऋ क् गतौ', भृशमियर्त्ति, 'अट्यर्त्तिसूत्रिमूत्रिसूच्यशूर्णोः' (३।४।१०) इति 'यङ्', "बहुल लुप्" (३।४।१४) इति यङ् लुप्यते, 'रिरौ च लुपि' (४।१।५६) इत्यनेन पूर्वस्य 'रि, री' इत्यागमः, 'ऋतोऽत्' (४।१।३८। इत्यनेन पूर्वस्य अकारः,) तदनन्तरं "पूर्वस्यास्वे स्वरे०"। (४।१।३७) इत्यनेन 'इय्', ततो गुणः, 'अरियर्त्ति' इति सिद्धम्; 'अरियरीति' इत्यत्र तु 'यङ्-तुरुस्तोर्बहुलम्' (४।३।६४) इत्यनेन धातुप्रत्ययविचाले ईकारः । [5]यजादिवश्वचः सस्वरान्तस्था य्वृत् (४।१।७२) इति य्वृत् ( = संप्रसारणम् ) ॥३७॥

## ऋतोऽत् ।४।१।३८।

वृत्तिः—धातोर्द्वित्वे सति पूर्वस्य 'ऋतोऽत्' स्यात् । चकार ॥३८॥

## ह्रस्वः ।४।१।३९॥

वृत्तिः द्वित्वे सति पूर्वस्य स्वरान्तस्य (? स्वरस्य) 'ह्रस्वः' स्यात् । पपौ, निनाय, लुलाव ॥३९॥

अवचूरिः—( एवम् ) कृ, चकार, सिसेके, लुलौके, तुत्रौके ॥३९॥

## गहोर्जः ।४।१।४०॥

वृत्तिः—द्वित्वे सति पूर्वयोर्गकारहकारयो- 'र्जकारः' स्यात् । जगाम, जहास, जहाति, जुहोति ॥४०॥

## द्युतेरिः ।४।१।४१॥

वृत्तिः—द्युतेर्द्वित्वे सति पूर्वस्य उत 'इः' स्यात् । [1]दिद्युते ॥४१॥

---

अवचूरिः—[1]"दिद्युते' इत्यस्याग्रे अदिद्युतत्, देद्युत्यते, [2]विदिद्युतिषते, [3]विदिद्योतिषते इत्यादि (ज्ञेयम्)। [4]वौ 'व्यञ्जनादेः सन् चाय्-वः", (४।३।२५ इति सनो वा कित्त्वम् ॥४१॥

## द्वितीयतुर्ययोः पूर्वौ ।४।१।४२॥

वृत्तिः—द्वित्वे सति पूर्वस्य [1]द्वितीयतुर्ययोः स्थाने यथासंख्यं "पूर्वौ = आद्यतृतीयावासन्नौ" भवतः । चखान, जुघोष[2] ॥४२॥

---

अवचूरिः— [1]द्वितीयचतुर्थवर्णयोः स्थाने । [2](एवं) चिच्छेद, जझाम, टिठकारयिषति, तस्थौ, पफाल जुघोष, डुढौके, दधौ, बभार, इत्थमुदाहरणावली ज्ञातव्या ॥४२॥

## [1]तिर्वा ष्ठिवः ।४।१।४३॥

वृत्तिः—ष्ठिवेर्द्वित्वे सति पूर्वस्य 'तिर्वा' स्यात्। तिष्ठेव टिष्ठेव। [2]तेरिकारोऽत्रोच्चारणार्थः, तेन [3]तुष्ठ्यूषति, टुष्ठ्यूषति। पूर्वस्य त्यादेशविधानमेव ज्ञापयति, ष्ठिवेः षकारः ठकारपरः ष्ठा ष्ठ्यैप्रभृतीनां तु तवर्गपरः, तेन तस्थौ, तष्ठ्यौ ॥४३॥

---

अवचूरिः – [1]"तिर्वा ष्ठिवः' (४।१।४३) इति सूत्रे 'ष्ठिवू क्षिवू निरसने' इति भ्वादिः, 'ष्ठिवू क्षिवूच् निरसने' इति दिवादिः; अत्रोदाहरणे द्वयोरपि ग्रहणम्। [2]तथा तेरिकार उच्चारणमात्रमेव, न तु 'ति' इत्येतेनादेशेनैव तुष्ठ्यूषति टुष्ठ्यूषति इति सिद्धम् । [3]ष्ठिव्, ष्ठेवितुमिच्छति, सन्, "अनुनासिके च च्छ-वः शूट्" (४।१।१०८) इति सूत्रेण वकारस्य ऊट्, 'इवर्णादेरस्वे स्वरे यवरलम्' (१।२।२१) इति यत्वम्, 'ष्ठ्यू' इति द्विर्वचनम्, 'अघोषे शिटः' (४।१।४५) इत्यनेन षकारो लुप्यते, 'व्यञ्जनस्यानादेर्लुक्' (४।१।४४) इति यलोपे [ "ह्रस्वः" (४।१।३९ इति सूत्रेण ह्रस्वत्वे च ] 'ठुकारः' स्थितः, तदनन्तरं तिर्वा ष्ठिवः (४।१।४३) इत्यनेन (प्रस्तुतसूत्रेण) विकल्पेन 'ठु' इत्यस्य 'तुः'; पक्षे—'द्वितीयतुर्य०' (४।१।४२। इत्यनेन) ठस्य टः, (यदि) तिरेव स्यात्, तदा 'तुष्ठ्यूषति' इति न सिद्ध्येत। तथा 'तष्ठ्यौ' इत्यत्र ष्ट्यैँ स्त्यैँ संघाते च, ष्ट्यै, णव्, "आत्सन्ध्यक्षरस्य" (४।२।१) इति आत्वम्, ष्ट्या, णव्, 'ष्ट्या' इति द्विर्वचनम्, "अघोषे शिटः" (४।१।४५) इति पूर्वस्य षस्य लोपः, "निमित्ताभावे नैमित्तिकस्याप्यभावः" इति न्यायात् टकारस्य तकारः, "षः सोऽष्ट्यैष्ठिवष्वष्कः" (२।३।९८) इत्यनेन 'तष्ठ्यौ' इत्यत्र 'षत्वं' न भवति इति तत्त्वम् ॥४३॥

## व्यञ्जनस्यानादेर्लुक् ।४।१।४४॥

वृत्तिः—द्वित्वे सति 'पूर्वस्य व्यञ्जनस्यानादेर्लुक्' स्यात् । जग्ले, पपाच ॥४४॥

---

अवचूरिः—अभ्यासस्यान्त्यव्यञ्जनस्य लुक्, न पूर्वव्यञ्जनस्येति भावः ॥४४॥

## अघोषे शिटः ।४।१।४५॥

वृत्तिः-द्वित्वे सति पूर्वस्य (यः) शिटस्तत्सम्बन्धिन्येवाघोषे परे 'लुक्'। चुश्च्योत, तिष्ठेव, चस्कन्द। अघोष इति किम् ? सस्नौ ॥४५॥

## कङश्चञ् ।४।१।४६॥

वृत्तिः—द्वित्वे सति पूर्वयोः ककारङकारयोर्यथासंख्यं 'चकारञकारौ' भवतः । चकार, ञ्ङुवे ॥४६॥

## [1]न कवतेर्यङः ।४।१।४७॥

वृत्तिः—यङन्तस्य कवतेर्द्वित्वे सति पूर्वस्य 'चो न' स्यात् । कोकूयते स्वरः । कवतेरिति किम् ? [2]चोकूयते । यङ इति किम् ? चुकुवे । ४७॥

अवचूरिः—[1]"न कवतेर्यङः" इति सूत्रे कवतेरित्यत्र शव्निर्देशात् 'उङ् कुङ् गुङ् घुङ् ङुङ् शब्दे' इति भ्वादेरेव चकारप्रतिषेधः । कौतेः 'टुक्षु रु कुक् शब्दे' इत्यस्य अदादेः, कुवतेः 'कुंङ् कुंङ् त शब्दे' इति तुदादेः इति द्वयोरपि पूर्वस्य चकारो भवत्येव । कवतिधातुरव्यक्तशब्दे वर्तते, कौतिश्च शब्दमात्रे एव वर्तते, कुवतिश्च आर्त्तस्वरे वर्त्तते। एषां धातूनां त्रयाणां पाठे शब्दमात्रार्थत्वेऽपि गत्यर्थत्वाऽविशेषे धावतिगच्छत्यादीनामिवार्थभेदोऽस्ति । तथा यङ् लुपि च चकारप्रतिषेधो न भवति, चकारो भवत्येव-चोकवीति । '[2]चोकूयते' इति कौतिकुवत्योः प्रयोगोऽयम् ॥४७॥

## आगुणावन्यादेः[1] ।४।१।४८॥

वृत्तिः—"यङन्तधातोर्द्वित्वे सति पूर्वस्यान्यादेः— नीमुरीरिरन्तवर्जितस्याकारगुणावासन्नौ" भवतः । [2]पापच्यते, चेचीयते, लोलूयते; तथा [3]पापचीति, बेभिदीति, लोलवीति । "एतावाकारगुणौ न यङ् निमित्तौ" इति यङ् लुप्यप्यागुणौ भवतः। अन्यादेरिति किम् ? वनीवच्यते, यंयम्यते, नरीनृत्यते, नरिनर्त्ति, नर्नर्त्ति ।४८॥

अवचूरिः—[1]न भविष्यन्ति न्यादयो यत्र । [2]एवमटाट्यते । [3]यङ् लुबन्तेऽप्यागुणौ दर्शयति । ननु 'वनीवच्यते' इत्यादौ अपवादत्वात् न्यादय एव बाधका भविष्यन्ति, किमत्र सूत्रे 'आगुणावन्यादेः' इति न्यादिवर्जनेन ? सत्यम्, 'धातोर्द्वित्वे सति पूर्वस्य विकारे कर्त्तव्ये बाधकोऽपवादरूपो न बाधकः" इति ज्ञापनार्थं न्यादिवर्जनं कृतम्, तेन "अचीकरद्" इत्यत्र सन्वद्भावस्य 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) इति सूत्रं न बाधते, अन्यथा परत्वात् अपवादत्वाच्च पूर्वं "लघोर्दीर्घोऽस्वरादेः" ( ४।१।६४ ) इति प्रवर्तेत, ततः 'अचाकरत्' इति प्रयोगः स्यात्; 'अचीकरद्' इति इष्टश्च । इति पूर्वमुत्सर्गः सन्वत्, पश्चादपवादो "लघोर्दीर्घोऽस्वरादेः" (४।१।६४) इति प्रवर्त्तते । न्यादिवर्जनेनाऽयमर्थः साधितः ॥४८॥

## न हाको लुपि ।४।१।४९।

वृत्तिः—हाको द्वित्वे पूर्वस्य यङो लुपि 'आ न' स्यात् । जहाति, एवं जहेति । लुपीति किम् ? जेहीयते ॥४९॥

अवचूरिः –'ओहांक् त्यागे' इत्यस्य न हाको लुपीति सूत्रवृत्तौ जहाति, (जहेति) इति प्रयोगद्वयं भवति । 'जहेति', अत्र यङ् लोपानन्तरं "यङ् तुरुस्तोर्बहुलम्" (४।३।६४) इत्यनेन धातोः परत ईत्, अवर्णस्य (१।२।६) इत्यादिना 'एत्वे' जहेतीति सिद्धम् ॥४९।

## वञ्चस्रंसध्वंसभ्रंशकसपतपदस्कन्दोऽन्तो नीः ॥४।१।५०॥

वृत्तिः—एषां यङन्तानां द्वित्वे सति पूर्वस्य 'नीरन्तोऽवयवो' भवति। वनीवच्यते, वनीवञ्चीति; एवं सनीस्रस्यते, सनीस्रंसीति; दनीध्वस्यते, बनीभ्रश्यते, चनीकस्यते, पनीपत्यते, पनीपद्यते, चनीस्कद्यते ॥५०॥

अवचूरिः—(एवं) दनीध्वंसीति, बनीभ्रंसीति, चनीकसीति, पनीपतीति, (पनीपदीति) । सनीस्रंसीति, दनीध्वंसीति, बनीभ्रंशीति, चनीस्कन्दीति

एषु यदा यङ्, तदा "नो व्यञ्जनस्यानुदितः" (४।२।४५) इत्यनेनानुस्वारो लुप्यते, यङ्लुपि सत्यां "निमित्ताभावे नैमित्तकस्याप्यभावः" इति न्यायात् पुनरनुस्वारप्रत्यावृत्तिः ॥५०॥

## मुरतोऽनुनासिकस्य ४।१।५१॥

वृत्तिः—अकारात्परो योऽनुनासिकस्तदन्तस्य धातोर्यङन्तस्य द्वित्वे सति पूर्वस्य मुरन्तः[1] स्यात्। बंभण्यते, बंभणीति; जंगम्यते, जंगमीति; [5]यलवानामनुनासिकत्वे [1]तन्तँयँते, तन्तयँः, [2]चंचलँयते, चंचलँः, [3]मंमवँयते, मंमवँः, यलवानामननुनासिकत्वे तु तातय्यते, तातयः चाचल्यते, चाचलः, मामव्यते, मामवः ॥५१॥

अवचूरिः—[5]प्रथमे पादे "तुल्यस्थानास्यप्रयत्नः स्वः" (१।१।१७) इति सूत्रे स्वसंज्ञाप्रस्तावे यलवानामनुनासिकोऽननुसिकश्चेति द्वौ भेदौ परस्परं स्वसंज्ञौ भवतः इत्युक्तमस्ति. तत्र यलवानामनुनासिकत्वे "तन्तँयँते तन्तयँः" इत्यादावपि मुरन्तः प्राप्तः। [1]तयि णयि रक्षणे च'-तय्, [2]चल कम्पने च-चल्, [3]मुर्वै मव बन्धने'-मव् यङ्, द्वित्वम्, 'मुरतोऽनु०' ( ४।१।५१ ) इति ( प्रस्तुतसूत्रेण ) मोन्तः, तन्तँयँते इति तन्तयँः, एवं चंचलँयते इति वाक्ये चंचलँः, मंमवँयते इति मंमवँः; 'अच्' ( ५।१।४९ इति अच् प्रत्ययः ) अचि ( ३।४।१५ ) इति सूत्रेण यङ् लुप्यते। यत्र च यलवानामनुनासिकाः कल्पिताः तत्र ………… ( भवति ) मोऽन्तः, तत्र (? अन्यत्र) "तातय्यते तातयः" इ…………(त्या) दयो भवन्ति ॥५१॥

## जप-जभ-दह-दश-भञ्ज-पसः× ।४।१।५२॥

वृत्तिः—एषां यङन्तानां द्वित्वे सति पूर्वस्य 'मुरन्तः' स्यात्। जंजप्यते, जंजपीति; एवं जंजभ्यते, दंदह्यते, दंदश्यते, बंभज्यते, पंपस्यते ॥५२॥

अवचूरिः—(एवं) जंजभीति, दंदहीति, दंदशीति, बंभञ्जीति, पंपसीति। 'जंजभीति',—अत्र ईति कृते 'जभः स्वरे' (४।४।१००) इत्यनेन नोऽन्तः प्राप्नोति, परम् "आगमशासनमनित्यम्" इति स आगमो न भवति। तो (? पस्) धातुः दन्……(त्यो) वा तालव्यो वा………(ज्ञेयः) ॥५२॥

## चर-फलाम् ।४।१।५३॥

वृत्तिः—एषां यङन्तानां द्वित्वे सति पूर्वस्य मुरन्तः स्यात्। चञ्चूर्यते, चञ्चुरीति; पंफुल्यते, पंफुलीति ॥५३॥

अवचूरिः—'चरफलाम्' इत्यत्र बहुवचनं………'फल निष्पत्तौ', 'फल त्रिफला विशरणे' इति द्वयोः परिग्रहार्थम् ॥५३॥

## [1]ति [2]चोपान्त्यातोऽनोदुः ।४।१।५४॥

वृत्तिः—चरफलां यङन्तानां तकारादौ च प्रत्यये परे उपान्त्यस्यातः = अकारस्य [3]उ आदेशः स्यात्, स चानोत्[4] = न ओत्[5]। चञ्चूर्यते, चञ्चुरीति; पंफुल्यते; पंफुलीति, [6]चूर्त्तिः, प्रफुल्तिः, प्रफुल्तः, प्रफुल्तवान्। अत इति किम्? [7]चंचार्यते पंफाल्यते ॥५४॥

अवचूरिः—[1]तु सप्तमी ङि इति ति=तकारादौ। [2]उपान्त्यश्चासावच्च उपान्त्यात्, तस्योपान्त्यातः। [3]तस्य—'उ' ( इति ) आदेशस्य न ओत्, कोऽर्थः? ओकारो गुणो न भवतीत्यर्थः। [4]अनोदिति किम्? चंचूर्त्ति, पंफुल्ति; अत्र यङ्लुपि वर्त्तमानातिव्, "ति चो०" (४।१।५४) इति 'उ', अत्र गुणः प्राप्नोति परम् 'अनोत्' इति वचनान्न भवति।

× बृहद्वृत्त्यादिषु 'पश्' इति तालव्यशकारान्तः।

"चंचूर्यते", अत्र "भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने" (२।१।६३) इति दीर्घः ऊः, । [६]यत्र तकारादिप्रत्ययः तत्र चरफलौ न यङन्तौ, चर्, फल्; अग्रे क्तिः, क्तः; चरणं = चूर्त्तिः, "श्र वादिभ्यः" (५।३।९२) इति क्तिः, प्रफुलनं = प्रफुल्तिः; प्रफलितुमारब्धः = प्रफुल्तः, "आरम्भे" (५।१।१०) इत्यनेन क्तः, अथवा 'क्तक्तवतू' (५।१।१७४) इति सूत्रेणाप्यारम्भेऽर्थे क्तक्तवतू; तदनन्तरं 'ति चोपान्त्या०' इति (प्रस्तुतसूत्रेण उकारः, ('चूर्तिः' इत्यत्र) 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) इति ऊः । [७]चर, चरन्तं प्रयुङ्क्ते, फल, फलन्तं प्रयुङ्क्ते, चारयति फालयतीति क्विप्, (चार्, फाल्, ) चारिवाचरति, फालिवाचरति; "कर्तुः क्विप्०" (३।४।२५। इति क्विप् प्रत्ययः) ततो यङ्, पूर्वसूत्रेण मोऽन्तः, अत्र चंचार्यते, (पंफाल्यते) इति "एकदेशविकृतस्यानन्यत्वात्" प्राप्नोति ॥५४॥

## ★ ऋमतां रीः ।४।१।५५॥

वृत्तिः—ऋकारवतां धातूनां यङन्तानां द्वित्वे सति पूर्वस्य 'रीरन्तः' स्यात् । नरीनृत्यते, दरीदृश्यते, वरीवृत्यते, परीपृच्छ्यते, वरीवृश्च्यते, जरीगृह्यते । ऋमतामिति किम् ? चेक्रीयते ॥५५॥

## रि-रौ च लुपि ।४।१।५६॥

वृत्तिः—ऋमतां यङो लुपि द्वित्वे पूर्वस्य 'रि, र री चान्तः' स्यात् । चरिकर्त्ति, चर्कर्त्ति, चरीकर्त्ति; नरिनृतीति, नरिनर्त्ति; नर्नृतीति, नर्नर्त्ति; नरीनृतीति, नरीनर्त्ति ॥५६॥

---

अवचूरिः—'रिरौ च लुपि' इति सूत्रे विशेषप्रयोगा इमे-वरिवृश्चिति, वरिवृष्टि, वर्वृश्चीति, वर्वृष्टि; वरीवृश्चीति, वरीवृष्टि; यत्र 'वर्वृश्चीति' तत्र "यङ्तुरुस्तो०" (४।३।६४) इत्यनेन 'ईत्' । यत्र "वर्वृष्टि"तत्र यङो लुपि तिवि (प्रत्यये परे) 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) इत्यनेन शलोपे 'यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः' (२।१ ८७) इति चकारस्य 'ष्', परे गुणे कर्त्तव्ये शलोपोऽसन् (इति) गुणाभावः। एवं चलिक्लपीति, चलिकल्प्ति; चल्क्लपीति, चल्कल्प्ति; चलीक्लपीति, चलीकल्प्ति । ऋमतामित्येव-कृ, चाकरीति, चाकर्त्ति चाकीर्तः, चाकिरति; अन्ति (प्रत्ययस्थनकारस्य) "अन्तो नो लुक्" (४।२।६४।। इति सूत्रेण लुक्), गृ-जागल्ति, "लुप्यय्वृल्लेनत्" (७।४।११२।। इति सूत्रे) "अय्वृल्लेनत्" इत्युक्तेर्यङ्लुप्यपि "ग्रो यङि" (२।३।१०१) इत्यनेन लत्वम् । तृ-तातर्त्ति । इति सूत्रान्ते उदाहरणावली ज्ञेया ॥५६॥

## निजां शित्येत् ।४।१।५७॥

वृत्तिः—निजिविजिविषां शिति द्वित्वे सति पूर्वस्य 'ए' आदेशः स्यात् । [१]नेनेक्ति, [२]वेवेक्ति, [३]वेवेष्टि । शीतीति किम् ? निनेज ॥५७॥

---

अवचूरिः—[१]णिज्ंकी शौचे च, [२]विज्ंकी पृथग्भावे, [३]विष्लंकी व्याप्तौ इत्यदादौ जुहोत्यादिपर्यन्ते, एते एवाऽत्र ज्ञातव्याः । वर्त्तमाना, सप्तमी, पञ्चमी, ह्यस्तनी एताः (चतस्रः) शितः ॥५७॥

## पृ-भृ-मा-हाङामिः ।४।१।५८॥

वृत्तिः—पृ, ऋ, भृग्, माङ्, हाङ् इत्येषां शिति द्वित्वे सति पूर्वस्य 'इः = इकारः' स्यात् । पिपर्त्ति, पिपृयात्; [१]इयर्त्ति इयृयात्; बिभर्त्ति, [२]मिमीते, [३]जिहीते । हाङिति ङकारः किम् ? [४]ओहांक्-जहाति । शितीति द्वित्वस्य विशेषणं किम् ? [५]पर्पर्त्ति, परिपर्त्ति ॥५८॥

---

अवचूरिः—[१]'इयर्त्ति', 'इयृ' अत्र पूर्वस्येकारे कृते "पूर्वस्यास्वे स्वरे०" (४।१।३७) इत्यनेन इय् ।

---

★ बहुवचननिर्देशो लाक्षणिकपरिग्रहार्थः, तेन प्रच्छ्यादीनां सूत्रकृतर्काराणामपि ऋमत्त्वं सिद्धम् ॥

[2]मांङ्क् मानशब्दयोः। [3]ओहांङ्क् गतौ। [4]ओहांक् त्यागे। [5]पृ, यङ्, द्वित्वम्, "ऋतोऽत्" (४।१।३८ इति द्वित्वे पूर्वस्याऽत्,) "रिरौ च लुपि" (४।१।५६। इत्यनेन) र, री;…………(अत्र) य…… " (ङन्तस्य द्वित्वं न) शिति, इति न इकारः ॥५८॥

## सन्यस्य ।४।१।५९॥

वृत्तिः—धातोर्द्वित्वे सति पूर्वस्याकारस्य सनि परे 'इकारः' स्यात्। पिपासति, प्रतीषिषति ॥५६॥

## ओर्जा-ऽन्तस्था-पवर्गे-ऽवर्णे [1] ।४।१।६०॥

वृत्तिः—धातोर्द्वित्वे सति पूर्वस्योकारान्तस्याऽवर्णान्ते जान्तस्थापवर्गे परे सनि 'इकारः' स्यात्। [2]जिजावयिषति, [3]यियविषति, यियावयिषति [4]इत्यादि। जान्तस्थापवर्ग इति किम्? [5]जुहावयिषति। अवर्ण इति किम्? बुभूषति, भू सत्तायाम्। ननु ण्यन्तानां वृद्ध्यावयोः कृतयोर्द्वित्वे सति पूर्वस्योदन्तता न संभवति, तत्र 'सन्यस्य' इत्यनेनैव सिद्धे किं गुरुणा सूत्रेण? "ओः पयेऽवर्णे" इत्येव विधेयम्, "पिपविषते, यियविषति" इत्यत्र पूर्वस्य उत इत्वं यथा स्यात्। सत्यं, [6]"णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद्" इति न्यायज्ञापनार्थं वचनमिदम्; तेन [7]"पुस्फारयिषति, [8]शुशावयिषति" इत्याद्यपि सिद्धम् ॥६०॥

---

अवचूरिः—[1]"अवर्णे", कोऽर्थः? अवर्णान्ते इत्यर्थः। [2]जुः सौत्रो, धातुः, "जिजावयिषति" इति, जु, जवन्तं प्रयुङ्क्ते, णिग्, "नामिनोऽकलिहलेः" (४।३।५१। इति) वृद्धिः औः, "ओदौतोऽवाव्" (१।२।२४) इत्याव्, एवं यियावयिषति, रिरावयिषति, लिलावयिषति इति त्रयोऽप्यन्तस्थोदाहरणे; 'युक् मिश्रणे' (इति) यु, 'टु क्षु रु कुंक् शब्दे' (इति) रु, 'लूग्‌श्छेदने' (इति) लू, यवन्तम्, रवन्तम्, लुनन्तं प्रयुङ्क्ते (इति) णिग्, वृद्धिः, आव्, जावयितुं, यावयितुं, रावयितुं, लावयितुमिच्छति (इति) सन्, "णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद्" इति न्यायात् 'जु, यु, रु, लू' ईदृशां द्विर्वचनम्, तत "ओर्जान्तस्था०" (४।१।६०) इत्यनेनाभ्यासे इकारः। पिपावयिषति, बिभावयिषतीति प्रयोगद्वयं पवर्गे' इत्यस्य। पू, भू; णिग्, वृद्धिः (इत्यादि) सर्वं पूर्ववत्। [3]'यियविषति' इत्यत्र यु, सन्, "इवृध०" (४।४।४७) इति इट्। 'पिपविषते', पू, सन्, "ऋस्मिपूङ्०" (४।४।४८) इति इट्। [4]आदिशब्दात् रिरावयिषति, लिलावयिषति, पिपविषते, पिपावयिषति, बिभावयिषति इति। प्रयोगद्वयसाधनाय (?) [5]"जुहावयिषति" इत्यत्र ह्वेंग् स्पर्द्धाशब्दयोः (इति) ह्वे, आत्, ह्वयन्तं प्रयुङ्क्ते (इति) णिग्, "णौ ङ सनि" (४।१।८८) इति य्वृत्-उ, "दीर्घमवोऽन्त्यम्" (४।१।१०३) इति दीर्घः, वृद्धिः, आव्, हावयितुमिच्छति (इति) सन्, "णौ यत्कृतं तत् सर्वं स्थानिवद्" इति 'हु' इत्यस्य द्विर्वचनम्। [6]"पुस्फारयिषति" इत्यत्र "स्फुर स्फुलत् स्फुरणे" (इति) स्फुर, णिग्, "चिस्फुरोर्नवा" (४।२।१२) इति सूत्रेण आकारः। [7]"शुशावयिषति", अत्र "ट्वोश्वि गतिवृद्ध्योः" श्वयन्तं प्रयुङ्क्ते (इति) णिग्, सन्, "श्वेर्वा" (४।१।८६) इति सूत्रेण य्वृत्-शु, तदनन्तरं "नामिनोऽकलिहलेः" (४।३।५१ इति) वृद्धिः-शौ, "ओदौतोऽवाव्" (१।२।२४ इति) आव्, 'शाव्', अत्र "णौ यत्कृतं कार्यं तत्सर्वं स्थानिवत्" इति न्यायात् 'स्फुर' इति 'शु' इति द्विर्वचनं सिद्धम्। अन्यथा "स्फार, शाव्" इति द्वित्वं स्यात्। [8]"णौ यत्कृतम्०" [इत्यादि]—एतच्च ज्ञापकं जान्तस्थापवर्गवत् अन्यत्रापि, कोऽर्थः? अजान्तस्थापवर्गेऽपि धातौ अवर्णसहिते एव प्रवर्त्तते, न प्रवाहतः सर्वधातौ; तेनाऽचिकीर्तत् इत्यत्र 'ईकारवतो' द्विर्वचनं जातम्, न ऋकारवतः ॥६०॥

## श्रु-स्रु-द्रु-प्रु-प्लु-च्योर्वा ।४।१।६१॥

वृत्तिः—एषां सनि परे द्वित्वे सति पूर्वस्योदन्तस्य = उकारान्तस्यान्तस्थायामवर्णान्तायां परत "इत् = इकारोऽन्तादेशो वा" स्यात्। शिश्रावयिषति,

शुश्रावयिषति; सिस्रावयिषति, सुस्रावयिषति; दिद्रावयिषति, दुद्रावयिषति; पिप्रावयिषति, पुप्रावयिषति, पिप्लावयिषति, पुप्लावयिषति; चिच्यावयिषति, चुच्यावयिषति । अवर्ण इत्येव-शुश्रूषते ॥६१॥

अवचूरिः—"श्रु स्रु द्रु प्रु प्लु च्योर्वा" इति वचनबलात् शुश्रावयिषतीत्यादावुदाहरणेष्वेकेन वर्णेनान्तस्थाया व्यवधानमाश्रीयते, तत इत्वं सिद्धयति । शुश्रावयिषतीत्यादौ णौ वृद्धयावोः कृतयोः "णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद्" इत्यनेन 'श्रु, स्रु, द्रु, प्रु, प्लु, च्यु' इति द्विर्वचनम् ॥६१॥

## स्वपो णावुः ।४।१।६२॥

वृत्तिः—सनीति निवृत्तम् । स्वपेर्णौ सति द्वित्वे कृते पूर्वस्य 'उत् = उकारः' आदेशः स्यात् । सुष्वापयिषति । स्वपो णाविति किम् ? सिष्वापयिषति । स्वपो णौ सति द्वित्व इति किम् ? सोषोपयिषति ॥६२॥

अवचूरिः—'सिष्वापयिषति', अत्र स्वप्, स्वपनं = स्वापः, "भावाकर्त्रोर्घञ्" (५।३।१८) इति घञ्, स्वापं करोति (इति) "णिज् बहुलं नाम्नः कृगादिषु" (३।४।४२ इति णिच्), स्वापयितुमिच्छति (इति) सन्, "अन्यस्य" (४।१।८) इत्यनेन 'स्वा' इति द्वित्वम् । अथवा स्वापशब्दः, तदनन्तरं 'स्वापं चिकीर्षति' इति वाक्यं कृत्वा णिच् सन् च आनीयते, ततः "अन्यस्य" (४।१।८) इति द्वित्वम्; अत्र न स्वपेर्णिग्, किन्तु स्वापतो णिः । 'सोषोपयिषति" इत्यत्र स्वप्, भृशं पुनः पुनर्वा स्वपिति (इति) यङ्, "स्वपेर्यङ्ङे च" (४।१।८०। इति) य्वृत्, सुप्, "सन्यङश्च" (४।१।३ इत्यनेन) 'सुप्' इति द्वित्वम्, "आगुणावन्यादेः" ( ४।१।४८ इति द्वित्वे पूर्वसुकारस्य ) सो, "बहुलं लुप्" (३।४।१४) इति यङ् लुप्यते, सोषुपन्तं प्रयुङ्क्ते (इति) णिग्, "लघोरुपान्त्यस्य" (४।३।४ इति) गुणः, 'सोषोप्', सोषोपयितुमिच्छति (इति) सन्, "णिस्तोरेव०" (२।३।३७ इति) सस्य षत्वम्; अत्र यङि सति द्वित्वम्, ततो यङ्लुबन्तात् णिग्, "णौ सति न द्वित्वम्" इति न उत् भवतीत्यर्थः ॥६२॥

## असमानलोपे सन्वल्लघुनि ङे ।४।१।६३॥

वृत्तिः—न विद्यते समानस्य लोपो यस्मिन् धातौ, तस्मिन् ङपरे णौ द्वित्वे सति पूर्वस्य लघुनि धात्वक्षरे परे [1]"सनीव कार्यं" स्यात् । अचीकरत्, अजीजवत्, अयीयवत्, अरीरवत्, अलीलवत्, अपीपवत्; तथा अशिश्रवत्, अशुश्रवत्; एवमसिस्रवत्, असुस्रवत् । लघुनीति किम् ? अततक्षत्, [2]अबभाणत् । असमानलोप इति किम् ? [3]अचकथत् । [4]पटुमाख्यत् = अपीपटत् इत्यादौ त्वसमानलोपत्वात् सन्वद्भावः । "अवीवदद्वीणां परिवादकेन, अत्र णेः समानलोपेऽपि सन्वद्भावः ॥६३॥

अवचूरिः—[1]"सनीव कार्यं स्याद्" इत्यस्यायमर्थः— यथा सनिपरेऽभ्यासेऽकारस्य "सन्यस्य" (४।१।५९) इत्यनेन इकारो भवति, तथा "असमानलोपे" (४।१।६३) इत्यनेनाप्यभ्यासे इकारः; पूर्वम् "ओर्जान्तस्थापवर्गेऽवर्णे" (४।१।६०) इत्युक्तं, तत् इहापि भवति, अजीजवदित्याद्यपीपवदिति पर्यन्तं ज्ञातव्यम् । जु सौत्रो धातुः, जु, यु, रु, लू, पू, णिग् ङप्रत्ययः; पूर्वं "श्रु-स्रु-द्रु-प्रु-प्लु-च्योर्वा" (४।१।६१) इत्युक्तम्, इहापि तथा— अशिश्रवत्, अशुश्रवत्; असिस्रवत् असुस्रवत्; अदिद्रवत्, अदुद्रवत्; अपिप्रवत्, अपुप्रवत्; अपिप्लवत्, अपुप्लवत्; अचिच्यवत्, अचुच्यवत् । अन्यस्य न भवति सन्वद्भावः—[5]अजूहवत् । [2]"अबीभणत्, अबभाणत्" इति प्रयोगद्वयम्, अणरण-इति ( भण ) दण्डकधातुः, णिग्, ङ, "भ्राजभासभाषदीप०" (४।२।३६) इत्यनेन विकल्पेन ह्रस्वः, यत्र ह्रस्वः तत्र सन्वत्,

[5] अन्यथा 'अजूहवत्' इत्यत्र व्यर्थं "णौ ङसनि" (४।१।४८) इति सूत्रे ङग्रहणं व्यर्थं स्यात् ।

अन्यत्र "अबभाणत्" इत्येव। तथा "अचिक्वणत्, अचिक्रमद्" इत्यादौ अनेकव्यञ्जनव्यवधानेऽपि वक्ष्यमाण 'स्मृदृत्वर" इत्यादीनामित्वबाधकस्याऽत्वस्य शासनात् सन्वद्भावो भवत्येव । [3]कथण वाक्यप्रबन्धे (इति) कथ अदन्तः, णिच्, "अतः" (४।३।८२) इत्यनेन धातुप्रान्तेऽकारलोपः । [4]पटुमाख्यत्, एवं लघुं, कपिम्, हरिम् आख्यत् ( इति ) णिच्, "नामिनोऽकलिहलेः" (४।३।५१। इति ) वृद्धिः— पटौ, लघौ, कपौ, हरौ; "त्र्यन्त्यस्वरादेः" (७।४।४३) इत्यन्त्यस्वरसन्ध्यक्षरलोपः— पट्, लघ्, कप्, हर्; ङ, अद्यतनीदि, "पट्, लघ्, कप्, हर्" इति द्वित्वम्, अत्र सन्ध्यक्षरश्च न समान इत्यसमानलोपत्वात् सन्वत्; अपीपटत्, अलीलघत्, अचीकपत्, अजीहरदिति प्रयोगाः । [5]"अवीवदत्", "वद व्यक्तायां वाचि" अवादीत् = शब्दमकार्षीद्वीणा, तां वीणां वदन्तीं परिवादको=वैणिकः प्रायुक्तः (?प्रायुङ्क्त इति) 'प्रयोक्तृव्यापारे णिग्" (३।४।२०। इत्यनेन णिग्), पुनरपि वीणां वादितवन्तं परिवादकं मैत्रः प्रयोजितवान् ( इति ) "प्रयोक्तृव्यापारे णिग्" (३।४।२०। इत्यनेन णिग्), 'त्र्यन्त्यस्व०" (७।४।४३। इति) एकस्य पूर्वस्य णिगो लोपः, अत्र कथं सन्वद्भावः ? इति पराशयः, सूरिराह— णाविति जात्याश्रयणात् णेः समानस्य लोपेऽपि सन्वत्— अवीवदद्वीणां परिवादकेन मैत्रः, एवमपीपठन्माणवकमुपाध्यायेन मैत्रः इति परिण (हैन) प्रयोगः; इति. प्रयोगद्वयं "लघोर्दीर्घोऽस्वरादेः" ( ४।१।६४ ) इत्यत्राऽपि दीर्घविधिप्रस्तावे ज्ञातव्यम् ॥६३॥

## लघोर्दीर्घोऽस्वरादेः ।४।१।६४॥

वृत्तिः—अस्वरादेर्धातोः ङपरेऽसमानलोपे णौ द्वित्वे सति पूर्वस्य लघोर्लघुनि धात्वक्षरे परे 'दीर्घः' स्यात् । अचीकरत् । लघोरिति किम् ? [1]*अचिक्षणत् । अस्वरादेरिति किम् ? औणुनवत् ।* णावित्येव- अचकमत ॥६४॥

अवचूरिः-[1]क्षणग् क्षिणूयी हिंसायाम् ॥६४॥

## स्मृ-दृ-त्वर-प्रथ-म्रद-स्तॄ-स्पशेः ।४।१।६५॥

वृत्तिः—एषामसमानलोपे ङपरे णौ द्वित्वे सति पूर्वस्य 'अत्' इत्यन्तादेशः स्यात् । सन्वदपवादः । असस्मरत्, अददरत्, अतत्वरत्, अपप्रथत्, अमम्रदत्, अतस्तरत्, अपस्पशत् ॥६५॥

अवचूरिः—"समृदृत्वरप्रथम्रद" इत्येतेषां घटादित्वात् "घटादेर्ह्रस्वो०" ( ४।२।२४ ) इत्यनेन ह्रस्वः ।६५॥

## वा वेष्ट-चेष्टः ।४।१।६६॥

वृत्तिः - वेष्टचेष्टोरसमानलोपे ङपरे णौ द्वित्वे सति पूर्वस्य 'वाऽत्'[1] स्यात् । अववेष्टत्, अविवेष्टत्; अचचेष्टत्, अचिचेष्टत् ॥६६॥

अवचूरिः - [1]अकारोऽन्तादेशः ॥६६॥

## ई च गणः ।४।१।६७॥

वृत्तिः—गणेः ङपरे णौ द्वित्वे सति पूर्वस्य 'इकारोऽच्च' स्यात् । अजीगणत्, अजगणत् ॥६७॥

अवचूरिः—गणधातोः चुरादावदन्तत्वेन समानलोपित्वात् सन्वद्भावो दीर्घत्वं च न प्राप्नोतीति ईकारविधिरकारादेशश्च ॥६७॥

## अस्यादेराः परोक्षायाम् ।४।१।६८॥

वृत्तिः—परोक्षायां धातोर्द्वित्वे सति पूर्वस्यादेरकारस्य 'आकारः' स्यात् । आटतुः, आटुः । अस्येति किम् ? [1]ईयतुः, [2]ईयुः । आदेरिति किम् ? पपाच ॥६८॥

अवचूरिः—लुगस्यादेत्यपदे (२।१।११३) इत्यस्यापवादोऽयम् । [1]ईयतुः, [2]ईयुरिति—"इणक् गतौ" (इति) इ, परोक्षा, अतुस्, उस्, ततो द्विस्वम्, अत्रै-

का दीर्घप्राप्तिः, इतरेयः (प्राप्तिः); परं "वार्णात्प्राकृतं बलीयः" इति न्ययात् प्रथमम् "इणः" (२।१।५१) इत्यनेन इयादेशः, न दीर्घः, ॥६८॥

## [1]अनातो नश्चान्त ऋदाद्यशौ-संयोगस्य ।४।१।६९॥

वृत्तिः--ऋकारादेरश्नोतेः संयोगान्तस्य च धातोः परोक्षायां द्वित्वे सति पूर्वस्यादेरकारस्य अनातः, कोऽर्थः? आकारस्थानेऽनिष्पन्नस्य, 'आः' स्यात्, 'कृताकाराच्चास्मान्नोऽन्तश्च'। आनृधु; "ऋधूच् वृद्धौ" आनृजे, अशौ-आनशे, संयोग-आनर्च, आनञ्च। ऋदादेरिति किम्? आर। संयोगस्येति किम्? आट। अनात इति किम्? आञ्छ ॥६९॥

अवचूरिः—[1]न विद्यते आत् = आकारः स्थानितयाऽस्याऽकारस्य स अनात्,तस्याऽनातः ॥६९॥

## भू-स्वपोरदुतौ ।४।१।७०॥

वृत्तिः—'भूस्वपोः' परोक्षायां द्वित्वे सति पूर्वस्य 'यथासंख्यमकारोकारौ' भवतः। बभूव, बभूवे; सुस्वाप। परोक्षायामित्येव— बुभूषति ॥७०॥

अवचूरिः—"बभूव बभूवे" इत्युभयोः प्रथमं वृद्ध्युवौ, ततो "भुवो वः परोक्षाद्यतन्योः" (४।२।४३) इत्यनने 'ऊः' ॥७०॥

## ज्या-व्ये-व्यधि-व्यचि-व्यथेरिः ।४।१।७१॥

वृत्तिः—एषां परोक्षायां द्वित्वे सति पूर्वस्य 'इकारः' स्यात्। [1]जिज्यौ, [2]संविव्याय, विव्याध, विव्याच, विव्यथे ॥७१॥

अवचूरिः—[1]"जिज्यौ," "ज्यांश् वयोहानौ"। [2]"संविव्याय," "व्येंग् संवरणे" णव्, "व्यस्थव्णवि" (४।२।३) इति सूत्रेण आत्वनिषेधः ॥७१॥

## यजादि-वश-वचः सस्वराऽन्तस्था य्वृत् ।४।१।७२॥

वृत्तिः—[1]यजादीनां वशवचोश्च परोक्षायां द्वित्वे सति पूर्वस्य [2]सस्वरान्तस्था "य्वृत् = इकार-उकार-ऋकाररूपा [3]प्रत्यासत्त्या" स्यात्। इयाज, [4]उवाय, उवाप, उवाह, उवाद, उवास, [5]वश्—उवाश, [6]उवाच ॥७२॥

अवचूरिः—[1]भ्वादिप्रान्ते यजीं देवपूजा-सङ्गति-करण-दानेषु ।१। वेंग् तन्तुसंताने ।२। व्येंग् संवरणे ।३। ह्वेंग् स्पर्द्धा-शब्दयोः ।४। टुवपीं बीजसन्ताने ।५। वहीं प्रापणे ।६। टुवोश्वि गतिवृद्धयोः ।७। वद व्यक्तायां वाचि ।८। वसं निवासे ।९। एवं यजादयः, परमत्र यजादिसूत्रे धातुषट्कं ज्ञातव्यम्; व्येधातोः "ज्याव्येव्यधि०" (४।१।७१) इत्यनेन इकार उक्तः, ह्वेश्विधात्वोः पूर्वस्याभ्यासेऽन्तस्थाया अभावादेव य्वृत् न प्राप्नोति। [2]"सस्वरान्तस्था य्वृत्," स्वरसहितान्तस्थायाः 'यवर' इति वर्णस्थाने यथासंख्यम् "इकार-उकार-ऋकाराः" भवन्तीत्यर्थः। [3]प्रत्यासत्त्या किमुच्यते? "इवर्णचवर्गयशास्तालव्याः", एते परस्परं स्वा भवन्ति, इति यकारान्तस्थाया इकारो भवति; एवं "उवर्णपवर्गोपध्मानीयाः औष्ठ्याः," "वो दन्तोष्ठ्यः" इति वकारान्तस्थास्थाने उकारः; तथा "ऋवर्णटवर्गरषाः मूर्धन्याः" इति रकारान्तस्थास्थाने ऋत्-ऋकारः; एवं स्वसंज्ञाभावेन प्रत्यासत्तिः = सामीप्यं वर्णानाम्। [4]'उवाय' इत्यत्र 'वेंग् तन्तुसन्ताने' (इति) वे, णव्, "वेर्वय्" (४।४।१९) इत्यनेन 'वय्' आदेशः। [5]'वशक् कान्तौ'। [6]वशसाहचर्यात् "वचंक् भाषणे" इत्यदादिको ज्ञातव्यः, ब्रूगादेशो वच् चुरादौ यौजादिको वा वच् न ग्राह्यः ॥७२॥

## न वयो य् ।४।१।७३॥

वृत्तिः—पूर्वस्येति निवृत्तमसम्भवात्। वेगादे-

शवयेर्यकारे 'य्वृन्न' स्यात्परोक्षायाम् । ऊयुः ॥७३॥

अवचूरिः—"ऊयतुः, ऊयुः;" अत्र "वेंग् तन्तुसन्ताने" परोक्षा, "वेर्वय्" (४।४।१६) इति सूत्रेण वेस्थाने 'वय्' आदेशः । अत्र 'यजादिवचेः किति" (४।१।१६) इत्यनेन यकारस्य वकाराकारेण सह य्वृत् प्राप्तो निषिध्यते, परं वकारस्य "यजादिवचेः किति" (४।१।७६) इत्यनेन य्वृत् उकारो भवत्येव ॥७३।

## वेरयः ।४।१।७४॥

वृत्तिः—वेगोऽयकारान्तस्य पूर्वस्य (परस्य च) 'य्वृन्न' स्यात्, परोक्षायाम् । [1]ववौ । अय इति किम् ? ऊवाय ॥७४॥

अवचूरिः—[1]"ववौ," अत्रापि 'वेर्वय्" (४।४।१६) इति विकल्पेन वय्, यत्र वय् तत्र 'उवाय' इति प्रयोगः; यत्र च न वय् तत्र 'ववौ' इति ॥७४॥

## अविति वा ४।१।८५॥

वृत्तिः—वेगो [1]ऽयन्तस्याविति परोक्षायां 'य्वृत् वा न' स्यात् । [2]ववतुः, [3]ववुः; ऊवतुः, ऊवुः ॥७५॥

अवचूरिः–[1]अयकारान्तस्य । [2]ववतुः,[3] "ववुः, ऊवतुः, ऊवु;" "वेंग्" (इति) वे, "आत् सन्ध्यक्षरस्य" (४।२।१ इत्यनेन) 'वा', ववतुः, ववुः; अत्र द्विर्वचने कृते, पूर्वस्य "यजादिवशवचः" (४।१।७२) इति य्वृत् प्राप्तः, "वेरयः" इत्यनेन य्वृन्निषिध्यते । ऊवतुः, ऊवुः; अत्र ······ (वे) गो य्वृत्, ततो द्विर्वचने कृते ······(सति 'धा) तोरिवर्णो०' (२।१।५०) इति परत्वात् उव्, (एवं) कृते सति पश्चात् "समानानां तेन दीर्घः" (१।२।१। इति दीर्घः) ॥७५॥

## ज्यश्च यपि ।४।१।७६॥

वृत्तिः—ज्या इत्यस्य वेगश्च यपि परे 'य्वृन्न' स्यात् । प्रज्याय, उपवाय ॥७६॥

अवचूरिः—ज्यांश् वयोहानौ ॥७६॥

## व्यः ।४।१।७७॥

वृत्तिः—व्येगो यपि 'य्वृन्न' स्यात् । प्रव्याय ॥७७॥

अवचूरिः—योगविभाग उत्तरार्थः ॥७७॥

## संपरेर्वा ।४।१।७८॥

वृत्तिः—संपरिभ्यां परस्य व्येगो यपि 'य्वृद्वा न' स्यात् । संव्याय, संवीय; परिव्याय, परिवीय ॥७८॥

अवचूरिः—"दीर्घमवोऽन्त्यम्" (४।१।१०३ इति दीर्घत्वे) संवीय, परिवीय; अत्र य्वृत् (? य्वृति) कृते तोऽन्तः प्राप्नोति, तत्राह-निरपेक्षत्वेनान्तरङ्गत्वात् प्रागेव य्वृतो दीर्घ एव; न तु तोऽन्तः ॥७८॥

## यजादि-वचेः किति ।४।१।७६॥

वृत्तिः—नेति निवृत्तम् । यजादीनां वचेश्च किति प्रत्यये परे सस्वरान्तस्था 'य्वृत्' स्यात् । ईजुः, इज्यते, इज्यात्, इष्टः; वेंग्-ऊयुः, ऊवुः, ऊयते, उतः; व्येंग्-संविव्युः, संवीतः; ह्वें-हूयते, हूतः; वपीं-ऊपुः, उप्यते, उप्तः; वहीं- उह्यते, ऊढः; श्वि- शूयते, शूनः[1]; वद- उद्यते, उदितः, ऊदुः; वसं- उष्यते, उषितः; [2]वच्- ऊचुः, उक्तः, उच्यते ॥७६॥

अवचूरिः—यजादिवचेरित्यत्र सूत्रे नवाऽपि यजादयः संगृहीताः सन्ति, सर्वेषां य्वृतः प्राप्तिभावार्थः (? र्थम्) । "[1]सूयत्याद्योदितः" (४।२।७०) इति तस्य नः । [2]वच् अदादिः, न तु चुरादौ यौजादिकः; तस्य वच्यते इति भवति ॥७६॥

## स्वपेर्यङ्-ङे च ।४।१।८०॥

वृत्तिः—स्वपेर्यङि, ङे किति च प्रत्यये परे 'य्वृत्' स्यात् । ञिस्वपंक् शये ( इति ) स्वप्, यङ्, सोषुप्यते, सोषुपीति; असूषुपत्, कित्प्रत्ययः-सुप्यते, सुषुपतुः, सुषुप्सति ॥८०॥

## ज्या-व्यधः क्ङिति ।४।१।८१।

वृत्तिः—ज्याव्यधोः किति ङिति च प्रत्यये परे ''य्वृत्' स्यात् । किति-जीयते, जीयात्, जीनः; ङिति-जिनाति, जेजीयते, जेजेति; किति—[2]विध्यते, विद्धः; ङिति-विध्यति, वेविध्यते वेवेद्धि ॥८१॥

---

अवचूरिः—[1]सस्वरान्तस्था। [2]व्यधंच् ताडने ॥८१॥

## व्यचोऽनसि ।४।१।८२॥

वृत्तिः—[1]व्यचेरस्वर्जिते क्ङिति सस्वरान्तस्था 'य्वृत्' स्यात् । विचति, विचितुम्※ । अनसीति किम् ? [2]उरुव्यचाः ॥८२॥

---

अवचूरिः—[1]व्यचत् व्याजीकरणे । [2]उरु विचतीति 'अस्' (उणादि० ६५२ इत्युणादिसूत्रेण अस्, "अभ्वादेरत्वसः सौ" ( १।४।४६। इति दीर्घत्वम् ) ॥८२॥

## वशेरयङि ।४।१।८३॥

वृत्तिः—वशेरयङि[1] क्ङिति परे '[2]य्वृत्' स्यात् । [3]उश्यते, उशितम्, उष्टः, उशन्ति । अयङीति किम् ? वावश्यते । क्ङितीत्येव- वष्टि ॥८३॥

---

अवचूरिः—[1]यङ्वर्जिते । [2]सस्वरान्तस्था । [3]वशक् कान्तौ (इति अदादौ परस्मैपदी ॥८३॥

## ग्रह-व्रश्च-भ्रस्ज-प्रच्छः ।४।१।८४॥

वृत्तिः—ग्रहादीनां क्ङिति सस्वरान्तस्था 'य्वृत्' स्यात् । जगृहुः, गृह्यते, [1]गृहीतः, गृह्णाति, जिघृक्षति, जरीगृह्यते; वृश्च्यते वृश्चति, [2]वृक्णः; [3]भृज्जति, पृच्छ्यते, पृष्टः, पृच्छति, परीपृच्छ्यते, पिपृच्छिषति, [4]पृच्छा ॥८४॥

---

अवचूरिः-"तेर्ग्रहादिभ्यः" (४।४।३३। इत्यनेन इट्, गृह्णोऽपरोक्षायां दीर्घः" (४।४।३४) इत्यनेन इट् दीर्घः । "[2]सूयत्याद्योदितः" (४।२।७०) इति नकारः । [3]'भृज्जति', अत्र "तृतीयस्तृतीयचतुर्थे" (१।३।४६) इति सकारस्य जकारः । [4] 'भिदादयः" (५।३।१०८) इति अङ् ॥८४॥

## व्ये-स्यमोर्यङि ।४।१।८५॥

वृत्तिः—व्येग्स्यमोर्यङि [1]'य्वृत्' स्यात् । वेवीयते, वेवयीति; [2]सेसिम्यते ॥८५॥

---

अवचूरिः—[1]सस्वरान्तस्था । (एवं) [2]सेसिमीति, स्यमू शब्दे ॥८५॥

## चायः कीः ।४।१।८६॥

वृत्तिः—[1]चायृधातोः 'कीः' आदेशः स्याद्यङि परे । चेकीयते । दीर्घनिर्देशो यङ्लुबर्थः—चेकीतः ॥८६॥

---

अवचूरिः—[1]"चायृग् पूजानिशामनयोः' (इति) चाय् । ८६॥

## द्वित्वे ह्वः ।४।१।८८॥

वृत्तिः—ह्वयतेर्द्वित्वे विषये सस्वरान्तस्था 'य्वृ-

---

※ कुटादित्वात् ङित्त्वेन य्वृद् गुणाभावश्च ॥

त्' स्यात्। जुहाव, जोहूयते, जोहवीति, जुहूषति ॥८७॥

## णौ ङ सनि ।४।१।८८॥

वृत्तिः—ह्वयतेर्ङपरे सन्परे च णौ विषये 'य्वृत्' स्यात्। अजूहवत्, जुहावयिषति ॥८८॥

अवचूरिः—'अजूहवत्', ह्वा, णिग्, अद्यतनीदि, "णिश्रिद्रुस्रु०" (३।४।५८) इति ङप्रत्ययः, "णौ ङसनि" (४।१।८८) इत्यनेन 'ह्वा' इत्यस्य य्वृत्-हु, "नामिनोऽकलिहलेः" (४।३।५१ इति) वृद्धिः-हौ, "ओदौतोऽवाव्" (१।२।२४ इति) हाव्, "भ्राजभासभाष०" (४।२।३६) इत्यादिना विकल्पेन ह्रस्वः, "णौ यत्कृतं कार्यं तत्सर्वं स्थानिवत्" इति न्यायात् 'हु' इति द्वित्वम्, "लघोर्दीर्घोऽस्वरादेः" (४।१।६४) इति पूर्वस्य दीर्घः, 'अजूहवत्' इति सिद्धम्; यत्र न ह्रस्वस्तत्र 'अजुहावत्' इति ॥८८॥

## श्वेर्वा ।४।१।८९॥

वृत्तिः—श्वयतेः ङसन्परे णौ विषये सस्वरान्तस्था 'य्वृद्वा' स्यात्। ङ- अशूशवत्, अशिश्वयत्; सन्- शुशावयिषति, शिश्वाययिषति। णावित्येव-अशिश्वियत्, शिश्वयिषति ॥८९॥

अवचूरिः—'णौ ङसनि" (४।१।८८) "श्वेर्वा" (४।१।८९) इति सूत्रद्वये णावित्यत्र विषयसप्तमीयम्, विषयसप्तमीबलादन्तरङ्गमपि वृद्ध्यादिकं य्वृता बाध्यते; पूर्वं य्वृत् प्रवर्त्तते, पश्चात् वृद्ध्यावौ; इति "अजूहवत्, अशूशवत्" इत्यादौ पूर्वं य्वृत्, ततो वृद्धिः, आव्, उपान्त्यह्रस्वः; ततो णौ कृतस्य वृद्ध्यावादेशस्य स्थानित्वम्, न तु य्वृतः स्थानित्वम् इति 'हु, शु' इति रूपेण द्वित्वम्, (ततः) पूर्वस्य लघोर्दीर्घः' इति वृद्धजनाम्नायक्रमः। "अशूशवत्", श्वि, णिग्, ङ, दि, "श्वेर्वा" (४।१।८९) इत्यनेन य्वृत्, शु, वृद्धिः—आव्, "उपान्त्यस्यासमानलोपिशास्वृदितो ङे" (४।२।३५) इति ह्रस्वः, "णौ यत्कृतं कार्यं तत्स्थानिवत्" इति न्यायात् 'शु' इति द्वित्वम्, "लघोर्दीर्घोऽस्वरादेः" (४।१।६४) इत्यनेन दीर्घः—शू, एवं "शुशावयिषति", अत्र सन् ॥८९॥

## वा परोक्षा-यङि ।४।१।९०॥

वृत्तिः—श्वयतेः परोक्षायां यङि च परे 'य्वृद्वा' स्यात्। [1]शुशाव, शिश्वाय; शोशूयते, शोशवीति; शेश्वीयते, शेश्वयीति ॥९०॥

अवचूरिः—[1]"णिद्वाऽन्त्यो णव्" (४।३।५८) इति वा णित्, ततो वा वृद्धिः। अवित्परोक्षायां परतः कित्त्वात् "यजादिवचेः किति" (४।१।७९) इत्यनेन य्वृति प्राप्ते विति परोक्षायां तु यङि च परेऽप्राप्ते "वा परोक्षायङि" (४।१।९०) इति विकल्पः कृतः इति। (एवम्) शुशुवतुः, शिश्वियतुः ॥९०॥

## प्यायः पी ।४।१।९१॥

वृत्तिः—प्यायतेः परोक्षायां यङि च 'पीः' आदेशः स्यात्। [1]आपिप्ये, पेपीयते, आपेपेति, आपेपीतः ॥९१॥

अवचूरिः—[1]स्फायैङ्, ओप्यायैङ् वृद्धौ (इति) प्याय्, पी-आदेशानन्तरं द्वित्वे कृते "योऽनेकस्वरस्य" (२।१।५६) इति यत्वम् ॥९१॥

## क्तयोरनुपसर्गस्य ।४।१।९२॥

वृत्तिः—अनुपसर्गस्य प्यायः क्तयोः=क्तक्तवतोः परयोः 'पीः' स्यात्। [1]पीनं, पीनवत् मुखम्। अनुपसर्गस्येति किम्? [2]प्रप्यानो मेघः ॥९२॥

अवचूरिः—प्यायते[1] स्म=पीनं, "गत्यार्थाकर्मकपिबभुजेः" (५।१।११) इति क्तः, "सूयत्याद्योदितः" (४।२।७० इति) नकारः। [2]'प्रप्यानो मेघः', प्याय, ... प्रप्यायते स्म (इति) क्तः, 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) इति यकारो लुप्यते, "व्यञ्जनान्तस्थातोऽख्याध्यः" (४।२।७१) इत्यनेन तकारस्य नकारः ॥९२॥

## आङोऽन्धूधसोः ।४।१।६३॥

वृत्तिः—आङः परस्य प्यायतेरन्धौ ऊधसि चार्थे क्तयोः परतः 'पीः' स्यात् । आपीनोऽन्धुः, आपीनमूधः । अन्धूधसोरिति किम् ? आप्यानश्चन्द्रः ॥६३॥

## स्फायः स्फी वा ।४।१.६४॥

वृत्तिः—स्फायतेः क्तयोः 'स्फीः' स्यात् वा । स्फीतः, स्फीतवान्; स्फातः, स्फातवान्; संस्फीतः, संस्फीतवान् ॥६४॥

## [1]प्रसम स्त्यः स्ती ।४।१।६५॥

वृत्तिः—[ [1]प्रात सम् = प्रसम्, तस्मात् ] 'प्रसम्' इति समुदायपूर्वस्य स्त्यायतेः क्तयोः 'स्तीः' स्यात् । प्रसंस्तीतः, प्रसंस्तीतवान् । प्रसम इति किम् ? संप्रस्त्यानः ॥६५॥

## प्रात्तश्च मो वा ।४।१.६६॥

वृत्तिः—प्रात्केवलात्परस्य स्त्य क्तयोः 'स्तीः' स्यात्, 'क्तयोस्तकारस्य च मकारो वा' स्यात् । प्रस्तीमः, प्रस्तीमवान्; प्रस्तीतः, प्रस्तीतवान् ॥६६॥

---

अवचूरिः—ष्ट्यैं स्त्यैं संघाते च ( इति ) स्त्यै धातुः ॥६६॥

## श्यः शीर्द्रवमूर्त्तिस्पर्शे नश्चास्पर्शे ।४।१।६७॥

वृत्तिः—द्रवस्य मूर्त्तिः=काठिन्यम्, तस्मिन्, स्पर्शे च वर्तमानस्य [1]श्यायतेः क्तयोः 'शीः' आदेशः स्यात्, तद्योगे च 'क्तयोस्तकारस्याऽस्पर्शविषये नकारादेशः' । शीनं, शीनवद् घृतम्; द्रवावस्थायाः काठिन्यं गतमित्यर्थः, स्पर्शे [2]शीतं वर्तते, शीतो वायुः । द्रवमूर्त्तिस्पर्श इति किम् ? [3]संश्यानो वृश्चिकः ॥६७॥

---

अवचूरिः—[1]श्यैङ् गतौ इति आत्मनेपदी । [2]अत्र नकारादेशो न संजातः ( स्पर्शविषयत्वात् ) । [3]शीतेन वृश्चिकः संकुचितः ॥६७॥

## प्रतेः ।४।१।६८॥

वृत्तिः—प्रतेः परस्य श्यायतेः 'शीः', क्तयोस्तकारस्य च [1]'नः' स्यात् । [2]प्रतिशीनः, प्रतिशीनवान् ॥६८॥

---

अवचूरिः—[1]नकारादेशः । [2]प्रतिपूर्वः श्यायतिरयं रोगे वर्तते । पूर्वेणाप्राप्ते प्रतेरिति वचनं कृतम् ।६८॥

## वाऽभ्यवाभ्याम् ।४।१।६९॥

वृत्तिः—अभ्यवाभ्यां परस्य श्यः क्तयोः 'शीर्वा' स्यात् तद्योगे 'क्तयोस्तस्यास्पर्शे [1]न च' । अभिशीनः, अभिशीनवान् ; अभिश्यानः, [2]अभिश्यानवान् ; अवशीनः, अवशीनवान् ; [3]अवश्यानः, द्रवमूर्तिस्पर्शयोरप्यनेनैव परत्वाद्विकल्पः—अभिशीनम्, अभिश्यानं घृतम् ; अवशीनम्, अवश्यानं हिमम्; तथा अभिशीतः, अवशीतो वायुः; स्पर्शत्वान्न नत्वम् अभिश्यानः[4], अवश्यानो वायुः ॥६९॥

---

अवचूरिः—[1] तकारस्य नकारादेशः । [2]"व्यञ्जनान्तस्थातोऽख्याध्यः" (४।२।७१) इत्यनेन तकारस्य नकारः, एवमग्रेऽपि । एवम्) [3]अवश्यानवान् । वा शब्दस्य च व्यवस्थितविभाषार्थत्वादन्योपसर्गान्ताभ्यामभ्यवाभ्यां परतः श्यायतेः शीर्नकारश्च न भवति—समभिश्यानः, समभिश्यानवान् , समवश्यानः, (समवश्यानवान्) । इयमवचूरिः "अभ्यवाभ्याम्" सूत्रार्थप्रान्ते ज्ञातव्या । [4]"व्यञ्जनान्तस्था०" (४।२।७१) इत्यनेन स्पर्शेऽपि नकारः ॥६९॥

## श्रः शृतं हविः-क्षीरे ।४।१।१००॥

वृत्तिः—श्रातेः श्रायतेश्च क्ते परे हविषि क्षीरे चार्थे 'शृ' इति निपात्यते । शृतं हविः, शृतं क्षीरम्

स्वयमेव। हविःक्षीर इति किम्? [१]श्राणा यवागूः ॥१००॥

अवचूरिः—श्रांक् पाके। श्रैं स्रैं पाके। श्राति-श्रायती हि अकर्मकौ कर्मकर्तृविषयस्य पचेरर्थे वर्तेते, तयोरेतन्निपातनम् शृतं हविः, शृतं क्षीरम्। अत्र 'श्रांक् पाके' अथवा 'श्रैं स्रैं पाके' इति भ्वादिः। श्राति स्म श्रायति स्म वा हविः क्षीरं देवदत्तः, स एवं विवक्षितवान्-नाहं श्रामि स्म श्रायामि स्म वा किन्तु हविः क्षीरं स्वयमेव श्रायते स्म; "गत्यर्थाकर्मकश्लिषभुजेः" (५।१।११) इति क्तः। अण्यन्तयोः पच्यमानकर्तृकयोर्निपातोऽयम्। तथा श्रायते स्मेति वाक्ये निष्ठाक्तः। अण्यन्तयोः पक्तृकर्तृकयोर्निपातः। [१]अत्र पक्षे देवदत्तेन इति अध्याहार्यम्। "व्यञ्जनान्त०" (४।२।७१) इति तस्य नकारः ॥१००॥

## श्रपेः प्रयोक्त्रैक्ये ।४।१।१०१॥

वृत्तिः—श्रातेः श्रायतेर्वा ण्यन्तस्यैकस्मिन् प्रयोक्तरि क्ते हविःक्षीरार्थं 'शृ' निपात्यते। [१]शृतं हविः, [२]शृतं क्षीरं चैत्रेण। हविःक्षीर इत्येव—श्रपिता यवागूः ॥१०१।

अवचूरिः—[१]"शृतं हविश्चैत्रेण, [२]शृतं क्षीरं चैत्रेण;" अत्र श्राति श्रायति वा हविः क्षीरं [स्वयमेव, तत्] चैत्रेण प्रायुज्यत, "प्रयोक्तृव्यापारे णिग्" (३।४।२० इति णिग्)। यदा पुनर्द्वितीये प्रयोक्तरि णिगुत्पद्यते तदा शृ न निपात्यते, तदा श्रपितं हविश्चैत्रेण मैत्रेण इत्येव प्रयोगः इदमेव व्यावृत्त्युदाहरणं ज्ञातव्यम्, वाक्यं त्वेवं कार्यम्—श्राति स्म श्रायति स्म वा हविः क्षीरं स्वयमेव, तद् देवदत्तेन प्रयुज्यते स्मेति वाक्ये णिग्, सोऽपि देवदत्तः श्रपयन्मैत्रेण प्रयुज्यते स्मेति वाक्ये द्वितीयवारे णिग्। [३]'श्रपिता यवागूः' अत्र श्रा, श्राति स्म श्रायति स्म (वा) यवागूं देवदत्तः, स एवं विवक्षितवान्—नाहं श्रामि स्म श्रायामि स्म (वा), किन्तु यवागूः स्वयमेव श्रायते स्म; यवागूः स्वयमेव श्रायमाणा देवदत्तेन प्रायुज्यत, णिग्, "अर्त्तिरीव्ली०" (४।२।२१) इति पोऽन्तः, "घटादेः०" (४।२।२४) इति ह्रस्वः ॥१०१॥

## ग्वृत् सकृत् ।४।१।१०२॥

वृत्तिः—'धातोर्ग्वृत् सकृद् = एकवारमेव' भवति। संवीयते, विध्यते ॥१०२॥

## दीर्घमवो[१]ऽन्त्यम्[२] ।४।१।१०३॥

वृत्तिः—वेगृवर्जितस्य [२]धातोर्ग्वृदन्त्यं 'दीर्घः' स्यात्। [३]जीनः, संवीतः, हूतः, शूनः। अव इति किम्? [४]उतः, [५]उतवान् ॥१०३॥

अवचूरिः—[१]न वा = अवा, ङस्। [२]"दीर्घमवोन्त्यं = धातोरन्त्यं ग्वृत् दीर्घं भवतीत्यस्याप्ययं भावः- यत्र धातोरन्ते ग्वृत्, तस्य ग्वृतो दीर्घो भवति; यत्र धातोरादौ विचाले वा ग्वृत्, तस्य ग्वृतो न दीर्घ इत्यर्थः; यथा—सुतः, उप्तः। [३]एवं जिनाति, अत्र "प्वादेर्ह्रस्वः" (४।२।१०५। इति ह्रस्वत्वम्)। [४]ऊयते स्म। [५]वयति स्म ॥१०३॥

## स्वर हन्-गमोः सनि धुटि ।४।१।१०४॥

वृत्तिः—स्वरान्तस्य धातोर्हन्तेर्गमोश्च धुड़ादौ सनि परे स्वरस्य 'दीर्घः' स्यात्। चिचीषति, चिकीर्षति; हन्—[१]जिघांसति, [२]गमु—जिगांस्यते। धुटीति किम्? यियविषति, इवृध्भ्रस्ज० (४।४।४७ इत्यनेन) इट् ॥१०४॥

अवचूरिः—"स्वरहन्गमोः०" इति सूत्रे सनीति किम्? स्तुतः, पश्चात् धुटीति किम्? [इति वक्तव्यम्] [१]"अङे हिहनो हो घः पूर्वात्" (४।१।३४) इति हस्य घः। [२]स्वरहन्गमोरिति सूत्रे इण्-इक्-इङां 'सनीङश्च' (४।४।२५) इति सूत्रेण यो गम् आदेशः स इह सूत्रे ज्ञातव्यः, न गम् धातुः। इण्क्-जिगांस्यते, संजिगासते। इक्-अधि-

जिगांसयते माता । इङ्क्- अधिजिगांसते सूत्रम् ॥१०४।

### तनो वा ।४।१।१०५॥

वृत्तिः—तनोतेर्धुडादौ सनि स्वरस्य 'दीर्घो वा' स्यात् । तितांसति, तितंसति । धुटीत्येव— तितनिषति । १०५॥

### क्रमः क्त्वि वा ।४।१।१०६॥

वृत्तिः—क्रमः स्वरस्य धुडादौ क्त्वाप्रत्यये 'दीर्घो वा' स्यात् । क्रान्त्वा, क्रन्त्वा । धुटीत्येव— क्रमित्वा । "ऊदितो वा" (४।४।४२।इति) विकल्पेन इट् 'प्रक्रम्य' इत्यत्र त्वन्तरङ्गमपि दीर्घत्वं बाधित्वा प्रागेव यप्, एतच्च "यपि चादो जग्ध्" (४ ४ १६) इत्यत्र ज्ञापयिष्यते ॥१०६।

### अहन्पञ्चमस्य क्वि क्ङिति ।४।१।१०७॥

वृत्तिः—हन्वर्जस्य पञ्चमान्तस्य धातोः स्वरस्य क्वौ धुडादौ च क्ङिति दीर्घः स्यात् । [1]प्रशान्, प्रदान्; क्ति-शान्तः, [2]शान्तिः; क्ङिति-शशान्तः । पञ्चमस्येति किम् ? पक्त्वा । अहनिति किम् ? 3वृत्रहणि । [3]धुटीत्येव-यम्यते ॥१०७॥

अवचूरिः—"[1]मो नो म्वोश्च" ( २ १।६७ ) इति मकारस्य 'न्' आदेशः । [एवम्] [2]शान्तवान्, एवम् दान्तः । "[3]कवर्गैकस्वरवति" ( २।३।७६। इति) णत्वम् ॥१०७॥

### अनुनासिके च च्छ्वः शूट् ।४।१।१०८॥

वृत्तिः—अनुनासिकादौ क्वौ धुडादौ च प्रत्यये धातोश्छकारवकारयोर्यथासंख्यं 'श्, ऊट्' इत्यादेशौ भवतः । [ अनुनाशिकादौ- ] [1]प्रश्नः, क्वि-[2]शब्दप्राट्, धुडादौ -[3]पृष्टः, प्रष्टा, वकारस्य ऊट्— [4]स्योमा; ( अनुनाशिकादौ— ) स्योमा, ( क्वि— ) [5]अक्षयूः, हिरण्ययूः (धुडादौ—) द्यूतः दुद्यूषति । धातोरित्येव - [6]द्युभिः ॥१०८॥

अवचूरिः—अनुनासिके च० इति 'च्छ्वः' इत्यत्र छकारस्य द्विः पाठात् द्वित्वापन्नस्य छकारस्य द्वयस्यापि 'श्' इत्यादेशः क्रियते इत्यर्थः । ऊट् इति टकारः 'ऊटा' (१।२।१३ इत्यत्र विशेषणार्थः । [1]प्रछ्, प्रच्छनं=प्रश्नः, "यजिस्वपिरक्षियतिप्रच्छो नः" (५।३।८५) इति 'न,' "स्वरेभ्यः" (१।३ ३०) इत्यनेन छकारस्य द्वित्वम् —'च्छ', द्वयोरपि छकारयोः "अनुनासिके च० ( ४।१।१०८ ) इत्यनेन 'शकारः' । [2]शब्दं पृच्छति ( इति ) "दिद्युद्दद्०" ( ५।२।८३ ) इत्यनेन क्विप् दीर्घश्च, "अनुनासिके०" (इति) छस्य 'श्.' यजसृजमृजराज० (२।१।८७) इत्यनेन शकारस्य 'ष्,' "धुटस्तृतीयः" ( २।१।७६ इति ) षस्य 'ड्', "विरामे वा" ( १।३।५१। इति ) ट् । [3]छकारस्य श्. प्रहृव्रश्चभ्रस्जप्रच्छः ( ४।१।८४। इति ) य्वृत् । [4]'स्योमा', सिव्, सीव्यतीति स्योमा, ' मन्वन्क्वनिप्विच् क्वचित् ' (५।१।१४७) इति 'मन्' प्रत्ययः, नित्यत्वात् पूर्वम् "अनुनासिके०" इत्यनेन वकारस्य ऊट्, न गुणः; ऊटि कृतेऽन्तरङ्गत्वात् (पूर्वं) 'यत्वम्', ततो नकारस्य गुणः— ओ । [5]तथा अक्षैर्दीव्यति (इति) क्विप् वस्य ऊट् । [एवं] [6]द्युभ्याम् दिव् धातुः, दीव्यतीति "दिवेर्डिव्" [उणा० ६४६ ] इति औणादिकः दिव् शब्दः, भ्याम्, "उः पदान्तेऽनूत्" (२।१।११८) इति वकारस्य उः । यदा तु दिवेः क्विप् तदा धातुत्वात् ऊट् द्यूभ्यां द्यूभिरिति भवति । यङ्लुपि तु देद्योति, देद्योषि इति प्रयोगः ॥१०८॥

### मव्यवि श्रिवि ज्वरि-त्वरेरुपान्त्येन ।४।१।१०९॥

वृत्तिः—मव्यादीनामनुनासिकादौ क्वौ धुडादौ च प्रत्यये वकारस्योपान्त्येन सह [1]'ऊट्' स्यात् । [2]मोमा. [3]मूः, [4]मूतिः, [5]मामोति; [6]ओम्. [7]ओमा, [8]ऊः, ऊतिः; [9]श्रोमा, [10]श्रूः, [11]श्रूतः, [12]शेश्रोति, [ शेश्रूतः; ] [13]जूर्मा, जूः, जूरौ, जूरः, जूर्तिः, जाजूर्ति, "जाजूर्षि; तूर्मा, तूः, तूरौ, [14]तूर्णः, तूर्णवान्, तातूर्त्ति ॥१०९॥

अवचूरिः—[1]शकारस्य स्थानी ऊकारोऽत्र सूत्रे न सम्भवतीति 'ऊट्' एवानुवर्तते न श्, अतो वृत्तौ उक्तम् 'ऊट्' स्यात् । [2]'ओमा' 'मुर्वै मव बन्धने' इति मव्, "मन्वन्०" (५।१।१४७) इति मन् ) वस्य उपान्त्येन सह ऊट्, गुणः । [3]'मूः', क्विप्, [4]'मूतिः', क्तिः । [5]'मामोति', यङ्लुपि । [6]'अव्, अवतीति ओम् औणादिकः म', "मव्यवि०" (४।१।१०९) इति अवस्थाने ऊट् गुणः - ओम् । [7]'ओमा', अत्र मन् प्रत्ययः । [8]'ऊः', अत्र 'क्विप्', 'ऊवौ, ऊवः,' अत्र उवादेशः । [9]'श्रोमा,' 'श्रीवृच् गतिशोषणयोः' (इत्यतः) मन् । [10] क्विप् । [11]क्तः । [12]यङ्लुपि ति, तस् । [13]ज्वर रोगे । [14] 'ञित्वरिष् सम्भ्रमे" (इति) त्वर्, 'रदादमूर्च्छमदः क्तयोर्दस्य च" (४।२।६६) इति तकारस्य नकारः।श्रिव्यविमव-धातूनां पूर्वं उपान्त्यो वकारात विद्यते. ज्वरित्वरो-र्वकारात्पर उपान्त्यः; इत्थं पूर्वोपान्त्येन सह, परो पान्त्येन सह वकारस्य ऊट् भवतीत्यर्थः । ॥१०९॥

## राल्लुक् ।४।१।११०॥

वृत्तिः—रेफात्परयोश्छकारवकारयोरनुनासिकादौ क्वौ धुडादौ च प्रत्यये लुक् स्यात् । शूटोऽपवादः । [1]मोर्मा, [2]होर्मा; मूः, [3]हूः, [4]मूर्तः, [5]मूर्त्तिः, मोमोर्त्ति; तूः, तुरौ, तुरः; [6]धूः, धुरौ, धुरः । [7]धूर्त्ता इति त्वौणादिकः । अनुनासिकादावित्येव—[8]मूर्च्छा ॥११०॥

अवचूरिः—[1]"मुर्च्छा मोहसमुच्छाययोः [2]हुर्च्छा कौटिल्ये" मुर्च्छा, हुर्च्छा, मन् । [3]क्विप् । [4]क्तः । [5]क्तिः । ( 'मूर्त्तः, मूर्त्तिः' इत्यत्र ) "भ्वादेर्नामिनो दीर्घो र्वो० (२।१।६३) इति दीर्घः, मूर् हूर्, तूरित्यत्रैव च 'पदान्ते" ( २।१।६४ ) इत्यनेन दीर्घः । ( एवम् ) उर्वै तुर्वै० दण्डकधातुः, तुर्व्, धुर्व्, मन-तोर्मा, धोर्मा इत्यनुनासिकादौ इत्यस्योदाहरणं ज्ञेयम् । [ एवम् ] तूर्णः, तूर्णवान्, तूर्त्तिः; धूर्णः; धूर्णवान्, धूर्त्तिः । ......... ( ननु धूर्ण इत्यत्र णकार स्तत्कथं धूर्त्त इत्याह -) [6]धूर्त्त इति च प्रयोग औणादिको ज्ञातव्यः । इयमवचूरिः "धूः, धुरौ, धूरः इति प्रयोगाऽग्रे द्रष्टव्या । [7]"भिदादयः" ( ५।३।१०८ । इत्यनेन स्त्रियामङ् प्रत्ययः ) ॥११०॥

## क्तेऽनिटश्चजोः कगौ घिति ।४।१।१११॥

वृत्तिः—क्तेऽनिटो धातोश्चकारजकारयोः स्थाने यथासंख्यं 'कगौ' भवतः, घिति[ = घकारानुबन्धे] प्रत्यये । पाकः, सेकः; त्यागः, रागः, भोग्यम्, योग्यम् । क्तेऽनिट इति किम् ? संकोचः, ["कुचत् संकोचने"] कूजः, गर्जः, समाजः । घितीति किम् ? पचनम् ।१११॥

## न्यङ्क्रुद्गम-मेघादयः ।४।१।११२॥

वृत्तिः—'न्यङ्क्वादयः कृतकत्वाः, उद्गादयः कृतगत्वाः, मेघादयः कृतघत्वा" निपात्यन्ते । [1]न्यङ्कुः, [2]तक्रम्, [3]वक्रम्, [4]शुक्रः, [5]शोकः [6]रोकः, [7]श्वपाकः, [8]मांसपाकः, पिण्डपाकः; "कर्मणोऽण्" (५।१।७२) इत्यणि, अणभावे श्वपचः इत्यादि, [अच् (५।१।४९) इति सूत्रेणाच् ] । [9]नीचेपाकः, [10]दूरेपाकः, फलेपाकः, क्षणेपाकः; उकारान्ता अपि गणे पठ्यन्ते—नीचेपाकुः, दुरेपाकु, फलेपाकुः; अत एव निपातनादुकारः, तुरेपाका इत्या (द्या) बन्ता अपि; [11]उद्गः, समुद्गः, अभ्युद्गः; तथा सृजेः कर्त्र्यचि- सर्गः, उपसर्गः; [12]मद्गुः, [13]भृगुः; तथा मिहेरचि संज्ञायां हस्य घत्वम्—मेघः, अन्यत्र मेहः; [14]वहेरनुपसर्गस्य वकारस्य ओत्वं घत्वं च- ओघः = प्रवाहः; ददेर्न्यवाभ्यां घञि—[15]निदाघः, [16]अवदाघः = केवलपानीयपक्वोऽपूपः; अर्हतेर्घञि संज्ञायाम्—अर्घः = मूल्यं पूजाद्रव्यं च; संज्ञायामित्येव—अर्हः ॥११२॥

अवचूरिः—[1]नि(पूर्वः) अञ्च्, न्यञ्चतीति न्यङ्कुः, निपातनात् उप्रत्ययः, निपातनात् चस्य कः । "[2]तक्रम्, [3]वक्रम्, [4]शुक्रः;" तञ्चिवञ्चिशुचीनां धातूनां रक् प्रत्यये निष्पत्तिः, 'तञ्चयते' इत्यादि परिज्ञाक्यम् । [5]शुचि[6]रुच्योर्घञि—शोकः, रोक

इति, घञोऽन्यत्र शोच्यम्, रोच्यम् । [७]श्वानं पचति, एवं [८]मांसं पचति; "कर्मणोऽण्" (५।१।७२) इत्यनेन अण्, निपातनात् चस्य कत्वम् । "[९]नीचे-[९]पाकः, [१०]"दूरेपाकः" इत्यादि, नीचे पच्यते स्वयमेव इति कर्मकर्तरि "अच् दीर्घत्वं च" निपातनात्, "तत्पुरुषे कृति" (३।२।२०) इत्यनेन बहुलाधिकारात् सप्तम्या अलुप् । [११]"उब्जत् आर्जवे" (इति) उब्ज्, घञ्, क्ते सेट्, क्ते सेटत्वान्न प्राप्नोति इति घञि सति जकारस्य निपातनात् गत्वम्, उपान्त्यस्य च दत्वम्; उद्ग इति सिद्धम् । [१२]'मद्गुः', मस्ज, मज्जतीति मद्गुः, मस्जेरुः । [१३]भ्रस्ज्, भृज्जतीति भृगुः, भ्रस्जेः कुः, निपातनात् गत्वं सलोपश्च । [१४]वहेरनुपसर्गस्य वस्यौकारश्चेत्यस्य अनुपसर्गस्येत्येव— प्रवहः, निवहः, विवहः, उद्वहः इत्यादि । [१५]निदह्यतेऽत्र, ग्रीष्मः । [१६]'अवदाघः', कोऽर्थः ? केवलेति [ केवलपानीयपक्वोऽपूप इति] ॥११२॥

## न वञ्चेर्गतौ ।४।१।११३॥

वृत्तिः—गत्यर्थस्य [= गत्यर्थे वर्तमानस्य] वञ्चेः 'कत्वं न' स्यात् । [वञ्चेर्घ्यण्—] वञ्च्यं वञ्चति, गन्तव्यं गच्छतीत्यर्थः । गताविति किम् ? वङ्क्यं काष्ठं; कुटिलमित्यर्थः ॥११३॥

अवचूरिः—

पर्यन्ते व्याधवार्कैण्यसङ्कुले वित्तवत्तमाः ।
रात्रावपि महाऽरण्ये, वञ्च्यं वञ्चन्ति वाणिजाः ।१।
[अनुष्टुप्] ॥११३॥

## यजेर्यज्ञाङ्गे ।४।१।११४॥

वृत्तिः—'यज्ञाङ्गे वृत्तेर्यजेर्गत्वं न' स्यात् । पञ्च प्रयाजाः । यज्ञाङ्ग इत्येव– यागः, प्रयागः । ११४॥

अवचूरिः— प्रेज्यन्त एभिः = प्रयाजाः "व्यञ्जनाद् घञ्" (५।३।१३२ इति करणे घञ्) । ११४॥

## घ्यण्यावश्यके ।४।१।११५॥

वृत्तिः—आवश्यकोपाधिके घ्यणि परे धातोश्चजोः 'कगौ न' भवतः । अवश्यपाच्यम्, अवश्यरञ्ज्यम्, अवश्यभञ्ज्यम् । आवश्यक इति किम् ? पाक्यम् ।।११५॥

अवचूरिः—अवश्यं पचतीति अवश्यपाच्यम्, एवमग्रेऽपि; "णिन् चावश्यकाधमर्ण्ये" (५।४।३६) इति सूत्रेण घ्यण् । अकारान्तोऽपि अनव्ययमवश्यशब्दोऽस्ति ॥११५॥

## निप्राद् युजः शक्ये ।४।१।११६॥

वृत्तिः—निप्राभ्यां परस्य युजेः शक्ये गम्यमानेऽर्थे घ्यणि 'गो न' स्यात् । [१]नियोज्यः, [२]प्रयोज्यः । शक्य इति किम् ? प्रयोग्यः ॥११६॥

अवचूरिः— [१]'नियोक्तुं शक्यः = नियोज्यः, "शक्तार्हे कृत्याश्च" (५।४।३५) इति सूत्रेण घ्यण् । [२]एवं प्रयोक्तुं शक्यः = प्रयोज्यः ॥११६॥

## भुजो भक्ष्ये ।४।१।११७॥

वृत्तिः—भुजो भक्ष्यार्थे घ्यणि 'गो न' स्यात् । भोज्यमन्नम्, भोज्यं पयः । भक्ष्य इति किम् ? [१]भोग्यः कम्बलः, [२]भोग्या अपूपाः ॥११७॥

अवचूरिः—[१]प्रावरणीय इत्यर्थः । [२]पालनीया इत्यर्थः ॥११७॥

## त्यज-यज-प्रवचः ।४।१।११८॥

वृत्तिः—एषां घ्यणि 'कगौ न' भवतः । त्याज्यम्, [१]याज्यम्, [२]प्रवाच्यो नाम पाठविशेषः ॥११८॥

अवचूरिः—¹"याज्यम्" इति, अत एव प्रतिषेधात् यजिधातोः परो घ्यणपि भवति, अन्यथा 'शकितकिचतियतिशसिसहियजिभजिपवर्गात्' (५।१।२९) इत्यनेन "यप्रत्यय एव" स्यात्। प्रवचिग्रहणं शब्दसंज्ञार्थमुपसर्गनियमार्थं वा, प्रपूर्वस्यैव वचेः कत्वप्रतिषेधो भवति, नान्योपसर्गपूर्वस्य, तत्र (=अन्योपसर्गपूर्वे) —अधिवाक्यमिति। ²प्रवाच्यो नाम पाठविशेषः, तदुपलक्षितग्रन्थोऽपि प्रवाच्य इत्युच्यते ॥११८॥

## वचोऽशब्दनाम्नि ।४।१।११९॥

वृत्तिः—अशब्दसंज्ञायां गम्यमानायां वचेर्घ्यणि 'को न' स्यात्। वाच्यमाह। अशब्दनाम्नीति किम्? वाक्यम् = विशिष्टः पदसमुदायः ॥११९॥

## भुज-न्युब्जं पाणि रोगे ।४।१।१२०॥

वृत्तिः—भुजेर्निपूर्वस्योब्जेश्च घञन्तस्य पाणौ रोगे चार्थे यथासंख्यं 'भुजन्युब्जौ' निपात्येते। ¹भुजः पाणिः, ²न्युब्जो नाम रोगविशेषः ॥१२०॥

अवचूरिः –¹भुज्यतेऽनेनेति भुजः = पाणिः, [न्युब्जिताः] शेरतेऽस्मिन् इति "व्यञ्जनाद् घञ्" (५।३।१३२) इति (अधिकरणे) घञ्, गत्वाभावः भुजेर्गुणाभावश्च निपात्यते ॥१२०॥

## वीरुन्न्यग्रोधौ ।४।१।१२१॥

वृत्तिः—विपूर्वस्य रुहेः क्विपि न्यक्पूर्वस्य चाचि 'वीरुन्न्यग्रोधशब्दौ धकारान्तौ' निपात्येते। ¹वीरुत्, न्यग्रोधः ॥१२१॥

अवचूरिः ¹रुहधातोः 'वीरुत्', अत्र निपातनात् दीर्घः ॥१२१॥ अत्र सूत्रे (पादे) अवचूरिश्लोक-२३८॥ ग्रन्थाग्रम्-१६४॥ चतुर्थस्याध्यायस्य प्रथमः पादः।

इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने
चतुर्थाध्यायस्य प्रथमः पादः समाप्तः ॥



॥ अर्हम् ॥

# ॥ चतुर्थोऽध्यायः ॥

## [ द्वितीयः पादः ]

★

### आत्सन्ध्यक्षरस्य ।४।२।१॥

म० वृ०—धातोः सन्ध्यक्षरान्तस्य 'आकारो निर्निमित्तः' स्यात् संव्याता, म्लाता, निशाता; [शोंच् तक्षणे] अनैमित्तिकत्वादात्वस्य प्रागेव कृतत्वादाकारान्तलक्षणः प्रत्ययो भवति-[1] सुम्लः,[2] सुम्लानम्[3]। धातोरित्येव-गोभ्याम्। "चेता, स्तोता" इत्यत्र लाक्षणिकत्वान्नाऽऽत्वम् ॥१॥

---

अव०—[1]धातोः पूर्वमाकारः क्रियते, पश्चात् आकारान्तधातुमाश्रित्य आकारान्तलक्षणः प्रत्ययः। [2]सुष्ठु म्लायति = सुम्लः, "उपसर्गादातो डोऽश्य" (४।१।५६) इति 'डः'। [3]सुखेन म्लायते = सुम्लानम्, "शासूयुधिदशिधृषिमृषातोऽनः" (५।३।१४१) इत्यनेन 'अनप्रत्ययः' ॥१॥

### न शिति ।४।२।२॥

म० वृ०—सन्ध्यक्षरान्तस्य धातोः शिति प्रत्यये विषयभूते 'आन्न' स्यात् [= आकारो न भवति]। म्लायति, संव्ययति ॥२॥

### व्यस्थव्-णवि ।४।२।३॥

म० वृ०-व्ययतेः थवि णवि च विषयभूते 'आन्न' स्यात [= आकारो न भवति]। संविव्ययिथ, संविव्याय, अहं संविव्यय ॥३॥

---

अव०—"संविव्ययिथ", अत्र "व्येंग् संवरणे" (इति) व्ये, परोक्षाथव्, द्विर्धातु०(४।१।१।इति) द्वित्वम्, 'ज्याव्येव्यधिव्यचिव्यथेरिः' (४।१।७१) इत्यनेन पूर्वस्य 'इकारः'; "ऋवृव्येऽद इट्"(४।४।८०) इति सूत्रेण इट्। "संविव्याय", इहापि 'ज्याव्ये०' (४।१।७१। इति इकारः' ॥३॥

### स्फुर-स्फुलोर्घञि ।४।२।४॥

म० वृ०:—स्फुरस्फुलोर्घञि सन्ध्यक्षरान्तस्य 'आत् [ = आकारः]' स्यात्। विस्फारः, विस्फालः, विष्फारः, विष्फालः; 'वेः' (२।३।५४) इति सूत्रेण वा षः ।४॥

### वाऽपगुरो णमि ।४।२।५॥

म० वृ०—अपपूर्वस्य गुरेः सन्ध्यक्षरस्य स्थाने णमि प्रत्यये परे 'आत्वाद्वा [-विकल्पेन]'। अपगोरमपगोरम्, अपगारमपगारम् ॥५॥

---

अव०—"अपगोरमपगोरम्", 'गुरैति उद्यमे'(इति)गुर अपपूर्वः अभीक्ष्णमपगूर्य(इति) 'ख्णम् चाभीक्ष्ण्ये' (५।४।४८) इति सूत्रेण ख्णम्, 'भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक् तमबादेः' (७।४।७३) इति सूत्रेण द्वित्वम् ='अपगोरम्' इति द्वितीयं वारं क्रियते, ततः प्रथमासिः, 'अव्ययस्य' (३।२।७) इति सिलोपः ॥५॥

### दीङः सनि वा ।४।२।६॥

म० वृ०—दीङः सनि परे 'आत्वं वा' स्यात्। दिदासते, दिदीषते। दीङ्च् क्षये' (इति) दी, दातुमिच्छति ॥६॥

## यबक्ङिति ।४।२।७॥

म० वृ० दीङो यपि अक्ङिति च प्रत्यये विषयभूते 'आत्' अन्तादेशः स्यात् । उपदाय, उपदाता । विषयसप्तमीनिर्देशात्प्रागेवात्वे सति [1]"ईषदुपदानः, [2]उपदायो' वर्त्तते; अत्र आकारान्तलक्षणो नः घञ्च स्यात् । [3]सानुबन्धनिर्देशात् यङ्लुपि नाऽऽत्वम्-उपदेदेति ॥७॥

अव०—अवदाय, दातुम्, उपदातुम्, उपदातव्यम्, उपादास्त इत्यादयोऽत्र ज्ञातव्याः । [1]आकारे कृते सति ईषदुपदीयते = ईषदुपदानः, 'शासू-युधिदृशिधृषिमृषातोऽनः' (५।३।१४१) इत्यनेन 'अनप्रत्ययः' । [2]"भावाऽकर्त्रोः' (५।३।१८ इति) घञ् । ननु घञः कथमाकारान्तलक्षणत्वम् ? आदन्तेभ्योऽप्यन्यत्रापि घञः सामान्येन विधानात, उच्यते—घञोऽप्याकारान्तलक्षणत्वं सामान्यमस्ति, यत आकाराभावे ईदन्तत्वादल् स्यात । (अनन्तरसूत्रे) [3]दीङः इत्यत्र ङकारनिर्देशात् । यबक्ङितीति किम् ? दीनः, उपदीयते, उपदेदीयते ॥७॥

## मिग्-मीगोऽखलचलि ।४।२।८॥

म० वृ०—[1]मिनोति[2]मीनात्योर्यपि परे खलचलवर्जितेऽक्ङिति च प्रत्यये विषयभूते 'आत्' अन्तादेशः स्यात् । निमाय, निमाता, निमातुम्, निमातव्यम्, प्रमाय, प्रमाता, प्रमातुम्, प्रमातव्यम् । अखलचलीति किम् ? (खलि-) ईषन्निमयः[3], [4]दुष्प्रमयः । अचि-मयः, [5]आमयः[6]; अलि-निमयः । यबक्ङितीत्येव—निमितः, निमीतः, प्रमेमीयते ॥८॥

अव०—[1]"डुमिंग्ट् प्रक्षेपणे' इति मिनोतिः । [2]"मींगश् हिंसायाम्' इति मीनातिः । [3]ईषद्-अनायासेन निमीयते = ईषन्निमयः, दुःखेन प्रमीयते = दुष्प्रमयः; [4]"दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात्खल्' (५।३।१३६) इत्यनेन 'खल्' । [5]मिनोति दुःखमिति मयः । [6]आ = सामस्त्येन मीनाति = हिनस्ति प्राणिनम् = आमयः । 'मिग्मीग्' इति गकारनिर्देशात् यङ्लुपि नाऽऽत्वम्—निमेमेति । तथा विशेषमाह—'मींङ्च् हिंसायाम्' इति दैवादिकस्य माभूत्—मेता, मेतुम् । 'मींङ्च् हिंसायाम्' (इति) अस्यापि केचिदात्वमिच्छन्ति—माता, मातुम् । इयमवचूरिः 'मिग्मीगोऽखलचलि' इति प्रान्ते ज्ञेया ॥८॥

## लीङ्-लिनोर्वा ।४।२।९॥

म० वृ०—[1]लीयतेर्लिनातेश्च यपि खलचलवर्जेऽक्ङिति च विषये 'आत् = [आकारः] स्याद्वा' । विलाय, विलीय; विलाता, विलेता; विलास्यते विलेप्यते । अखलचलीत्येव—ईषद्विलयः, विलयः, विलयो वर्त्तते । यबक्ङितीत्येव—लीनः,[3] लीयते, लेलीयते[2] ॥९॥

अव०—[1]"लीङ्च् श्लेषणे' 'लींश् श्लेषणे' (इति) द्वयोरपि समानं रूपम् । [2]लिनाति इत्यपि । [3]लीनः लीनवान्; अत्र लीधातुः क्र्यादिर्दिवादिर्वा, क्र्यादित्वात् ॠल्वादेरेषां तो नोऽप्रः' ४।२।६८) इत्यनेन, दैवादिकस्य तु 'सूयत्याद्योदितः' (४।२।७०) इत्यनेन तकारस्य नकारः ॥९॥

## णौ क्री-जीङः ।४।२।१०॥

म० वृ०—क्रींग्जीङां णौ परे 'आत्' अन्तादेशः स्यात् । क्रापयति, जापयति, अध्यापयति ॥१०॥

अव०—सर्वत्र 'अर्त्तिरीव्ली०' (४।२।२१) इत्यनेन पोऽन्तः ॥१०॥

## सिध्यतेरज्ञाने ।४।२।११॥

म० वृ०—अज्ञानार्थस्य [= अज्ञाने वर्तमानस्य] [1]सिध्यतेर्णौ परतः स्वरस्य 'आत्' स्यात् । मन्त्रं साधयति, एवं तपः (साधयति), अन्नं साधयति [2]साधर्मिकेभ्यो दातुम् । अज्ञान इति किम् ? [3]तपस्तापसं सेधयति । सिध्यतेरिति किम् ? षिधू गत्यामित्यस्य

भौवादिकस्य मा भूत्- तपः सेधयति । साधिनैव सिद्धे सिध्यतेरज्ञाने "सेधयति" इति प्रयोगनिवृत्त्यर्थं वचनम् ॥११॥

अव०—[1]"षिधूं च संराद्धौ"। [2]समानोधर्मः= सधर्मः, सधर्मः प्रयोजनमेषाम् [ति साधर्मिकाः, 'प्रयोजनम्' (६।४।११७) इतीकण्]। [3]"तपस्तापसं सेधयति" इत्यस्य एवं वाक्यरचना—सिध्यति, कोऽर्थः ? सिध्यति = जानीते, तापसः ज्ञानविशेषमासादयति, तं तापसं तपः कर्तृ प्रयुङ्क्ते (इति) णिग्; भावार्थोऽयम्- स्वान्येव कर्माणि एनं तापसं सेधयन्ति = अनुभवविशेषमासादयन्ति (?न्तं)तं कर्माणि प्रयुञ्जते, अस्य तापसस्य अनुभवविशेषमुत्पादयन्तीत्यर्थः; अनुभवः = साक्षात्कारः, स च ज्ञानमेव ॥११॥

## चि-स्फुरोर्नवा ॥४।२।१२॥

म० वृ०—चिस्फुरोर्णौ "स्वरस्यात् [=आकारः] स्याद्वा"। चापयति, चाययति; स्फारयति, स्फोरयति ॥ १२ ॥

## [1]वियः प्रजने[2] ॥४।२।१३॥

म० वृ०—प्रजनो =गर्भग्रहणम् । प्रजनार्थस्य 'वी' इत्यस्य णौ 'वा आत्' स्यात् । पुरो वातः[= पवनः] गाः[3] प्रवापयति प्रवाययति (वा), गर्भं ग्राहयतीत्यर्थः ॥ १३ ॥

अव०—[1]प्रजननं = प्रजनः, 'भावाकर्त्रोः' (५।३।१८ इति) घञ्, 'न जनवधः' (४।३।५४) इति सूत्रेण वृद्धिर्न भवति = आकारप्रतिषेधः । [2]वी क् प्रजनकान्त्यसनखादनेषु चागो[3], द्वितीयाशस्, आत्वम्; 'शसोऽता०' (१।४।४९) इत्यनेन शसोऽकारेण सह ओकारस्य 'आकारः' ॥ १३ ॥

## रुहः पः ॥४।२।१४॥

म० वृ०—रुहेर्णौ 'पकारान्तादेशो वा' स्यात् । रोपयति, रोहयति व्रीहीन् ॥ १४ ॥

## लियो नोऽन्तः स्नेहद्रवे ॥४।२।१५॥

म० वृ०—लियः स्नेहद्रवेऽर्थे गम्यमाने णौ परे 'नकारान्तावयवो वा' स्यात् । घृतं विलीनयति, विलाययति । स्नेहद्रव इति किम् ? अयो विलाययति । 'व्यलीलिनद्' इत्यत्रोपान्त्यह्रस्वः, [ 'उपान्त्यस्यासमान०' (४।२।३५) ] एवमुत्तरेष्वपि ॥ १५ ॥

अव०—'लियो नोऽन्तः' इति सूत्रे ली इति दैवादिको 'लींङ्च् श्लेषणे' इति, 'लींश् श्लेषणे' इति क्र्यादिः, 'लीण् द्रवीकरणे' इति त्रयाणामपि सामान्येन ग्रहणं भवति । घृतं विलीनयति, घृतं विलाययति; अत्रायं विशेषः– लीधातोर्णिग्, यदि परत्वाण्णौ वृद्धिः; आयादेशः, तदा "लिय ईः = लीः" इति युक्त्या ईकारप्रश्लेषादीकारान्तस्यैव लीधातोर्नोऽन्तो भवति । अथ ली, णिग्, 'लीङ्लिनोर्वा' (४।२।६) इत्यनेन आत्, कृतात्वस्य तु लीधातोर्वक्ष्यमाणौ 'लो लः' (४।२।१६) इत्यनेन लोऽन्तः, 'अर्त्तिरीव्ली०' (४।२।२१) इत्यनेन पोऽन्तः परत्वात् भवतः; तदा "घृतं विलालयति, घृतं विलापयति" इति रूपद्वयम्, एतेन घृतं विलीनयति ।१। विलाययति ।२। विलालयति ।३। विलापयति ।४। इति रूपचतुष्टयसिद्धिर्भवतीति ज्ञातव्यम् ॥ १५ ॥

## लो लः ॥४।२।१६॥

म० वृ० - लातेः ली इत्यस्य च कृतात्वस्य स्नेहद्रवे गम्यमाने णौ 'लोऽन्तो वा' स्यात् । घृतं विलालयति, विलापयति, [ लीङ्लिनो वा स्यात् ] घृतं व्यलीललत् । स्नेहद्रव इत्येव-श्येनो वर्त्तिकामुल्लापयते[1] ॥ १६ ॥

अव०—[1]( एवं ) जटाभिरालापयते, परैः स्वं पूजयतीत्यर्थः; पूर्वमिदम्, पश्चात् 'श्येनो वर्त्तिका०' इति ज्ञेयम्; वञ्चयते अभिभवति वा, अत्र 'लीङ्लिनोर्वाभिभवे चाच्चाकर्त्तर्यपि' (३।३।९०) इत्यनेनात्मनेपदमात्वं च ॥ १६ ॥

## पातेः ॥४।२।१७॥

म० वृ० – पृथग्योगान्नवेति निवृत्तम् । पातेर्णौ 'लोऽन्तः' स्यात् । पालयति, अपीपलत् ॥ १७ ॥

अव०—'पातेः' इत्यत्र तिवृनिर्देशेन 'पांक् रक्षणे' इत्ययमदादिको गृह्यते, 'पां पाने' 'पैं ओवैं शोषणे' इति धातुद्वयं निवार्यते; तयोः पाययति इति प्रयोगः; यङ्लुपि च लोऽन्तः प्रतिषिध्यते,—पापतं प्रयुङ्क्ते='पापायति' इति प्रयोगः । तथा 'पलण् रक्षणे' इति चौरादिकेनैव पालयतीति सिद्धे, पातेरादन्तत्वात् परत्वान् योऽन्तः स्यात्, इति पातेरिति सूत्रं कृतम् ॥ १७ ॥

## धूग्-प्रीगोर्नः ॥४।२।१८॥

म० वृ०—धूग्प्रीगोर्णौ 'नोऽन्तः' स्यात् । धूनयति[1], प्रीणयति ॥ १८ ।

अव०—"धूग् कम्पने धूग्श् कम्पने धूग्ण् कम्पने" इति त्रयोऽप्यत्र ज्ञातव्याः । "अदुधूनत् इत्यपि । "प्रीग्श् तृप्तिकान्त्योः प्रीग्ण् तर्पणे" इति द्वयं ज्ञेयम् । 'धूग्, प्रीग्' इत्यनुबन्धनिर्देशो यङ्लुपि नोऽन्तनिवृत्त्यर्थः— 'दोधावयति, पेप्राययति'; 'धूत् विधूनने प्रींङ्च् प्रीतौ' इति धातुद्वयप्रतिषेधार्थश्च-धावयति, प्राययति ॥ १८ ॥

## * वो विधूनने जः ॥४।२।१९॥

म० वृ०—[1]वातेर्विधूननेऽर्थे णौ 'जोऽन्तः' स्यात् । पक्षकेणोपवाजयति, पुष्पाणि प्रवाजयति, अवीवजत् । विधूनन इति किम् ? केशानावापयति[2], शोषयतीत्यर्थः ॥ १९ ॥

अव०—'[1]वांक् गतिगन्धनयोरित्यस्य' । '[2]पैं ओवैं शोषणे' आत्सन्ध्यक्षरस्य' (४।२।१ इति) वा ॥ १९ ॥

## पा-शा-छा-सा-वे-व्या-ह्वो यः ॥४।२।२०॥

म० वृ०—एषां णौ परे 'योऽन्तः' स्यात् । पाययति, शाययति, अवच्छाययति, अवसाययति, वेंग्-वाययति, व्येंग्-व्याययति, ह्वाययति । पोरपवादो योगः ॥ २० ॥

अव०—'पां पाने पैं ओवैं शोषणे' इति पाद्वयं ज्ञेयम्, न पातिः; पातेर्लोन्ति उक्तोऽस्ति । 'शोंच् तक्षणे (इति) शों । दों छोंच् छेदने ( इति ) छा । षोंच् अन्तकर्मणि (इति) सा, अथवा 'क्षैं जैं षैं क्षये'; उभयत्र 'आत्सन्ध्यक्षरस्य' । सूत्रे 'वे' इति निर्देशो 'वेंग् संवरणे' इत्यस्य ज्ञापकः, 'वांक् गतिगन्धनयोः पैं ओवैं शोषणे' इत्यनयोर्निवृत्त्यर्थः । तयोर्वापयतीत्येव स्यात् । 'व्येंग् संवरणे' (इति) व्या । तथा पासादीनां कृतात्वानां ग्रहणाद् इह प्रकरणे सर्वत्र लाक्षणिकस्यापि ग्रहणं भवति, तेन "क्षापयति, जापयति, अध्यापयति" इत्यादि सिद्धम् ॥ २० ॥

## अर्ति-री-व्ली-ह्री-क्नूयि-क्ष्माय्यातां पुः ॥४।२।२१॥

म० वृ० एषामाकारान्तानां च धातूनां णौ परे 'पुरन्तः' स्यात् । अर्पयति, रेपयति, व्लेपयति, ह्रेपयति, क्नोपयति, क्ष्मापयति; आदन्त[=आकारान्त—]दापयति, क्रापयति, जापयति, अध्यापयति । बहुवचनं व्याप्त्यर्थम्, तेन नाम्नोऽपि-सत्यापयति, अर्थापयति, वेदापयति; ['सत्यार्थवेदस्याः' (३।४।४४) इति आकारः] प्रिय—प्रापयति ॥ २१ ॥

अव०—'ऋक् गतौ' 'ऋ प्रापणे च' (इति द्वयमपि ज्ञातव्यम्) । अर्तेः तिवृनिर्देशो यङ्लुपि पोऽन्तनिषेधार्थः,—आरतं प्रयुङ्क्ते = अरारयति, अरियृतं प्रयुङ्क्ते = अरियारयति । रेपयतीत्यत्र 'रींङ्च् स्रवणे रींश् गतिरेषणयोः' ( इति ) द्वयमपि ज्ञेयम् । 'व्लींश् वरणे' (इति) व्ली । 'ह्रींक् लज्जा-

* वजिनैव सिद्धे वाते रूपान्तरनिवृत्त्यर्थं वचनम् ।

-ध्याने' (इति) ह्री । 'क्नूयैङ् शब्दोन्दनयोः' (इति) क्नूय । 'क्ष्मायैङ् विधूनने' (इति) क्ष्माय । पुगित्यत्र 'उकारः' उच्चारणार्थः, 'पुस्पौ' (४।३।३) इत्यत्र विशेषणार्थः (च) । 'प्रियमाचष्टे' (इति) णिग्, 'प्रियस्थिर०' (७।४।३८) इत्यादिना 'प्रा' आदेशः ॥ २१ ॥

## स्फायः स्फाव् ॥४।२।२२॥

म० वृ०—स्फायतेर्णौ परे 'स्फाव्' इत्यादेशः स्यात् । स्फावयति । अभेदनिर्देशोऽस्ताधिकारनिवृत्त्यर्थः ['स्फायैङ् ओप्यायैङ् वृद्धौ'] ॥ २२ ॥

## शदिरगतौ शात् ॥४।२।२३॥

म० वृ०—शीयतिः 'शात्' स्यादगत्यर्थे णौ परे । पुष्पाणि शातयति ['शद्लृं शातने'] । अगताविति किम् ? गोपालो गाः शादयति, गमयतीत्यर्थः ['गाः' इत्यत्र "आ अमशसोता" (१।४।७५) इत्यनेनाकारः] ॥ २३ ॥

## घटादेर्ह्रस्वो दीर्घस्तु वा ञिणम्परे ॥४।२।२४॥

म० वृ०—घटादीनां धातूनां णौ परे 'ह्रस्वो' भवति, ञिणम्परे तु णौ 'दीर्घो वा' स्यात् । घटयति, ञिणम्परे णौ-अघाटि, अघटि; घाटंघाटम्, घटंघटम्; हिडयति, अहीडि, अहिडि; हीडंहीडम्, हिडंहिडम् [अत्र प्रथमासिः, 'अव्ययस्य' (३।२।७) इति सिलुक्] । स्फायादिपर्यन्ते घटादयः ॥ २४ ॥

अव०—इह 'घटादेर्ह्रस्वो दीर्घ०' इति सूत्रे घटादयः 'पठितार्था एव = यथाश्रुतार्था एव ह्रस्वदीर्घकार्यं गृह्यन्ते; अर्थान्तरे तु घटादीनां न ह्रस्वविधिः । उपसर्गैः प्रायेणार्थान्तरं भवति, यथा-उद्घाटयति, श्रापयति, स्मारयति, विस्मारयति, दारयति, विदारयति, प्रमादयति, नाटयति, लाडयति, चालयति इत्यादिषु घटादीनामर्थान्तरवृत्तित्वात् न ह्रस्वः । 'घटिष् चेष्टायाम्' (इति) घट्, घटमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) इत्यनेन सर्वत्र णिग् । 'ञिणति' (४।३।५०) इत्यनेन वृद्धिः 'आकारः' सर्वत्र । अघाटि अघटीत्यत्र णिगपरतोऽद्यतनीत, 'भावकर्मणोः' (३।४।६८) इति सूत्रेण णिगपरतो ञिच्प्रत्ययः, अद्यतनीतकारलोपश्च । 'घाटंघाटम्' इत्यत्र 'अभीक्ष्णं घटनं पूर्वम्' इति वाक्यम्, 'ख्णम् चाभीक्ष्ण्ये' (५।४।४८) इति सूत्रेण ख्णम्प्रत्ययः णिगपरतः । खकारोऽप्रयोगी । णम्, तदनन्तरं 'घटादेर्ह्रस्वो दीर्घस्तु वा ञिणम्परे' इत्यनेन सर्वत्र ह्रस्व उपान्त्ये. पश्चात् यत्र अद्यतनीञिच् प्रत्ययस्तत्र 'अघाटि, अघटि' इति, यत्र च ख्णम्प्रत्ययस्तत्र 'घाटंघाटम्, घटंघटम्' इति, अत्र सर्वत्र घटादेर्ह्रस्वो० इत्यनेन ञिणम्परे णौ आश्रित्य विकल्पेन दीर्घः कर्तव्यः; यत्र दीर्घस्तत्र 'अघाटि, घाटम्' इति, पक्षे—अघटि, घटम् । ख्णम्प्रत्ययमाश्रित्य "भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक्तमबादेः" (७।४।७३) इत्यनेन द्वित्वम्—घाटंघाटं, घटंघटम्; प्रथमासिः, 'अव्ययस्य' इति सिलोपः । एवं हिडयतीत्यादिषु, 'हेड् वेष्टने' णिग् सर्वत्र, शेषं पूर्ववत् । अत्र ह्रस्वः एकारस्य सर्वत्र इकारः, पश्चात् दीर्घः ईकारः । तथा 'घटादेर्ह्रस्वः०' इति सूत्रेऽयं विशेषः—दक्षादीनां केषांचिद् धातूनामुपान्त्याकाराभावेऽपि, घटादिपाठबलादनुपान्त्यस्यापि अकारस्य ह्रस्वदीर्घौ, यथा-अदाक्षि, अदक्षि; दाक्षंदाक्षं, दक्षंदक्षम्; अक्षाञ्जि, अक्षञ्जि; क्षाञ्जंक्षाञ्जं, क्षञ्जंक्षञ्जम्; । 'दक्षयति, क्षञ्जयति' इति प्रयोगे न घटते, 'ञिणति' वृद्धिर्न प्राप्नोति । वृद्धौ असत्यां ह्रस्वः कथं क्रियते इति न दर्शितम् ॥ २४ ॥

## कगे-वनू-जनै-जॄष्-क्नसू-रञ्जः ॥४।२।२५॥

म० वृ०—एषां णौ परे 'ह्रस्वः स्यात्, ञिणम्परे णौ 'वा दीर्घः' । कगे सौत्रो धातुः, कगयति, अकागि, अकगि; कागंकागं, कगंकगम् [सिः, 'अव्ययस्य' इत्यनेन सेर्लुप्] । 'वनूयि याचने'-उपवनयति, अवानि, अवनि; वानंवानं, वनंवनम्; 'जनैचि प्रादुर्भावे'-जनयति, अजानि, अजनि; जानंजानं, जनंजनम्; 'जॄष् झॄष्च् जरसि'—जरयति,

अजारि, अजरि; जारंजारम्, जरंजरम्; एवं क्नसयति, "क्नसूच ह्वृतिदीप्त्योः" । रञ्जि,—रजयति मृगान् व्याधः, अराजि, अरजि; राजंराजम्, रजंरजम् । नलोपे वचनस्य चरितार्थत्वान्नलोपाभावे 'अरञ्जि, रञ्जंरञ्जम्' इत्यत्र दीर्घो वा न भवति ॥ २५ ॥

**अव०**—इह 'घटादेर्ह्रस्वो दीर्घः०' इति सूत्रे घटादयः पठितार्था एव = यथाश्रुतार्था एव ह्रस्वदीर्घकार्ये गृह्यन्ते, अर्थान्तरे तु घटादीनां न ह्रस्वविधिः । उपसर्गैः प्रायेणार्थान्तरं भवति, यथा-उद्घाटयति । स्मारयति, विस्मारयति, दारयति, विदारयति, प्रमादयति, नाटयति, लाडयति, चालयतीत्यादिषु घटादीनामर्थान्तरवृत्तित्वात् न ह्रस्वः । तथा 'कगेवनू०' इति सूत्रे तु कगादीनां धातूनामर्थविशेषविवक्षा कापि न कार्या, पृथग्योगात् । कगे इति सौत्रो धातुः, एकारश्चात्रैदित्कार्यार्थः, "न श्विजागृशसक्षणह्म्येदितः" (४।३।४९) इति सूत्रे एकारान्तधातूनां वृद्धिनिषेधः; यथा-अकगीत् । तथा 'वनू' इति ऊकारनिर्देशात् 'वनूयि याचने' इत्ययं ग्राह्यः, 'वन षन संभक्तौ' इत्यस्य न ह्रस्वदीर्घविधिः । "रजयति मृगान् व्याधः" इत्यादौ 'रञ्जीं रागे' (इति) भ्वादिर्दिवादिर्वा, णिग् सर्वत्र, 'णौ मृगरमणे' (४।२।६१) इति सूत्रेण उपान्त्यस्य नकारस्य लोपः; नलोपे कृते 'कगेवनू०' इति वचनं चरितार्थं जातम्, कोऽर्थः ? सूत्रं प्रवर्त्तितम्, उपान्त्याकारस्य ह्रस्वदीर्घकार्यसिद्धिः । [1]अत्र 'णौ मृगरमणे' (४।२।६१ । इत्यनेन) नलोपो न प्राप्नोति, मृगरमणार्थाभावात् ॥ २५ ॥

## अमोऽकम्यमि-चमः । ४।२।२६॥

**म० वृ०**—कम्यमिचमिवर्जितस्य अमन्तस्य धातोर्णौ 'ह्रस्वः'स्यात्, ञिणम्परे तु णौ 'वा दीर्घः' । रमयति, अरामि, अरमि; रामंरामम्, रमंरमम् । कथं संक्रामयति ? [1]संक्रामन्तं करोतीति शत्रन्ताण्णिजि भविष्यति । अकम्यमिचम इति किम् ? कामयते, अकामि, कामंकामम्; एवमामयति, [2]आमि; आचामयति ॥ २६ ॥

**अव०**—'रमयति, अरामि, रामंरामं, रमंरमम्' इत्यादिषु उत्तरसूत्रोदाहरणेष्वपि (च) धातुपरतः सर्वत्र णिग्, 'ञ्णिति' (४।३।५०। इति) वृद्धिः-आ, तदनन्तरमेकत्राद्यतनीत, 'भावकर्मणोः' (३।४।६८। इति) ञिच् तलोपश्च; अन्यत्र 'ख्णम् चाभीक्ष्ण्ये' (५।४।४८। इति) ख्णम्, तदनन्तरं तैः तैः सूत्रैः सर्वत्र ह्रस्वः, ञिणम्परे णौ विकल्पेन दीर्घः कार्यः, 'भृशाभीक्ष्ण्याविच्छेदे०' (७।४।७३) इति द्वित्वं सर्वत्र, ख्णमुदाहरणेषु प्रथमासिः, 'अव्ययस्य' (३।२।७) इत्यनेन सिलुप्यते । [1]संक्रामतीति शतृप्रत्ययः, णिज्बहुलम्० (३।४।४२) णिज्, 'त्रन्त्यस्वरादेः' इति (७।४।४३। इत्यनेन) अन्त्यस्वरादिलोपः । [2](एवम्) आममामम् । आचामयति, आचामि, आचाममाचामम् ॥ २६ ॥

## पर्यपात्स्खदः ॥४।२।२७॥

**म० वृ०**—पर्यपाभ्यामेव परस्य स्खदेर्णौ 'ह्रस्वः' ञिणम्परे णौ 'दीर्घश्च वा' स्यात् । परिस्खदयति, पर्यस्खादि, पर्यस्खदि; परिस्खादंपरिस्खादम्, परिस्खदंपरिस्खदम् । एवमपस्खदयतीत्यादि । स्खदेर्घटादिपाठेन सिद्धे नियमार्थं वचनम्, अन्योपसर्गपूर्वस्य मा भूत् - प्रस्खादयति ॥ २७ ॥

## शमोऽदर्शने ॥४।२।२८॥

**म० वृ०**—अदर्शनेऽर्थे वर्तमानस्य शमेर्णौ 'ह्रस्वः', ञिणम्परे णौ 'दीर्घश्च वा' स्यात् । शमयति रोगम्, निशमयति श्लोकान्; अशामि, अशमि; शामंशामम्, शमंशमम् । अदर्शन इति किम् ? निशामयति रूपम् ॥ २८ ॥

## यमोऽपरिवेषणे णिचि च ॥४।२।२९॥

**म० वृ०**—अपरिवेषणे वर्त्तमानस्य यमेर्णिचि अणिचि च णौ परे 'ह्रस्वो' ञिणम्परे णौ 'दीर्घश्च

वा' स्यात् । यमयति, अयामि, अयमि; यामंयामम्, यमंयमम्। अपरिवेषण इति किम् ? यामयत्यतिथीन्, यामयति चन्द्रम् । णाविति सिद्धेऽस्य[1] णिचि चेति वचनादन्येषां चुरादिधातूनां णिचि न ह्रस्वः, न दीर्घः । "स्यमिण् वितर्के" (इत्यस्य) स्यामयते,अस्यामि, स्यामंस्यामम्; "शमिण् आलोचने" (इत्यस्य) निशामयते, न्यशामि निशामंनिशामम् ॥ २९ ॥

अव०—'यमोऽपरिवेषणे णिचि च' इति सूत्रेऽयं धातुः 'यमूं उपरमे' इति भ्वादिः, 'यमण् परिवेषणे' इति चुरादिः (इति) धातुद्वयमप्यत्र ग्राह्यम्, अतः सूत्रार्थे यमेर्णिचि अणिचि चेति उक्तम् । परिवेषणं भोजनविषयम्; चन्द्रसूर्यादिवेष्टनं परिवेषो वा गृह्यते । चकारोऽणिचि चेत्यस्यानुकर्षणार्थः । [1] अस्य णिचि चे'ति कोऽर्थः ? सूत्रार्थे 'यमेर्णिचि अणिचि च' इत्युक्तम्, इति अस्य यमेरित्यर्थः ॥२९॥

## मारण-तोषण-निशाने ज्ञश्च ॥४।२।३०॥

म० वृ०-एष्वर्थेषु वर्त्तमानस्य जानातेः[= ज्ञाधातोः] णिचि अणिचि च णौ 'ह्रस्वः', ञिणम्परे णौ तु 'वा दीर्घः' । मारणे,—संज्ञपयति पशुम् । तोषणे,—ज्ञपयति गुरुम्, विज्ञपयति राजानम्। निशाने,-ज्ञपयति शरान्। अज्ञापि, अज्ञपि; ज्ञापंज्ञापम्, ज्ञपंज्ञपम् । इह पूर्वत्र च सूत्रे णिचि अणिचि च णौ [1]रूपसाम्येऽप्यर्थभेदः, एकत्र[2] स्वार्थोऽन्यत्र प्रयोक्तृव्यापारः[3] ॥ ३० ॥

अव०—चकारो णिचि चेत्यस्यानुकर्षणार्थः । निशानं तीक्ष्णीकरणमुच्यते । ज्ञाधातुः 'ज्ञांश् अवबोधने' इति क्र्यादिः, 'ज्ञाण मारणादिनियोजनेषु' इति चुरादिः, द्वयमप्यत्र ज्ञातव्यम् । यदि चुरादिस्तदा 'चुरादिभ्यो णिच् (३।४।१७) भवति, यदि च क्र्यादिः तदा 'अणिच्' इति विशेषः । णिचि अणिचि चेति व्यक्तं वृत्तौ । 'यमोऽपरिवेषणे णिचि च' (४।२।२९) इति सूत्रे णाविति सिद्धे, कोऽर्थः ? सर्वत्र णौ परे इत्यधिकारे आयाते सत्यपि इत्यर्थः । [1]ज्ञाण् मारणादिनियोजनेषु इत्यस्य । [2]'प्रथममेव मारणम्' इति धात्वर्थः स्वार्थ उच्यते । [3]'प्रथमं मरणम्, पश्चात् मारणम्' इति प्रयोक्तृव्यापारः ॥३०॥

## चहण् शाठ्ये ॥४।२।३१॥

म० वृ०—चहेः[= 'चहण् कल्कने' इति] चौरादिकस्य शाठ्येऽर्थे णिचि णौ परे 'ह्रस्वः', ञिणम्परे णौ "वा दीर्घश्च" स्यात्। चहयति, चाहिष्यते, चहिष्यते; अचाहि, अचहि; चाहंचाहम्, चहंचहम्। शाठ्य इति किम् ? अचहि, चहंचहम्। चहयतीत्यदन्तत्वात् सिद्धम्, 'दीर्घार्थं' वचनम् ॥ ३१ ॥

अव०—'चाहिष्यते, चहिष्यते'; 'स्वरग्रहदृशहन्भ्यः स्यसिजाशीःश्वस्तन्यां ञिट् वा' (३।४।६९) इत्यनेन ञिट् । 'चहण् कल्कने' इति अदन्तो धातुः । अदन्तत्वात् दीर्घोऽप्राप्तः, ह्रस्वः सिद्ध एवास्ति, परं दीर्घकारणे वचनं कृतम् ॥ ३१ ॥

## ज्वल-ह्वल-ह्मल-ग्ला-स्ना-वनू-वम-नमोऽनुपसर्गस्य वा ॥४।२।३२॥

म० वृ०—एषामनुपसर्गाणां णौ परे 'ह्रस्वो वा' स्यात् । ज्वलयति, ज्वालयति; ह्वलयति, ह्वालयति; ह्मलयति, ह्मालयति; ग्लपयति, ग्लापयति; स्नपयति, स्नापयति; वनयति, वानयति; [1]वमयति, वामयति; नमयति, नामयति । ग्लास्नोरप्राप्ते, शेषाणां तु प्राप्ते विभाषा ॥ ३२ ॥

अव०—एवमज्वालि, अज्वलि; ज्वालंज्वालम्, ज्वलंज्वलम् इत्यादि। सर्वत्र ज्वलादिप्रयोगेषु दीर्घविकल्पः सिद्ध एवास्ति, 'ज्वलह्वलेति सूत्रेण विकल्पेन ह्रस्वकरणात्; एकत्र ह्रस्वः कृतः, ह्रस्वविकल्पपक्षे दीर्घस्तिष्ठत्येव; इति हेतोर्ज्वलह्वलेतिसूत्रार्थे 'ञिणम्परे' इत्यनुवादो न कृतः । [1]"टुवमू उद्गिरणे" । अनुपसर्गस्येति किम् ? प्रज्वलयति, प्रह्वलयति, प्रह्मलयति; इह 'घटादेर्ह्रस्वः०' (४।२।२४) इत्यनेन ह्रस्वः; प्रग्लापयति, प्रस्नापयति; प्रवनयति; अत्र 'कगेवनू०' (४।२।२५) इति ह्रस्वः; प्रवमयति, प्रणमयति; 'अमोऽकम्यमि०' (४।२।२६)इति ह्रस्वः, इति अवचूरिः

'सूत्रार्थप्रान्ते', एवमज्ञालि, अज्वलि इत्यवचूरि: 'नमयति, नामयति' इत्युदाहरणाग्रे ज्ञातव्या ॥३२॥

## छदेरिस्-मन् त्रट्-क्वौ ॥४।२।३३॥

म० वृ०—[1]छदेः इस्-मन्-त्रट्-क्विप्परे णौ 'ह्रस्वः' स्यात्। [2]छदिः, छद्म, छत्रम्, क्विप्-उपच्छत्। त्रडिति किम् ? त्रे मा भूत्—छात्रः, उणादित्रप्रत्ययः ॥ ३३ ॥

अव०—[1]'छदण् संवरणे'। [2]'चुरादिभ्यो णिच्'(३।४।१७इति णिच्); छादयतीति 'रुच्यर्चि०' (उणादि० ६८६) इति उणादिसूत्रेण इस्। 'छद्म', अत्र 'मन्वन्क्वनिप्०' (५।१।१४७) इत्यनेन मन्। 'छात्रम्', 'त्रट्' (४४६ इति) उणादिसूत्रेण त्रट् ॥ ३३ ॥

## एकोपसर्गस्य च घे ॥४।२।३४॥

म० वृ०—एकोपसर्गपूर्वस्यानुपसर्गस्य च छदेर्घपरे णौ 'ह्रस्वः' स्यात्। [1]प्रच्छदः, छदः; एवं [2]सप्तच्छदः। एकोपसर्गस्येति किम् ? समुपच्छादः। घ इति किम् ? प्रच्छादनम्। ३४।।

अव०—[1]प्रच्छाद्यतेऽनेन = प्रच्छदः, एवं छदः; 'पुन्नाम्नि घः' (५।३।१३० इति घप्रत्ययः)। [2]तथा सप्त छदा अस्य। एवमुरश्छदः, उरसश्छदः = उरश्छदः; दन्तच्छदः, दन्तस्य छदः = दन्तच्छदः ॥ ३४ ॥

## उपान्त्यस्यासमानलोपिशास्वृदितो ङे ॥ ४।२।३५ ॥

म० वृ०—समानलोपि—शासूक्—ऋदनुबन्धवर्जितस्य धातोरुपान्त्यस्य ङपरे णौ 'ह्रस्वः' स्यात्। अपीपचत्, अचीकरत्, अलीलवत्। उपान्त्यस्येति किम् ? अचकाङ्क्षत्। असमानलोपिशास्वृदित इति किम् ? [1]अत्यरराजत्, [2]असस्वामत्, [3]अतताहत्, [4]अममातत्, अशशारत्; शासू—अशशासत्, ऋदित्—मा भवानोणिणत् [ओणन्तं प्रायुङ्क्त], मेजिजत्, अययाचत् [4]अलुलोकत्, अडुढौकत्। शासेरूकारग्रहणं यङ्लुपि निवृत्त्यर्थम्—अशाशसत्। [5]'अवीवदद्वीणां परिवादकेन मैत्रः' (इति) णिजात्याश्रयणात् सिद्धम् ॥ ३५ ॥

अव०—एवमदीदपत् दाधातोः। अलीलवत् इत्यादौ "कृताकृतप्रसङ्गि यल्लक्षणम् (तन्नित्यम्")" इति ज्ञायते नित्यत्वं द्विर्वचनस्य, नित्यमपि[क] द्विर्वचनं बाधित्वा प्रागेव ह्रस्वः। 'मा भवानटिटत्' इत्यादौ ह्रस्वत्वे कृतेऽकृतेऽपि द्वित्वं प्राप्नोतीति नित्यम्। ह्रस्वस्तु द्वित्वे कृते न प्राप्नोतीत्यनित्यः। न केवलं नित्यं द्विर्वचनं बाधित्वा प्रागेव ह्रस्वः, प्राक् स्वरे स्वरविधेरित्यपि बाधित्वा (इति) [5]अपेरर्थः। अत्र 'ओणधातोः ऋदित्करणं' ज्ञापकम्। ऋदित्करणं हि 'मा भवानोणिणद्' इत्यत्र ऋदित्त्वात् 'उपान्त्यह्रस्वत्वप्रतिषेधो' यथा स्यादित्येवमर्थं क्रियते। यदि चात्र 'ओणिणत्' इत्यत्र नित्यत्वात्प्रागेव द्वितीयावयवस्य द्वित्वं स्यात्तदाऽनुपान्त्यत्वादेव ह्रस्वत्वस्याप्राप्तिः, इति ह्रस्वनिवृत्त्यर्थेन किमृदित्करणेन ? एवं 'मा भवानटिटत्' इत्यादि सिद्धं भवति। '[1]अत्यरराजत्' इत्यादि, राजानमतिक्रान्तः=अतिराजः, अतिक्रान्तो राजानं वा, 'राजन्सखेः' (७।३।१०६) इति सूत्रेण अट् समासान्तः, 'नोऽपदस्य तद्धिते' (७।४।६१) इति नस्य लोपः, अतिराजमाख्यत् (इति) 'णिज्बहुलम्०' (३।४।४२ इति) णिच्, 'त्र्यन्त्यस्वरादेः' (७।४।४३) इत्यन्त्यस्वरलोपः, 'अन्यस्य' (४।१।८) इति द्वित्वम्। एवं [2]स्वामिनमाख्यत्, [3]तादृशमाख्यत्, [4]मातरमाख्यत् [इति] णिज्, शेषं प्राग्वत्। [4]लोकृ भ्वादिः चुरादिर्वा। [5]अवादीत्=वादमकार्षीत् वीणा, तां वीणां वदन्तीं परिवादको = वैणिकः प्रायुङ्क्त (इति) 'प्रयोक्तृ०' (३।४।२० इति) णिग्, तदनन्तरं वीणां वादितवन्तं परिवादकमन्यो मैत्रः प्रयोजितवान् (इति) पुनरपि णिग् ॥ ३५ ॥

## भ्राज-भास-भाष-दीप-पीड-जीव-मील-कण-रण-वण-भण-श्रण-ह्वे-हेठ-लुट-लुप-लपां नवा ॥ ४।२।३६ ॥

म० वृ०—एषामुपान्त्यस्य ङपरे णौ 'ह्रस्वो नवा' स्यात् । अबिभ्रजत्, अबभ्राजत्; अबीभसत्, अबभासत्; अबीभषत् अबभाषत्; अदीदिपत्, अदिदीपत्; अपीपिडत्, अपिपीडत्; अजीजिवत्, अजिजीवत्; अमीमिलत्, अमिमीलत्; अचीकणत्, अचकाणत्; अरीरणत्, अरराणत्; अबीबणत्, अबबाणत्; अबीभणत्, अबभाणत्; अशिश्रणत्, अशश्राणत्; अजूहवत्, अजूहावत्; अजीहिठत्, अजिहेठत्; अलुलुटत्, अलुलोटत्; अलुलुपत्, अलुलोपत्; अलीलपत् अलीलापत् । बहुवचनं शिष्टप्रयोगानुसरणार्थम्, तेन अविभ्रसत् अबभ्रासदित्यादि सिद्धम् । ३६ ॥

अव०— 'एजृङ् भ्रेजृङ् भ्राजि दीप्तौ' अथवा 'राजृग्टुभ्राजि दीप्तौ' इति भ्राज् । "भासि टुभ्रासि टुभ्लासृङ् दीप्तौ" (इति) भास् । 'भाषि च व्यक्तायां वाचि' (इति) भाष् । 'दीपैचि दीप्तौ' (इति) दीप् । 'पीडण गहने' (इति) पीड् । 'जीव प्राणधारणे' (इति) जीव । 'मील श्मील स्मील क्ष्मील निमेषणे' (इति) मील् । 'अण रण वणे'ति दण्डकधातौ कण, रण, बण, भण । तथा 'शण श्रण दाने' इत्यस्य दानार्थस्य श्रणधातोर्घटादित्वात् ह्रस्वत्वं सिद्धमेवास्ति, अत्र च पाकार्थेऽर्थान्तरे सति 'भ्राजभास०' इत्यनेन विकल्पेन ह्रस्वः । 'ह्वेंग् स्पर्द्धाशब्दयोः' (इति) ह्वे । 'एठि हेठि विबाधायाम्' (इति) हेठ् । 'लुटच् विलोटने' 'लुट् विलोटने' ( इति ) लुट् । लुप्लृंती छेदने' (इति) लुप् । 'रप लप जल्प व्यक्ते वचने' (इति) भ्वादौ लप् ॥ ३६ ॥

## ऋदवर्णस्य । ४।२।३७॥

म० वृ०—धातोरुपान्त्यस्य ऋवर्णस्य ङपरे णौ "ऋकारो वा' स्यात् । अवीवृतत्, अववर्तत्; अवीवृधत्, अववर्द्धत्; अदीदृशत्, अददर्शत्; अचीकृतत्, अचिकीर्त्तत् [कृतः कीर्त्तिः (४।४।१२२। इति सूत्रेण कृतः 'कीर्त्' इत्यादेशः] ॥ ३७ ॥

अव०—अमीमृजत्, अममार्जत्; अवीवृतत्, अववर्त्तत् इत्यादौ वचनसामर्थ्यात् अर्गुणः कीर्त्यादेशश्च बाध्यते । यदि ऋकारे कृतेऽपि अर्गुणः, 'कृतः कीर्त्तिः' (४।४।१२२) इत्यनेन 'कीर्त्' आदेशश्च स्यात्, तदा ऋदव०........................ (इति वचनं व्यर्थं स्यात् । ऋदवर्णस्य० इति वचनं विकल्पेनार्-) कीर्त्यादेशबाधनार्थम् ॥ ३७ ॥

## जिघ्रतेरिः । ४।२।३८॥

म० वृ०—घ्राधातोरुपान्त्यस्य ङपरे णौ 'इकारो वा' स्यात् । अजिघ्रिपत्, अजिघ्रपत् । तिवृनिर्देशाद् यङ्लुपि नेत्वम् = इकारो न भवति—अजाघ्रपत् ॥ ३८ ॥

## तिष्ठतेः ।४।२।३९॥

म० वृ०—स्थाधातोरुपान्त्यस्य ङपरे णौ 'इत्वं' स्यात् । अतिष्ठिपत् । तिवृनिर्देशो यङ्लुपि इत्वनिषेधार्थः—अतास्थपत् । योगविभागो नित्यार्थः ॥ ३९ ॥

## ऊद् दुषो णौ ।४।२।४०॥

म० वृ०—दुषेरुपान्त्यस्य णौ परे 'ऊत्' स्यात् । दूषयति । पुनर्णिग्रहणं ङनिवृत्त्यर्थम् ॥ ४० ॥

अव०—'दुष्यन्तं प्रयुङ्क्ते । णाविति किम् ? दोषो वर्त्तते ॥ ४० ॥

## चित्ते वा ।४।२।४१॥

म० वृ०—चित्तविषयस्य दुषेरुपान्त्यस्य णौ 'वा ऊत्' स्यात् । चित्तं दूषयति, चित्तं दोषयति; मनो दूषयति, मनो दोषयति; चित्तग्रहणेन प्रज्ञाया अपि ग्रहणात् प्रज्ञां दूषयति, प्रज्ञां दोषयति ॥४१॥

अव०– चित्तसहचारित्वात् प्रज्ञापि चित्तमुच्यते ॥ ४१ ॥

## गोहः स्वरे ॥४।२।४२॥

म० वृ०—कृतगुणस्य गुहेः स्वरादौ प्रत्यये परे उपान्त्यस्य 'ऊः' स्यात्। निगूहति, निगूहकः। गोह इति किम्? निजुगुहुः ॥ ४२ ॥

अव०—'गुहौग् संवरणे'। निगूहति ॥ ४२ ॥

## भुवो वः परोक्षा-ऽद्यतन्योः ॥४।२।४३॥

म० वृ०—भुवो वकारान्तस्य उपान्त्यस्य परोक्षाद्यतन्योः परत 'ऊः' स्यात्। [१]बभूव, बभूवुषः, अभूवन्, अभूवम्। वृद्धिगुणाऽऽवाद्यादेशेषु कृतेषु भुवो वकारान्तत्वं भवति, पश्चात् 'ऊः' उपान्त्यस्य कर्त्तव्यः। व इति किम्? बभूवान्, अभूत्; अत्र भस्य मा भूत् ॥ ४३ ॥

अव०–[१]'भूस्वपोरदुतौ' (४।१।७०। इत्यनेन द्वित्वे पूर्वस्य) अकारः। (एवं) बभूवतुः। 'अभूवम्' इत्यत्र अद्यतनी, अम्, सिच्, अट्, 'पिबैतिदाभूस्थः०' (४।३।६६) इत्यनेन सिच्लोपः, पश्चात् 'धातोरिवर्णोवर्णस्य०' (२।१।५०) इत्यनेन भुव ऊकारस्थाने 'उव्' आदेशः, उवादेशे कृते 'भुवो वः परोक्षाद्यतन्योः' इत्यनेन उकारस्थाने ऊः आदेशः, अभूवमिति सिद्धम्। इत्येवं साधनिका पुराणादर्शे दृष्टा, एतदनुसारेण ज्ञायते। 'बभूवुषः' इत्यादीनामुवादेशे कृते 'भुवो वः परोक्षाद्यतन्योः' इति सूत्रं प्रवर्त्तते। सूत्रार्थे तु "वृद्धिगुणावा(?द्या)देशेषु कृतेषु भुवो वकारान्तत्वं भवति" इत्युक्तम्, उवादेशवार्त्ताऽपि न कृता; इति बहु विमृश्यं तत्त्वं ................ (कथितं भव) ति ॥ ४३ ॥

## गम-हन-जन-खन-घसः स्वरेऽनङि क्ङिति लुक् ॥४।२।४४॥

म० वृ०—एषामुपान्त्यस्य अङ्वर्जिते स्वरादौ क्ङिति प्रत्यये परे 'लुक्' स्यात्। किति—गम्,—जग्मुः, हन्,—जघ्नुः, जन्,—जज्ञे, खन्,—चख्नुः, घस्- जक्षतुः, जक्षुः; ङिति—घ्नन्ति ['हनो ह्नो घ्नः' (२।१।११२) इति घ्नः]। स्वर इति किम्? गम्यते। अनङीति किम्? अगमत् ['लृदिद्द्युतादि०' (३।४।६४) इत्यङ्] ॥ ४४ ॥

अव०—क्ङिति, कीदृशे? स्वरादौ, पुनः कीदृशे? अङ्वर्जिते। 'जक्षतुः, जक्षुः'; अत्र 'घस्लृ अदने' (इति) घस्, घसो द्वित्वम्' 'द्वितीयतुर्ययोः पूर्वौ' (४।१।४२) इति पूर्वस्य घस्य गः, 'गहोर्जः' (४।१।४०) इत्यनेन गस्य जः, 'गमहन०' इत्यनेन उपान्त्याकारलोपः, 'अघोषे प्रथमोऽशिटः' (१।३।५०) इति घस्य कः, 'घस्वसः' (२।३।३६) इति सूत्रेण सस्य षः; अथवा 'अदं प्सांक् भक्षणे' (इति) अद्, परोक्षा, परोक्षायां नवा' (४।४।१८) इति सूत्रेण अदः स्थाने 'घस्' आदेशः, शेषं प्राग्वत्; परं 'नाम्यन्तस्थाकवर्ग०' (२।३।१५) इत्यनेन सस्य षत्वम्। 'गमहनजने'ति सूत्रे 'जनैचि प्रादुर्भावे' (इति) अयमेव दैवादिको जन् गृह्यते, जनेरात्मनेपदित्वात्, अत एव 'जज्ञे' इति प्रयोगः। कथं 'जज्ञतुः, जज्ञुः'? सत्यम्, छान्दसावेतौ प्रयोगौ। जुहोत्यादौ हि केचित् 'जनं जनने' इति परस्मैपदिनं छान्दसं पठन्ति, तन्मते—'जज्ञतुः, जज्ञुः' इति प्रयोगद्वयम्, न स्वमते ॥ ४४ ॥

## नो व्यञ्जनस्याऽनुदितः ॥४।२।४५॥

म० वृ०—व्यञ्जनान्तस्य धातोरनुदितः [= उकारानुबन्धवर्जितस्य] उपान्त्यनकारस्य क्ङिति प्रत्यये 'लुक्' स्यात्। स्रस्तः, स्रस्यते; ध्वस्तः, परिध्वजते, सनीस्रस्यते [वञ्चस्रंस० (४।१।५०) इत्यनेन नीरन्तः]। अनुदित इति किम्? ('टुनदु समृद्धौ' इत्यस्य) नन्द्यते, नानन्द्यते। क्ङितीत्येव—स्रंसिता ॥ ४५ ॥

## अञ्चोऽनर्चायाम् ॥४।२।४६॥

म० वृ०—अञ्चेरनर्चायामेव वर्त्तमानस्योपान्त्यस्य नकारस्य 'लुक्' स्यात्। उदक्तमुदकं कूपात्,

[उदञ्चति स्म (इति) 'गत्यर्था०' (५।१।११) इति क्तः]। अनर्चायामिति किम्? ¹अञ्चिता गुरवः॥४६॥

अव०—'नो व्यञ्जन०' (४।२।४५) इति पूर्वेण सिद्धे 'अञ्चोऽनर्चायाम्' इति सूत्रं नियमार्थं कृतम्, अनर्चायामेवेति ¹अञ्च्यते स्म(इति)'लुभ्यञ्चेर्विमोहार्चे' (४।४।४४। इत्यनेन) इट् ॥ ४६ ॥

## लङ्गि-कम्प्योरुपतापा-ऽङ्गविकृत्योः ॥४।२।४६॥

म० वृ०—लङ्गिकम्प्योरुपान्त्यनस्य यथासङ्ख्यमुपतापे अङ्गविकारे चार्थे क्ङिति प्रत्यये 'लुक्' स्यात्। विलगितः, विकपितः। उपतापाङ्गविकृत्योरिति किम्? विलङ्गितः, विकम्पितः ॥४७॥

अव०— लङ्गिकम्प्योरुदित्त्वात्पूर्वेणाप्राप्ते 'लङ्गिकम्प्योरुपतापाङ्गविकृत्योः' इति वचनं कृतम्। उख नखेति दण्डकधातौ लगुधातुः। कपुङ् चलने। 'विलगितः', कोऽर्थः? रोगादिना उपतापितः। 'विलङ्गितः', कोऽर्थः? केनचिदङ्गेन हीनः। 'विकम्पितः', कोऽर्थः? मनसि कम्पितः, चित्ते भीत इत्यर्थः, इति नाङ्गविकृतिः ॥ ४७ ॥

## भञ्जेर्ञौ वा ॥४।२।४८॥

म० वृ०—भञ्जेरुपान्त्यस्य नस्य [नकारस्य] ञौ परे 'लुग्वा' स्यात्। अभाजि, अभञ्जि ॥४८॥

## दंशसञ्जः शवि ॥४।२।४६॥

म० वृ०—अनयोरुपान्त्यस्य नस्य शवि परे 'लुक्' स्यात्। दशति, सजति ॥ ४६ ॥

## अकट्-घिनोश्च रञ्जेः ॥४।२।५०॥

म० वृ०—रञ्जेरकटि¹ घिनणि² शवि च प्रत्यये परे उपान्त्यस्य नस्य 'लुक्' स्यात्। ³रजकः, ⁴रागी, रजति। तथा ⁵रजः, ⁶रजनिः, ⁷रजनम्, ⁸रजतमित्यौणादिकाः ॥ ५० ॥

अव०—¹प्रत्यये परे। ²प्रत्यये परे। ³रजतीति रजकः, 'नृतखन्रञ्जः शिल्पिन्यकट्' (५।१।६५) इति सूत्रेण 'अकट्'। ⁴रजतीत्येवं शीलो= रागी, 'युजभुजभजत्यजरञ्जद्विषदुषद्रुहदुहाभ्याहनः' (५।२।५०) इति सूत्रेण घिनण्। ⁵'रञ्जीं रागे' रजति वस्त्रादिकमिति रजः, 'मिथिरञ्जिउषिनृतृशृभूवघ्रिभ्यः कित्' (६७१) इत्युणादिसूत्रेण 'अस्, स च कित्'। ⁶'रजनिः' इत्यत्र 'रञ्जेः कित्'(६८१) इत्युणादिसूत्रेण 'अनिः, स च कित्'। ⁷'रजनम्' इत्यत्र 'तुदादिवृजिरञ्जिनिधाभ्यः कित्' (२७३) इत्युणादिसूत्रेण 'अनः, स च कित्'। ⁸'रजतम्', अत्र च 'पृषिरञ्जिसिकिकालाभ्रूभ्यः कित्' (२०८) इत्युणादिसूत्रेण 'अतः, स च कित्'। सर्वत्र 'नो व्यञ्जनस्यानुदितः' (४।२।४५) इति नलोपः ॥ ५० ॥

## णौ मृगरमणे ॥४।२।५१॥

म० वृ०—रञ्जेरुपान्त्यनस्य णौ परे मृगाणां रमणे, कोऽर्थः? क्रीडाऽर्थे 'लुक्' स्यात्। रजयति मृगान् व्याधः। मृगरमणे इति किम्? रञ्जयति सभां नटः¹ ॥ ५१ ॥

अव०—(एवं) ¹रञ्जयति रजको वस्त्रम् ॥ ५१ ॥

## घञि भावकरणे ॥४।२।५२॥

म० वृ०—रञ्जेर्नस्य भावकरणार्थे घञि परे 'लुक्' स्यात्। रागः। घञीति किम्? रञ्जनम्। भावकरणे इति किम्? रङ्गः ॥ ५२ ॥

अव०—रञ्जनं = रागः, रजत्यनेन वा इति रागः। रजत्यस्मिन्निति रङ्गः, 'भावाऽकर्त्रोः' (५।३।८१। इति) घञ् ॥ ५२ ॥

## स्यदो जवे ॥४।२।५३॥

म० वृ०—'स्यदः' इति स्यन्देर्घञि 'नलोपो वृद्ध्यभावश्च' निपात्यते, जवे = वेगार्थे। गोस्यदः,

अश्वस्यदः। जव इति किम् ? घृतस्यन्दः, तिलस्यन्दः ॥ ५३ ॥

**दशना-ऽवोदैधौद्म-प्रश्रथ-हिमश्रथम् ॥४।२।५४॥**

म० वृ०=[1]एते शब्दाः कृतनलोपादयो निपात्यन्ते'। [1]दशनम्, [2]अवोदः, [3]एधः, [4]ओद्मः, [5]प्रश्रथः, [6]हिमश्रथः ॥ ५४ ॥

अव०—[1]दश्यतेऽनेनेति दशनम्, 'करणाधारे' (५।३।१२६) इत्यनेन अनट्। प्रायेण अनट्प्रत्ययान्तः क्लीबः स्त्रीलिङ्गो वा। यदि च दन्तपर्यायः दशनशब्दः तदा पुल्लिङ्गत्वम्। तथावेदमत्वचिन्त्यम्(?)। [2]अवपूर्वः 'उन्दैप् क्लेदने' (इति) उन्द्, अवोदनम्, 'भावा०' (५।३।१८। इति। घञ्, गुणः, अत्र गुणे कृते 'उपसर्गस्यानिणे०' (१।२।१६) इति अकारलोपः। [3]'ञिइन्धैपि दीप्तौ' (इति) इन्ध्, घञ्,। [4]'ओद्मः', अत्र उन्देः परो मन्। [5]प्रपूर्वः श्रन्थ, [6]हिमपूर्वः श्रन्थ्, 'घञ्'। निपातनात् सर्वत्र न लोपः दीर्घाभावश्च ॥ ५४ ॥

**यमि-रमि-नमि-गमि-हनि-मनि वनति-तनादेर्धुटि क्ङिति ॥४।२।५५॥**

म० वृ०—एषां धुडादौ क्ङिति प्रत्यये परे 'अन्तस्य लुक्' स्यात्। यतः, ( यत्वा ) यतिः; रतः, रत्वा, रतिः; नतः, नत्वा; गतः, गत्वा, गतिः; हतः, हत्वा, आहत; मतः, मत्वा, मति; वतिः, तनादि.- ततः, ततिः इत्यादि। [1]तिवगणनिर्देशाद्यङ्लुपि [2]नाऽन्तलोपः-वंवान्तः, तंतान्तः। अन्येषां यमादीनां यङ्लुप्यप्यन्तलोपः—यंयतः, रंरतः, नंनतः, जङ्गतः, जङ्घतः, मंमतः। धुटीति किम् ? यम्यते, यंयम्यते ॥ ५५ ॥

अव०—(एवं) यतवान्, रतवान्, नतवान्, नतिः; गतवान् हतवान्, हतिः; आहथः, मतवान्। 'हतिः' इत्यत्र हननं=हतिः,'श्रवादिभ्यः' (५।३।९२) इति सूत्रेण क्तिः। 'सातिहेतियूतिजूतिज्ञप्तिकीर्त्तिः' (५।३ ९४)इति बाधनार्थम्'श्रवादिभ्यः क्तिः क्रियते। हनपरतः 'सातिहेति०'इति यदि क्तिः, तदा 'हेतिः' इति प्रयोगो भवति, 'न हतिः'। आहत, आहथः'; हन् आङ्पूर्वः, अद्यतनी, त, थास्, सिच्, 'हनः सिच्' (४।३।३८) इत्यनेन सिच् कित्, 'यमि०' इति (प्रकृतसूत्रेण) हनो नस्य लुक्, 'धुड्ह्रस्वाल्लुगनिटस्तथोः' ( ४।३।७० ) इत्यनेन सिचो लुक्। 'मतः' इत्यत्र मन्यते इति मतः, 'ज्ञानेच्छार्चार्थ०' इति क्तः, मन् धातुः दैवादिकोऽत्र, न तनादिसत्कः, मनोऽस्तिनादिषु गृहीतः। यम्यते स्म = यतः, यच्छति स्म = यतवान्। एवं रतः, रतवान् इत्यादिषु वाक्यानि कार्याणि। "वतिः", अत्र 'वन षन भक्तौ' (इति) वन्, क्तिः, न तिक्, तिकि तु 'न तिकि दीर्घश्च' (४।२।५६) इति निषेधो वक्ष्यते। वनधातोः क्तिप्रत्ययस्यैव प्रयोगो दर्शितः, क्तौ न इट्, क्तक्तवत्वोः इट्प्राप्तिः। तनादिः 'तनूयी विस्तारे' इत्यादिः सर्वोऽपि ग्राह्यः, 'षणूयी दाने' इति वर्जयित्वा। तनादीनामिमे प्रयोगाः, ततः, ततवान्, तत्वा, ततिः; क्षणूग्,– क्षतः, क्षतवान्, क्षत्वा, क्षतिः; ऋणूयी.- ऋतः, ऋतवान्, 'तृणूयी,—तृतः, तृतवान्, घृणूयी,- घृतः, घृतवान् 'वनूयि – वतः, वतवान्; मनूयि,- मतः, मतवान्। एषामिति किम् ? शान्तः, दान्तः। [1]वनतिरित्यत्र। [2]वनतितनादीनाम् ॥ ५५ ॥

**यपि ॥४।२।५६॥**

म० वृ०—एषां धातूनां यपि (परे) 'अन्तस्य लुक्' स्यात्। 'वा मः' (४।२।५७) इति वक्ष्यमाणवचनान्नान्तानामेव धातूनामयं विधिः[1]। [2]प्रहत्य, मन्,—प्रमत्य, वन्,—प्रवत्य, तन्,—प्रतत्य, प्रसत्य[3]। यपीति किम् ? हन्यते ॥ ५६ ॥

अव०—[1]नकारान्तधातूनामेव 'यपि' इति सूत्रं प्रवर्त्तते इत्यर्थः। [2]हन्। [3]प्रक्षत्येत्यादि ॥ ५६ ॥

**वा मः ॥४।२।५७॥**

म० वृ०—एषां मान्तानां[= मकारान्तानाम्] 'अन्तस्य लुग् वा' स्यात्, यपि। प्रयत्य, प्रयम्य;

विरत्य, विरम्य; प्रणत्य, प्रणम्य; आगत्य, आगम्य ॥ ५७ ॥

## गमां क्वौ ॥४।२।५८॥

म० वृ० - एषां गमादीनामन्तस्य 'यथादर्शनं कौ क्ङिति लुक्' स्यात्। गम्, —जनंगन्, संयम्,— संयत्, वियत्; मन्,—सुमत्, सुवत्, परीतत्, सन्, —सत् ॥ ५८ ॥

अव०—"गमाम्" इत्यत्र बहुवचनं प्रयोगानुसरणार्थम्, तेन गमयमनवनतनादीनामेव पञ्चानां धातूनामन्तस्य लुग् भवति। अत एव सूत्रार्थे यथादर्शनमित्युक्तम्। 'यथादर्शनम्', कोऽर्थः ? बहुलम्। गमयममनवनतनादीनामेवोदाहरणानि वृत्तौ दर्शितानि सन्ति। एतेन 'गमाम्' इत्युक्ते 'यमिरमिनमिगमि०' (४।२।५५) इति सूत्रोक्तगमादिपाठो नानुसरणीयः। जनं गच्छतीति जनंगत्, क्विप्। संयमनं = संयत्, 'क्रुत्संपदादिभ्यः क्विप्' (५।३।११४)। एवं वियत्। परितनोतीति परीतत्, क्विप्। 'गतिकारकस्य नहि०' (३।२।८५) इत्यादिना 'परि' इत्यस्य दीर्घः। सर्वत्र नलोपो भवति सर्वत्रापि वा ततिश्च (?)। कथम् 'अग्रेगूः' ? औणादिकः, यथा—अग्रे गच्छतीति अग्रेगूः, इत्यौणादिको डूः। गमां क्वौ इति प्रान्ते (?) ॥ ५८ ॥

## न तिकि दीर्घश्च ॥४।२।५९।

म० वृ०—एषां तिकि प्रत्यये 'लुग् दीर्घश्च न' भवति। यन्तिः, रन्तिः, नन्तिः, गन्तिः, हन्तिः, मन्तिः, वन्तिः, तन्तिः। एषामित्येव—शम्यादित्याशास्यमानः शान्तिर्जिनः ॥ ५९ ॥

अव०—'एषाम्', यमिरमिनमिगमिहनि(मनि, वनति)तनादीनां सर्वेषाम्। 'यमू उपरमे' (इति) यम्, यम्यादित्याशास्यमानो यन्तिः एवं रंसीष्ट इत्याशास्यमानो रन्तिः, नम्यादित्याशास्यमानो नन्तिः, गम्यादित्याशास्यमानो गन्तिः, हन्यादित्याशास्यमानो हन्तिः, मंसीष्टेत्याशास्यमानो मन्तिः, वन्यादित्याशास्यमानो वन्तिः, तन्यादित्याशास्यमानस्तन्तिः। सर्वत्र 'तिक्कृतौ नाम्नि' (५।१।७१) इति सूत्रेण तिक्। 'न तिकि ·········(दीर्घश्च)' इत्यनेनान्तलोपः प्रतिषिध ··········(यते, एवम्) 'अहन्पञ्चमस्य' (४।१।१०७) इत्यादिना प्राप्तोऽपि ······ (दीर्घविधिः) प्रतिषिध्यते ॥ ५९ ॥

## आः खनि-सनि-जनः ॥४।२।६०॥

म० वृ०—एषां धुडादौ क्ङिति 'अन्तस्याकारादेशः' स्यात्। [खायते खन्यते स्म वा = ] खातः, खातवान्; [खननं = ] खातिः; सातः सातिः, जातः, जातवान्, जातिः ॥ ६० ॥

अव०—'षणूयी दाने' 'वन षन भक्तौ' द्वयोरपि ग्रहणम्। सन्,—सायते स्म सन्यते स्म वा इति सातः, सातवान्। 'सात्वा' इत्ययं प्रयोगः 'षणूयी दाने' इत्यस्यैव, 'ऊदितो वा' (४।४।४२) इति विकल्पेन इट्करणात्। वन षन भक्तौ इति सन्परत इट्। कृतत्वे च (?) ··········(क्ङितीत्येव-चंखन्ति) संसन्ति, जंजन्ति ॥ ६० ॥

## सनि ॥४।२।६१॥

म० वृ०—खनादीनां धुडादौ सनि परतो—'ऽन्तस्यात्वम् = [आकारदेशः]' स्यात्। सिषासति। खनिजनोरिटा भाव्यमिति धुडादिः सन् न स्यात्[1]। धुटीत्येव—सिसनिषति ॥ ६१ ॥

अव०—[1]इति हेतोः खनिजनोः प्रयोगौ अदर्शितौ ॥ ६१ ॥

## ये नवा ॥४।२।६२॥

म० वृ०—खनादीनां ये क्ङिति 'अन्तस्यात्वम्[ = आकारादेशः] वा' स्यात्। खायते, खन्यते; चाखायते, चङ्खन्यते; सायते, सन्यते; सासायते, संसन्यते; जायते, जन्यते; प्रजाय, प्रजन्य; जाजायते, जंजन्यते। 'श्यप्रत्यये तु 'जा ज्ञाजनोऽत्यादौ'

(४।२।१०४) इति नित्यं जादेशः— जायते। य' इत्यकारान्तनिर्देशादिह नात्वम् [ = न आकारः]-सन्यात्, खन्यात्। अन्यथा 'यि' इति क्रियेत ॥ ६२ ॥

अव०—'संसन्यते' इत्यस्यान्ते 'प्रसाय, प्रसत्य' इति उभयोरपि भ्वादितनादिसनोः समानम् (रूपं ज्ञेयम्)। "दिवादेः श्यः' (३।४।७२। इति श्यप्रत्ययसम्बन्धिनि यकारे परत इत्यर्थः ॥ ६२ ॥

## तनः क्ये ॥४।२।६३॥

म० वृ०—तनोऽन्तस्य क्ये परे 'आत्वं वा' स्यात्। तायते, तन्यते ॥ ६३ ॥

## तौ सनस्तिकि ॥४।२।६४॥

म० वृ०—सनः [ सन्धातोः ] तिकि प्रत्यये 'तौ = लुगाऽऽकारौ वा' भवतः। सतिः, सातिः, सन्तिः ॥ ६४ ॥

अव०—'तौ सनस्तिकि' इति सूत्रे 'षणूयी दाने, वन षन भक्तौ' इति द्वावपि धातू ग्राह्यौ। 'षणू' इत्यस्य वृत्तौ उदाहरणानि। 'वन षन' इत्यस्य इमे प्रयोगाः—सतिः, सातिः, सान्तिः.........( सान्तिरि ) त्यत्र 'अहन्पञ्चमस्य' (४ १।१०७) इति दीर्घः ॥ ६४ ॥

## वन्याङ् पञ्चमस्य ।४।२।६५॥

म० वृ०—धातोः पञ्चमस्य वनि प्रत्यये परे 'आ आङ्' स्यात्। विजावा, अग्रेगावा, घूरावा, घ्वावा, अवावा, यावा। पुनराग्रहणम्[=आकारग्रहणं] ताविति नवेति च निवृत्त्यर्थम् ॥ ६५ ॥

अव० 'वन्याङ् पञ्चमस्ये'-ति सूत्रे 'आङ्' इत्यत्र 'आश्चासौ आङ् च = आ आङ्' इत्येवमाकारान्तरप्रश्लेषात् अननुनासिकोऽनुनासिकश्चायम् आ आङ् आदेशः। ङित्करणात् घ्वावा इत्यादौ गुणनिषेधः। अन्यथा आ इति 'अननुनासिक' एव स्यात्। एवं घ्वावा अवावा घूरावा इत्यत्र गुणः स्यात्। विजायते ( इति ) विजावा। अग्रे गच्छति ( इति ) अग्रेगावा। 'घुण घूर्णन् भ्रमणे' ( इति ) घुण, घूर्ण, घुणतीति घ्वावा, घूर्णतीति घूरावा। 'ओणृ अपनयने' ओणतीति अवावा। 'इवु व्याप्तौ' (इति) इव्, इवतीति यावा, 'मन्वन्क्वनिप्विच क्वचित्' (५।१।१४७) इति वन्। 'वन्याङ् पञ्चमस्य' इति आकारः आङ् च, सर्वत्र सिः, 'नि दीर्घः' ( १।४।८५। इत्यनेन दीर्घः )। 'यावा' इत्यत्र 'य्वोः प्य्व्यञ्जने०' (४।४।१२१) इत्यनेन वलोपः, ततो नकारस्य आत्वम्, यावा इति सिद्धम् ॥ ६५ ॥

## अपाच्चायश्चिः क्तौ ॥४।२।६६॥

म० वृ०—अपपूर्वस्य चायतेः क्तिप्रत्यये 'चिरित्यादेशः' स्यात्। अपचितिः ॥ ६६ ॥

## ह्लादो ह्रद् क्तयोश्च ॥४।२।६७॥

म० वृ०—ह्लादतेः क्तक्तवत्वोः क्तौ च ह्रद्' आदेशः स्यात्। ह्रन्नः, ह्रन्नवान्, ह्रत्तिः ॥ ६७ ॥

अव०—'रदादमूर्च्छमदः क्तयोर्दस्य च' (४।२।६९) इत्यनेन दकारतकारयोर्नकारः ॥ ६७ ॥

## ॠल्वादेरेषां तो नोऽप्रः ॥४।२।६८॥

म० वृ०—प्धातुवर्जात् ॠकारान्ताद्धातोर्ल्वादिभ्यश्च परेषामेषां क्तिक्तक्तवतूनां 'तकारस्य नकारादेशः' स्यात्। [तरणं = ]तीर्णिः, [तीर्यते स्म = ] तीर्णः, तीर्णवान्; ल्वादि-[लवनं = ] लूनिः, [क्तिः] लूनः, लूनवान्; धूनिः, धूनः, धूनवान्। अप्र इति किम्? पूर्त्तिः, पूर्त्तः, पूर्त्तवान् ॥ ६८ ।

अव०—इदम्, षष्ठी (बहुवचनस्य) आम्, 'आद्वेरः' (२।१।४१) इत्यनेन मकारस्य अकारः, 'अवर्णस्यामः साम्' ( १।४।१५ ) इत्यनेन साम्, 'अद् व्यञ्जने' (२।१।३५) अनेनाकारः, 'एद् बहुस्भोसि' (१।४।४) एकारः, 'नाम्यन्तस्था०' (२।३।१५) इत्यनेन षत्वम्।

क्र्यादिधातुमध्येऽन्तर्गणो 'लू आच्छेदने' [? लूग्श् छेदने] इत्यादिधातवः २१ ल्वादिगणः । ल्वादिमध्ये ये ॠकारान्ताः स्तॄदॄवॄप्रभृतयो धातवः तेषामॄकारान्तग्रहणेनैव तकारादेशे सिद्धेऽपि, तत्र पाठः प्वादिगणकार्यार्थः ॥ ६८ ॥

## रदादमूर्च्छ-मदः क्तयोर्दस्य च ॥४।२।६९॥

म० वृ०—मूर्च्छिमदिवर्जितात् रेफदकारान्ताद्धातोः परयोः क्तक्तवत्वोः—'स्तकारस्य तत्संयोगे धातुदकारस्य च नकारादेशः' स्यात् ।['पूरैचि आप्यायने'] पूर्णः, पूर्णवान्; भिन्नः, भिन्नवान्; छिन्नः, छिन्नवान् । अमूर्च्छमद इति किम् ? मूर्त्तः, मूर्त्तवान्; मत्तः, मत्तवान् । क्तयोरिति किम् ? चूर्त्तिः, भित्ति । कथं चूर्णिः ? औणादिको णिः । कथं ×चीर्णिः ? औणादिको णिः । एवं कथम् आचीर्णः आचीर्णवान् ? (चॄ इति धात्वन्तरं चरति समानार्थं क्तक्तवतुविषयमामनन्ति ) ॥ ६९ ॥

---

अव०—'मूर्त्तः', 'मूर्छा मोहसमुच्छ्राययोः' मूर्च्छ्यते स्म (इति)'क्तक्तवतू'(५।१।१७४ । इति क्तः,) 'राल्लुक्' (४।१।११०) इत्यनेन छलोपः, 'भ्वादेर्नामिनो०' (२।१।६३) इति दीर्घः । 'चूर्णिः', अत्र 'चूरैचि दाहे' (इति) चूर, चूरतीति चूर्णिः, 'कावावीक्रीश्रिश्रुजुज्वरितूरिचूरिपूरिभ्यो णिः' (उणा० ६३४) इति णिः । रदात्तस्येति किम्? वरितम्, वरणम् (इति) वाक्यम्, मोदनं = मुदितम् । "क्लीबे क्तः" (५।३।१२३। इति क्तः ) । अत्र इटा व्यवधानं तकारस्येति न नत्वम् ॥ ६९ ॥

## सूयत्याद्योदितः ॥४।२।७०॥

म० वृ०—सूयत्यादिभ्यो नवभ्यो धातुभ्य ओकारान्तेभ्यश्च 'क्तयोः' 'तकारस्य नकारादेशः' स्यात् । सूनः, सूनवान्; दूनः, दीनः, धीनः, ओदित्-लग्नः, लग्नवान्, पीनः, शूनः, वृक्णः, उद्विग्नः, 'ओविजैति भयचलनयोः' । एभ्य इति किम् ? पीतः ॥ ७० ॥

---

अव०- 'सूयति' ( इति ) दिवादिनिर्देशात् सूतिसुवत्योर्नत्वं न भवति । ओत् = ओकार इत्= अनुबन्धो येषां ते=ओदितः । दिवादिधातुमध्ये 'षूङौच् प्राणिप्रसवे' इत्यादयो 'व्रींङ्च् वरणे' इति पर्यन्ता वृत् स्वादिः इति संज्ञाप्रसिद्धाः, तेषामिमे प्रयोगाः—सूनः, सूनवान्; 'दूङ्च् परितापे' दूनः, दूनवान्; 'धींङ्च् अनादरे' धीनः, धीनवान्; 'दींङ्च् क्षये' दीनः, दीनवान्; 'मींङ्च् हिंसायाम्' मीनः, मीनवान्; 'रींङ्च् श्रवणे' रीणः रीणवान्; 'लींङ्च् श्लेषणे' लीनः, लीनवान्; 'डीङ्च् गतौ' डीनः, डीनवान्; उड्डीनः; 'व्रींङ्च् वरणे' व्रीणः, व्रीणवान्, । लग्नः, लग्नवान् इत्यत्र 'ओलजैङ् ओलस्जैति व्रीडे' । लज् लस्ज् वा लज्यते स्म ( इति ) 'क्तक्तवतू', 'संयोगस्यादौ स्कोर्लुक्' ( २।१।८८ ) इत्यनेन 'लस्ज' इत्यत्र सकारलोपः, 'चजः कगम्' (२।१।८६ । इति) जस्य गः । ततः 'सूयत्या०' (इत्यनेन) तस्य नकारः । 'पीनः', 'स्फायैङ् ओप्यायैङ् वृद्धौ' इति प्याय्, 'गत्यर्थ०' ( ५।१।११ ) इति क्तः, 'क्तयोरनुपसर्गस्य' (४।१।९२) इति 'पीः' आदेशः, ततो नत्वम् । 'शूनः', अत्र 'टुओश्वि गतिवृद्ध्योः' (इति) श्वि, 'यजादिवचेः०' ( ४।१।७९ । इति ) य्वृत्, 'दीर्घमवोऽन्त्यम्' (४।१।१०३ । इति) ऊः, ततो नत्वम् । 'वृक्णः', 'ओव्रश्चौत् छेदने'(इति व्रश्च,क्तः,संयोग०' (२।१।८८। इति) सलोपः, 'चजः कगम्' २।१।८६। इति) कः, ततो नत्वम्, 'रषृवर्णा०' ( २।३।६३ ) इति नस्य णत्वम् ॥ ७० ॥

## व्यञ्जनान्तस्थातोऽख्या-ध्यः ॥४।२।७१॥

म० वृ०—ख्याध्यावर्जितस्य धातोर्यद् व्यञ्जनम्, तस्मात् परा या अन्तस्था, तस्याः परो य आकारः, तस्मात्परस्य क्तयोस्तस्य नः [तकारस्य नकारः] स्यात् । ['ष्टयैं स्त्यैं संघाते'] स्त्यानः, स्त्यानवान्; निद्राणः,

---

× ॠतॄवॄकॄवृषिभ्यः कित् (उणा० ६३५) इत्यनेन चॄधातोः कित् णिः ।

निद्राणवान्; ग्लानः, ग्लानवान् । अयञ्जनेति किम् ? यातः । अन्तस्थेति किम् ? स्नातः । आत इति किम् ? च्युतः, (च्युतवान्;) द्रुतः, द्रुतवान्; प्लुतः प्लुतवान् । अध्याध्य इति किम् ? ख्यातः, ध्यातः । आतः परस्येति किम् ? दरिद्रितः, दरिद्रितवान्; अत्र इटा व्यवधानम् ॥ ७१ ॥

## पू-दिव्यञ्चेर्नाशा-ऽद्यूता-ऽनपादाने ॥४।२।७२॥

म० वृ० – पूदिवञ्चेभ्यो यथासङ्ख्यं नाशे, अद्यूते अनपादाने चार्थे क्तयोस्तस्य[1] नः स्यात् । पूना यवाः, विनष्टा इत्यर्थः । आद्यूनः । [2]समक्नौ पक्षौ । नाशाद्यूतादीति किम् ? पूतं धान्यम्, द्यूतं वर्तते, उदक्तमुदकं कूपात् । कथं व्यक्तम् ? अञ्जेर्भविष्यति ॥ ७२ ॥

अव०—'अनपादाने', कोऽर्थः ? अञ्चिवाच्या क्रिया यदि अपादानकारकसाधिका न भवतीत्यर्थः । व्यावृत्त्युदाहरणे 'कूपात्' इति अपादानविषया अञ्चिरस्ति । [1]तकारस्य । [2]शकुनेः पक्षिणः पक्षौ सङ्गतौ इत्यर्थः ॥ ७२ ॥

## सेर्ग्रासे कर्मकर्त्तरि ॥४।२।७३॥

म० वृ०—सिधातोः परस्य क्तयोस्तस्य[=तकारस्य] ग्रासे कर्मणि कर्तृत्वेन विवक्षिते सति नः (नकारः) स्यात् । सिनो ग्रासः स्वयमेव । ग्रास इति किम् ? सितं कर्म स्वयमेव । कर्मकर्त्तरीति किम् ? सितो ग्रासो मैत्रेण, सितो गलो ग्रासेन ॥ ७३ ॥

अव०—सिनोति सिनातेर्वा द्वयस्यापि सिनः । 'सिन' इत्यत्र 'षिंगट् बन्धने' इति स्वादिः, षिंग्श् बन्धने इति क्र्यादिः, 'षः सोऽष्ट्यैष्ठिवष्वष्कः' (२।३।६८ इति सः) सिनोति सिनाति वा ग्रासं मैत्रः, स एवं विवक्षिते (? विवक्षति) नाहं ग्रासं सिनामि सिनोमि स्म, अपि तु सितो ग्रासः स्वयमेव । एवं सितं कर्म स्वयमेवेत्यस्य वाक्यम् ॥ ७३ ॥

## क्षेः क्षी चाध्यार्थे ॥४।२।७४॥

म० वृ०—ध्यणर्थो भावकर्मणी, ततोऽन्यस्मिन् कर्त्राद्यर्थे विहितयोः 'क्तयोस्तकारस्य क्षिधातोः परस्य नः' स्यात्, तद्योगे च क्षेः क्षी इत्यादेशः । कर्त्तरि,-[1]क्षीणः मैत्रः, अधिकरणे,—इदमेषां क्षीणम् । अध्यार्थ इति किम् ? [2]क्षितमस्य ॥ ७४ ॥

अव०—[1]क्षयति स्म, 'गत्यर्थ०' (५।१।११। इति) क्तः । एवं क्षीणवान् । [2]क्षयणं = क्षितम्, भावे क्तः ॥ ७४ ॥

## वा-ऽऽक्रोश-दैन्ये ॥४।२।७५॥

म० वृ०—आक्रोशे दैन्ये च गम्यमानेऽध्यार्थे क्षेः परस्य 'क्तयोस्तस्य नो वा' स्यात्, क्षेः क्षीश्च । क्षीणायुः, क्षितायुः जाल्मः; [1]क्षीणकः, क्षितकस्तपस्वी । अध्यार्थ इत्येव—क्षितं जाल्मस्य, क्षितं तपस्विनः ॥ ७५ ॥

अव०—'[1]अनुकम्पा तद्युक्तनीत्योः०' (७।३।-३४) इति (कप्) ॥ ७५ ॥

## ऋ-ह्री-घ्रा-घ्रा-त्रौन्द-नुद-विन्तेर्वा ॥४।२।७६॥

म० वृ० एभ्यः 'क्तयोस्तस्य नो वा' स्यात् । ऋणम्, ऋतम्; ह्रीणः, ह्रीतः; घ्राणः, घ्रातः; घ्राणः, घ्रातः; त्राणः, त्रातः; उन्द-, समुन्नः, समुत्तः; नुद्,-नुन्नः, नुत्तः; विदिंप्,—विन्न, विन्नवान्; वित्तः, (वित्तवान्) । व्यवस्थितविभाषेयम् । तेन ऋणमिति 'उत्तमर्णाधमर्णयोरेव', अन्यत्र ऋतं सत्यम् । त्रायतेस्तु संज्ञायां न नत्वं—त्रातः, देवत्रातः; अन्यत्र तु नत्वमेव—त्राणम् ॥ ७६ ॥

अव० (एवं) ह्रीणवान्, ह्रीतवान्; घ्राणवान्, घ्रातवान्; घ्राणवान्, घ्रातवान्; त्राणवान्, त्रातवान्; समुन्नवान्, समुत्तवान्; नुन्नवान्, नुत्तवान् । 'विन्तेः' इत्यत्र श्निर्देशात् 'विदिंप् विचारणे' इत्यस्य विकल्पेन क्ततकारस्य नकारः । 'विदिंप्

सत्तायाम्' इति दिवादेः, 'विदॢंती लाभे' इति तुदादेः नित्यं नकारः—विन्नः, विन्नवान् । तथा ऋ-ह्रीभ्यां नत्वेऽप्राप्ते घ्रादिभ्यस्तु नत्वे प्राप्ते सर्वत्र विकल्पः । परं दकारान्तानां दकारस्यापि 'रदाद०' (४।२।६९) इत्यनेन नकारः । तकारस्य नकाराभावपक्षे च सन्नियोगशिष्टत्वाद्दकारस्यापि नकारो न भवति इति भावः ॥ ७६ ॥

## दुगोरू च ॥४।२।७७॥

म० वृ०—दुगुभ्यां परस्य 'क्तयोस्तस्य नः [= नकारादेशः]' स्यात्तद्योगे, दुगोरूकारश्चान्तादेशः । दूनः, दूनवान्; गूनः ॥ ७७ ॥

अव०—'टुदुंट् उपतापे' । 'उंङ् कुंङ् गुंङ् घुंङ् ङुंङ शब्दे' (इति) गु, 'क्तक्तवतू' (५।१।१७४। इति क्तः, एवं ) गूनवान् ॥ ७७ ॥

## क्षै-शुषि-पचो-म-क-वम् ॥४।२। ७८॥

म० वृ०—क्षैशुषिपचिभ्यः परस्य 'क्तयोस्तस्य यथासङ्ख्यं 'म, क, व' इत्यादेशा' भवन्ति । क्षामः, क्षामवान्; शुष्कः, शुष्कवान्; पक्वः, पक्ववान् ॥ ७८ ॥

## निर्वाणमवाते ॥४।२।७९॥

म० वृ०—निर्वाणमिति निर्पूर्वाद्वाधातोः परस्य 'क्तस्य नो [नकारः]' निपात्यते, अवाते कर्त्तरि = निर्वातिक्रियायाश्चेद्वातः कर्त्ता न स्यात् । निर्वाणो मुनिः, निर्वाणो दीपः । अवात इति किम् ? निर्वातो वातः । तथा 'निर्वाणः प्रदीपो वातेन' इत्यत्र प्रदीपः कर्त्ता, वातस्तु हेतुः करणं वेति न निषेधः ॥ ७९ ॥

अव०—'वांक गतिगन्धनयोः' निर्वाति स्म (इति) 'गत्यर्थ०' (५।१।११) इति क्तः, 'स्वरात्' (२।३।८५) इत्यनेन णत्वम् ॥ ७९ ॥

## अनुपसर्गाः क्षीबोल्लाघ-कृश-परिकृश-फुल्लोत्फुल्ल-सम्फुल्लाः ॥४।२।८०॥

म० वृ०—'अनुपसर्गाः क्तान्ता एते शब्दा निपात्यन्ते' । क्षीबः, उल्लाघः, कृशः, परिकृशः, फुल्लः, उत्फुल्लः, सम्फुल्लः । अनुपसर्गा इति किम् ? प्रक्षीबितः । [1]निपातनस्येष्टविषयत्वात् 'फल निष्पत्तौ' (इत्यस्य) फलितः, फलितवान् । कथं प्रक्षीबः ? [2]प्रादिसमासाद्भविष्यति ॥ ८० ॥

अव०—'क्षीबृङ् मदे' उत्पूर्वो 'लाघृङ् सामर्थ्ये' 'कृशच् तनुत्वे' केवलः परिपूर्वश्च, एभ्यः परस्य क्तकारस्य निपातनात् लोपः, अकारस्तिश्रुति, इडभावश्च । तथा 'दल त्रिफला विशरणे' केवलः, उत्पूर्वः समपूर्वश्च । 'फुल्ल' इत्यत्र फल, फलतीति फुल्लः; ज्ञानेच्छा० ( ५।२।९२ ) इत्यनेन क्तः, अथवा एवमपि फुल्लः साध्यते- फलितुमारब्धः(इति) 'गत्यर्थ०' (५।१।११) इति क्तः, अथवा 'आरम्भे' (५।१।१०) इत्यनेन क्तः । 'ति चोपान्त्यातोऽनोदुः' (४।१।५४) इत्यनेन फल उपान्त्याकारस्य उकारः, निपातनात् तकारस्य लकारः इडभावश्च; एवमुत्फुल्लः, सम्फुल्ल इत्यपि । केचित् क्षीबवान्, उल्लाघवान्, कृशवान्, परिकृशवान्, फुल्लवान्, उत्फुल्लवान्, सम्फुल्लवान् इति क्तवतुप्रत्ययेऽपि रूपमिच्छन्ति । तदर्थं क्तान्ता इत्युक्तौ क्तक्तवतुनिपातनं द्रष्टव्यम्, एतदर्थं सूत्रे बहुवचनम् । [1]उपलक्षणत्वात् 'पल फल शल गतौ' इत्यस्यापि फलितः, फलितवान् । क्षीबादयः शब्दाः सर्वे कप्रत्ययेन अचप्रत्ययेनापि सिध्यन्ति, परं 'क्षीबित' इत्यादिरूपप्रतिषेधार्थम् 'अनुपसर्गाः०' इति सूत्रं कृतम् । [2]प्रगतः क्षीबः=प्रक्षीब इति समासः ॥ ८० ॥

## भित्तं शकलम् ॥४।२।८१॥

म० वृ०—भिदेः परस्य 'क्तस्य नत्वं' न निपात्यते, शकलपर्यायश्चेद् भित्तशब्दः । भित्तं शकलम्, खण्डमित्यर्थः । शकलमिति किम् ? भिन्नम् ॥८१॥

## वित्तं धन-प्रतीतम् ॥४।२।८२॥

म० वृ०—विन्दतेः परस्य 'क्तस्य नत्वाभावो' निपात्यते । धनपर्यायः प्रतीतपर्यायश्च चेत्तद्वित्त-शब्दः । वित्तं = धनम्, वित्तः = प्रतीतः । धनप्रतीतमिति किम् ? विन्नः, [1]वेत्तेर्विदितम्, [2]विन्तेर्विन्नं वित्तं च, [3]विद्यतेर्विन्नम् ॥ ८२ ॥

अव०—'विद्लृंती लाभे' इति तुदादेरेव वित्तं प्रयोगः, नान्येषाम् । 'विद्लृंती लाभे' विद्यते=लभ्यते इति वित्तं = धनम्; विद्यते = उपलभ्यतेऽसौ इति वित्तः प्रतीतः । [1]'विदंक् ज्ञाने' । [2]'विदिंप् विचारणे' । [3]'विदिंच् सत्तायाम्' ॥ ८२ ॥

## हु-धुटो हेर्धिः ॥४।२।८३॥

म० वृ०—जुहोतेर्धुडन्ताच्च धातोः परस्य 'हेर्धिरादेशः' स्यात् । जुहुधि, धुट्,—भिन्द्धि, छिन्द्धि, विन्द्धि । हुधुट इति किम् ? क्रीणीहि । हुधुड्भ्यां परस्य हेर्विशेषणादिह न धिः—रुदिहि ॥ ८३ ॥

अव०—'जुहुतात्त्वम्, भित्तात्त्वम्' इत्यत्र नित्यत्वात् प्रकृत्यनपेक्षणेन अन्तरङ्गत्वात् च हेः स्थाने 'तातङ्', तस्य तातङो न पुनर्धिः, हेरिति शब्दाश्रयणात् ॥ ८३ ॥

## [*]शासस्-हनः शाध्येधि-जहि ॥४।२।८४॥

म० वृ०—'शासस्हनां हिप्रत्ययान्तानां यथासङ्ख्यं शाधि, एधि, जहि (इति) आदेशाः' स्युः । शाधि, एधि; जहि ॥ ८४ ॥

अव०—शास्हनोर्यङ्लुप्यपि 'शाधि, जहि' इत्येव प्रयोगः । हनेस्तु यङ्लुपि नेच्छन्त्यन्ये, तन्मते-'जङ्घहि' इति प्रयोगः । अस्तेस्तु स्वरादिधातुत्वात् यङ् न भवति इति भावः ॥ ८४ ॥

## [1]अतः प्रत्ययाल्लुक् ॥४।२।८५।

म० वृ०—धातोः परो योऽकारान्तः प्रत्ययस्तस्मात्परस्य 'हेर्लुक्' स्यात् । पठ, दीव्य, तुद, चोरय । प्रत्ययादिति किम् ? [2]पापहि । ८५ ॥

अव०—[1]अकारान्तात् । [2]'अयि वयि पयि मयि नयि चयि रयि गतौ' (इति) पय, भृशं पयते (इति) यङ्, द्वित्वम्, 'बहुलं लुप्' (३।४।१४। इति) यङ्लोपः, अथ 'य्वोः प्वय्व्यञ्जने०' (४।४।१२१।इति) य लुप्यते । (एवं वावहि) ॥ ८५ ॥

## असंयोगादोः ॥४ २ ८६॥

म० वृ०—असंयोगात्परो य उकारस्तदन्तात्प्रत्ययात् 'हेर्लुक्' स्यात् । सनु, तनु, कुरु । असंयोगादिति किम् ? अश्नुहि[1] ॥ ८६ ॥

अव० 'अश्नुहि', 'ऋणूयी गतौ' 'कृग्तनादेरुः' (३।४।८३।इत्युप्रत्ययः), 'उश्नोः' (४।३।२) गुणः अर् । प्रत्ययादित्येव—युहि, रुहि । [1]एवम् 'आप्नुहि' इत्याद्यपि ज्ञेयम् ॥ ८६ ॥

## वम्यविति वा ॥४।२।८७॥

म० वृ०—'असंयोगात्परो य उकारस्तस्य प्रत्ययसम्बन्धिनो लुग्वा' स्यात्, वकारादौ मकारादौ चाविति प्रत्यये परे । सुन्वः, सुनुवः; सुन्मः, सुनुमः; तन्वः, तनुवः; तन्मः, तनुमः । अवितीति किम् ? सुनोमि, तनोमि । असंयोगादित्येव—अश्नुवः, आप्नुवः ॥ ८७ ॥

अव०—पूर्वसूत्रे 'उ' इति पञ्चम्यन्तमपि "अर्थवशाद्विभक्तिपरिणामः" इति न्यायात् षष्ठ्यन्ततया विपरिणम्यते, तत्र उकारस्य लुक् इति व्याख्यातम्, उकारस्य लुक् स्यादिति सम्बन्धः । व इत्=अनुबन्धो येषां तिव्सिव्मिवित्यादीनां = ते वितः,

[*] शास्हन्साहचर्याद् असिति 'आदादिकस्य' ग्रहणम् ।

न विद्यते वित् यस्य वस् मस् इत्यादेः (सोऽवित्), वा तस्मिन् । सुन्वहे, सुनुवहे; सुन्महे, सुनुमहे इत्यपि । तन्वहे, तनुवहे; तन्महे, तनुमहे । प्रत्ययस्येत्येव— युवः, युमः । [1]असंयोगात् इति उकारस्य विशेषणात् 'आप्नुमः' इत्यत्रापि लुक् न भवतीत्यर्थः ॥ ८७ ॥

## कृगो पि च ॥४।२।८८॥

म० वृ० –कृगः परस्य 'उकारस्य यकारादौ वमि चाविति परे लुक्' स्यात् । कुर्यात्, कुर्याताम्, कुर्युः; कुर्वः, कुर्मः;' कुर्वहे, कुर्महे । अवितीत्येव— करोमि ॥ ८८ ॥

## अतः शित्युत् ॥४।२।८९॥

म० वृ०—शिति अविति परे य उकारस्तन्निमित्तो यः कृगोऽकारस्तस्य "अकारस्य उकारः' स्यात् । कुरु, कुरुतः, कुर्वन्ति, कुर्यात्, कुरुताम्, कुर्वन्, कुर्वाणः ॥ ८९ ॥

अव०—"कुर्वन्, कुर्वाणः" इत्यत्र उकारकरणबलान्न गुण ओकारः,[5] अन्यथा 'ओकार' एव कुर्यात् । तथा 'उकारनिमित्तत्वेन' अकारविज्ञानात् कुर्यादित्यादौ उकारलोपेऽपि, अकारस्य उत् भवत्येव । तथा शित्यवितीति उकारविशेषणं किम् ? 'कुरुत' इत्यादौ शिति व्यवहिते उत्वं यथा स्यात् ॥ ८९ ॥

## श्ना-ऽस्त्योर्लुक् ॥४।२।९०॥

म० वृ०—'श्नप्रत्ययस्यास्तेश्च सम्बन्धिनोऽकारस्य शित्यविति परे लुक्' स्यात् । रुन्धः, रुन्धन्ति, रुन्ध्यात्, रुन्धानः; स्तः, सन्ति, स्थः, स्वः, स्मः, स्यात्, स्तात्, सन् । अवितीत्येव– रुणद्धि, अस्ति । अत इत्येव– आस्ताम्, आसन् ॥ ९० ॥

अव०—'श्नास्त्योर्लुक्' इत्यत्र 'अतः' इति अधिकारो न स्यात्, तदा 'षष्ठ्यान्त्यस्य' (७।४।१०६) इति सूत्रबलाद् (अस्तेः) अन्त्यसकारस्यैव लुक् स्यात्* इति सूत्रार्थे अकारस्येति अधिकार कृतः । 'अस्ती'— त्यत्र तिव्निर्देशात् दिवादेरस्यतेर्न लुक् ॥ ९० ॥

## वा द्विषा-ऽऽतोऽनः पुस्[1] ॥४।२।९१॥

म० वृ०—द्विष आकारान्ताच्च धातोः परस्य 'शितोऽवितोऽनः स्थाने पुस्' इत्यादेशो वा स्यात् । अद्विषुः, अद्विषन्; अयुः, अयान्; अरुः, अरान् ॥ ९१॥

अव० –[1]पकारः 'पुस्पौ' (४।३।३) इत्यत्र विशेषणार्थः । 'वा द्विषातोऽनः पुस्' इत्यनेन ह्यस्तन्या अनः स्थाने पुस् क्रियते, 'सिज्विदोभुवः' (४।२।९२) इत्यनेन अद्यतन्या अनः स्थाने पुस् । 'दुव्युक्तजक्षपञ्चतः'(४।२।९३) इत्यनेनापि ह्यस्तन्या अनः स्थाने पुस् ॥ ९१ ॥

## सिज्विदोऽभुवः ॥४।२।९२॥

म० वृ०—सिचः प्रत्ययात् विदश्च धातोः परस्य 'अनः स्थाने पुस्' स्यात्, भुवः परः सिच् चेन्न स्यात् । सिचः परात्,—अकार्षुः, [1]अगुः, अदुः, अधुः; विद्,–अविदुः । अभुव इति किम् ? [2]अभूवन् ॥ ९२ ॥

अव०—[1]"इडेत्पुसि चातो लुक्' (४।३।९४) इति आकारस्य लुग् । [2]अत्र पूर्वं गुणः, अव्, पश्चात् 'भुवो वः०' (४।२।४३) इति ऊव् ॥ ९२ ॥

## [1]द्व्युक्त-जक्षपञ्चतः[2] ॥४।२।९३॥

म० वृ०—कृतद्वित्वधातोः [ =कृतद्विर्वचनधातोः]परतः जक्षपञ्चकाच्च परस्य 'शितोऽवितोऽनः

[5] 'लघोरुपान्त्यस्य' (४।३।४) इत्यनेन प्राप्तः । *श्नस्य तु 'प्रत्ययस्य' इति परिभाषया सर्वस्यापि लुक् स्यात् ।

स्थाने पुस्' स्यात् । द्विर्वचनधातु:,—अजुहवु:, अबिभयु:, अददु:, अदधु: । जक्षादि,—अजक्षु:, अदरिद्रु:, अजागरु:, अचकासु:, अशासु: ॥ ६३ ॥

अव०—'द्वे उक्ते यस्य = स द्व्युक्त: । ²"पञ्चत्', पञ्चानां वर्ग: = पञ्चत्, 'पञ्चद्दशद्वर्गे वा' (६।४।१७५) इति सूत्रेण पञ्चत् निपात:; जक्षाणां पञ्चत् (=जक्षपञ्चत्), तस्मात् जक्षपञ्चत: । "अजुहवु:, अबिभयु:, अजागरु:" अत्र 'पुस्पौ' (४।३।३) इत्यनेन गुण: । "जक्षक् भक्षहसनयो:, दरिद्राक् दुर्गतौ, जागृक् निद्राक्षये, चकासृक् दीप्तौ, शासूक् अनुशिष्टौ" इति जक्षपञ्चकम् ॥ ६३ ॥

## अन्तो नो लुक् । ४।२।६४॥

म० वृ०—द्व्युक्तजक्षपञ्चकात्परस्य शितोऽवितोऽन्त: सम्बन्धिनो नकारस्य लुक्'स्यात् । अन्ति,-ददति, अन्तु,—ददतु, शतृ,-ददत्, ङी-औ,-ददती स्त्री कुले वा, जक्षति इत्यादि ॥ ६४ ॥

अव०—'ददति' इत्यत्र जुह्वति, जुह्वतु, शतृ—जुह्वत् इत्यपि ज्ञातव्यम्, एषु 'ह्विणोरप्विति व्यौ' (४।३।१५) इत्यनेन धातो: उकारस्य 'व्' इति क्रियते । 'ददती स्त्री', ङी, । 'ददती कुले', औ, 'औरी:'(१।४।५६।इति) ई: । 'ददती'इत्यत्र 'अवर्णादश्नोऽन्तो०'(२।१।११५) इति (सूत्रस्य) वृत्तौ इत्युक्तं यद्,-'ददती' इत्यत्र 'अवर्णा'-दिति विशेषणात् 'अश्न' इति प्रतिषेधाच्च 'श्नश्चात:' (४।२।६६) इति 'समानानां तेन०' (१।२।१) इति लोपदीर्घाभ्यां पूर्वमेव 'अवर्णादश्नोऽन्तो०' इति सूत्रेण अतृस्थाने अन्त् आदेश: । यदि वा परत्वात् 'श्नश्चात:' (४।२।६६) इत्यनेनावश्यमाकारलोप: तदा भूतपूर्वतया पश्चात् अन्तादेश: क्रियते । कृते चान्तादेशे 'अन्तो नो लुक्' इत्यनेन अन्तो नकारस्य लुक् कार्य: । (एवम्) जक्षति, जक्षतु, जक्षत्; दरिद्रति, दरिद्रतु, द्ररिद्रती स्त्री कुले वा; जाग्रति, जाग्रतु, जाग्रत्; चकासति, चकासतु, चकासत्; शासति, शासतु; शासत् ॥ ६४ ॥

## शौ वा ॥४।२।६५॥

म० वृ०—'द्व्युक्तजक्षपञ्चत: परस्यान्तो नकारस्य शिप्रत्यये वा लुक्' स्यात् । ददति, ददन्ति; दधति, दधन्ति; जक्षति, जक्षन्ति कुलानीत्यादि । शाविति किम् ? ददती कुले ॥ ६५ ॥

अव०—'ददति' इत्यादिषु सर्वत्र पूर्वं शतृ, पश्चात् जस्, शस् वा, 'नपुंसकस्य शि:' (१।४।५५) इति सूत्रेण जस्शस्स्थाने 'शि:' आदेश: । 'जक्षति, जक्षन्ति'; आदिशब्दात् दरिद्रति, द्ररिद्रन्ति; जाग्रति, जाग्रन्ति; चकासति, चकासन्ति; शासति, शासन्ति कुलानि । एषु सर्वत्र पूर्वं धातो: पर: शतृ. पश्चात् जस् शस् वा,'नपुंसकस्य शि:'(१।४।५५। इति जस्-शस्स्थाने 'शि:' आदेश:) ॥ ६५ ॥

## श्नश्चा-ऽऽत: ॥४।२।६६॥

म० वृ०—¹"द्व्युक्तजक्षपञ्चत: श्नासम्बन्धिनश्चाकारस्य लुक्' स्यात्, शित्यविति परे । मिमते, अमिमत; द्ररिद्रति, श्ना,—क्रीणन्ति, लुनते, पुनताम्, अपुनत । आत इति किम् ? बिभ्रति । अवितीत्येव — अक्रीणाम् ॥ ६६ ॥

अव०—¹द्व्युक्तजक्षपञ्चकसम्बन्धिन आकारस्य इत्यर्थ: । 'अमिमत' इत्यस्याग्रे यायति, यायतु; संजिहते, समजिहत इत्यपि । (एवं) क्रीणन्तु, लुनताम्, अलुनत, लुनन्ति; एवं पुनन्ति ॥ ६६ ॥

## एषामीर्व्यञ्जनेऽद: । ४।२।६७॥

म० वृ०—'एषां द्व्युक्तजक्षपञ्चत्श्नामाकारस्य शित्यविति व्यञ्जनादौ परे 'ई:' स्यात्, दासंज्ञं वर्जयित्वा । मिमीते¹, लुनीत:, लुनीहि । व्यञ्जन इति किम् ? मिमते । अद इति किम् ? ²दत्त:, धत्त:; दद्ध:, दद्य:; दद्यात् ॥ ६७ ॥

अव०—दासंज्ञकानामित्ववर्जनात् दांवदैंवोर्न दासंज्ञा इति दांवदैंवोर्यङ्लुपि कृतेऽपि ईत्वं भवति।

'एषामीर्व्यञ्जनेऽदः' इति सूत्रेण 'दादीतः, दादीथ' इत्यादि। ¹(एवं) मिमीताम्, अमिमीत, अत्र 'पृभृ-माहाङामिः' (४।१।५८) इत्यनेन पूर्वस्य इः। ²'श्नश्चातः' (४।२।६६) इति आकारलोपः सर्वत्र ॥ ६७ ॥

## इर्दरिद्रः ॥४।२।६८॥

म० वृ०—'दरिद्रातेरातः[=आकारस्य] इत्[=इकारः']स्यात् व्यञ्जनादौ शित्यविति। दरिद्रितः, दरिद्रिवः, दरिद्रियात्। व्यञ्जन इत्येव- दरिद्रति, (अत्र) अन्ति, 'श्नश्चातः' (४।२।६६ इत्यातो लुक्,) 'अन्तो नो०' (४।२।६४। इति नो लुक्)। अवितीत्येव—दरिद्राति ॥ ६८ ॥

## भियो नवा ॥४।२।६६॥

म० वृ०—'बिभेतेरन्तस्य इत्वं वा' स्यात्, व्यञ्जनादौ शित्यविति। बिभितः, बिभीतः व्यञ्जन इत्येव—बिभ्यति। शितीत्येव—बिभीषति, बेभीयते। अवितीत्येव—बिभेति ॥ ६६ ॥

---

अव०—(एवं) बिभियात् बिभीयात्; तथा यङ्लुपि बेभितः, बेभीतः ॥ ६६ ॥

## हाकः ॥४।२।१००॥

० वृ० —'जहातेर्द्व्युक्तस्य शित्यविति व्यञ्जनादावन्त्यस्य इत् वा' स्यात्। जहितः, जहीतः¹। व्यञ्जन इत्येव-जहति। शितीत्येव-जिहासति, जेहीयते। अवितीत्येव—जहाति ॥ १०० ॥

---

अव०—'हाक' इत्यत्रानुबन्धनिर्देश 'ओहाङ्-धातोः यङ्लुपश्च' निवृत्त्यर्थः कृतः, तेन उज्जिहीते,* जहीतः²; अत्र इत्वं न भवति। "ओहाङ् गतौ" ओहाक् त्यागे"। ³"न हाको लुपि (४।१।४६) इति अभ्यासे दीर्घनिषेधः। योगविभाग उत्तरार्थः। ¹एवं जहिवः, जहीवः; जहिमः, जहीमः ॥ १०० ॥

## आ च हौ ॥४।२।१०१॥

म० वृ० - 'जहातेर्द्व्युक्तस्य हौ परे आत् इश्च[=आकार इकारश्च]' वा' स्यात्। जहाहि, जहिहि, जहीहि ॥ १०१ ॥

---

अव०—'आ च हौ' इति सूत्रे अवितीति निवृत्तम्, वितोऽसम्भवात्; हिविभक्तिमेवाश्रित्य सूत्रप्रवृत्तेः। 'शिति' इत्यनुवर्त्तते ॥ १०१ ॥

## यि लुक् ॥४।२।१०२॥

म० वृ०—यकारादौ शिति परे 'जहातेरन्तस्य लुक्' स्यात्। जह्यात् ॥ १०२ ॥

---

अव०—'यि लुक्' इति सूत्रे नवेति निवृत्तम्। पूर्वसूत्रेषु इकाराधिकारे नवा इत्यधिकृतः, इह तु 'यि लुक्' सूत्रे लुक् विधीयतेऽतो नवाऽधिकारो निवृत्तः ॥ १०२ ॥

## ओतः श्ये ॥४।२।१०३॥

म० वृ०—'धातोरोकारस्य श्ये परे लुक्' स्यात् ['दों छोंच् छेदने']अवद्यति, ['षोंच् अन्तकर्मणि']अवस्यति। श्य इति किम्? ¹गवति ॥ १०३ ॥

---

अव०—¹गौरिवाचरति=गवति, 'कर्त्तुः क्विप् गल्भक्लीबहोडात्तु ङित्' (३।४।२५) इत्यनेन क्विप्, 'अप्रयोगीत्' (१।१।३७। इत्यनेन क्विप्लोपः), तिव्, शव्, अवादेशः ॥ १०३ ॥

## जा ज्ञा-जनोऽत्यादौ ॥४।२।१०४॥

म० वृ०—'ज्ञाजनोर्धात्वोः शिति प्रत्यये परे 'जा' इत्यादेशः" स्यात्, अत्यादौ=नत्वनन्तरे ति-

---

*'पृभृमाहाङामिः' (४।१।५८) इति सूत्रेण द्वित्वे पूर्वस्य इः। ²'जहीतः' इत्यत्र।

त्यादौ । जानाति, जानीते; जानन्, जानानः; जायते, जायमानः । अत्यादाविति किम् ? जाज्ञाति, जञ्जन्ति; यङ् (लुप्) । शितीत्येव-ज्ञायते, जन्यते । १०४॥

अव०—'अत्यादौ' इति कोऽर्थः ? न त्वनन्तरे तिवादौ, अस्यायं भावार्थः—यदि धातुतिवादीनामन्तरे = विचाले श्नाश्यादिप्रत्यया भवन्ति, तदा ज्ञाजन्धात्वोर्जादेशो भवति; यदि तु पुनर्धातोः परस्तिवादिप्रत्ययोऽनन्तरो भवति, कोऽर्थः ? धातुतिवादेरन्तरे = विचाले श्नाश्यादिप्रत्ययो न भवति, तदा जा आदेशो न स्यात् इत्यर्थः ॥ १०४ ॥

## प्वादेर्ह्रस्वः ॥४।२।१०५॥

म० वृ०—'प्वादिगणस्य शिति ह्रस्वः' स्यात्, अत्यादौ । पुनाति, लुनाति । प्वादेरिति किम् ? ['व्रीश् वरणे'] व्रीणाति । जानातीत्यत्र विधानसामर्थ्यान्न ह्रस्वः ॥ १०५ ॥

अव०—क्र्यादिधातुमध्ये 'पूग्श् पवने' इत्यारभ्य वृकरणपर्यन्ताः प्वादयो धातवः २१ ज्ञेयाः ॥ १०५ ॥

## गमिषद्-यमश्छः ॥४।२।१०६॥

म० वृ०—"एषामन्तस्य 'छ' इत्यादेशः" शिति अत्यादौ स्यात् । गच्छति, इच्छति, यच्छति । शितीत्येव— गन्ता, एष्टा, यन्ता । अत्यादावित्येव-जङ्गन्ति ॥ १०६ ॥

अव०—'गमिषत्' (इति) अत्रात्निर्देशः 'इषच् गतौ' इति दिवादेः, 'इषश् आभीक्ष्ण्ये' इति क्र्यादेर्निवृत्त्यर्थः । शितीत्येव- गन्ता, एष्टा इत्यादि, अत्र श्वस्तनीता, न तृच् प्रत्ययः, अन्यथा द्व्यङ्गविकलता स्यात्; यथा-शित् नास्ति, तथाऽत्यादिरपि नास्ति इति ॥ १०६ ॥

## वेगे सर्त्तेर्धाव् ॥४।२।१०७॥

म० वृ०—"सरतेर्वेगे गम्यमाने शिति परे अत्यादौ 'धाव्' आदेशः" स्यात् । धावति, धाव । वेग इति किम् ? प्रियामनुसरति ॥ १०७ ॥

अव०—धाव्धातुना सिद्धे, सरतेर्वेगे गम्यमाने सरति इति प्रयोगनिवृत्त्यर्थं वचनमिदम् । 'वेगे सर्त्ते'-रित्यत्र तिव्निर्देशात् यङ्लुपि सरतेर्न धाव्,-सर्स्रर्त्ति, सरिस्रत्, सरीस्रत् ॥ १०७ ॥

## श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्-दृश्यर्त्ति-शद-सदः शृ-कृ-धि-पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्यर्च्छ-शीय-सीदम् ॥४।२।१०८।

म० वृ०—"श्रौत्यादीनां शिति [= शकारानुबन्धे प्रत्यये परे] यथासङ्ख्यं शृ इत्याद्यादेशा" भवन्ति, अत्यादौ । श्रौतेः शृ, शृणोति; कृवोः कृ, कृणोति; धिवोर्धिः, धिनोति; पः पिबः, पिबति; घ्रो जिघ्रः, जिघ्रति, उज्जिघ्रः; ध्मो धमः, धमति, उद्धमः; स्थः तिष्ठः, तिष्ठति, उत्तिष्ठमानः; म्नो मनः, आमनति, कतीहामनमानाः; दामो यच्छः, प्रयच्छति; दृशः पश्य, पश्यति, शे प्रत्यये उत्पश्यः; अर्त्तेः ऋच्छः, ऋच्छति, समृच्छमानः; शदेः शीयः, शीयते, शीयमानः; सदेः सीदः, सीदति, कतीह सीदमानाः ॥ १०८ ॥

अव०—श्रौत्यर्त्योरितव्निर्देशः कृवधिवद्शदामामनुबन्धश्च यङ्लुपि 'शृ' इत्याद्यादेशनिवृत्त्यर्थः कृतः, ततः "शोश्रुवत्, आरत्, चरीकृण्वत्, देधिन्वत्, दर्दृशत, दादत्" इत्येव प्रयोगाः । 'ऋ' प्रापणे च' (इति धातोः) भृशमर्त्ति (इति) 'अत्यर्त्ति०' (३।४।१०। इति)यङ्, द्वित्वम्,'ऋतोऽत्' (४।१।३८) इति द्वित्वे पूर्वस्य ऋतः अकारः, 'रि रौ च लुपि'(४।१।५६ । इति)अभ्यासे रोऽन्तः, 'बहुलं लुप्' (३।४।१४। इति) यङ्लोपः । 'आगुणावन्यादेः'

(४।१।४८) अकारस्य- आ, ✱ यङ्निमित्तो रोऽन्त-लोपोऽपि कार्यः, आरत्तीति आरत्, शतृ, 'इवर्णादेरस्वे०' (१।२।२१) धात्वृकारस्य र्, आरत् इति सिद्धम्। एवं चरिकृणोतीति देधिनोतीति उटि गुणे च कृते शतृवाक्यम् एवं दर्दर्शीति (?दर्दर्शीति) दर्दृ-शीति वा दर्दर्शत्, शतृ। यत्र यङ्लुप् तत्र 'ऋदुदितः' (१।४।७०) इत्यनेन नोऽन्तो न भवति।

"तिवा शवा-ऽनुबन्धेन, निर्दिष्टं णेन च।
एकस्वरनिमित्तं च, पञ्चैतानि न यङ्लुपि" ।१।

इति न्यायबलान्न नोऽन्तः। श्रौति, 'श्रुंट् श्रवणे'। कृत्, 'कृवुट् हिंसाकरणयोः'। धिन्, 'धिवुट् गतौ'। तथा घ्राध्मादिभिः साहचर्यात् पा इति 'पां पाने' इति भौवादिकस्यैव ग्रहणम्, तस्य पिबादेशः सस्वरः, स्वरान्तत्वादुपान्त्यलक्षणो गुणो न भवति। 'पैं ओवैं शोषणे' पै इत्यस्य लाक्षणिकत्वाच्च न ग्रहणम्; तेन पायति, पान् (? पायन्) इति प्रयोगः। तथा उत्पिबतीति उत्पिबः' उत्पूर्वपिबतेः परः 'घ्राध्माधाट्धेट्दृशः शः' (५।१।५८) इति सूत्रेण शप्रत्ययः, ततः पिब आदेशः, 'उत्पिबः, इति सिद्धम्। दाम् इत्यत्र मकारनिर्देशो दासंज्ञकशङ्कानिवृत्त्यर्थः ॥१०८॥

## क्रमो दीर्घः परस्मै ॥४।२।१०९॥

म० वृ०—'क्रमेः परस्मैपदनिमित्ते शिति परे दीर्घः' स्यादत्यादौ। क्रामति, क्रामन्, क्राम्यति, क्रामेत्, अक्रामत्। परस्मै इति किम्? आक्रमते सूर्यः, आक्रममाणः। परस्मैपदनिमित्तविज्ञानात् हेर्लुक्यपि दीर्घः- क्राम ॥१०९॥

अव०—'क्रामति, क्राम्यति' इत्यत्र 'भ्रासभ्लासभ्रमक्रमक्लमत्रसित्रुटिलषियसिसंयसेर्वा' (३।४।७३) इत्यनेन विकल्पेन श्यप्रत्ययः ॥१०९॥

## ष्ठिवू-क्लम्वाचमः ॥४।२।११०॥

म० वृ० 'ष्ठिवः, क्लमेः आङ्पूर्वस्य च चमेः शिति दीर्घः' स्यादत्यादौ। ष्ठीवति, क्लामति, क्लाम्यति [ 'भ्रासभ्लास०' (३।४।७३) इत्यनेन वा श्यः ] आचामति ॥११०॥

अव०—'ष्ठीवति' इत्यत्र भ्वादेः 'ष्ठिवू क्षिवू निरसने' इत्यस्यैव 'ष्ठिवूक्लम्वाचमः' इत्यनेन दीर्घो भवति, 'ष्ठिवू क्षिवूच् निरसने' इति दैवादिकस्य 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) इत्यनेन दीर्घो विहितोऽस्ति,-दीव्यति,....(ष्ठीव्य) तीत्यादि ॥११०॥

## शमसप्तकस्य श्ये ॥४।२।१११॥

म० वृ०—अत्यादाविति निवृत्तम्। 'शमादीनां सप्तानां श्ये परे दीर्घः' स्यात्। शाम्यति, दाम्यति इत्यादि। ॥१११॥

अव०—'शमू दमूच् उपशमे' तमूच काङ्क्षायाम् 'श्रमूच् खेदतपसोः' 'भ्रमूच् अनवस्थाने' 'क्षमौच् सहने' 'मदैच् हर्षे' इति शमादिसप्तकम्। यथाक्रममुदाहरणानि,-शाम्यति, दाम्यति, ताम्यति, श्राम्यति, भ्राम्यति, क्षाम्यति, माद्यति। शमसप्तकस्येति किम्? असयति। श्य इति किम्? भ्रमति, 'भ्रमूच् अनवस्थाने' इत्यस्यैव धातोर्भ्रमतीति रूपं ज्ञेयम्, अन्यथा

★ चिन्त्येयं प्रक्रिया वैयाकरणैः। अत्र 'आरत्' इत्यस्य साधनिका क्रियते। अत्र 'आगुणावन्यादेः' इत्यनेन 'अकारस्य आ' इति यदुक्तं तदसङ्गतम्। यतोऽकारस्याकारविधायके 'आगुणावन्यादेः'(४।१।४८) इति सूत्रे 'अन्यादेः' इत्यनेन न्याद्यागमवर्जस्य धातोरकारस्याकारः प्रतिपादितः, अत्र तु "रिरौ च लुपि"(४।१।५६) इत्यनेन रागमो विद्यते। एवं "यङ्निमित्तो रोऽन्तलोपोऽपि कार्यः" इति यदुक्तं तदप्यचारु,"रो रे लुक् दीर्घश्चादिदुतः" (१।३।४१) इति सूत्रेण रागमस्य लोपात्। अत्र रागमानन्तरं धात्वृकारस्य 'र्' इति कृते सति 'रो रे लुक् दीर्घश्चादिदुतः' (१।३।४१) इत्यनेनैव रागमस्य लोपोऽकारस्याकारश्च भवति। तदुक्तं हैमप्रकाशे यङ्लुबन्तप्रक्रियायाम्—"शतरि द्वित्वे, पूर्वस्य अत्वे, रागमे धातोश्च रत्वे, रो रे लुग्'० इति रलोपे पूर्वदीर्घत्वे च आरत्"।

द्व्यङ्गविकलता स्यात् । 'भ्रासभ्लास०' (३।४।७३) इति वा श्यः ॥१११॥

## ष्ठिव-सिवोऽनटि वा ॥४।२।११२॥

म०वृ०–'ष्ठिव्‌सीव्यतेश्चानटि दीर्घो वा' स्यात्। निष्ठीवनम्, निष्ठेवनम्; सीवनम्, सेवनम् ॥११२॥

## मव्यस्याः ॥४।२।११३॥

म०वृ०–'धातोर्विहिते मकारादौ वकारादौ च प्रत्यये 'अकारस्य आकारो दीर्घः' स्यात्। पचामि, पचावः, पचामः; पचावहे, पचामहे ॥११३॥

---

अव०–'मव्यस्याः' अत्र सूत्रे 'मव्, अ, आ' इति रचना। 'मव्यस्याः' इति सूत्रे विशेषोऽयम्- धातोः प्रत्ययेन सहाभिसम्बन्धः, न अकारेण सह; इति प्रत्ययाऽकारस्यापि दीर्घो भवति ॥११३॥

## अनतोऽन्तोऽदात्मने ॥४।२।११४॥

म०वृ०--अनकारात्परस्यात्मनेपदसम्बन्धिनोऽन्तरूपस्य अवयवस्य 'अत्'इत्यादेशः स्यात्। चिन्वते, अचिन्वत; लुनते, लुनताम्; एवं मिमते, मिमताम्, अमिमत इत्यपि। आत्मनेपदस्येति किम्? चिन्वन्ति। अनत इति किम्? पचन्ते, पच्यन्ते। ॥११४॥

---

अव०–न अत्-अकारः=अनत्, तस्मात् अ(न)तः, न अकारात् परस्य (इत्यर्थः) ॥११४॥

## शीङो रत् ॥४।२।११५॥

म०वृ०–शीङः परस्यात्मनेपदसम्बन्धिनोऽन्तो 'रत्' [ इत्यादेशः ] स्यात्। शेरते, शेरताम्, अशेरत [शीङ एः शिति (४।३।१०४) इत्यनेन एकारः]॥११५॥

## वेत्तेर्नवा ॥४।२।११६॥

म०वृ०–वेत्तेः परस्यात्मनेपदसम्बन्धिनोऽन्तो 'रत्' [ इत्यादेशः ] वा स्यात्। संविद्रते,संविदते। आत्मनेपद इत्येव- विदन्ति ॥११६॥

---

अव०–"संविद्रते, संविदते"इत्यत्र 'समो गमृच्छिप्रच्छिश्रुवित्स्वरत्यर्त्तिदृशः' (३।३।८४) इत्यनेनात्मनेपदम् ॥११६॥

## तिवां णवः परस्मै ॥४।२।११७॥

म० वृ०–वेत्तेः परेषां परस्मैपदसम्बन्धिनां तिवादीनां नवानां स्थाने "परस्मैपदसम्बन्धिन एव" णवादयो नवादेशा यथासङ्ख्यं नवा स्युः। [1]वेद, विदतुः, [तसोऽतुस्] विदुः;(अन्तेरुस्) वेत्थ, (सेर्थव्) विदथुः, (थसोऽथुस्) विद; (थस्य अ) वेद, (मेर्णव्) विद्व, (वसो व) विद्म; (मसो म)। पक्षे वेत्ति, वित्तः, विदन्ति; वेत्सि, वित्थः, वित्थ; वेद्मि, विद्वः, विद्मः ॥११७॥

---

अ०–तिव्, तस्, अन्ति; सिव्, थस्, थ; मिव्, वस्, मस् इति नवानां णव्,अतुस्, उस्; थव्, अथुस्, अ; णव्, व, म इति नव आदेशाः। [1]तिवो णव् ॥११७॥

## ब्रुगः पञ्चानां पञ्चाहश्च॥४।२।११८॥

वृ०–ब्रूगः परेषां तिवादीनां पञ्चानां स्थाने यथासङ्ख्यं 'पञ्च णवादयो नवा' स्युः, तद्योगे 'ब्रूगः स्थाने 'आह' इत्यादेशश्च। आह, आहतुः, आहुः; आत्थ, आहथुः। पक्षे ब्रवीति, ब्रूतः,ब्रुवन्ति; ब्रवीषि, ब्रूथः ॥११८॥

---

अव०–तिव्स्थाने णव्, तस्स्थानेऽतुस्, अन्तिस्थाने उस्, सिस्थाने थव्, थस्स्थाने अथुस्। 'आत्थ' इत्यत्र 'नहाहोर्धतौ' (२।१।८५) इत्यनेन हकारस्य तकारः ॥११८॥

## आशिषि तु-ह्योस्तातङ् ॥४।२।११९॥

म०वृ०–[ङित्करणं गुणनिषेधार्थम्] आशिषि विहितयोस्तुह्योः स्थाने'तातङ् आदेशो नवा' स्यात्। जीवतात्, जीवतु भवान्; जीवतात्, जीव त्वम् (हि)। आशिषीति किम्? जीवतु, जीव ॥११९॥

## आतो णव औः ॥४।२।१२०॥

म०वृ०—नवेति निवृत्तम् । आकारात्परस्य णवः स्थाने 'औ' आदेशः स्यात् । [1]पपौ सः, सुनोऽहं किल पपौ [2] ॥१२०॥

अव०—[1]परोक्षायाः प्रथमपुरुषे णव् । [2]परोक्षाया उत्तमपुरुषे णव् ॥१२०॥

## आतामाते-आथामाथे आदिः [1]॥४।२।१२१॥

म०वृ०-अकारात्परेषां 'आताम्, आते, आथाम्, आथे' इत्येषामाकारस्य[1] 'इकारः' स्यात् । पचेताम्, पचेते; पचेथाम्, पचेथे । आदिति किम् ?, अयात् ॥१॥

अव०-[1]बृहद्वृत्तौ 'आत' इति मूलपाठः । आदिति किम् ? मिमाताम्, मिमाते । पूर्वसूत्रे आतः= आकारात्परस्येति अस्ति, आतामाते० इति सूत्रे तु आत इति षष्ठ्यन्तम् 'अर्थवशाद्विभक्तिपरिणामः' इति न्यायात् व्याख्येयम् । आत्=अकारात्[2]॥१२१॥

## यः सप्तम्याः ॥४।२।१२२॥

म० वृ०-[1]आत्परस्य सप्तम्या याशब्दस्य 'इत्' स्यात् । पचेत्, पचेताम्, पचेः ॥१२२॥

अव०-[1]आत्=अकारात्परस्य । एवं पचेत, पचेत्र, पचेम । ॥१२२॥

## याम्-युसोरियमियुसौ ॥४।२।१२३॥

म० वृ०-[1]आत्परयोर्याम्युसोर्यथासङ्ख्यम् 'इय-मियुसादेशौ' भवतः । पचेयम्, पचेयुः ॥१२३॥ इति चतुर्थस्याध्यायस्य द्वितीयः पादः । ग्रन्थाग्र० २०५॥

अव०-[1]अकारात्परयोः ॥१२३॥ अत्र सूत्रे (? पादे) अवचूरिश्लोकाः ३५९॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने चतुर्थाध्यायस्य द्वितीयः पादः समाप्तः ॥



॥ अर्हम् ॥

# ॥ चतुर्थोऽध्यायः ॥

## [ तृतीयः पादः ]

★

### नामिनो गुणोऽक्ङिति ॥४।३।१॥

म० वृ०-नाम्यन्तस्य धातोः कित्ङित्वर्जिते प्रत्यये परे 'आसन्नो गुणः' स्यात्। चेता, नेता, स्तोता, कर्त्ता, जयति, [१]एता, एति। नामिन इति किम्? उम्भिता। [२]अक्ङितीति किम्? युतः, अशिश्रियत् ॥१॥

अव०-'आसन्नः,' किमुच्यते? इवर्णस्य ए एते परस्परं स्वाः, उवर्ण ऋवर्ण अर् (?)। एकारः, ओकारः, अर् एते गुणसंज्ञकाः। [१]आद्यन्तवद्भावाद् ❀ नाम्यन्तत्वम्। (एवं) [२]चितः, चितवान्; लुलुवे, लिल्ये। 'नीभ्यां लूभ्याम्' इत्यत्र नामार्थसंवलित-धात्वर्थाभिधायित्वेन नामिनो गौणत्वमिति न गुणः ॥१॥

### उ-श्नोः ॥४।३।२॥

म० वृ०-धातोः परयोरुश्नुप्रत्यययोरक्ङिति प्रत्यये परे'गुणः' स्यात्। तनोति, तर्णोति, करोति, सुनोति। अक्ङितीत्येव- कुरुतः ॥२॥

### पुस्-पौ ॥४।३।३॥

म० वृ०-नाम्यन्तस्य धातोः पुसि पौ च परे 'गुणः' स्यात्। अबिभयुः, अजुहवुः, [२]ऐयरुः, पु,-अर्पयति ॥३॥

अव०-'ऋंक् गतौ' ह्यस्तनी, अनु द्वित्वम्, 'ऋतोऽत्' (४।१।३८ इत्यभ्यासेऽकारः) 'पृभृमाहाङामिः' (४।१।५८। इति) अभ्यासे इः, 'पूर्वस्यास्वे स्वरे य्वोरियुव्' (४।१।३७) इति अभ्यासे इय्, 'द्व्युक्तजक्षपञ्चतः' (४।२।९३। इति) अन्स्थाने पुस्, 'पुस्पौ' (इति) गुणः अर्, 'स्वरादेस्तासु' (४।४।३१। इति)अभ्यासे वृद्धिः ऐः, ऐयरुरिति सिद्धम्। 'अर्पयति', 'ऋंक् गतौ' 'ऋ' प्रापणे च' वा, णिग्, 'अर्त्तिरीऌली०' (४।२।२१) इत्यादिना पोऽन्तः, 'पुस्पौ' (इति) गुणः अर्। (एवं) रेपयति, ह्रेपयति, क्नोपयति ॥३॥

### लघोरुपान्त्यस्य ॥४।३।४॥

म० वृ०-धातोरुपान्त्यस्य नामिनो लघोरक्ङिति प्रत्यये परे 'गुणः' स्यात्। भेत्ता, गोपनम्, वेत्ति। लघोरिति किम्? ईहते, ऊहते। उपान्त्यस्येति किम्? भिनत्ति,रुणद्धि। अक्ङितीत्येव-भिन्नः,भिन्नवान् ॥४॥

### मिदः श्ये ॥४।३।५॥

म० वृ०-मिदेरुपान्त्यस्य श्ये परे 'गुणः' स्यात्। मेद्यति ॥५॥

### जागुः किति ॥४।३।६॥

म० वृ०-जागर्त्तेः किति प्रत्यये परे 'गुणः' स्यात्। जागरितः, जागरितवान्; जागर्यते, कौ,-जागः, जजागरतुः। कितीति किम्? [तस्,-] जागृतः, [अन्ति-] जाग्रति,[अन्तो नो लुक् (४।२।९४) इत्यन्ति-नकारस्य लुक्] जाग्रत्। क्ङिति प्रतिषेधे प्राप्ते वचनम्। अक्ङिति तु पूर्वेणैव गुणः- जागरिता ॥६॥

अव०-जजागृवान्, अत्र गुणः कथं न भवति? + सूरिराह-जागर्त्तेः परतः कसुप्रत्ययाऽनभिधानाद् भाषायां नास्तीत्येके आहुः। अपरे च केचित् कसु-

❀ 'आद्यन्तवदेकस्मिन्' इति न्यायेन। + 'बृहद्वृत्तौ' इत्यध्याहारः।

कानयोर्गुणप्रतिषेधमेवाहुः, तन्मते-जजागृवान्, व्यतिजजागृवान्, व्यतिजजाग्राणः। केचित्पुनर्गुणमिच्छन्त्येव, तन्मते-जजागर्वान्। 'जाग्रत्' इत्यत्र 'ऋदुदितः' (१।४।७०) इत्यनेन नोऽन्तः, तदनन्तरम् 'अन्तो नो लुक्' (४।२।९४) इत्यनेन अन्तो नकारस्य लुक् ॥६॥

## ऋवर्ण-दृशोऽङि ॥४।३।७॥

म० वृ०-ऋवर्णान्तानां धातूनां दृशश्चाङि प्रत्यये परे 'गुणः' स्यात्। [आरत्,] असरत्, अजरत्, अदर्शत् ॥७॥

अव०-'असरत्', अत्र 'सर्त्यर्त्तेर्वा' (३।४।६१) इत्यनेन अङ्, 'ऋवर्णदृशोऽङि' (४।३।७) इत्यनेन गुणः अर्। 'अजरत्', 'ऋदिच्छ्वस्तम्भूम्रुचूम्लुचूग्रुचूग्लुचूग्लुञ्चूज्रो वा' (३।४।६५) इत्यनेनाङ् ॥७॥

## स्कृच्छृतोऽकि परोक्षायाम् ॥४।३।८॥

म० वृ०-स्कृच्छ्धात्वोः ऋकारान्तानां च धातूनां नामिनः परोक्षायां परतो 'गुणः' स्यात्, अकि = ककारोपलक्षितायां कसुकानरूपायां न स्यात् [=गुणो न भवति]। स्कृ,-संचस्करतुः, ['संपरेः कृगः स्सट्' (४।४।९१) इति कृग आदिः स्सट्] ऋछ्,-आनर्च्छ, ऋत्,-विचकरुः, ['कृत् विक्षेपे']तेरुः। एवं शृ,-विशशरुः, दृ,-विददरुः, पृ,-निपपरतुः, निपपरुः। अकीति किम्? संचस्कृवान्, संचस्क्राणः, एवम् आनृच्छ्वान्, विचिकीर्वान्, धितितीर्वान्, विततिराणः, [वितेरे इति वाक्यम्] ॥८॥

अव०- एवं विशिशीर्वान्, विशशिराणः, निपुपूर्वान्, निपप्रे निपपरे वा निपपुराणः, "तत्र कसुकानौ०" (५।२।२। इति कानप्रत्ययः)। विशशरे (इति) विशशिराणः, अथवा 'ऋः शदृप्रः' (४।४।२०) इति ऋत्वे कृते विशश्रे (इति) विशशिराणः, "तत्र कसु० (५।२।२। इति कानप्रत्ययः) तथा काने पूर्वं द्वित्वं क्रियते, पश्चात् इरादिः, स्वरविधित्वात्। विचकार निजगारेत्यत्र परत्वाद् वृद्धिरेव, न गुणः। चक्रतुः, चक्रुरित्यत्र न गुणः, 'स्कृच्छृतोऽकि०' इति सूत्रे सस्सट्कृगो ग्रहणाद्। तथा कृ इत्यस्य 'क्ययङाशीर्ये' (४।३।१०) इति वक्ष्यमाणेनैव गुणो भविष्यति (इत्याशङ्कायाम्) अत्राह-- वक्ष्यमाणेनैव सिद्धेऽपि, यदत्र 'स्कृच्छृतोऽकि०' सूत्रे स्कृग्रहणं कृतं तत् 'क्ययङा०' इति सूत्रे औपदेशिक-[स्वाभाविक] संयोगपरिग्रहार्थम्, तेन 'संस्क्रियते' इत्यादौ 'क्ययङा०' (४।३।१०) इति सूत्रेण न गुणः ॥८॥

## संयोगादृदर्त्तेः ॥४।३।९॥

म० वृ०—संयोगात्परो य ऋकारस्तदन्तस्य धातोरर्त्तेश्च परोक्षायां 'गुणः' स्यात्, अकि। सस्मरतुः, सस्मरुः, सस्वरतुः, अर्त्ति,-आरतुः, आरुः। संयोगादिति किम्? चक्रुः। गुणप्रतिषेधविषये पुनः प्रसवार्थं [=गुणोत्पत्त्यर्थं] वचनम्। वृद्धिस्तु भवत्येव- सस्मार। ऋतः संयोगेन विशेषणादर्त्तिग्रहणम्। तिव्निर्देश उत्तरार्थः ॥९॥

## क्य-यङा-ऽऽशीर्ये ॥४।३।१०॥

म० वृ०—संयोगात्परो य ऋकारस्तदन्तस्य धातोरर्त्तेश्च क्ये, यङि आशीःसम्बन्धिनि ये च परे 'गुणः' स्यात्। स्मर्यते, अर्यते, सास्मर्यते, अरार्यते, स्मर्यात्, अर्यात्। औपदेशिक[स्वाभाविक] संयोगग्रहणादिह न गुणः, संस्क्रियते, संचेस्क्रियते, रिः शक्याशीर्ये (४।३।११० इति) ऋतो रिः। ऋत इत्येव-आस्तीर्यते, आतेस्तीर्यते। अर्त्तेस्तिव्निर्देशाद् यङ्-लुपि न गुणः- आरियात्, अर्यियात् ॥१०॥

अव० —'आरियात्, अर्यियात्' इत्यत्र 'ऋंक् गतौ, अत्यर्थमियर्त्ति (इति) यङ्, द्वित्वम्, 'बहुलं लुप्' (३।४।१४ इति) यङ् लुप्यते, 'रिरौ च लुपि' (४।१।५६) इत्यनेन र्, रि; 'ऋतोऽत्' (४।१।३८ इति) अभ्यासे अः, 'रिः शक्याशीर्ये' इत्यनेन धात्वृकारस्य रिः, 'आरियात्' अत्र रो रे लुग्दीर्घश्चा० (१।३।४१) इत्यनेन अभ्यासे अकारस्य आ, र् लुप्यते,

'अर्य्यियादि'-त्यत्र "इवर्णादेरस्वे स्वरे यवरलम्" (१।२।२१ इति) यत्वं कृत्वा 'रिः शकया०' इति 'रिः' कार्यः ॥१०॥

## न वृद्धिश्चाविति क्ङिल्लोपे ॥४।३।११॥

म० वृ०—अविति प्रत्यये यः कितो ङितश्च लोपस्तस्मिन् सति 'गुणो वृद्धिश्च न' स्यात्। यङ्-लोपे-चेच्यः, नेन्यः, लोलुवः, नरीनृजः*(मरीमृजः)[1]। क्ङिदिति किम्? रागी, रागः। ॥११॥

अव०-'चेच्यः' इत्यादि, "चिंग्ट् चयने, णींग् प्रापणे, लूग्श् छेदने, पूग्श् पवने" भृशं पुनः पुनः वा चिनोति, नयति, लुनाति, पुनाति (इति) 'व्यञ्जनादेरेकस्वरा०' (३।४।९) इति यङ्, द्वित्वम्, 'आगुणावन्यादेः' (४।१।४८) इति गुणः- चे, ने, लो, पो; 'चेचीयते, नेनीयते, लोलूयते, पोपूयते" इति वाक्ये कृते, 'अच्०' (५।१।४९) इत्यनेन अच्, 'अचि' (३।४।१५) इति सूत्रेण यङ् लुप्यते, यङ् सस्वर एव लुप्यते, यदि पुनः 'अतः' (४।३।८२) इति सूत्रेण यकाराकारो लुप्यते ततो यङ् लोपः (तर्हि) 'स्वरस्य परे प्राग्विधौ' (७।४।११०) इति सूत्रबलात् लुप्तोऽकारः स्थानिवत् भवति, स्थानित्वे च गुणप्राप्तिरेव नास्ति, इति हेतोः 'अचि' (३।४।१५) इत्यनेन सस्वरो यङ् लुप्यते। यङ् लोपानन्तरं 'चेच्यः, नेन्यः' (इति) अत्र 'योऽनेकस्वरस्य (२।१।५६) इत्यनेन धातुस्वरस्य यः; 'लोलुव' इत्यत्र धातोरिवर्णोवर्ण०' (२।१।५०) इत्यनेन उकारस्य उव्, (एवं) पोपुवः। [1]"ऋतः स्वरे वा' (४।३।४३) इत्यनेन वृद्धिप्राप्तिः। केचित्तु दधीवाचरति (इति) क्विप्, क्विपो लोपः, दधयनं दध्या इति स्वमते वाक्यम्, मतान्तरे तु दध्यनं दध्या इति वाक्ये 'शंसिप्रत्ययात्' (५।३।१०५) इत्यनेन अप्रत्ययः, दधयन्तं प्रयुङ्क्ते इति स्वमते परमते च 'प्रयोक्तृ०' (३।४।२०) णिग्, अप्रत्यये गुणः, णिगि वृद्धिः, एतं गुणवृद्ध्योः प्रतिषेधमिच्छन्ति, तन्मतसंग्रहार्थं वृत्तौ क्ङिल्लोपे=कितो ङितश्च लोपे इत्युक्तं सूरिणा ★। एतच्चाचार्यस्य संमतम्। वृत्तौ ङिल्लोपोदाहरणं दर्शितम्। किल्लोपे दध्या, दध्ययति इति उदाहरणं ज्ञातव्यम्। वितिप्रत्यये तु दधयति। 'रागी' इत्यत्र 'रञ्ज्ञींच् रागे" रञ्जतीत्येवं शीलः (इति) 'युजभुजभजरञ्ज०' (५।२।५०) इत्यनेन घिनण्, 'अकट्-घिनोश्च रञ्जेः' (४।२।५०) इत्यनेन 'न' लुप्यते-- रागी। 'राग' इत्यत्र नलोपे सति (वृद्धेः) प्रतिषेधो मा भूत् ॥११॥

## भवतेः सिज्लुपि ॥४।३।१२॥

म० वृ०--सिचो लुपि 'भवतेर्गुणो न' स्यात्। अभूत्, अभूताम्, अभूः। सिज्लुपीति किम्? अत्यभविष्ट। तिव्निर्देशाद्यङो लुपि न प्रतिषेधः- अबोभोत् ॥१२॥

## सूतेः पञ्चम्याम् ॥४।३।१३॥

म०वृ०--सूतेः पञ्चम्यां 'गुणो न' स्यात्। सुवै,

* अत्र 'मरीमृजः' इत्यस्य स्थाने मकारे नकार भ्रान्त्या 'नरीनृजः' इति लिखितमिति संभाव्यते, यतः बृहद्वृत्त्यादिषु 'मरीमृजः' इत्येव दृष्टिपथमवतरति, अत्रावचूरौ 'ऋतः स्वरे वा' इत्यादिपाठोऽपि 'मरीमृजः' इत्येनमेवोदाहरणमाश्रित्य घटामटति।

★ इदमुक्तं भवति—केचित्तु 'दधीवाचरति' इति क्विप्, 'अप्रयोगीद्' इति तल्लोपे, 'शंसिप्रत्ययादः' इति अप्रत्यये 'दध्या' इत्यत्र गुणस्य, तथा 'दधीवाचरति' इति क्विप्, तल्लोपे, शतृप्रत्यये परे दधयन्, 'दधयन्तं प्रयुङ्क्ते' इति [दधि-णि-अ-ति] 'दध्ययति' इत्यत्र वृद्धेः प्रतिषेधमिच्छन्ति। तन्मतसंग्रहार्थं "क्ङिल्लोपे सति अविति प्रत्यये परे गुणवृद्धी न भवतः" इति व्याख्येयम्। 'दध्या' इत्यत्र स्वमते 'दधयनम्' परमते च 'दध्यनम्' इति वाक्यं कार्यम्। 'दध्ययति' इत्यत्र स्वपरोभयमते 'दधयन्तं प्रयुङ्क्ते' इत्येवमेव वाक्यं कर्तव्यम्, अत्र परस्य शवप्रत्ययस्य वित्त्वादुभयमते गुणसद्भावाद्। 'दध्या' इत्यत्र स्वमते तु गुणसद्भावाद् 'दधया' इति भवति। एवं 'दध्ययति' इत्यत्र स्वमते वृद्धिसत्त्वाद् दधाययति इति भवति।

सुवावहै। तिवनिर्देशाद्यङो लुपि गुणः--सोषवाणि, सोषवाव ॥१३॥

## युक्तोपान्त्यस्य शिति स्वरे ॥४।३।१४॥

म०वृ०— कृतद्वित्वस्य धातोरुपान्त्यनामिनः स्वरादौ शिति प्रत्यये परे 'गुणो न' स्यात्। नेनिजानि, अनेनिजम्; वेविषाणि अवेविषम्; बेभिदीति, अबेभिदम्; मोमुदीति,अमोमुदम्; नर्नृतीति अनर्नृतम्। युक्तेति किम्? वेद, वेदानि, अवेदम्। शितीति किम्? निनेज, बिभेद। स्वर इति किम्? नेनेक्ति, मोमोक्ति ॥१४॥

## ह्विणोरप्विति व्यौ ॥४।३।१५॥

म०वृ०— ह्विण्धात्वोर्नामिनः स्वरादावपिति, अविति च शिति परे यथासङ्ख्यं 'वकारयकारादेशौ' भवतः। [1]जुह्वति, यन्ति, यन्तु; मा स्म यन्, [2]शतृ,- यन्तौ, यन्तः। शितीत्येव-जुहुवतुः, ईयतुः, ईयुः। अप्वितीति किम्? पुस्,- अजुहवुः; वित्- अयानि [इंण्क् गतौ आनि गुणः] आयन्नित्यत्र 'एत्यस्तेर्वृद्धिः' (४-४-३०) इति वृद्धिरपवादत्वात्। ॥१५॥

अव०–स्वरादौ शिति प्रत्यये परे, कीदृशे? अपिति अविति च इति व्याख्येयम्। प् च व् च= प्व्, प्=पकारो व्=वकार इत्=अनुबन्धो यस्य शित्प्रत्ययस्य= स प्वित्, न प्वित् = अप्वित्, तस्मिन्। [1] अन्तु,--जुह्वतु, कतीह जुह्वानाः। (एवं) [2]यन्।'ईयतुः ईयुः,' अत्र पूर्वं द्विर्वचनम्, ततः 'इणः' (२।१।५१) इत्यनेन धातोरिकारस्य (इय्,) न य्। ईयतुः ईयुः इत्यस्याग्रे स्वरादाविति किम्? जुहुवः, इतः इति व्यावृत्तिः ॥१५॥

## इको वा ॥४।२।१६॥

म० वृ०–इकः [इंक् स्मरणे इत्यस्य] स्वरादाविति 'शिति यकारो वा' स्यात्। अधियन्ति, अधीयन्ति; अधियन्तु, अधीयन्तु; कतीहाधियानाः, कतीहाधीयानाः ॥१६॥

अव०-(एवं) मा स्माधियन्, मा स्माधीयन् ॥१६॥

## कुटादेर्ङिद्वदञ्णित् ॥४।३।१७॥

म०वृ०–कुटादेर्गणात् परो ञितृणितृवर्जितः प्रत्ययो 'ङिद्वत्' स्यात्। कुटिता, कुटितुम्, कुटितव्यम्, कुटित्वा। [1]अञ्णिदिति किम्? उदकोटि, उत्कोटः, उच्चुकोट ॥१७॥

अव०–तुदाद्यन्तः कुटत् कौटिल्ये इत्यारभ्य गुरैति उद्यमे धृत् कुटादिः इति पर्यन्तः कुटादिर्गणः। [1]एवं नुविता, नुवितुम्, धुविता, धुवितुमित्यादि। 'न्यनुवीद्' इत्यत्र सिचो ङित्त्वात् "सिचि परस्मै समानस्याङिति" (४।३।४४) इत्यनेन वृद्धिरपि (न) भवतीत्यर्थः ॥१७॥

## विजेरिट् ॥४।३।१८॥

म०वृ०–विजेरिट् 'ङिद्वत्' स्यात्। उद्विजिता, उद्विजिष्यते, उद्विजितव्यम्। इडिति किम्? उद्वेजनम्, उद्वेजयति इत्यपि ॥१८॥

## वोर्णोः ॥४।३।१९॥

म०वृ०–ऊर्णोतेरिट् 'ङिद्वद्वा' स्यात्। प्रोर्णुविता, प्रोर्णविता ॥१९॥

## शिदवित् ॥४।३।२०॥

म०वृ०–धातोः परो विद्वर्जितः शित्प्रत्ययो 'ङिद्वत्' स्यात्! [वर्तमानातस्,-]इतः,स्तुतः, अधीते, दीव्यति, सुनुतः, तुदति, क्रीणाति, अधीयन्, सिद्धान्तमधीयानः, जिनाति, गृह्णाति, विध्यति, घ्नन्ति। अविदिति किम्? एति। कथं प्लवन्ते? अन्तरङ्गत्वाद् गुणे कृते शवो [1]लोपात्, स्थानिवद्भावाद्वा ॥२०॥

अव०–[1]"लुगस्यादेत्यपदे" (२।१।११३) इत्यनेन शव् लुप्यते ॥२०॥

## इन्ध्यसंयोगात्परोक्षा किद्वत् ॥४।३।२१॥

म० वृ०–इन्धेरसंयोगान्ताच्च धातोः पराऽवित् परोक्षा 'किद्वत्' स्यात्। समीधे, समीधाते,

निन्यतुः, बिभिदुः, ऊचुः, जजागरुः, सुषुपतुः, सुषुपुः। इन्ध्यसंयोगादिति किम्? सस्रंसे। अविदित्येव- निनय, निनयिथ ॥२१॥

अव०–'ङिद्वत्' इति प्रकृते, कोऽर्थः? ङिद्वत् इत्यधिकारे प्रस्तुतेऽपि, यत् 'इन्ध्यसंयोगा० इत्यत्र सूत्रे 'किद्वत्' इति वचनं कृतम्, तत् यजादिवचिस्वपीनां य्वृदर्थं जागर्तेश्च गुणार्थम्। ङिद्वद्भावे कृते हि य्वृत् गुणो द्वावपि न स्याताम्, यथा-स्वपितः, स्वपन्ति,जागृतः, जाग्रति, जाग्रत्,जागृयात्। 'इन्ध्यसंयोगात्परोक्षा'०इति सूत्रे विशेषोऽयं ज्ञातव्यः ।२१।

## स्वञ्जेर्नवा ॥४।३।२२॥

म० वृ०–स्वञ्जेः परोक्षा 'किद्वत्' स्यान्नवा [विकल्पेन]। परिषस्वजे, परिषस्वञ्जे ॥२२॥

## ज-नशो न्युपान्त्ये तादिः क्त्वा ॥४।३।२३॥

म० वृ०–जकारान्तान्नशेश्च नकारे उपान्त्ये सति तकारादिः क्त्वा 'किद्वन्नवा' स्यात्। रक्त्वा, रङ्क्त्वा, भक्त्वा, भङ्क्त्वा; नश्-नष्ट्वा, नंष्ट्वा; ['नशो धुटि' (४।४।१०९) इति नोऽन्तः]। नीति किम्? भुक्त्वा। तादिरिति किम्? विभज्य, अञ्जित्वा ॥२३॥

## ऋत्-तृष-मृष-कृश-वञ्च-लुञ्च-थ-फः सेट् ॥४।३।२४॥

म० वृ०–न्युपान्त्ये सति एभ्यः क्त्वा सेट् 'किद्वन्नवा' स्यात्। [ 'ऋत् घृणागतिस्पर्धेषु' ] ऋतित्वा, अर्त्तित्वा; तृषित्वा, तर्षित्वा; मृषित्वा, मर्षित्वा; कृशित्वा कर्शित्वा; वचित्वा, वञ्चित्वा; [ऊदितो वा (४।४।४२) इति इट्,] लुचित्वा, लुञ्चित्वा; श्रथित्वा, श्रन्थित्वा; ग्रथित्वा, ग्रन्थित्वा; गुफित्वा, गुम्फित्वा। न्युपान्त्य इत्येव- कोथित्वा, पोथित्वा। सेडिति किम्? वञ्च्-वक्त्वा [ऊदितो वा (४।४।४२)इतीट्विधेर्विकल्पत्वादत्र नेट्] वक्ष्यमाण-'क्त्वा' (४।३।२९) इत्यनेन क्त्वि प्रतिषेधे प्राप्ते विकल्पार्थमिदम् ॥२४॥

अव०–न्युपान्त्ये इति प्रवाहत एवोक्तमस्ति, यतः ऋत्तृषमृषकृशानां नोऽन्तस्य सम्भव एव नास्ति, वञ्चलुञ्चथफान्तानां★व्यभिचाराभावात् वञ्चादीनां पाठसिद्धं नोऽन्तत्वम्। अत एव बृहद्वृत्तौ "न्युपान्त्य इति विशेषणं थफान्तानाम्, नान्येषाम्, सम्भवव्यभिचाराभावात्" इत्युक्तम्। थान्त-, 'श्रन्थश् मोचनप्रतिहर्षयोः' 'ग्रन्थश् सन्दर्भे'। फान्त,-'गुफ गुम्फन् ग्रन्थने'। 'कोथित्वा, पोथित्वा' इत्यत्र 'कुथच् पूतिभावे' (इति) कुथ्, 'पुथच् हिंसायाम्' (इति) पुथ्, व्यावृत्तिबलादुत्तरेण 'वौ व्यञ्जनादेः सन् चाय्वः' (४।३।२५) इत्यनेनापि न विकल्पः, किन्तु 'क्त्वा' (४।३।२९) इत्यनेन नित्यनिषेधो भवति ॥२४॥

## वौ व्यञ्जनादेः सन् चाय्वः ॥४।३।२५॥

म० वृ०–वौ=उकारे इकारे चोपान्त्ये सति व्यञ्जनादेर्धातोः परः क्त्वा सन् च सेटौ "किद्वन्नवा" स्याताम्, अय्वः=यकारान्ताद्वकारान्ताद्धातोर्न [किद्वत्] स्यात्। द्युतित्वा, द्योतित्वा; मुदित्वा, मोदित्वा; लिखित्वा, लेखित्वा; दिद्युतिषते, दिद्योतिषते, लिलिखिषति, लिलेखिषति[1]। व्यादिति किम्? वर्त्तित्वा। व्यञ्जनादेरिति किम्? ओषिषिषति, ओषित्वा। सेडित्येव- भुक्त्वा, बुभुक्षते। अय्व इति किम्? दिदेविषति, देवित्वा ॥२५॥

अव०–[1]श्वितित्वा, श्वेतित्वा; शिश्वितिषते, शिश्वेतिषते; मुमुदिषते, मुमोदिषते इत्यपि ज्ञेयम्। ॥२५॥

## उति शवर्हाद्भ्यः क्तौ भावारम्भे ॥४।३।२६॥

म०वृ०—उकारे उपान्त्ये सति शवर्हेभ्योऽदादिभ्यश्च परौ, भावे आरम्भे च विहितौ क्तक्तवतू

★ अयं पाठोऽसङ्गतः। अत्र 'वञ्चलुञ्चोः' इति पाठ आवश्यकः। अग्रे 'वञ्चादीनाम्' इत्यत्रापि 'वञ्चलुञ्चोः' इति पाठोऽपेक्ष्यते। "ऋत्तृषमृषकृशां न संभवः, वञ्चलुञ्चोर्न व्यभिचारः" इति बृहद्वृत्तिलघुन्यासे।

सेटौ 'किद्वद् वा' स्याताम् । कुचितम्, कोचितमनेन [ 'कुच्यते स्म' इति भावे क्तः ] । प्रकुचितः, प्रकोचितः; प्रकुचितवान्, प्रकोचितवान् [प्रकोचितुमारभते स्म आरब्धवान् वा इति क्तक्तवतू ] । अदूभ्यः,- रुदितम्, रोदितमेभिः; प्ररुदितः, प्ररोदितः; प्ररुदितवान्, प्ररोदितवान् । उतीति किम् ? शिवतितम्, प्रशिवतितः । भावारम्भे इति किम् ? रोचते स्म (इति) रुचिता कन्या । सेटाविति किम् ? रोहते स्म (इति) रुढम् । प्ररोहितुमारब्धः=प्ररुढः ॥२६॥

अव०—एवं प्रद्युतितः, प्रद्योतितः; द्युतितमनेन, द्योतितम्, "नवा भावारम्भे" (४।४।७२।इति) इट् । एवं मुदितम्, मोदितमनेन; प्रमुदितः, प्रमोदितः ॥२६॥

## न डीङ्-शीङ्-पूङ्-धृषि-क्ष्विदि-स्विदि-मिदः ॥४।३।२७॥

म०वृ०—एभ्यः परौ सेटौ क्तक्तवतू 'किद्वद् न' भवतः । [1] डयितः, डयितवान्; [2] शयितः, शयितवान्; [3] पवितः, पवितवान्; [4] प्रधर्षितः, [5]प्रक्ष्वेदितः, [6] प्रस्वेदितः' प्रमेदितः, प्रमेदितवान् ञिमिदाङ् स्नेहने । सेटावित्येव--[7]डीनः, डीनवान्; पूतः, पूतवान्; *धृष्टः, क्ष्विण्णः,[卐] स्विन्नः, मिन्नः, मिन्नवान् ॥२७॥

अव०--डीङ्-शीङ्-पूङामनुबन्धनिर्देशो यङ्-लुपि निवृत्त्यर्थः, डेड्यितः, डेड्यितवान्; शेशियतः, शेशियतवान्; पोपुवितः, पोपुवितवान् । [1]"डीङ् विहायसां गतौ" । [2] शीङ्क् स्वप्ने, श्लिषशीङ्० (५।१।९) इति क्तः । [3] पूङ्--क्लिशिभ्यो नवा' (४।४।४५) इति विकल्पेन इट् । [4] ञिधृषाद् प्रागल्भ्ये, (इति) धृष्, प्रधर्षितुमारब्धवान् (इति) क्तक्तवतू, नवा भावारम्भे (४।४।७२।इति) इट्, प्रधर्षितः, प्रधर्षितवान् । [5] 'ञिक्ष्विदाङ् मोचने च' (इति) क्ष्विद् । [6]'ञिष्विदांच् गात्रप्रक्षरणे' 'षः सोऽष्ट्यै०'(२।३।९८ इति) स्विद् । नवा भावारम्भे (४।४।७२) इत्यनेन सर्वत्र इट् । [7]दैवादिकस्यैवायं प्रयोगः, 'डीङ्च् गतौ' 'सूयत्याद्योदितः' (४।२।७०) इति नकारः । मूलोदाहरणे भौवादिक एव 'डयितः', अस्य इडेव । दैवादिकस्य इट्निषेध उक्तोऽस्ति*॥२७॥

## मृषः क्षान्तौ ॥४।३।२८॥

म० वृ०-क्षान्तौ वर्त्तमानान्मृषः परौ सेटौ क्तक्तवतू 'किद्वन्न' स्याताम् । :मृषीत् तितिक्षायाम्' मर्षितः, मर्षितवान् । क्षान्ताविति किम् ? अपमृषितं वाक्यमाह, सासूयं=समत्सरं वचनं वदति । सेटाविति किम् ? 'मृषू सहने च' मृष्टः, मृष्टवान् ॥२८॥

## क्त्वा ॥४।३।२९॥

म० वृ०-धातोः परः सेट् क्त्वा 'किद्वन्न' स्यात् । देवित्वा, सेवित्वा, वर्त्तित्वा । सेडित्येव-कृत्वा ॥२९॥

## स्कन्द-स्यन्दः ॥४।३।३०॥

म० वृ०-स्कन्दिस्यन्दिभ्यां परः क्त्वा 'किद्वन्न' स्यात् । स्कन्त्वा, स्यन्त्वा; प्रस्कन्द्य, प्रस्यन्द्य; सेटि तु 'क्त्वा' (४।३।२९) इत्यनेनैव 'स्यन्दित्वा' इत्येव भवति, अनिडर्थं वचनम् ॥३०॥

## क्षुध-क्लिश-कुष-गुध-मृड-मृद-वद-वसः ॥४।३।३१॥

म० वृ०--नेति निवृत्तम् । एभ्यः परः क्त्वा सेट् :किद्वत्' स्यात् । क्षुधित्वा, क्लिशित्वा, कुषित्वा, गुधित्वा, मृडित्वा, मृदित्वा, उदित्वा, उषित्वा । 'क्त्वा' (४।३।२९) इति प्रतिषेधे 'वौ व्यञ्-

* धृष-शसः प्रगल्भे (४।४।६६) इति नेट् ।

卐 'क्ष्विण्णः' इत्यादिषु 'आदितः' (४।४।७१) इति नेट् ।

* डीयश्व्यैदितः क्तयोः (४।४।६१) इति नेट् ।

जनादेः०' (४।३।२५) इत्यनेन विकल्पे च प्राप्ते वचनम् ॥३१॥

अ०-'उषित्वा' इत्यत्र 'क्षुधवसस्तेषाम्' (४।४।४३) इति इट्, 'घस्वसः' (२।३।३६) इत्यनेन षकारः ॥३१॥

## रुद्-विद्-मुष-ग्रह-स्वप-प्रच्छः सन् च ॥४।४।३२॥

म० वृ०-[1]सेडिति निवृत्तम्। एभ्यः परः सन् क्त्वा च 'किद्वत्' स्यात्। रुदित्वा,रुरुदिषति; *विदित्वा, विविदिषति; मुषित्वा, मुमुषिषति; गृहीत्वा,[2] जिघृक्षति; सुप्त्वा, सुषुप्सति; [3]पृष्ट्वा, पिपृच्छिषति ॥३२॥

अव०-रुदविदमुषां 'वौ व्यञ्जनादेः सन् चाय्वः' (४।३।२५) इति विकल्पे, ग्रहेस्तु 'क्त्वा' (४।३।२९) इत्यनेन प्रतिषेधे च प्राप्ते सति 'रुदविदमुष०' इति सूत्रं कृतमित्यर्थः। [1]स्वपप्रच्छोरिटोऽसम्भवात्।[2] 'जिघृक्षति', 'ग्रहीश् उपादाने' ग्रहीतुमिच्छति (इति) सन्, द्वित्वम्, 'रुदविद०' इत्यनेन सन् किद्वत्, 'ग्रहव्रश्चभ्रस्जप्रच्छः' (४।१।८४) इत्यनेन य्वृत्-रकारस्य ऋ, 'हो धुट् पदान्ते' (२।१।८२। इति) हस्य ढः, 'गडदबादेः (२।१।७७) इत्यनेन गकारस्य घः, 'षढोः कस्सि' (२।१।६२ इति) ढस्य क्, 'नाम्यन्तस्थाकवर्गा०' (२।३।१५) इत्यनेन सस्य षत्वम्। [3]'पृष्ट्वा' इत्यत्र प्रच्छ्, क्त्वा, किद्वद्भावात् 'ग्रहव्रश्चभ्रस्जप्रच्छः' (४।१।८४) इत्यनेन य्वृत्-रस्य ऋ, 'अनुनासिके च च्छ्वः शूट्' (४।१।१०८) इत्यनेन छकारस्य स्थाने तालव्यशकारः, 'यजसृजमृज०' (२।१।८७) इत्यनेन शकारस्य षकारः, तवर्गस्य श्चवर्ग० (१।३।६०) इत्यनेन प्रत्ययतकारस्य टः ॥३२॥

## नामिनोऽनिट् ॥४।३।३३॥

म० वृ०-नाम्यन्ताद्धातोरनिट् सन् 'किद्वत्' स्यात्। निनीषति ॥३३॥

अव०-एवं चिचीषति, लुलूषति, चिकीर्षति इत्यपि ॥३३॥

## उपान्त्ये ॥४।३।३४॥

म० वृ०-नामिन्युपान्त्ये सति धातोरनिट् सन् 'किद्वत्' स्यात्। भिद्,-बिभित्सते, बुभुत्सते[1]। अनिडित्येव– विवर्त्तिषते[2] ॥३४॥

अव०-[1]बुध्, सन्, द्वित्वम्, 'गडदबादेश्चतुर्थान्तस्यैकस्वरस्यादेः०' (२।१।७७। इति) बकारस्य भः। एवं बिभृत्सति। [2]एवं विवर्धिषते। नामिन इत्येव- यियक्षति, यियक्षते ॥३४॥

## सिजाशिषावात्मने ॥४।३।३५॥

म०वृ०-नामिन्युपान्त्ये सति धातोः परे आत्मनेपदविषयेऽनिटौ सिजाशिषौ 'किद्वद्' भवतः। अभित्त, भित्सीष्ट; बुध,-अबुद्ध, भुत्सीष्ट। आत्मने इति किम्? अस्राक्षीत्। उपान्त्य इत्येव- अचेष्ट। अनिडित्येव- अवर्धिष्ट, वर्द्धिषीष्ट ॥३५॥

अव०-'अस्राक्षीत्', सृज्, अद्यतनीदि, सिच्, 'सः सिजस्तेर्दिस्योः' (४।३।६५। इति) ईत्, 'अः सृजिदृशोऽकिति' (४।४।१११ इति) धातुविचाले अकारः, 'व्यञ्जनानामनिटि' (४।३।४५) इति वृद्धिः, 'यजसृजमृजराजभ्राज०'. (२।१।८७) इति जस्य षत्वम्, 'षढोः कः सि' (२।१।६२) इति षस्य कः, 'नाम्यन्तस्थाक०' (२।३।१५) इति सस्य षः। एवमद्राक्षीत्। नामिन इत्येव– अयष्ट,यक्षीष्ट ॥३५॥

## ऋवर्णात् ॥४।३।३६॥

म० वृ०-ऋवर्णान्ताद्धातोरात्मनेपदविषयेऽनिटौ सिजाशिषौ 'किद्वद्' भवतः। अकृत, कृषीष्ट; अतीर्ष्ट, तीर्षीष्ट; अपूर्ष्ट, पूर्षीष्ट। अनिडिति किम्? अतरिष्ट, तरिषीष्ट ॥३६॥

अव०-"अतीर्ष्ट, अपूर्ष्ट, तीर्षीष्ट, पूर्षीष्ट"; एषु

* विदेति 'विदक् ज्ञाने' इत्यस्य ग्रहणम्, नान्येषाम्, तेषां हि निषेधाभावात् किद्वदेव क्त्वा, न च वाच्यं "वौ व्यञ्जनादेः०" इति विकल्पः, तत्र सेटीति विशेषणात्।

'एकधातौ कर्मक्रियैका०' (३।४।८६) इत्यनेन कर्मकर्त्तरि आत्मनेपदं भवति । आत्मनेपदसम्बन्धितप्रत्यये सति 'स्वरदुहो वा' (३।४।९०) इति सूत्रेण विकल्पेन ञिच्, विकल्पत्वादत्र न ञिच्, कर्मविवक्षायां सत्यां तु नित्यं ञिच् प्राप्नोति ॥३६॥

## गमो वा ॥४।३।३७॥

म० वृ०—गमेरात्मनेपदविषये सिजाशिषौ 'किद्वद्वा' स्याताम्। समगत, समगंस्त चैत्रः; संगसीष्ट, संगंसीष्ट ॥३७॥

अव०—(एवम्) अगसाताम्, अगंसाताम् ग्रामौ चैत्रेण; गसीष्ट, गंसीष्ट चैत्रेण चैत्रः ।(? ग्रामः) । समगतेत्यादौ 'समो गमृच्छ०' (३।३।८४) इति आत्मनेपदम् ॥३७॥

## हनः सिच् ॥४।३।३८॥

म० वृ०—हनेः परः आत्मनेपदविषयः सिच् 'किद्वत्' स्यात्। आहत,आहसाताम्, आहसत॥३८॥

## यमः सूचने ॥४।३।३९॥

म० वृ०--सूचने वर्त्तमानाद् यमेः परः आत्मनेपदविषयः सिच् 'किद्वत्' स्यात्। उदायत। सूचन इति किम्? [1]आयंस्त कूपाद्रज्जुम् ॥३९॥

अव०-उदायत, उदायसाताम्, उदायसत, अत्र 'आङो यमहनः स्वेऽङ्गे च' (३।३।८६) इत्यात्मनेपदम्। सकर्मकात् 'समुदाङो यमेरग्रन्थे' (३।३।९८) इत्यात्मनेपदम्। परदोषाविष्करणं सूचनमुच्यते । [1]उद्धृतवानित्यर्थः ॥३९॥

## वा स्वीकृतौ ॥४।३।४०॥

म० वृ०-स्वीकारार्थाद् यमेरात्मनेपदविषयः सिच् 'किद्वद्वा' स्यात्। उपायत, उपायंस्त महास्त्राणि। स्वीकृताविति किम्? आयंस्त पाणिम् ॥४०॥

अव०-(एवम्) उपायत, उपायंस्त कन्याम्; 'यमः स्वीकारे'(३।३।५९) इत्यात्मनेपदम्। उपायत उपायंस्त इत्युदाहरणविषये पूर्वकविप्रयोगाविमौ–"मोपयध्वं भयं सीताम्, नोपायंस्त दशाननः" ॥४०॥

## इश्च स्था-दः ॥४।३।४१॥

म० वृ०--स्थादासंज्ञकात्परः आत्मनेपदविषयः सिच् 'किद्वत्' स्यात्, तद्योगे च स्थादोरन्तस्य इकारादेशः। उपास्थित, दाम्,-व्यत्यदित, व्यत्यदिषातां वस्त्रे, देङ्,-अदित पुत्रम्, डुदांग्क्,-अदित धनम्, दोंच्,-व्यत्यदित दण्डौ, दृधें,-व्यत्यधित स्तनौ, डुधांग्क्,-अधित भारम्। स्थाद इति किम्? दांवक् दैव्,-व्यत्यदास्त [1] ॥४१॥

अव०--व्यत्यदितेत्यत्र 'क्रियाव्यतिहारेऽगतिहिंसाशब्दार्थहसोह्वहश्चानन्योन्यार्थे' (३।३।२३) इत्यनेनात्मनेपदम्। (एवं) [1]व्यत्यदासाताम्, व्यत्यदासत ॥४१॥

## मृजोऽस्य वृद्धिः ॥४।३।४२॥

म० वृ०--मृजेर्गुणे सत्यकारस्य 'वृद्धिर्भवति'। मार्ष्टि, मार्ष्टा, मार्ष्टव्यम्; मार्जिता, मार्जकः, संमार्जनम्, [1] सम्मार्गः। अत इति किम्? मृज्यते, मृष्टः [2] ॥४२॥

अव०--[1]'क्तेऽनिटश्चजोः कगौ घिति' (४।१।१११) इति गत्वम्। [2]एवं मरीमृज्यते, मृष्टवान् ॥४२॥

## ऋतः स्वरे वा ॥४।३।४३॥

म० वृ०--मृजेः ऋकारस्य स्वरादौ प्रत्यये परे 'वृद्धिर्वा' स्यात्। परिमार्जन्ति, परिमृजन्ति। ऋत इति किम्? [1]ममार्ज, मार्जयति। स्वर इति किम्? मृष्टः, मृष्ठः [थस्] ॥४३॥

अव०–परिमार्जन्तु; परिमृजन्तु; पर्यमार्जन्, पर्यमृजन्; परिममार्जतुः, परिममृजतुः; परिमार्जन्, परिमृजन् इत्यपि ज्ञेयानि। [1]'ममार्ज,' अत्र गुणे कृते 'मृजोऽस्य वृद्धिः' (४।३।४२) इत्यनेन नित्यं वृद्धिः, न त्वनेन विकल्पः ॥४३॥

## सिचि परस्मै समानस्याङिति ॥४।३।४४॥

म० वृ०--समानान्तस्य धातोः परस्मैपदविषये सिचि अङिति परे 'आसन्ना वृद्धिः' स्यात् । अचैषीत् , अनैषीत्,अकार्षीत् , अनेनायीत् । [1]परस्मै इति किम् ? अच्योष्ट, अप्लोष्ट ॥४४॥

अव०--अयावीत् , अलावीत् , अतारीत् (इत्यपि) । 'अच्योष्ट, अप्लोष्ट' इत्यत्र नित्यत्वादन्तरङ्गत्वाच्च पूर्वं गुणो भवति, गुणे कृते हि सिचो लुप् न प्राप्नोति ॥४४॥

## व्यञ्जनानामनिटि ॥४।३।४५॥

म० वृ०--व्यञ्जनान्तस्य धातोः परस्मैपदविषयेऽनिटि सिचि परे समानस्य 'वृद्धिः' स्यात् । अपाक्षीत् , अभैत्सीत् , अरौत्सीत् । बहुवचनं जात्यर्थम् , तेनानेकव्यञ्जनव्यवधानेऽपि वृद्धिः, रञ्ज् ,-अराङ्क्षीत् ; भञ्ज् ,-अभाङ्क्षीत् , -अताक्षीत् । समानस्येत्येव-- उदवोढाम् । अनिटीति किम् ? अतक्षीत् , अकोषीत् , अदेवीत् , अनर्त्तीत् ॥४५॥

अव०--'अताक्षीत्' , 'तक्षौ त्वक्षौ तनूकरणे' (इति) तक्ष, दि, अट् , 'सिजद्यतन्याम्' (३।४।५३। इति सिच् ,) 'सः सिजस्तेर्दिस्योः' (४।३।६५) इत्यनेन सिचः पर ईत् , 'धूगौदितः' (४।४।३८) इत्यनेन विकल्पेन इट् , यत्र न इट् तत्र 'व्यञ्जनानामनिटि' इत्यनेन उपान्त्यदीर्घः,'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) इत्यनेन क्षमध्ये ककारो लुप्यते, ततः षढोः कः सि' (२।१।६२) इति षस्य कः, 'नाम्यन्तस्था०' (२।३।१५) इति सस्य षः । 'अतक्षीत्' इति व्यावृत्त्युदाहरणम्, 'इट ईति' (४।३।७१) इति सूत्रेण सिच् लुप्यते । 'उदवोढाम्' इति, उत्पूर्ववह, अद्यतनीताम्, 'अड्धातोरादिः०' (४।४।२९। इत्यट् ) 'सिजद्यतन्याम्' (३।४।५३। इति सिच् ) 'व्यञ्जनानामनिटि' इति वृद्धिः आ, वाह् , 'धुड्ह्रस्वाल्लुगनिटः०' (४।३।७०) इति सिचो लोपः, 'हो धुट्पदान्ते' (२।१।८२) इत्यनेन हकारस्य ढः, 'अधश्चतुर्थात्तथोर्धः' (२।१।७९) इत्यनेन क्तकारस्य धकारः, 'तवर्गस्य श्चवर्गष्टवर्गाभ्याम्०' (१।३।६०) इत्यनेन धकारस्य ढः, 'सहिवहेरोच्चावर्णस्य' (१।३।४३) इत्यनेन धातुढकारो लुप्यते, 'एकदेशविकृतमनन्यवत्' इति न्यायात् वाहेरपि ओत्वम् , सूत्रे वहेरित्युक्तम् , तदनन्तरं भूतपूर्वगत्या, ढस्य परेऽसत्त्वाद् वा व्यञ्जनान्तधातुत्वे सति पुनरपि 'व्यञ्जनानामनिटि इत्यनेन (ओकारस्य) वृद्धिः प्राप्नोति, परं 'समानस्येत्येव' इति व्यावृत्तिबलात् वृद्धिः प्रतिषिध्यते, उदवोढामिति सिद्धम् ॥४५॥

## वोर्णुगः सेटि ॥४।३।४६॥

म० वृ०--ऊर्णोः सेटि सिचि परस्मैपदविषये 'वृद्धिर्वा' स्यात् । प्रौर्णावीत् , प्रौर्णवीत् ; प्रौर्णुवीत् ['संयोगात्' (२।१।५२) इति) उव् ]परस्मै इत्येव-प्रौर्णविष्ट । सानुबन्धोपादानं यङ्लुपि निवृत्त्यर्थम्-प्रौर्णोनावीत् ॥४६॥

## व्यञ्जनादेर्वोपान्त्यस्यातः ॥४।३।४७॥

म० वृ०--व्यञ्जनादेर्धातोरुपान्त्यस्य अतः [= अकारस्य] सेटि सिंचि परस्मैपदे 'वृद्धिर्वा' स्यात् । अकाणीत् , अकणीत् ; अश्वासीत् , अश्वसीत् ; गौरिवाचारीत्=अगावीत् , अगवीत् । व्यञ्जनादेरिति किम् ? मा भवानटीत् । उपान्त्यस्येति किम् ? अरक्षीत् । अत इति किम् ? अदेवीत् । सेटीत्येव- दह, अधाक्षीत् ॥४७॥

अव०--गौरिवाचारीत् इति वाक्ये 'कर्तुः क्विप् गल्भक्लीबहोडात्तु ङित्' (३।४।२५) इति क्विप् , (तस्य) लोपश्च, अद्यतनीदि, सिच् , 'सः सिज०' (४।३।६५- इति) ईत् , 'स्ताद्यशितो०' (४।४।३२। इति) इट् , 'इट ईति' (४।३।७१। इति) सिचो लोपः, गुणः,[ ? 'ओदौतोऽवाऽऽव् ' स्वरे (१।२।२४) इत्यवादेशः ] ततो वृद्धिः । 'अरक्षीत्' इत्यस्याग्रे 'अवधीत्' इत्यपि ज्ञेयम् । हनंक् , अद्यतनीदिविषये 'अद्यतन्यां वा त्वात्मने'(४।४।२२) इत्यनेन वध आदेशोऽदन्तः, सिच् , ईत् , इट् , 'अतः' (४।३।८२) इत्यनेन अकारो लुप्यते ॥४७॥

## वद-व्रज-लः ॥४।३।४८॥

म० वृ०-वदव्रजोर्लान्तानां[1] रान्तानां[2] च धातूनामुपान्त्यातः[3] परस्मैपदे सेटि सिचि 'वृद्धिः' स्यात्। अवादीत्, अव्राजीत्, [4]अज्वालीत्, अक्षारीत्। पूर्वस्यापवादोऽयम् ॥४८॥

अव०-[1]लकारान्तानाम्। [2]रकारान्तानाम्। [3]उपान्त्याऽकारस्य। [4](एवम्) अचालीत्। उपान्त्यस्येत्येव- अश्वल्लीत् ॥४८॥

## न श्वि-जागृ-शस-क्षण-हृम्येदितः ॥४।३।४९॥

म० वृ०-श्विजागृशसक्षणां धातूनाम्, हान्तमान्तयान्तानामेदितां च धातूनां परस्मैपदे सेटि सिचि 'वृद्धिर्न' स्यात्। अश्वयीत्, अजागरीत्, अशसीत्, अक्षणीत्, हान्त,- अग्रहीत्, मान्त,- अवमीत्, यान्त,- अव्ययीत्, एदित्,- अकगीत्, श्विजाग्रोः 'सिचि परस्मै समानस्य०' (४।३।४४) इति वृद्धौ अन्येषां च 'व्यञ्जनादेर्वोपान्त्यस्यातः' (४।३।४७) इति विकल्पे प्राप्ते वचनम् ॥४९॥

अव०-एकारानुबन्धानां 'न श्विजागृ०' (इति) सूत्रे विशेषोऽयम्,- श्विजागृादीनां यङ्लुबन्तानामपि वृद्धिप्रतिषेधः,- अशेश्वयीत्, अजर्जागरीत्, अशाशसीत्, अचंक्षणीत्, अचाचहीत्, असंस्यमीत्, अवाव्ययीत्; एदितां तु यङो लुपि वृद्धिप्रतिषेधो न भवति,- अजाहासीत्। सेटीत्येव- अधाक्षीत् ॥४९॥

## ञ्णिति ॥४।३।५०॥

म० वृ०-ञिति णिति च प्रत्यये परे धातोरुपान्त्यातो[1] 'वृद्धिः' स्यात्। अपाचि, पाकः, पाचकः, पपाच, पाचयति ॥५०॥

अव०-ञिति=ञकारानुबन्धे। णिति=णकारानुबन्धे। [1]उपान्त्याऽकारस्य ॥५०॥

## नामिनोऽकलि-हलेः ॥४।३।५१॥

म० वृ०-नाम्यन्तस्य धातोर्नाम्नो वा कलिहलिवर्जितस्य ञ्णिति परे 'वृद्धिः' स्यात्। अनायि, अकारि, कारः, कारकः। कलिहलिवर्जनान्नाम्नोऽपि वृद्धिः,- पटुमाख्यातवान्=अपीपटत्, [1]अलीलघत्। कलिहलिवर्जनं किम्? अचकलत्, अजहलत् ॥५१॥

अव०-[1]'अपीपटत्, अलीलघत्' इत्यत्र णिच्, ततो वृद्धिः, 'नामिनोऽकलि०' इत्यनेन वृद्धिः औं, 'त्र्यन्त्यस्वरादेः' (७।४।४३) इत्यनेन अन्त्यस्वरादिलोपः; 'पट्, लघ्' इति शब्दः, ततोऽद्यतनीदि, 'णिश्रिद्रुस्रु०' (३।४।५८) इति ङप्रत्ययः, द्विर्वचनम्, अभ्यासेऽसमानलोपित्वात् सन्वद्भावः, 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) इति दीर्घः) ॥५१॥

## जागुर्ञि-णवि ॥४।३।५२॥

म० वृ०-जागर्त्तेर्ञौ,णव्येव ञ्णिति प्रत्यये 'वृद्धिः' स्यात्। अजागारि, जजागार। ञिणवीति किम्? जागरयति, जागरकः, [1]जागरंजागरम्, जागरो वर्त्तते[2] ॥५२॥

अव०-'अभीक्ष्णं[1] जागरणं पूर्वम्' इति वाक्ये 'ख्णम् चाभीक्ष्ण्ये' (५।४।४८) इति ख्णम्, 'भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक् तमबादेः' (७।४।७३) इति द्वित्वम्, सिः, 'अव्ययस्य' (३।२।७) इति लुप्। पूर्वेणैव सिद्धे नियमार्थोऽयं योगः, ञौ णव्येवेति। [2]एवं साधु जागरी, 'साधौ' (५।१।१५५)इति णिन्। ॥५२॥

## आत ऐः कृञ्ञौ ॥४।३।५३॥

म० वृ०-आकारान्तस्य धातोर्ञ्णिति कृति प्रत्यये ञौ च परे 'ऐः' स्यात्। दायः,(अत्र घञ्,) दायकः, [1]शतं दायी, [2]गोदायो याति,अदायि, ['भावकर्मणोः' (३।४।६८) इति ञिच्,] दायिष्यते, ['स्वरग्रहदृश०' (३।४।६९) इति ञिच्]। कृदिति किम्? ददौ ॥५३॥

अव०-[1]दास्यतीति दायी, 'णिन् चावश्यकाधमर्ण्ये' (५।४।३६) इत्यनेन णिन्, 'आत ऐः कृञ्ञौ'

(इति) ऐः, ❀ शतस्य दायी, शतं दायी, अत्र 'एष्य-दृणेनः' (२।२।९४) इत्यनेन षष्ठी न भवति, किन्तु कर्मणि द्वितीयैव भवति। एवं सहस्रं दायी इत्यपि । △ [२]गां ददातीति गोदायः, ★'कर्मणोऽण्'(५।३।१४) इति सूत्रेण 'वत्स्यति गम्यादिषु' (? दिः) (५।३।१) इति कृत्तृतीयपादोक्तेन 'अण्' भवति, न प्रथम-कृत्पादोक्तेन 'कर्मणोऽण्' इत्यनेन, तस्याऽविषयः ॥५३॥

## न जन-वधः ॥४।३।५४॥

म० वृ०-जनिवध्योः कृति ञ्णिति ञौ च परे 'वृद्धिर्न' स्यात्। घञ्,- प्रजनः; घ्यण्,- जन्यः; णक,-जनकः; ञिच्,- अजनि; वधः, वध्यः, वधकः, अवधि। वधि-रिह सूत्रे 'वधि बन्धने' इत्ययं गृह्यते, "भक्षकश्चे-न्नास्ति बधकोऽपि न विद्यते." हन्यादेशस्य तु वधेर-दन्तत्वाद् वृद्धेरप्रसङ्ग एव। [अद्यतन्यां वा त्वात्मने (४।४।२२) इत्यनेन हनो 'वध' (इति) अकारान्ता-देशः ॥५४॥

## मोऽकमि-यमि-रमि-नमि-गमि-वमाचमः ॥४।३।५५॥

म० वृ०--मान्तधातोः कम्यादिवर्जितस्य ञ्णिति कृत्प्रत्यये ञौ च परे 'वृद्धिर्न' स्यात्। शमः, शमकः, शमी,[२] अशमि[१] । कम्यादिवर्जनं किम्? कामः, कामुकः, अकामि; यामः, यामकः, अयामि। राम इत्यादि[३]। कथमामः, आमकः, आमि; ? 'अमण् रोगे' इत्यस्य भविष्यति। भौवादिकस्य त्वमः 'अमः, अमक' इति। कुरुवावित्येव,- शशाम, निशा-मयते [शमिण् आलोचने] ॥५५॥

अव०-[१]एवं तमः,तमकः,तमी,(अतमि;) दमः,दमकः, दमी, (अदमि)। [२]शाम्यतीत्येवंशीलः- शमी, 'शमष्ट-काद् घिनण्' (५।२।४९) इति (घिनण्); (एवं) तमी, दमीत्यपि । [३]आदिशब्दात् रामः,रामकः, अरामि; नामः, नामकः,अनामि; आगामुकः, आगामि; वामः, वामकः,अवामि;आचामः, आचामकः,आचामि ॥५५॥

## विश्रमेर्वा ॥४।३।५६॥

म० वृ०--विपूर्वश्रमेर्ञ्णिति कृत्प्रत्यये ञौ च परे 'वृद्धिर्वा न' स्यात्। [घञ्-]विश्रामः, विश्रमः;[१] [णक,-] विश्रामकः, विश्रमकः; [ञिच्,-] व्यश्रामि, व्यश्रमि। वीति किम्? [घञ्,-] श्रमः, [णक,-] श्रमकः, [ञिच्,-] अश्रमि ॥५६॥

अव०-[१] अविश्रमं यावदिदं शरीरम् ॥५६॥

## उद्यमोपरमौ ॥४।३।५७॥

म० वृ०--उत्पूर्वयमेरुपपूर्वरमेर्घञि 'वृद्ध्य-भावो' निपात्यते। उद्यमः, उपरमः ॥५७॥

अव०- उद्यमोपरमौ इति सूत्रे उदुपाभ्या-मन्यत्र उपसर्गान्तरे सति पूर्वेण वृद्धिरेव- यामः, संयामः, सुयामः; रामः, विरामः ॥५७॥

---

❀ अत्र 'शतस्य दायी' इति पाठोऽसङ्गतोऽधिकश्च प्रतीयते ।

△ अत्र "गां दास्यामीति यातीति गोदायो याति" इति विग्रहेण भाव्यम्।

★ 'गोदायः' इति अण्प्रत्ययेनैव भवति,अण्प्रत्ययः 'कर्मणोऽण्' इति सूत्रेण विहितः, परं 'कर्मणोऽण्' इति द्वे सूत्रे स्तः,तयोः केन सूत्रेण 'गोदायः' इति भवतीत्याशङ्कायामत्राह–"'कर्मणोऽण्''इति सूत्रेण'वत्स्यति गम्यादिषु'इति कृत्तृतीयपादोक्तेन अण् भवति" इत्यादि । अत्रायं हेतुः–प्रथमपादोक्तस्य 'कर्मणोऽण्' इति सूत्रस्य 'आतो डोऽह्वावामः' इत्यपवादसूत्रम्, उत्सर्गापवादोभयसूत्रप्राप्तौ 'उत्सर्गादपवादः' इति न्यायादपवादसूत्रं प्रवर्तते,अतः 'गां ददाति' इत्यत्र 'आतो डोऽह्वा-वा-मः' इति सूत्रस्य प्रवर्तनाद् 'गोदः' इति भवति, न तु 'कर्मणोऽण्' इत्यनेन 'गोदायः' इति, न च 'असरूपोऽपवादे वोत्सर्गः प्राक्क्तेः' इत्यनेनात्रोत्सर्गप्रत्ययस्यापि प्रवर्तनात् 'गां ददाति' इत्यत्र प्रथमपादोक्तेन 'कर्मणो ऽण्' इति सूत्रेणाणपि प्रवर्तते इति वाच्यम्, असरूपोऽपवादे०' इति सूत्रेणापवादेनासमानरूपस्यैवौत्सर्गिकप्रत्ययस्या-पवादविषये प्रवर्तनात्, अनुबन्धोऽप्रयोगीति डाणप्रत्यययोः सारूप्याच्च ।

## णिद्वाऽन्त्यो णव् ॥४।३।५८॥

म० वृ०–परोक्षातृतीयत्रिकैकवचनमन्त्यो णव् 'णिद् वा न' स्यात् ,[१] णित्त्वाश्रयं कार्यं पक्षे प्रतिषिध्यते । सुप्तोऽहं किल विललप, विललाप; निनय, निनाय; जजागर, जजागार; वा णित्त्वप्रतिषेधात् कुटादीनां गुणविभाषा– चुकुट, चुकोट ॥५८॥

अव०–[१] ञ्णिति (४।३।५०) इत्यादिविधिकार्यम् । अन्त्य इति किम् ? स पपाच । णित्त्वाश्रयस्य विकल्पनात् णवाश्रयं कार्यं नित्यमेव भवति,– अहं पपौ । ननु एवं तर्हि णवाश्रयत्वात् 'जागुर्ञ्णिति' (४।३।५२) इत्यनेन जजागरेत्यत्र नित्यं वृद्धिः प्राप्नोति, सत्यम् , 'णिद्वान्त्यो णव्' (? 'जागुर्ञ्णिति' ।४।३।५२) इत्यनेन नात्र वृद्धिः क्रियते, नियमविधायकत्वादस्य; वृद्धिश्च पूर्वेणैव भवति, तत्र णित्त्वमाश्रीयते इति भावः ।।५८॥

## उत और्विति व्यञ्जनेऽद्वेः ॥४।३।५९॥

म० वृ०– अद्विरुक्तस्य उकारान्तस्य धातोर्व्यञ्जनादौ विति प्रत्यये 'औः' स्यात् । यौति, रौति; यौषि, यौमि, यौतु; अयौत् , अयौः, अरौः[१] । धातोरिति किम् ? तनोमि[२] । वीतोति किम् ? रुतः । व्यञ्जने इत्येव– यवानि, स्तवानि । अद्वेरिति किम् ? जुहोति, योयोति । तथा तोः स्थाने तातङो ङित्त्वात् स्थानिवत्त्वं बाध्यते, तेन– युतात्[३] ॥५९॥

अव०–विति=वकारानुबन्धे प्रत्यये परे सति । (एवं) [१]रौषि, रौमि, रौतु, अरौत् । (एवं) [२]सुनोमि । केचित्तु यङ्लुबन्तस्यापि उकारान्तधातोः औत्वमिच्छन्ति,– नोनौति, रोरौति, योयौति । ( एवं )[३] 'रुतात्' इत्यत्र न औकारः ॥५९॥

## वोर्णोः॥४।३।६०॥

म० वृ०–ऊर्णोतेरद्विरुक्तस्य व्यञ्जनादौ [१]विति 'और्वा' स्यात् । प्रोर्णौति, प्रोर्णोति । अद्वेरिति किम् ? प्रोर्णोनोति । पूर्वेण नित्यं प्राप्ते विकल्पः ॥६०॥

अव०- [१]वकारानुबन्धे प्रत्यये परे सति॥६०॥

## न दि-स्योः ॥४।३।६१॥

म० वृ०–'ऊर्णोतेर्दिस्योः परयोरौर्न' स्यात् । प्रौर्णोत् , प्रौर्णोः ॥६१॥

अव०–❀ 'वोर्णोः' इति पूर्वसूत्रेण प्राप्तोऽपि औः, 'न दिस्योः' इति ∴ पृथग्योगात्प्रतिषिध्यते इति भावः । 'स्वरादेस्तासु' ( ४।४।६१।इति ) वृद्धिः ॥६१॥

## तृहः श्नादीत् ॥४।३।६२॥

म० वृ०–तृहेः श्नात्पर 'ईत्=ईकारः' स्यात् , व्यञ्जनादौ विति । तृणेढि[१] । व्यञ्जनादावित्येव- तृणहानि [२] । वितीत्येव- तृण्ढः ॥६२॥

अव०–[१] 'हिसु तृहप् हिंसायाम्' (इति) तृह्, वर्तमानातिव् , एवं सिव् , मिव् ,'रुधां स्वरात् श्नो०' इति धातुविचाले श्नः, 'तृहः श्नादीत्' ( ४।३।६२। इतीत् ,) 'हो धुट्०' (२।१।८२ इति ) हस्य ढः, 'अधश्चतुर्था०' (२।१।७९। इति) तस्य धः, 'तवर्गस्य श्च०' (१।३।६०।इति) धस्य ढः, 'ढस्तड्ढे' (१।३।४२।इति) एको ढो लुप्यते, 'तृणेढि' इति सिद्धम् , एवं तृणेक्षि, तृणेह्मि । [२](एवम् ) अतृणहम् ॥६२॥

## ब्रूतः परादिः॥४।३।६३॥

म० वृ०–[ब्रुवः ऊत्=ब्रूत् , तस्मात् , इति रचना ] ब्रूतेरुकारात्पर 'ईत्' स्यात् , व्यञ्जनादौ विति, स 'परादिः[=परावयवो']' भवति । ब्रवीति, ब्रवीषि, ब्रवीमि, अब्रवीत् । ऊत इति किम् ? ७
आत्थ[१] । व्यञ्जनादावित्येव- अब्रवम् ॥६३॥

❀ अत्र 'वोर्णोः' इति पाठोऽसङ्गतः, 'उत और्विति' व्यञ्जनेऽद्वेः' इति पाठः सङ्गतः ।

∴ अन्यथा 'वोर्णोरदिस्योः' इत्येकमेव सूत्रं क्रियेत ।

**अव०**– [1]ब्रू , वर्तमानासि, 'ब्रुवः पञ्चानां पञ्चाहश्च' (४।२।११८। इति) ब्रूस्थाने आह् ; सिस्थाने थः, 'नह्राहोर्धतौ' (२।१।८५) इत्यनेन हकारस्य तकारः ॥६३॥

## यङ्-तु-रु-स्तोर्बहुलम् ॥४।३।६४॥

**म० वृ०**–यङ्लुबन्तात् 'तुरुस्तु' इत्येतेभ्यश्च धातुभ्यः पर 'ईत्' स्यात् , व्यञ्जनादौ त्रिति, स च 'परादिः', बहुलं=शिष्टप्रयोगानुसारेण । क्वचिद्वा– बोभवीति, बोभोति; नर्नृतीति, नर्नर्त्ति[1] । क्वचिन्न,– वृत् (इत्यस्य) वर्वर्त्ति, कृ (इत्यस्य) चर्कर्मि । अन्ये तु- वावदीति, लालपीति, रोरवीति (इति) नित्यम् । [तुंक् वृत्तिहिंसापूरणेषु। टुक्षु रु कुंक् शब्दे ] तुंक्,- तवीति, तौति; ' रु–[2]रवीति, रौति; स्तु- स्तवीति, स्तौति । व्यञ्जनादावित्येव– बोभवानि अबोभवम् , लालपानि, तवानि; रवाणि स्तवानि । वितीत्येव- बोभूतः, लालप्तः, स्तुतः; [सर्वत्र तस् ] । अद्वेरित्यनुवृत्तेः 'तुतोथ, तुष्टोथ' इत्यत्र न ईत् ॥६४॥

**अव०**– (एवं) [1] लालपीति, लालप्ति । यङ्तुरुस्तोरिति सूत्रे 'यङ्' इति सामान्याभिधानेन यङ्लुबन्तस्यैव ग्रहणम् , यङन्तधातोरात्मनेपदित्वाद् व्यञ्जनादिवित्प्रत्ययस्यासम्भवात् । यङ्लुबन्तं हि परस्मैपदिनं धातुमाहुः (अदादौ) । यङ्लुबन्ताच्च तिव्सिवादयः प्रत्यया भवन्ति ॥६४॥

## सः सिजस्तेर्दिस्योः ॥४।३।६५॥

**म० वृ०**–सिजन्ताद्धातोरस्तेश्च सकारान्तात्परः 'परादिरीत् ' स्याद्दिस्योः परयोः । अकार्षीत् , अकार्षीः; आसीत् , [1]आसीः ॥※॥ स इति किम् ? अदात् , अभूत् ॥६५॥

**अव०**-[1]'आसीत् , आसीः' इत्यत्र ह्यस्तन्या एव दिव् , सिव् ; न अद्यतन्याः दि,सि; अद्यतन्यां सत्यां हि वक्ष्यमाणसूत्रेणास्तेः 'भूः' आदेशः स्यात् । किं च अस्तेश्च सकारान्तात्पर ईत् इति पुनर्व्याख्यानं व्यर्थं स्यात् ,सिच्द्वारेणैव ईत् भवेत् । 'सः सिजस्ते'–रिति पाठोऽलीकः स्यादिति ह्यस्तन्या एव 'दिव् सिव् ' अस्तेः परो भवति ॥६५॥

## [1]पिबैति- [2]दा-भू[3] -स्थः सिचो लुप् परस्मै न चेट् ॥४।३।६६

**म० वृ०**–एभ्यः परस्य 'सिचो लुप्' स्यात् , परस्मैपदे परे, न चेट्=लुब्योगे चैतेभ्यो धातुभ्यः पर 'इट् न' स्यात् । अपात् , [2]अगात् , अध्यगात् , दासंज्ञ,- अदात् , अधात् ; अभूत्[3], अस्थात् । सिच्लोपः परत्वादीतं बाधते । परस्मै इति किम् ? अपासत पयांसि चैत्रेण । लुकमकृत्वा लुप्करणं स्थानिवद्भावाभावार्थम् , तेन- अबोभोद् , अत्र न वृद्धिः ॥६६॥

**अव०**–'[1]पिब' इति निर्देशात् 'पा पाने' इति भौवादिकस्यैव ग्रहणम् ,पातिपायत्योर्न ग्रहणम् ,तयोः 'अपासीद्वनं वस्त्रं वा' इति प्रयोगः । [2]सूत्रे एतीति निर्देशात् 'इंण्क् गतौ' 'इंक् स्मरणे' इत्येतयोर्ग्रहणम् ; तयोः 'अगात्' इति उदाहरणम् ; इकोऽध्यगात् । [3]'भू' इति निर्देशात् भवतेः, अस्त्यादेशस्य 'भू' इत्यस्यापि ग्रहणम् । दासंज्ञ इति किम् ? अदासीत् केदारं भोजनं वा ॥६६॥

## ट्धे-घ्रा-शा-छा-सो वा ॥४।३।६७॥

**म० वृ०**–एभ्यः 'सिचो लुप् परस्मैपदे वा' स्यात् , लुब्योगे एभ्यो 'नेट्' । अधात् , अधासीत् ; अघ्रात् , अघ्रासीत् ; अशात् , अशासीत् ; अछात् , अछासीत् ; असात् , असासीत् । परस्मै इति किम् ? अधिपातां स्तनौ वत्सेन ॥६७॥

**अव०**–ट्धेः (धातोः) पूर्वेण नित्यं प्राप्ते,शेषेभ्योऽप्राप्ते विकल्पोऽयम् ॥६७॥

※ नन्वत्र 'अस्तेः सिः हस्त्वेति' इति स्लोपेऽस्तेः कथं सकारान्तत्वम् ? इति चेद् , न, 'आदेशागमः' इति न्यायेनादावेवाकारागमः ।

## तन्भ्यो वा [1]त-थासि ण्णोश्च ।।४।३।६८।।

म० वृ०– तनादेर्गणात् 'सिचो लुप्' ते थासि च प्रत्यये परे 'वा' स्यात्, लुब्योगे 'नकारस्य णकारस्य च लुप्; न चेट्'। अतत, अतनिष्ट; अतथाः, अतनिष्ठाः; असत, असनिष्ट; असथाः, असनिष्ठाः। एवमक्षत [2] इत्यादि ।।६८।।

अव०–[1]तप्रत्यये परे थास्प्रत्यये च परे। 'तन्भ्यो वा तथासि ण्णोश्च' इति सूत्रे परस्मैपदे इति निवृत्तम्, थास्ग्रहणात्। थास्साहचर्याच्च तप्रत्ययोऽप्यात्मनेपदसम्बन्ध्येव गृह्यते, तेन- अतनिष्ट यूयमित्यत्र ते सिचोऽलुप्। '[2]अक्षत', आदिशब्दात् अक्षणिष्ट, अक्षथाः, अक्षणिष्ठाः; आर्त्त, आर्णिष्ट; आर्थाः, आर्णिष्ठाः; अतृत, अतर्णिष्ट; अतृथाः, अतर्णिष्ठाः; अघृत, अघर्णिष्ट; अघृथाः, अघर्णिष्ठाः; अवत, अवनिष्ट; अवथाः, अवनिष्ठाः; अमत, अमनिष्ट; अमथाः, अमनिष्ठाः ।।६८।।

## सनस्तत्रा वा ।।४।३।६९।।

म० वृ०–सनोतेस्तत्र लुपि [सिचो लुपि] सत्यां सन्धातोरन्तस्य 'वा आः' स्यात्। असात, असत; असाथाः, असथाः। तत्रेति किम्? असनिष्ट, असनिष्ठाः ।।६९।।

अव०–'असनिष्ट, असनिष्ठाः'; अत्र 'तन्भ्यो वा०' (४।३।६८) इत्यादिना विकल्पेन सिचो लुप्, अत्र सिच् न लुप्तः ।।६९।।

## धुड्-ह्रस्वाल्लुगनिटस्त-थोः ।।४।३।७०।।

म० वृ०–धुडन्तात् ह्रस्वान्ताच्च धातोरनिटः 'सिचो लुक्' स्यात्तकारादौ थकारादौ च प्रत्यये परे। अभैत्ताम्, [1]अभित्थाः;ह्रस्व,- अकृत, [2]अकृथाः; आहत, आहथाः[3]। धुड्ह्रस्वादिति किम्? अमंस्त, अमंस्थाः। [4]अच्योष्ट,– अत्र लुकः परत्वेऽपि नित्यत्वात्प्रागेव गुणः। तथोरिति किम्? अभित्साताम्, अभित्सत; अकृषाताम्, अकृषत। लुबधिकारे लुग्ग्रहणं सिज्लुक्यपि स्थानित्वेन तत्कार्यप्रतिपत्त्यर्थम् [=सिचमाश्रित्य वृद्ध्यादिकार्यप्रतिपत्त्यर्थम्], तेन [5]'अवात्ताम्, अवात्तम्, अवात्त;' अत्र सिचि क्रियमाणा वृद्धिः सिजभावेऽपि सिद्धा। तथासीत्यनुवर्त्तमाने तथग्रहणं व्याप्त्यर्थम्, [6]तेन साहचर्यं नास्ति। तथोरिति द्विवचनं यथासङ्ख्यपरिहारार्थम् ।।७०।।

अव०–(एवम्) [1]अभैत्तम्, अभैत्त, अभित्त इति प्रयोगा ज्ञेयाः। [2]एवं समस्थित, समस्थिथाः। [3]'आहत, अहथाः'; अत्र 'यमिरमिनमिगमिहनिमनिवनतितनादेर्धुटि क्ङिति' (४।२।५५) इति नकारो लुप्यते। (एवम्) [4]अच्योष्ठाः। [5]'अवात्ताम्' इत्यादि, 'वसं निवासे' (इति) वस्, अद्यतन्याः ताम्, तम्, त; 'सस्तः सि' (४।३।९२) इति सूत्रेण धातुसकारस्य तकारः, तत्पश्चात् पूर्वं 'धुड्ह्रस्वाल्लुग०' (४।३।७०) इति सिच् लुप्यते, सिचो लुक्यपि स्थानित्वात् 'व्यञ्जनानामनिटि' (४।३।४५ इति) वृद्धिः क्रियते। [6]'तेन साहचर्यं नास्ति',–यथा 'तन्भ्यो वा तथासि०' (४।३।६८)........................ (इति सूत्रे थास्साहचर्यात् तप्रत्ययोऽप्) यात्मनेपदी गृह्यते,........ (तथा) धुड्ह्रस्वेत्यत्र थप्रत्ययेन सह तप्रत्ययस्य साहचर्यं न ग्राह्यम्, इ....................(ति परस्मैपदेऽपि 'अभैत्तम्' इत्यादिषु सिचो लुक्, तस्य च स्थानिवद्भावाद् 'व्यञ्जनानाम)निटि' (इति) वृद्धिः ।।७०।।

## इट ईति ।।४।३।७१।।

म० वृ०–इटः परस्य सिचो 'लुक्' स्यादीति परे। अलावीत्, सिचो लुक्यपि स्थानिवद्भावात् वृद्धिः; अग्रहीत्। इट इति किम्? अकार्षीत् ।।७१।।

## सो धि वा ।।४।३।७२।।

म० वृ०–धातोः सकारस्य 'लुग् वा' स्याद्धकारादौ प्रत्यये। चकाधि, चकाद्धि; ['हुधुटो हेर्धिः' (४।२।८३) इति हेर्धिः,] आशाध्वम्, आशाद्ध्वम्; ['तृतीयस्तृतीयचतुर्थे' (१।३।४९) इति सस्य दकारः] ।।७२।।

अव०–'आशाद्ध्वम्' इत्यस्याग्रे 'अलविध्वम्, अलविड्ढ्वम्, इत्यपि ज्ञेयम्, (तत्प्रक्रियैवम्-) अद्य० ध्वम्, सिच्, (इट्) अट्, 'सो धि वा' इत्यनेन सिच्सकारो विकल्पेन लुप्यते, यत्र सो लुप्तः तत्र अलविध्वम्, अन्यत्र 'नाम्यन्तस्था०' (२।३।१५) (इति) सस्य षः, 'तृतीयस्तृतीयचतुर्थे (१।३।४९) इति षस्य डः, 'तवर्गस्य श्चवर्ग०'(१।३।६०) इत्यनेन ध्वमो धस्य ढः। सिच(?सिच्य)नुवर्त्तमाने सग्रहणं सामान्यसकारपरिग्रहार्थम्, तेन प्रकृतिसकारस्य प्रत्ययसकारस्यापि लुग् भवतीत्यर्थः ॥७२॥

## अस्तेः सि हस्त्वेति ॥४।३।७३॥

म० वृ०– अस्तेः सकारस्य सकारादौ प्रत्यये 'लुक्' स्यात्, 'एकारे तु प्रत्यये परे सति सकारस्य हकारः'। असि, [1]व्यतिसे, हस्त्वेति– व्यतिहे[2] ॥७३॥

अव०-[1]'व्यतिसे' इत्यत्र 'असक् भुवि' (इति)अस् व्यतिपूर्वम्,वर्त्तमानासे, 'श्नाऽस्त्योर्लुक्' (४।२।९०) इत्यनेन अस्तेः अकारो लुप्यते, 'अस्तेः सि हस्त्वेति' इत्यनेन अस्तेः सकारो लुप्यते,एवमकारसकारयोर्लोपे प्रत्ययमात्रं 'व्यतिसे'इति पदम्। [2]'व्यतिहे'इत्यस्याग्रे 'भावयामाहे, कारयामाहे चैत्रेण' इति प्रयोगद्वयं द्रष्टव्यम्। (तत्प्रक्रियैवम्–) भू, कृ; णिग्, वृद्धिः; भाव्, कार्; परोक्षा-ए, 'धातोरनेकस्वरादाम्०' (३।४।४६) इत्यनेन परोक्षा-एस्थाने आम्, 'आमन्ताल्वाय्येत्नावय्' (४।३।८५) इत्यनेन णिगस्थाने अय्, 'धातोरनेकस्वरा०'इत्यनेनैव आम्परतः 'अस्, ए' इत्यनुप्रयोगः, 'अस्यादेराः परो०' (४।१।६८। इति) पूर्वस्य आकारः,'अस्तेः सि हस्त्वेति' इति सकारस्य हकारः। एकारे नेच्छन्त्यन्ये सस्य हम्,– भावयामासे, कारयामासे चैत्रेण ॥७३॥

## दुह-दिह-लिह-गुहो दन्त्यात्मने वा सकः ॥४।३।७४॥

म० वृ०–एभ्यः परस्य सक्प्रत्ययस्य 'वा लुक्' स्यात्, दन्त्यादौ आत्मनेपदे। अदुग्ध, अधुक्षत; अदुग्धाः, अधुक्षथाः; अधुग्ध्वम्, अधुक्षध्वम्, अदुह्वहि; अधुक्षावहि इत्यादि[1]। दन्त्येति किम्? अधुक्षामहि ॥७४॥

अव०–'त, थास्, ध्वम्, वहि'– एते प्रत्यया दन्त्या उच्यन्ते;"लृवर्णलवर्गलसा दन्त्याः, वो दन्त्योष्ठ्यः' इति न्यायात्। [2]'दुहदिह०' इति सूत्रे आदिशब्दात् दिह,- अदिग्ध, अधिक्षत; अदिग्धाः, अधिक्षथाः; अधिग्ध्वम्,अधिक्षध्वम्;अदिह्वहि, अधिक्षावहि; लिह,- अलीढ, अलिक्षत; अलीढाः,अलिक्षथाः अलीढ्वम्, अलिक्षध्वम्; अलिह्वहि, अलिक्षावहि; गुह,- न्यगूढ, न्यघुक्षत; न्यगूढाः, न्यघुक्षथाः; न्यगूढ्वम्, न्यघुक्षध्वम्; न्यगुह्वहि, न्यघुक्षावहि; एवमुदाहरण(?णानि) ३२। एषु सर्वत्र 'हशिटो नाम्युपान्त्याददृशोऽनिटः सक्' (३।४।५५। इति सक्,) 'दुहदिह०' इत्यनेन वा सको लुक्, 'भ्वादेर्दादेर्घः' (२।१।८३) इति दुहो हस्य घः, लिहगुहो हस्य 'हो धुट्०' (२।१।८२) इत्यनेन ढः, सकि सति 'गडदबादे:०' (२।१।७७) इत्यनेन दस्य धः गस्य घः, सर्वत्र प्रत्ययत-थोर्धकारः, 'तवर्गस्य०' (१।३।६०) इति धस्य ढः, 'ढस्तड्ढे'(१।३।४२।इति)ढलोपः, उपान्त्यस्य दीर्घः, 'अघोषे प्रथमो०' (१।३।५०। इति) घस्य क्, 'नाम्यन्तस्था०' (२।३।१५) इति सस्य षः ॥७४॥

## स्वरेऽतः ॥४।३।७५॥

म० वृ०–सकोऽकारस्य स्वरादौ प्रत्यये 'लुक्' स्यात्। अधुक्षाताम्, अधुक्षाथाम्, अधुक्षि[1]। स्वर इति किम्! अधुक्षत[2] ॥७५॥

अव०– [1]एवमधिक्षाताम्, अधिक्षाथाम्, अधिक्षि। (एवम्) [2]अधिक्षत ॥७५॥

## दरिद्रोऽद्यतन्यां वा ॥४।३।७६॥

म० वृ०–दरिद्रातेरद्यतन्यां विषयेऽन्तस्य 'वा लुक्' स्यात्। [1]अदरिद्रीत्, अदरिद्रासीत्, [2]अदरिद्रि, अदरिद्रायि ॥७६॥

अव०– [1]'अदरिद्रीत्' इत्यादि, दरिद्रा, अद्यतनी-दि, सिच्, ईत्, विषयव्याख्यानात् 'आदे-

'शाद्रागमो बलवान्' इति न्यायबलात् पूर्वं 'यमिरमिनम्यातः सोऽन्तश्च' (४।४।८६) इति सूत्रेण 'इट् (तथा) सोऽन्तो न कार्यः' इति हेतोः पूर्वं विकल्पेन दरिद्र आकारलोपः; पक्षे- इट् सोऽन्तश्च, 'इट ईति' (४।३।७१ इति) सिच् लुप्यते। [२]'अदरिद्रि,' अद्यतनीत, 'भावकर्मणोः' (३।४।६८ इति) ञिच्; विषयव्याख्यानबलात् 'आत ऐः कृञ्चौ' (४।३।५३) इत्यनेन ऐकारो न भवति, पक्षे ऐः स्यात् ॥७६॥

अशित्यस्सन्-णकच्-णकाऽनटि ॥४।३।७७॥

म० वृ०—सकारादिसन्-णकच्-णकानट्वर्जितेऽशिति विषये 'दरिद्रोऽन्तस्य लुक्' स्यात्। [१]दरिद्रयति, दरिद्रितुम्; दरिद्यते, दरिद्रातीति दरिद्रः,[२] दरिद्राणम्=दरिद्रः[३]। अशितीति किम्? दरिद्राति। सन्नादिवर्जनं किम्? दिदरिद्रासति, दरिद्रायको[४] याति, दरिद्रायिका,[५] दरिद्रायकः,[६] दरिद्यते (इति) अनट्- दरिद्राणम्। सनः सादिविशेषणं किम्? दिदरिद्रिषति ['इवृधभ्रस्जदम्भ०' (४।४।४७) इति इट्]॥७७॥

अव०—[१]विषयविज्ञानाद् 'अर्त्तिरीव्ली०' (४।२।२१) इति न पोऽन्तः। [२]विषयसप्तमीविज्ञानादेव पूर्वमाकारलोप एव, तदनन्तरमच्प्रत्ययः क्रियते, न तु 'तन्व्यधीण्श्वसातः' (५।१।६४) इत्यनेन आदन्तलक्षणो णप्रत्ययः। [३]'दरिद्राणम्=दरिद्रः,' अत्र घञि सति 'आत ऐः कृञ्चौ' (४।३।५३) इति ('ऐः') न भवति, विषयसप्तमीविज्ञानात्पूर्वमालोपः। [४]दरिद्रास्यामीति याति इति वाक्ये 'क्रियायां क्रियार्थायां तुम्णकच्भविष्यन्ती' (५।३।१३) इत्यनेन णकच्,— दरिद्रायको याति। [५]तथा दरिद्रातुं पर्यायो=दरिद्रायिका वर्त्तते; 'पर्यायार्हर्णोत्पत्तौ०' (५।३।१२०) इत्यनेन णकप्रत्ययः। [६]दरिद्रातीति दरिद्रायकः, 'णकतृचौ' (५।१।४८ इति णकः)। अक इत्येवं वक्तव्यम्, णकच्णकयोरुपादानं किम्? आशिष्यकनि मा भूत्,— दरिद्यादित्याशास्यमानो=दरिद्रकः ॥७७॥

व्यञ्जनाद्देः सश्च दः ॥४।३।७८॥

म० वृ०—धातोर्व्यञ्जनान्तात्परस्य 'देर्लुक्' स्यात्, यथासम्भवं 'धातुसकारस्य च दः'। अचकाद् भवान्, अन्वशात्, अजागः ॥७८॥

अव०- धातोरित्येव- अभैत्सीत्। अत्र ईतः परादित्वेन सेतोऽपि देर्लुक् प्राप्नोति इति प्रतिषेधः, सिचः परो दिः, न धातोः पर इति न लुक् ॥७८॥

सेः स्-द्-धां च रुर्वा ॥४।३।७९॥

म० वृ०-धातोर्व्यञ्जनान्तात् 'सेर्लुक्' स्यात्, यथासम्भवं 'सकारदकारधकाराणां च वा रुः'। अचकास्त्वम्, अचकात्त्वम्; एवमन्वशास्त्वम्, अन्वशात्त्वम्। सकारस्य रुत्वे सिद्धे[१] पक्षे रुत्वबाधनार्थं वचनम्, ततश्च [२]पक्षे 'धुटस्तृतीयः' (२।१।७६। इति सस्य दः— अभिनस्त्वम्, अभिनत्त्वम्, अरुणस्त्वम्, अरुणत्त्वम्; अजर्घाः, अजर्घः, अजागस्त्वम्। रोरुदित्करणं किम्? [३]उत्वादिकार्यं यथा स्यात्,— अभिनोऽत्र, अरुणोऽत्र ॥७९॥

अव०— 'व्यञ्जनाद् देः सश्च दः' इति सूत्रे ह्यस्तनीसम्बन्धी दिः, तत्साहचर्यात्=तत्प्रत्यासत्तेः 'सेः स्द्धां च रुर्वा' इत्यत्रापि सूत्रे सिरपि ह्यस्तनीसम्बन्ध्येव गृह्यते, तेन 'हिनत्सि' इत्यत्र न 'सेः' लुक्। [१]'सो रुः' (२।१।७२) इत्यनेन रुत्वप्राप्तिः। [२]परं सकारस्य दकारः कार्यः। [३]'अतोऽति रोरुः' (१।३।२०) इत्यनेन उत्वम्, आदिशब्दात् 'रोर्यः' (१।३।२६) इत्यपि ॥७९॥

योऽशिति ॥४।३।८०॥

म० वृ०— व्यञ्जनान्ताद्धातोः परस्य 'यकारस्याशिति लुग्' स्यात्। जङ्गमिता, बेभिदाञ्चक्रे, बेभिद्यते, सोसूचिता, कुषुभिता, मगधकः। धातोरित्येव-- ईर्ष्यिता, पुत्रकाम्यिता। व्यञ्जनादित्येव- लोलूयिता ॥८०॥

अव०— 'योऽशिति' इत्यनेन 'य्' इति स्वरहीनो लुप्यते, न सस्वरो यकारः। यदि सस्वरस्य यकारस्य लुक् स्यात्, तदा 'जङ्गमिता' इत्यादौ

'गमहनजनखन०' (४।२।४४) इत्यनेन उपान्त्यलोपः स्यात् । 'य्' इति व्यञ्जने च लुप्ते स्थानित्वाद् व्यवधायकत्वं स्यात् । ※ प्रत्यये परे यङ् तृच् सूसूनी ता 'अत' (४।३।८२) इति अकारलोपः उपूर्वे यङ् ततः क्यङ् ※ सोसूचिता, सोसूत्रिता, मोमूत्रिता, शाशयिता, कुषुभिता, मगधकः । सूच्यादीनां णिजलोपे शयादेशे च कृते, सर्वोदाहरणेषु 'अतः' (४।३।८२) इत्यनेन अकारलोपे च कृते, धातोर्व्यञ्जनान्तत्वं ● घटितम् । कुषुभमगधशब्दौ कण्ड्वादौ अकारान्तौ, 'धातोः कण्ड्वादेर्यक्' (३।४।८।इति) यक् ।।८०।।

## क्यो वा ।।४।३।८१।।

म० वृ०—धातोर्व्यञ्जनात्क्यस्याशिति 'वा लुक्' स्यात् । समिधमिच्छति (इति) क्यन्, समिधिष्यति, समिध्यिष्यति; समिध्यात्, समिध्यात्; दृषदिवाचरति (इति क्यङ्,) दृषदिष्यते, दृषद्यिष्यते, दृषदिषीष्ट, दृषद्यिषीष्ट । व्यञ्जनादित्येव- पटमिच्छति (इति) पटीयिता, पट इवाचरति (इति) पटायिता ।।८१।।

---

अव०—"क्यो वा" इत्यत्र सामान्यनिर्देशात् क्यन्क्यङो'-र्ग्रहणम् । कयङ्परस्तु व्यञ्जनान्तात् प्राप्तिरेव नास्ति । 'क्यो वा' इति सूत्रे क्य इत्यत्र व्यञ्जनान्तात् 'क्य्' इति परतः षष्ठी (अतो लुकि कृते) लुगर्थी ज्ञातव्या, तेन, 'अतः' (४।३।८२) इति सूत्रेण क्यस्य अकारे लुकि कृते....(ऽनेन 'य्') इति लुप्यते, (अन्यथा) अकारलुगपवादः क्यस्य सस्वरस्य लुक् विज्ञायेत इत्यर्थः । तेनेत्यादिविवेः फलमिदं ज्ञातव्यम् - 'दृषदक' इत्यत्र स्थानिवद्भावे (वृद्ध्यभावः) फलम्, सस्वरक्यलोपे तु स्थानित्वं न स्यात्, समुदायलोपत्वात्, नापि 'न वृद्धिश्चाचिति०' (४।३।११) इत्यनेन वृद्धिनिषेधः स्यात्, तत्र नामिनोऽधिकाराद् । इयमवचूरिः पटायिता इत्यस्याग्रे ज्ञातव्या ।।८१।।

## अतः ।।४।३।८२।।

म० वृ०—अकारान्ताद्धातोर्विहितेऽशिति 'तस्यैव धातोर्लुगन्तादेशः' स्यात् । कथयति, कुषुभ्यति, मगध्यति, प्रचिकीर्ष्य, दृषद्यिष्यते । विहितविशेषणादिह न स्यात्- गतः, गतवान् । अत इति किम् ? याता ।।८२।।

---

अव०—'कथण् वाक्यप्रबन्धे' (इति) कथ सस्वरः, णिगि सति 'अतः' इत्यनेन अकारलोपः, कथ्, अय् इत्यन्तादेशः । ।।८२।।

## णेरनिटि[1] ।।४।३।८३।।

म० वृ०—अनिटि अशिति प्रत्यये परे 'णेर्लुक्' स्यात् । अररक्षत्, आटिटत्, कारणा, कारकः, कार्यते, प्रकार्य । इय्-य्-गुण-वृद्धि-दीर्घता-ऽऽगमानां बाधकोऽयम् । अनिटीत्यत्र विषयसप्तम्यपि, तेन 'चेतन' इत्यत्र प्रागेव णेर्लोपे 'इङितो व्यञ्जनाद्यन्तात्' (५।२।४४) इत्यनः सिद्धः[2] । चेतयते इत्येवं शील इति वाक्ये अनः । अनिटीति किम् ? कारयिता ।।८३।।

---

अव०—[1]'अररक्षत्' इत्यत्र णिगः "संयोगात्" (२।१।५२) इतिसूत्रेण 'इय्' (आदेशो), 'आटिटत्' (इति) अत्र च 'योऽनेकस्वरस्य' (२।१।५६)सूत्रेण 'य्' आदेशे, 'कारणा' इत्यत्र "नामिनो गुणोऽक्ङिति" (४।३।१) इति गुणे, 'कारकः' (इति) अत्र च 'नामिनोऽकलिहलेः' (४।३।५१) इति वृद्धौ, 'कार्यते' इत्यत्र "दीर्घश्च्वियङ्यक्क्येषु च" (४।३।१०८) इति दीर्घे, 'प्रकार्य' इत्यत्र "ह्रस्वस्य तः पित्कृति" (४।४।११३) इति तोऽन्ते च प्राप्ते सति "णेरनिटि" अयं योगो बाधकः कृतः । [2]अन्यथाऽनेकस्वरत्वान् चेतेः

---

※ 'प्रत्यये परे' इत्यतः प्रभृति 'ततः क्यङ्' इति यावत्पाठोऽशुद्धतादिदोषग्रसितो विद्यते ।

● अत्रायं भावः--सोसूचितादिदृष्टान्तत्रिके सूच्यादिधातूनां चुरादित्वाण्णेर्लोपेऽदन्तत्वाच्चाकारलोपे, 'शाशयिता' इत्यत्र शीङो धातोः शयादेशे कृते, 'कुषुभिता मगधकः' इत्यत्र कुषुभमगधधात्वोरदन्तत्वादकारलोपे व्यञ्जनान्तत्वम् ।

-परो 'निन्दहिंसक्लिश०' (५।२।६८) इत्यनेन 'णकः' स्यात् ॥८३॥

[1]सेट्क्तयोः ॥४।३।८४॥

म० वृ०—सेटोः क्तयोः परतो 'णेर्लुक्'स्यात्। कारितः, कारितवान्; गणितः ॥८४॥

अव०-[1]सेट्क्तयोरिति सूत्रे सेडिति किमर्थम्? इटि कृते एव लोपो यथा स्यात्,- शाकितः, शाकितवान्; अन्यथाऽत्र 'एकस्वरादनुस्वारेतः' (४।४।५६) इति सूत्रेण एकस्वरत्वात् 'इट् न' स्यात् ॥८४॥

आमन्ताऽऽल्वाऽऽय्येत्न्वाय् ॥४।३।८५॥

म० वृ०—आम्-अन्त-आलु-आय्य--इत्नुप्रत्ययेषु परेषु 'णेरयादेशः' स्यात्। लुकोऽपवादः। कारयाञ्चकार, ([1]गण्डयन्तः)[2] मण्डयन्तः,([3]गृहयालुः) [4]स्पृहयालुः, स्पृहयाय्यः, महयाय्यः, स्तनयित्नुः ॥८५॥

अव०-[1] 'गडु वदनैकदेशे' [2]'मडुण् भूषायाम्' 'उदितः स्वरान्नोऽन्तः' (४।४।९८) इति गण्ड् मण्ड्; 'गण्डयतात्, मण्डयतात् इत्याशास्यमानः' इति वाक्ये 'तॄजिभूवदिवहिवसिसासादिसाधिमदिगडिगण्डिमण्डिनन्दिरेविभ्यः' (उणा०२२१) इत्युणादिसूत्रेण अन्तप्रत्ययः। [3]गृह्णाति [4]स्पृहयति इत्येवं शीलः (इति) 'शीङ्-श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेरालुः' (५।२।३७।इत्यालुः)। स्पृह्, 'महण् पूजायाम्' (इति) मह अदन्तः, स्पृह्यन्ते मह्यन्ते देवता गुरवोऽस्मिन् (इति) 'श्रुदक्षिगृहिस्पृहिमहेराय्यः' (उ०३७३) इत्युणादिसूत्रेण आय्यप्रत्ययः। 'स्तन धन ध्वन चन स्वन वन शब्दे' (इति) स्तन्, णिग्, 'हृषिपुषिघुषिगदमदिनन्दिगडिमण्डिजनिस्तनिभ्यो णेरित्नुः'(उ०७९७) इत्यनेन उणादिना इत्नुप्रत्ययः ॥८५॥

लघोर्यपि ॥४।३।८६॥

म० वृ०—लघोः परस्य णेर्यपि परे 'अय्' स्यात्। प्रशमय्य, प्रबेभिदय्य, प्रगणय्य। लघोरिति किम्? प्रतिपाद्य। ॥८६॥

अव०'लघोर्यपी'-ति सूत्रे वचनसामर्थ्यादेकेन वर्णेन व्यवधानमाश्रीयते, (तेन) प्रशमः परतो णेः स्थाने 'अय्' सिद्धः ॥८६॥

वाऽऽप्नोः ॥४।३।८७॥

म० वृ०—आप्नोतेः परस्य णेर्यपि परे 'अय् वा' स्यात्। प्रापय्य, प्राप्य। इनुनिर्देशादिङादेशस्यापेः न 'अय्',- अध्याप्य गतः[1] ॥८७॥

अव०—[1]इङ् अध्ययने (इति) अधिपूर्वः (इ), अधीयानं प्रयुङ्क्ते (इति) 'प्रयोक्तृ०' (३।४।२०। इति) णिग्, 'णौ क्रीजीङः' (४।२।१०) इत्यनेन इकारस्य आकारः, 'अर्त्तिरीव्ली०' (४।२।२१) इति पोऽन्तः, इति आप् लाक्षणिकः ॥८७॥

मेङो वा मित् ॥४।३।८८॥

म०वृ०—मेङो यपि 'मिदादेशो वा' स्यात्। अपमित्य, अपमाय याचते ॥८८॥

अव०—*अपमातुं याचते (इति) "निमील्यादिमेङस्तुल्यकर्तृके" (५।४।४६) इति सूत्रेण क्त्वाप्रत्ययः। 'मेङ् प्रतिदाने' इति मेङ् धातुः ॥८८॥

क्षेः क्षी ॥४।३।८९॥

म० वृ०—क्षेर्यपि 'क्षीः' स्यात्। प्रक्षीय ॥८९॥

अव०—'क्षि क्षये' इत्यस्य निरनुबन्धस्य क्षी आदेशः, सानुबन्धस्य 'क्षिषश् हिंसायाम्'इत्यस्य न क्षी, सानुबन्धत्वात् ॥८९॥

क्षय्य-जय्यौ शक्तौ ॥४।३।९०॥

म० वृ०—क्षि जि इत्येतयोः शक्तौ गम्यमानायां 'यप्रत्ययेऽय्' [1] निपात्यते। [2]क्षय्यो व्याधिः, [3] क्षय्यं बटुना; [4] जय्यः शत्रुः, [5] जय्यं राज्ञा। शक्ताविति किम्? अर्हे- क्षेयम्, [6] जेयम् [7] ॥९०॥

अव०—[1]'अय्' इत्यन्तादेशः। [2] क्षेतुं शक्यः, 'य एचातः' (५।१।२८)। [3]शक्यं क्षितुम्, (? क्षेतुम्)।

* प्रतिदातुमित्यर्थः।

[4]शक्यो जेतुम् । [5] शक्यं जेतुम् , (सर्वत्र) 'य एञातः' (५।१।२८ । इति यप्रत्ययः) । [6] क्षेतुं [7] जेतुमर्हः (? अर्हम् )–'शक्तार्हे कृत्याश्च' (५।४।३५। इति) यः ॥९०॥

## क्रय्यः क्रयार्थे ॥४।३।९१॥

म० वृ०–क्रीणातेर्यप्रत्ययेऽय्[1] निपात्यते, क्रयाय चेत् [2]प्रसारितोऽर्थो भवति । क्रय्यो गौः कम्बलो वा । क्रयार्थ इति किम् ? क्रेयं नो धान्यम् , न चास्ति प्रसारितम् ॥९१॥

अव०–[1]अन्तादेशः । [2]धातूनामनेकार्थत्वात् प्रसारितेऽर्थेऽत्र क्रीधातुः ॥९१॥

## सस्तः सि ॥४।३।९२॥

म० वृ०-अशितीत्यनुवर्त्तते । धातोः सकारान्तस्याशिति सकारादौ प्रत्यये विषयभूते 'तकारोऽन्तादेशः' स्यात् । वस् ,- वत्स्यति, अवात्सीत् , एवं वत्सीष्ट चैत्रेण, विवत्सति; अद,- जिघत्सति; घस् ,- घत्स्यति । स इति किम् ? यज् ,- यक्षीष्ट, यक्ष्यति । सीति किम् ? वसिष्यते । विषयसप्तमीविज्ञानात् 'अवात्ताम् , अवात्त' इत्यत्र प्रागेव सस्य तः ॥९२॥

अव०–अवात्तामित्यादिषु सिचोऽनागमने एव पूर्वं सकारस्य तकारः, पश्चात् सिच् । ❀सिचो लुक्यपि वृद्धिर्भवति । ननु सिचो लुक्यपि स्थानित्वात् सस्य तो भवति इति च न वाच्यम् , यतः सकारे तकार उक्तः, सस्य च वर्णविधित्वात् , (वर्णविधौ च स्थानित्वाभावाद् , वर्णविधौ) 'स्वरादेशस्य स्थानित्वं भवति (न तु व्यञ्जनादेशस्य) ॥९२॥

## दीय् दीङः क्ङिति स्वरे ॥४।३।९३॥

म० वृ०–दीङो 'दीयादेशः' स्यात् , क्ङिति अशिति स्वरे परे । उपदिदीये, उपदिदीयानः । क्ङितीति किम् ? उपदानम् । स्वर इति किम् ? उपदेदीयते । परोक्षायामिति सिद्धे 'क्ङिति स्वरे' इत्युत्तरार्थम् ॥९३॥

अव०–दीङो ङित्करणं यङो लुपि दीयादेशनिवृत्त्यर्थम्– उपदेदियितः । 'दीङ्च् क्षये' ॥९३॥

## इडेत्पुसि चातो लुक् ॥४।३।९४॥

म० वृ०-क्ङित्यशिति स्वरे, इटि, एकारे पुसि च परे 'आकारान्तस्य धातोरन्तस्य लुक्' स्यात् । किन् ,- पपुः; ङित् ,- अदधत् ; ['टूधेश्वेर्वा' (३।४।५९) इति 'ङः'] प्रपा;[1] इट् ,- पपिथ; एत्- व्यतिरे [2] पुस् ,- [3]उदगुः, अदुः,[4] अरुः,[5] अलुः । क्ङितीत्येव- दानम् । अशितीत्येव- यान्ति । अक्ङिदर्थं शिदर्थं च इडादिग्रहणम् ॥९४॥

अव०–[1]'प्रपा', अत्र प्रपीयते इति प्रपा, 'उपसर्गादातः' (५।३।११०) इत्यनेनाङ् प्रत्ययः; यदा तु प्रपिबन्त्यस्यामिति प्रपा, 'स्थादिभ्यः कः' (५।३।८२। इति कः) तदा किद्द्वारमध्ये ज्ञेयम् । [2]'रांक् दाने' वर्त्तमाना-ए,एवं व्यतिले,'लांक् आदाने' । [3]'उद्गुः' इत्यत्र 'इंण्क् गतौ' 'इणिकोर्गाः' (४।४।२३।इति) इणो 'गा' आदेशः, अद्यतन्यन् , सिच् 'पिबैति०' (४।३।६६।इति) सिचो लुक् , 'सिज्विदोऽभुवः' (४।२।९२।इति) अन्स्थाने पुस् । [4]'अदुः', दा, अद्यतन्यन् , [5]'अरुः, अलुः'; ह्यस्तन्यन् , 'वा द्विषातोऽनः पुस्' (४।२।९१।इत्यनो पुस् ) ॥९४॥

## संयोगादेर्वाशिष्यैः ॥४।३।९५॥

म० वृ०–धातोः संयोगादेराकारान्तस्य क्ङिति आशिषि परतोऽन्तस्य 'एकारो वा' स्यात् । ग्लेयात् , ग्लायात् । संयोगादेरिति किम् ? यायात् । क्ङितीत्येव- ग्लासीष्ट ॥९५॥

## गा-पा-स्था-सा-दा-मा-हाकः ॥४।३।९६॥

म० वृ०–एषामन्तस्य क्ङित्याशिषि 'एः' स्यात् । गेयात् , पेयात् , स्थेयात् , अवसेयात् , देयात् , धेयात् , मेयात् , हेयात् ॥९६॥

अव०–'कै गै रै शब्दे' (इति गा), न तु 'गाङ् गतौ' । तथा गास्थामध्ये पाठात् भौवा-

❀ धुड्ह्रस्वा० (४।३।७०) इत्यत्र लुबधिकारे लुग्ग्रहणं सिचो लुक्यपि स्थानित्वेन तत्कार्यप्रतिपत्त्यर्थम्, तेनात्र सिचोऽभावेऽपि वृद्धिः सिद्धा ।

दिकयोरेव 'पै पा' इत्येतयोः पाशब्देन ग्रहणम्, आदादिक-'पांक् रक्षणे' इत्यस्य पायादित्येव। 'षोंच् अन्तकर्मणि' अथवा 'क्षै जै सै क्षये' उभावपि साशब्देन (ग्राह्यौ)। दासंज्ञकाः सर्वेऽपि (ग्राह्याः)। माशब्देन "मांक् माने, मांङ्क् मानशब्दयोः, मेंङ् प्रतिदाने" इति त्रयोऽप्यत्र। 'ओहांक् त्यागे' इत्यस्यैव एत्वम्, न तु 'ओहांङ्क् गतौ' (इत्यस्य), सूत्रे 'हाक्' इति पाठात्। तथा गाङ्-माङ्-मेङां यङ्-लुबन्तानामपि एत्वम्, अन्यथा गाङ्-माङ्-मेङामात्मनेपदित्वात् किदाशीर्न सम्भवति, यङो लुपि च परस्मैपदिन एते। हाकः ककारो यङो लुपि एत्वनिषेधाय-जहायात्। शेषाणां गापास्थासादामानां यङो लुप्यपि एत्वं भवतीत्यर्थः, जागेयात्, पापेयात्, तास्थेयात्, अवसासेयात्, दादेयात्, दाधेयात्, मामेयात् इति प्रयोगावली।॥९६॥

## ईर्व्यञ्जनेऽयपि ॥४।३।९७॥

म० वृ०–गादीनामन्तस्य यपवर्जिते क्ङिति अशिति व्यञ्जनादौ प्रत्यये परे 'ईः' स्यात्। गीयते, यङ्,- जेगीयते, गीतः, गीतवान्; पीयते, पेपीयते; पीतः, पीतवान्; पीत्वा इत्यादि[1]। व्यञ्जन इति किम्? तस्थुः। अशितीत्येव- पाहि। अयपीति किम्? प्रगाय, प्रपाय, प्रस्थाय, अवसाय, प्रदाय। कथमापीय? पीङो भविष्यति॥९७॥

---

अव०–[1]आदिशब्दात् स्थीयते, तेष्ठीयते; सो,- सीयते, सै,- सीयते, सेसीयते; दासंज्ञकाः,- दीयते, देदीयते; धीयते, देधीयते; धीतः, धीतवान्; धीत्वा स्तनम्; मा-माङ्-मेङां त्रयाणामपि ग्रहणम्, मीयते, मेमीयते; हाक्–हीयते, जेहीयते; हीनः, हीनवान्; हाङो न ईत्वम्– हायते, जाहायते; इति प्रयोगावली अत्र ज्ञातव्या। स्वरादौ क्ङिति परे 'इडेत्पुसि'० इत्यनेनान्तलोपविधानाद् व्यञ्जनादौ लब्धेऽपि, 'ईर्व्यञ्जनेऽयपि' इत्यत्र व्यञ्जनग्रहणं साक्षाद् व्यञ्जनप्रतिपत्त्यर्थम्, तेन क्विपो लुकि स्थानिवद्भावेनापि न ईत्वम्,- शंस्थाः पुमान्, शं=सुखम्, तत्र तिष्ठति, (इति) क्विप्- शंस्थाः॥९७॥

## घ्राध्मोर्यङि ॥४।३।९८॥

म० वृ०–घ्राध्मोर्यङि परे 'ईः' अन्तादेशः स्यात्। जेघ्रीयते, देध्मीयते। यङि इति किम्? घ्रायते, ध्मायते। यङो लुपि न ईः,- जाघ्रीतः, दाध्मीतः, 'एषामीर्व्यञ्जनेऽदः' (४।२।९७) इत्यनेन द्वित्वे सति ईकारः॥९८॥

---

अव०–'घ्राध्मोर्यङि' इति सूत्रे यङो लुपि जाघ्रीतः, दाध्मीतः; अत्राचार्यमते यङो लोपे कृते 'घ्राध्मोर्यङि' इत्यनेन न ईत्वम्। केचित् यङो लुप्यपि इच्छन्ति,- जेघ्रीतः, देध्मीतः॥९८॥

## हनो घ्नीर्वधे ४।३।९९॥

म० वृ०–हन्तेर्वधे=हिंसायां वर्त्तमानस्य यङि 'घ्नी' आदेशः स्यात्। जेघ्नीयते, द्विषो जेघ्नीयिषीष्ट वः। वध इति किम्? गतौ- जङ्घन्यते॥९९॥

## ञ्णिति घात् ॥४।३।१००॥

म० वृ०–ञ्णिति परे 'हन्तेर्घात्' इत्यादेशः स्यात्। घञ्,- घातः, घातयति, घातकः, घातंघातम् [अभीक्ष्णं हननं पूर्वम्-'ख्णम् चाभीक्ष्ण्ये' (५।४।४८) इति ख्णम्प्रत्ययः]॥१००॥

## ञिणवि घन् ॥४।३।१०१

म० वृ०–ञौ णवि च प्रत्यये 'हन्तेर्घन्' आदेशः स्यात्। अघानि, जघान, अहं जघन॥१०१॥

---

अव०–'जघान' इत्यत्र 'अङे हिहनो हो घः पूर्वात्' (४।१।३४) इत्यनेनापि सिद्धे 'ञिणवि घन्' इति सूत्रे णवग्रहणं 'ञ्णिति घात्' (४।३।१००) इत्यस्य घातादेशबाधनार्थमित्यर्थः। 'णिद्वाऽन्त्यो णव्' (४।३।५८) इति विकल्पपक्षे जघान॥१०१॥

## नशेर्नेश् वाऽङि ॥४।३।१०२॥

म० वृ०–नशेरङि परे 'नेश्' आदेशः स्याद्वा। अनेशत्, अनशत्; अनेशन् अनशन्, अनेशम्, अनशम्[1]॥१०२॥

अव०-अनेशदित्यादौ लृदिद्द्युतादिपुष्यादेः० (३।४।६४) इत्यनेन अङ्। [१](एवम्) अनेशताम्, अनशताम् ॥१०२॥

## श्वयत्यसू-वच-पतः श्वा-ऽस्थ-वोच-पप्तम् ॥४।३।१०३॥

म० वृ०—श्वयति, असू, वच, पत इत्येषां यथासङ्ख्यं 'श्व, अस्थ, वोच, पप्त' इत्यादेशाः अङि परे भवन्ति। [१]अश्वत्, अश्वः, आस्थत्, [२]अपास्थत, [३]अवोचत्, [४]अपप्तत्। श्वयतेस्तिव्निर्देशो यङो लुपि निवृत्त्यर्थः,[५] [तेन यङो लुपि श्वयतेर्न 'श्व' आदेशः-] ★अशोश्वियत, △अशोशुवत् ["वा परोक्षायङि" (४।१।९०) इति सूत्रेन विकल्पेन] ॥१०३॥

अव०-[१]'टृधे-श्वेर्वा'*(३।४।५९) अङ्, अश्वत्, (एवम्) अश्वन्। [२]'अपास्थत' इत्यत्र 'उपसर्गादस्योहो वा' (३।३।२५) इत्यनेनात्मनेपदम्, 'शास्त्यसूवक्तिख्यातेरङ्' (३।४।६०। इत्यङ्)। [३]वच् ब्रूग् वा। [४]'लृदिद्द्युतादि०' (३।४।६४। इति) अङ्। [५]श्वयतेः यङो लुपि न श्वादेशः, ●अस्वचपतां तु यङो लुप्यपि मूलप्रयोगसदृशा एव प्रयोगा ज्ञातव्याः ॥१०३॥

## शीङ एः शिति ॥४।३।१०४॥

म० वृ०—शीङः शिति परे 'ए' आदेशः स्यात्। शेते, शयाते, शेरते: शेताम्, शयीत, अशेत, शयानः। ङिन्निर्देशाद्यङो लुपि न एः-शेशीतः, शेश्यति, [अन्तो नो लुक् (४।२।९४) इत्यन्तो नो लुक्] ॥१०४॥

## क्ङिति यि शय् ॥४।३।१०५॥

म० वृ०—शीङः क्ङिति यकारादौ प्रत्यये परे 'शय्' आदेशः स्यात्। शय्यते, शाशय्यते, संशय्य, शय्या ॥१०५॥

अव०—'क्ङिति यि शय्' इत्यत्र सूत्रेऽपि यङो लुपि न शयादेशः-संशेशीय। शेरतेऽस्यामिति शय्या= पर्यङ्कः शब्दगुम्फो वा, ∴समजनिपन्निषद्शीङ्सुग्विदिचरिमनीणः (५।३।९९) इत्यनेन क्यप् ॥१०५॥

## उपसर्गादूहो ह्रस्वः ॥४।३।१०६॥

म० वृ०—उपसर्गात्परस्योहतेरुतः [=ऊकारस्य] क्ङिति यादौ [=यकारादौ] परे 'ह्रस्वः' स्यात्। समुह्यते, समुह्यात्, समुह्य; अभ्युह्यतेः, अभ्युह्य। क्ङितीति किम्? अभ्यूह्योऽयमर्थः। [१]"ऊ ऊह्" इत्यूकारप्रश्लेषात् आ ऊह्यते-ओह्यते इत्यत्र न ह्रस्वः ॥१०६॥

अव०—[१]'आ ऊह्यते' इत्यत्र आङ् पूर्व ऊह-धातुः, ते, क्य, 'उपसर्गादूहो०' इत्यनेन ऊकारस्य ह्रस्वः, 'अवर्णस्येवर्णादि०' (१।२।६) इत्यनेन ओत्वे कृते पुनर्ह्रस्वः प्राप्नोति इति "ऊ ऊह् इत्यूकारे"-त्यादि उक्तम् ॥१०६॥

## आशिषीणः ॥४।३।१०७॥

म० वृ०—उपसर्गादिण ईतः [=ईकारस्य] क्ङिति यादावाशिषि 'ह्रस्वः' स्यात्। [१]उदियात्, समियात्। आशिषीति किम्? उदीयात्। उपसर्गादिति किम्? ईयात् ॥१०७॥

अव०—"आशिषीणः" इत्यत्रापि पूर्वसूत्रवत् 'ई इणः' इत्येवमीकारप्रश्लेषात् ............... ("आ इयात्-एयात् समेयात्" इत्यत्र न भवति)। ननु 'प्रतीयात्' इत्यत्र समानलक्षणे दीर्घे कृते कथं न

★ 'संयोगात्' (२।१।५२) इत्यनेनेकारस्येय्।

△ धातोरिवर्णोवर्ण० (२।१।५०) इत्यनेनोकारस्योव्।

* अत्रेदं सूत्रमसङ्गतम्, श्विधातोः "ऋदिच्छ्विस्तम्भू०" (३।४।६५) इत्यनेनाङः प्राप्तेः।

● इदं चिन्त्यम्, असूधातोः स्वरादित्वाद् यङप्राप्तेः।

∴ तदुक्तं हैमलिङ्गानुशासनविवरणे—"शय्या पर्यङ्कः शब्दगुम्फश्च"।

ह्रस्वः ? दीर्घे सति उपसर्गात्परस्य इण्धातोरभावात् । [१]उत्पूर्व इण्, आशीःक्यात्, 'दीर्घश्च्वियङ्-यक्क्येषु च' (४।३।१०८) इत्यनेन दीर्घे कृते 'आशिषीणः' इत्यनेन ह्रस्व इकारः कार्यः ॥१०७॥

## दीर्घश्च्वि-यङ्-यक्-क्येषु च ॥४।३।१०८॥

म० वृ०—च्वौ, यङि, यकि, क्येषु यादावाशिषि च परतोऽन्त्यस्वरस्य 'दीर्घः' स्यात् । [च्वि–] [१]शुचीकरोति, शुचीभवति, पटूकरोति; (यङ्-) चेचीयते; (यक्-) मन्तूयति; ['धातोः कण्ड्वादेर्यक्' (३।४।८) इति यक्,] क्येष्वत्र बहुवचनात् क्यन्-क्यङ्-क्यङ्ष्-क्यानामविशेषेण ग्रहणम्, क्यन्–निधीयति, दधीयति; क्यङ्–श्येनायते, भृशायते; क्यङ्ष्-लोहितायते, लोहितायति; क्य-स्तूयते, आशिषि यि,– स्तूयात्, जीयात्, ईयात् । आशिषि यीत्येव-चेषीष्ट ॥१०८॥

अव०–च्विक्यानां ग्रहणात् अधातोरपि 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' इति सूत्रं प्रवर्तते । [१]च्व्यन्तात् सिः, 'अव्ययस्य' (३।२।७) इति लुक्, (एवम्) शुचीस्यात्, पटूभवति, पटूस्यात् ॥१०८॥

## ऋतो री ॥४।३।१०९॥

म० वृ०—धातोरधातोर्वा ऋदन्तस्य ऋतः [=ऋकारस्य] स्थाने 'री' आदेशः स्यात्, च्वि-यङ्-यक्-क्येषु । पित्रीकरोति, चेक्रीयते, पित्रीयते, मात्रीयते । ऋत इति किम् ? चेकीर्यते [कॄत् विक्षेपे] ॥१०९॥

## रिः श-क्या-ऽऽशीर्ये ॥४।३।११०॥

म० वृ०—ऋदन्तधातोः ऋस्थाने शे,[१] क्ये आशीर्ये च परे 'रिः' आदेशः स्यात् । शे–व्याप्रियते, आद्रियते, क्रिया, क्रियते, क्रियात् । ह्रस्वविधानात् पूर्वेण न दीर्घः[२] ॥११०॥

अव०–[१]'शे,' 'तुदादेः शः' (३।४।८१) अथवा 'कृगः श च वा' (५।३।१००) इत्ययं शो ज्ञातव्यः । [२]'दीर्घश्च्वियङ्०' (४।३।१०८) इत्यादिना ॥११०॥

## ईश्च्वाववर्णस्यानव्ययस्य ॥४।३।१११॥

म० वृ०—अव्ययवर्जितस्यावर्णस्य (अवर्णान्तस्य) च्वौ परे 'ई (इति) अन्तादेशः' स्यात् । शुक्लीकरोति, शुक्लीभवति, शुक्लीस्यात्; मालीकरोति, मालीभवति । अनव्ययस्येति किम् ? दिवाभूता रात्रिः, एवं दोषाभूतमहः ॥१११॥

अव०–"ईश्च्वाववर्णस्यानव्ययस्य" इति योगो दीर्घत्वाऽपवादो भवति ।

## क्यनि ॥४।३।११२॥

म० वृ०—क्यनि परेऽवर्णान्तस्य 'ई (इति) अन्तादेशः' स्यात् । दीर्घत्वापवादः । पुत्रीयति, मालीयति । योगविभाग उत्तरार्थः ॥११२॥

## क्षुत्-तृड्-गर्द्धेऽशनायोदन्य-धनायम् ॥४।३।११३॥

म० वृ०—क्षुदादिष्वर्थेषु यथासङ्ख्यमशनादयः क्यन्नन्ता निपात्यन्ते । अशनायति, उदन्यति, धनायति । क्षुत्तृड्गर्द्ध इति किम् ? अशनीयति, उदकीयति, धनीयति दानाय [दानबुद्ध्या] ॥११३॥

अव०–अशनमिच्छति=अशनायति, 'अमाव्ययात् क्यन् च' (३।४।२३) (इति क्यन्), क्षुधि गम्यमानायामशनशब्दस्य आत्वम्, अशनायति इति सिद्धम् । एवमुदकमिच्छति (इति) क्यन्, तृषि गम्यमानायामुदकशब्दस्य 'उदन्' इत्यादेशः । गर्द्धे=वाञ्छायां गम्यमाने धनशब्दस्य 'आत्वं' निपात्यते ॥११३॥

## वृषाऽश्वान्मैथुने स्सोऽन्तः ॥४।३।११४॥

म० वृ०—मैथुने वर्त्तमानाद्वृषशब्दादश्वाच्च क्यनि स्सोऽन्तो[१] भवति । वृषस्यति गौः, अश्वस्यति वडवा=अश्वा । वृषाश्वशब्दौ (अत्र) मैथुने वर्त्तेते । मैथुनेच्छापर्यायौ मनुष्यादावपि प्रयुज्येते[२] । मैथुन इति किम् ? वृषीयति ॥११४॥

अव०–'वृषाश्वान्मैथुने'० इति सूत्रे 'स्स' इति द्विसकारनिर्देशः षत्वनिषेधार्थः, तेन उत्तरत्र 'दधि-

स्यति, मधुस्यति' इत्यत्रापि त्वं न भवति। [१]अव-यवो भवति। [२]वृषस्य, अश्वस्य इत्येव।

"अनेकयुगजीविन्यायन्यास्त्रेता त्रयोदशी;"

"सा क्षीरकण्ठकं वत्सं वृषस्यन्ती न लज्जिता"।

इति मनुष्यजातिविषयेऽपि वृषस्यशब्दो मैथुने प्रयुक्तः कविना। त्रीन् अवतारानिता=प्राप्ता त्रेता, पृषोदरादित्वादेत्वम्, स्त्रीत्वं प्रतिपदोक्तमस्य। अल्पः क्षीरकण्ठः क्षीरकण्ठकः, ह्रस्वे कप् *। तथा शुनी गौश्च स्वं स्वमश्वस्यति। लक्ष्मणं सा वृषस्यन्ती महोक्षं गौरिवागमत् ॥११४॥

## अस् च लौल्ये ॥४।३।११५॥

म० वृ०–भोक्तुमभिलाषाधिक्यं लौल्यमुच्यते। लौल्ये गम्यमाने क्यनि नाम्नः 'सोऽस् चान्तः' स्यात्। [१]दधिस्यति, दध्यस्यति; एवं [२]क्षीरस्यति, [३]लवणस्यति। लौल्य इति किम्? क्षीरीयति दातुम् ॥११५॥ ग्रन्थाग्रम्-१९६॥

अव०-- [१]दधि भक्षितुमिच्छति=दधिस्यति, दध्यस्यति; एवं मधु भक्षितुमिच्छति=मधुस्यति, मध्वस्यति; क्यन्। [२]क्षीरं भक्षितुमिच्छति। [३]लवणं भक्षितुमिच्छति। तथा 'अस् च लौल्ये' इति सूत्रे अस्विधानमनकारान्तार्थम्, कोऽर्थः? अकारान्तवर्जितदधिमध्वादिशब्दकारणे(न)। यतः अकारान्तशब्दे(षु)क्षीरलवणादिषु असि कृते 'लुगस्यादेत्यपदे' (२।१।११३) इत्यनेन प्रकृत्यकारस्य लुकि कृते विशेषः कोऽपि नास्ति। यथा लवणस्यति, क्षीरस्यति। अत्र असि सकारे च कृते समानरूपं भवति। येन दध्यस्यति मध्वस्यति इति प्रयोगौ सिध्यतः, एषु(? अत्र) तदर्थमस् कृतः, असं विना दधिस्यति मधुस्यति इति सिध्यतः। क्षीरस्यति इ······दि······ति। सि आदेशे कृतेऽपि उभयथापि सिद्धं ···············क्त ······इत्यभिप्रायः ॥११५॥। अत्र सूत्रे (? पादे) अवचूरिश्लोक-३२३, अक्षर-२६।

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने चतुर्थाध्यायस्य तृतीयः पादः समाप्तः ॥

* इदं चिन्त्यम्, "क्षीरः कण्ठे यस्यासौ "क्षीरकण्ठकः" इति बहुव्रीहेः कच्प्रत्ययेन सिद्धेः।

॥ अर्हम् ॥

# ॥ चतुर्थोऽध्यायः ॥

## [ चतुर्थः पादः ]

★

### [1]अस्ति-ब्रुवोर्भू-वचावशिति ॥४।४।१॥

म० वृ०–अस्तिब्रुवोर्यथासङ्ख्यं 'भूवचादेशौ' भवतः, अशिति विषये। [अस्तेर्भ्वादेशः-] अभूत्, बभूव, भविता, भूयात्, भविष्यति, बोभूयते, बुभूषति, भवितव्यम्, भवितुम्; [ब्रुवो वच्-]अवोचत्, ऊचे, उवाच, वक्ता, उच्यात्, वक्ष्यति, वावच्यते, विवक्षति, वक्तव्यम्, वक्तुम्[2]। अशितीति किम्? अस्ति, अस्तु, स्यात्, आसीत्; ब्रवीति, ब्रूते, ब्रूयात्, ब्रवीतु, अब्रवीत्, ब्रुवन्, ब्रुवाणः। विषयसप्तमीनिर्देशः किम्? [3]भव्यम्, वाच्यम्। [4]धात्वन्तरेणैव सिद्धे अस्तिब्रुवोरशिति प्रयोगनिवृत्त्यर्थं वचनम् ॥१॥

---

अव०–[1]अस्तीति निर्देशात् 'असूच् क्षेपणे' (इति) अस्यतेः, 'अषी असी गत्यादानयोश्च' (इति) असतेर्न भ्वादेशः। [2](एवम्) वक्षीष्ट, अवक्ष्यत, वक्ष्यते। 'चकासामास' इत्यादावनुप्रयोगे कृभ्वस्तीनां पृथग्निर्देशान्न भ्वादेशः ❀। [3]'भव्यम्, वाच्यम्'; अत्र विषयसप्तमीबलात् पूर्वमस्तेर्भू (इति) आदेशः, तदनन्तरं 'य एचातः' (५।१।२८) इत्यनेन यप्रत्ययः सिद्धः, 'वाच्यम्', अत्र ब्रूस्थाने पूर्वं वच्, तदनन्तरम् 'ऋवर्णव्यञ्जना०' (५।१।१७) इति घ्यण् सिद्धः, अन्यथा 'भव्यम्, वाच्यम्' इति न सिध्येत। [4]'भू सत्तायाम्' इत्यनेनापि अभूत्-बभूवादिप्रयोगाः, 'वचंक् परिभाषणे' इत्यनेनावोचदित्यादिप्रयोगाः सिध्यन्ति, किमर्थमस्तिब्रुवोर्भूवचादेशविधानम्? सूरिराह- धात्वन्तरेणेत्यादि, यत्र अशिति प्रत्ययः तत्र केवलयोः असुब्रुवोर्न प्रयोगः, आस इत्यादि परिणा (?)। अशिति विषयेऽवश्यं बभूवेत्याद्येव प्रयोगाः भवन्ति इति अभिप्रायः ॥१॥

### अघञ्क्यबलच्यजेर्वी ✱ ॥४।४।२॥

म० वृ०-घञ्-क्यप्-अल्-अच् वर्जिते 'अशिति विषयेऽजेर्वी आदेशः' स्यात्। विवाय, वीयात्, प्रवेता, प्रवीतः[1]। अघञ्क्यबलचीति किम्? [घञ्-] समाजः, (क्यप्-) समज्या, [अल्-] [2]समजः, [अच्-] [3]अजः ॥२॥

---

अव०–[1]प्रवेयम्, प्रवयणीयम्, वायकः, प्रवीय इत्यपि। [2]समजनं=समजः, "समुदोऽजः पशौ" (५।३।३०) इत्यल्, समजः पशूनाम्, समूह इत्यर्थः। [3]अजतीति अजः, स्त्री चेत् अजा ॥२॥

### त्रने वा ॥४।४।३॥

म० वृ०—'तृ-अनप्रत्यययोर्विषयेऽजेर्वी वा' स्यात्। प्रवेता, प्राजिता; प्रवयणः, [1]प्राजनो दण्डः ॥३॥

---

अव०–[1]प्राज्यतेऽनेनेति प्राजनः, प्रवयणः; 'करणाधारे' (५।३।१२९) इत्यनेन अनट् ॥३॥

### चक्षो वाचि क्शांग्-ख्यांग् ॥४।४।४॥

म० वृ०—चक्षिङो वाचि वर्त्तमानस्याशिति विषये 'क्शांग् ख्यांग्' (इत्येतौ) आदेशौ स्याताम्। आक्शाता, [1]आख्शाता, आख्याता; आक्शास्यति, [2]आख्शास्यति; आख्यास्यति, आख्यास्यते[3]। वाचीति

---

❀ अन्यथा कृभ्वोरेव द्वयोरुपादानं कुर्यात्।

✱ वीं इत्यनुस्वारेदादेश इडभावार्थः।

किम् ? बोधे- विचक्षणः[४] (वर्जने-) सञ्चक्ष्याः, परिसञ्चक्ष्याः खलाः; हिंसायाम्- नृचक्षा राक्षसः । अशितीत्येव- आचष्टे ॥४॥

अव०–[१]'शिट्याद्यस्य द्वितीयो वा' (२।३।५९) इत्यनेन (विकल्पेन) ककारस्य खकारः । [२]एवमाक्शास्यते, आख्शास्यते । [३]आख्यास्यति आख्यास्यते इत्यस्याग्रे 'आक्शेयात्, आक्शायात्; आख्शेयात्, आख्शायात्; आख्येयात्, आख्यायात्, एवमाचाक्शायते, आचाख्यायते; आक्शातव्यम्, आख्यातव्यम्' इत्यपि ज्ञेयानि । विषयसप्तमीविज्ञानात् आक्शेयम्, आख्येयम् । [४]विचष्टे (इति) विचक्षणः, 'नन्द्यादिभ्योऽनः' (५।१।५२। इत्यनप्रत्ययः) ॥४॥

## नवा परोक्षायाम् ॥४।४।५॥

वृ०—चक्षिङो वाचि परोक्षायां परतः 'क्शांग्, ख्यांग् वा' भवतः । आचक्शौ, आचख्शौ; आचख्यौ, आचख्ये;[१]पक्षे आचचक्षे ॥५॥

अव०–[१](एवम्) आचक्शे, आचख्शे ॥५॥

## भृज्जो भर्ज् ॥४।४।६॥

म० वृ०–भृज्जतेरशिति 'भर्ज् (इति) आदेशः' स्यात् नवा । बभर्ज, [१]बभ्रज्ज; भर्ष्टा, [४]भ्रष्टा, अभार्क्षीत्[२], अभ्राक्षीत्, भर्जनम्, भ्रज्जनम्[३] । अशितीत्येव-[५]भृज्जति, भृज्जते । कथं भृज्यात्[६], भृज्यते, भृष्टः, बरीभृज्यते ? परत्वात् भर्ज्जादेशेऽपि स्थानिवद्भावेन पूर्वेण स्वरेण सह य्वृति कृते प्रयोगो भविष्यति ॥६॥

अव०–[१]'बभ्रज्ज' इत्यत्र 'तृतीयस्तृतीयचतुर्थे' (१।३।४९ इति) सकारस्य दः, 'तवर्गस्य श्चवर्ग०' (१।३।६०) इति दस्य जः ।[२] 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः । [३]एवं भर्क्षीष्ट, भ्रक्षीष्ट; बिभर्क्षति, बिभ्रक्षति; बिभर्जिषति, बिभ्रज्जिषति; भर्ग्यम्, भ्रद्ग्यम्; भर्गः, भ्रद्गः इति प्रयोगा ज्ञेयाः । [४]'भ्रष्टा' इत्यादिषु पूर्वं संयोगस्यादौ स्कोर्लुक्' (२।१।८८) इत्यनेन सलोपः, ततो 'यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः (२।१।८७ इति) जस्य ष् । [५]भ्रस्जीत् पाके (इति) भ्रस्ज्, ते, ति, 'तुदादेः शः' (३।४।८१। इति शः), 'ग्रहव्रश्चभ्रस्जप्रच्छः' (४।१।८४) इति य्वृत्, 'तृतीयस्तृतीयचतुर्थे' (१।३।४९। इति) सस्य द्, 'तवर्गस्य०' (१।३।६०) इति दस्य ज् ❀। 'भृज्जो भर्ज्' इति सूत्रे लुप्ततिव्निर्देशो यङो लुपि आदेशप्रतिषेधार्थः, (तेन) बर्भृज्यते, अत्र द्वित्वे कृते सपूर्वस्य धातोः "प्रकृतिग्रहणे यङ्लुबन्तस्यापि(ग्रहणम्)" इति न्यायात्प्राप्त आदेशो न भवति) । [६]'भृज्यात्' इत्यादौ भर्जादेशः कथं न भवतीति पराशङ्का, सूरिराह-परेति, यदि भर्ज् कृतः तदापि स्थानिवद्भावात् भ्रस्ज इत्यस्य य्वृता भाव्यमिति न भर्ज्, य्वृत् एव ॥६॥

## प्राद्दागस्त्त आरम्भे क्ते ॥४।४।७॥

म० वृ०—आरम्भार्थस्य प्रपूर्वकदागः[१] स्थाने क्ते प्रत्यये परे 'त्त आदेशः' स्यान्नवा । [२]प्रत्तः, प्रदत्तः । प्रादिति किम् ? [३]परीत्तम् । दाग इति किम् ? दांव्– प्रत्तम् । आरम्भ इति किम् ? अन्यत्र नित्यमेव–[४]प्रत्तम् । [५]क्त इति किम् ? [६]प्रत्तवान् । द्वितकारादेशः सर्वादेशार्थः ॥७॥

अव—[१]'डुदांग्क् दाने' इति एकस्यैव दागः स्थाने त्तादेशः, नान्येषां दासंज्ञकानामित्यर्थः । (त्त इत्यत्र) अकार उच्चारणार्थः । [२]प्रपूर्वक-दा, दातुं प्रारब्धवान्=प्रत्तः, 'आरम्भे' (५।१।१०) इति सूत्रेण क्तः । तथा सूत्रे द्वितकारः 'त्त' इति आदेशः प्रक्रियालाघवार्थः=साधनिकाप्रयासोत्तारणाय कृतः, अन्यथा धात्वाकारस्य स्थाने त इत्यादेशे कृते 'अघोषे प्रथमोऽशिटः' (१।३।५०) इत्यनेन 'द्' इत्यस्य 'त्', इत्येवं प्रयोगाः सिध्यन्ति । परिदा[३], परिदीयते स्म (इति) क्तः, 'स्वरादुपसर्गात्०' (४।४।९) इति उत्तरसूत्रेणात्र 'त्त' आदेशः, 'धुटो धुटि स्वे वा' (१।३।

❀ "सस्य शषौ (१।३।६१) इति सस्य शत्वे, 'तृतीयस्तृतीयचतुर्थे' (१।३।४६) इति शस्य जत्वे भृजति" इति हैमप्रकाशादौ ।

।४८) इत्यनेन तकारत्रयमध्यात् मध्यमतकारस्य लुक्, 'दस्ति' (३।२।८८) इति सूत्रेण 'परि' इत्यत्र दीर्घः, 'परीत्त' इति सिद्धम् । [४]प्रकर्षेण दीयते स्म। [५]न क्तवति प्रत्यये । [६]दातुं प्रारब्धवानित्यर्थः, स्वरादुपसर्गा० (४।४।९) इति 'त्त्' ॥७॥

## नि-वि-स्वन्ववात् ॥४।४।८॥

म० वृ०—एभ्य उपसर्गेभ्यो दागः क्ते 'त्तो वा' स्यात् । नीत्तम्, निदत्तम्; वीत्तम्, विदत्तम्; सूत्तम्, सुदत्तम्; अनूत्तम्, अनुदत्तम्, अवत्तम्, अवदत्तम् । उत्तरेण नित्यं त्तादेशे प्राप्ते विभाषेयम् ॥८॥

---

अव०—"दस्ति" (३।२।८८) इत्यनेन दीर्घः सर्वत्र ॥८॥

## स्वरादुपसर्गाद्दस्ति कित्यधः ॥४।४।९॥

म० वृ०—पूर्वयोगात्म्भोन्ववेति निवृत्तम् । स्वरान्तादुपसर्गात्परस्य धावर्जितस्य दासंज्ञकस्य तकारादौ किति प्रत्यये परे सति 'त्तः' स्यात् । [१]प्रत्तः, प्रत्तवान्; एवं [२]परीत्तः, [३]परीत्त्रिमम्; तथा [४]अवत्तवान्, [५]अवत्तिः । उपसर्गादिति किम्? [६]दत्तम् । स्वरादिति किम्? निर्दितम्, निर्दत्तम्; दुर्दितम्, दुर्दत्तम् । द इति किम्? दांवक् लवने- प्रदाता व्रीहयः, दैव् [७]विशोधने,-निदातानि[८]। कितीति किम्? प्रदाता । अध इति किम्? धाग्- निहितः, ['धागः' (४।४।१५) इत्येनन तादौ हिः] दधेनिधीतः ॥९॥

---

अव०—[१]प्रदातुमारब्धवान्, अथवा प्रदीयते स्म (इति) क्तक्तवतू, 'स्वरादुपसर्गा०' इति दास्थाने 'त्त' आदेशः, 'धुटो धुटि स्वे वा' (१।३।४८) इति तकारत्रयमध्यात् मध्यमतकारस्य विकल्पेन लुक्- प्रत्तः, प्रत्तः । [२]'परीत्त' इत्यत्र 'दस्ति' इत्यनेन दीर्घः । [३]'परीत्त्रिमम्' इत्यत्र परिदा, परिदानेन निर्वृत्तं=परीत्त्रिमम्, ड्वितस्त्रिमक् तत्कृतम् (५।३।८४) इति सूत्रेण 'त्रिमक्' प्रत्ययः; एवं प्रणीत्त्रिमम्, 'दस्ति' इति दीर्घः । [४]'अवत्तवान्', अत्र 'दों छोंच् छेदने' 'आत्सन्ध्यक्षरस्य' (४।२।१) दा, अवद्यति स्म- क्तवत्, अत्र 'दोसोमास्थ इः' (४।४।११) इत्यस्य परत्वेऽपि स्वरादुपसर्गा० इति विशेषविधानबलात् इत्वं सामान्योक्तं बाधित्वा 'स्वरादुपसर्गा०' इति सूत्रेण त्तादेश एव, न इत्वम् । तथा [५]अवदानम्=अवत्तिः, 'उपसर्गादातः' (५।३।११०) इत्यस्य बाधकः (? बाधकेन) 'श्वादिभ्यः' (५।३।९२) इत्यनेन क्तिः । [६] दत्तं दधि, लता (दिता) । [७]प्रतिदाने । [८]निदातानि भाजनानि ॥९॥

## दत् ॥४।४।१०॥

म० वृ०—धावर्जितस्य दासंज्ञकस्य तादौ किति परे 'दत्' आदेशः स्यात् । दत्तः, दत्तवान्, दत्तिः, दत्त्वा । द्यतेः परत्वादित्वमेव- दितः, दितवान् । द इत्येव- दातं बर्हिः, अवदातं मुखम् । अध इत्येव- धीतः, धीतिः ॥१०॥

## [२]दो-सो-मा[१]-स्थ इः ॥४।४।११॥

म० वृ०—एषां तादौ किति परे 'इ (इति) अन्तादेशः' स्यात् । दो,-निर्दितः, निर्दितवान्, दित्वा, दितिः; सो,-अवसितः, अवसितवान्, सित्वा, सितिः; मा,-मितः, (मित्वान्,) मित्वा, मितिः; स्थितः, स्थितवान्, स्थित्वा, स्थितिः । तीत्येव-- दादितः[३] ॥११॥

---

अव०—[१]सूत्रे 'मा' इति शब्देन "मांक् माने, मांङ्क् मानशब्दयोः, मेंङ् प्रतिदाने" इति त्रयोप्यत्र ज्ञेयाः,★यतो 'दोसोमास्थ इः' इति सूत्रेण "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्" "निरनुबन्धग्रहणे न सानुबन्धस्य ग्रहणम्" इति परिभाषाद्वयं बाध्यते इति न्यासकाराभिप्रायः । [२]'दोसो' इति ओकारनिर्देशो दैवादिकयोरेव परिग्रहार्थः । तथा [३]'दादितः', अत्र दो, अत्यर्थं द्यति (इति) यङ्, 'बहुलं लुप्' (३।४।१४इति) यङ् लुप्यते,

---

★ "मादाग्रहणेष्वविशेषः" इति (न्यायेन) माङ्-मा-मेङां ग्रहणमिति बृहद्वृत्तौ ।

द्वित्वम्, ❀ 'आगुणा०' (४।१।४८) आ, 'स्ताद्य-शितो०' (४।४।३२।इति) इट्, 'इडेत्पुसि चातो लुक्' (४।३।९४।इति) आकारलुक्। एवं दादितवान् ॥११॥

## छाशोर्वा ॥४।४।१२॥

म० वृ०–छोशो इत्येतयोस्तादौ किति परे 'इ (इति) अन्तादेशः' स्याद् वा। अवच्छितः, निशितः; अवच्छातः, निशातः[1]। श्यतिशिनोत्योरपि रूपद्वयसिद्धौ श्यतेर्विकल्पवचनम् "क्तं नञादिभिन्नैः" (३।१।१०५) इति [2]समासार्थम्– शाताशितम् ॥१२॥

अव०–[1](एवम्) अवच्छितवान्, निशितवान्; अवच्छातवान्, निशातवान्।[2] अन्यथा धातुभेदात् प्रकृतिभेदे समासो न स्यात् ॥१२॥

## शो व्रते ॥४।४।१३॥

म० वृ०–श्यतेः क्ते परे व्रतविषये प्रयोगे 'नित्यमित्वं' स्यात्। [1]संशितं व्रतम्, [2]संशितव्रतः साधुः, संशितः साधुः। [3]संशितशब्दोऽन्यत्राप्यस्तीति व्रतमिति विशेषणं न दुष्यति। नित्यार्थं वचनम्, तेन व्रतविषये 'संशात' इति न भवति॥१३॥

अव०–[1]'संशितं व्रतम्', कोऽर्थः? असिधारातीक्ष्णं व्रतमित्यर्थः। [2]"संशितव्रतः साधुः", कोऽर्थः? व्रते यत्नवान् साधुरित्यर्थः। [3]ननु व्रते इत्वं विहितम्=उक्तम्, इत्युक्तार्थत्वात् व्रतस्याप्रयोगः प्राप्नोतीत्याह,–व्रतमिति (? संशितशब्द इत्यादि), संशितशब्दोऽन्यस्मिन्नर्थेऽपि संशयरूपे वर्त्तते इति व्रतप्रयोगः कृत इत्यर्थः। व्रत इति किम्? निशातः ॥१३॥

## हाको हिः क्त्वि ॥४।४।१४॥

म० वृ०–हाकस्तादौ किति क्त्वाप्रत्यये परे 'हिरादेशः' स्यात्। हित्वा। क्त्वि इति किम्? [1]हीनः। तीत्येव– प्रहाय। यङो लुपि– जहित्वा[2] ॥१४॥

अव०–"हाको हिः क्त्वि" इत्यत्र ककार-निर्देशात् 'ओहांक् त्यागे' इत्यस्यैव ग्रहणम्, न 'ओहाङ् गतौ' इत्यस्य, तस्य हात्वा इति प्रयोगः। [1]'सूयत्याद्योदितः' (४।२।७०) इत्यनेन तकारस्य नादेशः। [2]'जहित्वा' इत्यत्र 'न हाको लुपि' (४।१।४९) इत्यनेन दीर्घनिषेधः ॥१४॥

## धागः ॥४।४।१५॥

म० वृ०–दधातेस्तादौ किति 'हिः' स्यात्। क्त्वीति न सम्बध्यते, पृथग्योगात्। विहितः, विहितवान्, हितिः, हित्वा ॥१५॥

अव०–'धाग' इति सूत्रे गकारः ट्धेनिवृत्त्यर्थः, ट्धें इत्यस्य "धीतः, धीतवान्, धीत्वा, धीतिः"। तीत्येव– प्रधाय। यङो लुपि इट्, 'इडेत्पुसि०' (४।३।९४) इति आलोपे "दाधितः, दाधितवान्, दाधित्वा" इति प्रयोगाः ॥१५॥

## यपि चादो जग्ध् ॥४।४।१६॥

म० वृ०–तादौ किति यपि च परेऽदे–'जग्धादेशः' स्यात्। जग्धः, जग्धवान्, जग्ध्वा, प्रजग्ध्य। तीत्येव– अद्यात्। कितीत्येव– अत्तव्यम्। कथमन्नम्[1]? अनितेरौणादिको नः, 'अदोऽनन्नात्' (५।१।१५०) इति ज्ञापकाद्वा 'अद्यते तत्' इति अन्नम्[2]। एकपदाश्रयत्वेनान्तरङ्गत्वाद्यपादेशात् प्रागेव जग्धादेशे सिद्धे यब्ग्रहणम् "अन्तरङ्गानपि विधीन् यबादेशो बाधते" इति ज्ञापनार्थम्, तेन प्रशम्य, प्रपृच्छ्य, प्रदीव्य, प्रखन्य, प्रस्थाय, प्रपाय, प्रदाय, प्रधाय, प्रपठ्य इत्यादौ दीर्घत्वम्, शत्वम्, ऊत्वम्, आत्वम्, इत्वम्, ईत्वम्, नत्वम्, हित्वमिड् च यपा बाध्यते ॥१६॥

अव०–[1]अन्, अनिति=जीवति जीवलोकोऽनेन इति उणादिसूत्रेण ('प्याधापन्यनि०' उणादि० २५८) नप्रत्ययः। [2]निपातनात् सिद्धिः, 'ज्ञानेच्छा०' (५।२।९२) इति क्तप्रत्ययः। 'प्रशम्य' इत्यत्र प्रकृत्याश्रियादिहेतोः (? 'प्रकृतेराश्रितं यत्स्यादि'-

❀ 'आत्सन्ध्यक्षरस्य' (४।२।१) इत्यनैमित्तकत्वादात्वस्य प्रागेव कृतत्वाद् 'दा' इत्यस्य द्वित्वं भवति।

त्यादिहेतोः ) पूर्वम् 'अहन्पञ्चमस्य क्वि क्ङिति' (४।१।१०७) इति सूत्रेण प्राप्तो दीर्घोऽन्तरङ्गोऽपि यपा बाध्यते, पूर्वं यप्, यपि सति दीर्घो न प्राप्नोति। एवं प्रपृच्छ्येत्यादिष्वपि भावनीयम्। 'प्रपृच्छ्य'-त्यत्रान्तरङ्गः 'अनुनासिके च छ्वः शूट्' (४।१।१०८) इत्यनेन छकारस्य शकारः। 'प्रदीव्य', अत्र 'अनुनासिके०' (४।१।१०८) इत्यनेन वकारस्य ऊट्। 'प्रखन्ये'-त्यत्र 'आः खनिसनिजनः' (४।२।६०) इत्यनेन आत्वं प्राप्तम्। 'प्रस्थाय', अत्र 'दोसोमास्थ इः' (४।४।११) इत्यनेन इत्वम्। 'प्रपाय' इत्यत्र 'ईर्व्यञ्जनेऽयपि' (४।३।९७) इत्यनेन ईत्वम्। 'प्रदाय', प्राद्दास्त०' (४।४।७) इति त्तत्वम्। 'प्रधाय', अत्र 'धागः' (४।४।१५) इति सूत्रेण हित्वम्। 'प्रपठ्य' इत्यत्र 'स्ताद्यशितो०' (४।४।३२) इति सूत्रेण इट् यपा बाध्यते ॥१६॥

### घस्लृ सनद्यतनीघञचलि ॥४।४।१७॥

म० वृ०–सनादिप्रत्ययेष्वदे-'घस्लृ' आदेशः स्यात्। [1]जिघत्सति, [2]अघसत्, [3]घासः, [4]प्रघसः, प्रघसः[5]। 'घस्लृ' अदने इति सिद्धेऽप्यदेः सन्नादिषु रूपान्तरनिवृत्त्यर्थं लृदर्थं च वचनम् △॥१७॥

अव०–[1]अत्तुमिच्छति। [2](एवम्) अघसताम्, अघसन्; अद्, अन्, घस्लृ (इति) आदेशः, 'लृदिद्द्युतादिपुष्यादेः परस्मै' (३।४।६४) इति अङ्। [3]घासः' (इत्यत्र) घञ्। [4]प्रात्तीति प्रघसः, अच्। [5]प्रादनं=प्रघसः, 'भूश्र्यदोऽल्' (५।३।२३ इत्यल्), अदेर्घस्लृ आदेशः। लृदिद्द्युतादि० (३।४।६४) सूत्रे लृ अनुबन्धधातोः परोऽङ् कार्यार्थः इति हेतो- 'घस्लृ सन०' इति सूत्रं कृतम् ❀ ॥१७॥

### परोक्षायां नवा ॥४।४।१८॥

म० वृ०–परोक्षायां परतोऽदे-'घस्लृ नवा' स्यात्। जघास, आद; जक्षुः, आदुः[1]। घस्यदिभ्यामेव सिद्धे, विकल्पवचनं घसेरसर्वविषयत्वज्ञापनार्थम्; तेन 'घस्ता, घस्मर' इत्यादावेव घसेः प्रयोगः ॥१८॥

अव०–[1](एवम्) जक्षतुः, आदतुः ॥१८॥

### वेर्वय् ॥४।४।१९॥

म० वृ०–वेग्धातोः परोक्षायां 'वयादेशो नवा' स्यात्। [1]उवाय, ववौ; ऊयुः, ववुः[2] ॥१९॥

अव०–[1]'यजादिवश्वचः सस्वरान्तस्थाय्वृत्' (४।१।७२ इति) उकारः। [2](एवम्) ऊयतुः, ववतुः। 'ऊयतुः, ऊयुः' इत्यत्र 'न वयो य्' (४।१।७६) इति सूत्रेण वयादेशसम्बन्धियकारस्य पूर्वस्वरेण सह य्वृत् न भवति, परं वकारस्य य्वृत् उकारो भवत्येव, अभ्यासवकारस्य 'यजादिवश्०' (४।१।७२) इति य्वृत् उः। ववौ ववुरित्यत्र 'वेरयः' (४।१।७४) इत्यनेन य्वृन्निषेधः ॥१९॥

### ॠः शॄ-दॄ-प्रः ॥४।४।२०॥

म० वृ०–एषां परोक्षायां 'नवा ॠ (इत्ययम्) अन्तादेशः' स्यात्। [1]विशशार, विशशार; विशश्रतुः, विशशरतुः; विदद्रतुः, विददरतुः; निपप्रतुः, निपपरतुः; [2]कसौ-विशशृवान्, विशिशीर्वान् ॥२०॥

अव०–[1]'विशशार', अत्र परोक्षाणव्, 'ॠः शॄ०' इत्यनेन ॠः, नामिनोऽकलि०' (४।३।५१) वृद्धिः आर्; पक्षे 'विशशार' इति रूपं भवति, नामिनोऽकलि०' (इति) वृद्धिः, णवि सति समानं रूपं जायते। ननु "विशशरतुः, विददरतुः, निपपरतुः" इत्येते प्रयोगाः शृणात्यादिधातुभिः 'स्कृच्छृतोऽकि

△ अत्रैतादृशेन पाठेन भाव्यम्–'घस्लृ अदने' इति सिद्धेऽप्यदेः सन्नादिषुरूपान्तरनिवृत्त्यर्थं वचनम्। लृदर्थः।

❀ अत्र वाक्यरचना न समीचीना, अत्र "अत्र लृनुबन्धो 'लृदिद्०' इति सूत्रेणाङो विधानाय कृतः" एतादृशेन वाक्येन भाव्यम्।

परोक्षायाम्' (४।३।८) इति सूत्रेण गुणे कृते सेत्स्यन्ति, "विशश्रतुः, विदद्रतुः, निपप्रतुः" इति च प्रयोगाः "श्रां पाके, द्रांक् कुत्सितगतौ, प्रांक् पूरणे' इति धातुभिरेव भविष्यन्ति, किमिदं 'श्रः शृद्प्रः' इति वचनम्? इति यः शङ्कते तं प्रति कसि प्रयोगान् सूरिर्दर्शयति– क्वसौ "विशश्रृवान्, विशिशीर्वान्; एवं विदद्वान्, विदिदीर्वान्; (निपप्रवान्, निपुपूर्वान्। 'निपुपूर्वान्' इत्यत्र) निपूर्वः पृ, 'ओष्ठ्यादुर्' (४।४।११८।इति) उर्, 'पदान्ते' ※ (२।१।६४।इति) दीर्घ ऊर् ॥२०॥

## हनो वध आशिष्यञौ ॥४।४।२१॥

म० वृ०–आशीर्विषये हन्ते- 'र्वध इति [1]अकारान्तादेशः' स्यात्, अञौ=ञिविषयायां [2]तु न स्यात्। [3]वध्यात्, [4]वध्यास्ताम्, आवधिषीष्ट[5]। अञाविति किम्? [6]घानिषीष्ट ॥२१॥

---

अव०–अत्र परोक्षानिवृत्तौ वेति निवृत्तम्। [1]वध आदेशः सस्वर इत्यर्थः। [2]आशिषि सत्याम्। [3]'अतः' (४।३।८२) इत्यनेन अकारलोपः। [4](एवं) वध्यासुः। [5]एवमावधिषीयास्ताम्, आवधिषीरन्। [6]'घानिषीष्ट,' हन्, आशीःसीष्ट, "स्वरग्रहदृश-हन्भ्यः" स्यसिजाशीःश्वस्तन्यां ञिड् वा" (३।४।६९) इत्यनेन ञिट्, 'ञिणति घन्' (४।३।१०१।इति) घन् आदेशः, 'ञ्णिति' (४।३।५०।इति) वृद्धिः ॥२१॥

## अद्यतन्यां वात्वात्मने ॥४।४।२२॥

म० वृ०–अद्यतन्यां[1] विषये हनो [2]'वधः' स्यात्, [3]आत्मनेपदे त्वस्यां [4] वा स्यात्। अवधीत्, अवधीषुः। वा त्वात्मने,–[5] आवधिष्ट, अवधि, आहत, अघानि ॥२२॥

---

अव०–[1]अद्यतनीपरस्मैपदविषये। [2]अकारान्तः। [3]अद्यतन्यात्मनेपदविषये। [4]अद्यतन्याम्। [5]'आवधिष्ट,' (एवम्) आवधिषाताम्, आवधिषत; आहसाताम्, आहसत। 'अवधीत्' इत्यादिषु वधसम्बन्ध्यकारलोपस्य स्थानिवद्भावेन 'व्यञ्जनादेर्वोपान्त्यस्यातः' (४।३।४७) इत्यनेन वृद्धिर्न भवति ॥२२॥

## इणिकोर्गा ॥४।४।२३॥

म० वृ०–अद्यतन्यां विषये इण इकश्च धातो–'र्गा आदेशः' स्यात्। अगात्[1] अगुः, अगायि त्वया; [2]अध्यगात्, अध्यगुः ॥२३॥

अव०–'अद्यतन्यां विषये' इत्यस्यायं भावार्थः,- विषयव्याख्यानं विना 'अगात्' (इति) अत्र सिचो लोपे कृते एव गादेशः स्यात्, न तु अगायि इत्यत्र गादेशः, ञिचा व्यवधानात्। [1](एवम्) अगाताम्। [2]इक्धातोः प्रयोगाः, (एवम्) अध्यगात्, अध्यगायि भवता ॥२३॥

## णावज्ञाने गमुः ॥४।४।२४॥

म० वृ०–अज्ञाने वर्तमानयोरिणिकोः–'गमु (इत्ययम्) आदेशः' स्यात्। उकारः 'स्वरहनगमोः सनि०' (४।१।१०४) इत्यत्र विशेषणार्थः। गमयति, अधिगमयति, अधिगमयन्ति प्रियम्। अज्ञान इति किम्? अर्थान् प्रत्याययति। 'अज्ञाने' इति इणो विशेषणम्, न इकः, असम्भवात्। कथमर्थान् गमयन्ति शब्दाः? गमिनैव सिद्धम् ॥२४॥

---

अव०–णावज्ञाने गमुरिति सूत्रेऽपि 'णौ' इत्यत्र विषयसप्तमी व्याख्येया, विषयव्याख्यानबलात् 'अजीगमत्' इति सिद्धम्, अन्यथा णौ परे गमादेशे कृते "णौ यत्कृतं कार्यम्०" इति न्यायात् इण इकारस्यैव द्वित्वं स्यात्, न तु गमः। 'गमयति', अत्र इण्, एति कश्चित्, तमन्यः प्रयुङ्क्ते इति विस्तरेण 'यन्तं प्रयुङ्क्ते' इति संक्षेपेण, गमयति, गमयतः, गमयन्ति ग्रामम्। 'प्रत्याययति', 'इंक् स्मरणे' प्रतियन्तं प्रयुङ्क्ते (इति) णिग्, 'नामिनोऽकलिहलेः' (४।३।५१।इति) वृद्धिः ऐः, ('एदैतोऽ-

---

※ एतच्चिन्त्यम्, उर्स्थरकारस्य पदान्तत्वाभावाद्, अत्र 'भ्वादेर्नामिनो०' (२।१।६३) इत्यनेन दीर्घेण भाव्यम्।

याय्' इति ) आय् । गमयतीत्यादेर्धात्वन्तरेणैव सिद्धे (? सिद्धौ) णौ सति इकः अज्ञानार्थादन्यत्र इणश्च रूपान्तरनिवृत्त्यर्थम् 'णावज्ञाने गमुः' इति सूत्रं कृतम् ॥२४॥

## सनीङश्च ॥४।४।२५॥

म० वृ०—अज्ञानार्थे इङ इणिकोश्च सनि परे 'गमुः'स्यात् । अज्ञान इति इणो विशेषणम्, न इकिङोः, असम्भवात् । इङ्,—अधिजिगांसते विद्याम्, इण्,—जिगमिषति ग्रामम्, इक्,—मातुरधिजिगमिषति । अज्ञाने इत्येव— अर्थान् प्रतीषिषति ॥२५॥

## गाः परोक्षायाम् ॥४।४।२६॥

म० वृ०—इङः परोक्षाविषये[1] 'गाः' स्यात् । अधिजगे[2] ॥२६॥

अव०—'इङः परोक्षायाम्' इत्यस्य सूत्रार्थे परोक्षाविषये इति विषयनिर्देशः किम् ? इङो गादेशे कृते एव द्विर्वचनं यथा स्यात्, तेन 'प्राक्तु स्वरे स्वरविधेरिति अत्र नोपतिष्ठते । [1]गादेशः । [2](एवम्) अधिजगाते, अधिजगिरे, अधिजगिषे ॥२६॥

## णौ सन्-ङे वा ॥४।४।२७॥

म० वृ०—सनपरे, ङपरे, णौ परत इङो 'गा' वा स्यात् । [1]अधिजिगापयिषति, [2]अध्यापिपयिषति; [3]अध्यजीगपत्, अध्यापिपत् । णाविति किम् ? अधिजिगांसते ॥२७॥

अव०—[1]'अधिजिगापयिषति' इत्यादिषु 'इङ्क् अध्ययने' अधीयानं प्रयुङ्क्ते (इति) णिग्, 'णौ क्रीजीङः' (४।२।१०) इत्यनेन आत्वप्राप्तिः, तदनन्तरम् 'अर्त्तिरीऌव्ली०' (४।२।२१) इत्यनेन पागमप्राप्तिः, उभयोरप्यन्तरङ्गयोः 'णौ सन् ङे वा' इत्ययमपवादविधिः, इति पूर्वं गादेशः, पश्चात् पोन्तः, अथवा इङः स्थाने 'णौ क्रीजीङः' इत्यात्वम्, तदनन्तरम् 'अर्त्ति०' इत्यनेन पोऽन्तः, तत आप्स्थाने "णौ सन्ङे वा" इत्यनेन गादेशः, "यावत्सम्भवस्तावद्विधिः" इतिन्यायात् पुनः पोऽन्तः क्रियते, (ततः) अध्यापयितुमिच्छति (इति) सन्, 'गाप्' इत्यस्य द्वित्वम्, इट्, णिगो गुणः । [2]'अध्यापिपयिषति' इत्यत्र 'स्वरादेर्द्वितीयः' (४।१।४) इत्यनेन 'पि' इत्यस्य द्वित्वम्, इट्, गुणः । [3]'अध्यजीगपत्, अध्यापिपत्' इत्यत्र 'णिश्रिद्रु०' (३।४।५८) इति ङप्रत्ययः, 'उपान्त्यस्यासमान०' (४।२।३५) इति ह्रस्वः, द्वित्वम्, 'असमानलोपे सन्वत्०' (४।१।६३। इति द्वित्वे पूर्वस्येत्वम्), 'लघोर्दीर्घः'० (४।१।६४ । इति) ईत्वम् ॥२७॥

## वाद्यतनी-क्रियातिपत्त्योर्गीङ् ॥४।४।२८॥

म० वृ०—अद्यतनीक्रियातिपत्त्योः परतो 'वा इङो गीङादेशः' स्यात् । अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत; अध्यैष्ट, अध्यैषाताम्, अध्यैषत; अध्यगीष्यत, अध्यैष्यत । ङकारो गुणनिषेधार्थः ॥२८॥

अव०—क्रियातिपत्तिः,-अध्यगीष्यत, अध्यगीष्येताम्, अध्यगीष्यन्त; पक्षे– अध्यैष्यत, अध्यैष्येताम्, अध्यैष्यन्त; 'स्वरादेस्तासु' (४।४।३१) इति सर्वत्र वृद्धिः । ङकारो गुणनिषेधार्थ एव कृतः, न च वाच्यं विधानसामर्थ्याद् गुणो न भविष्यतीति, तदा हि 'अध्यगायि' इत्यत्र वृद्धिरपि न स्यात् इति भावः ॥२८॥

## अड् धातोरादिर्ह्यस्तन्यां चामाङा ॥४।४।२९॥

म० वृ०—ह्यस्तन्यामद्यतनीक्रियातिपत्त्योश्च विषये 'धातोरादिरवयवोऽट्' [1]स्यात्, अमाङा=न माङो योगे । अकरोत्, अकार्षीत्, अकरिष्यत् । विषयविज्ञानात् प्रत्ययव्यवधानेऽप्यट्, [2]परविज्ञाने हि अहन्नित्यादावेव स्यात् । अमाङा इति किम् ? मा भवान् कार्षीत्[3], मा स्म करोत् । धातोरिति किम् ? प्राकरोत् ॥२९॥

अव०—[1]अटो धात्ववयवत्वे सति 'प्रण्यमिमीत' इत्यादौ णत्वं सिद्धम् । [2]यदि अड् धातोरित्यस्य सूत्रार्थे ह्यस्तन्यादौ परतः अट् स्यादेवं कुर्यात्, तदाऽहन् इत्यादौ धातोर्ह्यस्तन्यादयः परतः सन्ति ।

³'मग्नां द्विषच्छद्मनि पङ्कभूते,
　　सम्भावनां भूतिमिवोद्धरिष्यन्।
आधिद्विषामा तपसां प्रसिद्धे,—
　　रस्मद्विना मा भृशमुन्मनी भूः'❀॥

इति किराते तृतीयसर्गे एकोनचत्वारिंशत्तमः श्लोकः, 'मा भवान् कार्षीत्' इत्यग्रेऽयं प्रयोगो ज्ञातव्यः ॥२९॥

## ²एत्यस्तेर्वृद्धिः ॥४।४।३०॥

म० वृ०—इणिकोरस्तेश्चादेः स्वरस्य ह्यस्तनीविषये 'वृद्धिः' स्यात्, अमाङा। ¹आदेरिति विभक्तिपरिणामात्। इण्– आयन्; इक्– अध्यायन्; आस्ताम्, आसन्। अमाङा इत्येव- मा स्म भवन्तो यन्, मा स्म भवन्तः सन् ॥३०॥

अव०–¹'आदेरिति०' 'अर्थवशाद्विभक्तिपरिणामः' इति न्यायात् 'आदित (? आदिः)' इति पदं पूर्वसूत्रे प्रथमान्तम्, 'एत्यस्तेर्वृद्धि'-रत्र सूत्रे आदेरिति षष्ठ्यन्तं ज्ञेयम्; इति विभक्तिपरिणाम उच्यते। ²'आयन्' इत्यादौ 'ह्विणोरप्विति व्यौ' (४।३।१५) इत्यनेन यत्वे कृते, 'आस्ताम्, आसन्' इत्यत्र च 'अस्त्योर्लुक्' (४।२।९०) इति सूत्रेण अस्तेः अकारलोपे सति, स्वरादित्वाभावात् उत्तरेण 'स्वरादेस्तासु' (४।४।३१) इत्यनेन वृद्धिर्न प्राप्नोति इति 'एत्यस्तेर्वृद्धि'-रिति वचनं कृतम्। अत्र परः प्राह,-विषयविज्ञानात् परत्वाद्वा उत्तरेण प्रागेव वृद्धौ कृतायां कुतो यत्वाकारलोपयोः प्राप्तिरिति चेत्, न, इदमेव वचनं ज्ञापकं कृतम्, "अन्यस्मिन् धातुप्रत्ययकार्ये कृते एव पश्चाद्वृद्धिः कर्त्तव्या, तद्बाध्योऽट् च भवति", तेन "ऐयरुः, अध्यैयत" इत्यादौ इयादेशे कृते पश्चाद्वृद्धिः सिद्धा, अन्यथा "आयरुः, अध्यायत" इति रूपं स्यात्, अचीकरदित्यादौ दीर्घत्वं सिद्धम्, अत्र हि अटि कृते स्वरादित्वाद्दीर्घो न स्यात्; इति हेतोर्यत्वाकारलोपापवादोऽयम् "एत्यस्तेर्वृद्धि"-रिति योगः। 'अध्यायन्' इत्यत्र च 'इको वा' (४।३।१६) इति सूत्रेण यत्वे प्राप्ते 'एत्यस्ते'-रिति बाधकं वचनम्, यत्वाभावपक्षे तु इयि कृते स्वरादित्वादुत्तरेण वृद्धिः, 'अध्यैयन्' इत्यपि सिद्धम्, इति विशेषो ज्ञेयः ॥३०॥

## स्वरादेस्तासु ॥४।४।३१॥

म० वृ०—स्वरादेर्धातोरादेः स्वरस्य तास्वद्यतनीक्रियातिपत्तिह्यस्तनीषु विषये 'आसन्ना वृद्धिः' स्यात्, अमाङा। आटीत्, आटिष्यत्, आटत्; ¹आर्च्छीत्, ऐषीत्, ऐच्छत्; ऐधिष्ट, ऐधत, औहिष्ट औहत; इन्द्रमैच्छत्=ऐन्द्रीयत्, एवमैश्वर्यीयत्, ²औंकारीयत्, ³औषधीयत्। अमाङा इत्येव– मा भवानटीत्, मा स्म भवानटत्।

अव०–(एवम्) ¹आर्च्छिष्यत्, आर्त (? आर्च्छत्) ऐषिष्यत्, ऐधिष्यत। ²ओंकारमैच्छत्। ³औषधमैच्छत् ॥३१॥

## स्ताद्यशितोऽत्रोणादेरिट् ॥४।४।३२॥

म० वृ०–धातोः परस्य सकारादेस्तकारादेश्चाशितः प्रत्ययस्यादि-'रिट्' स्यात्, अत्रोणादेः, त्रस्य=त्रप्रत्ययस्य उणादेश्च नेट्। अर्दिटिषति, अलविष्ट, लविष्यति, लविता, लवितुम्। स्तादीति किम्?

❀ वेदव्यासमुनिना विद्यासाधनार्थं तपोविधानाय प्रेरितोऽर्जुनस्तदर्थं शिलोच्चयं प्रति गन्तुमुत्सुकः सन् प्रस्थानप्रारम्भे द्रौपद्याः समीपे जगाम। तदानीं सा तं तपःसिद्धिपर्यन्तं मनोऽस्थैर्यपरिहारायोपदिशन्त्याह–'मग्नाम्' इत्यादि। पङ्कभूते (=पङ्कोपमिते) द्विषच्छद्मनि (=शत्रुकपटे) मग्नां (=पतितां) संभावनां (=गौरवं) भूतिमिव (=सम्पत्तिमिव) उद्धरिष्यन् (त्वम्) आधिद्विषां (=दुःखच्छिदां) तपसामाप्रसिद्धेः (सम्यक्सिद्धिपर्यन्तम्) अस्मद्विना (=अस्माकं विरहाद्) मा भृशमुन्मनी भूः (अत्यन्तं दुर्मना मा भूः)। सम्यक्तपोविधानेन प्रसाधितया विद्यया कपटेन शत्रुगृहीतां स्वराज्यसम्पत्तिं त्वं स्वायत्तीकर्तुं शक्ष्यति, अतस्तपःसमाप्तिं यावन्मनःस्थैर्यं न हेयम्, तदर्थं चास्मद्विरहो न चिन्त्यः, अन्यथा त्वन्मनःस्थैर्यं न स्थास्यतीति भावः।

भूयात्। अशितीत्येव-- आस्ते। अत्रोणादेरिति किम्? शस्त्रम्, पत्रम्; उणादि,-वत्सः, अंसः, हस्तः ॥३२॥

अव०-'शसू हिंसायाम्, शसत्यनेन इति शस्त्रम्, पतत्यनेन (इति) पत्रम्,'नीदाव्शसू युयुजस्तुतुदसिसिचमिहपतपानहस्त्रट्' (५।२।८८ इति त्रट्) ॥३२॥

## तेर्ग्रहादिभ्यः ॥४।४।३३॥

म० वृ०-ग्रहादिभ्य एव परस्य स्ताद्यशितस्तेरादिरिट् स्यात्। निगृहीतिः, अपस्निहितिः, उदितिः, भणितिः, लिखितिः, अन्दोलितिः। बहुवचनमाकृतिगणार्थम्। ग्रहादिभ्य एवेति नियमात् अन्यत्र नेट्- शान्तिः, दीप्तिः, ज्ञप्तिः, वान्तिः; तिकः,-- सन्तिः, तन्तिः, कण्डूतिः ॥३३॥

अव०-तेरिति सामान्येन क्तेः तिको वा ग्रहणम्। निग्रहणं=निगृहीतिः, 'स्त्रियां क्तिः' (५।३।९१। इति क्तिः), 'ग्रहव्रश्चभ्रस्जप्रच्छः' (४।१।८४। इति) य्वृत्। 'उदितिः',अत्र 'उन्दैप् क्लेदने' इति धातुर्घटते। 'ष्णिहौच् प्रीतौ' अपस्नेहनम् (इति) क्तिः। तथा अन्दोल् धातुश्चुरादौ केचित्पठन्ति, स्वमते बहुलमेतन्निदर्शनमिति। यथासम्भवं 'तिक्कृतौ नाम्नि' (५।१।७१) इति तिक्। 'तेरेव ग्रहादिभ्य' इति विपरीतनियमो न भवति, उत्तरत्र ग्रहेः परोक्षायामिटो दीर्घनिषेधात्। शम्यात् (इति) शान्तिः, 'तिक्कृतौ नाम्नि' (५।१।७१। इति) आशीरर्थे तिक्। ज्ञपयतेः परः (क्तिः), 'सातिहेतियूतिजूतिज्ञप्तिकीर्तिः' (५।३।९४) इति निपातः ॥३३॥

## गृहणोऽपरोक्षायां दीर्घः ॥४।४।३४॥

म० वृ०-ग्रहेर्यो विहित इट्, तस्य 'दीर्घः' स्यात्, अपरोक्षायाम्=स इट् परोक्षायां चेन्नहि। [1]ग्रहीता, ग्रहीतुम्, ग्रहीष्यति, [2]अग्रहीत्, [3]अग्रहीध्वम्, अग्रहीढ्वम्। विहितविशेषणं किम्? यङन्ताद्विहितस्य [4]मा भूत्,-जरीगृहिता। लुप्ततिवृनिर्देशाद् यङो लुपि न दीर्घः- जरीगर्हिता,[5] जरीगर्हितव्यम्। अपरोक्षायामिति किम्? जगृहिव ॥३४॥

अव०-[1]'स्ताद्यशितो०' (४।४।३२।इति) सर्वत्र इट्। [2]"अग्रहीध्वम्, अग्रहीढ्वम्" इत्यत्राद्यतनीध्वम्, सिच्, 'स्ताद्य०' (४।४।३२।इति) इट् सिजादौ कार्यः, 'गृह्णोऽपरो०' (इति) इटो दीर्घः, 'सो धि वा' (४।३।७२) इत्यनेन सिचो लुक्, 'हान्तस्थाञ्जीड्भ्यां वा' (२।१।८१)इत्यनेन विकल्पेन धस्य ढः। [3]ग्रह, अद्यतनीदि, 'सिजद्यतन्याम्' (३।४।५३।इति सिच्), 'सः सिजस्तेर्दिस्योः' (४।३।६५) इत्यनेन ईत्, 'स्ताद्यशितो०' (४।४।३२।इति) इट्, 'गृह्णोऽपरोक्षायां दीर्घः' इति इटो दीर्घः, 'स्थानीवाऽवर्णविधौ' (७।४।१०९) इति न्यायात् दीर्घस्य स्थानिवद्भावात् 'इट ईति' (४।३।७१) इत्यनेन सिचो लुक्। [4]इटो दीर्घो मा भूत्। [5]यलोपे गृह्णातेः पर इट् अस्त्येव, 'रिरौ च लुपि' (४।१।५६।इति) र्यागमः) ॥३४॥

## वृतो नवाऽनाशीः-सिच्परस्मै च ॥४।४।३५॥

म०वृ०-वृभ्यामृकारान्तेभ्यश्च धातुभ्यः परस्य इटो 'वा दीर्घः' स्यात्, परोक्षाशिषोः परस्मैपदविषये सिचि च (दीर्घो) न भवति। [1]वृग्,- प्रावरीता, प्रावरिता; [2]वृङ्,- वरीता, वरिता; ऋदन्त,- तरीता, तरिता; तितरीषति, तितरिषति। परोक्षादिवर्जनं किम्? ववरिथ, तेरिथ, वरिषीष्ट, प्रावारिष्टाम्,*प्रावारिषुः[3] ॥३५॥

अव०-सिचः परस्मैपदं=सिच्परस्मै इति समासः कार्यः, सप्तमीङि, सूत्रत्वात् ङिलोपः। यस्मिन् स्यादौ सिच् विधीयते, तत् सिचः परस्मैपदं, तस्मिन्। 'ऋत्' इत्यत्र तो वर्णनिर्देशार्थः। *अन्यथा "समरीता, समरिता" इति ऋणातेरेव*

* सिचः परस्मैपदविशेषणादात्मनेपदे दीर्घो भवत्येव,—अवरीष्ट, अवरिष्ट; प्रावरीष्ट, प्रावरिष्ट; आस्तरीष्ट, आस्तरिष्ट।

विज्ञायते ★। [1]वृग् वरणे, ( एवम् ) प्राविवरीषति, प्राविवरिषति । [2]"वृङ्श् सम्भक्तौ" (एवं) विवरीषति, विवरिषति । [3]'सिचि परस्मै०' (इति) वृद्धिः, 'सिज्विदोऽभुवः' (४।२।९२।इत्यनो) पुस् । ।।३५।।

## इट् सिजाशिषोरात्मने ।।४।४।३६।।

म० वृ०–वृतः परयोरात्मनेपदविषयोः सिजाशिषोरादि–'रिट् वा' स्यात् । [1]प्रावृत, प्रावरिष्ट, प्रावरीष्ट; [2] अवृत, अवरिष्ट, अवरीष्ट; आस्तीर्ष्ट, आस्तरिष्ट,[3] आस्तरीष्ट; प्रावृषीष्ट, प्रावरिषीष्ट; वृषीष्ट, वरिषीष्ट । आत्मने इति किम् ? प्रावारीत्, अतारीत्[4] ।।३६।।

प्रव०–'वृतः०' प्राप्ते विभाषेयम् । [1]प्र, वृग् । [2]वृङ्श् । [3]आशीः– आस्तीर्षीष्ट, आस्तरिषीष्ट । [4]एवमास्तारीत्, एषु नित्यमेव इट् ।।३६।।

## संयोगादृतः ।।४।४।३७।।

म० वृ०–धातोः संयोगात्परो य ऋकारस्तदन्तादात्मनेपदविषयसिजाशिषोरादिरिट् स्याद्वा । अस्मृषाताम्, अस्मरिषाताम्; स्मृषीष्ट, स्मरिषीष्ट । संयोगादिति किम् ? अकृत, कृषीष्ट । आत्मने इत्येव– अस्मार्षीत् ।।३७।।

प्रव०–'संयोगादृतः' इति सूत्रे इयं व्यावृत्तिः- धातोरिति विशेषणादिह नेट्,– मा निष्कृत, निष्कृषीष्ट । 'स्कच्छतोऽकि परोक्षायाम्' (४।३।८) इत्यत्र स्कग्रहणात् स्सट्संयोगो न गृह्यते, तेनेह नेट्,– समस्कृत, संस्कृषीष्ट ।।३७।।

## [२]धूगौदितः ।।४।४।३८।।

म० वृ०–धूग औदिद्भ्यश्च परस्य स्ताद्यशित आदिर्वा 'इट्' स्यात् । पृथग्योगात् 'सिजाशिषोरात्मने' इति निवृत्तम् । धोता, धविता; [3]औदित्,– रद्धा, रधिता; त्रप्ता, [1]तर्प्ता, तर्पिता । धूग्, औस्वृ, षूङौ इति त्रयाणाम् 'ऋवर्णश्र्यूर्णुगः कितः' (४।४।५८) इति 'उवर्णात्' ( ४।४।५७।८ ) इति च परत्वात् किति इट्प्रतिषेधः,– धूत्वा, स्वृत्वा, सूत्वा ।।३८।।

प्रव०–[1]"त्रप्ता, तर्प्ता'; अत्र 'तृपौच् प्रीतौ' (इति) तृप्, श्वस्तनी-ता, 'स्पृशादिसृपो वा' (४।४।११२) इति सूत्रेण धातुविचाले अकारो विकल्पेन । एवं दृपौच् (इत्यस्य) द्रप्ता, दर्प्ता, दर्पिता । [2]"धूग्श् कम्पने' इत्ययं धूग्, न तु 'धून् विधूनने', गिदिति निर्देशात् । तुदादिधू(धातोः) नित्यमिट्,– धुविता । [3]औदित्,– 'रधौच् हिंसासंराद्धयोः', नशौच्,– नंष्टा, नशिता; मुहौ-च्,– मोग्धा, मोढा, मोहिता; द्रुहौच्,– द्रोग्धा, द्रोढा, द्रोहिता; ष्णुहौच्,– स्नोग्धा, स्नोढा, स्नोहिता; ष्णिहौच्,– स्नेग्धा; स्नेढा, स्नेहिता; गुपौच्,– गोप्ता, गोपिता; जुगुप्सति, जुगोपिषति, जुगुपिषति; गुहौ,– निगोढ, निगूहिता; गाहौ,– विगाढा, विगाहिता; औस्वृ,– स्वर्त्ता, स्वरिता; षूङौ,–सोता, सविता इत्यादि । स्वरतेस्तु स्ये परतः परत्वात् 'हनृतः स्यस्य' ( ४।४।४९।इति ) नित्यमिट्,– स्वरिष्यति । औदितः (इति) अत्रानुबन्धनिर्देशात् यङो लुपि नित्यमिट्,– सरीस्वरिता, जोगूहिता । अत्रोणादेरित्येव– धूसरः,अक्षी,–अक्षरम्; 'धूगौदितः' इति सूत्रे व्यावृत्तिरियम् ।।३८।।

## निष्कुषः ।।४।४।३९।।

म० वृ०–निर्-निस्पूर्वात् कुषः परस्य स्ताद्यशित आदिर्वा 'इट्' स्यात् । निष्कोष्टा, निष्कोषिता । निष्पूर्वनियमात्केवलादन्यपूर्वाच्च नित्य एवेट्,–

★ अत्र लघुन्यासकारकृतस्फुटार्थ एवम्—"तकाराभावे 'ऋ' इति निर्दिश्यमाने, 'वृ' इत्यनेन धातुना साहचर्यात् 'ऋश् गतौ' इत्यस्यैव ग्रहणं स्यात्, न ऋकारान्तधातुमात्रपरिग्रहः, ततश्च 'समरीता, समरिता' इत्यत्रैव स्यात् । तकारे तु सति,–'ऋत्' इत्यस्य धातोरभावात् तकारस्य च वर्णनिर्देशेन प्रसिद्धत्वात् ऋकारवर्णविज्ञानात् तदन्तधातुमात्रप्रतिपत्तिर्भवतीति तकारोपादानम् ।"

कोषिता, प्रकोषिता । योगविभाग उत्तरार्थः ॥३९॥

## क्तयोः ॥४।४।४०॥

म० वृ०–निष्कुषः परयोः 'क्तयोरादिरिट्' स्यात् । पृथग्योगान्नवेति निवृत्तम् । निष्कुषितः, निष्कुषितवान् ॥४०॥

## जॄ-व्रश्चः क्त्वः ॥४।४।४१॥

म० वृ०–जॄव्रश्चिभ्यां परस्य 'क्त्वाप्रत्ययस्यादिरिट्' स्यात् । जरित्वा, जरीत्वा; व्रश्चित्वा । 'जॄ' इत्यस्य 'ऋवर्णश्र्यूर्णुगः०' (४।४।५८) इति निषेधे, व्रश्चेरौदित्त्वात् ['धूगौदितः' (४।४।३८) इत्यनेन] विकल्पे प्राप्ते वचनम् ॥४१॥

अव०–सूत्रे 'जॄष् वयोहानौ' इत्ययं ग्राह्यः, न तु दैवादिकः, तस्य जीर्त्वा । 'व्रश्चित्वा', अत्र 'क्त्वा' (४।३।२९) इति सूत्रेण सेट् क्त्वा 'किद्वन्न' भवति इति न स्थूल ॥४१॥

## ऊदितो वा ॥४।४।४२॥

म० वृ०–ऊदितो धातोः परस्य 'क्त्वा इत्यस्यादिरिट् स्याद्वा' । दान्त्वा, दमित्वा । यमूसिध्यत्योरप्राप्ते, शेषाणां प्राप्ते विकल्पोऽयम् ॥४२॥

अव०–(अत्र) दान्त्वा, दमित्वा; शान्त्वा, शमित्वा; तान्त्वा, तमित्वा, यूत्वा, देवित्वा; स्यूत्वा, सेवित्वा इति प्रयोगावली ज्ञेया । यमूषिधूप्रयोगौ न दर्शितौ, अदृष्टत्वात् । 'दान्त्वा' इत्यादिषु 'अहन्पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) इति अनिटि किति दीर्घः । 'द्यूत्वा स्यूत्वा' इत्यत्र 'अनुनासिके च च्छ्वः शूट्' (४।१।१०८) इति अनेन वकारस्य ऊट् ॥४२॥

## क्षुध-वसस्तेषाम् ॥४।४।४३॥

म० वृ०–क्षुधिवसिभ्यां परेषां 'क्तक्तवतुक्त्वामादिरिट् स्यात् । क्षुधितः, क्षुधितवान्, क्षुधित्वा; उषितः, उषितवान्, उषित्वा; यङो लुपि,-वावसितः, वावसित्वा ॥४३॥

अव०–तेषाम्, कोऽर्थः ? परेषाम्, षष्ठी,आम् । क्षुधंच् बुभुक्षायाम्' । 'वसं निवासे' (इति) अयमेव धातुः, न तु 'वसिक् आच्छादने', अस्य ......[इट्] अस्त्येव । वावसितः, वावसितवान्, वावसित्वा इत्यत्र गणपाठनिर्देशात् 'यजादिवचेः किति' (४।१।७९) इत्यनेन न य्वृत् ॥४३॥

## लुभ्यञ्चेर्विमोहार्चे ॥४।४।४४॥

म० वृ०–लुभ्यञ्चिभ्यां यथासङ्ख्यं [1]विमोहेऽर्चायां[2] चार्थे 'क्तक्तवतुक्त्वामादिरिट्' स्यात् । विलुभितः सीमन्तः, [3]विलुभिताः केशाः, विलुभितवान्; [4]लुभित्वा, लोभित्वा; अञ्चिता गुरवः, अञ्चितवान् गुरून्, अञ्चित्वा । विमोहार्च इति किम् ? [5]लुब्धो जाल्मः, उदक्तमुदकं कूपात्; अक्त्वा, अञ्चित्वा ॥४४॥

अव०–लुभेः उत्तरसूत्रेण 'सहलुभेच्छरुष०' (४।४।४६) इत्यादिना विकल्पे, अञ्चेश्च 'ऊदितो वा' (४।४।४२) इति विकल्पे, उभयोश्च 'वेटोऽपतः' (४।४।६२) इति क्तयोर्नित्यं प्रतिषेधे प्राप्ते 'लुभ्यञ्चेर्विमोहार्चे' इति सूत्रं कृतम् । [1]विमोहो=विमोहनम्, आकुलीकरणम् । [2]अर्चा=पूजा । [3]अनाकुला आकुलाः कृता इत्यर्थः । 'लुभच् गार्ध्ये' । [4]'लुभित्वा, लोभित्वा' कोऽर्थः ? अनाकुलमाकुलीकृत्य इत्यर्थः, 'वौ व्यञ्जनादेः सन्चाय्वः' (४।३।२५) इति सेट् क्त्वा वा किद्वत् । [5](एवम्) लुब्धोऽजः, लुब्धवान्, लुब्ध्वा ॥४४॥

## पूङ्-क्लिशिभ्यो नवा ॥४।४।४५॥

म० वृ०–पूङ्-क्लिशिभ्यां परेषां 'क्तक्तवतुक्त्वामादिरिट् स्यान्नवा' । पवितः, पूतः; पवितवान्, पूतवान्; पवित्वा, पूत्वा; क्लिशितः, क्लिष्टः, क्लिशित्वा, क्लिष्ट्वा ॥४५॥

अव०–सूत्रे 'पूङ् पवने' इत्ययं ग्राह्यः, न तु 'पूगृश् पवने', अस्य "न डीङ्-शीङ्" (४।३।२७) इत्यादिना कित्त्वप्रतिषेधाभावात् 'पुवितः' इत्यनिष्टं

रूपं प्रासज्येत। 'क्लिशिभ्यो' इत्यत्र बहुवचनं "क्लिशिच् उपतापे, क्लिशौश् विबाधने" (इति) द्वयोरपि ग्रहणार्थं कृतम्। पूङः परतः 'उवर्णात्' (४।४।५९) इति निषेधे प्राप्ते, क्लिश्यतेर्नित्यमिटि प्राप्ते, क्लिश्नातेश्च औदित्त्वात् विकल्पे प्राप्ते, क्तयोश्च नित्यं निषेधे प्राप्ते 'पूङ्-क्लिशिभ्यो नवा' इति विभाषेयं कृता ॥४५॥

## सह-लुभेच्छ-रुष-रिषस्तादेः ॥४।४।४६॥

म० वृ०—एभ्यः परस्य 'स्ताद्यशितस्तकारादेरिट्' स्यान्नवा। सोढा, सहिता; सोढुम्, सहितुम्; सोढव्यं, सहितव्यम्; लोब्धा, लोभिता; लोब्धव्यं, लोभितव्यम्; एष्टा, एषिता; एष्टव्यम्, एषितव्यम्; "इषच् गतौ, इषश् आभीक्ष्ण्ये" इत्याभ्यां नित्यमेवेट्,-प्रेषिता, प्रेषितुम्, प्रेषितव्यम्; रुष्,-रोष्टा, रोष्टुम्; रिष्,-रेष्टा, रेष्टव्यम्। तादेरिति किम्? सहिष्यते, एषिष्यति[1] ॥४६॥

अव०—इच्छेति निर्देशात् 'इषत् इच्छायाम्' इत्यस्य ग्रहणम्, न तु इषच् इत्यादि (? देः)। [1](एवम्) लोभिष्यति। 'रुषच् रोषे' अथवा भ्वादौ 'कष शिष जष झष वष मष मुष रुष रिष यूष जूष शष चष हिंसायाम्' (इति) रुष्, रोष्टा, रोष्टुम्, रोष्टव्यम्; रोषिता, रोषितुम्, रोषितव्यम्। रिष्--रेष्टा, रेषिता; रेष्टुम्, रेषितुम्; रेष्टव्यम्, रेषितव्यम्; एते प्रयोगा रुषरिषेर्ज्ञातव्याः ॥४६॥

## इवृध-भ्रस्ज-दम्भ-श्रि-यूर्णु-भर-ज्ञपि-सनि-तनि-पति-वृद्दरिद्रः सनः ॥४।४।४७॥

म० वृ०—इवन्तात्, ऋधभ्रस्जदम्भश्रियूर्णुभरज्ञपिसनितनिपतिवृभ्यः, ऋकारान्तात् दरिद्रश्च परस्य 'सन आदिरिट् स्यान्नवा'। इवन्त,--दुद्यूषति, दिदेविषति; सिव्,--सुस्यूषति, सिसेविषति; ऋध्,--[1]ईर्त्सति, अर्दिधिषति; (भ्रस्ज,--) बिभ्रक्षति, बिभर्क्षति; एवं बिभर्जिषति, बिभ्रज्जिषति; (दम्भ,-) धिप्सति, धीप्सति, दिदम्भिषति; (श्रि,-) शिश्रीषति,[2] शिश्रयिषति; (यु,--) युयूषति, यियविषति; (ऊर्णु,--) प्रोर्णुनूषति, प्रोर्णुनुविषति, प्रोर्णुनविषति; (भर,--) बुभूर्षति, बिभरिषति; (ज्ञप्,-) ज्ञीप्सति[3], जिज्ञपयिषति; ज्ञपीति कृतह्रस्वग्रहणात् ज्ञापेर्जिज्ञापयिषति इत्येव, (सन्,-) सिषासति, सिसनिषति; (तन्,-) तितंसति[4], तितांसति, तितनिषति; (पत्,-) पित्सति[5], पिपतिसति; (वृ,-) प्राबुवूर्षति, प्राविवरिषति; एवं वुवूर्षते, ऋदन्त,-तितीर्षति, तितरिषति, तितरीषति; 'चिकीर्षति' इत्यत्र लाक्षणिकत्वान्नेट्, (दरिद्रा,-) दिदरिद्रासति, दिदरिद्रिषति ॥४७॥

अव०—[1]"ऋधूच् वृद्धौ, ऋधूट् वृद्धौ" (इति) द्वावपि ज्ञेयौ, ऋध्, अर्द्धितुमिच्छति (इति) सन्, 'ऋध ईर्त्' (४।१।१७इति) ऋधः स्थाने ईर्त्, न च द्विर्वचनम्। 'बिभ्रक्षति' इत्यादि,--'भ्रस्जीन् पाके' (इति) भ्रस्ज्, भ्रष्टुमिच्छति, सपूर्व (? सन्) 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) इत्यनेन स लुप्यते, 'यजसृज०' (२।१।८७) इति जस्य षः, 'षढोः कस्सि' (२।१।६२) (इति षस्य कः), 'नाम्यन्तस्था०' (२।३।१५) इति सकारस्य षः। दम्भ्, सन्, 'दम्भो धिप् धीप्' (४।१।१८इति) दम्भः स्थाने 'धिप्, धीप्', न च द्विर्वचनम्। [2]'स्वरहनगमोः सनि धुटि' (४।१।१०४इति) दीर्घः। यियविषति' इत्यत्र 'ओर्जान्तस्थापवर्गेऽवर्णे' (४।१।६०) इत्यनेन पूर्वस्य इत्वम्। प्रोर्णुनूषतीत्यादौ पूर्वं 'स्वरादेर्द्वितीयः' (४।१।४) इति 'नु' इत्यस्य द्वित्वम्, तत एकत्र 'स्वरहनगमोः सनि धुटि' (४।१।१०४) इति दीर्घः, 'वोर्णोः' (४।३।१९) इत्यनेन वा सेट् सन् ङिद्वत्, (अतः) एकत्र गुणः, अन्यत्र उव्। [3]जानन्तं प्रयुङ्क्ते (इति) णिग्, 'अर्त्तिरी०' (४।२।२१) इति पोऽन्तः, 'मारणतोषणनिशाने ज्ञश्च' (४।२।३०) इति ह्रस्वः ज्ञप्, ज्ञपयितुमिच्छति (इति) सन्, 'ज्ञप्याप्यो ज्ञीपीप्०' (४।१।१६) इति ज्ञीप्, ज्ञीप्सति। 'जिज्ञपयिषति' इत्यत्र सेट् सन्, (अतः) ज्ञीप् (आदेशः) न प्राप्नोति। [4]'सनि' (४।२।६१) इत्यनेन आत्वं नस्य, 'तनो वा' (४।१।१९५) इत्यनेन वा दीर्घः। [5]"रभलभशकपतपदामिः' (४।

१।२१। इतीः ) । वृग् ( इत्यस्य ) प्राविवरीषति (इत्यपि) । 'वृङ्श् सम्भक्तौ' (इत्यस्य) वुवूर्षति, विवरिषति, विवरीषति। 'तितीर्षति' इत्यस्याग्रे आतितीर्षति, आतितरिषति, आतितरीषति इत्यपि । 'बुभूर्षति' इत्यादौ 'इवृधभ्रस्जदम्भश्रियूर्णुभर०' इत्यत्र शवा निर्देशो विभक्तिधातोः यङ्लुपो भरस्य च इति निवृत्त्यर्थः, तेन बुभूर्षति इत्यत्र 'भृग् भरणे' इति भ्वादिको ग्राह्यः, 'ओष्ठ्यादुर्' (४।४।११७) इति उर्, 'भ्वादेर्नामिनो दीर्घो०' (२।१।६३) इति दीर्घ ऊर्, पक्षे गुणः ॥४७॥

## ऋ-स्मि-पूङ्ञ्ज्यशौ-कृ-गृ-दृ-धृ-प्रच्छः ॥४।४।४८॥

म० वृ०—पृथग्योगात् नवेति स्थितं (? निवृत्तम्)। एभ्यः परस्य 'सनः आदिरिट्' स्यात्। अरिरिषति, सिस्मयिषते, [1]पिपविषते, अञ्जिजिषति, [2]अशिशिषते, चिकरिषति,[3] जिगरिषति, जिगरीषति, [4]आदिदरीषते, [5]आदिधरिषते, पिपृच्छिषति। ऋस्मिपूङ्दृधृप्रच्छामप्राप्ते, शेषाणां विकल्पे प्राप्ते वचनम् ॥४८॥

अव०—[1]'पूङ् पवने' इत्ययं ग्राह्यः, अनुबन्धनिर्देशात्, न तु 'पूंग्श् पवने', तस्य 'पुपूषति, पुपूषते' । [2]'अशौटि व्याप्तौ' इत्ययम्, न तु 'अशश् भोजने', तस्य इट् अस्त्येव। [3]'कृत् विक्षेपे' इत्ययं धातुः, एवं चिकरीषति, 'वृतो नवानाशी'—त्यादिना (४।४।३५) वा दीर्घः। प्रच्छसहचरिताः कृगधृ इत्येते धातवस्तौदादिका एव ग्राह्याः, तेन कृणातेः चिकीर्षति, चिकरिषति, चिकरीषति; गृणातेर्जिगीर्षति, जिगरिषति, जिगरीषति; धरतेः दिधीर्षति इत्येवं भवति । [4]दृङ्त् आदरे । [5]धृङ्त् स्थाने ॥४८॥

## हनृतः स्यस्य ॥४।४।४९॥

म० वृ०—हन्तेः ऋदन्ताच्च परस्य 'स्यस्यादिरिट्' स्यात् । हनिष्यति, अहनिष्यत्, हनिष्यन्;[1] करिष्यति, करिष्यमाणः[2]; स्वरिष्यति[3] । तकारनिर्देशादृर्त्तेः (एव) न ग्रहणम् ॥४९॥

अव०—[1] एवमाहनिष्यते, आहनिष्यमाणः इत्यपि। (एवम्) [2]अकरिष्यत्, करिष्यन्। [3]स्वरतेः परत्वात् विकल्पं बाधित्वा नित्यमिट् ॥४९॥

## कृत-चृत-नृत-छृद-तृदोऽसिचः सादेर्वा ॥४।४।५०॥

म० वृ०—एभ्यः परस्य सिच्वर्जितस्य सकारादेः स्ताद्यशित 'आदिरिट् स्याद्वा'। कर्त्स्यति, कर्त्तिष्यति; चिकृत्सति, चिकर्त्तिषति; चर्त्स्यति, चर्त्तिष्यति; चिचृत्सति, चिचर्तिषति, नर्त्स्यति, नर्त्तिष्यति; निनृत्सति, निनर्त्तिषति; छर्त्स्यति, छर्दिष्यति; तर्त्स्यति, तर्दिष्यति । सादेरिति किम्? कर्त्तिता, नर्त्तिता । असिच इति किम्? अकर्त्तीत्, अनर्त्तीत्। प्राप्ते विभाषा ॥५०॥

अव०—'कृतैत् छेदने कृतैप् वेष्टने' वा। 'चृतैत् हिंसाग्रन्थयोः' (इति) चृत्। 'नृतैत् नर्त्तने'। 'उछृदृपी दीप्ति–देवनयोः'। 'उतृदृपी हिंसा-ऽनादरयोः' (इति) तृद् ॥५०॥

## गमोऽनात्मने ॥४।४।५१॥

म० वृ०—गमेः परस्य सकारादेः स्ताद्यशित 'आदिरिट्' स्यात्, नत्वात्मनेपदे[1]। गम्लृ,–गमिष्यति, अगमिष्यत्, जिगमिषति, जिगमिषिता, जिगमिषितुम्;[2] [3]इण्,–जिगमिषति ग्रामम्, जिगमिषुः; इक्,–अधिजिगमिषति मातुः,[4] इङ्,–अधिजिगमिषिता शास्त्रस्य, अधिजिगमिषुः, अधिजिगमिषितव्यम् । अनात्मने इति किम्? गंस्यते ग्रामः, संगंस्यते वत्सो मात्रा, [5]गंस्यमानः, सङ्गंस्यमानः, सञ्जिगंसिष्यमाणः; [6]एवमधिजिगांसते, अधिजिगांस्यते; इणिकोर्जिगांस्यते, अधिजिगांस्यते माता[7] ॥५१॥

अव०—'गम' इति (आदेशस्य) अनादेशस्य च ग्रहणम्, अविशेषात्। [1]गमेः परतो यदि आत्मनेपदं न भवति इत्यर्थः, आत्मनेपदविषयस्य अविषयस्य चात्मनेपदाभावे सति इट् भवतीत्यर्थः । [2](एवम्)

सञ्जिगमिषिता, सञ्जिगमिषितव्यम् । [3]इण्-इक्-इङ् धातोः 'सनीङश्च' (४।४।२५) इति सूत्रेण 'गम' आदेशः । [4](एवम्) अधिजिगमिषुः । [5]गंस्यते ग्राम इत्यादि ★ उदाहरणान्यारभ्य सञ्जिगंसिष्यमाण इति यावत् गम्लृधातोरेव एतानि रूपाणि । तत्र निरुपसर्गस्य गमेर्भावे कर्मणि चात्मनेपदम्, समपूर्वकस्य गमेः 'समो गमृच्छि'० (३।३।८४) इत्यनेन (कर्तरि) आत्मनेपदम् । अगंस्यत, समगंस्यत, गंसीष्ट, सङ्गंसीष्ट, संजिगंसते, सञ्जिगंसमानः, संजिगंसिष्यते, संगंसिष्यमाणः इत्यपि ज्ञेयानि । [6]तथा अधिजिगांसते, अधिजिगांसमानः, अधिजिगांस्यते, अधिजिगांसिष्यते, अधिजिगांसिष्यमाणः इत्यपि ज्ञातव्यानि । [7]एवं संजिगांस्यते ॥५१॥

## स्नोः[1] ॥४।४।५२॥

म० वृ०–स्नोः परस्य स्ताद्यशित 'आदिरिट्' स्यात्, न त्वात्मनेपदे[2] । प्रस्नविष्यति, प्रस्नविता, प्रस्नवितुम्[3] । अनात्मने इति किम् ? प्रस्नोष्यते[4] । स्नोतेरिट् सिद्ध एव, प्रतिषेधाभावात्, आत्मनेपदे इड्निवृत्त्यर्थं तु वचनम् । एवमुत्तरयोगोऽपि ॥५२॥

अव०–[1]'स्नोः' इति पृथग्योगात् अत्र सूत्रे सादेरिति नानुवर्त्तते । [2]यदि स्नोः परमात्मनेपदं न भवति । [3](एवं) प्रस्नवितव्यम् । प्रसुस्नूषति● इत्यत्र 'ग्रहगुहश्च सनः' (४।४।६०) इति इट्प्रतिषेधः । [4]प्रस्नोष्यमाणः, प्रास्नोष्यत, प्रस्नोषीष्ट प्रस्नोता इत्यपि ॥५२॥

## क्रमः ॥४।४।५३॥

म० वृ०–क्रमः परस्य स्ताद्यशित 'आदिरिट्' स्यात्, न त्वात्मनेपदे[1] । क्रमिष्यति, निरक्रमीत्,[2] क्रमितासि, चिक्रमिषति, चिक्रमिषिता, प्रक्रमितुम्, चिक्रमिषितुम्, प्रक्रमितव्यम् । अनात्मने इत्येव– प्रक्रंस्यते, प्रक्रंस्यमानः, उपक्रंस्यते, उपक्रंस्यमानः, प्रक्रन्ता, उपक्रन्तासे, प्रक्रंसीष्ट, प्राक्रंस्त, प्रचिक्रंसते । कथं चिक्रंसया कुत्रिमपत्रिपङ्क्तेः' (इति) अत्रेड्भावः ? गतानुगतिक △ एष पाठः, 'जिघृक्षया[3] कुत्रिमपत्रिपङ्क्ते'– रिति तु [4] अविगानः पाठः ॥५३॥

अव०–[1]आत्मनेपदविषयात् आत्मनेपदाऽविषयाद्वा । [2]'निरक्रमीत्', अत्र 'व्यञ्जनादेर्वोपान्त्य'० (४।३।४७) इत्यनेन न वृद्धिः, 'न श्विजागृ'० (४।३।४९) इति प्रतिषेधः । [3]पत्रिणां=पक्षिणां हंसादीनां पङ्क्तिः, तस्याः । [4]न विद्यते विगानं=वचनीयता दोषो यत्र=सोऽविगानः पाठः ॥५३॥

## तुः ॥४।४।५४॥

म० वृ०–अनात्मनेपदविषयात् क्रमः परस्य तुः=तृचः तृनश्च स्ताद्यशित 'आदिरिट्' स्यात् । क्रमिता, निष्क्रमिता । अनात्मने इत्येव– व्यतिक्रन्ता, प्रक्रन्ता, आक्रन्ता ॥५४॥

अव०–आत्मनेपदविषयश्च क्रमिः कर्मव्यतिहारवृत्त्यादिषु प्रोपव्याङ्पूर्वकश्च आरम्भादिषु❀ भवति । 'तुः', कोऽर्थः ? तृचः तृनश्च । क्रमोऽनुपसर्गादिति विकल्पेनात्मनेपदविषयत्वात् 'क्रन्ता' इत्यपि ॥५४॥

## न वृद्भ्यः ॥४।४।५५॥

म० वृ०–वृतादिपञ्चकात्परस्य 'स्ताद्यशित आदिरिट्' न भवति, [1]आत्मनेपदनिमित्तं वृतादयो यदि न भवन्ति । वृत्,- वर्त्स्यति, विवृत्सति, विवृत्सिता, विवृत्सितुम्, विवृत्सितव्यम्, विवृत्सा;

★ अत्र 'आदि उदाहरणानि' इति पाठोऽधिकः ।

● ननु 'प्रसुस्नूषति, इत्यत्र सनः स्ताद्यशित्वादात्मनेपदाभावाच्च कथं नेट् ? इत्याह–'प्रसुस्नूषति' इत्यादि ।

△ गतस्यानुगतं=गतानुगतम्, तदत्रास्तीति 'अतोऽनेकस्वरात्' (७।२।६) इत्यनेन इकः ।

❀ आदिपदाद् विपूर्वस्य स्वार्थे आङ्पूर्वस्य तु ज्योतिरुद्गमे ।

स्यन्द्,- स्यन्त्स्यति, सिस्यन्त्सति, सिस्यन्त्सिता: वृधे: वृतिवन् रूपाणि, [२]शृध्,- शर्त्स्यति; कृप्,-कल्प्स्यति, चिकॢप्सति, चिकॢप्सिता, कल्प्ता, कल्प्तार: । स्यन्दिकृपोरौदित्लक्षणो विकल्प: परत्वादनेन बाध्यते । अनात्मने इत्येव- वर्त्तिता, वर्त्तिष्यते, विवर्त्तिषते विवर्त्तिषितव्यम्; एवं वर्द्धिष्यते, विवर्द्धिषते; कल्प्स्यते, कल्पिस्यते[३] अकल्पिष्यत ।.५५॥

अव०—भ्वादौ द्युतादिगणान्ते 'वृत्, स्यन्द्, वृध्, शृध्, कृप्' इति वृत्पञ्चकम् । [१]आत्मनेपदनिमित्तमित्यादि,-अनात्मनेपदनिमित्तं वृतादय: स्यकारादिप्रत्ययविषये सन्प्रत्ययविषये च विकल्पेन भवन्ति, कृपिधातुश्च श्वस्तनीविषये विकल्पेन भवति, इति 'वृद्भ्य: स्यसनो:' (३।३।४५) 'कृप: श्वस्तन्याम्' (३।३।४६) उक्तमस्ति । एकत्र परस्मैपदमेकत्र आत्मनेपदं च । यत्र परस्मैपदम् तत्र इट् (न) भवत्येव, यथा- वर्त्स्यति, वर्तिष्यते इत्यादि । [२]शृध्,- शर्त्स्यति, शिशृत्सति, शिशृत्सिता, शिशृत्सितुम्, शिशृत्सितव्यम् । [३]एवं चिकॢप्सितुम्, चिकॢप्सितव्यम्, कल्प्तासि; एषु सर्वत्र 'ऋरलृलं कृपोऽकृपीटादिषु' (२।३।९९) इत्यनेन (ऋत:) लृकार: रस्य च ल: ।।५५।।

**एकस्वरादनुस्वारेत: [१] ।।४।४।५६।।**

म० वृ०—एकस्वरादनुस्वारेतो धातोर्विहितस्य 'स्ताद्यशित आदिर्नेट्' स्यात् । पाता, आकूशाता, आख्याता, जेता । एकस्वरादिति किम्? अवधीत्, शाशकिता । विहितविशेषणं किम्? चिकीर्षति, पश्चादनेकस्वरत्वेऽप्यत्र प्रतिषेधो भवत्येव । अनुस्वारेत इति किम्? श्वि- श्वयिता, श्रयिता । कथं 'तप्ता, दप्ता'? औदित्वाद्विकल्पेनेट् ।।५६।।

अव०—[१]अनुस्वार इत्=अनुबन्धो यस्य, अनुस्वारानुबन्धधातु: इत्यर्थ: (तस्मात्) । येषां धातूनां अनुस्वारोऽनुबन्धो नास्ति ते धातव: सेटो भवन्ति । श्वि, श्रि, डी, शी, यु, रु, क्षु, क्ष्णु, णु, स्नु, वृग्, वृङ्, ऊदन्ता ॠदन्ता इत्यादय: प्राय: सर्वेऽपि चुरादय: युजादिश्च सेटो भवन्ति । तथा चाह—

'श्विश्रिडीशीयुरुक्षुक्ष्णु,-णुस्नुभ्यश्च वृगो वृङ:
ऊदॄदन्त-युजादिभ्य:' इति पादत्रयम् ।

अथ अनुस्वारानुबन्धा उच्यन्ते, 'स्वरान्ता धातवोऽपरे' ।१।

इति चतुर्थपाद: श्लोकस्य । 'पाठ एकस्वरा: स्युर्ये', अयमर्थ:- पूर्वोक्तादपरे, 'ये' इति धातुपारायणे स्वरान्ता धातव:, कीदृशा: स्वरान्ता:? ये धातव: पाठे=भ्वादिसर्वधातुगणे एकस्वरा भवन्ति ते अनुस्वारेत उच्यन्ते । तथाहि—

पाठ एकस्वरा: स्युर्येऽनुस्वारेत इमे मता: ।
द्विविधोऽपि शकिश्चैवं वचिर्विचिरिची पचि: ।।२।।

सिञ्चतिर्मुचिरितोऽपि प्रच्छति-भ्रस्जिमस्जि भुजयो युजिर्यजि: । त्वञ्जिरञ्जिरुजयो निजिर्विजसञ्जिभञ्जिभजय: सृजित्यजी ।।३।। स्कन्दिविद्यविदॢविन्तयो नुदि: स्विद्यति: शदिसदी भिदिच्छिदी । तुद्यदी पदिहदी खिदिक्षुदी राधिसाधिशुधयो युधिव्यधी ।।४।। बन्धिबुध्यरुधय: क्रुधिक्षुधी सिध्यतिस्तदनु हन्तिमन्यती । आपिना तपिशपिक्षिपिच्छुपो लुम्पति: सृपिलिपी वपिस्वपी ।।५।। यभिरभिलभियमिरमिनमिगमय: क्रुशिलिशिरुशिरिशिदिशितिदशतय: । स्पृशिमृशतिविशतिदृशिशिश्लषिशुषयस्त्विषिपिषिविष्लकृषितुषिदुषिपुषय: ।६। श्लिष्यतिर्द्विषिरतो घसिवसती रोहतिर्लिहिरिही अनिगदितौ । देग्धिदोग्धिलिहयो मिहिवहती नह्यतिर्दहिरिति स्फुटमनिट: * ।।७।।

* अत्र श्लोकसप्तकेन धातूनां स्वरान्तव्यञ्जनान्तलक्षणद्विप्रकारमाश्रित्य सेटनिड्विभाग: प्रदर्शित:, तत्र सार्धश्लोकेन स्वरान्तधातूनाश्रित्य सार्धपञ्चश्लोकैश्च व्यञ्जनान्तधातूनाश्रित्य प्रदर्शित: । आद्यसार्धश्लोकभावार्थ एवम्—श्व्यादिवृपर्यन्तेभ्य:, ऊदन्तेभ्य:, ॠदन्तेभ्य:, (स्वरान्त)युजादिभ्यश्चान्ये ये स्वरान्ता धातवो धातुपाठे एकस्वरा अनुस्वारानुबन्धाश्च तेऽनिटो भवन्ति । तत इदं समापतितम्—श्व्यादिवृपर्यन्ता:, ऊदन्ता:, ॠदन्ता युजादयश्च स्वरान्ता धातव: सेट:, श्व्यादिभ्योऽन्ये ये धातुपाठे एकस्वरा अनुस्वारेतश्च धातवस्तेऽनिटो भवन्ति ।

सार्धपञ्चश्लोकेषु दर्शिता: शक्यादिधातवोऽनिट:, तेभ्योऽन्ये व्यञ्जनान्तधातव: (वेटो धातूनन्तरा सर्वे) सेटो भवन्ति ।

एते एकस्वरा अनुस्वारेतो धातवः, एषां न इट्। "पां पाने, घ्रां गन्धोपादाने, एवं ध्मां, ष्ठां, म्नां, दां, जिं, श्रिं, युं, स्मृं, सृं, ऋं, दृषं, ध्यैं' एवमादिप्रकाराः स्वरान्ता अनुस्वारेतो धातवः, एतेषामपि न इट् भवतीत्यर्थः । एकस्वरादनुस्वारेत इत्यस्य वृत्तौ सर्वा इयमवचूरिर्ज्ञातव्या । 'लुहि-रिही' इति हिंसार्थौ सौत्रौ । मनूयि,-मनिता । कथं मतं ? 'वेटोऽपतः' (४।४।६२) इति भविष्यति ।५६।

## ऋवर्णश्र्यूर्णुगः कितः ॥४।४।५७॥

म० वृ०–ऋवर्णान्ताद्धातोः, श्रेः ऊर्णोश्चैकस्वराद्विहितस्य 'कितः प्रत्ययस्यादिरिट् न' स्यात्। वृतः, वृतवान्, वृत्वा; तीर्णः, तीर्णवान्, तीर्त्वा; [1]पूर्त्तः, श्रितः, श्रितवान्; ऊर्णुतः[2] । गित्त्वात् यङ्लुपि इट् स्यादेव– ऊर्णोनवित्वा । एकस्वरान्तादित्येव– जागरितः । कित इत्येव– वरिता, तरिता, श्रयिता ।५७।

---

अव०–विहितविशेषणात् 'तीर्णः, पूर्णः' इत्यत्र (अनुक्रमेण) ईर्, ऊर् (इति) आदेशे कृतेऽपि इट्प्रतिषेधो भवत्येव । [1]"पृश् पालनपूरणयोः', पूर्त्तः, पूर्त्तवान्, पूर्त्वा । [2](एवम्) ऊर्णुत्वा, ऊर्णुवान्; एवं प्रोर्णुतः, प्रोर्णुवान् । 'उवर्णात्' (४।४।५८) इत्युत्तरसूत्रेणैव सिद्धे ऊर्णुग्रहणमनेकस्वरार्थम् ।५७।

## उवर्णात् ॥४।४।५८॥

म० वृ०–उवर्णान्तादेकस्वराद्विहितस्य 'कित आदिरिट् न' स्यात् । युतः, युतवान्; लूनः, लूनवान, लूत्वा ।५८।

## ग्रहगुहश्च सनः ॥४।४।५९॥

म० वृ०–ग्रहिगुहिभ्यामुवर्णान्ताच्च विहितस्य 'सन आदिरिट् न' स्यात् । जिघृक्षति, जुघुक्षति, [टुक्षु रु कुंङ् शब्दे] रुरूषति, तुतूषति, पुपूषति, लुलूषति ।५९।

---

अव०–यौतेस्तु 'इवृधभ्रस्जदम्भ०' (४।४।४७) इत्यादिना विकल्पेन इट् उक्तः,–यियविषति युयूषति ; इति हेतो–'ग्रहगुह०' इत्यनेन सर्वथा न······इति (? इट्) निषेधः । 'जिघृक्षति', ग्रह सन्, द्वित्वम्, 'गहोर्जः' (४।१।४०।इति द्वित्वे गस्य जः), 'सन्यस्य' (४।१।५९।इति द्वित्वे पूर्वस्येत्वम्) 'ग्रहव्रश्चभ्रस्जप्रच्छः' (४।१।८४) इति य्वृत्, 'गडदबादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये' (२।१।७७) इति गस्य घः, 'हो धुट्पदान्ते' (२।१।८२।इति) हस्य ढः, 'षढोः कस्सि' (२।१।६२।इति ढस्य क् ।५९।

## स्वार्थे ॥४।४।६०॥

म० वृ०–स्वार्थे कृतस्य 'सन आदिरिट् न' स्यात् । जुगुप्सति, [1]शीशांसते, मीमांसते[1] । स्वार्थ इति किम् ? पिपठिषति ।६०।

---

अव०–(एवम्) तितिक्षते, चिकित्सति । [1]"शान्दान्मानवधा'० (३।४।७) इत्यनेन सन दीर्घश्च ।६०।

## डीयश्व्यैदितः क्तयोः ॥४।४।६१॥

म० वृ०–डीयतेः, श्वयतेः ऐदिद्भ्यश्च परयोः 'क्तयोरिट् न' स्यात्; [1]डीनः, डीनवान्; उड्डीनः, उड्डीनवान्; सूनः[2] । [3]लग्नः, लग्नवान्; [4]उद्विग्नः, यत्तः, यत्तवान्[5] । 'डीय' इति श्यनिर्देशात् डयतेरिडेव– डयितः[6] ।६१।

---

अव०–[1]'डीङ्च् गतौ,' 'सूयत्याद्योदितः' (४।२।७०) इति नकारः । [2] (एवम्) सूनवान् । [3]ओलजैङ् ओलस्जैति व्रीडे । [4]ओविजैति भयचलनयोः । [5](एवं) त्रस्तः, त्रस्तवान् । [6]डीङ् विहायसां गतौ । 'डीये'-ति सूत्रे विशेषोऽयम्,- कृतै, नृतै, चृतै इत्येषां 'कृतचृत०' (४।४।५०) इत्यनेन वेट्त्वेन उत्तरसूत्रेण 'वेटोऽपतः' (४।४।६२) इति सूत्रेणापि क्तयोरिट्प्रतिषेधे सिद्धे, 'डीयश्व्यैदित' इत्यत्र यत् ऐदित्त्वं कृतं तत् यङ्लुबर्थम्; यङो लोपेऽपि इट्प्रतिषेधः स्यात् । तेन चरीकृत्तः, चरिकृत्तवान्; नरीनृत्तः, नरीनृत्तवान्; चरीचृत्तः, (चरिचृत्तवान्) इत्यत्रानेकस्वरत्वेऽपि इट्प्रतिषेधो भवत्येव इत्यर्थः ।६१।

## [1]वेटोऽपतः[2] ॥४।४।६२॥

म० वृ०-पतिवर्जिताद् यत्र कश्चिद्विकल्पितेटो धातोरेकस्वरात्परयोः 'क्तयोरादिरिट् न' स्यात् । [रधौ-]रद्धः, [गुहौ-] गूढः, गूढवान्; शान्तः, शान्तवान्; अस्तः, अस्तवान्; सोढः, सोढवान् । अपत इति किम्? पतितः, पतितवान् । एकस्वरादित्येव—दरिद्रितः, दरिद्रितवान् ॥६२॥

अव०-[1]वा इट् यस्मात् धातोः=स वेट्, तस्मात्, 'एकार्थं चानेकं च' (३।१।२२) इति समासः । रद्ध इत्यादिषु ❀ । [2]सनि वेट्त्वात् प्राप्ते प्रतिषेधः कृतः ॥६२॥

## सं-नि-वेरर्दः ॥४।४।६३॥

म० वृ०-सम्निविपूर्वादर्दतेः परयोः 'क्तयोरादिरिट् न' स्यात् । समर्णः, समर्णवान्; न्यर्णः, व्यर्णः । संनिवेरिति किम्? अर्दितः, प्रार्दितः ॥६३॥

अव०-'समर्णः', 'अर्द गतियाचनयोः', क्तः, क्तवत्, 'रदादमूर्च्छमदः क्तयोर्दस्य च' (४।२।६९) इत्यनेन धातुदकारस्य प्रत्ययतकारस्य च नकारः । 'रषृवर्णा०' (२।३।६३) इति प्रकृतिनकारस्य णः, 'तवर्गस्य श्चवर्ग०' (१।३।६०) इति क्तनकारस्य णकारः ॥६३॥

## [1]अविदूरेऽभेः ॥४।४।६५॥

म० वृ०-अभिपूर्वादर्देः परयोः 'क्तयोरविदूरेऽर्थे इट् न' स्यात् । अभ्यर्णम्[2] । अविदूर इति किम्? अभ्यर्दितो वृषलः, शीतेन बाधित इत्यर्थः ॥६४॥

अव०-[1]विदूरम्=अतिविप्रकृष्टम्, ततोऽन्यत् अविदूरम्, समीपमित्यर्थः, (अविदूरे=) समीपे इत्यर्थः । [2] अभ्यर्णा शरत्, अभ्यर्णे शेते इत्यपि ज्ञेयम् ॥६४॥

## वर्त्तेर्वृत्तं ग्रन्थे ॥४।४।६५॥

म० वृ०-वृतेर्ण्यन्तात् क्ते परे 'वृत्तम्' इति निपात्यते, ग्रन्थविषये । गुणाभावेट्निषेधौ णिलुक् च निपातनात् । [1]वृत्तो [2]गुणश्छात्रेण, वृत्तं पारायणं चैत्रेण । ● वर्त्तेस्तु ग्रन्थविषये वर्त्तितमिति प्रयोगनिवृत्त्यर्थं वचनम् । ग्रन्थ इति किम्? वर्त्तितं कुङ्कुमम् ॥६५॥

अव०-[1]वृत्, णिग्, क्तः, अत्र निपातनात् गुणाभावः, इट्निषेधः, णिग्लुक् च निपात्यते । [2]तथा उपचारात् गुणशब्देन गुणप्रकरणमुच्यते, ततो गुणः=गुणप्रकरणम्, छात्रेण वृत्तः, कोऽर्थः? पठितम् ॥६५॥

## धृष-शसः प्रगल्भे ॥४।४।६६॥

म० वृ०-धृषिशसिभ्यां परयोः 'क्तयोरादिः प्रगल्भे एवार्थे इट् न' स्यात् । [जितसभः प्रगल्भः, अविनीत इत्यन्ये] धृष्टः, विशस्तः; प्रगल्भ इत्यर्थः । प्रगल्भ इति किम्? धर्षितः [=पराभूतः], विशसितः [=हिंसितः] ॥६६॥

अव०-धृषेः "आदितः" (४।४।७२) इति, शसेरपि ऊदित्त्वात् 'वेटोऽपतः' (४।४।६२) इति प्रतिषेधे सिद्धे, नियमार्थं वचनम् । प्रगल्भ एव (इति) नियमः । ञिधृषाट् प्रागल्भ्ये, शसू हिंसायाम् ॥६६॥

## कषः कृच्छ्र-गहने ॥४।४।६७॥

म० वृ०-कृच्छ्रं=दुःखम् तत्कारणं[1] च, गहनं=दुरवगाहम्, तयोरर्थयोः कषेः 'क्तयोरादिरिट् न' स्यात् । कष्टं वर्त्तते, कष्टोऽग्निः, कष्टानि वचनानि । कृच्छ्रगहन इति किम्? कषितं स्वर्णम् ॥६७॥

❀ अत्र पाठः च्युतकियदंशः प्रतीयते ।

● ननु वृतेरन्तर्भूतण्यर्थस्य क्ते 'वृत्तम्' इति सिद्ध्यतीति कथमिदं सूत्रं क्रियते? इत्याशङ्क्याह—'वर्तेस्तु' इत्यादि ।

**अव०**–[१]अग्निचौरादिकं कारणमपि कष्टमुच्यते। कषिष्यतीति 'कषोऽनिटः' (५।३।२) इति सूत्रेण क्तः ॥६७॥

## घुषेरविशब्दे ॥४।४।६८॥

**म० वृ०**–विशब्दः=नानाशब्दनं प्रतिज्ञानं वा, ततोऽन्यत्रार्थे घुषेः परयोः 'क्तयोरादिरिट् न' स्यात्। घुष्टा रज्जुः, सम्बद्धावयवेत्यर्थः, घुष्टवान्। अविशब्द इति किम्? अवघुषितं वाक्यमाह, नानाशब्दितं प्रतिज्ञातं वा वाक्यं ब्रूते इत्यर्थः ॥६८॥

---

**अव०**–सूत्रे 'घुषृ शब्दे' इति भौवादिक आदरणीयः, न चुरादिकः। ❀ अत एव विशब्देन प्रतिषेधात् ज्ञाप्यते घुषेर्विशब्दनार्थस्य अनित्यः चुरादिणिच्, तेन अयमपि प्रयोग उपपन्नो भवति, यथा– "महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः" [मङ्गलपाठकाः] स्वाभिप्रायं नानाशब्दैराविष्कृतवन्त इत्यर्थः। अयं विशेषो 'घुषेरविशब्दे' इति सूत्रे ज्ञातव्यः ॥६८॥

## बलि-स्थूले दृढः ॥४।४।६९॥

**म० वृ०**–बलिनि स्थूले चार्थे दृहेर्दृंहेर्वा क्तान्तस्य 'दृढ' इति निपात्यते। [१]दृढो बलिः स्थूलो वा[२], पारिदृढी कन्या। बलिस्थूल इति किम्? दृढितम्, दृंहितम् ॥६९॥

---

**अव०**–[१]"दृह दृहु वृह वृद्धौ' इति भ्वादिः, दृह दृंह् वा, क्तः, अत्र इटोऽभावः, क्तस्य ढत्वम्, धातुसम्बन्धिनोर्हकारनकारयोर्लोपश्च। सर्वं निपातनात् भवति। [२]एवं परिदृढस्य गतः इत्यपि, परिदृढ इति निष्पाद्य परिदृढमाचष्टे (इति) णिग्, "त्र्यन्त्यस्वरादेः" (७।४।४३। इत्यन्त्याकारस्य लुक्), "पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः' (७।४।३९)इति रः', [परिद्रढनं पूर्वं क्त्वा, 'लघोर्यपि' (४।३।८६) इति णेरय्]। [३]परिदृढ इति शब्दो निष्पन्नः,ततः परिदृढस्यापत्यं (स्त्री) पारिदृढी, 'अत इञ्' (६।१।३१। इतीञ् प्रत्ययः) 'नुर्जातेः' (२।४।७२) इति ङीः ॥६९॥

## क्षुब्ध-विरिब्ध-स्वान्त-ध्वान्त-लग्न-म्लिष्ट-फाण्ट-बाढ-परिवृढं मन्थ-स्वर-मनस्-तमः-सक्ता-ऽस्पष्टा ऽनायास-भृश-प्रभौ ॥४।४।७०॥

**म० वृ०**–'क्षुब्धादयः क्तान्ता मन्थादिष्वर्थेषु यथासङ्ख्यमनिटो निपात्यन्ते'। [१]क्षुब्धः समुद्रः मथित इत्यर्थः, [२]मथ्यमानः क्षोभं गत इति वार्थः अथवा मन्थनं मन्थस्तस्मिन्नभिधेये क्षुब्धं वल्लवेन, विलोडनं कृतमित्यर्थः, [३]अथवा द्रवद्रव्यसम्पृक्ताः सक्तवो रूढया मन्थशब्देनोच्यन्ते, तद्द्रव्याभिधाने क्षुब्धशब्दो मन्थपर्यायो भवति। मन्थेऽर्थे इति किम्? क्षुभितं समुद्रेण, क्षुभितं मन्थेन,[४] क्षुभितः समुद्रो मन्थेन। [५]विरिब्धः स्वरः, विरिभितं विरोभितमन्यत्। [६]स्वान्तं मनश्चेत्, अन्यत्र स्वनितो मृदङ्गः। [७]ध्वान्तं तमः, अन्यत्र ध्वनितम्। लगेधातोः लग्नमिति सक्तं चेत्, लगितमन्यत्। [८]म्लिष्टमस्पष्टं चेत्, म्लेच्छितमन्यत्। [९]फाण्टमनायाससाध्यं चेत्, [१०]बाढमिति भृशं चेत्, बाहितमन्यत्। [११]परिवृढ इति प्रभुश्चेत्, परिवृढः प्रभुः, [१२]परिव्रढस्य गतः,[१३]पारिवृढी कन्या, अन्यत्र परिवृंहितम्, परिवृंहितम् ॥७०॥

---

**अव०**–[१] ('क्षुभच् संचलने') 'क्षुभश् संचलने' इति दिवादिः क्र्यादिर्वा। क्षुभ्यते स्म इति कर्मण्येव क्तः, क्षुभेर्मन्थेऽर्थे क्तान्तस्य इटोऽभावो निपात्यते; मथ्यते इति मन्थः, कर्मणि घञ्, क्तोऽपि क्षुभेः कर्मण्येव, तत्सामानाधिकरण्यात्। [२]क्षुब्ध इत्यत्र अन्तर्भूतण्यर्थत्वात् क्षुभ्यमानः सन् क्षोभं गमित इत्यर्थः। [३]अथवा द्रवद्रव्येत्यादिके अस्मिन् तृतीयव्याख्याने मन्थशब्दस्य कोऽर्थः? सक्तुद्रव्यस्य क्षुब्ध इति पर्यायः। [४]अत्र मन्थशब्देन मन्थानक उच्यते। [५]विरिब्ध इत्यत्र विपूर्वो रिभ्धातुः सौत्रः,

---

❀ ननु 'घुषृ शब्दे' इत्यस्यैव 'घुषृण् विशब्दने' इति विशब्दनेऽर्थे चुरादित्वाण्णिचि सत्यनेकस्वरत्वात् प्रतिषेधो न स्यात्, किं वर्जनेनेत्याह–'अत एव' इत्यादि।

अथवा रेभृङ् अभुङ् रभुङ् लभुङ् शब्दे (इति रेभधातुः), क्तः, निपातनात् इकारः, स्वरेऽर्थे विरिब्धम् (?धः)। [6]स्वनेर्धातोर्मनसि वाच्ये 'स्वान्तम्' (इति) निपातः, 'अहन्पञ्चमस्य'० (४।१।१०७)इत्यात्वम्,मनःपर्यायः स्वान्तशब्दः। [7]स्तन धन ध्वन चन स्वन वन शब्दे' (इति) ध्वन्, ध्वनन्त्यत्रापश्यन्तः प्राहरिका इति ध्वान्तम्, 'अद्यर्थाच्चाधारे' (५।१।१२) क्तः, तमःपर्यायो ध्वान्तशब्दः ; अन्यत्र ध्वनितं तमसा, (अत्र) हृतौ करणे वार्थे तमः ; अथवा ध्वनितो मृदङ्गः। [8]गोचरीभूतम्, म्लेच्छधातोः इत्वं निपातनात्। साधुताया अपभ्रष्टे (?)। [9]फणधातोः। यत् अश्रपितमपिष्टमुदकसम्पर्कमात्राद्विभक्तरसमौषधं कषायादि वस्तु तत् फाण्टमुच्यते। अग्निना तप्तं यत् ईषदुष्णं तत् फाण्टमित्यन्ये। [10]········(भृशेऽर्थे) वाहेर्बाढमिति निपात्यते,········ (तथास्य)भावात् बाढमिति क्रियाविशेषणमेव भवति। तथा 'बाढविक्रमा' इति तु विस्पष्टपटुवत् समासः। [11]परिपूर्वस्य वृहेर्वृहेर्वा परिवृढ इति प्रभौ वाच्ये, निपातनात् क्तस्य ढत्वम्, इडभावो हकारतकारयोर्लोपश्च। [12]पूर्वं परिवृढ इति निष्पाद्य परिवृढमाष्टे— णिग्, त्र्यन्त्यस्वरादेः' (७।४।४३) इत्यन्त्यकारलुक्, 'पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः' (७।४।३९) इति रः [परिवृढनं पूर्वं कृत्वा, लघोर्यपि (४।३।८६) इति णेरय् ]। [13]परिवृढस्यापत्यं (स्त्री) पारिवृढी कन्या। 'अत इञ्' (६।१।३१ इतीञ्) 'नुर्जातेः' (२।४।७२।इति) ङी ॥७०॥

## आदितः ॥४।४।७१॥

म० वृ०—अकारानुबन्धात् (धातोः) परयोः 'क्तयोरादिरिट् न' स्यात्। मिन्नः, मिन्नवान्। आदितां धातूनां भावारम्भे वेट्त्वादन्यत्र 'वेटोऽपतः' (४।४।६२) इति नित्यमिड्निषेधे सिद्धे योगविभागो[1] "यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः" इति न्यायज्ञापनार्थः, तेन विदक् ज्ञाने (इत्यस्य) विदितः, विदितवान्; [2]हृषितः हृषितवान् इत्यादि सिद्धम् ॥७१॥

अव०–[1]यदुपाधेरित्यक्षरस्यायमर्थः- वक्ष्यमाण- 'गमहनविद्लृविशदृशो वा' (४।४।८३) इत्यनेन क्वसोरादिर्वा इट्, (तत्र) 'विद्लृं ती लाभे' इत्यस्यैव क्वसि वेट्त्वमुक्तम्, न 'विदक् ज्ञाने' इत्यस्य, इति विद्धातोर्नित्यमिट्; क्वसौ विद्वान् इत्येव। [2]तथा ['हृषेः केशलोम०' (४।४।७६) इति सूत्रे] हृषेः केशलोमादिष्वर्थेष्वेव वेट्त्वमिति अन्यत्र 'तुषं हृषच् तुष्टौ' इत्यस्य (हृषितः, हृषितवान् इत्येव), तुष्ट इत्यर्थः ॥७१॥

## नवा भावारम्भे ॥४।४।७२॥

म० वृ०–[1]आदितो धातोर्भावे आरम्भे च विहितयोः क्तयोरादिरिट् 'वा न' स्यात्। [2]मिन्नम्, मेदितमनेन; प्रमिन्नः, प्रमेदितः[3]। आदित इति किम्? विदितमनेन, प्रविदितः[4]। पूर्वेण नित्यं निषेधे प्राप्ते विकल्पः ॥७२॥

अव०–[1]अकारानुबन्धाद्धातोः। [2]'ञिमिदाङ् स्नेहने' (इति) भ्वादिः, (ञिमिदाङ् च् स्नेहने इति) दिवादिर्वा। [3](एवम्) प्रमिन्नवान्, प्रमेदितवान्। [3]प्रमेदितुमारब्ध (इति) आरम्भे (५।१।१०) क्तः। [4]एवम् प्रवेदितवान्। भावारम्भ इति किम्? मिन्नः, मिन्नवान् ॥७२॥

## शकः कर्मणि ॥४।४।७३॥

म० वृ०–शकेः धातोः कर्मणि विहितयोः क्तयोरिड् 'वा न' स्यात्। [1]शक्तः शकितो वा घटः कर्तुम्[2]। कर्मणीति किम्? शक्तः कटं कर्तुं चैत्रः ॥७३॥

अव०–[1]कर्मणि क्तवतुर्नास्ति इति शक्तः इत्यत्र क्तवतुप्रयोगो नोदाहृतः। [2]चैत्रेण इति ज्ञेयम् ॥७३॥

## णौ दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-छन्न-ज्ञप्तम् ॥४।४।७४॥

म० वृ०–"णौ सति दमादीनां क्तान्तानां

दान्तादयो वा निपात्यन्ते"। दान्तः, दमितः; शान्तः, शमितः; [पूरैचि] पूर्णः, पूरितः; [दासृग् दाने] दस्तः, दासितः; स्पष्टः, स्पाशितः; छन्नः, छादितः; ज्ञप्तः, ज्ञापितः ॥७४॥

**अव०**–दमादिधातूनां इटोऽभावो निपात्यते वा। दान्तादिप्रयोगत्रये निपातनात् णेर्लोपः, 'णेरनिटि' (४।३।८३) इति सूत्रेणानिट् (? टि) णिगो लोपः क्रियते इति इटि सति इट् (?इटोऽभावः) णेः (लुक् चेति) उभयोरपि निपातनम्। 'दस्त' इत्यादित्रयेषु निपातनात् णि-इट्लोपः * ह्रस्वश्च वा। दान्तादिषु सर्वत्र इटोऽभावः। 'ज्ञप्तः, ज्ञापित' इत्यत्र निपातनात् 'ह्रस्वः, 'मारणतोषण०' (४।२।३०) इत्यनेनाप्राप्तेः (एवं) संज्ञप्तः, संज्ञपितः। दान्तादिसर्वोदाहरणेषु निपातनात् इट्लोपः (?इडभावः)। पक्षे अत्र कश्चित् ह्रस्वश्च ॥७४॥

## श्वस-जप-वम-रुष-त्वर-संघुषा-ऽऽस्वनामः ।४।४।७५।

**म० वृ०**–एभ्यः 'क्तयोरादिरिट् नवा' स्यात्। [१]श्वस्तः, श्वसितः; प्रश्वस्तः, प्रश्वसितः, आश्वस्तः, आश्वस्तवान्; आश्वसितः, आश्वसितवान्। जप्- जप्तः, जप्तवान्; जपितः, जपितवान्; एवं वान्तः, वमितः[२]; रुष्टः, रुषितः[३]; त्वर्,–तूर्णः, तूर्णवान्; त्वरितः, त्वरितवान्; संघुष्टं[४], संघुषितं वाक्यम्; [आङ् पूर्वः स्वन्=]आस्वन्,– आस्वान्तः, आस्वनितश्चैत्रः। अम्– अभ्यान्तः[५], अभ्यमितः, अभ्यमितवान् ॥७५॥

**अव०**–[१]'श्वस्तः' इत्यादिषु 'अन श्वसक् प्राणने' (इति) श्वसधातोः केवलात्, अथवा प्रपूर्वकात् श्वस्धातोः परतोऽभिधानात् कर्त्तरि क्त एव भवति, न (क्तवतुः, इति) क्तवतोर्नोदाहृतम्; एवं विश्वस्तः, विश्वस्तवान्; विश्वसितः, विश्वसितवान्। [२]'वमितः', (एवं) वमितवान्। [३] 'रुषितः', (एवं) रुषितवान्; रुषेर्वेट्त्वात् नित्यमिड्निषेधे प्राप्ते 'श्वस' इत्यादिसूत्रे रुषग्रहणं कृतम्। [४]तथा 'संघुष्टम्,' कोऽर्थः? नानाशब्दितं प्रतिज्ञातं वा सम्बद्धावयवं वा वाक्यं=वचनम् ब्रूते इत्यध्याहारः, कर्तृपदं वा; (एवं) संघुष्टवान्, संघुषितवान् वाक्यम्; संघुष्टौ, संघुषितौ दम्यौ वत्सौ इति प्रयोगा ज्ञातव्याः। तथा संघुषास्वनिभ्यां परत्वात् विकल्प एवायम्, न तु 'घुषेरविशब्दे' (४।४।६८) 'क्षुब्धविरिब्ध०' (४।४।७०) इत्याभ्यां नित्यमिड्निषेधः; तेन अविशब्दनेऽपि संघुष्टा रज्जुः, संघुषिता रज्जुः; मनसि वाच्येऽपि– आस्वान्तं मनः, आस्वनितं मनः इत्येव भवति। [५]( अम्) अभ्यान्तवान् ॥७५॥

## हृषेः केश-लोम-विस्मय-प्रतिघाते ॥४।४।७६॥

**म० वृ०**–हृषेः केशादिष्वर्थेषु वर्त्तमानात् 'क्तयोरिट् वा न' स्यात्। हृष्टाः, हृषिताः केशाः; हृष्टम्, हृषितं केशैः लोमभिर्वा; हृष्टः, हृषितश्चैत्रः; विस्मित इत्यर्थः; हृष्टाः, हृषिता दन्ताः; प्रतिहता इत्यर्थः। केशादिष्विति किम्? [१]हृष्टो मैत्रः इत्यलीकार्थस्य, [२]हृषितश्चैत्र इति तुष्ट्यर्थस्य ॥७६॥

**अव०**–केशलोमकर्तृका क्रिया उद्धर्षणादिका केशलोमशब्देनोच्यते। 'हृष्टा' इत्यादिषु 'तुषं हृषच् तुष्टौ' अथवा 'हृषू अलीके' (इति हृषेः परः) क्तः, हृष्टाः, हृषिताः केशाः; हृष्टं,हृषितं केशैः इति केशार्थे; हृष्टानि, हृषितानि लोमानि; हृष्टं; हृषितं लोमभिः इति लोमार्थे। हृष्टाः=तोषं प्राप्ताः अलीका बभूवुर्वा। [१]'हृषू अलीके' इत्यस्य। [२]'तुषं हृषच् तुष्टौ' इत्यस्य ॥७६॥

## अपचितः ॥४।४।७७॥

**म० वृ०**–"अपपूर्वाच्चायतेः क्तान्तस्येडभावः 'चि' (इत्ययम्) आदेशश्च वा निपात्यते"। अपचितः, अपचायितः ॥७७॥

**अव०**–'अपचित' इति सूत्रे 'चायृग् पूजानि-

* अत्र 'णि-इट्लोपः' इत्यस्य स्थाने 'णिलोपः, इडभावः' इति पाठः साधु प्रतिभाति, बृहद्वृत्तौ 'इडभावः सर्वत्र' इत्युक्तत्वात्, अत्रैवाग्रे "दान्तादिषु सर्वत्र इटोऽभावः" इत्युक्तत्वाच्च।

शामनयोः' इत्ययमेव धातुर्ज्ञातव्यः, न तु चिनोतिः। ❋ चिनोतेः पूजार्थो नास्ति, इति (चायृग्धातोः) पूजायामपचित (इति) निपातनम् ॥७७॥

## सृजि-दृशि-स्कृ-स्वरा-ऽत्वतस्तृज्नित्या-निटस्थवः ॥४।४।७८॥

म० वृ०—सृजिदृशिभ्याम्, सस्सटः कृगः धातोः, स्वरान्तादकारवतश्च धातोः तृचि नित्यानिटो विहितस्य 'थव आदिरिट् वा न' स्यात्। [सृज् ,-] सस्रष्ठ, ससर्जिथ; (दृश् ,-) दद्रष्ठ, ददर्शिथ; (स्कृ,-) सञ्चस्कर्थ, सञ्चस्करिथ; [स्वर,-]ययाथ, ययिथ; निनेथ, निनयिथ; [अकारवतः-] शशक्थ, शेकिथ; जगन्थ, जगमिथ। तृजिति किम्? [१]किति नित्यानिटो मा भूत्,-लुलविथ। नित्येति किम्? तृजि विकल्पेटो मा भूत्,-ररन्धिथ। अनिट इति किम्? शिश्रयिथ। स्कादिसूत्रेण (४।४।८१) प्राप्ते विभाषा ॥७८॥

अव०—स्वरान्ताद्धातोः कीदृशात्? अकारवतश्च धातोः कीदृशात्? 'तृचि नित्यानिटः' इति विशेषणं ज्ञातव्यं द्वयोरपि। सृजिदृशिस्कृस्वरात्वत इति किम्? रराधिथ, बिभेदिथ। [१]किति प्रत्यये 'ऋवर्णश्र्यूर्णुगः कितः' (४।४।५७) इत्यनेन नित्यं इडनिषेधः। इटो निषेधः (?)। अदादेशस्य घसः, वेगादेशस्य वयेर्नित्यमेव इट् भवति, यथा- जघसिथ, उवयिथ। तृच्प्रत्ययविषये तु अदेर्घसादेशः वेगो वयादेशः 'परोक्षायां नवा' (४।४।१८) 'वेर्वय्' (४।४।१९) इति सूत्रद्वये प्रतिषिद्धोऽस्ति। 'घस्लृ अदने' इत्यस्यापि परोक्षायां प्रायिक एव प्रयोगो भवति, न सर्वत्र इति 'परोक्षायां नवा' (४।४।१८) इत्यत्रोक्तम्। एषाऽवचूरिः 'सृजिदृशि'० इति प्रान्ते द्रष्टव्या। तथा स्वरान्तत्वेन सिद्धे स्कृग्ग्रहणं यत् सूत्रे कृतं तत् वक्ष्यमाणोत्तर- 'ऋतः' (४।४।७९) इति प्रतिषेधबाधनार्थम् ॥७८॥

## ऋतः ॥४।४।७९॥

म० वृ०—ऋदन्तधातोस्तृचि नित्यानिटो विहितस्य 'थव आदिरिट् न' स्यात्। [१]पृथग्योगान्नवेति निवृत्तम्। जहर्थ, सस्मर्थ। तृज्नित्यानिट इत्येव- सस्वरिथ ॥७९॥

अव०—'ऋत' इति पूर्वस्यापवादोऽयम्। [१]'ऋतः' इति पृथक्सूत्रारम्भसामर्थ्यात् 'नवा' इति निवृत्तम्, अन्यथा स्वरान्तद्वारेण पूर्वेणैव सिद्धमिति भावः। 'जजागरिथ' इत्यत्र तु अनेकस्वरत्वात् च इट्प्रतिषेधो न भवति। न केवलं तृचि सेट्त्वात् (?) ॥७९॥

## ऋ-वृ-व्येद इट् ॥४।४।८०॥

म० वृ०—अर्त्तेः, वृगः, व्येगोऽदश्च धातोः 'थव आदिरिट्' स्यात्। ऋ,- आरिथ, वृग् ,- ववरिथ, व्येग् ,- संविव्ययिथ, अद् ,- आदिथ। अर्त्तेः पूर्वेण वृग उत्तरेण प्रतिषेधे, व्येऽदोस्तु 'सृजिदृशि'० (४।४।७८) इत्यादिना विकल्पे प्राप्ते वचनम् ॥८०॥

अव०—'ऋवृव्येद इट्' इत्यत्र पुनरिट्ग्रहणात् नेत्यधिकारो निवृत्तः ॥८०॥

## स्कसृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञ्जनादेः परोक्षायाः ॥४।४।८१॥

म० वृ०—सस्सटः कृगः सृवृभृस्तुद्रुश्रुस्रुवर्जितेभ्यश्च सर्वधातुभ्यः परस्या 'व्यञ्जनादेः परोक्षाया आदिरिट्' स्यात्। [१]सञ्चस्करिव, स्राद्यन्येभ्यः-ददिम,निन्यिवहे,जुहुविव, [२]लुलुविढ्वे, तेरिव, तेरिम, शेकिव, शेकिम; पेचिषे, पेचिध्वे, पेचिवहे। स्रादिवर्जनं किम्? ससृव, ससृम, ससर्थ; ववृव, ववृमहे; बभृम, बभृव, बभर्थ; तुष्टुव, तुष्टुम, तुष्टोथ; दुद्रुम, शुश्रुम, शुश्रोथ; सुस्रुम। स्तुद्रुश्रुस्रूणां 'सृजिदृशि'० (४।४।७८) इत्यादिनापि थवि न विकल्पः, अनेन प्राप्ते हि स विकल्पः; एषां तु

❋ ननु स्वादेः चिगट् धातोरनिट्त्वाद् 'अपचितः' इति सिध्यति, किमनेन सूत्रेण? इत्याशङ्क्याह-'चिनोतेः' इत्यादि।

निषिद्धत्वात्प्राप्तिर्नास्ति । ववृषे (इति) अत्र तु 'स्नाश्रशितो'० (४।४।३२) इत्यादिनापि नेट्, 'ऋवर्ण०' (४।४।५७) इति निषेधात् ॥८१॥

अव०–[1]"स्कृच्छृतोऽकि परोक्षायाम्' (४।३।८) इत्यनेन गुणः, (एवम्) सञ्चस्करिम, सञ्चस्करिषे; ददिव, ददिषे; निन्यिमहे। [2]'लुलुविद्वे' इत्यत्र 'हान्तस्थाञ्ञीड्भ्यां वा' (२।१।८१) इत्यनेन विकल्पेन धस्य ढत्वम्, पक्षे लुलुविध्वे। 'स्कृ' इति ससटा निर्देशः किम्? केवलस्य कृगो मा भूत्,-चकृव, चकृम, चकर्थ, चकृषे ॥८१॥

## घसेकस्वरातः क्वसोः ॥४।४।८२॥

म० वृ०–घसेरेकस्वरादादन्ताच्च परस्य 'क्वसोरादिरिट्' स्यात्। घसि,– जक्षिवान्,[1] एकस्वर,– आदिवान्, ऊचिवान्, ['यजादिवचेः किति' (४।१।७९) इति धातोः य्वृत्] अनूचिवान्, पेचिवान्,[2] उपसेदिवान्, एवम् ईयिवान्,[3] समीयिवान्,[4] आरिवान्; आदन्त,- पपिवान्, [ययिवान्] तस्थिवान्। घसेकस्वरात इति किम्? [बिभिद्वान्] बभूवान्, [उपशुश्रुवान्]। क्वसोरिति किम्? बिभिदिव, बिभिदिम। पूर्वेणैव सिद्धे नियमार्थं वचनम्। एभ्य एव क्वसोरादिरिट्, नान्येभ्य इति ॥८२॥

अव०–[1]"जक्षिवान्,' अत्र 'घस्लृ' अदने' अथवा अद्स्थाने 'परोक्षायां नवा' (४।४।१८) इति घसादेशः, जघास ··················(इति वाक्ये 'तत्र क्वसुकानौ तद्वद्' इति क्वसुः, द्वित्वम्, 'द्वितीयतुर्ययोः पूर्वौ' (४।१।४२) इति द्वित्वे घकारस्य गकारः, 'गहोर्जः इति गस्य जः,) 'घसेक०' इति इट्। 'गमहनजनखनघसः०' (४।२।४४) इति उपान्त्याकारलोपः, 'अघोषे प्रथमो०' (१।३।५०। इति) घस्य क्, 'घस्वसः' (२।३।३६) इत्यनेन षः। [2]'अनादेशादेरेक०' (४।१।२४) इति एत्वम्। [3]'ईयिवान्', एवं समीयिवान्, उपेयिवान्; 'इंण्क् गतौ' ऐत्, इयाय, अगात् इत्यर्थे 'वेयिवदनाश्वदनूचानम्' (५।२।३) इत्यनेन ईयिवान् इति भूतकाले निपातः, परोक्षाविषये क्वसुकानौ विहितौ, ह्यस्तन्यादिविषये क्वसुकानौ न स्याताम् इति हेतोर्निपातः, क्वसुः निवचनात् (?) 'घसेकस्वरातः क्वसोः' इत्यनेन पूर्वमिट्, पश्चात् द्विर्वचनम्, ततः 'इणः' (२।१।५१) इत्यनेन धातु-इपार्श्वे इय्, ततः 'समानानां तेन दीर्घः' (१।२।१। इति दीर्घः), इत्थं ईयिवान् नि··········· (पात्यते)। नित्यो हि इट्, (अतो द्वित्वा)देः पूर्वमिट्, पश्चात् द्वित्वादि, (यदि च) पूर्वं द्विर्वचने (कृते) समानदीर्घः·······(क्रिय)ते, एवमपि एकस्वरसद्भावात् पश्चादपि इति (? इट्) भवति। इति (? इटि) च·················(सति) * 'इवर्णादेरस्वे०' (१।२।२१)·इति यत्वम्, ततो··················· (यिवा)न् इति अनिष्टं रूपं स्यात्। [4]'आरिवान्' इत्यत्र तु 'ऋ क् गतौ', आर इति वाक्ये आरिवान्, क्वस्, 'घसेकस्वरा०' इत्यनेन पूर्वमिट्, पश्चात् ( ऋ ) इत्यस्य द्वित्वम्, 'ऋतोऽत्' (४।१।३८) इत्यनेन पूर्वस्य ऋकारस्यात्), 'अस्यादेराः परोक्षायाम्' (४।१।६८) इत्यनेन आकारः, अत्र 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) इत्यनेन अर् प्राप्नोति, परं परत्वात् वृद्धसंमतत्वाच्च 'इवर्णादेरस्वे स्वरे यवरलम्' इत्यनेन स्थाने (?ऋतो) रत्वमेव भवति, इत्थं 'आरिवान्' इति सिद्धम्। इट् हि नित्यः इति पूर्वमिट् पश्चाद् द्वित्वादि। यदि पुनर्द्वित्वादिकं पूर्वं स्यात् पश्चात् इट्, एवं हि आरिवान् इति न सिद्ध्यते:(किन्तु) अरिवान् इति अनिष्टरूपं स्यात्। इटो हि नित्यत्वभावनार्थमित्थं प्रक्रिया दर्शिता परं युक्त्या एवं न घटते इति। *एकस्वरत्वात् घसः इट् सिद्ध एवास्ति, (तथापि) घस्-* ग्रहणं किमर्थं? नहि ※ यत् घस्ग्रहणं तद्विहितविशेषणानाश्रयणार्थम्, आग्रहणमनेकस्वरार्थम्, इटि हि सति आकारलोप उपान्त्यलोपश्च भवति। दरिद्रातेस्तु आमा भवितव्यं–दरिद्राञ्चकृवान् ॥८२॥

* अत्र 'इवर्णादि०' इति सूत्रमसङ्गतम्, ईकारात् परस्य 'इकारस्य' स्वस्वरत्वात्।

※ अत्र 'नहि' इति पाठोऽधिकोऽसङ्गतश्च।

## गम-हन-विद्लृ-विश-दृशो वा ॥४।४।८३

म० वृ०–एभ्यः परस्य 'क्वसोरादिरिट् वा' स्यात्। [2]जग्मिवान्, [3]जगन्वान्; जघनिवान् जघन्वान्; [विद्लृंती लाभे-] विविदिवान्, विविद्वान्; विविशिवान् विविश्वान्; ददृशिवान्, ददृश्वान् ॥८३॥

अव०–[1](सूत्रे) 'विद्लृ' इत्युक्तम्, (अतः) 'विद्लृंती लाभे' इत्यस्य ग्रहणम्, तेन ज्ञानार्थस्य 'विदक् ज्ञाने' इत्यस्य 'विविद्वान्' इत्येव भवति। सत्तार्थविचारणार्थयोस्तु धात्वोरात्मनेपदित्वात् क्वसुर्नास्त्येव इति भावः। [2]'जगाम', 'गमहनजन०' (४।२।४४) इति उपान्त्यलोपः। [3]'मोनो म्वोश्च' (२।१।६७) इत्यनेन मस्य न् ॥८३॥

## सिचोऽञ्जेः ॥४।४।८४॥

म० वृ०–अञ्जेः परस्य 'सिच आदिरिट्' स्यात्। आञ्जीत् [आञ्जीष्टाम्, आञ्जीषुः]। औदित्वाद्विकल्पे प्राप्ते नित्यार्थमिदम् ॥८४॥

## धूग् सु-स्तोः परस्मै ॥४।४।८५॥

म० वृ०–एभ्यः 'सिच आदिरिट्' स्यात्, परस्मैपदे परे। अधावीत्, [अधाविष्टाम्, अधाविषुः]; असावीत्, [असाविष्टाम्, असाविषुः]; अस्तावीत्। परस्मै इति किम्? अधोष्ट, अधविष्ट; असोष्ट, अस्तोष्ट। धूगो विकल्पे सुस्तुभ्यां च प्रतिषेधे प्राप्ते वचनम् ॥८५॥

अव०–'धूगसुस्तोः०' इति सूत्रे सु इति 'षुं प्रसवैश्वर्ययोः' इत्ययं ग्राह्यः, अस्य परस्मैपदित्वात्; 'षुंग्ट् अभिषवे' इति व्यावृत्त्युदाहरणे ज्ञातव्यः, उभयपदित्वात् ॥८५॥

## यमि-रमि-नम्यातः सोऽन्तश्च ॥४।४।८६॥

म० वृ०–एभ्य आदन्तेभ्यश्च परस्मैपदविषयस्य 'सिच इट्' स्यात्, [1]एषां च सोऽन्तो भवति। [2]अयंसीत्, [3]व्यरंसीत्, [4]अनंसीत्; [5]आदन्त,-अयासीत्, अदरिद्रासीत् ('आलोपपक्षे' अदरिद्रीत्[5]) परस्मै इत्येव–आयंस्त, अरंस्त ॥८६॥

अव०–[1]यमिरमिनमीनां धातूनामादन्तानां च धातूनाम्। [2]'अयंसीत्', (एवम्) अयंसिष्टाम्, अयंसिषुः। [3]'व्यरंसीत्', (एवम्) व्यरंसिष्टाम्, व्यरंसिषुः। 'व्याङ्-परे रमः' (३।३।१०५) इति परस्मैपदम्। [4]'अनंसीत्', (एवम्) अनंसिष्टाम्, अनंसिषुः। इत्थं प्रयोगावली द्रष्टव्या। ननु 卐 दिस्योः परयोः सिच आदौ इड्विधेः वृद्धिप्रतिषेध एव फलम्, 'व्यञ्जनानामनिटि' (४।३।४५) इत्यनेन वृद्धिप्राप्तिः। [5]आदन्तात्,-अयासीत्, अयासिष्टाम्, अयासिषुः; अदरिद्रासीत्, अदरिद्रासिष्टाम्, अदरिद्रासिषुः; एषु सर्वत्र अद्यतनीदि-ताम्-अन्, सिच्, यत्र दि तत्र 'सः सिजस्तेर्दिस्योः' (४।३।६५) इति सिचः ईत्, तदनन्तरं 'यमिरमिनमि'० इत्यनेन सिचः पश्चात् इट्, इटः पश्चात् धातोः परतः सोऽन्तः, 'इट ईति' (४।३।७१) इत्यनेन सर्वत्र सिज्लोपः, यत्र च अन् तत्र 'सिज्विदोऽभुवः' (४।२।९२इत्यनो) पुस्। [5]'अदरिद्रीत्' इति, अविद्धे (?) अदरिद्रीत् अदरिद्रासीत् इति प्रयोगद्वयम्, 'नामिनो गुणो'० (४।३।१) इति पादे 'दरिद्रोऽद्यतन्याम्'० (४।३।७६) इति सूत्रम्, दरिद्रातेरद्यतनीविषयेऽन्तस्य वा लुक् इति सूत्रार्थः; दरिद्रा, अद्य० दि, सिच्; ईत्, 'दरिद्रोऽद्य०' अनेन अन्तस्य अकारस्य लोपः, 'स्ताद्यशितो'० (४।४।३२इति) इट्, 'इट ईति' (४।३।७१) इति सिचो लुप्; (एवम्) अदरिद्रिष्टाम्, अदरिद्रिषुः। एषु उदाहरणेषु 'यमिरमिनमि'० इत्यनेन न इट् न सोन्तश्च। यदि कदाचित् आदन्तद्वारेण इट् भवति तदा सोन्तः, सर्वथा (?अन्यथा) न कार्यः ॥८६॥

## ईशीडः 'से-ध्वे-स्व-ध्वमोः ॥४।४।८७॥

म० वृ०–ईश्-ईड्भ्यां परयोः 'सेध्वयोः[1] [2]स्वध्वमोश्चादिरिट्' स्यात्। ईशिषे,ईशिध्वे; ईषि-

卐 अत्र 'ननु' इति पाठोऽधिकोऽसङ्गतश्च।

ध्व,ईषिध्वम् ;ईडिषे,ईडिध्वे; ईडिष्व,ईडिध्वम् ॥८७॥

अव०–[१]परोक्षासम्बन्धिनोः सेध्वयोरामा भाव्य-मिति वर्त्तमानासेध्वयोर्ग्रहणम्। सूत्रे समुदायद्वया-पेक्षं द्विवचनम्, तेन स्वसहचरितस्य ध्वमो ग्रहणात् ह्यस्तनीध्वमि 'ऐड्ढ्वम्' इति ★प्रयोगः। सूत्रे वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः । [१]वर्त्तमानासम्बन्धिनोः । [२]पञ्चमीसप्तम्योः ॥८७॥

## [१] रुत्पञ्चकाच्छिदयः ॥४।४।८८॥

म० वृ०–रुदादिपञ्चकात्परस्य 'व्यञ्जनादेः शितो[२]ऽयकारादेरादिरिट्' स्यात्। रोदिति, रुदितः; [३]स्वपिति, प्राणिति[४], श्वसिति,[५] जक्षिति[६] । शिदिति किम्? स्वप्ता। अय इति किम्? रुद्यात्। व्यञ्जनादेरित्येव– रुदन्ति ॥८८॥

अव०–[१]रुदिः, स्वपिः, अनिः, श्वसिः, जक्षिः इति रुदादिपञ्चकम्। [२]यकारवर्जितादेः। [३]स्वपितः। [४]प्राणितः। [५]श्वसितः। [६]जक्षितः ॥८८॥

## दिस्योरीट् ॥४।४।८९॥

म० वृ०–रुत्पञ्चकात्परयोर्दिस्योः शितोरादि-रीट् स्यात्। अरोदीत्, अरोदीः; अस्वपीत्, अस्वपीः; प्राणीत् प्राणीः; अश्वसीत्, अश्वसीः; अजक्षीत्; अजक्षीः ॥८९॥

अव०–'दिस्योः शितोः, कोऽर्थः? ह्यस्तनी-सम्बन्धिनोरेव दिस्योः, तेन रोदिति, रोदिषि ।८९।

## अदश्चाट् ॥४।४।९०॥

म० वृ०–अत्ते रुत्पञ्चकाच्च 'परयोर्दिस्योः शितो-रादिरट्' स्यात्। आदत्, आदः; अरोदत्, अरोदः; अस्वपत्, अस्वपः; प्राणत्, प्राणः; अश्वसत्, अश्वसः; अजक्षत्, अजक्षः ॥९०॥

## सम्परेः कृगः स्सट् ॥४।४।९१॥

म० वृ०–सम्परिभ्यां परस्य कृग आदिः 'स्सट्' स्यात्। संस्करोति कन्याम्,[१] संस्कृतं वचनम्[२] तत्र नः संस्कृतम्, समुदितमित्यर्थः; [३]परिष्करोति, परिष्कृतम्, परिष्कारः[४]। पूर्वं धातुरुपसर्गेण [सह] सम्बध्यते, पश्चात् साधनेन इति द्विर्वचनादडागमाच्च पूर्वं स्सडेव भवति, [ यथा ] संचस्कार, समस्करोत्, समस्कार्षीत्, समचिस्करत्, एवं परिचस्कारेत्यादि[५]। कथं संकृतिः? गर्गादिपाठात्। संकरः, परिकरः (इति) किरतेरला[६] भविष्यति। टकारः 'स्सटि समः' (१।३।१२) इत्यत्र विशेषणार्थः ॥९१॥

अव०–'सम्परेः कृगः स्सट्' इति सूत्रे स्सट्-प्रत्यय एकसकार एव क्रियते, द्विसकारपाठस्तु 'संचिस्करत्' इत्यादिषु षकारबाधनार्थः। 'न स्सः' (२।३।५९) इति सूत्रेऽपि द्विसकारमयस्सट्प्रत्ययस्य षत्वं न भवतीत्युक्तमस्ति, इति द्विसकारः स्सट् पठ्यते। किं च संस्करोतीत्यादिषु सम्पूर्वः कृग्, ततः 'सम्परेः कृगः' इत्यनेन एकसकार एव सट्, स्सटि समः (१।३।१२) इत्यनेनानुस्वारः पूर्वस्य तथा द्वितीयसकारः क्रियते, कस्यादिः='कादिर्व्यञ्जनम्' (१।१।१०) इति व्युत्पत्त्याऽनुस्वार(स्य) व्यञ्जनसंज्ञत्वात् 'धुटो धुटि स्वे वा' (१।३।४८) इत्यनेन विकल्पेन पूर्वः सकारो लुप्यते । [१]भूषयतीत्यर्थः । [२](एवम्) संस्कारो वासना। [३]'परिष्करोती'-त्यादिषु 'असोङ-सिवूसहस्सटाम्' (२।३।४८) इत्यनेन परिनिविभ्यः परस्य स्सटः षकारः कर्त्तव्यः। [४](एवम्) तत्र नः परिष्कृतम्। स्सट् इति द्विसकारनिर्देशात् समचिस्करत् इत्यादौ षकारो न भवति। [५]आदिशब्दात् पर्यस्करोत्, पर्यस्कार्षीत्, पर्यचिस्करत्। [६][युवर्णवृदृवश-रणगमृद्ग्रहः (५।३।२८) इति] अलप्रत्ययेन ॥९१॥

## उपाद्भूषा[१]-समवाय[२]-प्रतियत्न[३]-विकार[४]-वाक्या-ऽध्याहारे[५] ॥४।४।९२॥

म० वृ०–उपात्परस्य कृगो भूषादिष्वर्थे-

★ ईशीडोः ह्यस्तनीध्वमि 'यजसृज०' इति ईशधातोः शस्य षत्वे, तृतीयस्तृतीय० (१।३।४९) इति षस्य डत्वे, (उभयत्र) 'तवर्गस्य'० (१।३।६०) इति प्रत्ययस्थधकारस्य ढत्वे 'स्वरादेस्तासु' (४।४।३१) इति वृद्धौ च ऐड्ढ्वम्।

ष्वादिः 'स्सट्' स्यात् । कन्यामुपस्करोति, भूषयतीत्यर्थः । तत्र न उपस्कृतम्, [2]समुदितमित्यर्थः; [3]एधोदकस्योपस्कुरुते, तत्र प्रतियतते इत्यर्थः; [4]उपस्कृतं भुङ्क्ते, विकृतमित्यर्थः; उपस्कृतं [7]जल्पति ॥९२॥

अव०–[1]भूषा=अलङ्कारः । [2]समवायः=समुदायः, इत्यादि (? द्व्यादि-) वस्तूनामेकत्र मेलनमिति यावत् । [3]पुनर्यत्नः=प्रतियत्नः, सतोऽसम्बद्धस्य अर्थस्य केशादिरूपस्य सौगन्ध्यादिसम्बन्धविधये, अथवा लब्धवस्तुनो लाभाय卐वृक्षादेः सेकादिना वृद्धये=आधिक्याय,कुङ्कुमादेः स्नेहनिमीलन(? नेन) कपू(? पू)रादेरक्षतमेलनादिनाऽभिमतावस्थायोजनबुद्धिः प्रतियत्नः । [4]प्रकृतेरन्यथाभावो विकारः । [5]गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं वाक्याध्याहारः । क्रमेण एषु अर्थेषु उदाहरणानि । [6]काण्डगुणस्य उपस्कुरुते इत्यपि । [7]उपस्कृतं जल्पति इत्यस्याग्रे उपस्कृतमधीते, सोपस्काराणि सूत्राणि, कोऽर्थः ? सवाक्याध्याहाराणीत्यर्थः ॥९२॥

## किरो लवने ॥४।४।९३॥

म० वृ०–उपात् किरतेरादिः 'स्सट्' स्यात्, लवने=लवनविषयो यद्यर्थः स्यात् । उपस्कीर्य मद्रका लुनन्ति, उपस्कारं मद्रका लुनन्ति, विक्षिप्य लुनन्तीत्यर्थः, लवन इति किम् ? उपकिरति पुष्पम् ॥९३॥

अव०–उपस्कीर्य=उपस्कारम्, 'उपात्किरो लवने' (५।४।७२) इति सूत्रेण णम्प्रत्ययः ॥९३॥

## प्रतेश्च वधे ॥४।४।९४॥

म० वृ०–प्रतेरुपाच्च किरतेर्वधे [1]विषयेऽभिधेये वा 'स्सडादिः' स्यात् । [2]प्रतिस्कीर्णम्, उपस्कीर्णं ह ते वृषल ! भूयात् । अभिधेये,-उरोविदारं[3] प्रतिचस्करे नखैः, हत इत्यर्थः । वध इति किम् ? प्रतिकीर्णम्, उपकीर्णं बीजम्, विक्षिप्तमित्यर्थः ।९४।

अव०–[1]हिंसायां गम्यमानायाम् । [2]प्रतिस्करणं=प्रतिस्कीर्णम्, 'क्लीबे क्तः' (५।३।१२३) इति क्तः), प्रतिस्कीर्णम्, उपस्कीर्णं ह ते वृषल ! तस्यायमर्थः–हे वृषल ते हिंसानुबन्धी विक्षेपो भूयादित्यर्थः । [3]उरो विदार्य इति वाक्ये 'परिक्लेश्येन' (५।४।८०) इति सूत्रेण णम् ॥९४॥

## अपाच्चतुष्पात्[1]-पक्षि-शुनि[2]हृष्टा-ऽन्ना-ऽऽश्रयार्थे ॥४।४।९५॥

म० वृ०–अपात् [परस्य] किरतेश्चतुष्पदि, पक्षिणि, शुनि च कर्त्तरि यथासङ्ख्यं हृष्टे, अन्नार्थिनि, आश्रयार्थिनि 'स्सडादिः' स्यात् । [3]अपस्किरते वृषलो हृष्टः, अपस्किरते कुक्कुटो भक्ष्यार्थी[4], [5]अपस्किरते श्वा आश्रयार्थी । एष्विति किम् ? अपकिरति बालो धूलिं हृष्टः ॥९५॥

अव०–[1]चत्वारः पादाः यस्य स चतुष्पात्, 'सुसङ्ख्यात्' (७।३।१५०) इत्यनेन समासान्तपादशब्दस्य 'पाद्' आदेशः । [2]तुषं हृषच् तुष्टौ' हर्षणं=हृष्टिः, हृष्टिरस्यास्तीति 'अभ्रादिभ्यः' (७।२।४६ इति) अप्रत्ययः, 'अवर्णेवर्णस्य' (७।४।६८ इति इकारस्य लुक्) यदि क्तः कृतः स्यात् तदा इट् अभविष्यत् । [3]हर्षाद्विलिख्य तटं विक्षिपतीत्यर्थः । तथा [4]भक्षमर्थयतीत्येवं शीलः–'अजातेः शीले' (५।१।१५४ इति) णिन्, विलिख्यावस्करं कुक्कुटो विक्षिपतीत्यर्थः । [5]अपस्किरते श्वेति, विलिख्य भस्म विक्षिपतीत्यर्थः । हृष्टादिष्विति किम् ? अपस्किरति हस्ती रजश्चापलेन ॥९५॥

## वौ विष्किरो वा ॥४।४।९६॥

म० वृ०–वौ=पक्षिणि वाच्ये 'विष्किर इति वा स्सट्' निपात्यते । विकिरतीति विष्किरः=पक्षिविशेषः, विकिरोऽपि स एव ॥९६॥

## प्रात्तुम्पतेर्गवि ॥४।४।९७॥

卐 अत्र 'लाभाय' इति पाठोऽधिकोऽसङ्गतश्च ।

म० वृ०–प्रात्परस्य [1]तुम्पधातोर्गवि कर्त्तरि 'स्सडादिः' स्यात् । प्रस्तुम्पति गौः, प्रस्तुम्पति वत्सो [2]मातरम् । गवीति किम् ? प्रतुम्पति वनस्पतिः (तरुः) ॥९७॥

प्रव०–[1]'तुप तुम्प तुफ तुम्फ हिंसायाम्' । [2]वत्सोऽपि गौरेव, विशेषस्य सामान्यात्मकत्वात् ।९७।

## उदितः स्वरान्नोऽन्तः ॥४।४।९८॥

म० वृ०–[1]उदितो धातोः स्वरात्परो 'नोऽन्तोऽवयवः' स्यात् । [2]नन्दति, [3]निन्दति, हुण्डिता । नोऽन्त उपदेशकाले एव स्यादनैमित्तिकत्वात्, तेन [4]कुण्डा, [5]हुण्डा इत्यादि सिद्धम् ॥९८॥

प्रव०–[1]उकारानुबन्धधातोः । [2]'टुनदु समृद्धौ' । [3]'णिदु कुत्सायाम्' । [4]कुडुङ् दाहे, [5]हुडुङ् पिडुङ् संघाते; कुण्डनं=कुण्डा, हुण्डनं=हुण्डा; 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) इति सूत्रेण अप्रत्ययः सिद्धः, (तत्र) गुरुमतो धातोरिति भणनात् ॥९८॥

१ २ ३ ४ ५ ६

## मुचादि-तृफ-दृफ-गुफ-शुभोम्भः शे ॥४।४।९९॥

म० वृ०–एषां स्वरान्नोन्तोऽवयवः स्यात्, शे परे । मुञ्चति, सिञ्चति, तृम्फति, दृम्फति, गुम्फति, शुम्भति, उम्भति । तृफादयः [7]सनकारा [8]अनकाराश्च तुदादौ, तत्र तृम्फादीनां शे परे नस्य[9] लुक्, तृफादीनां त्वनेन नस्य विधानम्; विधानबलाच्च न नस्य[10] लोप इति तृफति तृम्फति इत्यादि द्वैरूप्यं सिद्धम् ॥९९॥

प्रव०–[1]मुच्लृंती मोक्षणे । षिचींत् क्षरणे । विदॢंती लाभे । लुप्लृंती छेदने । लिपींत् उपदेहे । एते उभयपदिनो विभाषिताः । कृतैत् छेदने । खिदंत् परिघाते । पिशत् अवयवे । इति वृत् मुचादिः ८ । अथ [2]'तृफ तृम्फत् तृप्तौ' यथासंख्यं नकारवर्जितः नकारयुक्तः, एवमग्रेऽपि । [3]दृफ दृम्फत् उत्क्लेशे । [4]गुफ गुम्फत् ग्रन्थने । [5]शुभ शुम्भत् शोभार्थे । [6]उभ उम्भत् पूरणे । इति तृफादिः । [7]नकारोऽनुस्वारः, तेन युक्ताः, [8]नकारोऽनुस्वारः, तेन वर्जिताः, एवं द्विविधाः । [9]नकारस्य 'नो व्यञ्जनस्य'० (४।४।४५) इत्यनेन (लुक्) विधानम् । [10]नकारस्य ॥९९॥

## जभः स्वरे ॥४।४।१००॥

म० वृ०–[1]जम्भः [धातोः] स्वरात्परः स्वरादौ प्रत्यये परे 'नोऽन्तः' स्यात् । जम्भयति[2], जम्भकः[3] ॥१००॥

प्रव०–[1]'यभं जभ मैथुने' अथवा 'जभुङ् जभैङ् जृभुङ् गात्र विनामे' । [2]जम्भन्तं जम्भमानं वा प्रयुङ्क्ते–णिग् । [3](एवम्) साधुजम्भी, जम्भंजम्भम् ॥१००॥

## रध इटि तु परोक्षायामेव ॥४।४।१०१॥

म० वृ०–रधधातोः स्वरात् [परः] स्वरादौ प्रत्यये 'नोऽन्तः' स्यात्, इटि तु=इडादौ तु प्रत्यये परोक्षायामेव । रन्धयति, रन्धकः । इटि तु परोक्षायाम्,– ररन्धिव, ररन्धिम । रेधिवान्[1] अत्र नस्य लुक् । परोक्षायामेव– रधिता । एवकारो विपरीतनियमनिरासार्थः,[2] तेनात्र न नियमः,– ररन्ध[3] ॥१०१॥

प्रव०–[1]'रेधिवान्', क्वसुः, 'धूगौदितः' (४।४।३८।इति) इट्, 'रध इटि०' इति नोन्तः, 'इन्ध्यसंयोगात्परोक्षा किद्वत्' (४।३।२१) इति क्वसुः किद्वत्, 'नो व्यञ्जनस्य'० (४।२।४५) इति नकारो लुप्यते, अनादेशादेरेकव्यञ्जन'० (४।१।२४) इति एत्वम् । [2]पूर्वसूत्रात् स्वराधिकारे सत्यपि यदत्र 'रध इटि तु०' (४।४।१०१) सूत्रे इड्ग्रहणं करोति तस्मात् इट् (ग्रहण) बलात् विपरीत (?) नियमः सिद्धः । [3]'ररन्ध', (एवं) ररन्धतुः, ररन्धुः ॥१०१॥

## रभोऽपरोक्षाशवि ॥४।४।१०२॥

म० वृ०–रभेः स्वरात्परोक्षाशव्वर्जिते स्वरादौ प्रत्यये 'नोऽन्तः' स्यात् । आरम्भयति, आरम्भकः[1] ॥१०२॥

अव०-[1]एवं साध्वारम्भी, आरम्भमारम्भम्, आरम्भो वर्त्तते इत्याद्यपि। अपरोक्षाशवीति किम्? आरेभे, आरभते। स्वर इत्येव- आरब्धा ॥१०२॥

## लभः ॥४।४।१०३॥

म० वृ०-लभतेः स्वरात्परः परोक्षाशव्वर्जिते स्वरादौ परे 'नोऽन्तः' स्यात्। लम्भयति, लम्भकः [साधुलम्भी]। अपरोक्षाशवीत्येव- लेभे, लभते। योगविभाग उत्तरार्थः ॥१०३॥

अव०-लभेः परस्मैपदस्यापि अभिधानाल्लभन्ती स्त्री इति केचिदाहुः ॥१०३॥

## आङो यि ॥४।४।१०४॥

म० वृ०-आङः परस्य लभः स्वराद् परः यि=यकारादौ प्रत्यये [परे] 'नोऽन्तः' स्यात्। आलम्भ्या गौः, आलम्भ्या वडवा। यीति किम्? आलब्धा ॥१०४॥

अव०-आलभ्यते=आलम्भ्या, 'शकितकिचतियतिशसिसहियजिभजिपवर्गात्' (५।१।२९) इति यः ॥१०४॥

## उपात्स्तुतौ ॥४।४।१०५॥

म० वृ०-उपात्परस्य लभः स्वरात्[1] यादौ प्रत्यये[2] स्तुतौ=प्रशंसायां गम्यमानायां 'नोऽन्तः' स्यात्। [3]उपलम्भ्या विद्या त्वया, उपलम्भ्यं शीलम्। स्तुताविति किम्? उपलभ्या वार्त्ता[4] ॥१०५॥

अव०-[1]परः। [2]यकारादौ प्रत्यये परे। [3]उपलभ्यते=उपलम्भ्या, 'शकि०' (५।१।२९) इति यप्रत्ययः, कोऽर्थः? ज्ञायते त्वया विद्या इत्यर्थः। [4](एवम्) उपलभ्यमस्मात् वृषलात् किञ्चित् ॥१०५॥

## ञि-ख्णमोर्वा ॥४।४।१०६॥

म० वृ०-ञौ ख्णमि च प्रत्यये परे लभः स्वराद् 'नोऽन्तः स्यात् वा'। अलाभि, अलम्भि; लाभंलाभम्, लम्भंलम्भम् ॥१०६॥

## उपसर्गात्खल्-घञोश्च ॥४।४।१०७॥

म० वृ०-उपसर्गात्परस्य लभः स्वरात्खल्घञिख्णमोश्च परयो-'र्नोऽन्तः' स्यात्। खल्,-[1]ईषत्प्रलम्भम्, [2]दुष्प्रलम्भम्, [3]सुप्रलम्भम्। घञ्,- उपलम्भः। ञि,- प्रालम्भि। ख्णम्,- प्रलम्भंप्रलम्भम्। उपसर्गादिति किम्? ईषल्लाभः, लाभः। ञिख्णमोर्नित्यार्थमुपसर्गादेव खल्घञोरिति नियमार्थं च वचनम्[4] ॥१०७॥

अव०-[1]ईषत्=अनायासेन प्रकर्षेण लभ्यते=ईषत्प्रलम्भम्, [2]दुःखेन प्रलभ्यते=दुःप्रलम्भम्, [3]सुखेन प्रलभ्यते=सुप्रलम्भम्, 'दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात्खल्' (५।३।१३९) इत्यनेन खल्। [4]उपसर्गनियमस्तु न भवति, 'शप उपलम्भने' (३।३।३५) इति ज्ञापकात् ॥१०७॥

## सुदुर्भ्यः ॥४।४।१०८॥

म० वृ०-सुदुर्भ्यां [1]व्यस्ताभ्यां [2]समस्ताभ्यां चोपसर्गात्पराभ्यां परस्य लभः स्वरात्परयोः खल्घञो-'र्नोन्तः' स्यात्। [3]अतिसुलम्भम्, [4]अतिदुर्लम्भम्, [5]अतिसुदुर्लम्भम्। घञ्,- अतिसुलम्भः, [अतिदुर्लम्भः] अतिसुदुर्लम्भः। उपसर्गादित्येव- सुलभम्, दुर्लभम्, सुदुर्लभम्, [6]सुलाभः, दुर्लाभः। [[7]अतिसुलभमतिदुर्लभमित्यतः पूजातिक्रमयोरनुपसर्गत्वात्] उपसर्गादेव सुदुर्भ्य इति नियमार्थं वचनम् ॥१०८॥

अव०-[1]एकैकाभ्याम्। [2]मिलिताभ्याम्। [3]अतिशयेन सुखेन लभ्यते=अतिसुलम्भम्, [4]अतिशयेन दुःखेन लभ्यते=अतिदुर्लम्भम्। [5]तथा अतिशयेन सुष्ठु दुःखेन लभ्यते=अतिसुदुर्लम्भम्, अत्र दुःखातिशयस्य अतिशयो ज्ञातव्यः, अतिमहादुष्प्रापमित्यर्थः, 'दुःस्वीष०' (५।३।१३९) इति खल्। [6]'सुलाभः, दुर्लाभ' इत्यस्याग्रे 'दुःसुलाभ' इत्यपि व्यावृत्त्युदाहरणं द्रष्टव्यम्। अत्र समस्तग्रहणेन विपर्यस्तावपि 'दुःसु' इत्येवं गृहीतौ स्तः, इत्यपि

(? इत्यत्र) विपरीतसुदुरोरुदाहरणम्। [७]तथा 'अतिसुलभम्, अतिदुर्लभम्'; अत्र नोऽन्तः किमर्थं न भवति? सूरिराह– अतिशब्दः पूजातिक्रमार्थोऽत्र, पूजातिक्रमार्थस्तु अति उपसर्गसंज्ञो न भवति इति न नोऽन्तः, उपसर्गात्परयोः सुदुरोर्योगे नोऽन्तविधिः ॥१०८॥

## नशो धुटि ॥४।४।१०९॥

म० वृ०–नशः स्वरात् [परः] धुडादौ प्रत्यये परे 'नोऽन्तः' स्यात्। नंष्टा, नंष्टुम्, नङ्क्ष्यति, निनङ्क्षति। धुटीति किम्? नशिता ॥१०९॥

## मस्जेः सः ॥४।४।११०॥

म० वृ०–मस्जः स्वरात्परस्य सकारस्य स्थाने धुडादौ परे 'नोऽन्तः' स्यात्। [१]मङ्क्ता, मङ्क्तुम्, मङ्क्ष्यति, अमाङ्क्षीत्। [२]आदेशकरणं नलोपार्थम्,- मग्नः, [३] मग्नवान्, मक्त्वा, तसि- मामक्तः। धुटीति किम्? मज्जनम् ॥११०॥

---

अव०–[१]अघोषे प्रथमो० (१।३।५०।इति गस्य कः)। [२]आदेशकरणमित्यादि, 'मस्जेः स' इति सूत्रे सकारस्य नोऽन्त इति आदेशस्तस्य करणं=विधिः, आदेशकरणं नलोपार्थम्, यो नोऽन्तविधिः तस्य 'नो व्यञ्जनस्यानुदितः (४।२।४५) इत्यनेन नो लुप्यते इत्येतदर्थमादेशकरणं कृतम्, अन्यथा 'संयोगस्यादौ स्कोर्लुक् (२।१।८८) इति सलुकि कृतेऽपि 'नो व्यञ्जनस्यानुदितः' इति उपान्त्यलोपे कर्तव्ये सलुक् असन् भवतीति नोऽन्तलोपो न प्राप्नुयात्, उपान्त्याभावात्। [३]'मग्नः' इत्यत्र मस्जः क्तः, सस्य न, 'नो व्यञ्जनस्या०' (४।२।४५।इति) न लुप्यते, 'चजः कगम्' (२।१।८६।इति जस्य गः) ॥११०॥

## अः सृजिदृशोऽकिति ॥४।४।१११॥

म० वृ०–सृजिदृशोः स्वरात्परो धुडादौ प्रत्यये [परे] 'अकारोऽन्तो' भवति, [१]अकिति। स्रष्टा, [१]अस्राक्षीत्, स्रक्ष्यति, द्रष्टा, अद्राक्षीत्, [२] द्रक्ष्यति; सरिस्रष्टि, दरिद्रष्टि। धुटीत्येव– सर्जनम्, दर्शनम्। अकितीत्येव– सृष्टः, दृष्टः[३] ॥१११॥

अव०–[१]'अकिति,' कोऽर्थः? किति प्रत्यये अकारो न भवतीत्यर्थः। 'अः सृजि'० इति सूत्रे विशेषो लिख्यते,– अकिति नञ्प्रसज्याश्रयणात् प्रतिषेधे धुटीति नाश्रीयते, कोऽर्थः? अकिति धुडादौ प्रत्यये इति नाश्रीयते, तेन सिज्लुचो धुडादिं प्रति वर्णाश्रयत्वेन स्थानिवद्भावाभावेऽपि परं कित्त्वं प्रति स्थानिवद्भावात् किदाश्रयः प्रतिषेधो भवत्येव, यथा (असृष्ट, असृष्टाः)। [२]'अस्राक्षीत्, अद्राक्षीत्' इत्यत्र परत्वादकारागमे कृते एव वृद्धिर्भवति। [३](एवम्) सिसृक्षति, दिदृक्षति ॥१११॥

## स्पृशादिसृपो वा ॥४।४।११२॥

म० वृ०–स्पृशमृशकृषतृपदृपां सृपश्च स्वरात् धुडादौ "अकारोऽन्तो वा" स्यात्, अकिति। स्प्रष्टा, स्पर्ष्टा; अस्प्राक्षीत्, अस्पार्क्षीत्; एवं म्रष्टा, मर्ष्टा; क्रष्टा, कर्ष्टा; त्रप्ता, तर्प्ता; द्रप्ता, दर्प्ता; स्रप्ता, सर्प्ता ॥११२॥

---

अव०–एवं स्प्रष्टुम्, स्पर्ष्टुम्; स्प्रष्टव्यम्, स्पर्ष्टव्यम्; स्प्रक्ष्यति, स्पर्क्ष्यति इत्यपि। म्रष्टुम्, मर्ष्टुम्; म्रष्टव्यम्, मर्ष्टव्यम्; म्रक्ष्यति, मर्क्ष्यति; अम्राक्षीत्; अमार्क्षीत्। एवं क्रष्टुम्, कर्ष्टुम्; क्रष्टव्यम्, कर्ष्टव्यम्; क्रक्ष्यति, कर्क्ष्यति; अक्राक्षीत्, अकार्क्षीत्। त्रप्तुम्, तर्प्तुम्; त्रप्तव्यम्, तर्प्तव्यम्; त्रप्स्यति, तर्प्स्यति; अत्राप्सीत्, अतार्प्सीत्; द्रप्तुम्, दर्प्तुम्; द्रप्तव्यम्, दर्प्तव्यम्; द्रप्स्यति, दर्प्स्यति, अद्राप्सीत्, अदार्प्सीत्; एवमुदाहरणावली। अकितीत्येव– स्पृष्टः, पिस्पृक्षति; एवं मृष्ट इत्यादि ॥११२॥

## ह्रस्वस्य तः पित्कृति ॥४।४।११३॥

म० वृ०–ह्रस्वान्तस्य धातोः पिति कृत्प्रत्यये परे 'तोऽन्तः' स्यात्। [३]जगत्, [१]सोमसुत्, आगत्य। ह्रस्वस्येति किम्? ग्रामणीः। पिदिति किम्? स्तुतम्। कृतीति किम्? अजुहवुः। [२]सुश्रूः, उपश्रुय; अत्रान्तरङ्गत्वाद्विशेषविहितत्वाच्च य्वृत् दीर्घत्वं च ॥११३॥

अव०—ह्रस्वस्य० इति सूत्रे धुटीति निवृत्तम्, असम्भवात् । अक्तितीत्यपि निवृत्तम्, 'सोस्तो क्वनिपि' इति सूत्राकरणात् । [1]'सोमं सुतवान्(इति) 'सोमात्सुगः' (५।१।१६३) इत्यनेन क्विप् ) । [2]'सुश्रुः, उपश्रुय'; टुवोश्वि गतिवृद्ध्योः इति श्वि, अनुक्रमेण क्विप्, क्त्वा, 'यजादिवचेः'० ( ४।१।७९।इति ) य्वृत्, 'दीर्घमवोऽन्त्यम्' (४।१।१०३।इति) दीर्घत्वम् । [3]जगत् इति शब्दः क्रियाशब्दः संज्ञाशब्दश्च इति द्वेधा, ❀ तत्र क्रियाशब्दजगत्व्युत्पत्तिः 'दिद्युद्दद्‌ज्जगत्'० (५।२।८३) इति सूत्रे दर्शयिष्यते, अत्र तु भुवनवाचकः संज्ञाशब्दः उणादिः साध्यते-- गम्लृ, गच्छतीति 'गमेर्डिद् द्वे वा' (उ०८८५) इति उणादिसूत्रेण क्वत्, स डित् द्वित्वं च इति प्रक्रियाऽत्र न घटते, (किन्तु) अत्र क्विप्, पश्चात् 'गमां क्वौ' (४।२।५८) इत्यनेन मलोपः, ततोऽनेन 'ह्रस्व'० इति तोऽन्तः, अभिधानात् द्वित्वं च इति घटते, 'दिद्युद्'० इति द्वित्वं निपात्यते वा ॥११३॥

## अतो म आने ॥४।४।११४॥

म० वृ०—धातोर्विहिते आनप्रत्यये अकारस्य 'मोऽन्तः' स्यात् । पचमानः, पवमानः, विद्यमानः । अत इति किम् ? शयानः [भुञ्जानः] ।११४।

## आसीनः ॥४।४।११५॥

म० वृ०—आस्तेः परस्य आनस्यादेः 'ई' निपात्यते । आसीनः, उदासीनः [अध्यासीनः] ॥११५॥

## ॠतां क्ङितीर् ॥४।४।११६॥

म० वृ०—ॠदन्तधातोः क्ङिति प्रत्यये 'ॠ'स्थाने इर्' आदेशः स्यात् । तीर्णम्, किरति । बहुवचनं लाक्षणिकस्यापि परिग्रहार्थम्,– तेन चिकीर्षति ॥११६॥

## ओष्ठ्यादुर् ॥४।४।११७॥

म० वृ०—धातोरोष्ठ्याद्वर्णात्परस्य 'ॠतः स्थाने क्ङिति उरादेशः' स्यात् । पूर्त्तः, [1]पूः, पोपूर्यते, [2](पोपुरति) बुभूर्षति । दन्त्योष्ठ्योऽप्योष्ठ्यः, तेन [3]वुवूर्षते । क्ङितीत्येव- प्रावरणम् [प्रावारकः] ।११७।

अव०–[2]यङो लुपि पूर्वं द्वित्वम् (? उर्) पश्चात् उर् (? द्वित्वम्), पुर्, पोपुर्, (अन्तिप्रत्ययनकारलुकि पोपुरति) । [1]पॄ, पृणातीति पूः, क्विप्, उर्, ततः 'पदान्ते' (२।१।६४) दीर्घः । [3]वृगश् वरणे, (एवम्) वुवूर्षति प्रावुवूर्षति ॥११७॥

## इसासः शासोऽङ्व्यञ्जने ॥४।४।११८॥

म० वृ०—शास्तेरवयवस्य आसः स्थानेऽङि व्यञ्जनादौ च क्ङिति परे 'इसादेशः' स्यात् । अङि,- [1]अशिषत् । क्ङिति व्यञ्जने,-- शिष्टः, शिष्टवान्; [अनुशिष्य] अनुशिष्टि, शिष्यते [ शिष्यः ][2] । क्ङितीत्येव-- शास्ता, शास्ति[3] ॥११८॥

अव०–'शासः शिस्' इति सूत्रमकृत्वा यत् 'शास्तेः आसः स्थाने इस्' इति कृतम् तत् यङो लुपि प्रयोगसिद्ध्यर्थम् । [1]'शासूक् अनुशिष्टौ' इत्यस्य 'शास्त्यसू'० (३।४।६०।इति) अङ् । [2]एवं शेशिष्यते, शिष्टः, शिष्ठः, शिष्मः इत्यपि । [3](एवम्) शास्त्रम्,

❀ अत्र 'तत्र क्रियाशब्दजगत्व्युत्पत्तिः' इत्यादिपाठोऽशुद्धः प्रतिभाति, तद्यथा–अत्र "क्रियाशब्दजगत्व्युत्पत्तिः 'दिद्युद्दद्‌ज्जगत्'० इति सूत्रे दर्शयिष्यते" इति यदुक्तं तदसङ्गतम्, 'दिद्युद्दद्‌ज्जगज्जुहू'० इति सूत्रे भुवनवाचिजगत्शब्दव्युत्पत्तेः प्रदर्शितत्वात् । एवम् "अत्र तु भुवनवाचकः संज्ञाशब्दः उणादिः साध्यते" इति यदुक्तं तदसमीचीनम्, अत्र क्रियावाचिजगत्शब्दस्य सत्त्वाद्, तदुक्तं लघुन्यासे–"जगद् इति, 'दिद्युत्'० इति क्रियाशब्दोऽत्र, संज्ञाशब्दस्तु 'गमेर्डिद् द्वे वा' इति साधुः" । तथाऽत्र भुवनवाचिजगत्शब्दसाधनिकायां द्विधा प्रक्रिया प्रदर्शिता, तत्र प्रथमा प्रक्रिया निषिद्धा, द्वितीया स्वीकृता, परं तन्न चारु, ग्रन्थान्तरेषु प्रथमप्रक्रियया भुवनवाचिनो द्वितीयप्रक्रियया च क्रियावाचिनो जगत्शब्दस्य साधितत्वात् । अत्रायं पाठः शुद्धः प्रतिभाति– तत्र भुवनवाचकजगत्शब्दव्युत्पत्तिः 'दिद्युद्दद्‌ज्जगज्जुहू'० इति सूत्रे दर्शयिष्यते, अत्र तु क्रियावाचको जगत्शब्दः साध्यते– गम्, क्विप्, 'दिद्युद्दद्‌ज्जगज्जुहू'० इति निपातनाद् द्वित्वम्, द्वित्वेऽनादिव्यञ्जनलोपः, द्वित्वे गस्य जः, 'गमां क्वौ' (४।२।५८) इत्यनेन मलोपः, प्रस्तुतसूत्रेण तकारागमे जगत् ।

शिष्यतेऽनेनेति शास्त्रम्, त्रट्, । अङ्-व्यञ्जन इति किम्? शासति, [अन्ति] शशासुः ॥११८॥

## क्वौ ॥४।४।११९॥

म० वृ०-शास आस्स्थाने 'क्वाविस्' स्यात्। मित्रशीः, आर्यशीः ॥११९॥

## आङः ॥४।४।१२०॥

म० वृ०-आङः परस्य शास आस्स्थाने 'क्वावेव इस्' स्यात्। [1]आशीः, आशिषः। पूर्वेण सिद्धे नियमार्थो योगः, तेन आयुराशास्ते[2] ॥१२०॥

अव०-[1]आशासनमाशीः, 'क्रुत्सम्पदादिभ्यः क्विप्' (५।३।११४इति क्विप्)। [2]अत्र न इस्, एवमाशास्महे ॥१२०॥

## य्वोः प्वय्व्यञ्जने लुक् ॥४।४।१२१॥

म० वृ०-पौ यकारवर्जव्यञ्जनादौ च प्रत्यये 'य् व् इत्येतयोर्लुक्' स्यात्। क्नोपयति[1]। अयव्यञ्जने,- [2]ऊतम, [3]देदिवः, [4]कण्डूः, लोलूः, [बोभूः] [5]लून्युः, [6]पून्युः। यवर्जनं किम्? सेव्यते। व्यञ्जन इति किम्? देविता ॥१२१॥

अव०-सूत्रे पुग्रहणमप्रत्ययार्थम्, कोऽर्थः? प्रत्ययसम्बन्धी पुर्न गृह्यते। [1]'क्नोपयति, एवं क्ष्मापयति, अत्र 'अर्त्तिरीव्ली'० (४।२।२१) इति पोऽन्तः। [2]'ऊतम्' इत्यत्र 'ऊयैङ् तन्तुसन्ताने' (इति) ऊय्, क्तः। [3]'देदिवः,' दिवूच् क्रीडायाम्' (इति) दिव्, भृशं पुनः पुनर्वा दीव्यावः-यङ्,'बहुलं लुप्' (३।४। १४इति यङो लुप्), वर्त्तमानावस्। [4]कण्डूमिच्छतीति कण्डूयति, क्यन, कण्डूयतीति क्विप्, अथवा कण्डूयनं=कण्डूः, 'क्रुत्सम्पदा'० (५।३।११४ इति) क्विप्, 'अतः' (४।३।८२) इत्यनेन अकारलोपः, 'य्वोः प्वय्'० इति यो लुप्यते, (द्विवचनबहुवचनयोरनुक्रमेण) कण्ड्वौ, कण्ड्वः; (अनुक्रमेण) औ, जस्, 'धातोरिवर्णो'० (२।१।५०इति) उव्। [5]लूनः, [6]पूनः; लूनमिच्छति पूनमिच्छतिक्यन्, लूनीयतीति पूनीयतीति क्विप्, 'अतः' (४।३।८२इति) अलोपः, 'य्वोः प्वय्'० इत्यनेन यो लुप्यते, (ततः) ङसि, ङस् वा; 'स्वादेशोऽषि' (२।१। ६१) इत्यनेन ऊस्य नत्वमसत्, असत्त्वात् तीरूपत्वं ज्ञातव्यम्, ततः 'खितिखीती'० (१।४।३६। इति) उरादेश ॥१२१॥

## कृतः कीर्त्तिः ॥४।४।१२२॥

म० वृ०-कृतण् इत्यस्य 'कीर्त्त आदेशः' स्यात्, अव्यञ्जने। कीर्तयति, कीर्त्तिः। इकारान्तनिर्देशो मङ्गलार्थः ॥१२२॥ ग्रन्थश्लोक २४०। एवमाख्यातसर्वाग्रम् १३११।

अव०-'कृतण् संशब्दने' इत्यस्य। ननु चुरादौ कीर्त्तण् इति पठ्यताम्; किमनेन "कृतः कीर्त्तिः" सूत्रेण? इत्याह- ऋकारः श्रवणार्थः, [? कृत ऋदुपदेशोऽचीकृतदित्यत्र ऋकारश्रवणार्थः] यतः 'ऋदवर्णस्य' (४।२।३७) इति सूत्रे वर्णग्रहणसामर्थ्यात् कीर्त्यादेशो बाध्यते, 'ऋदवर्णस्य' इत्यस्यार्थः,- धातोरुपान्त्यस्य ऋवर्णस्य ङपरे णौ ऋकारो वा भवति। अवीवृतत् अववर्त्तत्;, अचीकृतत्, अचिकीर्त्तत्। वचनसामर्थ्यात् कीर्त्यादेशो बाध्यते इति 'ऋदवर्णस्येति सूत्रे उक्तम्। यदि कीर्त्त आदेशोऽभविष्यत् तदा 'अचीकृतत्' इति न सिद्ध्येत। 'अचीकृतत्' इत्यसिद्धौ 'ऋदवर्णस्य' इत्यस्य निष्फलः प्रयासः ॥१२२॥ अत्र सूत्रे अवचूरिश्लोक ४८९।

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥

। इति चतुर्थोऽऽध्यायः समाप्तः ।

॥ श्री ॥ श्री ॥ शुभं भवतु ॥

॥ अर्हम् ॥

# ॥ पञ्चमोऽध्यायः ॥

## [ प्रथमः पादः ]

★

### आ तुमोऽत्यादिः कृत् ॥५।१।१॥

म० वृ०–धातोः क्रियमाणस्त्यादिवर्जितो वक्ष्यमाणप्रत्ययस्तुमभिव्याप्य[४] 'कृत्संज्ञो' भवति । [१]घनघात्यः, [२]गोदायो याति । अत्यादेरिति किम् ? प्रणिस्ते[३] । कृत्प्रदेशाः 'तिकृकृतौ नाम्नि' (५।१।७१) इत्येवमादयः ॥१॥

अव०–[४]कृत्सूत्रे चतुर्थपादप्रान्ते 'शकधृष०' (५।४।९०) सूत्रोक्तं तुमभिव्याप्य तुम् यावत्, न क्रियायां क्रियार्थायाम्० ( ५।३।१३ ) इति तुम्, शकधृषोक्तुमः संज्ञायां सत्यां प्रनिन्दितुम्, प्रणिन्दितुमिति [ 'निंसनिक्षनिन्दः कृति वा' (२।३।८४) इत्यनेन ] विकल्पेन णत्वं सिद्धम्, अन्यथा 'अदुरुपसर्गं०' (२।३।७७) इत्यनेन नित्यं णत्वं सिद्धम् (स्यात्) । [१]'कारकं कृता' (३।१।६८) समासः । [२]'इस्युक्तं कृता' (३।१।४९) समासः । [३]'अदुरुपसर्गं०' (२।३।७७) णत्वम् ॥१॥

### बहुलम् ॥५।१।२॥

म० वृ०–अधिकारोऽयम् । कृत्प्रत्ययो यथानिर्दिष्टादर्थादेरन्यत्रार्थे[१] 'बहुलं' स्यात् । [२]पादहारकः, [३]मोहनीयं कर्म इत्यादि[४] ॥२॥

अव०–[१]आदिशब्दात् उपपदधातू गृह्येते । [२]पादाभ्यां ह्रियते=पादहारकः, अत्र अकर्त्तर्यपि णकप्रत्ययः । [३]मुह्यत्यनेनात्मा मोहनीयम्, अत्र कर्त्तर्यपि (? करणेऽपि) अनीयः । [४]आदिशब्दात् स्नानीयं चूर्णम्, यानीयोऽश्वः, दानीयोऽतिथिः, सम्प्रदानम्, स्पृहणीया विभूतिः, समावर्त्तनीयो गुरुः, उद्वेजनीयः खलः, स्थानीयं नगरम्, शयनीयः पल्यङ्कः, एषां क्रमेण वाक्यानि-स्नाति तेनेति स्नानीयम्, यात्यनेनेति यानीयः, दीयते तस्मै इति दानीयः, सम्प्रदीयतेऽस्मै (इति) सम्प्रदानम्, स्पृहयत्येतां जनः (स्पृहयत्यस्य वेति) स्पृहणीया, समावर्त्तते तस्मादिति समावर्त्तनीयः इति संक्षेपवाक्यम्, सं=सम्यक् आ=समन्तात् आचारेषु जना वर्त्तन्तेऽस्मात् इति समावर्त्तनीयः, जना गुरुतः सदाचारानभ्यस्यन्तीत्यर्थः, उद्वेजत्यसौ इति उद्वेजनीयः, तिष्ठन्त्यस्मिन् जना इति स्थानीयम्, शेतेऽस्मिन् धनवानिति शयनीयः, एषु 'तत्साप्यानाप्यात्कर्मभावे०' (३।३।२०) इति वचनात् कर्मभावे कृत्याः तव्यानीयाद्याः प्रत्यया उक्ताः, परं 'बहुलम्' इति सूत्रबलात् कर्त्तर्यपि अनीयः अनट् च ॥२॥

### कर्त्तरि ॥५।१।३॥

म० वृ०–कृत्प्रत्ययोऽर्थविशेषं विना 'कर्त्तरि' स्यात् । कर्त्ता, कारकः ॥३॥

### व्याप्ये घुर-केलिम-कृष्टपच्यम् ॥५।१।४॥

म० वृ०—घुरकेलिम इति प्रत्ययौ कृष्टपच्यशब्दश्च 'व्याप्ये कर्त्तरि' [कर्मकर्त्तरीत्यर्थः,] भवतीति ज्ञेयम् । [१]भङ्गुरं काष्ठम्, [२]भिदुरः कुशूलः [३]पचेलिमा माषाः, [४]भिदेलिमास्तण्डुलाः, [५]कृष्टपच्याः शालयः ॥४॥

अव०–'व्याप्ये,' अत्र कोऽर्थः ? कर्मकर्त्तरि । घुरप्रत्ययो वक्ष्यति द्वितीयपादे । [१]भनक्ति काष्ठं चैत्रः, स एवं विवक्षति-नाहं भनज्मि, किन्तु

भज्यते स्वयमेव काष्ठम्, 'भञ्जिभासिमिदो घुरः, (५।२।७४) इति सूत्रेण घुरप्रत्ययः; [२]एवं भिनत्ति कुशूलमित्यपि, वेत्तिछिद्भिदः कित् (५।२।७५) घुरः; एवं भासुरः, मेदुरः, विदुरः; परमत्र विशेषोऽयम्- भासिमिदिविदां कर्त्तर्येव घुरः, कर्मकर्तृरसम्भवात्, भासते इत्येवं शीलः, मेद्यति, वेत्तीति। [३]पच्यते स्वयमेव (इति) पचेलिमाः। [४]एवं भिद्यन्ते स्वयमेव। अत्र 'विहाविशापचिभिद्यादेः केलिमः' (उणा० ३५४) इत्युणादिसूत्रेण केलिमप्रत्ययो नियतधातुविषय एवौणादिकः, अयं तु 'व्याप्ये घुर०' इति सूत्रेण केलिमः सर्वधातुविषयो ज्ञातव्यः। तथाह- अत एव वचनात् सर्वधातुभ्यः परत्र ज्ञायत एव। [५]कृष्टे पच्यन्ते स्वयमेव (इति) कृष्टपच्याः, अत एव वचनात् यप्रत्ययः ॥ ४ ॥

## सङ्गतेऽजर्यम् ॥५।१।५॥

म० वृ०--सङ्गमनं=सङ्गतम्। 'सङ्गते कर्त्तरि वाच्ये नञ्पूर्वाज्जीर्यतेर्यप्रत्ययो' निपात्यते। अजर्यमार्यसङ्गतम्, तथा "तेन सङ्गतमार्येण रामाजर्यं कुरु द्रुतम्"। सङ्गतमिति किम्? अजरः पटः। कर्त्तरीत्येव- अजार्यं सङ्गतेन ॥५॥

अव०--'अजर्यम्', अत्र 'जृष्च् झृष्च् जरसि' इति दिवादिरेव, न तु 'जृश् वयोहानौ' इति क्र्यादिः इति सूत्रार्थे जीर्यते(:) इत्युक्तम्। सामान्यविशेषभावेन च उभयोरपि विशेषणविशेष्ययोः प्रयोगो भवति, यथा- तेन सङ्गतमार्येणेत्यादि, हे राम तेन सुग्रीवेण सह सङ्गतं कुरु। सङ्गतमिति सामान्यपदम्, कोऽर्थः? विशेष्यम्, कीदृशं सङ्गतं=मैत्र्यम्? अजर्यम्=अक्षयमिति विशेषणपदमिति भावना ॥५॥

## रुच्या-ऽव्यथ्य-वास्तव्यम् ॥५।१।६॥

म० वृ०-एते 'कर्त्तरि' निपात्यन्ते। रुच्यो मोदको मैत्राय, न व्यथति (इति) अव्यथ्यो मुनिः, वसतीति वास्तव्यः ॥६॥

अव०-रोचते इति रुच्यः ॥६॥

## भव्य-गेय-जन्य-रम्या-ऽऽपात्या-ऽऽप्लाव्यं नवा ॥५।१।७॥

म० वृ०-एते 'कर्त्तरि नवा' निपात्यन्ते। भावकर्मणोः प्राप्तयोः पक्षे [१]कर्त्तरि विधानार्थमिदम्। भवत्यसाविति भव्यः, पक्षे भव्यमनेन। एवं[२] गेयो माणवकः साम्नाम्, गेयानि सामानि[३]। जायतेऽसौ इति जन्यः, [४]जन्यमनेन। रमयत्यसाविति रम्यः, पक्षे रम्यते (इति) रम्यः। आपतत्यसाविति आपात्यः, आपात्यमनेन। [आप्लवतेऽसाविति] आप्लाव्यः, आप्लाव्यमनेन[५] ॥७॥

अव०--[१]भूगैरम्भ्यो यो यः प्रत्ययः, यश्च प्रत्ययो जनेः परतः आङ् पूर्वाभ्यां च पतिप्लुभ्यां घ्यण् स कर्त्तरि नवा निपात्यते इत्यर्थः। [२]गायतीति। [३]माणवकेन। [४]"जन्यमनेन," अत्र जन्यते इति जन्यम्, 'ऋवर्णव्यञ्जनाद् घ्यण्' (५।१।१७), 'न जनवधः' (४।३।५४) इत्यनेन वृद्धिप्रतिषेधः। [५]रम्यते इति रम्यम्', 'शकितकिचतियतित्रसि' (५।१।२९) इत्यादिना यः प्रत्ययः ॥७॥ [६]अवश्यमाप्लूयते-"उवर्णादावश्यके" (५।१।१९) इति अनेन घ्यण्, गुणः, गुणे सति (? वृद्धिः, वृद्धौ सत्यां) 'य्यक्ये' (१।२।२५। इति सूत्रेण) आवादेशः ॥७॥

## प्रवचनीयादयः ॥५।१।८॥

म० वृ०-प्रवचनीयादिशब्दाः अनीयप्रत्ययान्ताः 'कर्त्तरि नवा' निपात्यन्ते। प्रवक्ति प्रकृते वा- प्रवचनीयो गुरुः शासनस्य, प्रवचनीयं गुरुणा शासनम्[१]। एवं रमयतीति रमणीयः देशः। एवं मदयतीति मदनीया नारी। [२]मोहनीयं कर्म। एवं ज्ञानमावृणोतीति ज्ञानावरणीयम् ॥८॥

अव०--[१]"प्रवचनीयं गुरुणा शासनम्' इत्यस्याग्रे उपतिष्ठते इत्युपस्थानीयः शिष्यो गुरोः, उपस्थानीयः शिष्येण गुरुः; एवं दीपयतीति दीपनीयं चूर्णम्। मदयतीति मदनीया योषित् इत्यपि। [२]मोहयतीति मोहनीयं कर्म, एवं ज्ञानावरणीयम्, दर्शनावरणीयं वेदनीयम्, कर्मेत्यादि ॥८॥

## श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह-जृ-भजेः क्तः ॥५।१।९॥

म० वृ०-एभ्यः क्तप्रत्ययो यो विहितः स 'कर्त्तरि नवा' स्यात् । [1]आश्लिष्टः कान्तां मैत्रः, कर्मणि,-[2]आश्लिष्टा कान्ता प्रियेण। शीङ्,-अतिशयितो गुरुं शिष्यः, कर्मणि- अतिशयितो गुरुः शिष्येण, अतिशयितं शिष्येण इति भावे। स्था,-उपस्थितो गुरुं शिष्यः, उपस्थितो गुरुः शिष्येण[3]। उपासितो गुरुं शिष्यः, उपासितो गुरुः शिष्येण[4]। [5]अनूषित इत्यादि[6]। [7]अनुजात इत्यादि। [8]आरूढोऽश्वं सः, आरूढोऽश्वस्तैः। [9]अनुजीर्णः। [10]विभक्ता भ्रातरः स्वम् ॥९॥

अव०-अकर्मका अपि हि धातव उपसर्ग-सम्बन्धात् सकर्मका भवन्ति इति शीङादिग्रहणम्। अन्यथाऽकर्मकत्वादुत्तरेण 'गत्यर्थाकर्मक'० (५।१।११) इत्यनेन क्तः सिद्धोऽस्ति। श्लिषभजी केवलावपि सकर्मकौ इत्यर्थः। [1]आश्लिष्यति स्म- आश्लिष्टः इति कर्त्तरि, [2]आश्लिष्यते स्म इति कर्मणि, भावे च आश्लिष्टं कामुकेन इति भवति। [3]उपस्थितं शिष्येण इति भावे। [4]उपासितं शिष्येण (इति भावे)। [5]वस् धातुः, 'क्षुधवस'० (४।४।४३ इति) इट्। [6]आदिशब्दात् अनूषितो गुरुं भवान्, अनूषितः गुरुर्भवता; अनूषितं भवता। [7]एवमनुजातः, कोऽर्थः? अनुजननेन प्राप्तवान् माणवको माणविकाम्; अनुजाता माणविका माणवकेन; जन्धातुः, 'आः खनिसनि०' (४।२।६०), जन्धातोरिदमप्युदाहरणं ज्ञेयम्-विजाता वत्सं गौः, विजातो वत्सो गवा; विजातं गवा इति वाक्यं विधेयम्। [8]आरूढो वृक्षं भवान्, आरूढो वृक्षो भवता, आरूढं भवता। [9]अनुजीर्णो वृषलीं चैत्रः, वृषलीं प्राप्य जीर्ण इत्यर्थः, अनुजीर्णा वृषली चैत्रेण, अनुजीर्णं चैत्रेण। [10]विभक्ता भ्रातरः स्वम्, धनमित्यर्थः, विभक्तं भ्रातृभिः स्वम्; विभक्तं भ्रातृभिः। एवं प्रयोगावली ॥९॥

## आरम्भे ॥५।१।१०॥

म० वृ०-[1]भूतादित्वेन विवक्षिते आरम्भे वर्त्तमानाद्धातोर्यः क्तः विहितः स 'कर्त्तरि नवा' स्यात्। प्रकृतः कटं भवान्, प्रकृतः कटो भवता, प्रकृतं भवता। एवं प्रभुक्तः ओदनं चैत्रः, प्रभुक्त ओदनः चैत्रेण ॥१०॥

अव०--प्रकर्तुमारभत (इति) प्रकृतः, प्रक्रियते स्म वा। [1]आदिशब्दात् वर्तमानाभविष्यत्योरपि परिग्रहः, यथा ज्ञातुमारभते (इति) प्रज्ञातः, कथितं प्रारप्स्यते (इति) प्रकथितः ॥१०॥

## गत्यर्था-ऽकर्मक-पिब-भुजेः ॥५।१।११॥

म० वृ०-भूतादौ य क्तः उक्तः स गत्यर्थेभ्योऽकर्मकेभ्यश्च पिबभुजिभ्यां च 'कर्त्तरि नवा' स्यात्। गतः स ग्रामम्, गतो ग्रामस्तेन; गतं तेन। अकर्मक-आसितः, शयितो भवान्। अविवक्षितकर्माणः सकर्मका अप्यकर्मकाः, तेन-पठितो भवान्, एवं विदितः, प्रख्यातः। [1]कालभावदेशाध्वभिश्च कर्मभिः सकर्मका अप्यकर्मका उक्ताः, तेन त्रैरूप्यम्-सुप्तो भवान् मासम्, सुप्तो भवता मासः, सुप्तं भवान् मासम्; [2]एवमोदनपाकं सुप्तस्त्वम्, [3]सुप्तो भवान् कुरून् इत्यादि। पिब,-पयः पीता गावः, इदं गोभिः पीतम्। भुजि,-अन्नं भुक्तास्ते, इदं तैर्भुक्तम् ॥११॥

अव०--एवं यातास्ते ग्रामम्, यातस्तैर्ग्रामः, यातं तैः। आसितो भवान्, आसितं भवता। शयितो भवान्, शयितं भवता एवं प्रयोगा मन्तव्याः। [1]कालभावेत्यादिना युगपत्सकर्मकत्वमकर्मकत्वं च उक्तम्, तेन अकर्मकधातोः कर्त्तरि (भावे च) प्रयोगः क्तस्य, सकर्मकात् धातोः कर्मणि प्रयोगः इति त्रैरूप्यमुपपद्यते। [2]भावस्योदाहरणम्। [3]देशोदाहरणम्। क्रोशं स्थित इत्यध्वप्रयोगः। सुप्तो भवानित्यादौ 'कालाध्वभाव०' (२।२।२३) इत्यनेन कर्मसंज्ञा अकर्मसंज्ञा च भवति, 'कालाध्वनोर्व्याप्तौ' (२।२।४२) इत्यनेन द्वितीया ॥११॥

## अद्यर्थाच्चाधारे ॥५।१।१२॥

**म० बृ०**--अद्यर्थाद्=आहारार्थाद् [1]'गत्यर्थादिभ्यश्च भूते यः क्तः स 'आधारे वा' स्यात् । इदमेषां जग्धम् , इदं तैर्जग्धम् , इह तैर्जग्धम् । आरम्भे तु कर्त्तर्यपि,-इह ते अन्नं प्राशिताः[2] । अथ गत्यर्थ,-इदं तेषां यातम् । अकर्मक,-इदमेषामासितम् । पिब,-इदं गवां पीतम् । इदं तेषां भुक्तम्[3] । पक्षे कर्तृ-कर्म-भावेषु पूर्वे एव प्रयोगाः ॥१२॥

**अव०**--[1]"गत्यर्थाकर्मकपिबभुजेः' (५।१।११) । [2]अशितुमारभन्ते स्म । [3]एवमिदमेषां यातम् ॥१२॥

## क्त्वातुमम्[1] भावे ॥५।१।१३॥

**म० बृ०**--नवेति निवृत्तम् । क्त्वा, तुम् , अम् इति प्रत्यया 'भावे=धात्वर्थमात्रे' ज्ञेयाः । कृत्वा याति । एवं कर्तुम् । [2]कारंकारं याति । [3]अतिथिवेदं भोजयति ॥१३॥

**अव०**--सूत्रे भावे इति वचनात् कारकं कर्त्रादि निवृत्तम् । कारकनिवृत्तौ सत्यां नवा इत्यपि निवृत्तम् । [1]ख्णम्णमप्रत्ययो 'अम्' इति उच्यते । [2]'कारंकारम्', अत्र अभीक्ष्णं करणं पूर्वम्- कारं कारम् , 'ख्णम्चाभीक्ष्ण्ये' ( ५।४।४८ ) इत्यनेन ख्णम् । [3]अतिथीन् विदित्वा विदित्वा इति वाक्ये 'विद्दृग्भ्यः कार्त्स्न्ये णम्' (५।४।५४) इत्यनेन णम् ॥१३॥

## भीमादयोऽपादाने[1] ॥५।१।१४॥

**म० बृ०**--भीमादिशब्दा 'अपादाने' भवन्ति । [2]भीमः, भीष्मः, भयानकः[3] । एते औणादिकशब्दा इति उत्तरसूत्रेण निषेधे सति निपात्यन्ते ॥१४॥

**अव०**--[1]('अपादाने' इत्यत्र) 'भुजिपत्यादिभ्यः कर्मापादाने' (५।३।१२८) इति अनट् , [2]बिभ्यत्यस्मादिति भीमः; भीष्मः, भियः षोन्तश्च(वा) (उणा०३४४) इत्युणादिसूत्रेण मप्रत्ययः, विकल्पेन षोऽन्तश्च । [3]'भयानकः', अत्रापि भीधातुवाक्यं प्राग्वत् , 'शीभीराजेश्चानकः' ( उणा०७१ ) इत्युणादिना आनकः । एवं समुन्दन्ति=आर्द्री भवन्ति वेलाकाले नद्योऽस्मादिति समुद्रः खलतिश्च ॥१४॥

## सम्प्रदानाच्चान्यत्रोणादयः ॥५।१।१५॥

**म० ०**--'सम्प्रदानापादानादन्यत्र कारके भावे च' उणादयः प्रत्यया भवन्ति । कृत्त्वात्कर्त्तर्येव प्राप्ताः कर्मादिष्वप्युणादयो विधीयन्ते । करोतीति कारुः, वातीति वायुः; ऋषितोऽसाविति कर्मणि ऋषिः ॥१५॥

**अव०**--(कारुः, वायुः' इत्यत्र) 'कृवापाजी'-ति प्रथमोणादिसूत्रेण उण् । 'ऋषिः', अत्र लिशं ऋषैत् गतौ'(इति) ऋष् , नाम्युपान्त्यकृगृशृपृकृभ्यः कित् ( उणा०६०९ ) इति उणादिसूत्रेण कित् इप्रत्ययः ॥१५॥

## असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः ॥५।१।१६॥

**म० बृ०**--इतः सूत्रादारभ्य 'स्त्रियां क्तिः' (५।३।९१) इत्यतः प्राक् योऽपवादः [1]'तद्विषयेऽपवादेनासमानरूप उत्सर्गः= औत्सर्गिकप्रत्ययो वा' स्यात् । अवश्यलाव्यम् , अवश्यलवितव्यम् , अवश्यलवनीयम्[2] । असरूप इति किम् ? घ्यणि यो न [3]स्यात् ,- कार्यम् । डविषयेऽण् न स्यात् ,- गोदः । प्राक्क्तेरिति किम् ? कृतिः,[4] घञादिर्न भवति । [5]चिकीर्षा, न क्तिः । [6]अपवादत्यादिविषये त्वसरूपोप्युत्सर्गत्यादिर्न प्रवर्त्तते इति 'श्रुसद'० (५।२।१) इति सूत्रे वाग्रहणेन ज्ञापयिष्यते ॥१६॥

**अव०**--[1]अपवादविषये उत्सर्गप्रत्ययो वा भवतीति सम्बन्धः, । अपवादेन सह असमानरूपः; सदृशो न भवतीत्यर्थः । यो विशेषानभिधानेन प्रवाहतो विधीयते (स) उत्सर्गप्रत्ययः, यश्च विशेषस्वरूपेण नियतविषयेण वा विधीयते सोऽपवाद-

-प्रत्ययः। ※ ध्यण् उत्सर्गप्रत्ययः। यक्यपादिकोऽपवादः प्रत्ययः। अवश्यलाव्यमित्यत्र 'उवर्णादावश्यके' (५।१।१९) इत्यनेन ध्यण् उत्सर्गः योऽपवादः इति घ्यण् वा भवति, पक्षे तव्यानीयौ। [२]एवं ज्ञः, ज्ञाता, ज्ञायकः; नन्दनः, नन्दकः, नन्दयिता। [३]अनुबन्धोऽप्रयोगीति सारूप्यं घ्यणय्प्रत्यययोः, डाणोरपि, तृचतृनोः, एवमन्येषामपि सरूपता ज्ञातव्या। [४](एवम्) रक्षणम्, रक्षितम्। [५]'चिकीर्षा' इत्यस्याग्रे ईषत्पानः, सुपानः; अत्र न खल्। [६]अत्र सूत्रे कृत् इति विशेषानभिधानात् त्यादिरपि प्राप्नोति इत्याह- अपवादेति ॥१६॥

## ऋवर्ण-व्यञ्जनाद् घ्यण् ॥५।१।१७॥

म० वृ०—ऋवर्णान्तात् व्यञ्जनान्ताच्च धातोः 'घ्यण् प्रत्ययः' स्यात्। कार्यम्, वाक्यम् ॥१७॥

अव०—णकारो वृद्धयर्थः। घकारो 'क्तेऽनिटश्चजोः कगौ घिति' (४।१।१११) इत्यत्र विशेषणार्थः। घ्यण्क्यप्यतव्यानीया एते पञ्च कृत्यप्रत्ययाः कर्मभावे विधीयन्ते (इति) 'तत्साप्यानाप्यात् कर्मभावे कृत्यक्त'० (३।३।२१) इति सूत्रे उक्तमस्ति ॥१७॥

## पाणि-समवाभ्यां सृजः ॥५।१।१८॥

म० वृ०—पाणिपूर्वात् समवपूर्वाच्च सृजेः 'घ्यण्' स्यात्। ऋदुपान्त्यक्यपोऽपवादः। पाणिसर्ग्या रज्जुः, समवसर्ग्यः। 'समव' इति समुदायपरिग्रहार्थं द्विवचनम् ॥१८॥

अव०—पाणिभ्यां सृज्यते (इति) पाणिसर्ग्या, सम्, अव इत्येवं न ग्राह्यः, किन्तु समव इति ग्राह्यः ॥१८॥

## उवर्णादावश्यके ॥५।१।१९॥

म० वृ०—आवश्यके द्योत्ये उवर्णान्तधातोः 'घ्यण्' स्यात्। लाव्यम्, पाव्यम्। [१]यन्नियोगात् कर्त्तव्यमर्थप्रकरणादिना निश्चितं तत्रायं प्रत्ययः। लाव्यमवश्यम्। एवमवश्यलाव्यम्, [२]अवश्यपाव्यम्। तथा 'अवश्यस्तुत्य' इति परत्वात्क्यप्[३] ॥१९॥

अव०—अवश्यस्य भाव आवश्यकम्, अथवा अवश्य भाव आवश्यकम्, अकञ्। [१]अवश्यमादिशब्दं विनाऽपि। ● यथा 'व्यतिलुनते' इत्यादौ आत्मनेपदेनापि क्रियाव्यतिहारे द्योतिते व्यतिशब्दप्रयोगो भवति, तथा अवश्यलाव्यमित्यत्रापि अवश्यंशब्देनापि अवश्यंभावो द्योत्यते। अवश्यशब्दप्रयोगस्तु विशेषेण प्रकटनार्थं क्रियते। [२]मयूरव्यंसकादित्वादत्र समासः। [३]'दृवृगस्तुजुषेतिशासः' (५।१।४०) इत्यनेन ॥१९॥

## आसु-यु-वपि-रपि-लपि-त्रपि-डिपि-दभि-चम्या-ऽऽनमः ॥५।१।२०॥

म० वृ०—आङ्पूर्वसुनमिभ्यां यु इत्यादेश्च 'घ्यण्' स्यात्। आसाव्यम्, याव्यम्, वाप्यम्, राप्यम्, लाप्यम्, अभिलाप्यम्, अपत्राप्यम्, डेप्यम्, दाभ्यम्, *आचाम्यम्, आनाम्यम्। नमिरन्तर्भूतण्यर्थः सकर्मकः। अकर्मका अपि हि धातवो ण्यर्थे वर्त्तमानाः सकर्मकाः भवन्ति इति योगः, यथा नेमिं नमन्ति ॥२०॥

अव०—डिपः कुटादित्वात् ये सति गुणो न लभ्यते इति घ्यण् विधीयते। डेप्यम्। 'डिपत् क्षेपे' (इति) तुदादिः। दभिः सौत्रो बन्धने ॥२०॥

## वाऽऽधारेऽमावस्या ॥५।१।२१॥

म० वृ०—अमापूर्वाद्वसतेराधारे 'घ्यण्' पक्षे धातोर्ह्रस्वश्च' निपात्यते। अमावस्या, अमावास्या। २१।

अव०—अमाशब्दः सहार्थः। अमाऽग्रे 'वसं निवासे'। अमा, कोऽर्थः? सह (वसतः) सूर्या-

※ 'घ्यण्'इत्यत आरभ्य 'वा भवति' इति यावत्पाठोऽशुद्धः प्रतीयते।

● नन्वत्र अवश्यलाव्यम् इत्यादौ घ्यण्प्रत्ययेनैवावश्यकार्थद्योतनसंभवे उक्तार्थत्वादावश्यकशब्दप्रयोगोऽनुचित इत्याशङ्कायामाह-'यथा इत्यादि'।

चन्द्रमसावस्यां तिथौ सा अमावस्या अमावास्या वा, लोकरूढया तिथिविशेषः । तथा यतो ★ (पक्षे यमकृत्वा) ह्रस्वत्वनिपातनं तत 'अश्च वाऽमावास्यायाः' (६।३।१०४) इति तद्धिततृतीयपादसूत्रे 'एकदेशविकृतमनन्यवत्' इति न्यायादमावास्याशब्देनाऽमावस्या इति शब्दस्यापि ग्रहणार्थं कृतम् । तेन अमावस्यायां जातोऽमावस्यः, अमावस्यकः; अत्र 'अश्च वाऽमावास्यायाः' (६।३।१०४) इति सूत्रेण 'अमावस्या' इति शब्दादपि अकारोऽकश्च प्रत्ययौ सिद्धौ ॥२१॥

## सान्नाय्य-कुण्डपाय्य-राजसूयं क्रतौ ॥५।१।२२॥

म० वृ०–एते क्रतौ वाच्ये 'घ्यणन्ता' निपात्यन्ते । [1]सान्नाय्यः, [2]कुण्डपाय्यः, [3]राजसूयः [4]क्रतुः ॥२२॥

---

प्रव०–[1]सम्पूर्व 'चिग्ट् चयने', सञ्चीयते सोमोऽस्मिन् क्रतौ इत्याधारे वाक्यम्, सञ्चीयतेऽसाविति वा कर्मणि वाक्यम्, घ्यण्, निपातनादेव आय् इत्यादेशो दीर्घत्वं (च), एवमग्रेऽपि । सञ्चेयोऽन्यः । [2]कुण्डैः पीयते सोमोऽस्मिन्, अथवा कुण्डैः पीयते इति कुण्डपाय्यः । कुण्डपानोऽन्यः । [3]राजा सूयते=यजमानतया क्रियतेऽस्मिन्, अथवा राज्ञा सोतव्यः, राजसूयः क्रतुः । अत्र सर्वत्र घ्यण्, यथासम्भवम् आय् आदेशो दीर्घश्च । [4]ससोमको हि यागः क्रतुरुच्यते ॥२२॥

## प्रणाय्यो निष्कामा-ऽसम्मते ॥५।१।२३॥

म० वृ०–'प्रपूर्वान्नयतेर्घ्यणायौ' निपात्येते, निष्कामेऽसम्मते चार्थे । प्रणाय्योऽन्तेवासी [=शिष्यः], विषयेष्वनभिलाष इत्यर्थः । प्रणाय्यश्चोरः । अन्यत्र प्रणेयः ॥२३॥

## धाय्या-पाय्य-सान्नाय्य-निकाय्यमृङ्-मान-हविर्निवासे ॥५।१।२४॥

म० वृ०–धाय्यादिशब्दा यथासङ्ख्यम् ऋगादिष्वर्थेषु 'घ्यणन्ता' निपात्यन्ते । [1]धाय्या ऋग्, [2]पाय्यं मानम्, [3]सान्नाय्यं हविः, [4]निकाय्यो निवासः ॥२४॥

---

प्रव०–[1]धीयते समिदग्नावनयेति धाय्या, निपातनादाय् आदेशः । अन्यत्र धेया । तथा [2]माङ् धातुः, मीयते येन तत् मानम्, निपातनात् मास्थाने 'पा' आय् (च) । मेयमन्यत् । [3]सम्, सन्नीयते येन तत् सान्नाय्यम्, समो दीर्घत्वम् । सन्नेयमन्यत् । [4]नि, 'चिग्ट् चयने', चिस्थाने कः । निचेयमन्यत् ॥२४॥

## परिचाय्योपचाय्या-ऽऽनाय्य-समूह्य-चित्यमग्नौ ॥५।१।२५॥

म० वृ०–'एतेऽग्नौ' निपात्यन्ते । [1]परिचाय्यः अग्निः, [2]उपचाय्यः अग्निः, [3]आनाय्यः अग्निः, [4]समूह्यः अग्निः, [5]चित्यः अग्निः ॥२५॥

---

प्रव०–[1]परि, चिग्ट्, परिचीयते (इति) परिचाय्यः, [2]उप, चि, उपचीयते (इति) उपचाय्यः, घ्यण्, आय् आदेशः; परिचेयमुपचेयमन्यत् । [3]आङ्, नी, घ्यण्, आय्, योऽग्निर्गार्हपत्यादानीयते स आनाय्यो लोकरूढया आहवनीय इति उच्यते । आहवनीयाग्निर्दक्षिणाग्निश्च निर्वाणो गार्हपत्यादेवानीयेते, अतो द्वावप्येकयोनी, गार्हपत्याग्निस्तु अरणिनिर्मथनादेव उत्पद्यते इति स गार्हपत्य आनाय्य इति नोच्यते । आनेयोऽन्यः । [4]तथा सम्, वह्, घ्यण्, वकारस्य ऊत्वम्, समूह्यते इति समूह्यः । [5]चिनोतेः क्यप्, चित्यः । चेयोऽन्यः ॥२५॥

## याज्या दानर्चि ॥५।१।२६॥

म० वृ०–यजेः करणे 'घ्यण्' निपात्यते, दानर्च्यर्थे । याज्या ॥२६॥

---

प्रव०–दानकाले ऋग्=दानर्ग्, तस्याम्, इज्यते-

---

★ अस्मिन् वाक्ये 'यतः ततः' शब्दयोः प्रयोगोऽसंगतः ।

ऽनया इति याज्या, 'त्यज्यजप्रवचः' (४।१।११८) इति गत्वाभावः ॥२६॥

## तव्या-ऽनीयौ ॥५।१।२७॥

म० वृ०–धातोः परौ 'तव्यः, अनीयः' इति प्रत्ययौ स्याताम्। कर्त्तव्यम्, करणीयं त्वया; कर्त्तव्यः, करणीयः कटः ॥२७॥

## य एच्चातः ॥५।१।२८॥

म० वृ०–[1]स्वरान्ताद्धातोः 'यः प्रत्ययः' स्यात्, धातोरन्त्याकारस्य च एत्। [2]दित्स्यम्, जेयम्, नेयम्, भव्यम्, लव्यम्; एच्चातः– देयम्, धेयम् ॥२८॥

अव०–[1]ऋवर्णव्यञ्जनान्ताद्धातोर्घ्यण् विहितोऽस्ति इति हेतोः पारिशेष्यात् स्वरान्ताद्धातोरित्युक्तम्। [2]दातुमिच्छति (इति) सन्, 'मिमीमादामित्स्वरस्य' (४।१।२०) इति इत्, दित्स्यते इति दित्स्यम् ॥२८॥

## शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात् ॥५।१।२९॥

म० वृ०–शक्यादिभ्यः पवर्गान्तधातुभ्यश्च 'यः' स्यात्, घ्यणोऽपवादः। शक्यम्, तक्यम्, चत्यम्, यत्यम्, शस्यम्, सह्यम्, यज्यम्, भज्यम्, पवर्गान्त,-तप्यम्, लभ्यम्, गम्यम्। यजेः 'त्यज्–यज्-प्रवचः' (४।१।११८) इति निषेधात्[1] भजेश्च [2]बाहुलकाद् घ्यणपि,-याज्यम्, भाग्यम्। कथमसिवध्यः,[3] मुशलवध्य इति? 'न जनवधः' (४।३।५४) इति वृद्धिनिषेधे घ्यणा भाव्यम् ॥२९॥

अव०–[1]अन्यथा घित्प्रत्ययाऽभावात् गत्वस्य प्राप्तिरेव नास्ति। [2]'बाहुलकात्', कोऽर्थः? 'बहुलम्' इति सूत्रोक्तबहुलाधिकारबलाद् घ्यणप्रत्ययोऽपि भवतीत्यर्थः। [3]असिना वध्यते (इति) घ्यण् ॥२९॥

## यमि-मदि-गदोऽनुपसर्गात् ॥५।१।३०॥

म० वृ०–उपसर्गरहितेभ्य एभ्यो 'यः' स्यात्। यम्यम्, मद्यम्, गद्यम्। पवर्गान्तत्वात्सिद्धे यमो नियमार्थः पाठः, अनुपसर्गादेव यथा स्यात्। बहुलवचनात्करणेऽपि,-[1]मद्यम्; नियम्यमिति सोपसर्गादपि ॥३०॥

अव०–अनुपसर्गादिति किम्? आयाम्यम्, प्रमाद्यम्, निगाद्यम्। कृत्याः कर्मभावे प्रसिद्धाः। [1]माद्यन्त्यनेन प्राणिन इति मद्यम्, बहुलाधिकारात् यप्रत्ययः ॥३०॥

## चरेराङस्त्वगुरौ ॥५।१।३१॥

म० वृ०–अनुपसर्गाच्चरेः आङ्पूर्वाच्चागुरावर्थे 'यः' स्यात्। चर्यं त्वया, चर्यो देशः; आचर्यं त्वया, आचर्यो देशः। अगुराविति किम्? आचार्यो गुरुः ॥३१॥

अव०–आङस्त्विति किम्? अभिचार्यम् ॥३१॥

## वर्योपसर्या-ऽवद्य-पण्यमुपेयर्तुमति-गर्ह्य-विक्रेये ॥५।१।३२॥

म० वृ०–वर्यादिशब्दा उपेयाद्यर्थेषु यथासङ्ख्यं 'यान्ता' निपात्यन्ते। [1]वर्या कन्या, [2]उपसर्या गौः, [3]अवद्यं पापम्, [4]पण्या गौः ॥३२॥

अव०–[1]उपेयेऽर्थे वर्या इति निपातः, 'वृङ् शू संभक्तौ' वृ. व्रियते इति वर्या, शतेन वर्या, सहस्रेण वर्या, कोऽर्थः? संभक्तव्या, संभक्तव्येत्यस्य कोऽर्थः? मैत्रीमापादनीया, मैत्रीं प्रापयितव्येत्यर्थः। वृत्यान्या, अत्र वृणोतेः क्यप्। तथा सूत्रे वर्या इति स्त्रीलिङ्गनिर्देशादिह न,- वार्यः ऋत्विक्, कश्चित् 'सुग्रीवो नाम वर्योऽसौ भवता चारुविक्रमः' (भट्टिकाव्यप्रयोगः) इति प्रयोगदर्शनात् पुल्लिङ्गेऽपीच्छति। सामान्यनिर्देशात् सूत्रे वर्या वर्य इति तदपि संगृहीतम्। शतेन वर्यः, सहस्रेण वर्यः; कोऽर्थः? मैत्रीमापादनीय इत्यर्थः। [2]उपपूर्वात् सर्त्तेः ऋतुमत्यर्थे यो निपात्यते, उपसर्या गौः, गर्भग्रहणे प्राप्तकाला इत्यर्थः, अन्यत्र उपसार्या मथुरा शरदि। [3]अवद्य-

मिति नञ्पूर्वाद् वदेर्यः गर्ह्येऽर्थे, अवद्यं पापम्, अवद्या हिंसा, गर्ह्या इत्यर्थः । अनुद्यमन्यत् । यस्तु अनूद्यमिति पठति तत्र अनुवदनम्=अनूत्, अनूदि साधुः (इति) 'तत्र साधौ' (७।१।१५) यः । [४]पणेर्यो विक्रेयेऽर्थे– पण्यम्, पण्यः कम्बलः, पण्या गौः, विक्रेया इत्यर्थः । अन्यत्र पाण्यः साधुः ॥३२॥

## स्वामि-वैश्येऽर्यः ॥५।१।३३॥

म० वृ०–अर्तेः स्वामिनि वैश्ये चार्थे 'यः' स्यात् । अर्यः स्वामी, अर्यो वैश्यः ॥३३॥

## वह्यं करणे ॥५।१।३४॥

म० वृ०–वहेः करणे [१]'यः' स्यात् । [२]वह्यं शकटम्, वाह्यमन्यत् ॥३४॥

अव०–[१]यो निपात्यते । [२]वहन्ति तेन इति वह्यम् ॥३४॥

## नाम्नो वदः क्यप् च ॥५।१।३५॥

म० वृ०–अनुपसर्गान्नाम्नः पराद्वदेः 'क्यप् यश्च प्रत्ययौ' भवतः । ब्रह्मणा उद्यते (इति) ब्रह्मोद्यम्, ब्रह्मवद्यम् । नाम्न इति किम् ? वाद्यम् । अनुपसर्गादित्येव– अनुवाद्यम् ॥३५॥

अव०–'नाम्नो वदे'ति सूत्रे क्यप्ककारः कित्कार्यार्थः, पकार उत्तरसूत्रे 'हत्याभूयं भावे' (५।१।३६) इत्यत्र नकारस्थाने तोऽन्तो भवति इति कार्यार्थः ॥३५॥

## हत्या-भूयं भावे ॥५।१।३६॥

म० वृ०–अनुपसर्गान्नाम्नः परौ 'हत्या, भूय' इति शब्दौ 'भावे क्यबन्तौ निपात्येते, तोऽन्तादेशश्च' । ब्रह्मणो वधः=ब्रह्महत्या,[१] तथा [२]देवभूयं गतः । भाव इति किम् ? श्वघात्या वृषली । नाम्न इत्येव,– हतिः, घातः, भव्यम्, हन्तेर्भावे न घ्यण्, अनभिधानात्, तथा च बहुलाधिकारः[३] ॥३६॥

अव०–[१]स्त्रियां हन्, क्यप्, तोऽन्तश्च । एवं स्त्रीहत्या, भ्रूणहत्या, गौहत्या । [२]तथा नपुंसके भवतेर्भावे क्यप्, (एवम्) ब्रह्मभूयं (गतः), देवत्वं ब्रह्मत्वं गत इत्यर्थः 卐 । [३]एतदर्थमेव च बहुलाधिकारोऽनुवर्त्तित इत्यर्थः ॥३६॥

## अग्निचित्या ॥५।१।३७॥

म० वृ०–अग्नेः पराच्चिनोतेः स्त्रीभावे 'क्यप्' निपात्यते । अग्निचित्या । अग्नेश्चयनमिति वाक्यम् ॥३७॥

## खेयमृषोद्ये ॥५।१।३८॥

म० वृ०–अनुपसर्गान्नाम्न इति वचनं निवृत्तम्[१] । खेयमृषोद्यौ 'क्यबन्तौ' निपात्येते । खेयम्, उत्खेयम् । मृषा उद्यते=मृषोद्यम् ॥३८॥

अव०–[१]निपातनस्येष्टविषयत्वात् । खन्यते (इति) खेयम्, उत्खन्यते(इति उत्खेयम्) । खनेर्घ्यणोऽपवादः क्यप्, अन्त्यस्वरादेरेकारश्च निपात्यते । तथा मृषापूर्वाद्वदतेः (पक्षे) ये प्राप्ते 'नित्यं क्यप् एव' विधीयते, न तु 'नाम्नो वद'० इत्यनेन क्यप्यप्रत्ययौ । मृषोद्यम्, मृषावद्यम् । ※ तो न भावेति योऽवतीत्यर्थः ॥३८॥

## कुप्य-भिद्योद्ध्य-सिध्य-तिष्य-पुष्य-युग्याऽऽज्य-सूर्यं नाम्नि ॥५।१।३९॥

म० वृ०–एते संज्ञायां 'क्यबन्ताः' निपात्यन्ते । [१]कुप्यं धनम्, [२]भिद्य उध्यो नदः [३]सिध्यः, [४]तिष्यः, पुष्यः,[५] [६]युग्यं वाहनम्, [७]आज्यं घृतम्, [८]सूर्यो रविः ॥३९॥

卐 वृत्तिस्थस्य 'देवभूयं गतः' इत्यस्य 'देवत्वं गतः' इति, अवचूरिस्थस्य 'ब्रह्मभूयं गतः' इत्यस्य 'ब्रह्मत्वं गतः' इत्यर्थः ।

※ 'तो' इत्यादिपाठोऽशुद्धः ।

अव०–[1]'गुपधातोः गोपाय्यते तत् इति कुप्यम्, धनेऽर्थे निपातनात् गस्य ककारः। गोप्यमन्यत् । [2]भिदेः तथा उज्झधातोर्नदे=द्रहे वाच्ये क्यप्, झकारस्य धः, भिनत्ति कूलानीति भिद्यो नदः, उज्झत्युदकमिति उध्यः नदः । सिधितिषिपुषिधातुभ्यो नक्षत्रे वाच्ये क्यप्, तिषेर्त्रकारो लुप्यते, [3]सिध्यन्ति अस्मिन् कार्याणि (इति) सिध्यः, [4]त्वेषन्त्यस्मिन् कार्याणि (इति) तिष्यः, [5]पुष्यन्त्यस्मिन् कार्याणि इति पुष्यो नक्षत्रम्, अन्यत्र सेधनः, त्वेपणः, पोषणः। [6]'युग्यम्', अत्र युज्, युजन्ति तत् इति युग्यं वाहनं गजाश्वादि, क्यप्, गत्वं वाहनेऽर्थे । योग्यमन्यत् । [7]आङ् (-पूर्वाद्) अञ्ज्धातोः घृतेऽर्थे (क्यप्), आञ्जन्त्यनेनेति आज्यं घृतम्। आञ्जनमन्यत्। [8]'सृ' गतौ (इति) सृ, सरति कर्मसु लोकानिति सूर्यः, क्यप्, ऋकारस्य ऊर्, देवतार्थे सूर्य इति निपातः; अथवा सुवतेः सुवति कर्मसु लोकानिति सूर्यो रविः, क्यप् रोऽन्तश्च। बहुलाधिकारात् निपातनसामर्थ्याद्वाऽनुक्तोऽपि कारकविशेषो निपातनेषु गम्यते ॥३९॥

## दृ-वृग्-स्तु-जुषेति-शासः ॥५।१।४०॥

म० वृ०–एभ्यः 'क्यप्' स्यात् । आदृत्यः, प्रावृत्यः, स्तुत्यः, अवश्यस्तुत्यः, जुष्यः, [1]इत्यः, अधीत्यः, [2]शिष्यः। [3]आशास्तेस्तु– 'आशास्यमन्यत् पुनरुक्तभूतम्' (रघुवंशकाव्यप्रयोगः) । कथम् ? [4]'अनिवार्यो गजैरन्यैः स्वभाव इव देहिनाम्', सम्भक्तेरन्यत्रापि वृङ् ॥४०॥

अव०–[1]'दृवृग्०' इति सूत्रे एतीति इणिकोर्ग्रहणम्,– इत्यः, अधीत्यः । इं दूं द्रं इत्ययतेः इकश्च न भवति,– उपेयम्, अध्येयम्। इकोऽप्यध्येयम् (इति) केचित्। 'इङ् च् गतौ' इत्यस्याः अप्युपेयमिति भवति । [2]'शासूक् (अनुशिष्टौ' इति) शास्, शिष्यः । [3]'आशास्तेस्तु', आङः शासूकि (इच्छायाम्) इत्यस्य-'श्रेयांसि सर्वाण्यधिजग्मुषस्ते; पुत्रं लभस्वात्मगुणानुरूपं, भवन्तमीड्यं भवतः पितेव' (अस्य श्लोकस्य) प्रथमं पदम्- 'आशास्यमन्यत् * पुनरुक्तभूतम्। [4]'अनिवार्य' इत्यत्र वृङ् श् सम्भक्ताविलस्य प्रयोगः, परं वृङ् धातुरत्रोपसर्गबलात् निषेधे वर्त्तते, न सम्भक्तौ ॥४०॥

## ऋदुपान्त्यादकृपि-चृदृचः ॥५।१।४१॥

म० वृ०-ऋकारोपान्त्याद्धातोः कृपि-चृति ऋचिवर्जितात् 'क्यप्' स्यात्। वृत्यम्, वृध्यम्। अकृपीत्यादि किम् ? कल्प्यम्, चर्त्यम्, अर्च्यम् ॥४१॥

## कृ-वृषि-मृजि-शंसि-गुहि-दुहि-जपो वा ॥५।१।४२॥

म० वृ०–एभ्यो 'वा क्यप्' स्यात् । कृत्यम्, कार्यम्; वृष्यम्, वर्ष्यम्; मृज्यम्, मार्ग्यम्; शस्यम्, शंस्यम्; गुह्यम्, गोह्यम्; दुह्यम्, दोह्यम्; जप्यम्, जाप्यम् ॥४२॥

अव०–'जप्यम्', अत्र क्यप्, 'जाप्यम्', अत्र क्यबभावपक्षे घ्यण् एव विधीयते विकल्पबलात्। 'शकि-तकि'० (५।१।२९) इत्यनेन पवर्गान्तमाश्रित्य यप्रत्ययो न क्रियते, विशेषाभावात्। क्यपि जप्यम् ये च जप्यम् इति विशेषो न ज्ञायते ॥४२॥

## [1]जि-विपू-न्यो हलि-मुञ्ज-कल्के ॥५।१।४३॥

म० वृ०–जयतेर्विपूर्वपूनीभ्यां च यथासङ्ख्यं हलिमुञ्जकल्केषु कर्मसु वाच्येषु 'क्यप्' स्यात्। [2]जित्या जित्यो वा हलिः, [3]विपूयो मुञ्जः, [4]विनीयः कल्कः ॥४३॥

अव०–[1]पूश्च नीश्च=पून्यौ, विपूर्वौ पून्यौ=विपून्यौ, जिश्च विपून्यौ च=जिविपूनि, तस्मात्। [2]जीयते निपुणेन (इति) जित्या जित्यो वा हलिः, महद्धलं हलिरुच्यते। [3]पूङ्, पूग् वा, विपवितव्य इति विपूयः, मुञ्जस्तृणविशेषः। [4]तैलादिना कर्त्रा

* आशास्यमन्यत् पुनरुक्तभूतं, श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं, भवन्तमीड्यं भवतः पितेव ॥ इति रघुवंशे संपूर्ण श्लोकः ।

आत्मनो मध्ये विनेतव्यः, कोऽर्थः ? प्रापयितव्य इति विनीयः, कल्कस्त्रिफलादिचूर्णम् ॥४३॥

## [1]पदाऽ-स्वैरि-[2]बाह्या-[3]पक्ष्ये[4]ग्रहः ॥५।१।४४॥

म० वृ०—पदाद्यर्थेषु ग्रहः 'क्यप्' स्यात् । घ्यणोऽपवादः । [5]प्रगृह्यं पदम्, ● यत्स्वरेण न सन्धीयते, यथा- 'अग्नी इति' । [6]अवगृह्यं पदम् । [7]अस्वैरिणि,--गृह्याः कामिनः रागादिपरवशा इत्यर्थः । [8]बाह्यायाम्,-- नगरगृह्या सेना, बाह्येत्यर्थः । पक्ष्ये,-त्वद्गृह्यः, *'गुणगृह्या वचने विपश्चितः'; तत्पक्षाश्रिता इत्यर्थः । एष्विति किम् ? ग्राह्यं वचः ॥४४॥

अव०--[1]विभक्त्यन्तं पदम् । [2]अस्वैरी परवशः । [3]बाह्या बहिर्भवा । [4]पक्ष्यो वर्ग्यः सम्बन्धिजनः । [5]प्रगृह्यते=विशेषेण ज्ञायते तत् प्रगृह्यं पदम् । [6]तथा अवगृह्यते=नानावयवसात् क्रियते तत् अवगृह्यं पदम्, यथा पचतीति पदे पच्, शव्, तिव् इत्यवयवाः । [7]तथा अस्वैरिणि,- गृह्यन्ते=ज्ञायन्ते परतन्त्रतया परवशतया वा इति गृह्याः कामिनः । [8]तथा बाह्या (इति) स्त्रीलिङ्गनिर्देशो लिङ्गान्तरेऽनभिधानख्यापनार्थः ★ । अथ पक्ष,-- तत्र सम्बन्धी गृह्य इति वाक्यम्, त्वद्गृह्यः ॥४४॥

## भृगोऽसंज्ञायाम् ॥५।१।४५॥

म० वृ०--भृगोऽसंज्ञायां 'क्यप्' स्यात् । भृत्यः । असंज्ञायामिति किम् ? भार्यो नाम क्षत्रियः ॥४५॥

अव०--भ्रियते इति भृत्यः, पोष्य इत्यर्थः ।४५।

## समो वा ॥५।१।४६।

म० वृ०--सम्पूर्वाद् भृगो 'वा क्यप्' स्यात् । सम्भृत्यः, सम्भार्यः ॥४६॥

## ते कृत्याः ॥५।१।४७॥

म० वृ०—ते="घ्यण् तव्य अनीय य क्यप्" इति पञ्चप्रत्ययाः कृत्यसंज्ञाः स्युः । कृत्यप्रदेशाः 'तत्साप्यानाप्य०' (३।३।२१) इत्यादयः ॥४७॥

अव०--कृत्यप्रत्ययाः पञ्चापि प्रायः कर्मभावे एव भ.............. (वन्ति, "तत्साप्यानाप्यात् कर्मभावे कृत्यक्त-)खलर्थाश्च" इति वचनात्; बहुलमिति वचनात् अन्यत्रापि कारके भवतीत्यर्थः ॥४७॥

## णक-तृचौ ॥५।१।४८॥

म० वृ०--धातोः परौ 'णकतृचौ प्रत्ययौ' स्याताम् । कृत्वात्कर्त्तरि भवतः । णकारो वृद्ध्यर्थः । पाठकः, पठिता ॥४८॥

## अच् ॥५।१।४९॥

म० वृ०--'धातोरच्' स्यात्, कर्त्तरि । करः, पठः ॥४९॥

## लिहादिभ्यः ॥५।१।५०॥

म० वृ०--'लिहादिधातुभ्योऽच्' स्यात् । [1]पृथग्योगो बाधकबाधनार्थः[2] । लेहः, शेषः, [3]मेघः, सेवः, देवः, देहः, दर्शः, एषु नाम्युपान्त्यलक्षणं कं दृशेस्तु वा शं बाधते । [4]पारापतः, [5]कद्वदः, कन्यावरः, रघूद्वहः; एष्वणं बाधते । [6]बहुवचनमाकृतिगणार्थम् ॥५०॥

अव०--[1]पूर्वेण सिद्धेऽस्यारम्भादित्यर्थः । [2]उत्सर्गतः सर्वत्राच्, तस्य बाधको नाम्युपान्त्योक्तः कप्रत्ययः शप्रत्ययो वा; तस्यापि 'लिहादिभ्य' इदं सूत्रं बाधनं ज्ञेयम् । [3]मिहं सेचने, मेहतीति मेघः, लिहादिभ्योऽच्, 'न्यङ्कुद्गमेघादयः' (४।१।१२) इति

● परेणासंधीयमानस्य पदस्य प्रगृह्यमिति संज्ञा विहिता ।

* किराते भारविकविप्रयोगोऽयम् । सम्पूर्णश्लोक एवम्—

इष्टमिष्टगुणाय रोचतां, रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिःस्पृहा, गुणग्राह्या वचने विपश्चितः ॥

★ स्त्रियामेवास्य प्रयोगो भवति न पुंलिङ्गादावित्यर्थः ।

निपातनात् ह्रस्य घः। [४]पारमापततीति। [५]कुत्सितं वदतीति 'रथवदे' (३।२।१३१) इति कदादेशः। [६]बहुवचनमाकृतिगणार्थम्, तेन नदी, मही, भषी, प्लवी, गरी, चरी, तरी, दरी, सूदी, देवी, सेवी, चोरी, गोही; एते शब्दाः अजन्ता गौरादौ द्रष्टव्याः ॥५०॥

## ब्रुवः ॥५।१।५१॥

म० वृ०—ब्रुधातोरचि 'ब्रुव' इति निपात्यते ब्राह्मणब्रुवः ॥५१॥

## नन्द्यादिभ्योऽनः ॥५।१।५२॥

म० वृ०—नन्द्यादिधातुभ्यो नामगणदृष्टेभ्यः 'अनः' प्रत्ययः स्यात्। [१]नन्द्यादिभ्यो ण्यन्तेभ्यः संज्ञायाम् नन्दन इत्यादि। [२]सह्यादिभ्यः संज्ञायामेवाण्यन्तेभ्यः सहनः, रमणः [३]इत्यादि। [४]समः क्रन्द्यादिभ्यः संज्ञायाम् [५]संक्रन्दनः, [६]सङ्कर्षणः, [७]संहर्षणः। कर्मणो दमि-अर्दि-नाशि-सूदिभ्यः [८]सर्वदमनः इत्यादि। [९]नर्द्यादिभ्यः नर्दन इत्यादि। बहुवचनमाकृति(गणार्थम्) ॥५२॥

अव०—[१]नन्दि-वाशि-मदि-दूषि-साधि-वर्धि-शोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायामनप्रत्ययः, यथा नन्दनः पुत्रो देवोद्यानं वा, वाशनो नाम ऋषिः, मदनः कामः, दूषणो नाम राक्षसः, साधनो नाम राजा, वर्द्धनो नाम ऋषिः, शोभन ऋषिः, रोचन इति चन्द्रस्य संज्ञा। नन्द्यादयो नन्दनरमणेत्यादिनामगणशब्देभ्योऽपोद्धृत्य वेदितव्याः। ते च नन्द्यादयः सप्रत्ययपाठाः विशिष्टविषयार्थो नियतरूपग्रहणार्थाः एव ग्राह्याः, तेन ये ये निरुपसर्गाः यदुपपदाः यदुपसर्गाः पठ्यन्ते तेभ्यस्तथैव अनप्रत्ययो भवतीत्यर्थः। [२]सहि-रमि-दमि-रुचि-कृति-तपि-तृदि-दहि-यु-पू-लूभ्यः संज्ञायामेवाण्यन्तेभ्यः। [३]'रमणः', आदिशब्दात् तथाहि उदाहरणानि,— दमनः, रोचनः, विरोचनः, विकर्त्तनः, तपनः, प्रतर्दनः, दहनः, यवनः, पवनः, लवणः; निपातनाण्णत्वम्। * भर्त्ता, ऋषिः, चन्द्रः, अर्कः, बलिः पिता वा, आदित्यः, ऋषिः, अग्निः, राजा, वायुः, रामसुतः क्षारो वा। [४]समः क्रन्दि-कृषि-हृषिभ्यः संज्ञायामेवानप्रत्ययः। [५]इन्द्रः। [६]बलभद्रः। [७]ऋषिः। [८]'सर्वदमनः', आदिशब्दात् जनार्दनः वित्तविनाशनः; मधुसूदनः; ※ राजा, हरिः, राजा मदनश्च। असंज्ञायामपि,— रिपुदमनः, कुलदमनः, परार्दनः, रोगनाशनः, अरिसूदनः इति। [९]नर्दि-भीषि-भूषि-दर्पि-जल्पिभ्योऽनः— नर्दयतीति नर्दनः, विभीषयतीति विभीषणः, भूषयतीति भूषणः, दर्पयतीति दर्पणः, जल्पतीति जल्पनः ॥५२॥

## ग्रहादिभ्यो णिन् ॥५।१।५३॥

म० वृ०—ग्रहादिभ्यो 'णिन् प्रत्ययः' स्यात्। ग्रहादिराकृतिगणः। ग्राही, स्थायी, मन्त्री। उपावाभ्यां रुधः,- उपरोधी, अवरोधी। अपाद् राधः,- [१]अपराधी। नञ्पूर्वात् स्वरान्तादचित्तवत्कर्तृकात्,- अकारी घर्मस्य बालातपः, एवमहारी शीतस्य शिशिरः। चित्तवत्कर्तृकान्न णिन्,— अकर्त्ता कटस्य चैत्रः। केचिदनञ्पूर्वादपीच्छन्ति णिनम्,- कारी, [२]हारी ॥५३॥

अव०—[१]'अपराधी' इत्यस्याग्रे उदः सहिदसिभासिभ्यो णिन्, उत्सहते इत्युत्साही, उद्दासी, उद्भासी। तथा नेः श्रु-शी-विश-वस-वप-रक्षिभ्यो णिन्,— निशृणोतीति निश्रावी, निशायी, निवेशी, निवासी, निवापी, निरक्षी। तथा नञो व्याहृ-संव्याहृ-संव्यवहृ-याचि-व्रज-वद-वसिभ्यो णिन्,- न व्याहरतीति अव्याहारी, एवमसंव्याहारी, असंव्यवहारी, न याचते (इति) अयाची, अव्राजी, न

* अवचूरौ प्रदर्शितानां 'रमणः दमनः' इत्यादिदृष्टान्तानामनुक्रमेणार्थं प्रदर्शयति। रमणो भर्ता दमन ऋषिरित्येवं योजनीयम्।

※ राजा इत्यादिना सर्वदमनादिदृष्टान्तानां चतुर्णामनुक्रमेणार्थं ज्ञापयति। सर्वदमनो राजा, जनार्दनो हरिरित्येवमग्रेऽपि ज्ञेयम्।

वदतीति अवादी, अवासी । [२]'हारि' इत्यस्याग्रे व्यभिभ्यां भुवोऽतीते णिन्,-- विभवति स्म (इति) विभावी, अभिभवति स्म (इति) अभिभावी । तथा विपरिभ्यां भुवो ह्रस्वश्च वा,-- विभवतीति विभावी, विभवी; परिभावी, परिभवी । वेः शीङ् षिगोर्देरो णिन् ह्रस्वश्च,-- गुणैश्चित्ते विशेते इति विशयी, गुणैश्चित्ते विसिनोतीति विषयी देशः, निपातनात् षत्वम् ॥५३॥

## नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः ॥५।१।५४॥

म० वृ०--नाम्युपान्त्येभ्यः धातुभ्यः प्रीकॄगॄज्ञाभ्यश्च 'कः प्रत्ययः' स्यात् । [१]विक्षिपः, विलिखः, बुधः, युधः, कृशः; [२]प्रियः, [३]किरः, उत्किरः; [४]गिलः, निगिलः, ज्ञः[५] । काष्ठभेद इत्यत्र परत्वादण् ॥५४॥

अव०--ककारः कित्कार्यार्थः । [१]विक्षिपतीति । [२]प्रीणातीति प्रियः । [३]किरतीति किरः । [४]गिरतीति गिलः ❀ । [५]जानातीति ज्ञः ॥५४॥

## गेहे ग्रहः ॥५।१।५५॥

म० वृ०--गेहार्थे ग्रहः 'कः' स्यात् । गृहम्, गृहाणि, गृहाः, पुंसि बहुवचनान्त एव, उपचाराद्दारा गृहाः ॥५५॥

## उपसर्गादातो डोऽश्यः ॥५।१।५५॥

म० वृ०--उपसर्गात्परात् श्येङ्वर्जादाकारान्ताद्धातोः 'डः प्रत्ययः' स्यात् । आह्वयतीति आह्वः, प्रह्वः, [१]प्रस्थः, [२]सुग्लः, व्यालः, [३]सुरः । केनैव सिद्धे डविधानं वृद्धिनिषेधार्थम् । उपसर्गादिति किम्? णे [४]दायः । अश्य इति किम्? णे [५]अवश्यायः । "पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्" इति णो बाध्यते, नाण्,-- गोसंदायः[६] ॥ ५६ ॥

अव०--[१]प्रतिष्ठतीति । [२]सुग्लायतीति । [३]सुष्ठु राजते । [४]ददातीति दायः, (एवं दधातीति) धायः, 'तन्व्यधीण्श्वसातः' (५।१।६४) इत्यनेन णः, 'आत ऐः कृञ्चौ' (४।३।५३।इति) ऐः । [५]"श्यैङ् गतौ' अवश्यायतीति अवश्यायः, तन्व्यधीण्० (५।१।६४) इति णः,(एवं)प्रतिश्यायः। [६]गां संददातीति "कर्मणोऽण्" (५।१।७२), (एवं) वडवासन्दायः ।५६।

## व्याघ्रा-ऽऽघ्रे प्राणि-नसोः[१] ॥५।१।५७॥

म० वृ०--'व्याघ्र आघ्रा' इति शब्दौ जिघ्रतेर्यथासङ्ख्यं प्राणिनि नासिकायां चार्थे 'डान्तौ' निपात्येते । [२]व्याघ्रः प्राणी, [३]आघ्रा नासिका । शप्रत्ययापवादः ॥५७॥

अव०--[१]"दन्तपादनासिका' (२।१।१०१) इत्यादिना नासिकास्थाने नस् । [२]विविधमाजिघ्रति इति व्याघ्रः । [३]आजिघ्रतीति आघ्रा ॥५७॥

## घ्रा-ध्मा-पा-ट्धे-दृशः शः ॥५।१।५८॥

म० वृ०--एभ्यः 'शः' स्यात् । जिघ्रतीति जिघ्रः, उज्जिघ्रः, [१]धमः, [२]पिबः, [३]धयः, [४]पश्यः, विपश्यः, [५]उत्पश्यः । ट्धे (इति) टकारो ङ्यर्थः, (तेन) उद्धयी, विधयी ॥५८॥

अव०--शकारः प्रत्ययः शित्कार्यार्थः । [१]धमतीति । [२]पिबतीति । [३]धयति । [४]पश्यतीति । [५]उर्ध्वं पश्यति ॥५८॥

## साहि-साति-वेद्युदेजि-धारि-पारि-चेतेरनुपसर्गात् ॥५।१।५९॥

म० वृ०--एभ्य उपसर्गरहितेभ्यो ण्यन्तेभ्यः 'शः प्रत्ययः' स्यात् । साहि,-- साहयतीति साहयः; [१]सातयः, वेदयः, [२]उद्देजयः, [३]धारयः, [४]पारयः, चेतयः । छत्रधार इति परत्वादण् ॥५९॥

अव०--[१]सातिः सौत्रो धातुः, सातयतीति सातयः । [२]'एजृ कम्पने' इति परस्मैपदी, 'एजृङ् भ्रेजृङ् भ्राजि दीप्तौ' इत्यात्मनेपदी, उदेजन्तमुदे-

❀ "नवा स्वरे" (२।३।१०२) इत्यत्र व्यवस्थितविभाषाश्रयणान्नित्यं लत्वम् ।

जमानं वा प्रकुरुते । ³भृ, णिग्, धारयतीति । ⁴पारयतीति, पार तीरण् कर्मसमाप्तौ । अनुपसर्गादित्येव--प्रसाहयिता, तृच् ॥५९॥

### लिम्प-विन्दः* ॥५।१।६०॥

म० वृ०--अनुपसर्गाभ्यां लिम्पिविन्दिभ्यां 'शः' स्यात् । लिम्पतीति लिम्पः, विन्दः ॥६०॥

### ¹नि-गवादेर्नाम्नि ॥५।१।६१॥

म० वृ०--यथासङ्ख्यं निपूर्वाल्लिम्पेः गवादिपूर्वाच्च विन्देर्नाम्नि [संज्ञायां] 'शः' स्यात् । निलिम्पतीति निलिम्पा नाम देवाः, गां विन्दतीति गोविन्दः, कुविन्दः, ²अरविन्दः, कुरुविन्दः ॥६१॥

---

अव०--¹निश्च गवादिश्च । ²अरविन्द इति पुंसि चक्रावयव उच्यते, अरविन्दमिति च क्लीबे कमलमुच्यते ॥६१॥

### वा ज्वलादि-दु-नी-भू-ग्रहा-ऽऽस्रोर्णः ॥५।१।६२॥

म० वृ०--¹ज्वलादिगणाद्, दुनीभूग्रहि(भ्यः)आपूर्वस्रवतेश्चानुपसर्गात् वा 'णः प्रत्ययः' स्यात् । ज्वलः, ज्वालः; चलः, चालः; 'निपातः, उत्कोश' इति बहुलाधिकारात्² ; दवः, दावः; नयः, नायः; भवः, भावः । तथा व्यवस्थितविभाषेयम्, तेन ग्राहो मकरादिः, ग्रहः सूर्यादिः ; आस्रवः, आस्रावः । अनुपसर्गादित्येव,-प्रज्वलः, प्रदवः, प्रणयः, प्रभवः, प्रग्रहः, सर्वत्र अच् ॥६२॥

---

अव०--¹'ज्वल दीप्तौ' इत्यादयः 'षहि मर्षणे' इति पर्यन्ता भ्वादौ ज्वलादयः ३१धातवः पठ्यन्ते । ²सोपसर्गादपि णप्रत्यय इत्यर्थः ॥६२॥

### अवह-सा-संस्रोः ॥५।१।६३॥

म० वृ०--अवपूर्वाभ्यां हृसाभ्यां सम्पूर्वाच्च स्रवतेः 'णः' स्यात् । अवहारः, अवसायः, संस्रावः ॥६३॥

अव०--¹हृश्च सा च हृसौ ; अवात् हृसौ, सम्पूर्वः स्रु=संस्रु, अवहृसौ च संस्रु च, तस्मात् ॥६३॥

### तन्-व्यधीण्-श्वसा-ऽऽतः ॥५।१।६४॥

म० वृ०--तन्-व्यधि-इण्-श्वस्भ्य आदन्तेभ्यश्च 'णः' स्यात् । तानः, उत्तानः, अवतानः; व्याधः, प्रत्यायः, अन्तरायः; श्वासः, आश्वासः; आदन्त,-अवश्यायः, प्रतिश्याय इत्यपि; ग्लायः, म्लायः । ¹कथं ददः, दधः ? ददिदध्योस्त्वा सिद्धम् ॥६४॥

---

अव०--¹परैः 'दाङ्-धाञोर्वा' इति सूत्रं कृतम्, युष्माकं तु कथं सिद्ध्यति इति परप्रच्छा, तत्राह--ददिदध्योरिति ॥६४॥

### नृत्-खन्-रञ्जः शिल्पिन्यकट् ॥५।१।६५॥

म० वृ०--एभ्यः ¹शिल्पिनि कर्त्तरि 'अकट्प्रत्ययः' स्यात् । नर्त्तकः, नर्त्तकी²; खनकः, खनकी; ³रजकः, रजकी । शिल्पिनीति किम् ? नर्त्तिका, खानकः, रञ्जकः ॥६५॥

---

अव०--¹शिल्पं कर्मसु कौशलम्, शिल्पमस्यास्तीति शिल्पी, तस्मिन् । ²पुल्लिङ्गे णकप्रत्ययाकट्प्रत्यययोर्विशेषो न लक्ष्यते, स्त्रीलिङ्गे तु अकटः टित्त्वात् ङीप्रत्यये विशेष उपलभ्यते इति रूपद्वयं (प्रयुक्तम्) । ³रजकः इत्यत्र 'अकट्घिनोश्च रञ्जेः' (४।२।५०) इत्यनेन नलोपः ॥६५॥

### गस्थकः ॥५।१।६६॥

म० वृ०--गायतेः शिल्पिनि 'थकः प्रत्ययः' स्यात् । गाथकः ॥६६॥

---

अव०-- 'गाङ् गतौ' इत्यस्य प्रत्यये सति शिल्पी न गम्यते इति 'कै गै रै शब्दे' इति गायतेर्ग्रहणं 'गस्थकः' इति सूत्रे ॥६६॥

### टनण् ॥५।१।६७॥

म० वृ०--गायतेः शिल्पिनि कर्त्तरि 'टनण्प्रत्ययः' स्यात् । गायनः, गायनी ॥६७॥

---

* लिम्पिसाहचर्यात् विन्देस्तौदादिकस्य ग्रहणम्, न तु 'विदु अवयवे' इत्यस्य ।

अव०-टनण्प्रत्यये टकारो ङ्यर्थः, णकारः 'आत ऐः कृञ्ञौ' (४।३।५३) इति सूत्रे ऐकारार्थः । योगविभाग उत्तरार्थः ॥६७॥

## हः काल-व्रीह्योः ॥५।१।६८॥

म० वृ०-हाको हाङो वा कालव्रीह्योः कर्त्रोः 'टनण्' स्यात् । [१]हायनो वत्सरः, [२]हायना नाम व्रीहयः ॥६८॥

अव०-[१]'ओहांक् त्यागे' (इति) हाक्, 'ओहांङ्क् गतौ' (इति) हाङ्, उभावप्यदादौ जुहोत्यादौ, वश (? यथा) क्रमं 'जहाति, जिहीते' इति प्रयोगौ; जहाति जिहीते वा भावान् इति हायनः । [२]जहत्युदकं दूरोत्थानात् इति हायना व्रीहयः, जिहते वा द्रुतम् इति हायनाः ॥६८॥

## प्रु-सृ-ल्वोऽकः साधौ ॥५।१।६९॥

म० वृ०-एभ्यः साध्वर्थे वर्त्तमानेभ्यः 'अकः प्रत्ययः' स्यात् । प्रवकः, सरकः, लवकः । साधाविति किम् ? प्रावकः, सारकः, लावकः ॥६९॥

अव०-'क्युंङ् ज्युंङ् जुंङ् प्रुङ् प्लुङ् गतौ' (इति) प्रु, साधु प्रवते इति प्रवकः, साधु सरति (इति) सरकः, साधु लुनातीति लवकः ॥६९॥

## आशिष्यकन् ॥५।१।७०॥

म० वृ०-[१]आशिषि गम्यमानायां धातोः 'अकन् प्रत्ययः' स्यात् । जीवतादिति आशास्यमानो जीवकः, [२]नन्दकः, भवतादिति आशास्यमानः भवकः । आशिषीति किम् ? जीविका, नन्दिका, भाविका [णकः] । नकारः 'इच्चापुंसोऽनित्'० (२।४।१०७) इत्यत्र इत्वव्युदासार्थः । तेन जीवका, नन्दका, भवका ॥७०॥

अव०-[१]इष्टस्य प्रार्थनमाशीः, तस्यां गम्यमानायाम् । [२]नन्दतादित्याशास्यमानो नन्दकः । नकार इच्चेत्याद्यक्षराणां भावार्थो लिख्यते,-- 'इच्चापुंसो'० इति सूत्रेण इत्वं विधीयते, न नकारानुबन्धस्य प्रत्ययस्याऽवयवभूते कि=ककारे आप्परे ।★पर न इत्यक्षराणि वृत्तौ अयमधिकारः । परं जीवका इत्यादौ 'अस्यायत्तत्क्षिपकादीनाम्' (२।४।१११) इत्यनेन इत्वप्राप्तिः, परमनित्कीत्येव इति व्यावृत्तिबलात् न इत्वं साध्यते, तत्रापि जीवका नन्दका इति प्रयोगद्वयमिति कारणात् जीवका नन्दका भवका इत्येव प्रयोगाः, न जीविका इत्यादयः, (न) इत्वमित्यर्थः ॥७०॥

## तिक्कृतौ नाम्नि ॥५।१।७१॥

म० वृ०-आशीर्विषये नाम्नि [संज्ञायां] धातोः 'तिक् कृतश्च सर्वे प्रत्ययाः' भवन्ति । [१]शम्यात् (इति) शान्तिः । कृतः,-- [२]वीरो भूयादिति वीरभूः, क्विप् । [३]देवभूतिः, [४]कुमारनीतिः, [५]मित्रवृद्धिः, क्तिः । [६]देवा एनं देयासुः (इति) देवदत्तः, क्तः । [७]गङ्गा एनं मिद्यात् (इति) गङ्गामित्रः, त्रक् । [८]वर्द्धिषीष्ट (इति) वर्द्धमानः ॥७१॥

अव०-[१]'शमू दमूच् उपशमे', शम्यात् इति शान्तिः, (एवं) तन्यात् इति तन्तिः, सन्यात् (इति) सन्तिः, रमतामित्येवमाशंसितः रन्तिः एषु सर्वत्र तिक् प्रत्ययः । अथ कृतः,- [२]वीरो भूयादिति वीरभूः, एवं मित्रभूः, क्विप् । अग्निरस्य भूयात् (इति) अग्निभूतिः, [३]देवोऽस्य भूयाद् (इति) देवभूतिः, एवमश्वभूतिः, सोमभूतिः एषु सर्वत्र भूधातुः (? तोः) क्तिः । [४]कुमारोऽस्य दुरितानि नयतामित्येवमाशंसितः, कुमार, अग्रे 'णींग् प्रापणे', ततो कुमारोऽस्येति वाक्यम् । [५]'ऋधूङ् वृधूङ् वृद्धौ' (इति) वृध् ,मित्रमेनं वर्द्धिषीष्ट इति वाक्यम् ,मित्रवृद्धिरिति उदाहरणम् , सर्वत्र क्तिप्रत्ययः । [६]देवा एनं देयासुः इति वाक्यम् ,देव, दा,यज्ञ एनं देयात् इति वाक्यम् , यज्ञ, दा, 'देवदत्तः यज्ञदत्त' इति प्रयोगौ, अत्र क्तप्रत्ययः, 'दत्' (४।४।१०) इति सूत्रेण दास्थाने दत् । (एवं) विष्णुरेनं श्रूयात् इति विष्णुश्रुतः, क्तः । [७]गङ्गा, 'ञिमिदाच् स्नेहने'-मिद्, गङ्गा एनं मिद्यात् (इति)

★ 'पर न' इत्यादिपाठोऽशुद्धः ।

गङ्गामित्रः, त्रक्प्रत्ययः । [८]वृध् , वर्द्धिषीष्ट इति वर्द्धमानः ॥७१॥

## कर्मणोऽण्[१] ॥५।१।७२॥

म० वृ०—[२]कर्मणः पराद्धातोः 'अण् प्रत्ययः' स्यात् । अजाद्यपवादः । [निर्वर्त्यात्-] कुम्भकारः । विकार्यात्-] शरलावः । [प्राप्यात्-] सूत्रधारः, भारवाहः, द्वारपालः । आदित्यं पश्यतीत्यादौ [३]प्राप्यात्कर्मणोऽनभिधानान्नाण् । [४]निर्वर्त्यविकार्याभ्यामपि क्वचिन्नाण् ,-- संयोगं जनयति इत्यादि[५] ॥७२॥

अव०--[१]णकारो वृद्ध्यर्थः । [२]'कर्त्तुर्व्याप्यं कर्म' (२।२।३) इति सूत्रे निर्वर्त्यं विकार्यं प्राप्यमिति त्रिधा कर्म उक्तम् । 'कर्मणोऽण्' इति सूत्रे त्रिविधमपि कर्म ज्ञेयम् इति त्रिविधकर्मण पराद्धातोरण् यथाक्रमम्-- कुम्भं करोति (इति) कुम्भकारः, शरान् लुनाति (इति) शरलावः, सूत्रं धरति (इति) सूत्रधारः; एवं प्राप्ये भारवाहः, भारहारः, द्वारपाल इत्यादयः । [३]आदिशब्दात् हिमवन्तं श्रृणोति, ग्रामं गच्छति इति ज्ञेयाः । [४]निर्वर्त्यकर्मविकार्यकर्मपरादपि,-- संयोगं जनयति । [५]आदिशब्दात् स्रजं विरचयति, वृक्षं छिनत्ति, कन्यां मण्डयति, इति युक्तधा इत्यपि ज्ञेयाः । तथा महान्तं घटं करोतीति सापेक्षत्वादनभिधानाच्च नाण् । तथा च बहुलाधिकारः । ननु सापेक्षत्वात् समासो मा भवतु, अण् कथं न ? सत्यम् , अणि हि सति 'महतां घटस्य कार' इति स्यात् , तन्न इष्टम् ॥७२॥

## शीलि-कामि-भक्ष्या-ऽऽचरीक्षि-क्षमो णः ॥५।१।७३॥

म० वृ०—कर्मणः परेभ्यः शील्यादिभ्यो 'णः प्रत्ययः' स्यात् । धर्मं शीलयति (इति) धर्मशीलः, स्त्रियां तु धर्मशीला; धर्मकामः, धर्मकामा; वायुभक्षः, वायुभक्षा; आङ् पूर्वश्चरिः,--कल्याणाचारः,[१] सुखप्रतीक्षः, बहुक्षमः, बहुक्षमा । [२]अण्बाधनार्थं वचनम् । अणि हि स्त्रियां ङी स्यात् , तथा च 'धर्मशीली' इत्याद्यनिष्टं रूपं स्यात् । तथा सूत्रे 'कामि' इति ण्यन्तस्योपादानादण्यन्तादणेव,--[३]पयस्कामीति । ण्यन्तस्य तु णे सति 'पयःकामा' इत्येव । अत एव ण्यन्तनिर्देशादण्यन्तनिर्देशे 'अतः कृकमिकंसः' (२।३।५) इत्यादौ केवलस्यैव कमेर्ग्रहणम् । तेन णे सति न सादेशः ॥७३॥

अव०--[१]स्त्रियां तु कल्याणाचारा सुखप्रतीक्षा इत्यक्षराणां भावार्थोऽवचूरेर्ज्ञातव्यः । [२]अल्घञन्तैरपि शीलकामादिभिर्बहुव्रीहौ सति धर्मशीलादयः सिद्ध्यन्ति, अण्बाधनार्थमेव 'शीलिकामी'ति सूत्रं कृतम् । अणि हि सति स्त्रियां ङी स्यात् , तथा च 'धर्मशीली धर्मकामी' इत्याद्यनिष्टं रूपं स्यात् । एवंप्रायेषु च बहुव्रीहावाश्रीयमाणे 'अम्भोऽतिगमा' इत्येव स्यात् , 'अम्भोऽतिगामी' इति च वृद्धिरिष्यते; अतिगम्यते इति (अति)गमा, 'युवर्ण०' (५।३।२८) इति अलि बहुव्रीहौ च । [३]पयः कामयते ( इति ) 'कर्मणोऽण्' (५।१।७२) ॥७३॥

## [१]गायोऽनुपसर्गाट्टक् ॥५।१।७४॥

म० वृ०--कर्मणः परादनुपसर्गाद्गायतेः 'टक् प्रत्ययः' स्यात् । वक्रं गायति (इति) वक्रगः, वक्रगी; सामगः, सामगी । अनुपसर्गादिति किम् ? वक्रसंगायः, खरुसंगायः । वक्रादयो गीतिविशेषाः॥७४॥

अव०--[१]'गाय इत्युक्ते 'कैं गैं रैं शब्दे'-- ऽयमेव गा ग्राह्यः, न तु 'गाङ् गतौ' । "खरुः स्यादश्वहरयोर्दर्पे दन्तसिचेषु च ॥७४॥

## सुरा-शीधोः पिबः ॥५।१।७५॥

म० वृ०—सुराशीधुभ्यां परादनुपसर्गात्पिबतेः 'टक्' स्यात् । सुरां पिबति (इति) सुरापः, शीधुपः ॥७५॥

अव०—स्त्रियां सुरापी, शीधुपी । सुराशीधोरिति किम् ? क्षीरपा बाला । कथं संज्ञायां सुरापा सुरापी ? अत्र ङीविकल्पः कथमिति पराशङ्का, अत्राह-- पातिपिबत्योर्भविष्यति, न च धात्वर्थभेदः, संज्ञायां धात्वर्थस्य व्युत्पत्तिमात्रार्थत्वात् ॥७५॥

## आतो डोऽह्वा-वा-मः ॥५।१।७६॥

म० वृ०--कर्मणः परादनुपसर्गाद् ह्वावामावर्जितादाकारान्ताद्धातोः 'डः प्रत्ययः' स्यात् । गां ददातीति गोदः[1] । अह्वावाम इति किम् ? स्वर्गह्वायः, [2]तन्तुवायः, [3]धान्यमायः;अणेव । कथं मित्रह्वः ? 'क्वचित्' (५।१।१७१) इति डः । अनुपसर्गादित्येव-- [4]गोसंदायः , उपसर्गैर्व्यवधानतैव इत्यण् ॥७६॥

---

अव०--[1]'गोद' इत्यस्याग्रे वस्त्रदः, अङ्गुलित्रः, ............ (ब्रह्म जि)नाति (इति) ब्रह्मज्यः, अथवा ब्रह्माणि जीनवान् (इति) ब्रह्मज्यः । [2]'वांक् गतिगन्धनयोः' (इति) वा, तन्तून् वातीति तन्तुवायः । [3]धान्यम्, 'मांक् माने' धान्यं मातीति 'कर्मणोऽण्', 'आत ऐः कृञ्चौ' (४।३।५३) (इति) ऐः ।[4](एवं) वडवासंदायः, आत ऐः कृञ्चौ' (४।३।५३) ऐः ।७६।

## समः ख्यः ॥५।१।७७॥

म० वृ०--कर्मपरात् सम्पूर्वात् ख्याधातोः 'डः' स्यात् । गोसङ्ख्यः । उपसर्गार्थं वचनम् ॥७७॥

---

अव०-- गां सङ्ख्याति सङ्ख्चष्टे वा गोसङ्ख्यः । एवं पशुसङ्ख्यः ॥७७॥

## दश्चाऽऽङः ॥५।१।७८॥

म० वृ०--कर्मपरादाङ् पूर्वाद्दाग: [ददातेः] ख्यश्च 'डः' स्यात् । [उपसर्गार्थं डवचनम् ।] दायमादत्ते (इति) दायादः, स्त्रियमाचष्टे (इति) स्त्र्याख्यः, प्रियाख्यः ॥७८॥

## प्राज् ज्ञश्च ॥५।१।७९॥

म० वृ०--कर्मपरात् प्रपूर्वाद् ज्ञो दारूपाच 'डः' स्यात् । उपसर्गार्थं वचनम् । पन्थानं प्रजानातीति पथिप्रज्ञः । प्रपां प्रदातीति प्रपाप्रदः ॥७९॥

## आशिषि हनः ॥५।१।८०॥

म० वृ०--आशिष्यर्थे[1]कर्मपराद्धन्तेः 'डः' स्यात् । शत्रुं वध्यात् (इति) शत्रुहः[2]पापहः ॥८०॥

अव०--[1]कर्मणः परात् हन्तेः । [2]पापं वध्यात् । एवं दुःखहः ॥८०॥

## क्लेशादिभ्योऽपात् ॥५।१।८१॥

म० वृ०--[1]क्लेशादिकर्मपरादपपूर्वाद्धन्तेः 'डः' स्यात् । क्लेशमपहन्ति (इति) क्लेशापहः, [2]तमोपहः दुःखापहः, दोषापहः, वातपित्तकफापहः, विषाग्निदर्पापहः । कथं दार्वाघाटः[3]चार्वाघाटः ? घटतेरणौ संज्ञायां भविष्यति । ॥८१॥

---

अव०--[1]क्लेशादिभ्यः कर्मभ्यः परात् ।[2]तमोऽपहन्ति, (एवं) रोगापहः, ज्वरापहः, दर्पापहः । क्लेशादिभ्य इत्यत्र बहुवचनाद्यथादर्शनमन्येभ्योऽपि कर्मभ्यः पराद्धन्तेर्डप्रत्ययः । [3]चारुर्जीवविशेषः,तमाघटते (इति) चार्वाघाटः, 'कर्मणोऽण्' । चारुमाहन्तीति हन्तेः चार्वाघातः । तर्हि दार्वाघातोऽपि स्यादिति पराशङ्का, सूरिराह-※असंज्ञायां गम्यमानायां दार्वाघातः, चार्वाघात इत्यपि इष्टतव (? इष्यते एव), तथाहि--एवमसंज्ञायां सम्पूर्वाभ्यां घटिहनिभ्यां वर्णसंघाटः, वर्णसंघातः; पदसंघाटः, पदसंघातः इत्यादि सिद्धम् । हन्तेरेव वा एते प्रयोगा ज्ञातव्याः । पृषोदरादित्वाद् वर्णविकारः कर्त्तव्यः इति भावः ॥८१॥

## कुमार-शीर्षाण्णिन् ॥५।१।८२॥

म० वृ०--कुमारशीर्षकर्मपराद्धन्तेः 'णिन्' स्यात् । कुमारं हन्तीति कुमारघाती, शीर्षघाती ।८२।

---

अव०--कुमारशीर्षाभ्यां कर्मभ्यां परात् । शीर्षशब्दोऽकारान्तः ॥८२॥

## अचित्ते टक् ॥५।१।८३॥

म० वृ०--कर्मपराद्धन्तेः अचित्तवति कर्तरि 'टक् प्रत्ययः' स्यात् । वात हन्ति (इति) [1]वातघ्नं तैलम्, पित्तघ्नं घृतम्, श्लेष्मघ्नं मधु, [2]रोगघ्नम्, वातघ्नास्तिलकालकाः, सर्वकर्मघ्नी, शैलेशी[3] । अचित्त इति किम् ? [4]पापघातो यतिः, चोरघातो राजा ॥८३॥

---

※ प्रस्तुतसूत्रस्य बृहद्वृत्तिं दृष्टिपथं कुर्वन्तु

प्रब०—[1]वातघ्नमित्यादिषु 'अनोऽस्य' (२।१।१०८) इति सूत्रेण अनोऽकारलोपः, ततो 'हन्' इत्यस्य 'हनो ह्नो घ्नः (२।१।११२। इति सूत्रेण) 'घ्न' आदेशः। [2]रोगघ्नमौषधम्। [3]शिलानामीशः=शिलेशः, शिलेशस्येयं शैलेशी, 'तस्येदम्' (६।३।१६०। इति) अण्। निष्प्रकम्पत्वाद् ध्यानविशेषोत्कर्षः शैलेशी इत्युच्यते। [4]'ञ्णिति घात्' (४।३।१००)। मत्स्यघातो बकः ॥८३॥

## जायापतेश्चिह्नवति[1] ॥५।१।८४॥

म० वृ०— [2]जायापतिकर्मपराद्धन्तेश्चिह्नवति कर्तरि 'टक्' स्यात्। जायाघ्नो[3]ब्राह्मणः, पतिघ्नी कन्या ॥८४॥

प्रब०—[1]चिह्नं देहस्थं शुभाशुभसूचकं लक्षणम्, यथा तिलकाऽलकादि, कोऽर्थः ? तिलानां तुल्यास्तिलकाः, तिलसमानाः, अलका इवालकाः, तिलकाश्च ते अलकाश्च=तिलकालकाः, जायाघ्नास्तिलकालकाः, येषां लोके 'मित्र' इति प्रसिद्धिः तेषां तिलकानां बाहुल्यं प्रायो जायाघ्नम्। [2]जायापतिभ्यां कर्मभ्यां परात् हन्तेः। चित्तवदर्थं वचनमिदम्, (तेन) चित्तवति कर्तरि टक् भवति। [3]कुलक्षणयुक् इत्यर्थः ॥८४॥

## ब्रह्मादिभ्यः ॥५।१।८५॥

म० वृ०—[1]ब्रह्मादिकर्मपराद्धन्तेः 'टक्' स्यात्। ब्रह्म हन्ति (इति) ब्रह्मघ्नः, [2]कृतं हन्ति (इति) कृतघ्नः, शत्रुघ्नः, गोघ्नः[3] पापी। बहुलाधिकारात्सम्प्रदानेऽपि,-[4]गोघ्नोऽतिथिः ॥८५॥

प्रब०—चित्तवदर्थ आरम्भोऽयम्। [1]ब्रह्मादिभ्यः कर्मभ्यः। बहुवचनाद्यथादर्शनमन्येभ्योऽपि टक्। [2]एषु सर्वत्र 'अनोऽस्य' (२।१।१०८। इत्यनेन) अनोऽकारलोपः, ततो ह्नो घ्नः। (एवं) वृत्रघ्नः, भ्रूणघ्नः। शशघ्नी पक्षिजातिः। [3]गां हन्ति इति गोघ्नः। [4]गां हन्ति यस्मै अतिथये आगताय दातुं स गोघ्नोऽतिथिः ॥८५॥

## हस्ति-बाहु-कपाटाच्छक्तौ ॥५।१।८६॥

म० वृ०—एभ्यः कर्मभ्यः पराद्धन्तेः शक्तावर्थे 'टक्' स्यात्। हस्तिनं हन्तुं शक्तः (इति) हस्तिघ्नो वीरः। बाहुं हन्तुं शक्तः (इति) बाहुघ्नो मल्लः, कपाटं हन्तुं शक्तः (इति) कपाटघ्नश्चौरः। शक्ताविति किम्? [1]हस्तिघातो रसदः ॥८६॥

प्रब०—[1]हस्तिनं हन्ति विषेण इति हस्तिघातः, अण्, ञ्णिति घात् (४।३।१००) ॥८६॥

## नगरादगजे ॥५।१।८७॥

म० वृ०—[1]नगरात्पराद्धन्तेर्गजवर्जिते कर्तरि 'टक्' स्यात्। नगरं हन्ति (इति) नगरघ्नो व्याघ्रः। अगज इति किम्? नगरघातो हस्ती ॥८७॥

प्रब०—चित्तवदर्थ आरम्भः। [1]कर्मणः ॥८७।

## राजघः ॥५।१।८८॥

म० वृ०—राजपराद्धन्तेः 'टक् घादेशश्च' निपात्यते। राजानं हन्ति (इति) राजघः ॥८८॥

## पाणिघ-ताडघौ शिल्पिनि ॥५।१।८९॥

म० वृ०—पाणिताडाभ्यां कर्मभ्याम् पराद्धन्तेः शिल्पिनि कर्तरि 'टक् घादेशश्च' निपात्यते। पाणिघः, ताडघः शिल्पी। शिल्पिनीति किम्? पाणिघातः ॥८९॥

प्रब०—पाणिं हन्ति (इति) पाणिघः। ताडं हन्ति (इति) ताडघः। अथवा पाणिना हन्तीति, ताडेन हन्तीति ॥८९॥

## कुक्ष्यात्मोदराद् भृगः खिः[1] ॥५।१।९०॥

म० वृ०—एभ्यः[2] परात् भृगः 'खिः' स्यात्। कुक्षिमेव बिभर्ति (इति) कुक्षिंभरिः,[3] आत्मंभरिः, [4]उदरंभरिः ॥९०॥

प्रब०—[1]खकारो मागमार्थः। [2]कर्मभ्यः। [3]आत्मानमेव बिभर्ति। [4]उदरमेव बिभर्ति इति ॥९०॥

## अर्होऽच् ॥५।१।९१॥

म० वृ०-कर्मणः परादर्हतेः 'अच्' स्यात् । अणोऽपवादः । पूजामर्हति=पूजार्हः साधुः, पूजार्हा प्रतिमा ॥९१॥

## धनु-र्दण्ड-त्सरु-लाङ्गला-ऽङ्कुशर्ष्टि-यष्टि-शक्ति-तोमर-घटाद् ग्रहः ॥५।१।९२॥

म० वृ०-एभ्यः पराद् 'ग्रहेरच्' स्यात् । धनुर्गृह्णाति (इति) धनुर्ग्रहः, [1]दण्डग्रहः, [2]त्सरुग्रहः, लाङ्गलग्रहः, अङ्कुशग्रहः, [3]ऋष्टिग्रहः, यष्टिग्रहः, शक्तिग्रहः, तोमरग्रहः, घटग्रहः, [4]घटीग्रहः ॥९२॥

प्रव०-[1]दण्डं गृह्णाति । [2]त्सरुः खड्गमुष्टिः । [3]ऋष्टिः खड्ग उच्यते । अणपि भवति, तत्र धनुर्ग्राहः, दण्डग्राहः इत्यादि । [4]"नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति न्यायात् घटीग्रहः ॥९२॥

## [1]सूत्राद्धारणे ॥५।१।९३॥

म० वृ०-[2]सूत्रपराद् ग्रहेर्ग्रहणपूर्वके धारणेऽर्थे 'अच्' स्यात् । सूत्रं गृह्णाति (इति) सूत्रग्रहः प्राज्ञः सूत्रधारो वा, सूत्रमुपादाय धारयतीत्यर्थः । धारणमिति किम् ? [3]सूत्रग्राहः ॥९३॥

प्रव०-[1]सूत्रं कर्पासादिमयम्, अथवा लक्षणसूत्रम्, उभावपि गृह्येते, उभयोरपि उदाहरणमेकमेव । [2]सूत्रशब्दात् कर्मणः । [3]'सूत्रग्राहः', कोऽर्थः यो हि सूत्रं गृह्णाति, न तु धारयति (स) सूत्रग्राह उच्यते ॥९३॥

## आयुधादिभ्यो धृगोऽदण्डादेः ॥५।१।९४॥

म० वृ०-दण्डादीन् वर्जयित्वा आयुधादिपराद् धृगः 'अच्' स्यात् । धनुर्धरति (इति) धनुर्धरः, एवं शक्तिधरः, चक्रधरः, आदिग्रहणात् भूधरः, जलधरः, विषधरः, शशधरः, विद्याधरः, श्रीधरः, जटाधरः, पयोधरः, । अदण्डादेरिति किम् ? दण्डधारः, कर्णधारः, सूत्रधारः, [1]छत्रधारः ॥९४॥

प्रव०-आयुधादिगणे यथा धनुर्धर इत्यादि तथा शार्ङ्गधरः, गदाधरः, पर्शुधरः इत्यादयोऽप्यनुसर्त्तव्याः । एवं शूलधरः, जलधरः, खड्गधरः । [1]एवं कुण्डधारः, काण्डधारः इत्यपि । बहुवचनाद्यथादर्शनमन्येभ्योऽपि अच् भवति, यथा- यष्टिधरः, फलकधरः, शङ्कुधरः, शङ्खधरः, गोत्रधरः, श्रीवत्सधरः, तूणीरधरः, पाशधरः । छत्रधर इति प्रयोगे धरतीति धरः,अच्, छत्रस्य धर इति सिद्धिः ॥९४॥

## हृगो वयोऽनुद्यमे ॥५।१।९५॥

म० वृ०-कर्मपराद् हरतेर्वयसि अनुद्यमे च 'अच्' स्यात् । कवचहरः, क्षत्रियकुमारः, अनुद्यमे,-अंशहरो दायादः गोत्री, मनोहरः प्रासादः, मनोहरा माला स्त्रियाम् । वयोऽनुद्यम इति किम् ? भारहारः ॥९५॥

प्रव०-प्राणिनां कालकृतावस्था वय उच्यते । उद्यम उत्क्षेपणम्, चन्द्रोदयादेः आकाशस्थस्य वा धारणम् । केचित्तु उत्क्षेपणाक्षेपणादिनिरपेक्षं यथाकथञ्चिदाकाशे धारणमुद्यम इति प्रतिपन्नाः । तत्रोक्तं आकाशस्थस्य धारणम् । उद्यमस्य अभावोऽनुद्यमः, तस्मिन्, ईदृशेऽनुद्यमे गम्यमाने इत्यर्थः । तथा वयसि विषये क्रियमाणः=साक्षात् प्रयुज्यमानः, अथवा सम्भाव्यमानः, कोऽर्थः ? अकुर्वन्नपि तत् कवचधारणादिकर्म अस्मिन् कर्मण्ययं शक्त इत्येवं सम्भाव्यमान उद्यम उच्यमानो वयो गमयति । प्रति (?) उद्यमार्थं च वयोग्रहणं कृतम् ॥९५॥

## आङः शीले ॥५।१।९६॥

म० वृ०-कर्मपरादाङ्पूर्वहरतेः शीले गम्यमाने 'अच्' स्यात् । [1]पुष्पाहरः, फलाहरः, सुखाहरः । शील इति किम् ? पुष्पाहारः । लिहादिप्रपञ्चः प्रकरणमिदम् ॥९६॥

प्रव०-[1]पुष्पाणि आहरतीत्येवं शीलः पुष्पाहरः, पुष्पफलसुखाद्याहरणे (=पुष्पफलसुखादि-)ढौकने

स्वाभाविकी फलनिरपेक्षा वृत्तिरस्य मैत्रस्य इति शीलार्थः । सुखाहर इति प्रयोगोऽशीलेऽपि अनुद्यमेऽर्थे पूर्वेण अचा साध्यः । आङ इति किम् ? पुष्पाणि हर्ता, तृन् ॥९६॥

## दृति-नाथात्पशाविः ॥५।१।९७॥

म० वृ०–दृतिनाथपरात् हरतेः पशौ कर्त्तरि 'इः' प्रत्ययः स्यात् । दृतिं हरतीति दृतिहरिः श्वा, नाथहरिः सिंहः । पशाविति किम् ? दृतिहारो व्याधः, नाथहारी गन्त्री ॥९७॥

## रजः-फले-मलाद् ग्रहः ॥५।१।९८॥

म० वृ०–एभ्यः कर्मभ्यः परादु ग्रहेः 'इः' प्रत्ययः स्यात् । रजोग्रहिः कञ्चुकः, [1]फलेग्रहिर्वृक्षः, सूत्रनिर्देशादेत्वम् , मलग्रहिः[2] ॥९८॥

---

अव०–[1]फलं गृह्णाति, सूत्रनिर्देशान्निपातनात् फलस्य एकारः । [2]कम्बलः ॥९८॥

## देव-वातादापः ॥५।१।९९॥

म वृ०–देववाताभ्यां कर्मभ्यां परादापृधातोः 'इः' स्यात् । [1]देवापिः, [2]वातापिः ॥९९॥

---

अव०–[1]देवानाप्नोति ( इति ) देवापिः । [2]वातमाप्नोति ॥९९॥

## शकृत्-स्तम्बाद् वत्स-व्रीहौ कृगः ॥५।१।१००॥

म० वृ०–शकृत्स्तम्बात् करोतेर्यथासङ्ख्यं वत्से व्रीहौ च कर्त्तरि 'इः' स्यात् । [1]शकृत्करिर्वत्सः, [2]स्तम्बकरिर्व्रीहिः ॥१००॥

---

अव०–[1]शकृत्करिरिति वत्सनाम । [2]व्रीहिनाम ॥१००॥

## किम्-यत्-तद्-बहो रः ॥५।१।१०१॥

म० वृ०–किम्– यद्– तद्–बहुकर्मभ्यः परात्करोतेः 'अः' प्रत्ययः स्यात् । किङ्करः, यत्करः, यत्करा; तत्करः, तत्करा, चौर्ये तस्करा [1][आप् ] बहुकरः, बहुकरा[2] । [3]जातिरिदानीं किङ्करीति हेत्वादौ टः ।१०१।

---

अव०–सर्वत्र 'आत्' (२।४।१८) इति सूत्रेणाप् । [1]'तस्करा' इत्यत्र चोरवाच्ये 'वर्चस्कादिष्ववस्करादयः' (३।२।४८) इत्यनेन दलोपं कृत्वा सकारो निपात्यते । चौरादन्यत्र तत्करः, तत्करा । '[2]कियत्तद्बहोरः' इति सूत्रे बहुकरः, बहुकरा इति मूलप्रयोगद्वयम् , 'बहुकरी' इति कथं ? 'सङ्ख्याहर्दिवा०' (५।१।१०२) इति सूत्रे बहुशब्दः सङ्ख्यावाची इति 'सङ्ख्याहर्दिवा०' इत्यनेन टप्रत्ययः, ततो ङी, बहुकरी इति सिद्धम् । [3]तर्कग्रन्थवाक्यमिदम् , तथाहि–जातिः सामान्या, इदानीं=साम्प्रतम् , किङ्करी अप्राधान्यहेतुत्वात् , अत्र हेतौ गम्यमाने 'हेतुतच्छीलानुकूले०' (५।१।१०३) इत्युत्तरसूत्रेण टप्रत्ययः, किं करोतीति स्त्रियां ङीप्रत्ययः ॥१०१॥

## सङ्ख्या-ऽह-र्दिवा-विभा-निशा-प्रभा-भाश्चित्र-कर्त्राद्यन्ता-ऽनन्त-कार-बाह्वरु-र्धनु-र्नान्दी-लिपि-लिवि-बलि-भक्ति-क्षेत्र-जङ्घा-क्षपा-क्षणदा-रजनि-दोषा-दिन-दिवसाट्टः ॥५।१।१०२

म० वृ०–एभ्यः कर्मभ्यः परात्कृगः 'टः' प्रत्ययः स्यात् । अहेत्वाद्यर्थ आरम्भः । [1]सङ्ख्याकरः, एककरः, द्विकरः, [2]अहस्करः, दिवाकरः, विभाकरः, निशाकरः, प्रभाकरः, भास्करः, चित्रकरः, कर्तृकरः, आदिकरः, अन्तकरः, अनन्तकरः, कारकरः, बाहुकरः, अरुष्करः, धनुष्करः, नान्दीकरः, लिपिकरः, लिविकरः, बलिकरः, भक्तिकर इत्यादि[3] ॥१०२॥

---

अव०–[1]'सङ्ख्याहर्दिवा०' इत्यत्र सङ्ख्या इति शब्दः सङ्ख्या इति अर्थप्रधानमपि ज्ञातव्यम् । कोऽर्थः ? सङ्ख्यार्थे ये शब्दा एकद्विञ्यादयस्ते सर्वे सङ्ख्याशब्देन ग्राह्याः, तेन सङ्ख्याकरः, एककरः, एवं बहुकरः, द्विकर इत्यादयः प्रयोगा दर्शिताः । सङ्ख्यां करोतीति (संख्याकरः), बहुकर इत्यपि ।

[२]'रो लुप्यरि' (२।१।७५) इति नस्य रः, "भ्रातुष्पुत्र-कस्कादयः" (२।३।१४) इति रस्य सकारः । [३]आदि-शब्दात् क्षेत्रकरः, जङ्घाकरः, क्षपाकरः, क्षणदा-करः, रजनिकरः, रजनीकरः, दोषाकरः, दिनकरः, दिवसकरः । टकारो ङ्यर्थः, तेन सङ्ख्याकरी, एक-करी इत्यादयो ज्ञेयाः ॥१०२॥

## हेतु-तच्छीला-ऽनुकूलेऽशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदात् ॥५।१।१०३॥

म० वृ०–हेत्वादिषु कर्तृषु शब्दादिवर्जकर्म-परात्कृगः [करोतेः] 'टः' स्यात् । हेतौ,-यशस्करी विद्या, एवं कुलकरं धनम्, तच्छीले,-क्रीडाकरः, अनुकूले,-वचनकरः । शब्दादिनिषेधः किम् ? शब्दकारः, श्लोककारः, कलहकारः, गाथाकारः, वैरकारः, चाटुकारः, सूत्रकारः, मन्त्रकारः, पदकारः, [सर्वत्र 'कर्मणोऽण्' ५।१।७२] ॥१०३॥

---

प्रब०–[१]हेतुः प्रतीतशक्तिकं कारणम् । [२]तच्छीलः तत्स्वभावः । [३]अनुकूल आराध्यचित्ता-नुवर्त्ती ॥१०३॥

## भृतौ कर्मणः ॥५।१।१०४॥

म० वृ०–कर्मशब्दात् कर्मरूपात् परात्कृगः [१]भृतावर्थे 'टः' स्यात् । कर्म करोति (इति) कर्मकरो भृतकः[२] । भृताविति किम् ? कर्मकारः ॥१०४॥

---

प्रब०–[१]भृतिर्वेतनं कर्ममूल्यमित्येकार्थः । [२]एवं कर्मकरी दासी ॥१०४॥

## क्षेम-प्रिय-मद्र-भद्रात्खा-ऽण्[१] ॥५।१।१०५॥

म० वृ०–एभ्यः कर्मभ्यः परात्करोतेः "ख, अण्" इति प्रत्ययौ भवतः । क्षेमङ्करः, क्षेमकारः; प्रियङ्करः, प्रियकारः; मद्रङ्करः, मद्रकारः; भद्रङ्करः, भद्रकारः । एभ्य इति किम् ? [२]तीर्थकरः । कथं योगक्षेमकरी लोकस्य ? [३]उपपदविधिषु तदन्त-विधेरनाश्रयणात् ॥१०५॥

प्रब०–[१]खप्रत्ययः, अण्प्रत्यय इति द्वौ प्रत्ययौ । [२]तीर्थङ्कर इति मतान्तरे, स्वमते तीर्थकर एव; 'हेतुतच्छीलानुकूले०' (५।१।१०३) इत्यनेन टः । [३]'उपपदविधिषु', कोऽर्थः ? कर्मरूपपूर्वपदमाश्रित्य धातोर्विधिः (=उपपदविधिः), उपपदविधौ "येन विधिस्तदन्तस्य" इति न्यायो नाश्रयणीयः, भद्र इत्युक्ते सुभद्र, मद्र इत्युक्ते सुमद्र इति युक्त्या धातोः परतो न प्रत्ययः, अत एव 'सङ्ख्याहर्दिवा०' (५।१।१०२) इति पूर्वसूत्रेऽन्तग्रहणे सति अपि अनन्तग्रहणं पृथग् कृतम्, उत्तरसूत्रे च भये सति अभय इति पुनः कृतम् : तथा 'क्षेमप्रिय०' इति सूत्रे क्षेमोपपदे सति योगक्षेम इति तदन्तपदमा-श्रित्य न खाण्प्रत्ययः (?प्रत्ययौ), हेत्वादौ अत्र टः । खौ वा' इत्येव सिद्धेऽपि यत् ख अण् इति प्रत्यय-द्वयग्रहणं तत् हेत्वादिषु टप्रत्ययबाधनार्थम्, खपक्षे टो न भवति, अणेव भवति इति अण्प्रत्ययः कृतः ॥१०५॥

## मेघर्त्ति-भया-ऽभयात्खः ॥५।१।१०६॥

म० वृ०–एभ्यः कर्मभ्यः परात्कृगः 'खः' स्यात् । मेघान् करोति (इति) मेघङ्करः, [१]ऋतिङ्करः, भयङ्करः, अभयङ्करः ॥ १०६ ॥

---

प्रब०–[१]ऋतिशब्दो गत्यर्थे सत्यर्थे वा, ऋतिं करोतीति ऋतिङ्करः, एवं भयम्, अभयं करोति । तथा हेत्वादिविवक्षायामपि परत्वात् 'मेघर्त्ति०' इति सूत्रं टप्रत्ययं बाधत एव, ततो भयङ्करं श्मशान-मित्यत्र खप्रत्यय एव, न हेत्वादिसूत्रेण टः, भय-कर इति प्रयोगो न भवति ॥१०६॥

## प्रिय-वशाद्वदः ॥५।१।१०७॥

म० वृ०–आभ्यां कर्मभ्यां पराद्वदेः 'खः' स्यात् । प्रियं वदति (इति) प्रियंवदः, वशं वदति (इति) वशंवदः ॥१०७॥

## द्विषन्तप-परन्तपौ ॥५।१।१०८॥

म० वृ०–एतौ 'ण्यन्तौ खान्तौ' निपात्येते । द्विषन्तपः, परन्तपः ॥१०८॥

अव०-द्विषन्तपः, परन्तप इति ण्यन्तस्यैव निपातः । अण्यन्तस्य तपेः खश् मोन्तश्च न भवति । द्विषतस्तपति (इति) द्विषत्तापः, तथा च परांश्च तपति (इति) परताप इत्येव प्रयोगौ स्याताम् । द्विषन्तप इति निपातनात् तपेः परो णिग्, खः, ह्रस्वः, तथा तकारलोपः । तथा परन्तप इत्यत्रापि तथैव परिभाव्यम् । द्विषतस्तापयतीति द्विषन्तपः, निपातनात् खः, ह्रस्वः, द्विषतः तलोपः, मोन्तः । तथा निपातनस्यैकविषयत्वात् स्त्रियां न निपातः, 'द्विषतीताप' इत्येव प्रयोगः ॥१०८॥

## [1]परिमाणार्थ-मित-नखात्पचः ॥५।१।१०९॥

म० वृ०-[2]परिमाणार्थशब्देभ्यो मितनखाभ्यां च परात् पचेः 'खः' स्यात् । प्रस्थं पचति (इति) प्रस्थंपचा स्थाली, द्रोणंपचा दासी, अल्पंपचा मुनयः, मितम्पचा ब्राह्मणी, नखम्पचा यवागूः ॥१०९॥

अव-[1]परिः, कोऽर्थः ? सर्वतो मानं परिमाणम्, परिमाणस्य अर्थाः=प्रस्थद्रोणाऽऽढकादयः परिमाणार्थाः परिमाणार्थाश्च मितश्च नखश्च । [2]प्रस्थद्रोणाढकखारीशब्देभ्यः कर्मभ्यः ॥१०९॥

## कूला-ऽभ्र-करीषात्कषः ॥५।१।११०॥

म० वृ०-एभ्यः कर्मभ्यः परात्कषेः 'खः' स्यात् । [1]कूलङ्कषा नदी, [2]अभ्रंकषो गिरिः, करीषंकषा वात्या ॥११०॥

अव०-[1]कूलं=तटं कषति=घर्षति । [2]गगनम् ॥ ११० ॥

## सर्वात्सहश्च ॥५।१।१११॥

म० वृ०-सर्वशब्दात्कर्मणः परात् सहेः कषेश्च 'खः' स्यात् । सर्वंसहो मुनिः, सर्वंकषः खलः ॥१११॥

## भृ-वृ-जि-तृ-तप-दमेश्च नाम्नि ॥५।१।११२॥

म० वृ०-कर्मणः परेभ्यो भृ वृ इत्यादिधातुभ्यः सहश्च खः स्यात्, नाम्नि[1] । [2]विश्वंभरा भूः, [3]पतिंवरा कन्या, [4]शत्रुञ्जयो गिरिः, धनञ्जयोऽर्जुनः, [5]रथन्तरं साम, शत्रुंतपो राजा,[6] बलिंदमः कृष्णः, शत्रुंसहो राजा । नाम्नि इति किम् ? कुटुम्बं बिभर्त्ति (इति) कुटुम्बभारः, अण् ॥११२॥

अव०-[1]संज्ञायाम् । [2]विश्वं बिभर्त्ति । [3]पतिं वृणीते । [4]शत्रुं जयति । [5]रथं तरति । [6]दमिरन्तर्भूतण्यर्थः अण्यन्तश्च गृह्यते, ततो बलिं दाम्यति (इति) बलिंदमः, अथवा बलिं दमयति (इति) बलिंदमः, एवमरिंदमो राजा ॥११२॥

## धारेर्धर् च ॥५।१।११३॥

म० वृ०-कर्मणः पराद्धारयतेर्नाम्नि 'खः' स्यात्, धारे-'धर्' इत्यादेशश्च । [1]वसुंधरा पृथ्वी, युगंधरः जिनः, सीमंधरः जिनः । नाम्नीति किम् ? छत्रधारः ॥११३॥

अव०-[1]वसूनि=रत्नानि धारयति ॥११३॥

## पुरन्दर-भगन्दरौ ॥५।१।११४॥

म० वृ०-एतौ नाम्नि 'खान्तौ' निपात्येते । पुरो दारयति (इति) पुरन्दरः[1] इन्द्रः, भगं दारयति (इति) भगन्दरो व्याधिः ॥११४॥

अव०-[1]'दृश् विदारणे' ण्यन्तं प्रयुक्तं-णिग्, 'नामिनोऽकलि०' (४।३।५१ इति) वृद्धिः, दार्, पुर् इति शब्दः पूर्वम्, पुरो दारयति इति खः, दारयतेर्निपातनात् ह्रस्वः, पुर् इत्यस्य अम् इत्यन्तश्च निपात्यते । यदि च पुर इत्यकारान्तः तदा 'पुरदार' इत्येव, न खः, (न) ह्रस्वः, न अम् ।११४।

## वाचंयमो व्रते[1] ॥५।१।११५॥

म० वृ०-व्रतार्थे वाच् इति कर्मणः पराद् यमेः 'खः' वाचश्च अम्' इति निपात्यते । वाचं यच्छति=नियमयति- वाचंयमो व्रती ॥११५॥

अव०-[1]व्रतं शास्त्रविहितो नियमः, तस्मिन् व्रते गम्यमाने ॥११५॥

## मन्याण्णिन् ॥५।१।११६॥

म० वृ०—कर्मणः परान्मन्यतेः 'णिन्प्रत्ययः' स्यात् । पण्डितं मन्यते बन्धुम्-पण्डितमानी बन्धोः, दर्शनीयमानी भार्यायाः ॥११६॥

अव०—"पण्डितमानी बन्धोः", बन्धोरग्रे 'कर्मणि कृतः' (२।२।८३) इति सूत्रेण कर्मणि षष्ठी भवति । दर्शनीयां मन्यते भार्याम्-दर्शनीयमानी भार्याया इत्यत्र 'क्यङ्मानिपित्तद्धिते' (३।२।५०) इति सूत्रेण पुंवद्भावो भवति ॥११६॥

## कर्तुः खश् ॥५।१।११७॥

म० वृ०—[1]प्रत्ययार्थात्कर्तुः कर्मणः परान्मन्यतेः 'खश्प्रत्ययः' स्यात् । पण्डितमात्मानं मन्यते=पण्डितंमन्यः, विद्वन्मन्यः,[2] विदुषिंमन्या । असरूपत्वाण्णिन्नपि,-पण्डितमात्मानं मन्यते=पण्डितमानी, विद्वन्मानी[3] । कर्तुरिति किम् ? [4]दर्शनीयमानी चैत्रस्य ॥११७॥

अव०—[1]प्रत्यये कृते सति यत्शब्दरूपं निष्पद्यते तेन शब्देन यः चैत्रादिरुच्यते स प्रत्ययार्थः । यदा प्रत्ययार्थश्चैत्रः कर्ता पुरुषः आत्मानमेव न परं दर्शनीयत्वादिना गुणेन विशिष्टं मन्यते तदाऽयं चैत्रः कर्म भवति, चैत्र आत्मानमेव पण्डितं मन्यते, न परमिति परमार्थः, तत्र तादृशेऽर्थे 'कर्तुः खश्' इदं सूत्रं प्रवर्तते । 'मन्याण्णिन्' (५।१।११६) इति सूत्रं तु गुणसम्पत्त( ? सम्पन्न )परविवक्षायामेव सत्यां प्रवर्त्तते । [2]विद्वांसमात्मानं मन्यते विद्वन्मानी, विद्वस्शब्दस्य स् इत्यस्य ※ 'पदस्य' (२।१।८९) इति सूत्रेण लुप्यते । (विद्वान् ,) [3]स्त्री चेत् विदुषी, विदुषीमात्मानं मन्यते विदुषिंमन्या, 'खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च'(३।२।१११) इति सूत्रेण पूर्वपदस्य ह्रस्वः मोऽन्तश्च ; एवं पट्वीमात्मानं मन्यते पट्विंमन्या ; अत्र परतः स्त्रीपुंवद्भावं बाधित्वा परत्वात् ह्रस्वो मोऽन्तश्च । यत्र दीर्घान्तं पूर्वपदं तत्र सर्वत्र 'खित्यनव्यया०' (३।२।१११) इत्यनेन ह्रस्वो मोऽन्तश्च । [3]एवं पट्वीमात्मानं मन्यते-पटुमानिनी, विदुषीमात्मानं मन्यते=विद्वन्मानिनी, णिन् पूर्वेण, ततः 'क्यङ्मानिपित्तद्धिते' (३।२।५०) इति सूत्रेण पुंवद्भावः । [4]पूर्वेण णिन्नेव ॥११७॥

## एजेः ॥५।१।११८॥

म० वृ०—कर्मपरादेजयतेः 'खश्' स्यात् । अङ्गमेजयः, जनमेजयः ॥११८॥

अव०—एजेः पूर्वं णिग् । अङ्गान्येजयते । जनमेजयते (इति जनमेजयः) राजा ॥११८॥

## शुनी-स्तन-मुञ्ज-कूला-ऽऽस्य-पुष्पात् ट्धेः ॥५।१।११९॥

म० वृ०—एभ्यः पराद्धयतेः 'खश्' स्यात् । [1]शुनिंधयः, [2]स्तनंधयः, मुञ्जन्धयः, कूलंधयः, आस्यंधयः, पुष्पंधयः ॥११९॥

अव०—[1]शुनीं धयति इति । [2]एवं स्तनं धयतीति । ट्धे इत्यत्र टकारो ङ्यर्थः, तेन शुनीं धयति शुनिंधयी, स्तनंधयी सर्पजातिः , अत्र क्रियावाचकात् जातिद्वारा ङी न प्राप्नोति इति टकरणम् ॥११९॥

## नाडी-घटी-खरी-मुष्टि-नासिका-वाताद् ध्मश्च ॥५।१।१२०॥

म० वृ०—एभ्यः कर्मभ्यः पराद्धमतेर्धयतेश्च 'खश्' स्यात् । नाडीं धमति धयति वा=नाडिंधमः, नाडिंधयः; घटिंधमः, घटिंधयः; खरिंधमः, खरिंधयः, मुष्टिंधमः, मुष्टिंधयः; नासिकंधमः, नासिकंधयः; वातंधमः, वातंधयः ॥१२०॥

※ चिन्त्यमिदम्, "स्रंस्-ध्वंस्-क्वस्सनडुहो दः" (२।१।६८) इति सूत्रेण सस्य दः, "तृतीयस्य पञ्चमे" इति दस्य नो भवति ।

अव०–'नाडीघटी'० इति सूत्रे ङ्यन्तनिर्देशः ★ नाडीशब्दे उपपदे खश्, नाडिशब्दाद् इतोऽक्त्यर्थात् (२।४।३२) इति ङीविकल्पः, ङ्यभावे खशपि न भवति,- नाडिंधमः, नाडिधः; घटंधमः, घटधः; खरध्म, खरधः इत्यर्थे कृतः ॥१२०॥

## पाणि-करात् ॥५।१।१२१॥

म० वृ०–पाणिकराभ्यां कर्मभ्यां पराद्धमतेः 'खश्' स्यात्। पाणिं धमति=पाणिंधमः, करंधमः। पाणिंधमाः, करंधमाः, नाडिंधमाः पन्थान इति तद्योगात्, यथा– मञ्चाः क्रोशन्ति ॥१२१॥

## कूलादुद्रुजोद्वहः ॥५।१।१२२॥

म० वृ०–कूलपराभ्यामुद्रुजोद्वहाभ्यां परात् 'खश्' स्यात्। कूलमुद्रुजो गजः, कूलमुद्वहा नदी। ॥१२२॥

## वहा-ऽभ्राल्लिहः ॥५।१।१२३॥

म० वृ०–वहाभ्रपराल्लिहः 'खश्' स्यात्। वहं लेढीति वहंलिहो गौः, अभ्रंलिहः प्रासादः ॥१२३॥

## बहु-विध्वरुस्तिलात्तुदः ॥५।१।१२४॥

म०वृ०–एभ्यः परात्तुदेः 'खश्' स्यात्। बहुं तुदति (इति) बहुंतुदं युगम्, विधंतुदो राहुः, [१]अरुंतुदः पीडाकरः, तिलतुदः काकः ॥१२४॥

अव०–[१]अरुस्, तुद्, अरुस्तुदतीति खश्, 'खित्यनव्ययाo' (३।२।१११) इत्यनेन सपरतो मोऽन्तः, 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) इत्यनेन स् लुप्यते ॥१२४॥

## ललाट-वात-शर्धात्तपा-ऽज-हाकः ॥५।१।१२५॥

म० वृ०–एभ्यः कर्मभ्यः परेभ्यो यथासङ्ख्यं तपज-हाकभ्यः 'खश्' स्यात्। ललाटंतपः, वातमजा मृगाः, शर्द्धंजहा माषाः ॥१२५॥

अव०–'शृधूङ् शब्दकुत्सायाम्'- शृधू, शर्द्धनं= शर्द्धः, अल्, शर्द्धं जहति (इति शर्द्धंजहाः) ॥१२५॥

## असूर्योग्राद् दृशः ॥५।१।१२६॥

म० वृ०–असूर्योग्रपराद् दृशेः 'खश्' स्यात्। सूर्यमपि न पश्यन्ति=असूर्यंपश्या राजदाराः, उग्रंपश्यः ॥१२६॥

अव०–दृशिना सह सम्बद्धस्य नञः सूर्येण सहासामर्थ्येऽपि गमकत्वात्, कोऽर्थः? वाक्यार्थप्रतिपादकत्वात्, समासो भवति ॥१२६॥

## इरंमदः ॥५।१।१२७॥

म० वृ०–कर्मण इति निवृत्तम्। इरापूर्वान्मदेः 'खश् इयाभावश्च' निपात्यते। इरा=सुरा, तया माद्यतीति इरंमदः ॥१२७॥

## नग्न-पलित-प्रिया-ऽन्ध-स्थूल-सुभगा-ऽऽढ्य-तदन्ता-च्व्यर्थेऽच्वेर्भुवः खिष्णु-खुकञ् ॥५।१।१२८॥

म० वृ०–नग्नादिभ्यः केवलेभ्यस्तदन्तेभ्यश्च अच्व्यन्तेभ्यः च्व्यर्थे भवतेः 'खिष्णुखुकञौ प्रत्ययौ' भवतः। अनग्नो नग्नो भवति=नग्नंभविष्णुः, नग्नंभावुकः; [१]पलितंभविष्णुः, पलितंभावुकः; [२]प्रियंभविष्णुः, प्रियंभावुक; एवमन्धंभविष्णुः,[३] अन्धंभावुकः, स्थूलंभविष्णुः,[४] स्थूलंभावुकः;[५] तदन्तेभ्यः,– अननग्नोऽनग्नो भवति–अनग्नंभविष्णुः, अनग्नंभावुकः; [६]सुनग्नंभविष्णुः इत्यादि। अच्वेरिति किम्? आढ्यीभविता [तृच्] ॥१२८॥

अव०–उपपदविधौ तदन्तविधिर्नाश्रित इति तदन्तग्रहणं पृथक् कृतम्। [१]अपलितः पलितो भवति। [२]अप्रियः प्रियो भवति। [३]अनन्धोऽन्धो भवति। [४] अस्थूलः स्थूलो भवति=स्थूलंभविष्णुः, स्थूलंभावुकः। [५]एवं सुभगंभविष्णुः, सुभगंभावुकः। एवमाढ्यादिष्वपि ज्ञेयम्। [६]असुनग्नः सुनग्नो भवतीति सुनग्नंभविष्णुः ॥१२८॥

## कृगः खनट् करणे ॥५।१।१२९॥

★ अस्य 'इत्यर्थे कृतः' इत्यनेन सह सम्बन्धः।

**म० वृ०**–नग्नादिभ्योऽच्व्यन्तेभ्यश्च्व्यर्थे करोतेः करणे 'खनट्' स्यात् । अनग्नो नग्नः क्रियतेऽनेनेति नग्नंकरणं द्यूतम्, [1]पलितंकरणं तैलम्, [2]प्रियङ्करणं शीलम्, [3]अन्धंकरणः शोकः, [4]स्थूलंकरणं दधि, [5]सुभगंकरणं रूपम्, [6]आढ्यंकरणं वित्तम्, तदन्त,-- [7]अनग्नंकरणः पटुः ॥१२९॥

**अव०**–[1]अपलितः पलितः क्रियतेऽनेनेति । [2]अप्रियः प्रियः क्रियतेऽनेन । [3]अनन्धोऽन्धः क्रियतेऽनेन । [4]अस्थूलः स्थूलः क्रियतेऽनेन । [5]असुभगः सुभगः क्रियतेऽनेन । [6]अनाढ्यः आढ्यः क्रियतेऽनेन । [7]अनग्नो नग्नः क्रियतेऽनेनेति वाक्यानि । अनग्नंकरणः पटुः, एवमपलितंकरणो रसः इत्यपि । च्व्यर्थ इत्येव– नग्नं करोति द्यूतेन । अत्र प्रकृतिविकारभावो न विवक्ष्यते । अच्वेरित्येव– नग्नीकुर्वन्त्यनेन । अत्र खनट्प्रतिषेधसामर्थ्यात् अनट्प्रत्ययोऽपि न भवति । नग्नीकरणमित्यत्रानट्खनटो रूपे, समासे, स्त्रियां वा नहि कोऽपि विशेषः ॥१२९॥

## भावे चा-ऽऽशिताद्[1] भुवः खः ॥५।१।१३०॥

**म० वृ०**–आशितशब्दात्पराद् भवतेर्भावे करणे च वाच्ये 'खः' स्यात् । आशितेन=तृप्तेन भूयते भवता (इति) आशितंभवो वर्त्तते भवतः [सूत्रस्य उदाहरणमिदं भावे] । आशितो भवत्यनेनेति आशितंभव ओदनः (करणे वाक्यमिदम्) । (एवम्) आशितं भवत्यनया-आशितंभवा पञ्चपूली । असरूपत्वादनडपि, न घञ्, सरूपत्वात्, आशितस्य भवनम्– आशितभवनम् ॥१३०॥

**अव०**–[1]आशित इत्यत्र अश्नातेः कर्त्तरि 'ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः' (५।२।९२) इत्यनेन क्तः, निपातनात् दीर्घत्वं च ; यद्वा आङ्पूर्वादविवक्षितकर्मकात् 'गत्यर्था०' इति क्तः ॥१३०॥

## नाम्नो गमः खड्डौ च विहायसस्तु विहः ॥५।१।१३१॥

**म० वृ०**–नाम्नः पराद्गमेः "खड् ड इति प्रत्ययौ खश्च" भवन्ति, 'विहायस्शब्दस्य विह' आदेशः । खड्,-- [1]तुरो गच्छति--तुरङ्गः, भुजेन [कौटिल्येन] भुज इव वा गच्छति-- [2]भुजङ्गः, विहायसा गच्छति-- विहङ्गः । ड,-- तुरगः, [3]भुजगः, विहगः, प्रवगः, प्लवगः, अत्यन्तगः, सर्वगः, सर्वत्रगः, अनन्तगः, ग्रामगः, परदारगः, गुरुतल्पगः[4] । अग्रादिभ्यस्तदन्तेभ्योऽपि डः,-- अग्रगः, सेनाग्रगः आदिगः, पङ्क्त्यादिगः, [5]मध्यगः, [6]अन्तगः, अध्वगः, पुराध्वगः, दूरगः, अदूरगः, पारगः, शास्त्रपारगः, इत्यादि[7] । अथ संज्ञायामपि डः,-- [8]खगः, [9]अगः, नगः, [10]उरगः, [11]पन्नगः, [12]पतगः, [13]आपगा नदी इत्यादि[14] । अगो वृषलः शीतेनेत्यसंज्ञायामपि डः । अथ खः,– [15]सुतङ्गमः, [16]मितङ्गमोऽश्वः, मितङ्गमा हस्तिनी, जनङ्गमश्चण्डालः,[17] तुरङ्गमः, भुजङ्गमः [=सर्पः], विहङ्गमः [=पक्षी], नभसंगमः[=पक्षी] इत्यादि ॥१३१॥

**अव०**–[1]तुरिः सौत्रो धातुः, तुर्, तोरतीति 'नाम्युपान्त्य०' (५।१।५४) इति कः । [2]'भुजङ्गः', अग्रे प्रवङ्गः, प्लवङ्गः इत्यपि; प्रवेण गच्छति-- प्रवङ्गः, प्लवेन गच्छति-- प्लवङ्गः; पत्,-- पतत्यनेनेति पतः, 'पुन्नाम्नि घः' (५।३।१३०।इति) घः, पतः=पक्षः, पतैर्गच्छति (इति) पतङ्गः, पतो गच्छति वा पतङ्गः । [3]भुजः=पाणिः, भुज इव=पाणिरिव गच्छतीति भुजगः । [4]'गुरुतल्पगः' इत्यस्याग्रे प्रतीपगः, पुरोगः, पीठगः, तीरगः, इत्यपि । गुरुतल्पः=शय्या कलत्रं वा । [5](एवम्) गृहमध्यगः । [6](एवम्) शाखान्तगः । [7]आदिशब्दात् अगारगः, स्त्र्यगारगः । [8]खे आकाशे गच्छतीति खगः=पक्षी । [9]न गच्छतीति अगो वृक्षः पर्वतश्च, एवं नगशब्दोऽपि ज्ञेयः । [10]उरसा गच्छति-- उरगः, पृषोदरादित्वात् सकारलोपः । [11]पद्भ्यां न गच्छति, पन्नं गच्छति वा-- पन्नगः= सर्पः । [12]पतो गच्छति-- पतगः=पत्री । [13]आपोऽस्य सन्ति इत्यापोऽब्धिः, 'ज्योत्स्नादिभ्योऽण्' (७।२।३४), तमापमब्धिं गच्छति-- आपगा,

(एवं) निम्नगा,समुद्रगा, सततगा इत्यपि ज्ञातव्याः । [१४]एवमाशु=शीघ्रं गच्छति-- आशुगः=शरः। [१५]सुतं सुतेन वा गच्छति-- सुतङ्गमो नाम मुनिः, यस्य सौतङ्गमिः पुत्रः । [१६]मितं गच्छति-- मितङ्गमोऽश्वः । [१७]चण्डालाग्रे पूर्वंगमाः पन्थानः, हृदयंगमा वाचः, प्रवङ्गमः कपिः, प्लवङ्गमो दर्दुरः, एतेऽपि प्रयोगा ज्ञातव्याः ॥१३१॥

## सुग-दुर्गमाधारे ॥५।१।१३२॥

म० वृ०--सुदुर्भ्यां परात्गमेराधारे 'डः' स्यात्। सुखेन गम्यतेऽस्मिन्निति सुगः, [दुःखेन गम्यतेऽस्मिन्निति] दुर्गः पन्थाः । असरूपत्वादनडपि,-सुगमनः, दुर्गमनः। सुगमः, दुर्गमः इति कर्मणि ।१३२।

## निर्गो देशे ॥५।१।१३३॥

म० वृ०--निर्पूर्वाद्गमेराधारे देशे 'डः' स्यात्। निर्गम्यते तस्मिन् देशे इति निर्गो देशः। देश इत्येव-- निर्गमनः ॥१३३॥

## शमो नाम्न्यः ॥५।१।१३४॥

म० वृ०--[१]शम्नामपराद्धातोर्नाम्नि 'अः प्रत्ययः' स्यात् । [२]शम्भवोऽर्हन् , [३]शं करोति=शङ्करः, [४]शङ्करः, शंवदः ऋषिः, [५]शंवरः। [६]तथा (अव्ययानां कर्मत्वं दृश्यते, तेन) शङ्करा नाम शकुनिका तापसी वा परिव्राजिका वा । नाम्नीति किम् ? शङ्करी जिनदीक्षा ॥१३४॥

---

अव०--[१]शम् इत्यव्ययं सुखेऽर्थे वर्तते । [२]शं सुखे भवतीति । [३]शं सुखं करोतीति वा । [४]शङ्करो नगरमृषिश्च । [५]शंवरो रुरुमृगविशेषः । शंवरो दैत्योऽपि भण्यते कु(त्र)चित् । [६]स्वः पश्य इत्यादिषु अव्ययानां कर्मत्वं दृश्यते । एके वैयाकरणा अव्ययानां कर्मत्वं न मन्यन्ते । तन्मतमाक्षिप्य 'अव्ययानां कर्मत्वं दृश्यते' इति आचार्येणोक्तम् । ततः शम् इत्यव्ययेऽपि कर्मणि सति हेत्वादिष्वपि टप्राप्तौ सत्यां 'शमो नाम्न्यः' इति सूत्रेण परत्वात् टप्रत्ययो बाध्यते , तेन 'शङ्करा' इति सिद्धम् , अन्यथा 'शङ्करी' स्यात् ॥१३४॥

## पार्श्वादिभ्यः शीङः ॥५।१।१३५॥

म० वृ०--अनाधारार्थं आरम्भः। पार्श्वादिभ्यो नामभ्यः परात् शीङः 'अः' स्यात् । पार्श्वाभ्यां शेते-- पार्श्वशयः, पृष्ठशयः, उदरशयः, तथा [१]दिग्धसहशयः बहुवचनाद्यथादर्शनमन्येभ्योऽपि ॥१३५॥

---

अव०--[१]दिग्धेन सह शेते=दिग्धसहशयः । दिग्धेन, कोऽर्थः ? विषाक्तेन, तैलादिना खरण्टितेन वा । दिग्धसहशय इत्यत्र दिग्धसहात् तृतीयासमासात् शीङोऽकारप्रत्ययः, पश्चादुपपदसमासः ॥१३५॥

## ऊर्ध्वादिभ्यः कर्तुः ॥५।१।१३६॥

म० वृ०--ऊर्ध्वादिनामभ्यः कर्तृवाचिभ्यः परात् शीङः 'अः' स्यात् । ऊर्ध्वः शेते=ऊर्ध्वशयः । उत्तानं ( ? उत्तानः ) शेते=उत्तानशयः । बहुवचनमाकृतिगणार्थम् ॥१३६॥

---

अव०--अवमुर्द्धशयः, अवगतो मुर्द्धा यस्य सोऽवमुर्द्धशयः इत्यपि उदाहरणमुत्तानशय इत्यस्याग्रे ज्ञेयम् ॥१३६॥

## आधारात् ॥५।१।१३७॥

म० वृ०--आधारवाचिनो नाम्नः शीङः 'अः' स्यात् । खे शेते-खशयः, [१]गर्त्तशयः, हृदि शेते=हृच्छयः, बिलेशयः, मनसिशयः, कुशेशयः; सप्तम्या अलुप् । [२]गिरिश इति संज्ञायां लोमादित्वात् शः, क्रियार्थत्वे तु गिरौ शेते-गिरिशय इति [भवितव्यमिति योगः] ॥१३७॥

---

अव०--[१]'फणगर्त्तरथाजमोद' [हैमलिङ्गानुशासने पुंस्त्रिलिङ्गप्रकरणे सप्तमश्लोके] इति वचनात् गर्त्तशब्दः पुंस्त्रीलिङ्गः, ततो गर्त्ते शेते-गर्त्तशयः । [२]गिरिरस्यास्तीति लोमपिच्छादेः शेलम् (७।२।२८। इति) शः ॥१३७॥

## चरेष्टः ॥५।१।१३८॥

म० वृ०–आधारवाचिपराच्चरेः 'टः' स्यात्। कुरुषु चरति-कुरुचरः, एवं मद्रचरः, वनेचरः, निशाचरः। टकारो ङ्यर्थः,तेन कुरुचरी, मद्रचरी ।१३८।

अव०–आधारादित्येव- कुरूंश्चरति, पञ्चालांश्चरति; यदि चात्र अण् क्रियते तथा (? तदा) कुरुचारः, पञ्चालचार इति ❀ प्रयोगौ ज्ञातव्यौ ॥१३८॥

## भिक्षा-सेना-ऽऽदायात् ॥५।१।१३९॥

म० वृ०–अनाधारार्थ आरम्भः। एभ्यः पराच्चरेः 'टः' स्यात्। भिक्षां चरति-भिक्षाचरः, भिक्षाचरी; [1]सेनाचरः, [2]आदायचरः ॥१३९॥

अव०–[1]सेनां चरति=परीक्षते, सेनया वा चरति (इति) सेनाचरः, कोऽर्थः ? तापसव्यञ्जनः; ❀ तापसस्य व्यञ्जनं चिह्नं यस्य सः। [2]आदाय=गृहीत्वा चरति-आदायचरः, आदानं=ग्रहणं कृत्वा चरतीत्यर्थः, किमादाय=किं गृहीत्वा इति विवक्षा न कर्त्तव्या ॥१३९॥

## पुरो-ऽग्रतो-ऽग्रे सर्त्तेः ॥५।१।१४०॥

म० वृ०–एभ्यः नामभ्यः परात् 'सर्त्तेष्टः' स्यात्। पुरः सरति=पुरःसरः, [1]अग्रतःसरः, [2]अग्रेसरः, सप्तम्यलुप्, अग्रे इति शब्दः एकारान्तमव्ययं वा, [3]सूत्रनिपातनाद्वा एकारः ॥१४०॥

अव०–[1]अग्रे=अग्रतः, 'आद्यादिभ्यः' (७।२।८४। इति) तस्, अग्रतः सरतीति=अग्रतःसरः। [2]अग्रे सरतीति=अग्रेसरः, सप्तम्या न लुप्, अग्रे शब्दो वा। [3]अग्रं सरति अग्रेण वा सरति इति। एवं पुरःसरी, (अग्रतःसरी,) अग्रेसरी ॥१४०॥

## पूर्वात्कर्त्तुः ॥५।१।१४१॥

म० वृ०–पूर्वात्कर्तृवाचिनः सर्त्तेः 'टः' स्यात्। पूर्वः सरति=पूर्वसरः, पूर्वो भूत्वा सरतीत्यर्थः। कर्त्तुरिति किम् ? पूर्वं देशं सरति=पूर्वसारः १४१

## स्था-पा-स्ना-त्रः कः ॥५।१।१४२॥

म० वृ०–नाम्नः परेभ्यः स्थादिभ्यः 'कः' स्यात्। समस्थः, विषमस्थः, कूटस्थः, कपित्थः, दधित्थः, महित्थः, अश्वत्थः, कूलस्थः। [1]द्विपः, पादपः, कच्छपः, अनेकपः। नदीष्णः। [2]आतपत्रम्। परत्वादयं योगः 'शमो नाम्न्यः' (५।१।१३४) इति अम् [=अप्रत्ययं] बाधते [शंस्थो नाम कश्चिद्]। 'शंस्था' इत्यसरूपत्वात् क्विप् ॥१४२॥

अव०–[1]द्वौ=आरोहकमात्मानं च पाति (इति) द्विपः। [2]आतपमातपाद्वा त्रायति-आतपत्रम्। एवं घर्मत्रम् ॥१४२॥

## शोकापनुद-तुन्दपरिमृज-स्तम्बेरम-कर्णेजपं प्रिया-ऽलस-हस्ति-सूचके ।५।१।१४३।

म० वृ०–एते यथासङ्ख्यं प्रियादिष्वर्थेषु 'कान्ता' निपात्यन्ते। [1]शोकापनुदः प्रियः। [2]तुन्दपरिमृजोऽलसः। [3]स्तम्बेरमो हस्ती। [4]कर्णेजपः खलः [सूचकः]। एष्विति किम् ? शोकापनोदो धर्माचार्यः इत्यादि[५] ॥१४३॥

अव०–शोकापनुदादिशब्दाश्चत्वारश्चतुर्ष्वर्थेषु विज्ञेयाः कप्रत्ययान्ताः। [1]शोकमपनुदति=अपहरति इति पुत्रादिरानन्दकर एवोच्यते। [2]तुन्दमुदरं परिमार्ष्टि=तुन्दपरिमृजोऽलसः। [3]स्तम्बे रमते इति वाक्यम्। [4]कर्णे जपति इति। [५]आदिशब्दात् तुन्दपरिमार्जं आतुरः, स्तम्बे रन्ता पक्षी, कर्णे जपिता मन्त्री। एषु चतुर्षूदाहरणेषु मध्ये आद्ययोरुदाहरणयोर्घञ्, उभयोस्तु तृच् ॥१४३॥

## मूलविभुजादयः ॥५।१।१४४॥

❀ अत्र बृहद्वृत्तिलघुन्यासे एवं पाठः—प्राप्यात् कर्मणः कदाचिदण् भवतीति यद्यणानीयते तदा समासोऽपि भवति, तथा च कुरुचारः पञ्चालचार इत्यपि।

★ यो हि तापसरूपं कृत्वा प्रच्छन्नतया सेनायां परिभ्रम्य तत्र प्रवर्तमानं कार्यं जानाति स तापसव्यञ्जन उच्यते।

म० वृ०—मूलविभुजादिशब्दाः 'कान्ता' यथादर्शनं निपात्यन्ते । मूलानि विभुजति=मन्दयति (इति) मूलविभुजो रथः, [1]उर्वीरुहो वृक्षः, [2]कुमुदम्, महीं धरति-- महीध्रः=शैलः, उषर्बुधोऽग्निः, [3]अभ्रं=मेघः, [4]सरसिरुहं पद्मम्, [5]धर्मप्रदः, [6]कामप्रदः, [7]स्वर्गप्रदः, [8]शास्त्रप्रज्ञः, [9]आगमप्रज्ञः ॥१४४॥

अव०-[1]'ङस्युक्तं कृता' (३।१।४९) इति समासार्थमत्र पाठः, अन्यथा 'नाम्युपान्त्य०' (५।१।५४) इति के सिध्यति । उर्व्यां रोहति इति वाक्यम् । [2]कौ पृथिव्यां मोदते=कुमुदं कैरवमुच्यते । [3]अपो बिभर्त्ति=अभ्रम् । [4]सरसि रोहतीति । एवं नखानि मुञ्चन्ति=नखमुचानि धनूंषि । अन्तर्भूतण्यर्थो वा । काकेभ्यो गूहनीयाः=काकगुहास्तिलाः । [5]धर्माय प्रददाति, [6]कामाय प्रददाति, [7]स्वर्गाय प्रददाति, [8]शास्त्रेण प्रजानाति, [9]आगमेन प्रजानातीति वाक्यानि ॥१४४॥

## दुहेर्डुघः ॥५।१।१४५॥

म० वृ०—नाम्नः परात् दुहेर्डुघप्रत्ययः स्यात् । कामान् दुग्धे=[पूरयति] कामदुघा, एवं ध्यानदुघा । असरूपत्वात् क्विप्,-- कामधुक् ॥१४५॥

अव०—डुघ इति ककारो (? डकारो)ऽन्त्यस्वरादिलोपार्थः ॥१४५॥

## भजो विण् ॥५।१।१४६॥

म० वृ०—नाम्नः परात् 'भजेर्विण्' स्यात् । [1]अर्द्धभाक्, [2]पादभाक्, [3]दूरभाक् । वकारो विण्-क्विपोः सारूप्यार्थः, तेन विण्विषये न क्विप् ॥१४६॥

अव०—[1]अर्द्धं भजते । [2]पादं भजते । [3]दूरं भजते । एवं प्रभजते-- प्रभाक् । इकार उच्चारणार्थः । णकारो वृद्ध्यर्थः ॥१४६॥

## मन्-वन्-क्वनिप्-विच् क्वचित् ॥५।१।१४७॥

म० वृ०—"नाम्नः पराद्धातोरेते प्रत्ययाः कचिल्लक्ष्यानुसारेण भवन्ति" । मन्,-- इन्द्रं शृणाति= इन्द्रशर्मा, सुदामा, अश्वत्थामा[1] ; क्वचिद्ग्रहणात्केवलादपि धातोर्मन्,-- शर्म, [वर्मोऽपि] हेम, दामा, पामा । वन्,-- भूरिदावा, घृतपावा, अग्रेगावा, विजावा; [ सर्वत्र 'वन्याङ् पञ्चमस्य' ४।२।६५ ] क्वनिप्-- सुधीवा, सुपीवा[2] । केवलादपि,-- कृत्वा, कृत्वानौ; धीवा, पीवा । विच्- कीलालपाः, शुभंयाः । केवलादपि विच्,-- [3]रेट्, [4]रोट्, [5]वेट्, जागः ॥१४७॥

अव०—क्वनिप् इत्यत्र ककारपकारौ कित्पित्कार्यार्थौ । [1]एवं सुशर्मा, सुतर्मा, पृषोदरादित्वात् सस्य तः । [2](एवं) प्रातरित्वा,प्रातरित्वानौ: क्वनिप् भवति । 'मन्वन्क्वनिप्०' इति सूत्रे क्वनिप्प्रत्ययविषये प्रातरित्वा प्रातरित्वानौ इति प्रयोगौ ज्ञातव्यौ । अत्र च प्रातर्, इण्क्, (यद्वा) इंक्, इङ्क् (वा), प्रातरेति-- प्रातरित्वा, प्रातरितः-- प्रातरित्वानौ; क्वनिप्, 'ह्रस्वस्य तः०' (४।४।११३) इति तोऽन्तः । एवमनुमानतः शब्दसिद्धिर्लिखिता । क्वनिप् इत्यस्याग्रे इयमवचूरिर्ज्ञेया । [3]'रेट्' इत्यत्र 'रुशं रिशंत् हिंसायाम्' (इति) रिश्, विच, गुणः, 'यजसृज०' (२।१।८७) इति शस्य षः, धुटस्तृतीयः' (२।१।७६।इति) षस्य डः, 'विरामे वा' (१।३।५१। इति) डस्य ट् । [4]'रोट्', 'रुहं जन्मनि' (इति) रुह्, विच्, 'हो धुट्पदान्ते' (२।१।८२) हस्य ढः, 'धुटस्तृतीयः' (२।१।७६) डः, 'विरामे वा' (१।३।५१) इति ट् । [5]'वेट्' इत्यत्र विशंत् प्रवेशने' विश्, विच्, शेषं पूर्ववत् ॥१४७॥

## क्विप् ॥५।१।१४८॥

म० वृ०—[पकारः पित्कार्यार्थः, इकार उच्चारणार्थः] नाम्नः पराद्धातोः 'क्विप्' स्यात्, कचित् । [1]उखेनोखया वा स्रंसते-- उखास्रत्, [2]पर्णध्वत्, [3]शकहूः, [4]यवलूः, [5]खलपूः, [6]अक्षद्यूः, [7]मित्रभूः, [8]प्रतिभूः [9]कटचिकीः । केवलादपि,-- [10]पाः ['पाः' इत्यत्र 'ईर्व्यञ्जनेऽयपि' (४।३।९७) इति साक्षात् व्यञ्जनप्रतिपत्त्या ईकारो न भवति] । [11]वाः, [12]कीः, [13]गीः, ऊः, लूः, [14]कुक्, पक् । तथा [15]'सदि' इत्यादि-

भ्यश्च,-- [१६]दिविषत्, द्युसत्, [१७]सभासत्, [१८]। [१९]अण्डसूः, [२०]प्रसूः। [२१]मित्रद्विट्, [२२]प्रद्विट्, द्विषो जेघ्नीयिषीष्ट[२३] वः' । [२४]मित्रध्रुक्। [२५]गोधुक्, [२६]कामधुक्, [२७]अश्वयुक्, [२८]युङ्, युञ्जौ, युञ्जः। तत्त्ववित्, [विदेरविशेषेणग्रहणम्]। बलभित्, गोत्रभित्, भित्। रज्जुच्छित्, भवच्छित्, प्रच्छित्, छित्। शत्रुजित्, प्रसेनजित्, प्रजित्, अभिजित्। सेनानीः, अग्रणीः, ग्रामणीः, प्रणीः, नीः, नियः। विश्वे राजते- विश्वाराट्, 'वसुराटोः' (३।२।८१) इति दीर्घः, राजसु राजते-- राजराट्, संराजते-- सम्राट्, राट्। तथा अञ्चेः,-- [२९]दध्यङ्, [३०]देवद्र्यङ्, [३१]अदद्र्यङ्, तिर्यङ्, सध्र्यङ्, सम्यङ्। कथं [३२]दिक्? क्रुत्सम्पदादित्वात् क्विप्॥१४८॥

अव०--[१]उखशब्दः पुते वर्त्तमानः पुंस्त्रीलिङ्गः। स्थाल्यां तु स्त्रीलिङ्गः । उखास्रत् । [२]एवं पर्णानि ध्वंसते पर्णध्वत्, क्विप्, सिलोपे 'स्रं'सध्वंसक्वस्सनडुहो दः' (२।१।६८) इत्यनेन सकारस्य दकारः। [३]शकान् आह्वयति-- शकहूः, क्विप्, य्वृत्, 'दीर्घमवोऽन्त्यम्' (४।१।१०३।इति) दीर्घः । एवं परिव्ययति-- परिवीः, क्विप्, 'यजादिवचेः किति' (४।१।७९) इति य्वृत्, 'दीर्घमवोऽन्त्यम्' (४।१।१०३। इति) दीर्घः । [४]यवान् लुनाति-- यवलूः । [५]खलं पुनाति-- खलपूः । तथा [६]अक्षैर्दीव्यति-- अक्षद्यूः, क्विप्, 'अनुनासिके च च्छ्वः शूट्' (४।१।१०८) इति वस्य ऊः, ततो यत्वम्। [७]मित्राद् भवति इति मित्रभूः। [८]प्रतिभवतीति प्रतिभूः। उत्तमर्णाधमर्णयोरन्तराले यः साक्षी स प्रतिभूः इत्युच्यते। [९]कट, अग्रे चिकीर्ष, कटं चिकीर्षतीति क्विप्, 'अतः' (४।३।८२) इत्यनेनाकारलोपे क्रियमाणे षकारोऽसन्नयः इति सकारं परिकल्प्य 'रात्सः' (२।१।९०) इति स्कारो लुप्यते, ततो 'रः पदान्ते'० (१।३।५३) इति विसर्गः । [१०]पाति पिबति वा-- पाः । [११]वातीति वाः । [१२]किरतीति कीः, [१३]गिरतीति गीः। 'ॠतां क्ङितीर्'(४।४।११६) इतीर्, 'पदान्ते' (२।१।६४।इति) दीर्घः। [१४]क्रुञ्चतीति क्रुङ्, 'युजञ्च०' (२।१।७१) इति ङ्। [१५]सदि-सू-द्विष-द्रुह-दुह-युज विद-भिद-छिद-जि-नी-राजिभ्यश्च क्विप्, क्रमेण प्रयोगाः । [१६](दिवि सीदतीति) दिविषत्=देवः, सप्तम्या अलुप्, 'भीरुष्ठानादयः' (२।३।३३) इति षः। देवौ (?) । [१७]सभ्याः=सभापुरुषाः (?सभ्यः =सभापुरुषः)। [१८]'प्रसत्', प्रसीदतीति प्रसत्=प्रसादकरः। एवमुपसत्=पार्श्ववर्त्ती। [१९]अण्डं सूते। [२०]प्रसूते । मित्रं द्वेष्टीति [२१]मित्रद्विट् । [२२]प्रद्वेष्टीति । [२३]हन्, भृशं हन्ति (इति) यङ्, 'हनो घ्नीर्वधे' (४।३।९९) इत्यनेन घ्नी, ततः 'सन्यङश्च' (४।१।३) इति द्वित्वम्, सीष्ट, 'स्वरः' (३।४।६९) इति ञिट्, 'अतः' (४।३।८२) अकारलोपः। मित्रेण युष्माकं द्विषः= शत्रवो जेघ्नीयिषीष्ट इत्यर्थः । [२४]मित्रं द्रुह्यति,-- मित्रध्रुक् । [२५]गां दोग्धीति गोधुक्। [२६]कामं दोग्धीति कामधुक्, 'भ्वादेर्दादेर्घः' (२।१।८३) इति हस्य घः, 'धुटस्तृतीयः' (२।१।७६) इति गः, 'गडदबादे०' (२।१।७७) इति दस्य धः, 'विरामे वा' (१।३।५१) क्। [२७]अश्वं युनक्तीति अश्वयुक्। सर्वत्र क्विप्, ततः सिः, 'दीर्घङ्याब्व्यञ्जनात्सेः' (१।४।४५) इति सिलोपः। [२८]युनक्तीति युङ् क्विप्, सिः, 'युञ्जोऽसमासे' (१।४।७१) इति नोऽन्तः, सिलोपः, 'युजञ्चक्रुञ्चो०' (२।१।७१) इत्यनेन नस्य ङ्, अन्यत्र (युञ्जौ इत्यादिषु) 'तवर्गस्य०' (१।३।६०) इति नोऽन्तस्य ञ्। अश्वयुक् इत्यत्र समासत्वात् नोऽन्तो न प्राप्नोति। [२९]दध्यञ्चतीति क्विप्, [३०]देवमञ्चतीति देवद्र्यङ्, [३१]अमुमञ्चति, सर्वत्र क्विप्, 'सर्वादिविष्वग्०' (३।२।१२२) इति डद्रिः, 'अचः' (१।४।६९) इति नोऽन्तः, 'युजञ्च०' (२।१।७१) नोऽन्तस्य ङ्। प्राङ् प्रत्यङ् इत्यत्र प्राञ्चतीति प्रत्यञ्चतीति वाक्याभ्यां क्विप्। [३२]दिश्यते इति दिक्, क्विप्, 'ऋत्विजदिशदृशस्पृशस्रजदधृषुष्णिहो गः' (२।१।६९) इति गादेशः।१४८।

## स्पृशोऽनुदकात् ॥५।१।१४९॥

म० वृ०--उदकवर्जान्नाम्नः परात्स्पृशेः 'क्विप्' स्यात्। घृतस्पृक्, मर्मस्पृक्। अनुदकादिति किम्? उदकस्पर्शः॥१४९॥

अव०–अनुदकादिति पर्युदासाश्रयणादुदक-सदृशं अनुपसर्गं नाम गृह्यते, तेनेह क्विप् न स्यात्,-उपस्पृशति ॥१४९॥

## अदोऽनन्नात् ॥५।१।१५०॥

म० वृ०–अन्नवर्जान्नाम्नः परादद्‌ः 'क्विप्' स्यात् । आममत्ति-आमात्, सस्यात् । अनन्नादिति किम् ? अन्नादः । बहुलाधिकारात् कणादः पिप्पलादः । क्विप् सिद्धः, अन्नप्रतिषेधार्थं वचनम् ॥१५०॥

## क्रव्यात्-क्रव्यादावाम-पक्वादौ ॥५।१।१५१॥

म० वृ०–क्रव्यात्क्रव्यादशब्दौ यथासंख्यं 'क्विबणन्तौ' निपात्येते, यदि आमात्पक्वाद्याभिधेयौ स्याताम् । क्रव्यात्=आममांसभक्षः, क्रव्यादः=पक्वमांसभक्षः ॥१५१॥

अव०–क्रव्यादशब्दः पक्वमांसभक्षणे वर्त्तते । तथा निपातनात् क्रव्यात्, अत्र क्विप् । क्रव्याद इत्यत्र च निपातनात् अण् । तथा आममांसवाच्यपि क्रव्यात् (? क्रव्यशब्दः) क्रव्याद इति निपातनसामर्थ्यात् वृत्तौ पक्वमांसे वर्त्तते । अथवा कृत्तविकृत्त-शब्दस्य,विशेषेण कृत्तं-विकृत्तम् पूर्वं कृत्तं द्विधा त्रिधा; सामान्येन पक्वमित्यर्थः,(पश्चात् विकृत्तम्,) विशेषेण ईषद्वा कृत्तम्, त्रिशिष्टमीषत् (वा) पक्वमित्यर्थः, ततः कृत्तं (च) तत् विकृत्तं च कृत्तविकृत्तम्, तस्य कृत्तविकृत्तस्य शब्दस्य पक्वमांसार्थस्य पृषोदरादित्वात्क्रव्यादेशः क्रियते । क्विबणप्रत्ययौ सिद्धौ, विषयनियमार्थं वचनमिति ॥१५१॥

## त्यदाद्यन्य-समानादुपमानाद् व्याप्ये दृशष्टक्सकौ च ॥५।१।१५२॥

म० वृ०–त्यदादेः, अन्यशब्दात् समानशब्दाच्चोपमानभूतात् व्याप्ये कर्मणि वर्त्तमानात् पराद् दृशोऽर्थे एव 'टक्, सक् क्विप् च' भवन्ति । त्यदादि,-स्य इव दृश्यते- त्यादृशः [ टक् ], त्यादृशी [टक् ]; त्यादृक्षः [सक् ], त्यादृक्षा [ सक् ]; क्विप्,-त्यादृक् । एवं तादृशः, तादृशी; तादृक्षः, तादृक्षा; तादृक् । अन्य,- अन्यादृशः, अन्यादृशी; अन्यादृक्षः, अन्यादृक् । समान,-[१]सदृशः, सदृशी; सदृक्षः, सदृक्षा; सदृक् । एभ्य इति किम् ? वृक्ष इव दृश्यते । उपमानादिति किम् ? स दृश्यते ॥१५२॥

अव०–[१]'दृग्दृशदृक्षे'(३।२।१५१। इति) समानस्य सभावः ॥१५२॥

## कर्तुर्णिन् ॥५।१।१५३॥

म० वृ०–कर्तृवाचिन उपमानभूतान्नाम्नः पराद्धातोः-'णिन् प्रत्ययः' स्यात् । कृत्त्वात् कर्त्तरि । उष्ट्र इव क्रोशति उष्ट्रक्रोशी,[१] ध्वाङ्क्षरावी, सिंहनर्दी[२] । कर्तुरिति किम् ? शालीनिव कोद्रवान् भुङ्क्ते । अशीलार्थो जात्यर्थश्चारम्भः ॥१५३॥

अव०–[१]ध्वाङ्क्ष इव (रौ)ति । [२](एवं) स्वरनादी ॥१५३॥

## अजातेः शीले ॥५।१।१५४॥

म० वृ०–अजातिवाचिनो नाम्नः पराद्धातोः शीलेऽर्थे 'णिन्' स्यात् । उष्णं भुङ्क्ते इत्येवं शीलः उष्णभोजी, शीतभोजी । अजातेरिति प्रसज्यप्रतिषेधादसत्त्ववाचिनोऽप्युपसर्गाण्णिन्,- उदा सरतीत्येवंशील उदासारी, प्रत्यासारी, प्रस्थायी, प्रतिबोधी, अयायी (? प्रयायी), प्रतियायी । अजातेरिति किम्? ब्राह्मणानामन्त्रयिता,[१] शालीन् भोक्ता ॥१५४॥

अव०–[१]'तृन् शीलधर्मसाधुषु' (५।२।२७) इत्यनेन तृन् । शील इति किम् ? उष्णभोज आतुरः । (इदं) शालीन् भोक्ता इत्यस्याग्रे ज्ञेयानि (? ज्ञेयम्) ॥१५४॥

## साधौ ॥५।१।१५५॥

म० वृ०–नाम्नः पराद्धातोः साध्वर्थे 'णिन्' स्यात् । अशीलार्थं आरम्भः । [१]साधुकारी, [२]साधुदायी, [३]चारुनर्त्ती, [४]सुष्ठुगामी । [५]बहुलाधिकारात्

साधु वादयति वादको वीणाम्, साधु गायतीत्यादौ न णिन् ॥१५५॥

अव०-[1]साधु करोतीति । [2]साधु ददाति । [3]चारु नृत्यतीति । [4]सुष्ठु=शोभनं गच्छति । [5]प्रभोक्ता, संभोक्ता इत्यत्र बहुलाधिकारान्न णिन् ।१५५।

## ब्रह्मणो वदः ॥५।१।१५६॥

म० वृ०-ब्रह्मपराद्वदे-'णिन्' स्यात्। ब्रह्मवादी ॥ १५६ ॥

अव०-ब्रह्म ब्रह्माणं वा वदति-ब्रह्मवादी । अयमपि योगोऽशीलार्थ आरम्भः, जात्यर्थोऽसरूपविधिः ( ? धेः) 'कर्मणोऽण्' (५।१।७२) इत्यादेर्निवृत्त्यर्थश्च ॥१५६॥

## व्रता-ऽऽभीक्ष्ण्ये ॥५।१।१५७॥

म० वृ०-[1]व्रताभीक्ष्ण्यार्थे नाम्नः पराद्धातो-'णिन्' स्यात्। व्रते,-[2]अश्राद्धभोजी, स्थण्डिलवर्त्ती, पार्श्वशायी[3] । आभीक्ष्ण्ये,-[4]क्षीरपायिण उशीनराः, तक्रपायिणः सौराष्ट्राः[5] । व्रतादिति किम् ? स्थण्डिले शेते-स्थण्डिलशयः । बहुलाधिकारादाभीक्ष्ण्येऽपि न णिन्,-कुल्माषखादाश्चौलाः ॥१५७॥

अव०-[1]व्रतं शास्त्रितो नियमः, आभीक्ष्ण्यं पौनःपुन्यम्, व्रतेऽर्थे आभीक्ष्ण्येऽर्थे च गम्यमाने इत्यर्थः। [2]अश्राद्धं भुङ्क्ते। [3](एवम्) अलवणभोजी, स्थण्डिलशायी, वृक्षमूलवासी इत्यपि। अत्र सर्वत्र तदन्यवस्तुवर्जनमिह व्रतं गम्यते । [4]पुनः पुनः क्षीरं पिबन्ति क्षीरपायिणः । [5]एवं कषायपायिणो गान्धाराः, सौवीरपायिणो बाह्लीकाः । एषु सर्वत्र 'घोत्तरपदान्तनस्यादेरयुवपक्वाह्नः' (२।३।७५) इत्यनेन नस्य णकारः ॥१५७॥

## करणाद्यजो भूते ॥५।१।१५८॥

म० वृ०-करणवाचिनो नाम्नः पराद् यजेः भूते [अतीते]ऽर्थे 'णिन्' स्यात्। [1]अग्निष्टोमयाजी । भूत इति किम् ? अग्निष्टोमेन यजते ॥१५८॥

अव०-[1]अग्निष्टोमेन इष्टवान् । करणादिति किम् ? गुरून् इष्टवान् । दरी-(?) ॥१५८॥

## [1]निन्द्ये व्याप्यादिन् विक्रियः ॥५।१।१५९॥

म० वृ०-व्याप्यान्नाम्नः पराद्विपूर्वात् क्रीणातेर्भूतेऽर्थे कर्त्तरि निन्द्ये 'इन्' स्यात् । सोमविक्रयी, घृतविक्रयी, तैलविक्रयी विप्रः[2] । निन्द्य इति किम् ? घृतविक्रायो[3] वणिक् ॥१५९॥

अव०-[1]कर्त्तरि निन्द्ये इति । [2]विप्रजातिस्यात् सोमघृततैलादिविक्रये निन्द्यत्वम्। विक्रयणम्=विक्रयः, 'युवर्ण०' (५ ३।२८) इत्यल् , घृतस्य विक्रयः=घृतविक्रयः, घृतविक्रयोऽस्यास्तीति घृतविक्रयी, (इत्येवं) मत्वर्थीयेनेना सिध्यति, कुत्सायामण्बाधनार्थं वचनमिदम् । [3]धान्यविक्रायः तैलविक्राय इत्यपि ॥१५९॥

## हनो णिन् ॥५।१।१६०॥

म० वृ०-व्याप्यान्नाम्नः परात् हन्तेः भूतेऽर्थे निन्द्ये कर्त्तरि 'णिन' स्यात् । पितृघाती,मातुलघाती । असरूपत्वादणपि,-पितृघातः । निन्द्ये इति किम ? [1]शत्रुघातः ॥१६०॥

अव०-घञन्तान्मत्वर्थीयेनेना सिद्धे भूतकुत्सायामन्यत्र शत्रुघातीत्यादौ मत्वर्थीयनिवृत्त्यर्थं 'हनो णिन' इति सूत्रं कृतम् । तथा व्याप्यादिति किम् ? दण्डेन हतवान् । [1]शत्रुं हतवान् ॥१६०॥

## ब्रह्म-भ्रूण-वृत्रात् क्विप् ॥५।१।१६१॥

म० वृ०-ब्रह्मादिभ्यः कर्मभ्यो हन्तेर्भूतेऽर्थे 'क्विप्' स्यात् । ब्रह्महा, [2]भ्रूणहा, [3]वृत्रहा । 'क्विप्' (५।१।१४८) इत्यनेनैव सिद्धे नियमार्थं वचनम् । [4]चतुर्विधोऽत्र नियमः ॥१६१॥

अव०-[1]ब्रह्माणं हतवान् । [2]भ्रूणं [3]वृत्रं हतवान् । [4]चतुर्विधोऽत्र नियमः, तथाहि- धातुनियमः १, उपपदनियमः २, कालनियमः३, प्रत्ययनियमः४ ।ब्रह्मादिभ्यः एव हन्तेः क्विप् , नान्यस्मात् उपपदपूर्वकात् इति धातुनियमः१ । पुरुषं

हतवान्=पुरुषघातः, तथा मधोर्हन्ता हनिष्यति वा इति वाक्ये मधुहा, एवमहिहा, गोत्रहा, हिमहा, तमोपहा; एषु सर्वत्र वर्त्तमानभविष्यतोः कालमात्रे वा 'क्विप्' (५।१।१४८) इति सूत्रेणैव क्विप् । तथा ब्रह्मादिभ्यो हन्तेरेव क्विप् ,नान्यस्माद्धातोरिति उपपदनियमः२ । ब्रह्माधीतवान्=ब्रह्माध्याय इत्यणेव, न तु क्विप् । तथा ब्रह्मादिभ्यो हन्तेः क्विप् , नान्यः प्रत्ययः इति कालनियमः३ । ब्रह्माणं हतवान् , अत्र क्विबेव, नाण्णिनौ । वृत्रघ्नादयस्तु कालसामान्येन 'ब्रह्मादिभ्यः' (५।१।८५) इति टक्प्रत्यये साधवः । 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' इति क्विपाऽणादिरेव बाध्यते, न क्तक्तवतू । तथा ब्रह्मादिभ्यो हन्तेः क्विप् भूत एव काले, नान्यस्मिन् काले इति प्रत्ययनियमः ४ । ब्रह्माणं हन्ति हनिष्यति वा - ब्रह्मघात इत्यणेव । तदेतत् सर्वं बहुलाधिकाराल्लभ्यते ॥१६१॥

## कृगः सु-पुण्य-पाप-कर्म-मन्त्र-पदात् ॥५।१।१६२

म० वृ०–सुशब्दात् पुण्यादिशब्देभ्यश्च कर्मभ्यः परात्करोतेर्भूतेऽर्थे 'क्विप्' स्यात् । सुष्ठु कृतवान् सुकृत् , पुण्यं कृतवान्– पुण्यकृत् , पापं कृतवान् पापकृत् , कर्मकृत् , मन्त्रकृत् , पदकृत् । इदमपि वचनं नियमार्थम् , त्रिविधश्चात्र नियमः ॥१६२॥

---

अव०–'कृगः सुपुण्य०' इति सूत्रे त्रिविधो नियमः , तथाहि– उपपदनियमः, प्रत्ययनियमः, कालनियमः । तथा एभ्यः सुपुण्यादिभ्यः कृगः एव भूते क्विप् , नान्यस्माद्धातोरिति उपपदनियमः,तेन मन्त्रमधीतवान्=मन्त्राध्यायः इत्यणक्ता ❀ एव भवन्ति,न क्विप् १ । मन्त्रविन् पापविन् , तथा ब्रह्मवित् इत्यादौ तु भूताविवक्षायां सामान्येन क्विप् । तथा एभ्यः सुपुण्यादिभ्यः कृगो भूते एव क्विप् , नान्यस्मिन् काले इति प्रत्ययनियमः , तेनेह न भवति,– कर्म करोति करिष्यति वा कर्मकारः, एवं मन्त्रकारः; पदकारः २ । एभ्यः सुपुण्यादिभ्यः परात् कृगो भूते क्विबेव भवति,नान्यः प्रत्ययः इति कालनियमः, तेन 'कर्म कृतवान्' इति वाक्ये 'कर्मकृत्' इत्येतत्प्रयोगः, न कर्मकार इति ३ । तथा एभ्य एव सुपुण्यादिभ्यः कृगो भूते क्विप् इति धातुनियमो नेष्यते, तेन तीर्थकृत् , शास्त्रकृत् , सूत्रकृत् , वृत्तिकृत् , भाष्यकृदित्यादयः प्रयोगाः सिद्धा भवन्ति । इति सर्वं बहुलाधिकारात् विज्ञायते ॥१६२॥

## सोमात्सुगः ॥५।१।१६३॥

म० वृ०–सोमात्कर्मणः परात्सुनोतेः [ 'षुंग्ट् अभिषवे' ] भूतेऽर्थे 'क्विप्' स्यात् । सोमं सुतवान् सोमसुत् ॥१६३॥

---

अव०–'सोमात्सुग' इति सूत्रे चतुर्विधो नियमः,– धातुनियमः १, उपपदनियमः २, प्रत्ययनियमः ३, कालनियमः ४ । सोमादेवेति धातुनियमः १ । सुरां सुतवान्– सुरासाव इत्यण् । सुरासुदिति भूताविवक्षायाम् । सुग एवेति उपपदनियमः २ । सोमं पीतवान्– सोमपा इति विच् । भूते एवेति नियमात् ३ सोमं सुनोति सोष्यति वा, (न) सोमसुत् , सोमासाव इत्यण् । क्विबेवेति नियमात् ४ सोमं सुतवान् इत्यण् न भवति ॥१६३॥

## अग्नेश्चेः ॥५।१।१६४॥

म० वृ०–अग्नेः कर्मणः पराच्चिनोतेर्भूतेऽर्थे क्विप् स्यात् । अग्निचित् । अत्रापि चतुर्विधो नियमः । धातुनियमः,– अग्नेरेवेति नियमात् कुड्यं चितवान्=कुड्यचाय इत्यण् । उपपदनियमः,- चेरेवेति नियमात् अग्निं कृतवान्=अग्निकारः । प्रत्ययनियमः,– भूते एवेति नियमात् अग्निं चिनोति चेष्यति वा अग्निचायः । कालनियमः,– क्विबेवेति नियमात् अग्निं चितवान् इत्यण् न भवति ॥१६४॥

## कर्मण्यग्न्यर्थे ॥५।१।१६५॥

म० वृ०–कर्मणः पराच्चिनोतेः कर्मणि कारकेऽ-

---

❀ अण् च क्तौ च = अणक्ताः । 'क्तौ' इत्यनेन क्तक्तवतू गृह्येते ।

ग्न्यर्थे वाक्ये भूतेऽर्थे 'क्विप्' स्यात्। श्येन इव चीयते स्म– श्येनचित्, कङ्कचित्, (रथचक्रचित्)। अग्न्यर्थ इष्टकाचय उच्यते ॥ १६५ ॥

अव०–श्येनचित्, कङ्कचित्, रथचक्रचित् इति प्रयोगा बहुलाधिकाराद् रूढिविषये एव द्रष्टव्याः॥ १६५ ॥

## दृशः क्वनिप् ॥५।१।१६६॥

म० वृ०–कर्मपराद् दृशेर्भूतेऽर्थे 'क्वनिप्' स्यात्। विश्वं दृष्टवान्–विश्वदृश्वा, बहुदृश्वा, परलोकदृश्वा। सामान्यसूत्रेण क्वनिपि सिद्धे भूतकाले * प्रत्ययान्तरबाधनार्थं वचनम् ॥१६६॥

## सह-राजभ्यां कृग्युधेः ॥५।१।१६७॥

म० वृ०–सहराजभ्यां कर्मभ्यां परात्करोतेर्युधेश्च भूतेऽर्थे 'क्वनिप्' स्यात्। सह कृतवान्–सहकृत्वा, एवं सहकृत्वानौ। सह युद्धवान्– सहयुध्वा। राजानं कृतवान्– राजकृत्वा, [1]राजयुध्वा। कर्मण इत्येव– राजा युद्धवान् ॥१६७॥

अव०–[1]राजानं युद्धवान् इति वाक्यं कार्यम्। युधिधातुरन्तर्भूतण्यर्थः सकर्मको भवति इति 'राजानं योधितवान्' इति परिणा (परिणाहेन) वाक्यमस्ति, परं तत्त्वतो 'राजानं युद्धवान्' इति वाक्यं कार्यम्। अयमपि 'सहराजभ्याम्०' इत्यारम्भः प्रत्ययान्तरबाधनार्थो ज्ञातव्यः ॥१६७॥

## अनोर्जनेर्डः ॥५।१।१६८॥

म० वृ०–कर्मपरादनुपूर्वाज्जनेर्भूतेऽर्थे 'डप्रत्ययः' स्यात्। [1]पुमनुजः, [2]स्त्र्यनुजः ([3]आत्मानुजः) ॥१६८॥

अव०–[1]अनुपूर्वो जनिर्जननोपसर्जनायां प्राप्तौ वर्त्तमानः सकर्मकः, तेन पुमांसमनुजातः इति वाक्यं सिद्धम्। [2]स्त्रियमनुजातः। [3]आत्मानमनुजात इति ॥१६८॥

## सप्तम्याः ॥५।१।१६९॥

म० वृ०–सप्तम्यन्ताद् नाम्नः परात् जनेर्भूतेऽर्थे 'डः' स्यात् मन्दुरजः,[1] अप्सु जातम्– अप्सुजम्,[2] अब्जम् ॥१६९॥

अव०–[1]मन्दुरायां मन्दुरे वा जातो मन्दुरजः। [2]अप्सुजमित्यत्र 'वर्षक्षरवराप्सर०' (३।२।२६) इत्यनेन अलुप् समासः ॥१६९॥

## अजातेः पञ्चम्याः ॥५।१।१७०॥

म० वृ०–पञ्चम्यन्तादजातिवाचिनो नाम्नः [परात्] जनेर्भूतेऽर्थे 'डः' स्यात्। बुद्धेर्जातः– बुद्धिजः संस्कारः, संस्कारजा स्मृतिः, सन्तोषजं सुखम्। अजातेरिति किम्? गजाज्जातः ॥१७०॥

## क्वचित् ॥५।१।१७१॥

म० वृ०–उक्तादन्यत्रापि क्वचिल्लक्ष्यानुसारेण 'डः' स्यात्। उक्तान्नाम्नोऽन्यतोऽपि डः,– किं जातेन= किञ्जः, केन जातः= किञ्जः,[1] द्विर्जातः= द्विजः, न जातः=अजः, प्रजाताः=प्रजाः[2]। अकर्मणोऽपि,– अनु=पश्चाज्जातः= अनुजः। जातेरपि,– ब्राह्मणाज्जातः ब्राह्मणजः पशुवधः, क्षत्रियजं युद्धम्, स्त्रीजमनृतम् = अलीकम्। उक्ताद्धातोरन्यतोऽपि [जनिधातोरन्यत्रापि डः]– ब्रह्मणि जीनवान्= ब्रह्मज्यः, उक्तान्नाम्नो धातोश्चान्यतोऽपि डः,– वराहः। उक्तान्नाम्नो धातोः कारकाच्चान्यतोऽपि डः,– परिखाता= परिखा, आखाता= आखा[3] [उपखा]। नामाभावे उक्त(धातु)कालान्यत्वे,– अटति अतति वा= अः, [4]कः, भातीति भमृक्षम [ नक्षत्रम ] तथा खन्यते= खम्[4] ॥१७१॥

अव०–[1]अनिर्ज्ञातपितृकः किञ्जः उच्यते। [2]एवमलं जातेन=अलञ्जः, अधिजातेन= अधिजः, परिजातेन= परिजः। [3]'परिखा, आखा' इत्यस्याग्रे नामधातुकालान्यत्वे डः,– मित्रं ह्वयति= मित्रह्वः। अत्र अणोऽपवादो डः। धातुकारकान्यत्वे डः,– पटे

* अणादिबाधनार्थम्।

हन्यते= पटहः । धातुकालान्यत्वे डः,-वार् चरति= वार्चो हंसः । नामकारकान्यत्वे डः,- पुंसाऽनुजातः= पुंसानुजः । ४"कैं गैं रैं शब्दे' कायति कामयते वा कः । ४तथा नामाभावे कारकान्यत्वे च डो भवति,- यथा खन्यते इति खम् । एषा अवचूरिर्ज्ञातव्या ।१७१।

## सु-यजो ङ्वनिप् ॥५।१।१७२॥

म० वृ०-सुनोतेर्यजेश्च भूतेऽर्थे वृत्ते 'ङ्वनिप्' स्यात् । सुतवान्= सुत्वा, इष्टवान्- यज्वा । क्वनिप्-वनिभ्या सिद्धे भूतनियमार्थं वचनम् । मन्त्रादिसूत्रस्थक्वचिच्छब्दस्यैव प्रपञ्चः ॥१७२॥

अव०-ङकारो गुणनिषेधार्थः । पकारः पित्कार्यार्थः । इकार उच्चारणार्थः । ॥१७२॥

## जॄषोऽतृः ॥५।१।१७३॥

म० वृ०-जॄषो भूतार्थाद् 'अतृः' स्यात् । जीर्यते स्म= जरन्, १ जरती । असरूपत्वाज्जीर्णः, जीर्णवान् ॥१७३॥

अव०-१"जॄष् झॄष्च् जरसि' 'ऋदुदितः' (१।४।७०) इति नोऽन्तः, 'पदस्य' (२।१।८९) इति 'त्' लुप्यते । ❀'जॄषोऽतृ' इति सूत्रेऽतृप्रत्यये ऋकारोऽनुबन्धो दीर्घत्वप्रतिषेधार्थः,कोऽर्थः ? 'अभ्वादेरत्वसः सौ' (१।४।७०) इति सूत्रेण दीर्घः प्रतिषिध्यते, यतो'ऽभ्वादे०' (१।४।९०) इति सूत्रे 'अतु' इति उकारानुबन्धकरणात् ऋदितः= ऋकारानुबन्धप्रत्ययस्य दीर्घो न भवति, यथा पचन् , जरन् ॥१७३॥

## क्तक्तवतू ॥५।१।१७४॥

म० वृ०-भूतार्थवृत्तेर्धातोः 'क्तक्तवतू प्रत्ययौ' भवतः । क्रियते स्म=कृतः, करोति स्म=कृतवान् । [प्रकर्तुमारब्धः=] प्रकृतः, प्रकृतवान् कटं मैत्रः, अत्र समुदायस्याभूतत्वेऽपि कटैकदेशे कटत्वोपचारात् तस्य कटैकदेशस्य च निर्वृत्तत्वाद्=निष्पन्नत्वात् भूते एव धात्वर्थे (? भूतः एव धात्वर्थः) इति गत्यादि ( ? १इत्यादि )कर्मण्यप्यनेनैव क्तक्तवतू सिद्धौ ॥१७४॥ ग्रं० २७४ ॥

अव०-१'आदि कर्मणि', कोऽर्थः ? आरम्भेऽप्यर्थे अनेनैव 'क्तक्तवतू' सूत्रेणैव क्तप्रत्ययः क्तवत्-प्रत्ययः सिद्धः। अत एव वृत्तौ प्रकृतः कटं मैत्रः, प्रकृतवान् कटं मैत्रः इति प्रयोगौ आरम्भेऽर्थे दर्शितौ इति विशेषः । 'आरम्भे' (५।१।१०) इति सूत्रे इत्युक्तम्,—आदिकर्मणि यो क्तो विहितोऽस्ति स कर्त्तरि वा भवति इत्यर्थः ॥१७४॥ अत्र सूत्रे अवचूरिश्लोक-५११।अक्षर- २४ ॥

❀ नन्वत्र प्रत्यये उकारानुबन्धे कृतेऽपि'जरन्' जरती' इति सिद्ध्यति, अतोऽत्र 'अतुप्रत्ययः' क्रियतामित्याह- 'जॄषोऽतृ इति सूत्रेऽतृप्रत्यये' इत्यादि, अयं भावः—उकारानुबन्धे कृते अभ्वादेरत्वसः सौ (१।४।७०) इति दीर्घः स्यात्, यथा भवतुशब्दस्य भवानिति, तन्निवारणार्थमृकारानुबन्धो क्रियते, कृते तस्मिन् न नदीर्घप्राप्तिः ।

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने पञ्चमाध्यायस्य प्रथमः पादः समाप्तः ॥

॥ अर्हम् ॥

# ॥ पञ्चमोऽध्यायः ॥

## [ द्वितीयः पादः ]

★

### श्रु-सद्-वस्भ्यः परोक्षा वा ॥५।२।१॥

म० वृ०–भूत इत्यनुवर्त्तते । श्रु इत्यादिधातुभ्यो भूतार्थवृत्तिभ्यः 'परोक्षा विभक्तिर्वा' स्यात् । उपशुश्राव, उपससाद, [१]अनूवास । पक्षे-[२]यथास्वकालं ह्यस्तन्यद्यतन्यौ च । ह्यस्तनी,-[३]उपाश्रृणोत् ; अद्यतनी,-उपाश्रौषीत्[४]; उपासीदत्[५], उपासदत्[६]; अन्ववसत्, अन्ववात्सीत्[७] । असरूपत्वादेवाद्यतन्यादिसिद्धौ वा वचनं [८]विभक्तिष्वसरूपोत्सर्गविभक्तिसमावेशनिषेधार्थम् ॥१॥

---

अव०–[१]'यजादिवस्वचः' (४।१।७२) इत्यादिना पूर्वधातोर्द्वित्वस्य य्वृत् । [२]'यथास्वकालम्'; कोऽर्थः ? अद्यतने कालेऽद्यतनी विभक्तिर्भवति, अनद्यतनकाले च ह्यस्तनी भवतीत्यर्थः । [३]'उपाश्रृणोत्', 'श्रौतिकृवु०' (४।२।१०८) इति शृ । [४]'उपाश्रौषीत्', 'सिचि परस्मै समा०' (४।३।४४ इति) वृद्धिः । [५]'उपासीदत्', 'श्रौति०' (४।२।१०८) इति सदेः सीद् । [६]'उपासदत्',अत्र 'लृदिद्द्युतादि०' (३।४।६४) इति अङ् । [७]'अन्ववात्सीत्' इत्यत्र सिच्, ईत्, 'व्यञ्जनानामनिटि' (४।३।४५) इति वृद्धिः, 'सस्तः सि' (४।३।९२) इत्यनेन धातुसकारस्य त् । एवं शुश्रुवे, अश्रावि, अश्रूयतेत्यादिरपि ज्ञेयः । [८]'विभक्तिष्वसरूप' इत्यादि, तेन विभक्तीनामेवान्योन्यमसरूपविधिर्नास्ति, प्रत्ययेन तु विभक्तीनामस्त्येव; तेन 'उपश्रुतवान्' इत्यादि सिद्धम् । 'श्रुसद्वस्भ्यः' इति बहुवचनं व्याप्त्यर्थम्, तेन भूतानद्यतनेऽपि इयं परोक्षा ह्यस्तन्या न बाध्यते इत्यक्षराणि अन्ववात्सीत् इत्यस्याग्रे ज्ञातव्यानि । तदनन्तरमसरूपत्वादेवेत्याद्यक्षराणि योज्यानि ॥१॥

### तत्र क्वसु-कानौ तद्वत् ॥५।२।२॥

म० वृ०–तत्र, कोऽर्थः ? परोक्षामात्रविषये, धातोः परौ 'क्वसुकानौ' प्रत्ययौ भवतः[१] । क्वसुकानौ परोक्षावद् व्यपदिश्येते । शुश्रुवान्, सेदिवान्, [२]ऊषिवान्, पेचिवान्, पाचयाञ्चकृवान्, जग्मिवान्, पपिवान्, [३]पेचानः, चक्राणः[४] । परोक्षावद्भावादेव कित्त्वे सिद्धे [ क्वसुकानौ इत्यत्र ] कित्करणं संयोगान्तधात्वर्थम्, तेन [अञ्जौप्-]आजिवान्,[भञ्जौप् -] बभज्वान् ; एषु कित्वान्नलोपः[५] । [६]ऋदन्तानां गुणप्रतिषेधार्थं च– तितीर्वान्[७],पपूर्वान्[८]; कर्मणि,– [९]ततिराणः, पपुराणः । बहुलाधिकारात् श्रुसद्वसिभ्यो न कानः । भूताधिकारेणैवोक्तपरोक्षाविषयत्वे लब्धे तत्र ग्रहणं [१०]परोक्षामात्रप्रतिपत्त्यर्थम्, तेन पेचिवानित्यादि सिद्धम् ॥२॥

---

अव०–[१]तत्र क्वसुः परस्मैपदित्वात् कर्त्तरि, कानस्तु आत्मनेपदित्वात् भावकर्मणोरपि भवति । [२]'ऊषिवान्', (एवम्) अनूषिवान्, अध्यूषिवान् । [३]कानः, पेचे (इति) वाक्यम् । [४]चक्रे (इति) वाक्यम् । [५]'नो व्यञ्जनस्यानुदितः' (४।२।४५) इत्यनेन नस्य लोपः । [६]'ऋदन्तानां च, इति, 'स्कृच्छृतोऽकि परोक्षायाम्' (४।३।८) इति गुणप्राप्तिः । [७]ततार । [८]पपार, एवं शशार- शिशीर्वान् । [९]'ततिराणः', एवं शशिराणः । [१०]'परोक्षामात्र' इति, अन्यथा 'श्रुसद०' (५।२।१) इत्यनेन विहितपरोक्षाविषये एव क्वसुकानप्रत्ययः स्यात्, तेभ्य एव भूतमात्रे विधानात्; न तु "परोक्षे" (५।२।१२) इति सूत्रविहितपरोक्षाविषये । भूताधिकारे ह्यनु-

वर्त्तमाने अपरोक्ष एवातीते प्रत्ययः स्यात् । परोक्षे त्वतीते परत्वात् परोक्षाविभक्तिः स्यादिति उभयोरप्यर्थः संगृह्यते इति भावः, तेन पपाचेति वक्तव्ये पपाच इति वाक्ये पेचिवान् इति सिद्धम् । उपसेदिवान्, प्रसेदिवान्, निषेदिवान् इत्यपि ॥२॥

## वेयिवद्-ऽनाश्वद्-ऽनूचानम् ॥५।२।३॥

म० वृ०–एते शब्दा भूतेऽर्थे 'क्वसुकानान्ताः' कर्त्तरि वा निपात्यन्ते । ईयिवान्, उपेयिवान्; अनाश्वान्, अनूचानः । [1]पक्षे-अगात्[2], उपागात्; [3]उपैत्, [4]उपेयाय; [5]नाशीत्, [6]नाश्नात्, [7]नाश; [8]अन्ववक्, [9]अन्ववोचत्, [10]अनूवाच ॥३॥

---

अव०–[1]'पक्षे', कोऽर्थः ? वावचनात्पक्षे अद्यतन्यादयोऽपि । [2]'अगात्', 'इणक् गतौ'अद्यतनी-दिः, सिच्, 'इणिकोर्गा' (४।४।२३) इति सूत्रेण इणो गादेशः, 'पिबैतिदा०' (४।३।६६। इति) सिचो लुप् । [3]'उपैत्', इण्, ह्यस्तनीदि, 'एत्यस्तेर्वृद्धिः' (४।४।३०।इति) ऐ । [4]'उपेयाय'(अत्र) परोक्षा । [5]'नाशीत्', अत्र 'अशश् भोजने'(इति) अश्, नञ् पूर्वम्, अद्यतनी, 'स्वरादेस्तासु' (४।४।३१) इति वृद्धिः 'आ' । [6]'नाश्नात्', अत्र ह्यस्तनी । [7]'नाश' इत्यत्र परोक्षा । [8]'अन्ववक्', ह्यस्तनी-दि 'व्यञ्जनाद्ः देः सश्च दः'(४।३।७८) इति दिलोपः । [9]'अन्ववोचत्', अद्यतनी, 'शास्त्यसू०' ( ३।४।६०। इति ) अङ्, 'श्वयत्यसू०' (४।३।१०३) वोच् । [10]'अनूवाच' इत्यत्र परोक्षा, 'यजादिवशवच०' (४।१।७२) इति अभ्यासे य्वृत् 'उकारः' । निपातनस्य इष्टविषयत्वान्न कर्त्तु-रन्यत्र 'अनुक्तम' इत्याद्येव ॥३॥

## अद्यतनी ॥५।२।४॥

म० वृ०–भूतेऽर्थे धातो–'रद्यतनीविभक्तिः' स्यात् । अकार्षीत् ॥४॥

## विशेषाविवक्षा-व्यामिश्रे ॥५।२।५॥

म० वृ०–'अनद्यतनादि[1]विशेषस्याविवक्षायां व्यामिश्रणे च सति भूतेऽर्थे धातोः परतो-'ऽद्यतनी' स्यात् । अगमाम घोषान्, अपाम पयः, रामो वनमगमत्; सतोऽप्यत्र विशेषस्याविवक्षा,यथा अनुदरा कन्या[2] । व्यामिश्रे,-अद्य ह्यो वा भुक्ष्महि । विशेषाविवक्षेति किम् ? अगच्छाम घोषान्, अपिबाम पयः, रामो वनं जगाम ॥५॥

---

अव०–[1]आदिशब्दात् परोक्षपरिग्रहः । [2](एवम्) अलोमिका एडका ॥५॥

## रात्रौ वसोऽन्त्ययामास्वप्तर्यद्य ॥५।२।६॥

म० वृ०–रात्रौ भूतेऽर्थे वसतेर्ह्यस्तन्या एवापवादोऽद्यतनी स्यात्, [1]अन्त्ययामास्वप्तरि=स चेदर्थो यस्यां रात्रौ भूतः तस्या एवान्त्ययामं व्याप्याऽस्वप्तरि कर्त्तरि वर्त्तते, [2]अद्य=तेनैवान्त्ययामेनावच्छिन्नेऽद्यतने चेत् प्रयोगो भवति, नाद्यतनान्तरे । [3]अमुत्रावात्सम् । रात्र्यन्त्ययामे तु मुहूर्त्तमपि स्वापे ह्यस्तन्येव,-अमुत्रावसम् ॥६॥

---

अव०–[1]अन्त्यश्चासौ यामश्च=अन्त्ययामः, पाश्चात्यप्रहर इत्यर्थः,स्वपिति इति स्वप्ता,न स्वप्ता=अस्वप्ता, अन्त्ययामेऽस्वप्ता=अन्त्ययामाऽस्वप्ता,तस्मिन् अन्त्ययामाऽस्वप्तरि, पश्चिमप्रहरे चैत्रे कर्त्तरि जाग्रति सतीत्यर्थः । ह्यस्तन्यादिविषयेऽपि अद्यतनीप्राप्त्यर्थम् 'अद्यतनी' इति सूत्रं कृतम् । [2]अद्य, कोऽर्थः ? तेनैवान्त्ययामेनेत्यादि । [3]न्याय्ये रात्रेरन्त्ययामे उत्थितम्=जागरितं चैत्रं प्रति मैत्रः प्राह,-क्व भवानुषितः ? चैत्रो मैत्रं प्रत्याह,-हे मैत्र ! अमुत्रावात्सम्, इत्यद्यतनीप्रयोगयुक्तिः ॥६॥

## अनद्यतने ह्यस्तनी ॥५।२।७॥

म० वृ०–[1]आन्याय्यादुत्थानादान्याय्याच्च संवेशनादहरुभयतः सार्द्धरात्रं वाऽद्यतनः कालः,[2]तस्मिन्नसति भूतेऽर्थे धातो-'र्ह्यस्तनी' स्यात् । अकरोत् ॥७॥

प्रव०-………………न कालप्रमाणेन ❀ तद्वयम् । तथाहि एके एवमाहुः,-[1]आन्याय्येत्यादि, रात्रेरन्त्ययामे यदुत्थितं जागरणं तदान्याय्यमुत्थानमुच्यते, आगामिन्या रात्रेः प्रथमयामानन्तरं यः स्वापः तत् आन्याय्यं संवेशनम् ,पाश्चात्यरात्रियामात दिनसत्कयाम(माः) ४ ( चत्वारः ), आगामिनीरात्रि आद्ययाव यावत् (आगामिरात्रेराद्ययामं यावत् षड् यामाः) । एवं यामषट्ककालोऽद्यतन इत्युच्यते । एकेषां मतमिदम् । अथ द्वितीयमतम् ,- 'उभयः (उभयतः) सार्द्धरात्रं वा' इति, गतरात्रेः पाश्चात्यप्रहरद्वयम , ततो दिनयाम (माः) ४, तदनन्तरमागामिन्या रात्रेः प्रथर(प्रथम) प्रहरद्वयम् २, एवमष्टयामिकोऽद्यतनः कालः, एतद्विपरीतः शेषपाश्चात्यदिवसो ह्यस्तनकालः, तस्मिन् ह्यस्तने काले ह्यस्तनी भवतीत्यर्थः । [2]ईदृशेऽद्यतनेऽविद्यमाने , कोऽर्थः ? ह्यस्तने काले सति ॥७॥

## ख्याते दृश्ये ॥५।२।८॥

म० वृ०-ख्याते=लोकविज्ञाते दृश्ये= प्रयोक्तुः शक्यदर्शने भूतेऽनद्यतनेऽर्थे वर्त्तमानाद्धातो- 'ह्यस्तनी' स्यात् । परोक्षापवादः । अरुणत् सिद्धराजोऽवन्तीन , अजयत् सिद्धः सौराष्ट्रान् । ख्यात इति किम ? चकार कटं चैत्रः । दृश्य इति किम् ? जघान कंसं किल वासुदेवः । अनद्यतने इत्येव-- उदगादद्यादित्यः ॥८॥

प्रव०-द्रष्टुं शक्यः=दृश्यः, 'शक्तार्हे कृत्याश्च' (५।४।३५) ॥८॥

## अयदि स्मृत्यर्थे भविष्यन्ती ॥५।२।९॥

म० वृ०-स्मृत्यर्थे धातावुपपदे सति भूतानद्यतनेऽर्थे 'भविष्यन्ती' भवति, अयदि=यदि यत् शब्दो न प्रयुज्यते । स्मरसि साधो ! स्वर्गे स्थास्यामः । चेतयसे चैत्र ! कलिङ्गेषु गमिष्यामः । अयदीति किम् ? अभिजानासि मित्र ! यत् कलिङ्गेष्ववसाम ॥९॥

प्रव०-स्मरसि, अभिजानासि, बुध्यसे, चेतयसे, अध्येषि- अवगच्छसि-- एते स्मृत्यर्थप्रयोगाः । ९

## वाऽऽकाङ्क्षायाम् ॥५।२।१०॥

म० वृ०-अयदीति नानुवर्त्तते[1] । स्मृत्यर्थ-- धातूपपदे (? धातावुपपदे) [2]सति प्रयोक्तुः क्रियान्तराकाङ्क्षायां सत्यां भूतानद्यतनेऽर्थे 'भविष्यन्ती' स्यात् वा । [3]स्मरसि मित्र ! कश्मीरेषु वत्स्यामः, तत्रौदनं भोक्ष्यामहे; पक्षे अवसाम यत्तत्रौदनमभुञ्ज्महि ॥१०॥

प्रव०-[1]विवक्षातोऽधिकारः । [2]'सति', यदि अयदि वा प्रयुज्यमाने । [3]'स्मरसि मित्रे-त्यादि, अत्र एवं प्रयोगावली कल्पनीया,-- स्मरसि मित्र ! कश्मीरेषु वत्स्यामः तत्रौदनं भोक्ष्यामहे, पास्यामः पयांसि च, पक्षे-- स्मरसि मित्र ! कश्मीरेष्ववसाम तत्रौदनमभुञ्ज्महि । अथ यच्छब्दप्रयोगे भविष्यन्तीं दर्शयति,-- स्मरसि मित्र ! यत् कश्मीरेषु वत्स्यामः यत्तत्रौदनं भोक्ष्यामहे, पक्षे स्मरसि मित्र यत् कश्मीरेष्ववसाम यत्तत्रौदनमभुञ्ज्महि । अत्र प्रयोगेषु वासो लक्षणं भोजनं पानं चेति लक्ष्यमिति लक्ष्यलक्षणयोः सम्बन्धे प्रयोक्तुश्चैत्रस्य आकाङ्क्षा भवतीत्यर्थः ॥१०॥

## कृतास्मरणा-ऽतिनिह्नवे परोक्षा ॥५।२।११॥

म० वृ०-कृतस्यापि कार्यस्य [व्यापारस्य] चित्तव्याक्षेपादिनाऽस्मरणेऽत्यन्तनिह्नवे वा गम्यमाने भूतानद्यतनेऽर्थे 'परोक्षा' स्यात् । सुप्तोऽहं किल विललाप[1], नाऽहं कलिङ्गान् जगाम ।[2] अतिग्रहणादेकदेशापह्नवे ह्यस्तन्येव,-- न कलिङ्गेषु ब्राह्मणमहमहनम् ॥११॥

प्रव०- अपरोक्षकालार्थ आरम्भोऽयम् । [1](एवम् ) मत्तोऽहं किल विचचार । [2]अतिनिह्नवे,-- नाहं कलिङ्गान् जगाम इति प्रयोगः । अत्र भावना (? भावना) ……(एवम्- ) कश्चित् केनाप्युक्तः,-

❀ अत्र पाठश्च्युतोऽशुद्धश्च ।

भो-भो त्वया कलिङ्गेषु विप्रो हतः । स तदपह्नुवानस्तं प्रत्याह,– कस्तात्रत् कलिङ्गे जगाम, को विप्रं ददर्श, इत्यपह्नवे–नाहं कलिङ्गान् जगाम ॥११॥

## परोक्षे ॥५।२।१२॥

म० वृ०–भूतानद्यतने परोक्षेऽर्थे वर्त्तमानाद्धातोः 'परोक्षा' स्यात् । जघान कंसं वासुदेवः, धर्मं दिदेश जिनः ॥१२॥

## ह-शश्वद्-[1]युगान्तःप्रच्छ्ये ह्यस्तनी च ॥५।२।१३॥

म वृ०–हे शश्वति च प्रयुज्यमाने, पञ्चवर्षमध्यप्रष्टव्ये च भूतानद्यतने परोक्षेऽर्थे 'ह्यस्तनी परोक्षा च' स्यात् । [2]इतिहाऽकरोत्, इतिह चकार; शश्वदकरोत्, शश्वत् चकार वा युगान्तःप्रच्छ्ये,–किमगच्छस्त्वं मथुराम्, किं जगन्थ त्वं मथुराम् । १३

अव०–[1]पञ्चवर्षं युगमुच्यते युगस्य अन्तर्मध्यं =युगान्तः, युगान्तः पृच्छ्यते यः स युगान्तःप्रच्छ्यः, तस्मिन् युगान्तःप्रच्छ्ये इत्यस्यार्थः । [2]'इतिहि इतिह' इति निपातसमुदायः वृद्धप्रवादपारम्पर्ये ॥१३॥

## अविवक्षिते ॥५।२।१४॥

म० वृ०–भूतानद्यतने परोक्षे परोक्षत्वेनाविवक्षितेऽर्थे वर्त्तमानाद्धातो–'ह्यस्तनी' स्यात् । अभवत् सगरः[1] । एवं च परोक्षानद्यतने विवक्षावशादद्यतनीह्यस्तनीपरोक्षास्तिस्रोऽपि विभक्तयः सिद्धाः[2] ॥१४॥

अव०–[1] (एवम्) अहन् कंसं वासुदेवः । [2]परोक्षत्वेन अनद्यतनत्वेन च अविवक्षिते भूतेऽर्थे 'विशेषाविवक्षा व्यामिश्रे' (५।२।५) इति सूत्रेणाद्यतनी । परोक्षत्वेन त्वविवक्षिते भूतानद्यतने 'अविवक्षिते' इति सूत्रेण ह्यस्तनी । उभयसद्भावविवक्षायां तु 'परोक्षे' (५।२।१२) इति सूत्रेण परोक्षा । एवं तिस्रोऽपि विभक्तयो भवन्ति । तथा च प्रयोगाः– "अन्वनैषीत्ततो वाली न्यक्षिपच्चाङ्गदम्, सुग्रीवं प्रोचे सद्भावमागतः" । "राक्षसेन्द्रस्ततोऽभैषीत्" [रामायणे] । "अभूवंस्तापसा केचित्पाण्डुपत्रैकभोशिनः" इत्यादि [आदिनाथचरित्रे] ॥१४॥

## वाऽद्यतनी[1] पुरादौ ॥५।२।१५॥

म० वृ०–परोक्षे इति निवृत्तम् । भूतानद्यतने परोक्षे चापरोक्षे चार्थे वर्त्तमानाद्धातोः पुरा इत्यादावुपपदे सति 'अद्यतनी' वा स्यात् । अवात्सुरिह पुरा [=पूर्वं] छात्राः, पक्षे– अवसन् [ह्यस्तनी], ऊषुः [परोक्षा], तदाऽभाषिष्ट राघवः [अद्यतनी], पक्षे– तदाऽभाषत राघवः [ह्यस्तनी], बभाषे राघवस्तदा ॥१५॥

अव०[1]–अपरोक्षे ह्यस्तन्याः तथा परोक्षे तु परोक्षायाः अपवादो वाऽद्यतनीति योगः । वावचनात् पक्षे यथाप्राप्ति ह्यस्तनीपरोक्षेऽपि भवतः,– अवसन् इह पुरा छात्राः, ऊषुरिह पुरा छात्राः ॥१५॥

## स्मे च वर्त्तमाना ॥५।२।१६

म० वृ०–भूतानद्यतने[1] स्मशब्दे पुरादौ चोपपदे सति धातोः 'वर्त्तमाना विभक्तिर्भवति' । इति स्म गुरुर्वदति । पृच्छति स्मोपाध्यायम् । वसन्तीह पुरा [=पूर्वं] च्छात्राः । भाषते राघवस्तदा । "अथाह वर्णी विदितो महेश्वरः यावद्गिरः खे मरुतां चरन्ति" (कुमारसंभवे) । आदिग्रहणमिह पूर्वत्र च [पुरादौ इत्यत्र सूत्रे पूर्वसूत्रेऽपि] प्रयोगानुसरणार्थम् । एवं पुरादियोगेऽद्यतनीह्यस्तनीपरोक्षावर्त्तमानाश्चतस्रोऽपि विभक्तयः सिद्धाः । [2]स्म-पुरायोगे तु परत्वाद्वर्त्तमानैव, यथा– नटेन स्म पुराऽधीयते । एवं ह शश्वत् स्मयोगेऽपि वर्त्तमाना,–इतिह स्माचार्यः कथयति, शश्वदधीयते स्म ॥१६॥

अव०–'पपात्ते उ (?परोक्षेऽ)परोक्षे वार्थे वर्त्तमानाद्धातोः वर्त्तमाना भवतीति । [2]ननु यदा एकत्र प्रयोगः=स्मयो.......(गः पुरादियोगश्च भवति त-) दा किम् ? इत्याह– स्मपुरायोगे इत्यादि, द्विकयोगे त्रिकयोगे वा वर्त्तमाना ॥ १६ ॥

## ननौ पृष्टोक्तौ सद्वत् ॥५।२।१७॥

**म० वृ०**–अनद्यतने इति निवृत्तम् । ननुशब्दे उपपदे सति[१]पृष्टोक्तौ=[२]पृष्टप्रतिवचने भूतेऽर्थे वर्त्तमाना-द्धातोः"सद्वत्=वर्त्तमानकाल इव वर्त्तमाना" स्यात् । सद्वद्वचनादत्रविषये[३]शत्रानशावपि । [४]किमकार्षीः कटं चैत्र ? [५]ननु करोमि भोः,[६]ननु कुर्वन्तं कुर्वाणं मां पश्य । पृष्टोक्ताविति किम् ? नन्वकार्षीत् चैत्रः कटम् ॥१७॥

**अव०**–[१]पृष्टस्य धात्वर्थस्य उक्तिः=प्रतिवचनं =पृष्टोक्तिः,यत् प्रश्नानन्तरमुत्तरदानं सा पृष्टोक्तिः। [२]प्रत्युत्तरदाने । [३]वर्त्तमानाविभक्तिविषये । [४] हे चैत्र ! त्वं कटमकार्षीः इति प्रच्छा ।[५]उत्तरमिदम् । [६]इदमपि उत्तरदानम् । कुर्वन्तमित्यत्र 'करोमि'इति वाक्यं कृत्वा शतृप्रत्ययः। कुर्वाणमित्यस्य'कुर्वे' इति वाक्यं कृत्वा आनश्प्रत्ययः ॥१७॥

## नन्वोर्वा ॥५।२।१८॥

**म० वृ०**–न नु इत्येतयोरुपपदयोः पृष्टोक्तौ भूतार्थे वर्त्तमानाद्धातोः 'वर्त्तमाना' वा स्यात् , 'स च सद्वत्'। [प्रश्नः] किमकार्षीः कटं चैत्र ? [उत्तरम्] न करोमि भोः ! न कुर्वन्तं न कुर्वाणं मां पश्य, नाऽकार्षम् । कस्तत्रावोचन ! अहं नु ब्रवीमि,ब्रुवन्तं ब्रुवाणं नु मां पश्य, पक्षे– अहं न्ववोचम् [इदमपि पृष्टोक्तेरुदाहरणम् ] ॥ १८ ॥

## सति ॥५।२।१९॥

**म० वृ०**–सन=विद्यमानः, वर्तमान इत्यर्थः; स च प्रारब्धा.रिसमाप्तः क्रियाप्रबन्धः । सत्यर्थे धातोः 'वर्त्तमाना' स्यात् । अस्ति, भवति, घटं करोति, ओदनं पचति.[१] जीवं न मारयति, मांसं नाऽस्ति । तथा इहाधीमहे, इह कुमाराः क्रीडन्ति इत्यादौ क्रियान्तरव्यवधानेऽप्यध्ययनादिक्रियायाः प्रारम्भापरिसमाप्तिरस्त्येव । एवं[२] चैत्रो भुङ्क्ते इत्यत्रापि ॥ १९ ॥

**अव०**–[१] जीवं न मारयति मांसं न खादती-त्यत्र यद्यपि जीवमारणप्रतिषेधस्य मांसखादनप्रति-षेधस्य अभा.........(वरूप)त्वात् अभावस्य च प्रारम्भापरिसमाप्ती न घटेते, तथापि जीवमारणनि-यमो मांसखादननियमः प्रारब्धोऽसमाप्तश्च प्रतीय-ते इति भावः । [२] चैत्रो भुङ्क्ते इत्यादावपि हि भोजनक्रियायां भुञ्जानोऽवश्यं हसति, जल्पति, पिबति जलं वा चैत्र इत्यादिकं क्रियान्तरव्ययवधान-मशक्यपरिहारमिति तत्त्वतः प्रारब्धापरिसमाप्तिः प्रतीयते ॥ १९ ॥

## शत्रानशावेष्यति तु सस्यौ ॥५।२।२०॥

**म० वृ०**–सत्यर्थे धातोः [१]'शतृ-आनशौ प्रत्ययौ' भवतः,[२]एष्यति तु=एष्यन्मात्रे भविष्यन्तीविषयेऽर्थे "सस्यौ=स्यप्रत्यययुक्तौ"शत्रानशौ । [३]स्योऽपि प्रत्य-यत्वाद्धातोरेव परतः, न शत्रानशभ्यां परतः । यान् , यान्तौ, यान्तः; शयानः, शयानाः; एवं निरस्यन् , पचन् , पचमानः । एकविषयत्वाद्वर्त्तमानापि,-याति, यातः, यान्ति; पचति । तथा सन् ,अस्ति; अधीयानः अधीते; विद्यमानः, विद्यते; विदन् , वेत्ति । तथा [४]तरादौ प्रत्यये,-[५]पचत्तरः, [६]पचत्तमः; [७]पचतित-राम् , [८]पचतितमाम् ; [९]पचद्रूपः, [१०]पचतिरूपम् ; जल्पत्कल्पः, जल्पतिकल्पम् इत्यादि । एवं पचमान-तरः, पचमानतमः; पचतेतरां, पचतेतमाम् इत्यादि। तथा द्वितीयाद्यन्तपदसामानाधिकरण्य[१]-सम्बोधन[२]-तरादिवर्जित[३]–तद्धितप्रत्ययोत्तरपद[४]-क्रियालक्षण[५]-क्रियाहेतुषु[६] वर्त्तमानाया[११]अन्वयायोगाच्छत्रानशा-वेव-(द्वितीयान्त) पचन्तं पचमानं पश्य । (तृतीयान्त) [१२]पचता कृतम् । (चतुर्थ्यन्त) [१३]पचते । (पञ्च-म्यन्त) पचतः पचमानाद्वीतः । (षष्ठ्यन्त) पचतः [१४]स्वम् । (सप्तम्यन्त) पचति गतः[१५] । अथ सम्बो-धने हे पचन् ! हे पचमान ! । तरादिवर्जिततद्धिते,-कुर्वतोऽपत्यं=कौर्वतः, [१६]पाचतः, [१७]पचत्पाशः, [१८]पचद्वरः । उत्तरपदे,-[१९]भज्यते इति भक्तिः, कुर्वन् भक्तिरस्य=कुर्वद्भक्तिः, कुर्वाणो भक्तिरस्य कुर्वाणभक्तिः; एवं कुर्वत्प्रियः, कुर्वाणप्रियः । क्रि-याया लक्षणं=ज्ञापकं चिह्नम् ,– [२०]तत्र तिष्ठन्तो-ऽनुशासति गणकाः, शयाना भुञ्जते यवनाः; बहुषु मूत्रयत्सु कः चैत्र इति पृष्टः कश्चिदाह,-- यः तिष्ठन्

मूत्रयति, योऽधीयान आस्ते, यः पठन् पचति स मैत्रः,[२१]

फलन्ती वर्द्धते द्राक्षा, पुष्यन्ती वर्द्धतेऽब्जिनी ।
शयाना वर्द्धते दूर्वा, आसीनं वर्द्धते बिसम् ॥

क्रियाया हेतुर्जनकः, तत्र,-[२२]अर्जयन् वसति [२३] एष्यति तु स्यस्यौ,-यास्यन्, पक्ष्यन्, पक्ष्यमाणः[२४] यास्यति, पक्ष्यति, भविष्यन्, भविष्यति । तथा पक्ष्यत्तरः, पक्ष्यतितराम् । तथा [२५]पक्ष्यन् व्रजति, पक्ष्यमाणो व्रजतीति क्रियायां क्रियार्थायामेकविषयत्वाच्च भविष्यन्त्यादयो[२६]ऽपि,- पक्ष्यामीति व्रजति, पाचको व्रजति, पक्तुं व्रजति । पूर्ववदेवात्र द्वितीयाद्यन्तसामानाधिकरण्यादिषु भविष्यन्त्या अभावः, [२७]समन्वयाभावात् [=योगस्य अघटनात् ], पक्ष्यन्तं पश्येत्यादि[२८] । सदेष्यतोरभावे तु[=वर्तमानाभविष्यत्कालाभावे तु]- श्वः पक्ता ॥२०॥

---

अव०-[१]शत्रानश्प्रत्यये शकारः शित्कार्यार्थः, ऋकारः ङ्याद्यर्थः । [२]'इण्क् गतौ' एष्यति= आगमिष्यति इति स्वभावादयमर्थः, अथवा 'इं दु द्रुं' इति इ आङ् पूर्वकः, 'उपसर्गस्यानिणेधे०' (१।२।१९) इत्यनेन आङ् लुप्यते । [३]प्रधानत्वात् प्रथमं धातोः परतः शत्रानशौ, पश्चात् स्यः, स्योऽपि प्रत्ययत्वात् धातोरेव परतः । तथा [४]तरतमादिप्रत्ययविषये शत्रानशौ वर्त्तमानापि, तथाहि-[५]अयं पचन् अयं पचन्, अयमनयोर्मध्ये प्रकृष्टः पचन्=पचत्तरः, "द्वयोर्विभज्ये च तरप् (७।३।६) । [६]अयं पचन् ,अयमेषां मध्ये प्रकृष्टः पचन्=पचत्तमः, 'प्रकृष्टे तमप्'(७।३।५) । [७]द्वाविमौ पचतः, अयममनयोरतिशयेन पचति= पचतितराम्, [८]सर्वे इमे पचन्ति, अयमेषामतिशयेन पचति= पचतितमाम् ; 'किंन्त्याद्येऽव्ययात्०'(७।३।८) इतितरप्-तमप्;'किन्त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याम्' (७।३।८) इति सूत्रेणैव तरप्-तमपग्रे अम्प्रत्ययः, सिः, 'अव्ययस्य' (३।२।७) इतिसिलोपः । (एवम्) ईषदसमाप्तो जल्पन् =जल्पत्कल्पः, ईषदसमाप्तं जल्पति=जल्पतिकल्पम्, एवं पश्यद्देश्यः,पश्यतिदेश्यम्;पठद्देशीयः,पठतिदेशीयम्; सर्वत्र'अतमबादेरीषदसमाप्ते कल्पप्देश्यपूदेशीयर्' (७।३।११) । 'शत्रानशौ०' इति सूत्रे पचतितराम्, पचतितमाम्;पचतेतराम्, पचतेतमाम्; एपूदाहरणेषु'द्वयोर्विभज्ये०'(७।३।६) इति सूत्रद्वयेन 'तरप्-तमप् न कार्योऽप्राप्तेः, नाम्नः परौ हि तौ विहितौ , अतोऽत्र 'किन्त्याद्येऽव्यया०' (७।३।८) इत्यनेन तरप् , तमप् , अम् इति कार्याः । अस्मादेव वचनात् त्याद्यन्तादपि द्व्यर्थप्रकर्षे तरप् बह्वर्थप्रकर्षे तमप् भवतीति 'किन्त्याद्येऽव्यया०' (७।३।८) इति सूत्रवृत्तौ उक्तोऽस्ति तरप्-तमप्प्रत्ययविधाने हेतुः । [९]प्रशस्तः पचन्=पचद्रूपः, [१०]प्रशस्तं पचति=पचतिरूपम्, 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०। इति रूपप् प्रत्ययः) । [११]वर्त्तमानाविभक्ति(? क्ते)रन्वयस्य=सम्बन्धस्य अघटनात् शत्रानशावेव भवतः, न वर्त्तमाना । [१२](एवम्) पचमानेन । [१३]देहीति योगः । [१४](एवम्) पचमानस्य धनम् । [१५](एवम्) पचमाने सति गतः । [१६]पचतोऽपत्यम् । [१७]कुत्सितः पचन् । [१८]'पचच्चरः,' भूतपूर्वः पचन्=पचच्चरः, 'भूतपूर्वे प्चरट्' (७।२।७८) इत्यनेन प्चरट् प्रत्ययः । [१९]भज्यते इति कर्मणि क्तिप्रत्ययः, भक्तिः, कोऽर्थः ? सेव्य इत्यर्थः । इह वाच्ये पुंलिङ्गेऽपि शब्दशक्तिस्वाभाव्यात् क्त्यन्तस्य स्त्रीलिङ्गतैव, ततश्च 'मुखं चन्द्र इव' इतिवत् अत्रापि अविरोधः । [२०]'तत्र तिष्ठन्तः' इत्यादि, अत्र प्रयोगे स्थानेन=अत्रस्थानेनानुशासनं=दैवपर्यालोचनं लक्ष्यते इति स्थानं लक्षणं भवति, तिष्ठन्तोऽवस्थिताः सन्तो गणकाः=दैवज्ञा अनुशासति, ग्रहणस्वरूपं वदन्तीत्यर्थः; एवं शयाना भुञ्जते यवनाः । [२१]एवं यो गच्छन् भक्षयति, यः शयानो भुङ्क्ते । [२२]अर्जण् प्रतियत्ने । [२३]एवमधीयानो वसति । [२४](एवं ) पक्ष्यमाणतमः, पक्ष्यतितराम्, पक्ष्यतितमामित्यादि; सर्वेष्वेकविषयत्वाद् भविष्यन्त्यपि । [२५]पक्ष्यन् व्रजति पक्ष्यमाणो व्रजतीति, अत्र क्रियायां क्रियार्थायामिति कोऽर्थः ? क्रियायां क्रियार्थायां तुम्-णकच्-भविष्यन्ती' (५।३।१३) इति सूत्रेण एष (? एक) विषयत्वाच्च हेतोः भविष्यन्ती विभक्तिर्भवति । [२६]आदि-

शब्दात् तुमुणकचावपि भवति, तथाहि- पक्ष्यामीति व्रजति, पक्तुं व्रजति, पाचको व्रजतीत्यर्थः । [२७]भविष्यन्तीविभक्तेः सम्बन्धो न घटते इति भविष्यन्ती न भवति, शत्रानशावेव भवत इत्यर्थः । [२८]आदिशब्दात् पक्ष्यमाणं पश्य, हे पक्ष्यन् ! हे पक्ष्यमाण ! पक्ष्यतोऽपत्यं=पाक्ष्यतः, पाक्ष्यमाणिः, तथा पक्ष्यमाणपाशः, पक्ष्यद्भक्तिः, पक्ष्यमाणभक्तिः, जल्पिष्यन्तो ज्ञास्यन्ते पण्डिताः, अध्येष्यमाणा वत्स्यन्तीत्यादि । तथा बहुलाधिकारात् द्रव्यगुणयोर्लक्षणे हेतुहेतुमद्भावद्योतकेत्यादिशब्दयोगे च शत्रानशौ न भवतः,-यः कम्पते सोऽश्वत्थः, यत्तरति तल्लघु । अत्र कम्पनोत्प्लवती(? ना)भ्यां यथाक्रममश्वत्थलघुसंज्ञकौ द्रव्यगुणौ लक्ष्येते, न तु क्रिया; इति शत्रानशोर्व्यावृत्तिः । अथ हेतुहेतुमद्भावः,- हन्ति इति पलायते, वर्षति इति जनो धावति, हनिष्यति इति नश्यति, पचति अतो लभते, क्षमते ततः पूज्यते । क्रियाया ✻ अपि लक्षणे चादियोगे न शत्रानशौ,- यः पचति च पठति च स चैत्रः, योऽधीते च आस्ते च स मैत्रः । ✻ न केवलं द्रव्यगुणयोर्लक्षणे चादियोगे (सति), क्रियाया अपि, इति अपिशब्दार्थो ज्ञातव्यः ॥ २० ॥

## तौ माङ्याक्रोशेषु [१] ॥५।२।२१॥

**म० वृ०**—माङि उपपदे आक्रोशे गम्यमाने "तौ शत्रानशौ" भवतः । [२]मा पचन् वृषलो ज्ञास्यति, मा [३]पचमानोऽसौ मर्तुकामः, [४]मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति ॥२१॥

---

**अव०**—[१]सत्यर्थे, बहुवचनादसत्यपि अर्थे इति भावः । [२]मा क्लेदयन्नित्यर्थान्तरेण वाक्यम् । [३]मा क्लेदयमान इत्यर्थान्तरेण वाक्यम् । [४]मा प्राणान् धारयन् इत्यर्थान्तरेण वाक्यम् । तौ माङ्याक्रोशेष्वित्यत्र शत्रानशोरनुवृत्तावपि तौ ग्रहणमवधारणार्थम्, तेनात्र माङ् (? माङि) उपपदे शत्रानशोः प्राप्तौ सत्यामसरूपविधिनापि अद्यतनी न भवति इति विशेषः ॥२१॥

## वा वेत्तेः क्वसुः ॥५।२।२२॥

**म० वृ०**—सत्यर्थे वर्त्तमानात् वेत्तेः परः [१]"क्वसुर्वा" स्यात् । पक्षे यथाप्राप्तम् । विद्वान्, साधुः तत्त्वं विद्वान्. पक्षे- विदन्, वेत्ति विदुषा (कृतम्), पक्षे शतृ- विदता कृतम्, हे विद्वन् ! [क्वसुः] हे विदन् ! [शतृ], [२]वैदुषः, [३] वैदतः; [४]विद्वद्भक्तिः, [५]विदद्भक्तिः, विद्वान्, विदन्नास्ते; विद्वाल्लँभते, विदल्लँभते; 'लिलौ' (१।३।६५) इत्यनेन सानुनासिको लकारः । अत्रापि द्वितीयाद्यन्तेति ज्ञातव्यम् ॥२२॥

---

**अव०**—'असरूपोऽपवादे वोत्सर्गः प्राक्तेः' (५।१।१६) इति सूत्रेण विकल्पे सिद्धेऽपि,वाग्रहणमत्र क्वसुकानशत्रानशप्रकरणे असरूपविधिर्लक्ष्यानुरोधार्थं इति ज्ञापयति। अत एव 'वयःशक्तिशीले'(५।२।२४) अत्र सूत्रेऽ(न)भिधानान्न वाऽसरूपः शतृप्रत्यय इति वक्ष्यते । [१]ककारः कित्कार्यार्थः, उकारो ङ्यार्थः । [२]विदुषोऽपत्यं वैदुषः । [३]विदतोऽपत्यं वैदतः । [४]विद्वान् भक्तिरस्य । [५]विदन् भक्तिरस्य ॥२२॥

## पूङ्-यजः शानः ॥५।२।२३॥

**म० वृ०**—सत्यर्थे पूङ्-यजिभ्यां परः [१]"शानः" स्यात् । कृत्त्वात्कर्त्तरि । पवते, पवमानः, [२]मलयं पवमानः, [३]यजमानः ॥२३॥

---

**अव०**—आनशप्रत्ययेनापि सिद्ध्यति, किमिदं 'पूङ्-यजः शानो' विधानम् ? सत्यम्, आनशा सह न षष्ठीसमासः, यजेश्चाफलवति कर्त्तरि आनश् नास्ति इति वचनम्, एवमुत्तरत्रापि । [१]शकारः शित्कार्यार्थः । [२]अत्र सम्बन्धषष्ठीसमासः (भवितुमर्हति) । [३]यजते यजति वा ॥२३॥

## वयः-शक्ति-शीले ॥५।२।२४॥

**म० वृ०**—सत्यर्थे वर्त्तमानाद्धातोर्वयः[१]-शक्ति[२]-शीलेषु[३] गम्यमानेषु 'शानः' स्यात् । कतीह शिखण्ड [४]वहमानाः, कतीह स्त्रियं [५]गच्छमानाः । शक्तिः= सामर्थ्यम्- कतीह हस्तिनं निघ्नानाः ।

शीलं=स्वभावः,-- कतीहात्मानं [५]वर्णयमानाः, पराग्निन्दमानाः ॥२४॥

अव०--[१]वयः प्राणिनां कालकृता बाल्याद्यवस्था। [२]शक्तिः=सामर्थ्यम्। [३]शीलं=स्वभावः। [४]बोद्धुं वयस इति वाक्ये वहमानाः। [५]गन्तुं वयसो गच्छमानाः। एषु सर्वत्र अनभिधानान्न वाऽसरूपः शतृप्रत्ययः। [६]वर्णयमानाः इत्यत्र 'वर्णण् वर्णक्रियाविस्तारगुणवचनेषु' ॥२४॥

## धारीङोऽकृच्छ्रेऽतृश् ॥५।२।२५॥

म० वृ०-अकृच्छ्रः= सुखसाध्यः। अकृच्छ्रे सत्यर्थे वर्त्तमानाद्धारेरिङश्च परोऽतृश् स्यात्। धारयन्नाचाराङ्गं,[१] अधीयन् [२]द्रुमपुष्पीयम्। अकृच्छ्र इति किम्? कृच्छ्रेण धारयति धर्मम्। इङ आनशि प्राप्ते धारेरुभयप्राप्तौ वचनम्। वाऽसरूपोऽपि नेष्यत एव ॥२५॥

अव०-[१]आचारप्रतिपादकमङ्गमाचाराङ्गम्। [२]द्रुमपुष्पमधिकृत्य कृतो ग्रन्थः, 'शिशुक्रन्दादिभ्य ईयः' (६।३।२००)इति ईयप्रत्ययः), द्रुमपुष्पीयं नाम दशवैकालिकागमे आद्यमध्ययनम् ॥२५॥

## सुग्-द्विषा-ऽर्हः सत्रि-शत्रु-स्तुत्ये ॥५।२।२६॥

म० वृ०-सत्यर्थे वर्त्तमानात् सुनोतेर्द्विषोऽर्हश्च धातोर्यथासंख्यं [१]सत्रिणि [यजमाने], शत्रौ, स्तुत्ये च कर्त्तरि 'अतृश्' स्यात्। सर्वे सुन्वन्तः, चौरं द्विषन्, चौरस्य द्विषन्; शत्रुरित्यर्थः; पूजामर्हन्, प्रशस्य इत्यर्थः ॥२६॥

अव०-[१]'सत्रिणि', यजमानेऽर्थे, यज्ञस्वामिनीत्यर्थः। (ननु) सर्वे सुन्वन्त इत्यादिषु अतृश्प्रत्यये शतृप्रत्यये वा सति रूपसाम्यान्न कश्चिद्विशेषो ज्ञायते, उच्यते, प्राकृतव्याकरणे卐 'शत्रानशौ' इति सूत्रे विशेषोऽस्ति ॥२६॥

## तृन् शील-धर्म-साधुषु ॥५।२।२७॥

म० वृ०-शीले, धर्मे साधौ च सत्यर्थे वर्त्तमानाद्धातोः 'तृन्' स्यात्। शीले,-- कर्त्ता कटम्,[१] वदिता जनापवादान्। [२]धर्मे,- वधूमूढां मुण्डयितारः श्राविष्ठायनाः। साधौ,-- गन्ता खेलः, साधु गच्छतीत्यर्थः। शीलादिष्विति किम्? कर्त्ता कटस्य। नकारः सामान्यग्रहणाविघातार्थः ॥२७॥

अव०-"तृन् शीलधर्मसाधुषु" इत्यत्र बहुवचनं वक्ष्यमाणेषु 'सन्भिक्षाशंसेरुः' (५।२।३३।) इत्यादिसूत्रेषु यथासंख्यपरिहारार्थम्। [१]कटकरणम् परवैभाष्यं मैत्रस्य स्वभाव इत्यर्थः। [२]"धर्मे", कोऽर्थः? कुलाद्याचारे। नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तृशब्दा- एते औणादिकाः पितृमातृवत्, नात्र तृन्प्रत्ययः; अत एवैषां पूर्वमारविधौ पृथगुपादानं विहितम् ॥२७॥

## भ्राज्यलङ्कृग्-निराकृग्-भू-सहि-रुचि-वृति-वृधि-चरि-प्रजना-ऽपत्रप इष्णुः ॥५।२।२८॥

म० वृ०-एभ्यः शीलाद्यर्थे सत्यर्थे 'इष्णुः' स्यात्। भ्राजिष्णुः, अलङ्करिष्णुः, निराकरिष्णुः, भविष्णुः, सहिष्णुः, रोचिष्णुः, वर्त्तिष्णुः, वर्द्धिष्णुः, चरिष्णुः, प्रजनिष्णुः, अपत्रपिष्णुः ॥२८॥

अव०-भ्राजनशीलो भ्राजनधर्मा साधु भ्राजते इति भ्राजिष्णुः, एवं सर्वत्र ॥२८॥

## उदः पचि-पति-पदि-मदेः ॥५।२।२९॥

म० वृ०-एभ्य उत्पूर्वेभ्यः शीलादौ सत्यर्थे 'इष्णुः' स्यात्। उत्पचिष्णुः, उत्पतिष्णुः, उत्पदिष्णुः, उन्मदिष्णुः ॥२९॥

## भू-जेः ष्णुक् ॥५।२।३०॥

म० वृ०-ककारः कित्कार्यार्थः। शीलादौ सत्यर्थे भूजिभ्यां 'ष्णुक्' स्यात्। भूष्णुः,जिष्णुः ।३०।

卐 प्राकृते हि 'शत्रानशः' (८।३।१८१) इति सूत्रेण शतृप्रत्ययस्य 'न्त' इत्यादेशो भवति, अतृश्प्रत्ययस्य तु स न भवतीति विशेषः।

म० वृ०-एभ्यः शीलादौ सत्यर्थे 'स्नुः' स्यात् स्थास्नुः, ग्लास्नुः, म्लास्नुः, पक्ष्णुः, [1]परिमाक्ष्र्णुः, क्षेष्णुः ॥३१॥

अव०-[1]''धूगौदितः' (४।४।३८) इति विकल्पेन इट्प्रत्यये 'परिमार्जिष्णुः' इत्यपि प्रयोगो मन्तव्यः। 'परिमाक्ष्र्णुः' इत्यत्र पूर्वं ( ? पूर्वं ) गुणः, पश्चात् 'मृजोऽस्य वृद्धिः' (४।३।४२) इत्यनेन वृद्धिः ॥३१॥

## त्रसि-गृधि-धृषि-क्षिपः क्नुः ॥५।२।३२॥

म० वृ०-एभ्यः शीलादौ सत्यर्थे 'क्नुः' स्यात्। त्रस्नुः, गृध्नुः, धृष्णुः, क्षिप्नुः ॥३२॥

## सन्-भिक्षाऽऽशंसेरुः ॥५।२।३३॥

म० वृ०-शीलादौ सत्यर्थे वर्त्तमानात् सन्प्रत्ययान्ताद्धातोर्भिक्षाशंसिभ्यां च पर 'उः' स्यात्। चिकीर्षुः, भिक्षुः, आशंसुः ॥३३॥

अव०-आशंसित्युक्ते 'आङः शसुङ् इच्छायाम्' इत्यस्य आत्मनेपदिनः उदितो भ्वादेरेव ग्रहणम्, न तु 'शंसू स्तुतौ च' इति भ्वादेः परस्मैपदिन इत्यस्य, 'शंसू स्तुतौ च इत्यस्य आङ्योगस्य अनियतत्वात् ॥३३॥

## विन्द्विच्छू ॥५।२।३४॥

म० वृ०-शीलादौ सत्यर्थे वेत्तेः इच्छतेश्च पर 'उप्रत्ययः' यथासंख्यं नकारोपान्त्यछकारान्तादेशौ' (च) निपात्यन्ते। [1]विन्दुः, [2]इच्छुः। कथमपां विदुः[3] ? विन्देरौणादिक उः ॥३४॥

अव०-[1]'विदक् ज्ञाने' वेदनशीलो विन्दुः। [2]एषणशील इच्छुः। [3] विदु अवयवे' विदू, 'उदितः स्वरान्नोऽन्तः' (४।४।९८) विन्दुः, 'भृमृतृत्सरितनिधन्यनिमनिमस्जिशीवदिकोदिपटिगडिचक्ष्यसिवसित्रपिशृस्तृरिनहिकिर्दिकन्दीन्दिविन्ध्यन्धिबन्ध्यणिलोष्ठिकुन्धिभ्य उः' (उणा०७१६) इत्युणादिसूत्रेण उप्रत्ययः ॥३४॥

## शृ-वन्देरारुः ॥५।२।३५॥

म० वृ०-शीलादौ सत्यर्थे शृवन्दिभ्यां पर 'आरुः' स्यात्। शरारुः, विशरारुः, वन्दारुः ॥३५॥

अव०-शृणातीत्येवंशीलः=शरारुः, विशीर्यते इति कर्मकर्त्तरि वा ॥३५॥

## दा-ट्धे-सि-शद-सदो रुः ॥५।२।३६॥

म० वृ०-शीलादौ सत्यर्थे दारूप ट्धे-सि-शद-सद्धातुभ्यो 'रुः' स्यात्। [1]दारुः, ट्धे,-[2]धारुः, [3]सेरुः, [4]शद्रुः, [5]सद्रुः ॥३६॥

अव०-[1]'दाट्धेसी'-ति सूत्रे ट्धेग्रहणात् दारूपाः सर्वेऽपि धातवो गृह्यन्ते,न दासंज्ञाः। अत एव दारुः इत्यस्य ददातीत्येवंशीलः, एवं दयते, यच्छति, द्यति दाति, दायति इत्येवंशीलो दारुः इत्यादिवाक्ये रुप्रत्ययः कृतोऽस्ति। कथं तर्हि द्यति तत् इति दारु काष्ठम् ? उच्यते, अत्र औणादिकः कर्मणि रुप्रत्ययः। तथा [2]धयति इत्येवंशीलो=धारुर्वत्सो मातरम्। [3]सिनोतीत्येवंशीलः=सेरुः। [4]शीयते इत्येवंशीलः =शद्रुः। [5]सीदति इत्येवंशीलः=सद्रुः। एभ्य इति किम् ? दधातीत्येवंशीलो=दधिर्गौः ॥३६॥

## शीङ्-श्रद्धा-निद्रा-तन्द्रा-दयि-पति-गृहि-स्पृहेरालुः ॥५।२।३७॥

म० वृ०-एभ्यः शीलादौ सत्यर्थे 'आलुः' स्यात्। शेते इत्येवंशीलः=शयालुः, श्रत्पूर्वो धाग्, श्रद्धत्ते=श्रद्धालुः, निद्राति निद्रायति वा=निद्रालुः, तत् द्राति [1] द्रायति वा=तन्द्रालुः, निपातनाद् दस्य न्, तन्द्रा इति सौत्रधातुर्वा; दयालुः, [2]पतयालुः, [3]गृहयालुः, [4]स्पृहयालुः ॥३७॥

अव०-[1]'द्राक् कुत्सितगतौ' 'द्रै स्वप्ने' अत्र द्वयोरपि ग्रहणम्। [2]पतण् गतौ च। [3]गृहणि ग्रहणे। [4]स्पृहण् ईप्सायाम्। पतिगृहिस्पृहयो धातवश्चौरादिका अदन्ताः, अथवा पतिगृही धातू सौत्रौ इकारान्तौ ज्ञातव्यौ। मृगयालुः, लज्जालुः, ईर्ष्यालुः, शला-

लुप्रभृतयस्तु औणादिकाः । तथा कृपालुहृदयालू मत्वर्थीयान्तौ ॥३७॥

## डौ सासहि-वावहि-चाचलि-पापतिः ॥५।२।३८॥

म० वृ०–एभ्यः शीलादौ सत्यर्थे 'सहिवहि-चलिपतीनां यङन्तानां डौ सति यथासंख्यमेते निपात्यन्ते'। अत एव वचनात् डिरपि। सासह्यते इत्येवंशीलः=सासहिः, एवं वावह्यते=वावहिः, चाचल्यते=चाचलिः, पापतिः ॥३८॥

अव०–पनीपत्यते इत्येवंशीलः=पापतिः, निपातनबलान्न्यागमाभावः ॥३८॥

## सस्रि-चक्रि-दधि-जज्ञि-नेमिः ॥५।२।३९॥

म० वृ०–एते शीलादौ सत्यर्थे 'कृतद्विर्वचना किप्रत्ययान्ता निपात्यन्ते'। सरतीत्येवं शीलः= सस्रिः, [1]चक्रिः, [2]दधिः, [3]जज्ञिः, [4]नेमिः ॥३९॥

अव०–[1]करोतीत्येवंशीलश्चक्रिः। [2]दधातीत्येवंशीलो= दधिः। [3]जायते जानाति वा= जज्ञिः। [4]नमति= नेमिः, द्विर्वचनाभाव एत्वं च निपातनात् ॥३९॥

## शृ-कम-गम-हन-वृष-भू-स्थ उकण् ॥५।२।४०॥

म० वृ०–शीलादौ सत्यर्थे एभ्य 'उकण्' स्यात्। शारुकः, [एवं प्रशारुकः शरः] [1]कामुकः, आगामुकः निजगृहम्, घातुकः, आघातुको व्याधः, वर्षुकः, प्रवर्षुको मेघः, भावुकः, प्रभावुकः क्षत्रियः, स्थायुकः प्रमत्तः, [2]उपस्थायुको गुरुम्, गुणानधिष्ठायुकः ॥४०॥

अव०–[1]एवं कामुकी रिरंसुः, कामुका या इच्छां विना कामयते, कामुका अन्यस्य स्त्रियो भवन्ति। [2]'आत ऐः कृञ्चौ' (४।३।५३) इति ऐः ॥४०॥

## लष-पत-पदः ॥५।२।४१॥

म० वृ०–योगविभाग उत्तरार्थः। एभ्यः शीलादौ सत्यर्थे 'उकण्' स्यात्। अपलषतीत्येवंशील-(म्)=अपलाषुकं नीचसाङ्गत्यम्, अभिलाषुकः, उत्पातुकं ज्योतिः, उपपादुका देवाः ॥४१॥

अव०–एवं प्रपातुका गर्भाः। शीलाद्यधिकारसूत्रेषु सर्वत्र सूत्रार्थेषु "शीलादौ सत्यर्थे वर्त्तमानाद्धातोः" इति सर्वत्र योज्यमलिखितमपि ॥४१॥

## [1]भूषा-क्रोधार्थ-जु-सृ-गृधि-ज्वल-शुचश्चानः ॥५।२।४२॥

म० वृ०–भूषार्थेभ्यः, क्रोधार्थेभ्यः, जुसृगृधिज्वलशुचिभ्यो लषपतपदिभ्यश्च शीलादौ सत्यर्थे 'अनः' स्यात्। भूषार्थाः,– [2]भूषणः,मण्डनः, प्रसाधनः। क्रोधार्थाः,– क्रोधनः, कोपनः, रोषणः। [3]जु,- जवनः, सरणः, गर्द्धनः, ज्वलनः, शोचनः, लष,– अभिलषणः, पतनः, अर्थस्य पदनः,[4] एवं ग्रन्थस्य पदनः, पदनः क्षेत्राणाम् ॥४२॥

अव०–[1]भूषा च क्रोधश्च=भूषाक्रोधावर्थौ येषां ते च ते जुश्च सृश्चेत्यादि। [2]भूषयतीत्येवंशीलः। [3]जु इति सौत्रो धातुर्वेगाख्ये* संस्कारे वर्त्तते, वेगाख्यस्तु चलनस्य हेतुरेव,न तु चलनम्;तेन चलनार्थाभावादुत्तरेण न प्राप्नोति इति इह सूत्रे जुग्रहणं कृतमित्यर्थः। [4]पदेरिदित्त्वात् उत्तरेण 'इङितो व्यञ्जना०' (५।२।४४) इत्यनेनैव सिद्धे सकर्मकार्थमत्रोपादानं कृतम्। पद्यते इत्येवंशीलः=पदनः ॥४२॥

## चल-शब्दार्थादकर्मकात् ॥५।२।४३॥

म० वृ०–[1]चलनार्थात् शब्दार्थाच्च धातोः शीलादौ वर्त्तमानादकर्मकात्पर 'अनः' स्यात्। चलतीत्येवंशीलः=चलनः, कम्पनः, चोपनः,[2] चेष्टनः। [3]शब्दनः, रवणः, आक्रोशनः। अकर्मकादिति किम्? पठिता विद्याम् ॥४३॥

अव०–[1]चलनार्थात् शब्दार्थाच्च कीदृशाद्? अकर्मकात् इति विशेषणं ज्ञातव्यम्। अकर्मकात् इति कोऽर्थः? अविद्यमानकर्मकात् अथवा अवि-

* कारिकावल्याः "संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने" इति कारिकां पश्यन्तु।

क्षितकर्मकात् । [2]चुप् मन्दायाम् : चोपतीत्येवंशील=चोपनः । [3]शब्दयतीत्येवंशीलः=शब्दनः ॥४३॥

## [1]इङितो व्यञ्जनाद्यन्तात् ॥५।२।४४॥

म० वृ०-इदनुबन्धात् ङानुबन्धाच्च व्यञ्जनाद्यन्ताद्धातोः परः शीलादौ सत्यर्थे 'अनः' स्यात् । इदित्,-- स्पर्द्धनः । ङित्,-- वर्त्तनः, वर्द्धनः । [2]णेरतश्च विषय एव लोपे व्यञ्जनान्तत्वादिहापि भवति,- चितिण् चेतनः, जुगुप्सनः, मीमांसनः । इङित इति किम् ? स्वप्ता । व्यञ्जनाद्यन्तादिति किम् ? एधिता, शयिता । अकर्मकादित्येव- वसिता वस्त्रम्, सेविता विषयान् ॥४४॥

अव०-[1]इश्च ङ् च=इङ्, इङ् इत्=अनुबन्धो यस्य धातोः स इङित्, तस्मात् । व्यञ्जनमादिरन्तश्च यस्य इदनुबन्धस्य ङानुबन्धस्य स व्यञ्जनाद्यन्तः,तस्मात्। इदनुबन्धात् ङानुबन्धात् कीदृशात् ? व्यञ्जनाद्यन्तात् इति विशेषणं ज्ञातव्यम् । [2]णेरतश्चेति कोऽर्थः ? चेतन इत्यत्र अनप्रत्ययविषये एव पूर्वं 'णेरनिटि' (४।३।८३) इत्यनेन णिग्लोपः कर्त्तव्यः, जुगुप्सनः मीमांसन इत्यत्र अनप्रत्ययविषये एव पूर्वम् 'अतः' (४।३।८२) इति सूत्रेण अतः=अकारस्य लोपः, पश्चात् अनप्रत्ययः कर्त्तव्यम् (? यः), णिं अतौ (? णेरतश्च) लोपे सति धातोर्व्यञ्जनाद्यन्तत्वादनप्रत्ययः प्राप्नोति । यदि णेरतो (? णेरतश्च) लोपो न क्रियते तदाऽनेकस्वरत्वाद्धातोः 'निन्दहिंस०' (५।२।६८) इति वक्ष्यमाणसूत्रेण णकः प्रत्ययः स्यात् ॥४४॥

## न णिङ्-य-सूद-दीप-दीक्षः ॥५।२।४५॥

म० वृ०-णिगन्तेभ्यः यान्तेभ्यः सूदादिभ्यश्च शीलादौ सत्यर्थे 'अनो न' भवति । णिगन्त,-- भाव[1]यिता, [2]हस्तयिता । यान्त,- क्ष्मायिता, दयिता, षूदि क्षरणे- सूदिता, दीपिता, दीक्षिता । [3]मधुसूदनादयो नन्द्यादिषु द्रष्टव्याः ॥४५॥

अव०-[1]'भावयिता' इत्यत्र 'भू सत्तायाम्' 'भूण् अवकल्कने' वा, 'भूङः प्राप्तौ णिङ्' (३।४।१९) इति णिङ् । [2]'हस्तयिता' इत्यत्र हस्तौ निरस्यति इति वाक्ये 'अङ्गान्निरसने णिङ्' (३।४।३८) इत्यनेन णिङ् । एवं पुच्छमुदस्यति=उत्पुच्छयिता, 'पुच्छादुत्परिव्यसने' (३।४।३९) इति णिङ् । भावयिता हस्तयिता अत्र णिग (णिङ)नन्तरमनेकस्वरधातुत्वात् णकविषये सति णिङो लोपो विधेयः, पश्चात् व्यञ्जनाद्यन्तत्वात् पूर्वेणानः प्राप्त इति 'न णिङ्०' सूत्रेणाऽनः प्रतिषिध्यते, तदनन्तरमिटि कृते सति 'णेरनिटि' (४।३।८३) इति वचनात् पुनर्णिङ् निवर्त्तते । [3]मधुसूदनः, अरिसूदनः, बलसूदन इति प्रयोगाः ॥४५॥

## द्रम-क्रमो यङः ॥५।२।४६॥

म०वृ०-यङन्ताभ्यां द्रमिक्रमिभ्यां शीलादौ सत्यर्थे 'अनः' स्यात् । कुटिलं द्रमति कुटिलं क्रामतीत्येवंशीलो[1]=दन्द्रमणः,[2]चंक्रमणः । सकर्मकार्थं वचनम्, ● 'य' इति प्रतिषेधनिवृत्त्यर्थं च ॥४६॥

अव०-[1]'दन्द्रमणः, [2]चंक्रमणः'; अत्र 'अतः' (४।३।८२) इत्यनेन अल्लोपः, 'योऽशिति' (४।३।८०) इति यलोपः ॥४६॥

## यजि-जपि-दंशि-वदादूकः ॥५।२।४७॥

म० वृ०-एभ्यो यङन्तेभ्यः शीलादौ सत्यर्थे 'ऊकप्रत्ययः' स्यात् । यायजूकः, जञ्जपूकः, दन्दशूकः, वावदूकः ॥४७॥

## जागुः ॥५।२।४८॥

म०वृ०-शीलादौ जागर्त्तेः 'ऊकः' स्यात् । 'यङः' इति निवृत्तम् । जागर्त्तीत्येवंशीलो=जागरूकः ॥४८॥

## शमाष्टकाद् घिनण् ॥५।२।४९॥

म०वृ०-शीलादौ सत्यर्थे शमादिभ्योऽष्टाभ्यो [1]'घिनण्' स्यात् । शमी, दमी, तमी, श्रमी, भ्रमी,

● 'न णिङ्-य०' (५।२।४५) इति यान्तधातुमाश्रित्य कृतस्य प्रतिषेधस्य निवृत्त्यर्थम् ।

क्षमी, प्रमादी, [२]क्लमी । ण् वृद्ध्यर्थः । घिरुत्तरत्र कत्वगत्यर्थः । नस्य अकार उच्चारणार्थः । अभिधाना-दकर्मकेभ्य एव घिनण्, तेनेह न घिनण्,-वनं भ्रमिता । सकर्मकेभ्यस्तु यथादर्शनं दर्शयिष्यामः ॥४९॥

---

अव०–[१]शमू दमूच् उपशमे, तमूच् काङ्क्षा-याम्, श्रमूच् खेदतपसोः, भ्रमूच् अनवस्थाने, क्षमौच् सहने, मदैच् हर्षे; क्लमूच् ग्लानौ इति शमाष्टकं दिवादौ पुषादिगणप्रान्ते । एतदनुक्रमेणो-दाहरणावली । [२]क्लमी इत्यत्र 'अमोऽकम्यमिचमः' (४।२।२६) इति ह्रस्वः । शमी इत्यादिषु क्षमीपर्यन्तेषु 'मोऽकमियमिरमिनमिगमिवमाचमः' (४।३।५५) इत्यनेन वृद्धिप्रतिषेधः । 'ञ्णिति' (४।३।५०) इति वृद्धिसम्भावना । शमादयो यजन्तान्मत्वर्थीयेन सिद्ध्यन्ति, तृन्बाधनार्थं तु वचनम् ॥४९॥

## युज-भुज-भज-त्यज-रञ्ज-द्विष-दुष-द्रुह-दुहाऽभ्या-हनः ॥५।२।५०॥

म० वृ०–एभ्यो 'घिनण्' स्याच्छीलादौ । [१]योगी, [२]भोगी, [३]कल्याणभागी, त्यागी, [४]रागी, द्वेषी, दोषी, द्रोही, दोही, [५]अभ्याघाती । अकर्मकादित्येव-गां दोग्धा ॥५०॥

---

अव०–[१]युज्यते युनक्ति वा इत्येवंशीलो=योगी । [२]भुङ्क्ते भुनक्ति भुजतीति वा इत्येवंशीलो=भोगी । [३]कल्याणं भजते इत्येवं(शीलः) । [४]रागी-त्यत्र 'अकट्घिनोश्च रञ्जेः' (४।२।५०) इति नलोपः । [५]अभि, आङ्, हन्, अभ्याघातीत्यत्र 'ञ्णिति घात्' (४।३।१००) इत्यनेन 'घात्' आदेशः ॥५०॥

## आङः क्रीड-मुषः ॥५।२।५१॥

म० वृ०–शीलादौ सत्यर्थे आङ् पराभ्यां क्रीड-मुषाभ्यां 'घिनण्' स्यात् । आक्रीडी, आमोषी ॥५१॥

---

अव०–'आङः क्रीडमुष' इत्यस्य बृहद्वृत्तौ विशेषोऽयम् ,–"शीलादिप्रत्ययान्ताः शब्दाः प्रायेण रूढिप्रकारा यथादर्शनमुक्तोपसर्गे प्रयुज्यन्ते इत्युप-सर्गान्तरे उपसर्गाधिक्ये वा शीलादिप्रत्यया न प्रयु-ज्यन्ते । एवमुत्तरत्र सूत्रेष्वपि" ॥५१॥

## प्राच्च यम-यसः ॥५।२।५२॥

म० वृ०–शीलादौ प्र-आङ् पराभ्यां 'घिनण्' स्यात् । प्रयच्छतीत्येवंशीलः=प्रयामी, आयामी; प्रयासी, आयासी ॥५२॥

## मथ-लपः ॥५।२।५३॥

म० वृ०–प्रात्पराभ्यां मथलपभ्यां 'घिनण्' स्यात् । प्रमथतीत्येवंशीलः=प्रमाथी, प्रलापी ॥५३॥

## वेश्च द्रोः ॥५।२।५४॥

म० वृ०–वेः प्राच्च परात् द्रवतेः 'घिनण्' स्या-त् । विद्रवतीत्येवंशीलः=विद्रावी, प्रदावी ॥५४॥

## वि-परि-प्रात्सर्तेः ॥५।२।५५॥

म० वृ०–विपरिप्रात्सर्तेः शीलादौ सत्यर्थे 'घिनण्' स्यात् । विसारी, परिसारी, प्रसारी ॥५५॥

## समः पृचैप्-ज्वरेः ॥५।२।५६॥

म० वृ०–सम्पराभ्यां पृचैप्ज्वरभ्यां शीलादौ सत्यर्थे 'घिनण्' स्यात् । ['पृचैप् सम्पर्के'] संपृणक्ती-त्येवंशीलः=सम्पर्की, संज्वरतीत्येवंशीलः=संज्वारी । अकर्मकादित्येव– सम्पृणक्ति शाकम् ॥५६॥

## सं-वेः सृजः ॥५।२।५७॥

म० वृ०–शीलादौ संविपरात् सृजेः 'घिनण्' स्यात् । संसृजति संसृज्यते वा इत्येवंशीलः=संसर्गी, विसर्गी ॥५७॥

## सम्-परि-व्यनु-प्राद्वदः ॥५।२।५८॥

म० वृ०–शीलादौ सम्-परि-वि-अनु-प्रेभ्यः पराद् वदेः 'घिनण्' स्यात् । संवदतीत्येवंशीलः=संवादी, परिवादी, विवादी, अनुवादी, प्रवादी ॥५८॥

## वेर्विच-कत्थ-स्रम्भ-कष-कस-लस-हनः ॥५।२।५९॥

म० वृ०–एभ्यो विपूर्वेभ्यः शीलादौ 'घिनण्'

स्यात् । विविनक्तीत्येवंशीलो= विवेकी, [विच् पी पृथग्भावे] विकत्थी, विस्रम्भी, [स्रम्भूङ् विश्वासे] विकाषी, विकासी, [कस गतौ] विलासी, विघाती, ['ञ्णिति घात्' (४।३।१००) इति हन्तेर्घातादेशः] ॥५९॥

व्यपा-ऽभेर्लषः ॥५।२।६०॥

म० वृ०–वि-अप-अभिपराल्लषे-'घिनण्' स्यात्। विलषतीत्येवंशीलो=विलाषी,अपलाषी,अभिलाषी ६०

सम्-प्राद्वसात् ॥५।२।६१॥

म० वृ०–सम्प्रात् पराद् वसतेः शीलादौ 'घिनण्' स्यात् । संवसतीत्येवंशीलः=संवासी, प्रवासी ॥६१॥

अव०–शब्निर्देशात् वस्तेरादादिकस्य न घिनण् ॥६१॥

समत्यपा-ऽभि-व्यभेश्चरः ॥५।२।६२॥

म० वृ०–सम् अति-अप-अभि-व्यभेः पराच्चरतेः शीलादौ सत्यर्थे 'घिनण्' स्यात् । सञ्चारी, अतिचारी, अपचारी, अभिचारी, व्यभिचारी ॥६२॥

अव०–शीलाद्यधिकारसूत्रेषु सर्वत्रापि "शीलादौ सत्यर्थे वर्त्तमानाद्धातोः" इति योजना सर्वत्रापि लिखिता ज्ञातव्या ॥६२॥

समनुव्यवाद्रुधः ॥५।२।६३॥

म० वृ०–सम-अनु वि-अवात्पराद् रुधे-'घिनण्' स्यात् । संरुन्धे इत्येवंशीलः=संरोधी, अनुरोधी, विरोधी, अवरोधी ॥६३॥

वेर्दहः ॥५।२।६४॥

म० वृ०–विपूर्वाद् दहे-'घिनण्' स्यात् । विदाही ॥६४॥

परेर्देवि-मुहश्च ॥५।२।६५॥

म० वृ०–देवीति देवृधातोरण्यन्तस्य ण्यन्तस्य च ग्रहणम् । परिपूर्वाभ्यां देविमुहिभ्यां चकाराद्दहश्च शीलादौ सत्यर्थे 'घिनण्' स्यात् । परिदेवते परिदेवयति वा इत्येवंशीलः=परिदेवी, परिमोही, परिदाही ॥६५॥

अव०–देवीति देवृधातोरण्यन्तस्य ण्यन्तस्य च ग्रहणम् । परिपूर्वाभ्यां देविमुहिभ्यां चकाराद्दहश्च शीलादौ सत्यर्थे घिनण् स्यात् इति युक्त्या सूत्रार्थो ज्ञातव्यः । सूत्राग्रे लिखितः सूत्रार्थो नादरणीयः (?) । अयं सूत्रार्थो नादरणीयः (?) । लाक्षणिकत्वाद्दीव्यतेर्ण्यन्तस्य न ग्रहणम् । तेवृङ् देवृङ् देवने इति भ्वादौ देव् ॥६५॥

क्षिप-रटः ॥५।२।६६॥

म० वृ०–परिपूर्वक्षिपरटभ्यां 'घिनण्' स्यात् । परिक्षिप्यति परिक्षिपति वा इत्येवंशीलः=परिक्षेपी, परिक्षेपी अम्भसाम्; परिराटी ॥६६॥

अव०–'क्षिपंच् प्रेरणे' इति दिवादौ, 'क्षिपींत् प्रेरणे' इति तुदादौ, उभयोरपि ग्रहणम् ॥६६॥

वादेश्च णकः ॥६७॥

म० वृ०–शीलादौ सत्यर्थे वर्त्तमानात् परिपरात् वादयतेः क्षिपरटिभ्यां च 'णकः' स्यात् । [1]परिवादकः, परिक्षेपकः, परिराटकः । असरूपत्वात् 'णकतृचौ' (५।१।४८) इति सिद्धे पुनरिह सूत्रे णकविधानं शीलादिकृत्प्रत्ययेषु अशीलादिकृत्प्रत्ययोऽसरूपविधिना न भवतीति ज्ञापनार्थम् । तेन अलङ्कारक इत्यादिप्रयोगवृन्दं शीलाद्यर्थे न भवति । बहुलाधिकारात् कचिद्भवत्यपि, यथा-"कामक्रोधौ मनुष्याणां [2]खादितारौ वृकाविव" । अत्र णकविषये तृच् ॥६७॥

अव०–[1]परिवादयतीत्येवंशीलः । [2]उत्तरसूत्रेण णकप्राप्तिः ॥६७॥

निन्द-हिंस-क्लिश-खाद-विनाशि-व्याभाषा-ऽसूया-ऽनेकस्वरात् ॥५।२।६८॥

म० वृ०–एभ्यो 'णकः' स्यात्, शीलादौ सत्यर्थे । [1]निन्दकः, [2]हिंसकः, [3]क्लेशकः, खादकः, [4]विनाशकः, व्याभाषकः, असूयकः, अनेकस्वर,-

दरिद्रायकः, चकासकः, गणकः, चुलुम्पकः ॥६८॥

अव०–[1]'णिदु कुत्सायाम्'। [2]'हिसु तृहप् हिंसायाम्' । तथा [3]'क्लिशिच् उपतापे' 'क्लिशौश् विबाधने' (इति) उभयोरपि ग्रहणम् , तेन क्लिशेर्दैवादिकस्य इदित्त्वेऽपि अनप्रत्ययो न भवति । [4]विनाशयतीत्येवंशीलो विनाशकः । असूयः कण्ड्वादौ अनेकस्वरत्वादेव सिद्धे ग्रहणं कण्ड्वादिनिवृत्त्यर्थम् , तेन 'कण्डूयिता, मन्तूयिता; अत्र तृन्नेव । असूयग्रहणं विनाऽनेकस्वरत्वात् कण्डूयिता इत्यादावपि णकः प्राप्नुयात् । तथा विनाशिग्रहणं तु अन्यस्य ण्यन्तस्य निवृत्त्यर्थम् , तेन कारयिता, (अन्यथा) अत्रापि अनेकस्वरत्वाण्णकः प्रसज्येत। कथं तर्हि गणक इत्यत्र णकः ण्यन्तत्वात् ? , उच्यते ,-अत्रायं विशेषः,–यतो विनाशीति णिगन्तग्रहणं वृत्ति(? सूत्र)कारः करोति तदिदं ज्ञापयति,-अन्यस्य णिगन्तस्यैव वर्जनम् , णिजन्तस्य णको भवत्येव । गणक इत्यत्र 'चुरादिभ्यो णिच्' (३।४।१७), न तु णिग् ॥६८॥

## उपसर्गाद् देव्-देवि-क्रुशः ॥५।२।६९॥

म० वृ०–उपसर्गात्परेभ्य एभ्यो 'णकः'स्यात् । आदेवते इत्येवंशीलः=आदेवकः, परिदेवकः; देवीति दीव्यतेर्देवतेर्वा ण्यन्तस्य ग्रहणम् , आदेवयतीत्येवंशीलः=आदेवकः, परिदेवकः, आक्रोशकः ॥६९॥

## वृङ्-भिक्षि-लुण्टि-जल्पि-कुट्टाट्टाकः ॥५।२।७०॥

म० वृ०–एभ्यः 'टाकप्रत्ययः' स्यात् । टकारो ङ्यर्थः । ['वृङ्श् संभक्तौ'] वृणीते इत्येवंशीलो=वराकः, एवं वराकी; भिक्षाकः, भिक्षाकी; लुण्टाकः, लुण्टाकी; जल्पाकः, जल्पाकी; [कुट्टण् कुत्सने च] कुट्टाकः, कुट्टाकी ॥७०॥

## प्रात्सू-जोरिन् ॥५।२।७१॥

म० वृ०–प्रात्पराभ्यां सुवतिजुभ्याम् 'इनप्रत्ययः' स्यात् । प्रसुवतीत्येवंशीलः=प्रसवी, प्रजवी; [जुः सौत्रः] ॥७१॥

अव०–'प्रात्सूजोरिन्' इत्यत्र सू इति निरनुबन्धग्रहणात् 'षूत् प्रेरणे' इति तुदादेर्ग्रहणम् , षूङौक् प्राणिगर्भविमोचने इत्यदादिकसूतेः,षूङौच् प्राणिप्रसवे इति दिवादेः सूयतेः उभयोरपि न ग्रहणम् । अत एव वृत्तौ प्रसुवतीत्येवंशील इति वाक्यम् ॥७१॥

## जीण्-दृ-क्षि-विश्रि-परिभू-वमा-ऽभ्यमा-ऽव्यथः ॥५।२।७२॥

म० वृ०–एभ्य 'इन्' स्यात् । जि,-जयी, इण्,-अत्ययी, उदयी; दृ-[1]आदरी, [2]क्षि,-क्षयी, विश्रि,-विश्रयी,परिभू,-परिभवी,वम्,-वमी,अभ्यमी, [3]अव्यथी ॥७२॥

अव०–[1]'दृङ्त् आदरे' आद्रियते इत्येवंशीलः =आदरी । [2]'क्षि क्षये' 'क्षिषश् निवासगत्योः' द्वयोरपि इन् । [3]न व्यथते इत्येवंशीलः ॥७२॥

## सृ-घस्यदो मरक् ॥५।२।७३॥

म० वृ०–एभ्यो 'मरक्' स्यात् । सृमरः, घस्मरः, अद्मरः ॥७३॥

## भञ्जि-भासि-मिदो घुरः ॥५।२।७४॥

म० वृ–एभ्यः शीलादौ सत्यर्थे 'घुरः' स्यात् । घकारो गत्वार्थः । भज्यते स्वयमेवेत्येवंशीलं= भङ्गुरं काष्ठम् , [1]भासुरम् , [2]मेदुरः ॥७४॥

अव०–[1]भासते इत्ययेवंशीलं भासुरं वपुः । [2]मेद्यति मेदते वा इत्येवंशीलो=मेदुरः ॥७४॥

## [1]वेत्ति-छिद्-भिदः कित् [2] ॥५।२।७५॥

म० वृ–एभ्यः 'कित् घुरः' स्यात् । विदुरः, छिद्यते स्वयमेवेत्येवंशीलः=छिदुरः, एवं भिदुरः [3] ॥७५॥

अव०[1]घुरस्य कित्त्वान्न गुणः । [2]वेत्ति इति तिव्निर्देश इतरविदित्रयव्युदासार्थः । [3]भिद्यते स्वयमेव इत्येवंशीलो=भिदुरः ॥७५॥

## भियो रु-रुक-लुकम् ॥५।२।७६॥

म० वृ०—शीलादौ बिभेते 'रु-रुक-लुक, इति प्रत्ययत्रयं'किल्' स्यात्। भीरुः, भीरुकः, भीलुकः ॥ ७६ ॥

## सृ-जीण्-नशष्ट्वरप् ॥५।२।७७॥

म० वृ०-एभ्यः 'कित् ट्वरप्' स्यात्। टकारो ङ्यर्थः। पकारस्तागमार्थः। सृ-सृत्वरः, जि,-जित्वरः, इण्,-इत्वरः, इत्वरी ; नश,-नश्वरः, नश्वरी ॥७७॥

## गत्वरः ॥५।२।७८॥

म० वृ०—गमेः'ट्वरप्' स्यात्, मकारस्य [धातुमकारस्य] च 'त्' निपात्यते। गत्वरः, गत्वरी ॥७८॥

## स्म्यजस-हिंस-दीप-कम्प-कम-नमो रः ॥५।२।७९॥

म० वृ०—एभ्यः शीलादौ 'रः' प्रत्ययः स्यात्। स्मि,-स्मेरं मुखम्, अजस्, [1]अजस्रं श्रवणम्, अजस्रा प्रवृत्तिः, अजस्रः पाकः, अजस्रं पचति, हिंस्रः व्याधः, दीप्रो दीपः, [2]कम्प्रः, [3]कम्,-कामयते इत्येवंशीला=कम्रा स्त्री, नम्रः ॥७९॥

---

प्रव०—[1]अजस्रमित्यत्र 'जसूच् मोक्षणे' (इति) जस् नञ्पूर्वः। न जस्यति इत्येवंशीलम्=अजस्रं श्रवणम्। अजस्रशब्दोऽयं स्वभावात् नैरन्तर्यविशिष्टां क्रियामाह,तेन अन्यस्य धातोरर्थे धात्वन्तरे★कर्त्तरि सति रप्रत्ययो भवति; यथा अजस्रं पचति, अजस्रः पाकः, अजस्रा प्रवृत्तिः, तेन 'अजस्रो घट' इति न भवति; क्रियाभिधानानुपपत्तेः। अथवा अजस्रमित्यव्ययमपि नित्यार्थं क्रियाविशेषणमस्ति। [2]कम्पते इति कम्प्रः। [3]बहुलाधिकारात् कर्मण्यपि रप्रत्ययः, (कम्यते=कम्रः) बहुलाधिकारादेव 'कमिता' इत्यपि भवति, अत्र तृच् ॥७९॥

## तृषि-धृषि-स्वपो नजिङ्[1] ॥५।२।८०॥

म० वृ०—एभ्यो 'नजिङ्' स्यात्। [2]तृष्णक्, [3]धृष्णक्, स्वप्नक् ॥८०॥

---

प्रव०—[1]नजिङ् इत्यत्र ङकारो गुणनिषेधार्थः, इकार उच्चारणार्थः। [2]तृष्यतीत्येवंशीलो=तृष्णक्। ञि तृषाट् प्रागल्भ्ये। [3]धृष्णोतीत्येवंशीलो =धृष्णक् ॥८०॥

## स्थेश-भास-पिस-कसो वरः ॥५।२।८१॥

म० वृ०—एभ्यः शीलादौ 'वरः प्रत्ययः' स्यात्। स्थावरः, स्थावरा; ईश्वरः, ईश्वरा ; कथमीश्वरी ? 'अश्नोतीश्वादेः' ❀ (उणा० ४४२) इत्युणादिसूत्रेण वरट् भवति, भास्वरः, भास्वरा ; पेस्वरः, पेस्वरा : विकस्वरः, विकस्वरा ॥८१॥

## यायावरः ॥५।२।८२॥

म० वृ०—याधातोः शीलादौ यङन्तात् 'वरप्रत्ययो' निपात्यते। कुटिलं यातीत्येवंशीलो= यायावरः ॥८२॥

---

प्रव०—'यायावर' इत्यत्र 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) इत्यनेन यङो य् लुप्यते। 'अतः' (४।३।८२) इत्यनेन पूर्वं यङन्तस्य अकारलोपि-स्यात् ततो 'य्वोः प्वय्०' इति यलोपः। 'योऽशिति' (४।३।८०) इति न प्रवर्त्तते, व्यञ्जनान्ताद्धातोर्विहितस्य यकारस्येति वचनात् ॥८२॥

## दिद्युद्दद्गज्जगज्जुहू-वाक्-प्राट्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटप्रू-परिव्राड्-भ्राजादयः क्विप् ॥५।२।८३॥

म० वृ०—एते शब्दाः 'क्विबन्ताः' शीलादौ सत्यर्थे निपात्यन्ते। द्योतते इत्येवंशीलः=[1]दिद्युत्, एवं [2]दद्रत्, [3]जगत्, [4]जुहूः, [5a]वक्तीत्येवंशीलो =वाक्, [5b]पृच्छति इति प्राट्, तत्त्वप्राट्, शब्दप्राट्, दधाति ध्यायति वा=धीः,[6] [7]श्रीः, [8]शतद्रूः, [9]स्रवतीति स्रूः, [10]जूः, [11]आयतस्तूः, [12]कटप्रूः, [13]परिव्राट्, बहुलाधिकारादशीलादावपि क्विप्-धीः, सुधीः, प्रधीः, आधीः, भ्राजादि,- विभ्राजते =विभ्राट्, भासते= भाः, [14]पूः, पुरौ, पुरः, [15]धूः, धुरौ, धुरः, [16]विद्युत्, [17]ऊर्क्, ऊर्जौ;

---

★ अत्र 'धात्वन्तरे' इति पाठोऽधिकः प्रतीयते। ❀ श्रीहैमप्रकाशे 'अश्नोतेरीश्चादेः' इति।

[18]पक्, [19]शक्, [20]भित्, [21]वित् इति भ्राजादिः। शीङादिप्रत्ययानां पूर्णोऽवधिः ॥८३॥

अव०– [1]दिद्युत् इति आयुधविशेषो विद्युच्च। [2]दृणातीति दद्रत्, धात्वर्थ एव निपातनात् द्विर्वचनं ह्रस्वत्वं च। तथा [3]गच्छतीत्येवंशीलो जगत्, क्रियाशब्दोऽयम्, तेन जगतौ, जगतः। विष्टपवाचकस्तु इत्थं साध्यते– गच्छतीति जगत्, 'गमेर्डिद् द्वे च' (उणा० ८८५) इत्युणादिसूत्रेण कत्(प्रत्ययः), स च डित्, द्विर्वचनं च, जगती जगन्ति इति द्विवचनबहुवचने सति शतृवत् क्रियते। [4]जुहोतीति जुहूः होमभाण्डम्, निपातनात् द्वित्वं दीर्घश्च। [5]वक्तीति वाक्, अथवा निपातनात् कर्मण्यपि 'उच्यते' इति वाक्। [5b]पृच्छति=प्राट्, प्राशौ। [6]धीः इत्यत्र निपातनात् दधातेराकारस्य ईकारः, ध्यायतेस्तु या इत्यस्य ईः। तथा [7]श्रयति= श्रीः। [8]शतं द्रवतीति शतद्रूरायुधविशेषः। [9]स्रवति=स्रूः। [10]जवतीति जूः पिशाचः। [11]आयतं स्तौति= आयतस्तूः याचकः। [12]कटं प्रवते= कटप्रूः, नदीतीरम्। [13]परिव्रजति= परिव्राट्, एषु सर्वत्र दीर्घः। परिवा······ स्त्री। पुंस्त्रीलिङ्गः (?)। 'पूः' [14]इत्यत्र 'पृश् पालनपूरणयोः' पृणातीति पूः। [15]धुर्वतीति धूः, क्विप्। [16]विद्योतते= विद्युत्। [17]उर्जयतीति ऊर्क्। [18]पचतीति पक्। [19]शक्नोतीति शक्। [20]भिनत्तीति भित्। [21]वेत्तीति वित्। सर्वत्र निपातनात् क्विप्। भ्राजादिगणे विशेषोऽयम्, तथाहि– भुवः संज्ञायामेव गम्यमानायां क्विप् निपात्यते,– भूः पृथ्वी, शम्भूः शिवः, आत्मभूः, मनोभूः कामः, स्वयम्भूः ब्रह्मा, स्वभूर्विष्णुः, मित्रभूर्नाम कश्चिन्नरः, प्रतिभूः उत्तमर्णाधमर्णयोरन्तरस्थः, द्रन्भूर्व्यसनसहायः, कारभूः पण्यमूल्यादिनिर्णेता, ददलालः बसा० (?) वर्षाभूः दर्दुरः औषधिश्च, पुनर्भूः पुनर्विवाहिता, धृतवा (?) ओषधिश्च संज्ञायाम्, अन्यत्र भविता। तथा शीलादिप्रत्ययेषु असरूपविधिर्नास्ति, तेन भ्राजादिभ्यः परः सामान्यलक्षणः क्विप् न प्राप्नोतीति पुनरनेन 'दिद्युद्दद०' इत्यादिना क्विप् निपात्यते ॥८३॥

## शं-सं-स्वयं-वि-प्राद् भुवो डुः ॥५।२।८४॥

म० वृ०–एभ्यः भुवः सत्यर्थे वर्त्तमानात् 'डुः प्रत्ययः' स्यात्। [1]शम्भुः शङ्करः, [2]सम्भुर्जनिता, [3]स्वयम्भुः, विभुर्व्यापकः, प्रभुः स्वामी ॥ ८४ ॥

अव०–[1]शं=सुखम्, तत्र भवति इति शम्भुः शङ्करः। [2]सम्भवति जनकत्वेन इति सम्भुर्जनिता, पिता इत्यर्थः, जनिरन्तर्भूतण्यर्थः। [3]स्वयम्भुर्ब्रह्मा ॥ ८४ ॥

## पुव इत्रो दैवते ॥५।२।८५॥

म०वृ०–सत्यर्थे वर्त्तमानात्[1] दैवते=देवतायां कर्त्तरि पूधातोः'इत्रः' स्यात्। ['पूङ् पवने' 'पूञ्श् पवने' (इति) उभावपि ग्राह्यौ] पवते पुनाति वा पवित्रोऽर्हन् ॥८५॥

अव०–[1]देवता एव दैवतम्, 'प्रज्ञादिभ्योऽण्' (७।२।१६५) इत्यण् ॥८५॥

## ऋषि-नाम्नोः करणे ॥५।२।८६॥

म० वृ०–सत्यर्थे वर्त्तमानात् पूधातोः करणे 'इत्रः' स्यात्, ऋषौ संज्ञायां च [नाम्नि=संज्ञायाम्]। पूयतेऽनेनेति पवित्रोऽयं ऋषिः। नाम्नि,- दर्भः पवित्रः[1] ॥८६॥

अव०–[1]दर्भः पवित्रः, (एवम्) बर्हिः पवित्रम्, यज्ञोपवीतं पवित्रम्, ओघोपकरणं पवित्रम्, पवित्रा नदी; दर्भादीनां पवित्रमिति संज्ञा, नामविषये प्रयोगमालेयम्। ओघ इत्यत्र वहति प्रापयति निरवद्यां सर्वसावद्यविरतिमिति ओघः, अच्, 'न्यङ्क्वुद्गमेघा०' (४।१।११२) इति साधुः ॥ ८६ ॥

## लू-धू-सू-खन-चर-सहार्त्तेः ॥५।२।८७॥

म० वृ०–एभ्यः सत्यर्थे वर्त्तमानेभ्यः करणे 'इत्रः' स्यात्। [1]लवित्रम्, धुवित्रम्, [2]सवित्रम्, खनित्रम्, चरित्रम्, सहित्रम्, [3]अरित्रम् ॥८७॥

अव०—[1]लुनात्यनेन लवित्रम् । '[2]लूधूसूखन०' इति सूत्रे धूसू इति निरनुबन्धनिर्देशात् 'धूग् विधुनने' इति धू 'षूत् प्रेरणे' इति षू गृह्येते अत एव धुवत्यनेन धुवित्रम्,धुवत्यनेन धुवित्रमित्यत्र 'कुटादेर्ङिद्वद्०' (४।३।१७) इत्यादिना गुणनिषेधः, सुवत्यनेन सवित्रम् । सानुबन्ध(योः) 'धूग्श् कम्पने' 'षूङौच् प्राणिप्रसवे' (इति) अनयोः प्रतिषेधः । [3]ऋच्छति=इयर्त्ति अनेनेति अरित्रम् ॥८७॥

**नी-दाव्-शस्-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-पा-नहस्त्रट् ॥५।२।८८॥**

म० वृ०—एभ्यः सत्यर्थे करणे 'त्रट्' स्यात् । टकारो ङ्यर्थः । नयन्त्यनेन नेत्रम्, [1]दात्रम्, [2]शस्त्रम्, योत्रम्, योक्त्रम्; स्तोत्रम्, तोत्रम्, [3]सेत्रम्, [4]सेक्त्रम्, मेढ्रम्, [5] पत,-पत्त्रम्, पात्रम्, पात्री; नद्ध्रः नद्ध्री ॥८८॥

अव०—[1]दात्रमित्यत्र 'दांवक् लवने' दात्यनेन दात्रम् । [2]'शस्त्रम्', 'शसूङ् हिंसायाम्' । 'सेत्रम्', षिंग्ट् बन्धने' सीयतेऽनेन सेत्रं रज्जुबन्धभेदः । [4]'सेक्त्रम्', 'षिचींत् क्षरणे' सेक्त्रं कोऽर्थः? पिचरिक उ (?) । [5] मेढ्रं पुरुषलिङ्गम् ॥८८॥

**हल-क्रोडाऽऽस्ये पुवः ॥५।२।८९॥**

म० वृ०—पूधातोः सत्यर्थे वर्तमानात् हलास्ये क्रोडास्ये च करणे 'त्रट्' स्यात् । पुनाति पवते वानेन =पोत्रं हलस्य सूकरस्य च मुखमुच्यते ॥८९॥

अव०—हलश्च क्रोडश्च=हलक्रोडौ,हलक्रोडयोरास्यं मुखं=हलक्रोडास्यम्, तस्मिन् । हलेन यज्ञभूमिः पवित्रा क्रियते, सूकरेण कांस्यं पवित्रं क्रियते इति पोत्रं हलमुखं क्रोडमुखं च ॥८९॥

**दंशेस्त्रः ॥५।२।९०॥**

म० वृ०—दंशेः करणे 'त्रः' स्यात् । दशत्यनया =दंष्ट्रा ॥९०॥

अव०—त्रट् इत्यधिकारे सति 'दंशेस्त्रः' इत्यत्र यत् त्रप्रत्ययविधानं तत् आप्प्रत्ययार्थमिति ज्ञापयति, अन्यथा त्रटि सति दंष्ट्री इति स्यात् ॥९०॥

**धात्री ॥५।२।९१॥**

म० वृ०—ट्धेर्धागो वा कर्मणि 'त्रट्' निपात्यते । धयन्ति तामिति धात्री=स्तनदायिनी । दधति तां भैषज्यार्थमिति धात्री आमलकी ॥९१॥

**ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः । ॥५।२।९२॥**

म० वृ०—ज्ञानार्थेभ्यः, इच्छार्थेभ्यः, अर्चार्थेभ्यः, ञीद्भ्यः शील्यादिभ्यश्च धातुभ्यः सत्यर्थे वर्त्तमानेभ्यः 'क्तः' स्यात् । पूर्ववच्चास्य कर्तृकर्मार्थनिर्देशः । ज्ञानार्थे,- राज्ञां [1]ज्ञातः, राज्ञां बुद्धः,[2] राज्ञां विदितः, अवगतः[3] । इच्छार्थे,- राज्ञामिष्यते =राज्ञामिष्टः, (राज्ञां) मन्यते=मतः[4] । अर्चार्थे,- राज्ञामर्चितः, पूजितः । [5]ञीत् ,-मिन्नः, धृष्टः, तूर्णः, सुप्तः, भीतः, [6]फुल्लः । [7]शील्यादि,-शीलितः, रक्षितः, क्षान्त इत्यादि । [8]बहुलाधिकाराद् यथाभिधानमेभ्यो भूतेऽपि क्तः, तथा च तद्योगे तृतीयासमासोऽपि सिद्धः,--[6]अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्य इति । एवं शीलितो मित्रेण इत्यादावपि द्रष्टव्यः ।९२।

अव०—[1]ज्ञायते इति ज्ञातः, [2]एवं बुध्यते इति बुद्धः, एवं सर्वत्र । [3]राज्ञाम् । [4]राज्ञाम् । सर्वत्र 'कर्त्तरि' (२।२।८६) इति सूत्रेण राज्ञामित्यत्र षष्ठी । [5]'ञीत्', कोऽर्थः? ञिकारानुबन्धधातुभ्यः, यथा मिन्नः, 'ञिमिदाङ् स्नेहने' 'ञिमिदाच् स्नेहने' (इति) द्वावपि । [6]'फुल्लः', अत्र 'दल ञिफला विशरणे' (इति) फल, फलतीति फुल्लः, 'ति चोपान्त्या०' (४।१।५४) इति उत्वम् । [7]शील्यादिप्रयोगमाला—

शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट उद्यतः ।
संयतः शपितस्तुष्टो रुष्टो रुषित आशितः ॥ १ ॥
कान्तोऽभिव्याहृतो हृष्टस्तृप्तः सुप्तः स्थितो भृतः ।
अमृतो मुदितः पूर्तः सक्तोऽक्तः श्रान्त-विस्मितौ ॥२॥
संरब्धा-ऽऽरब्ध-दयिता दिग्धः स्निग्धोऽवलीणकः ।
आरूढो मूढ आयस्तः क्षुधित-क्लान्त-व्रीडिताः ॥ ३ ॥

मत्तश्चैवं तथा क्रुद्धः श्लिष्टः सुहित a इत्यपि ।
लिप्त-दृप्तौ च विज्ञेयौ b सति c लग्नादयस्तथा ॥४॥

इति शील्यादिप्रयोगाः ४० वर्त्तमानकाले । 'aषह षुहच् शक्तौ' (इति) सुह्, सुह्यतीति सुहितः । bसति=वर्त्तमाने क्तः । c'लगे सङ्गे' (इति) लग्, लगतीति लग्नः । [8]'राज्ञां ज्ञात' इत्यादिषु 'ज्ञानेच्छाऽर्चार्थाधारक्तेन' (३।१।८६) इति सूत्रेण षष्ठीतत्पुरुषसमासनिषेधः, तर्हि 'राजमहितः, राजपूजित' इत्यादयः कथम्? अत्राह बहुलाधिकारादित्यर्थः (? दित्यादि), एभ्यो ज्ञानार्थेच्छार्थार्चार्थेभ्यो धातुभ्यो भूतेऽतीतकालेऽपि क्तो भवति, यथा राजपूजितः, राजमहितः, राजसम्मतः । राजभिः पूज्यते स्मेत्यादिवाक्यं कर्तव्यम् । [9]त्रिभुवनराजैः पूज्यते स्म=त्रिभुवनराजपूजितः, एवं राजमहितः राजसम्मत इत्यादि । वर्त्तमानक्ते सति षष्ठ्येव, यथा 'कान्तो हरिश्चन्द्र इव प्रजानाम्' ॥९२॥

## उणादयः ॥५।२।९३॥

म० वृ०–बहुलमिति वर्त्तते । सत्यर्थे वर्त्तमानात् धातो-'रुणादयः प्रत्यया बहुलं' भवन्ति । [1]कारुः, वायुः । सत्यर्थे [2]उक्ता उणादयः क्वचिद् [3]भूतेऽपि दृश्यन्ते,– [4]भसितं तत् इति भस्म । अद्भ्यः सरन्ति स्म निर्गच्छन्ति स्म= अप्सरसः । उक्तं च—

[5]संज्ञासु धातुरूपाणि[6] प्रत्ययाश्च[7] [8]ततः परे ।
[9]कार्यानुबन्धोपपदं विज्ञातव्यमुणादिषु ॥ १ ॥
बाहुलकं[10] [11]प्रकृतेस्तनुदृष्टेः[12]
[13]प्रायसमुच्चयनादपि[14] तेषाम् ।
[15]कार्यसशेषविधेश्च तदूह्यं
[16]नैगमरूढिभवं हि सुसाधु' ॥ २ ॥
[17]नाम च धातुजमाह निरुक्ते
व्याकरणे शकटस्य च तोकम् ।
[18]यत्र पदार्थविशेषसमुत्थं
प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥ ३ ॥

अत्र उणादिसूत्राणि ज्ञातव्यानि ॥९३॥ ग्रं० १८३ ॥

---

अव०–[1]'कृवापाजी'-ति प्रथमोणादिसूत्रेण 'उण्' प्रत्ययः । [2]उक्ता इत्यस्य विहिता इति व्याख्यानम् । [3]अतीतकालेऽपि । [4]'भष भर्त्सने' इति हैमधातौ, 'भस भर्त्सनदीप्त्योः' इति कलापके, पूर्वं दीप्तं सत् भसितमिति भस्म । [5]संज्ञास्विति श्लोकार्थोऽयम्,-उणादिषु=उणादिगणे बहुलाधिकारात् सर्वमिदं ज्ञातव्यम्,-'संज्ञासु', कोऽर्थः ? संज्ञाशब्देषु उणादिप्रत्ययान्तेषु, [6]'धातुरूपाणि', धातुपारायणोक्तधातुन् (? धातवः) अथवा सूत्र धातून् (? धातवः), तथा [7]'प्रत्ययाश्च' इति, ततो धातुपरत उणादिप्रत्ययाः । [8]ततो धातुरूपात्, तथा [9]'कार्यानुबन्धे'-ति, गुणवृद्ध्यादिकं कार्यमप्राप्तमनुक्तमपि निपातनात् भवति, सर्वमिदं ज्ञातव्यमिति सम्बन्धः । [10]'बाहुलकम्', इदं दोधकं नाम काव्यम्, उणादौ बाहुलकं=बहुलमिति पदमूह्यमिति सम्बन्धः । [11]कस्याः ? प्रकृतेः, [12]कीदृश्याः ? तन्वी चासौ दृष्टिश्च (तनुदृष्टिः, तस्याः) तनुदृष्टेः, तनोस्तनेर्वस्य वा दृष्टिः (?) तनुदृष्टिमाश्रित्येत्यर्थः, 'गम्ययप०' ( २।२।७४) इत्यनेन पञ्चमी, तथा [13]प्रायेणाकृच्छ्रेण समुच्चयनम्, न तु सामस्त्येन; [14]तेषामुणादिप्रत्ययानाम्, [15]'कार्यसशेषे-ति, न केवलं तेषामुणादिप्रत्ययानां प्रकृतेर्बाहुलकमूह्यम्, किन्तु कार्यसशेषविधेश्च बाहुलकमूह्यम्, सह शेषेण वर्त्तते=सशेषः, सशेषश्चासौ विधिश्च ( =सशेषविधिः ), कार्याणां सशेषविधिः=(कार्यसशेषविधिः), 'तस्याः काक' इत्यादिसिद्ध्यर्थं सूत्रान्तरं न कृतमस्ति, 'ककि लौल्ये' इत्यस्य अचि वृद्ध्यभणनात्; सशेषविधित्वमिति परिभाव्यम् । तथा [16]निगमो वेदः, तत्र भवं नैगमम्, नैगमं च रूढिभवं च[=नैगमरूढिभवम्, अथवा] निगम एव नैगमः, नैगमश्च रूढिश्च (=नैगमरूढी,) नैगमरूढ्योर्भवम् (=नैगमरूढिभवम्), यस्मात् बाहुलकात् (? हिशब्दो यस्मादर्थे, यस्मादत्र बाहुलकमस्ति तस्मात्) नैगमरूढिभवं शब्दजातं सुसाधु भवतीत्यर्थः । [17]न केवलं पच, पठेत्यादिपदं धातु-

जं=धातुसमुत्पन्नम्, किन्तु नामापि, केवलशब्दमपि धातुजं=धातोरेवोत्पन्नमाहु=ब्रूते निरुक्तिकारः। [१८]'यत्र पदार्थे'-ति,यत्र पदमर्थः=प्रयोजनं यस्य असौ पदार्थः=लक्षणम्, तस्य विशेषः, समुत्तिष्ठतेऽस्मात् इति समुत्थः, 'स्थादिभ्यः कः' (५।३।८२। इति कः), पदार्थविशेषः (? विशेषात्) समुत्थोऽस्य तत्, तदपि प्रत्ययात् प्रकृतेः (च) सोऽत्र भवः (?) उह्यम्, सम्भावनीयमित्यर्थः ॥९३॥ अत्र सूत्रे अवचूरिश्लोक--३२०।अक्षर-१६॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने पञ्चमाध्यायस्य द्वितीयः पादः समाप्तः ॥

॥ अर्हम् ॥

# ॥ पञ्चमोऽध्यायः ॥

## [ तृतीयः पादः ]

卐

### वर्त्स्यति गम्यादिः ॥५।३।१॥

म० वृ०–गम्यादयः शब्दाः वर्त्स्यति=भविष्यति धात्वर्थे 'इन्नादिप्रत्ययान्ताः' साधवो भवन्ति। गमिष्यतीति गमी ग्रामम् , आगामी, भावी इत्यादि ॥१॥

अव०–'वर्त्स्यति' इत्यत्र 'वृद्भ्यः स्यसनोः' (३।३।४५) इति परस्मैपदम् , अत्र सप्तम्येकवचनं ङि, सूत्रत्वात् लोपः★। 'वर्त्स्यति गम्यादिः' इति सूत्रेण उणादिप्रत्ययानां सत्यर्थे=वर्त्तमाने काले विहितानामपि भविष्यद्धात्वर्थता, भविष्यति कालेऽप्राप्तोऽपि विधिः क्रियते इति गमिष्यति, आगमिष्यति,भविष्यति,प्रस्थास्यति इत्यादिवाक्यानि । सामान्यतः सिद्धानां प्रत्ययानां 'वर्त्स्यति गम्यादि'- रित्यनेन भविष्यद्धात्वर्थता विधीयते। गमी, आगामी, भावी, प्रस्थायी, तथा प्रयायी,प्रतियायी, प्रबोधी,प्रतिबोधी, प्रतिरोधी इति गम्यादयः प्रयोगाः एवं ज्ञेयाः। एषु यथाक्रमं 'गमेरिन्' (उ०९१९) 'आङ्श्च णित्' (उणा०९२०)'भुवो वा'(उ०९२२)'प्रात्स्थः'(उ०९२४) 'प्रप्रतेर्याबुधिभ्याम्' (उ०९२३) इति इन् णित्। कथं श्वो ग्रामं गमी ? अत्र भविष्यत्सामान्ये गमीतिपदं निष्पाद्य पश्चात् श्वःशब्देन सह योगः कार्यः।१।

### वा हेतुसिद्धौ क्तः ॥५।३।२॥

म० वृ०–वर्त्स्यत्यर्थे वर्त्तमानाद्धातोर्धात्वर्थहेतोः सिद्धौ सत्यां 'क्तः स्यात् वा'। किं ब्रवीषि वृष्टो देवः संपन्नास्तर्हि शालयः, सम्पत्स्यन्ते इति वा। प्राप्ता नौस्तीर्ण्णा तर्हि नदी इत्यादि ॥२॥

अव०–हेतुः=कारणम् , तस्य सिद्धिर्निष्पत्तिर्हेतुसिद्धिः ॥२॥

### कषोऽनिटः ॥५।३।३॥

म० वृ०–अनिटः कषेर्वर्त्स्यत्यर्थे वर्त्तमानात् 'क्तः'स्यात्। कषिष्यति कष्टम् , कष्टा दिशस्तमसा अनिट इति किम् ? कषिता शत्रवः ॥३॥

अव०–कषेः कृच्छ्रगहनयोरनिटत्वमुक्तम् , यत्र न इट् तत्र क्तः ॥३॥

### भविष्यन्ती ॥५।३।४॥

म० वृ०–वर्त्स्यत्यर्थे [=भविष्यति काले] धातोः परतो 'भविष्यन्ती विभक्तिः' स्यात्। भोक्ष्यते ॥४॥

### अनद्यतने श्वस्तनी ॥५।३।५॥

म० वृ०–[1]अनद्यतने काले [2]वर्त्स्यत्यर्थे धातोः परतः 'श्वस्तनीविभक्तिः' स्यात् , कर्त्ता श्वः, कर्त्ता। अनद्यतन इति किम् ? व्यामिश्रे मा भूत् ,-अद्य श्वो वा गमिष्यति ॥५॥

अव०–[1]न विद्यतेऽद्यतनो यत्र आगामिदिने

★ 'वर्त्स्यति' इत्यत्र सूत्रत्वात् सप्तम्येकवचनलोप इति भावः, परमत्र चिन्त्यम्, 'वर्त्स्यति' इत्यत्र सप्तम्येकवचनङिप्रत्ययसद्भावाद्। अतो भ्रमात् 'सूत्रत्वात् लोपः' इत्युक्तमिति सम्भाव्यते, तद्यथा-अवचूरिकारैः 'वर्त्स्यति' इति पदं स्यतिप्रत्ययान्तं कल्पितम्, अत्र वर्त्स्यतिप्रकृतेरिकारान्तत्वाद् ङौ सति 'वर्त्स्यतौ' इति भवितव्यम् , परं सूत्रे तु 'वर्त्स्यति' इति दृश्यते, अतो ङिप्रत्ययस्य लोपो जातः इत्यभिप्रायेणोक्तं 'सूत्रत्वात् लोपः' इति, परं तदसत्, 'वर्त्स्यति, इत्यत्र स्यत्प्रत्ययान्तं 'वर्त्स्यत्' इति शब्दः, ततो ङिप्रत्ययः, अतो 'वर्त्स्यति' इति सप्तम्येकवचनरूपं भवति,अत्र ङिप्रत्ययो विद्यते, अतः "सूत्रत्वाद् लोपः" इति वचनं भ्रान्तिवशादुक्तमिति मामकीनी मतिः।

सोऽनद्यतनः, तस्मिन्। २भविष्यति काले । कथं श्वो गमिष्यति ? मासेन गमिष्यति ? अत्र Aपदार्थे भविष्यन्ती, Aपदं गमिष्यति क्रिया, साऽर्थो यस्य धात्वर्थस्य (स पदार्थः), तस्मिन् ॥५॥

## परिदेवने ॥५।३।६॥

म० वृ०–परिदेवने = शोचने गम्यमाने वर्त्स्यत्यर्थे 'श्वस्तनीविभक्तिः' स्यात् । अयं तु कदाऽध्येता [=पठिता] य एवमनभियुक्तः [=निरुद्यमः]। इयं तु कदा गन्ता यैवं पादौ निदधाति [=निक्षिपति] । विशेषविधानात् कदाकर्हियोगलक्षणा विभाषा१ बाध्यते ॥६॥

अव०–१'कदाकर्ह्योर्नवा' (५।३।८) इति सूत्रोक्तविभाषा ॥६॥

## पुरा-यावतोर्वर्त्तमाना ॥५।३।७॥

म० वृ०–पुरायावतोर्निपातयोरुपपदयोर्वर्त्स्यत्यर्थे [=भविष्यति] वर्त्तमानाद्धातोः'वर्त्तमाना' विभक्तिर्भवति। पुरा भुङ्क्ते, यावद् भुङ्क्ते । भविष्यदनद्यतनेऽपि परत्वाद्वर्त्तमानैव-पुरा श्वो भुङ्क्ते, यावत् श्वो याति ॥७॥

अव०–पुराशब्दोऽद्यतनकाले, यावच्छब्दः क्रमार्थे वर्त्तते। पुरा श्वो भुङ्क्ते इत्यादौ'अनद्यतने श्वस्तनी' (५।३।५) प्राप्नोति। पुरायावतो (?) ॥७॥

## कदा-कर्ह्योर्नवा ॥५।३।८॥

म०वृ०–कदाकर्हि इत्युपपदयोर्वर्त्स्यत्यर्थे'वर्त्तमाना [विभक्तिः] नवा' स्याद्धातोः१ । कदा भुङ्क्ते,पक्षे२ कदा भोक्ष्यते, कदा भोक्ता। एवं कर्हि भुङ्क्ते इत्यादि३। ४भूते तु नित्यं परोक्षादयः। कदा बुभुजे, कदा भुक्तवान्;एवं कर्हि बुभुजे,कर्हि भुक्तवान्।८।

अव०–१वर्त्तमानाद्धातोः इत्यध्याहारः। २भविष्यन्तीश्वस्तन्यावपि भवतः । (आदिशब्दात्) ३कर्हि भोक्ष्यते,कर्हि भोक्ता। ४ये वैयाकरणाः कदाकर्हियोगे सर्वेषु कालेषु वर्त्तमानाविभक्तिमिच्छन्ति तेषां मतमपास्यन् वृत्तिकारः प्राह–'भूते तु' इत्यादि ॥८॥

## किंवृत्ते लिप्सायाम् ॥५।३।९॥

म० वृ०–किंवृत्ते उपपदे प्रष्टुः (याचकस्य) लिप्सायां गम्यमानायां वर्त्स्यत्यर्थे धातोः 'वर्त्तमाना नवा' स्यात्। को भवतां भिक्षां ददाति, [पक्षे भविष्यन्ती श्वस्तनी च-] दास्यति, दाता वा। कतरो भवतां भिक्षां ददाति, [पक्षे-] दास्यति दाता वा। एवं कतमो भिक्षां ददाति दास्यति दाता वा। किंवृत्त इति किम् ? भिक्षां दास्यति। लिप्सायामिति किम् कः पुरं यास्यति ॥९॥

अव०–विभक्त्यन्तस्य डतरडतमप्रत्ययान्तस्य च किंशब्दस्य वृत्तं = किंवृत्तमिति वैयाकरणसमयः, तेन किन्तरां किन्तमामिति किंवृत्तं नोच्यते। यत्र प्रयोगे 'कः, कतरः, कतमः' इति शब्दा उपपदा भवन्ति तत्र धातोः परतो वर्त्तमाना इत्यर्थः ॥९॥

## लिप्स्यसिद्धौ ॥५।३।१०॥

म० वृ०–लब्धुमिष्यमाणाद्भक्तादेः १सिद्धौ = स्वर्गादिप्राप्तौ गम्यमानायां २धातोः'वर्त्तमाना नवा'३ स्यात् । अकिंवृत्तार्थोऽयमारम्भः । ४यो भिक्षां ददाति ५दास्यति दाता वा स स्वर्गं याति यास्यति याता वा ॥१०॥

अव०–१भक्तादेः = ॐ भक्तलोकात् यजमानसकाशात्। २वर्त्स्यत्यर्थे वर्त्तमानात् । ३पक्षे भविष्यन्ती श्वस्तनी (च)। ४याचको यजमानं भक्तलोकमेभिर्वाक्यैः प्रोत्साहयति। यो भवतां मध्यात् भिक्षां ददाति, एकं वाक्यमिदम्, स स्वर्गलोकं याति, द्वितीयवाक्यमिदम्, इत्युभयोर्वाक्ययोर्मिलितयोरेव लिप्स्यसिद्धिरर्थः प्रकटो ज्ञायते । तेन यो भिक्षां ददाति स स्वर्गं याति इत्युभयत्रापि 'लिप्स्यसिद्धौ' इति सूत्रेण वर्त्तमाना भवति। ५दास्यति, दाता; यास्यति, याता इति पक्षे उदाहरणानि ॥१०॥

ॐ इदं चिन्त्यम्, बृहद्वृत्तौ काशिकावृत्त्यादिषु वा भक्तशब्दस्यार्थो 'भक्तलोकः' इति न दर्शितः, किन्तु 'ओदनादिः' इति प्रदर्शितः।

## पञ्चम्यर्थहेतौ ॥५।३।११॥

म० वृ०—पञ्चम्यर्थः प्रैषादिस्तस्य हेतुः [=कारणम्] ऊपाध्यायागमनादि, तस्मिन्नर्थे वर्त्स्यति (वर्तमानाद्) धातोः 'वर्त्तमाना नवा' स्यात्। उपाध्यायश्चेदागच्छति आगमिष्यति आगन्ता वा, अथ त्वं सूत्रमधीष्व ॥११॥

अव०—वक्ष्यमाणे 'सत्सामीप्ये०' (५।४।१)इति सूत्रे (?पादे) 'प्रैषानुज्ञावसरे कृत्यपञ्चम्यौ' (५।४।२९) इति सूत्रेण, प्रैषार्थे, अनुज्ञार्थे, अवसरेऽर्थे पञ्चमी विहिताऽस्ति। न्यत्कारपूर्वं यत्प्रेरणं तत्प्रैष इत्युच्यते। अनुज्ञा कामचारानुमतिः। अवसरः प्राप्तकालता। अत्र च "पञ्चम्यर्थहेतौ" इति सूत्रे भविष्यदुपाध्यायागमनं कर्तृपदमध्ययनादिविषयस्य प्रैषस्य अनुज्ञाया अवसरस्य च हेतुः=कारणं भवति। इति उदाहरणानां भावना एवम्। पक्षे भविष्यन्ती, श्वस्तनी ॥११॥

## सप्तमी चोर्ध्वमौहूर्त्तिके ॥५।३।१२॥

म० वृ०—पञ्चम्यर्थहेतावूर्ध्वमौहूर्त्तिके वर्त्स्यत्यर्थे [वर्त्तमानात्] धातोः 'सप्तमी वर्त्तमाना च वा' स्यात्। ऊर्ध्वं मुहूर्त्तादुपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति आगन्ता वा, अथ त्वं तर्कमधीष्व ।१२।

अव०—मुहूर्त्तादूर्ध्वम=ऊर्ध्वमुहूर्त्तम् , 'नाम नाम्ना०' ( ३।१।१८) इति समासः, ऊर्ध्वमुहूर्त्ताद्भवः =ऊर्ध्वमौहूर्त्तिकः, 'अध्यात्मादिभ्य इकण्' (६।३।७८) इति इकण् प्रत्ययः, अस्मादेव निर्देशादुत्तरपदवृद्धिः ॥१२॥

## क्रियायां क्रियार्थायां तुम्-णकच्-भविष्यन्ती ॥५।३।१३॥

म०वृ०—[1]वेति निवृत्तम्। क्रियार्थायां[2]क्रियायामुपपदे [सति] वर्त्स्यत्यर्थे वर्त्तमानाद्धातोः 'तुम्-णकच्-भविष्यन्तीप्रत्यया' भवन्ति। कर्तुं याति, कारको याति, करिष्यामीति याति। [एवं भोक्तुं व्रजति, भोजको व्रजति,भोक्ष्ये इति व्रजति इत्यपि ज्ञेयम्]। क्रियायामिति किम्? भिक्षिष्ये इत्यस्य जटाः। क्रियार्थायामिति किम्? धावतस्ते पतिष्यति वासः[3] ॥१३॥

अव०—'णकतृचौ' (५।१।४८) इति सामान्येन सिद्धे क्रियार्थोपपदभाविन्या भविष्यन्त्या बाधो मा भूदिति 'क्रियायां क्रियार्थाया'—मित्यनेन णकच्-विधानम्। ननु असरूपविधिना णकोऽपि भविष्यन्तीति चेत्, एवं तर्हि असरूपविधिना तृजादयो मा भूवन्निति पुनर्णकच्विधानम्, तेन 'ओदनस्य पाचको व्रजति, पक्ता (व्रजति), पचो व्रजति' इत्यादि न भवति। [1]केवलविभक्तिविधानप्रस्तावे विकरणयोस्तुम्णकचोर्विधानात् वेति निवृत्तम्। [2]यस्माद्धातोस्तुमादिः, तद्वाच्या या क्रिया, साऽर्थः =प्रयोजनं यस्याः सा क्रियार्था, तस्यां क्रियायाम्, कीदृश्याम्? क्रियार्थायां व्रजतीत्यादिकायाम्, उपपदे=समीपपदे सति इत्यर्थः। [3]धावतस्ते पतिष्यति वास इति उदाहरणेऽपि धावक्रिया उपपदमस्ति, न तु असौ क्रिया पतनार्थमुपात्ता इति तुमुणकच्-भविष्यन्त्यो न भवन्ति ॥१३॥

## कर्मणोऽण् ॥५।३।१४॥

म० वृ०—क्रियायां क्रियार्थायामुपपदे [सति] कर्मणः परात् वर्त्स्यत्यर्थे वर्त्तमानाद्धातोरण् स्यात्। कुम्भकारो याति ॥१४॥

अव०—'कर्मणोऽण्' (५।१।७२) इति सामान्येन विहितोऽण् अनेन णकचा बाध्येत, असरूपविधिरपि नास्ति इति पुनकरण् (? पुनरण्) विधीयते। सोऽयमण् अपवादत्वात् णकचं बाधते। तथाऽस्य सामान्यस्याणो बाधकान् टगादिप्रत्ययान् अपि अयमण् बाधते, तेन वक्रगायो व्रजति, सुरापायो व्रजति, गोदायो व्रजति, एषु 'गायोऽनुपसर्गाट्टक्' (५।१।७४) 'सुराशीधोः पिबः' (५।१।७५) 'आतो डोऽह्वावामः' (५।१।७६) इति सूत्राणि बाधित्वाऽण् प्रवर्त्तते। क्वापि अणः प्राप्तौ बहुलाधिकारात् णकच्भविष्यन्त्यावपि भवतः,— कटं कारको व्रजति, ओदनं भोजको याति, काण्डानि लविष्या-

मीति याति, वस्त्रं दास्यामीति याति । ※ ननु यथा णकचाऽण् बाध्येत तथा तुम् प्रत्ययो हि अव्ययः, कृदव्ययो भावे एव भवति, अभिधानात्, अतो भिन्नविषयत्वात्तुमा नो बाधा भवति ॥१४॥

## भाववचनाः ॥५।३।१५॥

म० वृ०–[भावं वचन्ति– 'रम्यादिभ्यः०' (५।३।१२६) अनट्] "भाववचना घञ्क्त्यादयः", ते क्रियायां क्रियार्थायामुपपदे [सति] वर्त्स्यत्यर्थे [भविष्यति काले] धातोर्भवन्ति । पाकाय याति, पक्तये, पचनाय, पाचनायै याति । वचनग्रहणाद् यो यथा विहितः स तथा भवति ॥१५॥

अव०–क्रियार्थोपपदेन तुमा मा बाधिषतेति वचनम्, असरूपविधेरभावस्य प्राग् ज्ञापितत्वात् । यदि "भावे भावार्था" इति सूत्रं क्रियेत तदा भावमात्र एव ये प्रत्यया विहिताः त एव भवेयुः,न सर्वे । वचनग्रहणे तु ये केचित्प्रत्यया भावं ब्रुवन्ति तेऽत्र ग्राह्याः । येन केन प्रकारेण भावं ब्रुवाणा गृह्यन्ते, तेन पिक्षायै (? भिक्षायै) व्रजतीत्यत्र क्तिर्न भवति ॥१५॥

## पद-रुज-विश-स्पृशो घञ् [1] ॥५।३।१६॥

म० वृ०–एभ्यो 'घञ्' स्यात्, कृत्त्वात्कर्त्तरि । [2]वर्त्स्यतीत्यादि निवृत्तम् । [3]पादः, रोगः, वेशः, स्पर्शः ॥१६॥

अव०–[1]घकारः कत्वगत्वार्थः, ञकारो वृद्ध्यर्थः । [2]'वर्त्स्यतीत्यादि निवृत्तम्' 'पदरुज' इत्यादिप्रकृतिनियमितप्रत्ययोपादानात्, अत्र आदिशब्दात् क्रियाक्रियार्थोपपदं निवृत्तम् । [3]पद्यते पत्स्यते अपादि पेदे वा इति पादः, एवं रोगादिषु त्रिकालविषयवाक्यकरणात् वर्त्स्यतीतिनिवृत्तिफलम् ॥१६॥

## सर्त्तेः स्थिर-व्याधि-बल-मत्स्ये ॥५।३।१७॥

म० वृ०–सृधातोः 'घञ्' स्यात्, स्थिरव्याधिबलमत्स्ये कर्त्तरि । [1]सारः स्थिरः पदार्थः, एवं सालसारः, [खदिरसारः] कार्यसारः, [व्याधौ कर्त्तरि–] अतीसारो व्याधिः, सारो बलम्, विसारो मत्स्यः ॥ १७॥

अव०–[1]स्थिरे कर्त्तरि, सरति कालान्तरमिति सारः ॥१७॥

## भावाकर्त्रोः ॥५।३।१८॥

म० वृ०–भाववाच्ये कर्तृवर्जिते कारके च धातो–'घञ्' स्यात् । पचनम्= पाकः, एवं रागः, अकर्तृ,– प्रकुर्वन्ति तमिति प्राकारः । करणाधिकरणयोरनट् तदपवादश्च व्यञ्जनान्तेभ्यो घञ् वक्ष्यते । दाशन्तेऽस्मै दाशः, [तालव्यशकारः दाशोऽतिथिविशेषः ब्राह्मणश्च] आहरन्ति तस्मादित्याहारः [1](असंज्ञायामपि–) दायो दत्तः, लाभो लब्धः । भावाकर्त्रोरिति किम्? पचः ॥१८॥

अव०–'भावाकर्त्रो'-रेतदधिकारसूत्रम् । 'नाम्नि पुंसि च' (५।३।१२१) इत्यन्तं यावद् भावाकर्त्रोरयमधिकारः प्रायः । अत्राधिकारे सूत्राणि १०४, मध्ये केवले भावे, केवले कर्मणि, करणेनापि सूत्राणि । 'भावाकर्त्रो'- रिति सूत्रे भावस्वरूपं किञ्चिल्लिख्यते,– भावो भवत्यर्थः साध्यरूपः क्रियासामान्यं क्रियाणां साधारणं रूपं धात्वर्थ उच्यते, स धातुनैव उच्यते, तत्र नैव उच्यते (?) तत्र त्यादयः क्त्वातुमुतव्यादयः (च) भवन्ति, यथा क्रियते, कृत्वा, कर्त्तुम्, कर्त्तव्यम्, करणीयम्, कार्यमित्यादिप्रयोगाः । यस्तु भावो धात्वर्थधर्मः सिद्धता नाम लिङ्गसंख्यायोगी स द्रव्यवत् धात्वर्थाद्न्य एव, तत्र ईदृशे भावे वाचकत्वेन 'घञ्–अनट्- क्तिविधिः' प्रवर्तते, तेन तद्योगे लिङ्गवचनभेदः सिद्धो भवति– पाकः, पाकौ, पाकाः; पचनं, पचने, पचनानि; पक्तिः, पक्ती, पक्तयः । [1]केचित्तु, अत्र 'भावाकर्त्रो'-रिति सूत्रे संज्ञायां घञमाहुः, तन्मतनिराकरणार्थं सूरिः असंज्ञायामपि घञ् इत्याह, तेन 'दायो दत्तः, लाभो लब्धः' इत्यत्रापि घञ् ॥१८॥

※ अत्र प्रश्नघटकवाक्ये कानिचिदक्षराणि च्युतानीति प्रतिभाति ।

## इङोऽपादाने तु टिद्वा ॥५।३।१९॥

म० वृ०—इङो धातोर्भावाकर्त्रो-'घञ्', अपादाने तु कारके घञ् वा 'टित्' स्यात् ।[1]अध्यायः, [2]उपाध्यायः; [3]टित्करणबलात् स्त्रियां क्तिर्बाध्यते, [4]उपाध्यायी, उपाध्याया ॥१९॥

अव०—[1]अध्ययनम्=अध्यायः । [2]उपेत्याधीयतेऽस्मात् । [3]टित्त्वस्य हि स्त्रियां ङीप्रत्ययः फलम्, ततो यदि स्त्रियां क्तिर्भविष्यति तदा टित्करणेन किम् ?। [4]स्वयं व्याख्यात्री स्त्री उच्यते । यदा तु धवयोगः तदा उपाध्यायानी उपाध्याया इति भवति ॥ १९ ॥

## श्रो वायु-वर्ण निवृते ॥५।३।२०॥

म० वृ०—शृधातोर्भावाकर्त्रोर्वायुवर्णनिवृतेऽर्थे 'घञ्' स्यात् । शारो [1]वायुर्वर्णो [2]वा, [3]नीशारो निवृतम्= प्रावरणम् । तथा "गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः"। ★नियमेन वृता (=निवृता) इत्यन्वर्थात्—शारैरिव क्रीडितम्' ॥२०॥

अव०—[1]शीर्यते=हिंस्यते औषधादिभिरिति शारो वायुः । [2]शीर्यते=विनश्यते मालिन्येन इति शारो वर्णः । [3]निशीर्यते=अपह्रियते शीताद्युपद्रवो येन तन्नीशारो निवृतं=प्रावरणम्, 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) इत्यनेन इत्यस्य (? ह्रस्वस्य) दीर्घः ।

आक्षेपैः कनकस्य दीपकपिशाविश्राणिता राशयो, वादे वादिविषाणां प्रविहृताः शास्त्रार्थगर्भा गिरः; तत्र वातप्रतिरोधितैर्नृपतिभिः शारैरिव क्रीडितं, कर्त्तव्यं कितमर्थिता यदि विधेस्तत्रापि सज्जा वयम्।१। इति विक्रमादित्योक्तिरियम्। एष्विति किम् ? शरः, शरणम्=शरः, 'युवर्ण०' (५।३।२८) इत्यल्, शीर्यते =हन्यतेऽनेन प्राणी इति शरः, 'पुन्नाम्नि घः' (५।३।१३०) इति घप्रत्ययः) ॥२०॥

## निरभेः पूल्वः ॥५।३।२१॥

म० वृ०—निरभिपूर्वाभ्यां यथासंख्यं पूल्भ्यां भावाकर्त्रो-'घञ्' स्यात् । [निष्पूयते=] निष्पावः, अभिलावः ॥२१॥

## रोरुपसर्गात् ॥५।३।२२॥

म० वृ०—उपसर्गपूर्वरुधातो-'घञ्' स्यात् । संरवणं=संरावः, विरावः, । उपसर्गादिति किम् ? रवः। कथं रावः ? बहुलाधिकारात् ॥२२॥

## भूश्र्यदोऽल् ॥५।३।२३॥

म० वृ०—भू-श्रि-अद्धातुभ्यः उपसर्गपूर्वकेभ्यो भावाकर्त्रो-'रल्प्रत्ययः' स्यात् । [भू-,] प्रभवः, [विभवः] सम्भवः। (श्रि,-) प्रश्रयः। [अद्,] [1]प्रघसः, संघसः । उपसर्गादित्येव– भावः, श्रायः, घासः । कथं प्रभावः, विभावः, अनुभावः ? बहुलाधिकारात्, 'प्रकृष्टो भाव' इत्यादिप्रादिसमासो वा । ॥२३॥

अव०–'भूश्र्यदोऽल्' इत्यत आरभ्य 'उदः श्रेः' (५।३।५३) इत्यन्तमलोऽधिकारसूत्राणि ३१ । [1]'घस्लृ सनद्यतनीघञचलि' (४।४।१७) इत्यनेन अदः स्थाने घसः । भूश्र्यदो०इत्युपसर्गादेव इति नियमार्थमिदं वचनम्। अल् इत्यत्र लकारो 'मिग्मीगोऽखलचलि' (४।२।८) इत्यत्र विशेषणार्थः ॥२३॥

## न्यादो नवा ॥५।३।२४॥

म० वृ०—निपूर्वाददेरलि 'घसभावोऽकारस्य दीर्घत्वं च' वा निपात्यते। न्यादः, निघसः ॥२४॥

## सं-नि-व्युपाद् यमः ॥५।३।२५॥

म० वृ०—एभ्य उपसर्गेभ्यः परात् यम्धातोर्भावाकर्त्रोः 'अल् वा' स्यात् । [1]संयमः, संयामः ; नियमः, नियामः ; वियमः, वियामः; उपयमः, उपयामः ॥२५॥

अव०—[1]संयमनं=संयमः, एवं सर्वत्र अल्, पक्षे घञ् ॥२५॥

★ निवृता द्यूतोपकरणमिति कश्चिद्, नियमेन वृता.......................इति बृहद्वृत्तौ ।

## नेर्नद-गद-पठ-स्वन-क्वणः ॥५।३।२६॥

म० वृ०—नेरुपसर्गात्परात् (? परेभ्य) एभ्यो 'घाऽल्' (भावाकर्त्रोः) स्यात् । निनदः, निनादः; निगदः, निगादः; निपठः, निपाठः; निस्वनः, निस्वानः; निक्वणः, निक्वाणः ॥२६॥

## [1]वैणे क्वणः ॥५।३।२७॥

म० वृ०—वैणेऽर्थे वर्त्तमानादुपसर्गपूर्वात् क्वणेः 'अल् वा' स्यात् । प्रक्वणः, प्रक्वाणो वीणायाः[2] । वैण इति किम् ? प्रक्वाणः शृङ्खलस्य ॥२७॥

अव०—[1]वीणायां भवो=वैणः, 'भवे' (६।३।१२३। इत्यनेन) अण् । [2]एवं निक्वणः, निक्वाणो वीणायाः । कथं क्वणः क्वाणः ? वक्ष्यमाणेन 'नवा क्वण' (५।३।४८) इत्यादिसूत्रेण सामान्येन विधानात् वैणेऽप्यर्थेऽल् ज्ञातव्यः ॥२७॥

## युवर्ण-वृ-दृ-वश-रण-गमृद्ग्रहः ॥५।३।२८॥

म० वृ०—उपसर्गान्नवा इति (च) निवृत्तम् । इवर्णान्तोवर्णान्तेभ्यः, वृदृवशरणगमिभ्यः, ऋकारान्तेभ्यो ग्रहेश्च 'भावाकर्त्रोरल्' स्यात् । जयः, क्रयः, यवः, नवः, स्तवः, लवः, वरः, [ प्रवर इत्यपि ] दरः, आदरः, वशः, रणः, गमः, ऋदन्त,-[1]करः, [2]गरः, [3]तरः, [4]दरः, [5]शरः, ग्रहः । कथं[6]वारः ? बहुलाधिकाराद् घञ् । परिवार इति तु ण्यन्तादचि सिद्धम् ॥२८॥

अव०—[1]'कृत् विक्षेपे' करः । [2]'गृत् निगरणे' गरः । [3]तृ-तरः । [4]'दृश् विदारणे' दरः । [5]शृश्-शरः । [6]वारः इत्यत्र वृधातुः, अत्राल् प्राप्नोति कथं घञ् ? इति पराशयः, वारः समूहः, वारः क्रियाऽभ्यावृत्तिः (वारोऽवसरः) इति वारशब्दस्य अर्थत्रयम् । युवर्णवृदृवशरण०' इति सूत्रेण सोपसर्गेभ्यो निरुपसर्गेभ्यो वा उक्तधातुभ्योऽल् भवति इति पाश्चात्योपसर्गाधिकारो निवर्त्तितः इत्युक्तम्, यतोऽग्रेतनसूत्रेषु सोपसर्गधातुभ्योऽल् दर्शितोऽस्ति । व्यावृत्त्युदाहरणेषु घञ् ॥२८॥

## वर्षादयः क्लीबे ॥५।३।२९॥

म० वृ०—वर्षादिशब्दा 'अलन्ताः क्लीबे' यथादर्शनं [भावाकर्त्रोः] निपात्यन्ते । [1]नपुंसके क्तानड्निवृत्त्यर्थं वचनम् । वर्षम्, भयम्, धनम्, वनम्, खलम्, पदम्, युगम्[2] । अनपुंसकस्तु क्तप्रत्ययोऽसरूपविधिना स्यादेव,-[3]वृष्टं मेघेन, भीतं[4] बटुना ॥२९॥

अव०—[1]यदि नपुंसके क्तानटप्रतिषेधार्थं 'वर्षादयः क्लीबे' इति सूत्रं कृतं तर्हि वर्षणमिति किं न भवति ? भवत्येव, 'वृषभो वर्षणम् (? वर्षणाद्) इति भाष्यकारवचनाद् । [2]युगशब्दो रथाङ्गे, कालविशेषे, युग्मे (इति) अर्थत्रये वर्त्तते, 'युजूंपी योगे' (इति) युज्, योजनं=युगम्, निपातनात् अल् गत्वगुणाभावश्च भवति । [3]वृष्यते स्म इति वृष्टम् । [4]भीयते स्म=भीतम् ॥२९॥

## समुदोऽजः पशौ ॥५।३।३०॥

म० वृ०—समुद्भ्यां परादजेः पशुविषये धात्वर्थे[1] वर्त्तमानाद् 'अल्' स्यात् । [2]समजः, [3]उदजः पशूनाम् । पशाविति किम् ? समाजः [=सभा] साधूनाम्, उदाजः क्षत्रियाणाम् ॥३०॥

अव०—[1]भावाकर्त्रोः । [2]'समजः', कोऽर्थः ? समूहः । [3]'उदजः', पशूनां प्रेरणमित्यर्थः ॥३०॥

## सृ-ग्लहः प्रजना-ऽक्षे ॥५।३।३१॥

म० वृ०—सृग्लहाभ्यां यथासङ्ख्यं प्रजने [ =गर्भग्रहणे ] अक्षविषये धात्वर्थे वर्त्तमानाभ्यां भावाकर्त्रोः 'रल्' स्यात् । गवामुपसरः[1] [2]अक्षाणां ग्लहः । प्रजनाक्ष इति किम् ? अपसारो भृत्यै राज्ञाम् । कथं [3]परिसरविषमेषुर्लाढमुक्ताः ? घेन सिद्धम् ॥३१॥

अव०—[1](गवां) 'धीनाम् [=पक्षिणाम्] उपसरं दृष्ट्वा', प्रजनो गर्भग्रहणम्, तदर्थं स्त्रीपुंसां प्रथमं सरणमुपसर इत्युच्यते । तथा[2] 'अक्षाणां ग्लहः', कोऽर्थः ? अक्षाणां ग्रहः, ग्रहेः सूत्रपाठे 'ग्लह' इति निपातनात् लत्वम्, अथवा 'ग्लहौङ् ग्रहणे' इति

भ्वादिधातुना ग्लहः इति प्रयोगः । [3]परि=समन्तात् सरन्त्यस्मिन्निति परिसरः, 'पुन्नाम्नि घः' (५।३।१३०) इत्यनेन घप्रत्ययः ॥३१॥

## पणेर्माने ॥५।३।३२॥

म० वृ०—पणेर्मानेऽर्थे [1]'अल्'स्यात् । [2]मूलकपणः, शाकपणः । मान इति किम् ? पाणः ॥३२॥

अव०—घञपवादो योगः । [1]भावाकर्त्रोः । [2]पण्यते इति पणः, मूलकादीनां संव्यवहारार्थं परिमितो मुष्टिर्मूलकपण इत्यर्थः ॥३२॥

## संमद-प्रमदौ हर्षे ॥५।३।३३॥

म० वृ०—संमदप्रमदौ 'हर्षेऽर्थेऽलन्तौ' निपात्येते । सम्मदः पिकानाम्, प्रमदः कन्यानाम् । हर्ष इति किम् ? संमादः, प्रमादः ॥३३॥

## हनोऽन्तर्घना-ऽन्तर्घणौ देशे ॥५।३।३४॥

म० वृ०—अन्तःपूर्वाद्धन्ते-'रल् घनघणौ चादेशौ' निपात्येते [भावाकर्त्रोः],देशे वाच्ये । अन्तर्हण्यतेऽस्मिन्निति अन्तर्घनः अन्तर्घणो वा देशः, [वाहीकेषु देशविशेषः] अन्तर्घातोऽन्यः ॥३४॥

## प्रघण-प्रघाणौ गृहांशे ॥५।३।३५॥

म० वृ०—प्रपूर्वाद्धन्तेर्गृहांशे वाच्ये 'अल् घणघाणादेशौ च' निपात्येते । प्रघणः, प्रघाणः द्वारालिन्दकः, प्रघातोऽन्यः ॥३५॥

अव०—शुकाङ्गनीलोपलनिर्मितानाम्,
　　लिप्तेषु भासागृहदेहलीनाम् ;
　यस्यामलिन्देषु न चक्रुरेव,
　　मुग्धाङ्गनागोमयगोमुखानि ॥१॥
　इति मेघ (? माघे) ॥३५॥

## निघोद्घ-सङ्घोद्घना-ऽपघनोपघ्नं निमित-प्रशस्त-गणा-ऽत्याधाना-ऽङ्गा-ऽऽसन्नम् ॥५।३।३६॥

म० वृ०—हन्तेर्निगादयः शब्दा यथासङ्ख्यं निमितादिषु वाच्येषु 'कृतघत्वादयोऽलन्ता' निपात्यन्ते । [1]निघाः वृक्षाः शालयो बृहतिका वा, निघं वस्त्रम्, निघातोऽन्यः । [2]उद्घः प्रशस्तः, उद्घातोऽन्यः । गणः प्राणिनां समूहः, [3]संघः, अन्यत्र संघातः । [4]अत्याधानम्—उद्घनः काष्ठोद्घनः, लोहोद्घनः, उद्घातोऽन्यः । [5]अपघनोऽङ्गम्, अपघातोऽन्यः । [6]उपघ्नः आसन्नः, गुरूपघ्नः, उपघातोऽन्यः ॥३६॥

अव०—[1]समन्ततो मितं तुल्यमविशेषेण वा मितं परिच्छिन्नं=निमितम्, तुल्यारोहपरिणाहम्, कोऽर्थः ? तुल्यदैर्घ्यं तुल्यविशालत्वम्, निमितेऽर्थे निघ इति निपातः, निर्विशेषं निश्चयेन वा हन्यन्ते ज्ञायन्ते इति निघाः वृक्षाः, निघाः शालयः, निघा बृहतिकाः, निघं वस्त्रम् । [2]तथा उत्कर्षेण हन्यते ज्ञायते=उद्घः प्रशस्तः । [3]कथं 'संघातो मनुष्याणां' ? संघातः शब्दः समुदायमात्रे । ननु संघातः=प्राणिसमूहः, तत्कथं न निपातः ? सत्यम्, संघातशब्दं प्रसाध्य पश्चात् मनुष्यशब्देन सह सम्बन्धः । तथा [4]अत्याधीयन्ते छेदनार्थं कुट्टनार्थं वा काष्ठादीनि यत्र तदत्याधानम्, तत्र अत्याधानेऽर्थे—उद्घनः, काष्ठोद्घनः, लोहोद्घनः । [5]अङ्गे देहावयवे वाच्ये अपघन इति, अपहन्यतेऽनेनेति अपघनो देहावयवः । [6]आसन्ने=समीपेऽभिधेये उपघ्नम्, उपहन्यते=समीप इति ज्ञायते इति उपघ्नः=समीपम् ॥३६॥

## मूर्त्ति-निचिता-ऽभ्रे घनः ॥५।३।३७॥

म० वृ०—[1]मूर्त्त्यादिष्वर्थेषु 'हन्तेरल् घनादेशश्च' निपात्यते । [2]अभ्रस्य घनः, एवं दधिघनः, लोहघनः, निचितं= निरन्तरम्, घनाः केशाः । अभ्रं=मेघः, घनो=मेघः । कथं घनं दधि ? गुणशब्दोऽयं तद्योगाद् गुणिन्यपि वर्त्तते ॥३७॥

अव०—[1]मूर्त्तिः=काठिन्यम् । [2]'अभ्रस्य घनः', काठिन्यमित्यर्थः । इति उदाहरणम् ॥३७॥

## व्ययो-द्रोः करणे ॥५।३।३८॥

**म० बृ०**–वि–अयस्–द्रुभ्यः परात् 'हन्तेरल् घनादेशश्च करणे' स्यात् । भावस्य कारकान्तरस्य चानुप्रवेशो मा भूदिति करणग्रहणम् । [1]विघनः सूर्यः पाशश्च, अयोघनः, [2]द्रुघनः=कुठारः । स्त्रियां त्वनडेव परत्वात्,– विहननी, अयोहननी, द्रुहननी ।३८।

**अव०**–[1]विहन्यतेऽनेन तिमिरमिति विघनः =सूर्यः, विघनेन्दुसमद्युतिः, अथवा वयः=पक्षिणो हन्यतेऽनेनेति विघनः=पाशः, इति सूर्ये पाशे अर्थद्वये विघनशब्दः । [2]द्रुशब्दो वृक्षे पुंक्लीबः, द्रु हन्यते अनेनेति [2]द्रुघनः=कुठारः । कथं द्रुघणः ? 'अरीहणादेरकण्' (६।२।८३) इति तद्धिते अरीहण-द्रुघणेति गणपाठात् णत्वम् ।।३८।।

## स्तम्बाद् घ्नश्च ।।५।३।३९।।

**म० बृ०**–स्तम्बशब्दात् 'हन्तेरल् घ्नघनादेशौ च करणे' निपात्येते । [1]स्तम्बघ्नो दण्डः, स्तम्बघनो यष्टिः । स्त्रियां तु परत्वादनडेव,– स्तम्बहननी यष्टिः ।।३९।।

**अव०**–[1]स्तम्बो हन्यतेऽनेनेति स्तम्बघ्नः स्तम्बघनः । कथं स्तम्बघ्नी इषीका ? करणस्यापि कर्तृत्वविवक्षया 'अचित्ते टक्' (५।१।८३) इति टक्प्रत्यये सति सिद्धम् ।।३९।।

## परेर्घः ।।५।३।४०।।

**म० बृ०**–परिपूर्वाद्धन्तेः 'अल् घादेशश्च करणे' स्यात् । परिघोऽर्गला । लत्वे पलिघः ।।४०।।

**अव०**–परिहन्यतेऽऽनेनेति परिघः ।।४०।।

## ह्वः समाह्वया-ऽऽह्वयौ द्यूतनाम्नोः ।।५।३।४१।।

**म० बृ०**–[1]करणे इति निवृत्तम् । द्यूते नाम्नि चार्थे यथासंख्यं समाङ्पूर्वात् आङ्पूर्वाच्च ह्वयतेः 'अल् ह्वयादेशश्च' निपात्यते । [2]समाह्वयः प्राणिद्यूतम्, आह्वयो नाम ।।४१।।

**अव०**–[1]अर्थविशेषोपादानात् । [2]समाह्वयन्ते प्राणिनोऽत्र इति समाह्वयः=प्राणिद्यूतं कुक्कुटादियुद्धम् ।।४१।।

## न्यभ्युपवेर्वाश्चोत् ।।५।३।४२।।

**म० बृ०**–नि-अभि-उप-विभ्यः परात् ह्वयतेर्भावाकर्त्रोः 'अल् तद्योगे च वाशब्द उकारः' स्यात् । निहवः, अभिहवः, उपहवः, विहवः । 'ह्वो हव' इत्यनिपातनं किम् ? यङो लुपि निपातनं मा भूत्, तेन 'विजोहव' इति सिद्धम्, अन्यथा 'विहव' इति स्यात्[2] ।।४२।।

**अव०**–[1]वाऽग्रे प्रथमासिः, उदग्रे प्रथमासिः, एवमभेदनिर्देशः सर्वादेशार्थः । ह्व इत्येव,– निवायः । [2]"प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणम्" इति न्यायबलात् यङ्लुबन्तस्यापि धातोः परतो 'न्यभ्युपवेर्वाश्चोत्' इति सूत्रेण अलि कृते सति 'ह्वो हव' इति कृतद्वित्वस्यापि धातोरुकारादेशे (? 'हव' इत्यादेशे) 'विहव' इत्येव रूपं स्यात्, न विजोहव इति, इष्टं च विजोहव इति ।।४२।।

## आङो युद्धे ।।५।३।४३।।

**म० बृ०**–आङ्पूर्वात् ह्वयतेर्युद्धेऽर्थे भावाकर्त्रोः 'अल् वाशब्दश्च उः' । आहवो युद्धम् । युद्ध इति किम् ? आह्वायः, आह्वानम् ।।४३।।

**अव०**–आहूयन्ते योद्धारोऽस्मिन्निति आहवः ।।४६।।

## आहावो निपानम् ।।५।३।४४।।

**म० बृ०**–निपानं पशुपक्ष्यादीनां पानार्थो जलाधारः । आङ्पूर्वाद् ह्वयतेः 'अल् आहावादेशश्च' निपात्यते, निपाने वाच्ये । आहावः पशुपक्षिणाम् ।।४४।।

**अव०**–नितरां पिबन्त्यस्मिन् स्थानके इति निपानम्, नेवाण इति लोकरूढिः ।।४४।।

## भावेऽनुपसर्गात् ।।५।३।४५।।

म० वृ०–अनुपसर्गाद् [= उपसर्गरहितात्] ह्वयतेः 'अल् वाशब्द उः' स्यात्। भावे-, ह्वः[1]। भाव इति किम्? कर्मणि ह्वायः ॥४५॥

अव०–[1]ह्वानमिति वाक्यम्। 'भावेऽनुपसर्गाद्' इति, अकर्त्तरि कर्मादिकारकस्यानुप्रवेशो मा भूदिति भावग्रहणम् ॥४५॥

## हनो वा वध् च ॥५।३।४६॥

म० वृ०–अनुपसर्गाद्धन्तेर्भावे 'अल् वा, तद्योगे हनो वध् च'। हननं=वधः, पक्षे घातः ॥४६॥

अव०–अनुपसर्गादिति किम्? संघातः ॥४६॥

## व्यध-जप-मद्भ्यः ॥५।३।४७॥

म० वृ०–एभ्योऽनुपसर्गेभ्यो 'भावाकर्त्रोरल्' स्यात्। बहुवचनाद् भावे इति निवृत्तम्। व्यधः, जपः, मदः ॥४७॥

अव०–अनुपसर्गादित्येव– आव्याधः, उपजापः, उन्मादः ॥४७॥

## नवा क्वण-यम-हस-स्वनः ॥५।३।४८॥

म० वृ०–एभ्योऽनुपसर्गेभ्यो 'भावाकर्त्रोरल् वा' स्यात्। क्वणः, क्वाणः; यमः, यामः; हसः, हासः; स्वनः, स्वानः। अनुपसर्गादित्येव- प्रक्वाणः, प्रयामः, प्रहासः, विष्वाणः। अप्राप्तविभाषेयम् ॥४८॥

## आङो रुप्लोः ॥५।३।४९॥

म० वृ०–आङ्पराभ्यां रुप्लुभ्यां भावाकर्त्रो-'रल् वा' स्यात्। आरवः, आरावः; आप्लवः, आप्लावः। आङ् इति किम्? विरावः, विप्लावः ॥४९॥

अव०–रौतिधातोर्घञि प्राप्ते प्लुधातोश्चालि नित्यं प्राप्ते 'आङो रुप्लोः' इति विकल्पार्थं वचनम् ॥४९॥

## वर्षविघ्नेऽवाद् ग्रहः ॥५।३।५०॥

म० वृ०–अवपूर्वात् ग्रहेर्वर्षविघ्ने[1] वाच्ये 'भावाकर्त्रो- 'र्वाऽल्' स्यात्। अवग्रहः,अवग्राहः वृष्टेः; प्रतिबन्ध इत्यर्थः। वर्षविघ्न इति किम्? [2]अवग्रहोऽर्थस्य ॥५०॥

अव०–[1]विहन्यते कार्यमनेन इति विघ्नः, 'स्थादिभ्यः कः' (५।३।८२ इति कप्रत्ययः), वर्षस्य विघ्ने, कोऽर्थः? वृष्टिप्रतिबन्धेऽर्थे। [2]अर्थस्य पदार्थस्य कुम्भस्तम्भादेः सामान्यग्रहणात्मकं ज्ञानमवग्रह उच्यते ॥५०॥

## प्राद् रश्मितुलासूत्रे ॥५।३।५१॥

म० वृ०–प्रपूर्वाद् ग्रहे रश्मौ तुलासूत्रे चार्थे 'अल् वा' भावाकर्त्रोः स्यात्। प्रगृह्यते इति प्रग्रहः[1] प्रग्राहः, अन्यस्तु प्रग्रहः ॥५१॥

अव०–[1]अश्वादेः संयमनरज्जुः=बन्धनोपकरणमथवा तुलासूत्रं प्रग्रहः प्रग्राह इत्युच्यते ॥५१॥

## वृगो वस्त्रे ॥५।३।५२॥

म०वृ०–प्रपूर्वाद् वृणोतेर्वस्त्रविशेषेऽर्थे भावाकर्त्रो-'रल्' वा स्यात्। (प्रवृण्वन्ति तमिति) प्रवरः, प्रावारः। वस्त्र इति किम्? प्रवरो यतिः ॥५२॥

अव०–'प्रावार' इत्यत्र घञ्, 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) इति सूत्रेण दीर्घः कार्यः ॥५२॥

## उदः श्रेः ॥५।३।५३॥

म० वृ०–उत्पूर्वात् श्रेः 'अल् वा' भावाकर्त्रोः स्यात्। [नित्यमलि प्राप्ते विकल्पोऽयम्] उच्छ्रयः,उच्छ्रायः। ॥ ५३ ॥

## यु-पू-द्रोर्घञ् ॥५।३।५४॥

म० वृ०–वेति निवृत्तं पृथग्योगात्[1]। उत्पूर्वेभ्यो युपूद्रुभ्यो 'भावाकर्त्रोर्घञ्' स्यात्। अलोऽपवादः। उद्यावः, उत्पावः, उद्द्रावः ॥५४॥

अव०–'युपूद्रोर्घञ्' इत्यत आरभ्य 'माने' (५।३।८१) इत्यन्तं यावत् द्वितीयोऽयं घञोऽधिकारः। अत्र घञधिकारे सूत्राणि २८ ज्ञातव्यानि। [1]पूर्वसूत्रेण सह (अविधानात्) ॥५४॥

ग्रहः ॥५।३।५५॥

म० वृ०--उत्पूर्वाद् ग्रहेर्भावाकर्त्रो-'घञ्' स्यात्। उद्ग्राहः। उद इत्येव-ग्रहः,विग्रहः ['युवर्ण'० (५।३।२८) इति अल्] ॥५५॥

न्यवाच्छापे ॥५।३।५६॥

म०वृ०--नि-आवाभ्यां परादूग्रहेर्भावाकर्त्रो 'घञ्' स्यात्, शापेऽर्थे। निग्राहो ह ते वृषल! भूयात्, अवग्राहो ह ते वृषल! भूयात् [हकारोऽधिक्षेपेऽर्थे] शाप इति किम्? निग्रहश्चौरस्य, अवग्रहः [=सामान्यज्ञानम्] पदस्य ॥ ५६ ॥

प्राल्लिप्सायाम् ॥५।३।५७॥

म० वृ०--प्रपूर्वाद् ग्रहेर्लिप्सायां 'घञ्' भवति। पात्रप्रग्राहेण चरति पिण्डपातार्थी [=भिक्षार्थी] भिक्षुः ॥५७॥

समो मुष्टौ ॥५।३।५८॥

म० वृ०--सम्पूर्वाद् ग्रहेर्मुष्टिविषये धात्वर्थे 'भावाकर्त्रोर्घञ्' स्यात्। संग्राहो मल्लस्य, अहो मौष्टिकस्य संग्राहः, मुष्टेर्दार्ढ्यमुच्यते। मुष्टाविति किम्? संग्रहः शिष्यस्य ॥५८॥

अव०--मुष्टिरङ्गुलिसन्निवेशोऽत्र ज्ञातव्यः, न परिमाणम्। परिमाणेऽर्थे मुष्टिविशेषे वक्ष्यमाणेन 'माने' (५।३।८१) इत्यनेन घञः सिद्धत्वात् ॥५८॥

यु-दु-द्रोः ॥५।३।५९॥

म० वृ०--सम्पूर्वेभ्य एभ्यो 'भावाकर्त्रोर्घञ्' स्यात्। संयावः, सन्दावः, सन्द्रावः ॥५९॥

अव०--सम इत्येव- विद्रवः, उपद्रवः ॥५९॥

नियश्चानुपसर्गाद्वा ॥५।३।६०॥

म० वृ--अनुपसर्गान्नयतेर्युदुद्रोश्च 'घञ् स्यात् वा'। नयः, नायः; यवः यावः; दवः, दावः; द्रवः, द्रावः। अनुपसर्गादिति किम्? प्रणयः ['युवर्ण०' (५।३।२८) इत्यल्] ॥६०॥

वोदः ॥५।३।६१॥

म० वृ--उत्पूर्वान्नयतेर्वा 'घञ्' भावकर्त्रोः स्यात्। उन्नायः, उन्नयः ॥६१॥

अवात् ॥५।३।६२॥

म०वृ०--अवपूर्वान्नयतेः भावाकर्त्रो-'घञ्' स्यात्। अवनायः ॥६२॥

परेर्द्यूते ॥५।३।६३॥

म०वृ०--परिपूर्वान्नयतेः द्यूतविषये भावाकर्त्रो 'घञ्' स्यात्। परिणायेन शारीन् हन्ति, समन्तायनेनेत्यर्थः। द्यूत इति किम्? परिणयः कन्यायाः ['युवर्ण०'(५।३।२८) इत्यल्] ॥६३॥

भुवोऽवज्ञाने ॥५।३।६४॥

म०व०--परिपूर्वाद् भवतेरवज्ञानेऽर्थे भावाकर्त्रोर्वा 'घञ्' स्यात्। परिभावः, परिभवः। अवज्ञान इति किम्? परि=समन्ताद् भवनं परिभवः ['युवर्ण०' (५।३।२८) इत्यल्] ॥६४॥

यज्ञे ग्रहः ॥५।३।६५॥

म० वृ०--परिपूर्वाद् ग्रहेर्यज्ञविषये भावाकर्त्रो-'घञ्' स्यात्। पूर्वपरिग्राहः, उत्तरपरिग्राहः। यज्ञ इति किम्? परिग्रहः कुटुम्बिनः ॥६५॥

अव०--पूर्वस्या उत्तरस्याः क्रियायाः परिग्राहः; अथवा पूर्वश्चासौ परिग्रहश्चेति कर्मधारयः। वेदेर्यज्ञाङ्गभूताया ग्रहणविशेष एताभ्यां पूर्वपरिग्राहेत्यादिप्रयोगाभ्यामभिधीयते ॥६५॥

संस्तोः ॥५।३।६६॥

म० वृ०--सम्पूर्वात्स्तौतेर्यज्ञविषये 'घञ्' स्यात्। [1]संस्तावः छन्दोगानाम्। [2]यज्ञ इत्येव-[3]संस्तवोऽन्यदृष्टेः ॥६६॥

अव०--[1]संस्तुवन्त्यत्र इति संस्तावः। यस्मिन् देशे छन्दोगा=विप्राः समेत्य=मिलित्वा स्तुवन्ति स देशः संस्ताव उच्यते। [2]छन्दोगायनानां विप्राणाम्। [3]परिचयो मिथ्यादृष्टेः ॥६६॥

प्रात् स्नु-द्रु-स्तोः ॥५।३।६७॥

म० वृ--प्रात्परेभ्यः स्नुद्रुस्तुभ्यो 'भावाकर्त्रोर्घञ्'

स्यात् । प्रस्रावः, प्रद्रावः, प्रस्तावः । कथं स्रावः द्रावः ? बहुलाधिकारात् ॥६७॥

## अयज्ञे स्त्रः ॥५।३।६८॥

म० वृ०—प्रात् [=प्रपूर्वात्] स्तृधातोः 'भावाकर्त्रोर्घञ्' स्यात्, यज्ञविषये चेन्न प्रयोगः । प्रस्तारः, विमानप्रस्तारः, नयप्रस्तारः । अयज्ञे इति किम् बर्हिष्प्रस्तरः [ 'समासेऽसमस्तस्य' (२।३।१३) इति षत्वम् ] ॥६८॥

## वेरशब्दे प्रथने ॥५।३।६९॥

म० वृ०—वेः परात् स्तृणातेरशब्दविषये प्रथने = विस्तीर्णत्वेऽर्थे ( भावाकर्त्रोः ) 'घञ्' स्यात् । विस्तारः पटस्य। प्रथन इति किम् ? तृणस्य विस्तरः [छादनमित्यर्थः ] । अशब्द इति किम् ? अहो द्वादशाङ्गस्य विस्तरः ॥६९॥

## [1]छन्दोनाम्नि ॥५।३।७०॥

म० वृ०—विपूर्वात् स्तृणातेश्छन्दोनामविषये [भावाकर्त्रोः] 'घञ्' स्यात् । [2]विष्टारपङ्क्तिः । केचिद्वेरन्यतोऽपि घञमाहुः,- [3]आस्तारपङ्क्तिः, [3]प्रस्तारपङ्क्तिः ॥७०॥

अव०—[1]छन्दः, कोऽर्थः ? पद्यः, पादैः सङ्गतः, पादेषु वा साधुर्वर्णविन्यासः, छन्दसां नाम (=छन्दोनाम), तस्मिन् । [2]विस्तरस्य अतन्त्रप्रयोगस्य पङ्क्तिरिति शब्दान्तरेण विग्रहः, विष्टारपङ्क्तिरिति समुदायस्यैव छन्दोनामत्वात्, अथवा विस्तरश्चासौ पङ्क्तिश्चेति कर्मधारयस्तत्पुरुषसमासः, पङ्क्त्यन्तं छन्दोनामेदम्, अत्र 'वेः स्त्रः' (२।३। २३) इति सूत्रेण सकारस्य षकारः । [3]इदमपि छन्दोनाम ॥७०॥

## क्षु-श्रोः ॥५।३।७१॥

म० वृ०—विपूर्वक्षुश्रुधातो-'र्भावाकर्त्रोर्घञ्' स्यात् । [टुक्षु रु कुंकू शब्दे । श्रुंट् श्रवणे] । विक्षावः, विश्रावः ॥७१॥

## न्युदो ग्रः ॥५।३।७२॥

म० वृ०—नि-उत्परात् गृधातो-'र्घञ्' [भावाकर्त्रोः ) स्यात् । निगारः, उद्गारः । न्युद इति किम् ? [1]गरः, सङ्गरः[2] ॥७२॥

अव०—[1]गीर्यते दुःखार्तैरिति गरो विषम् । [2]सङ्गीर्यतेऽभ्युपगम्यते योद्धृभिरिति सङ्गरो युद्धम्, अथवा सङ्गरणं=सङ्गरः,तदा सङ्गरः प्रतिज्ञा उच्यते ॥७२॥

## किरो धान्ये ॥५।३।७३॥

म० वृ०—नि-उत्परात् कृधातोर्धान्यविषये 'भावाकर्त्रोर्घञ्' स्यात् । निकारो धान्यस्य, उत्कारो धान्यस्य, राशिरित्यर्थः । धान्ये इति किम् ? फलनिकरः, पुष्पोत्करः ॥७३॥

अव०—निकार इत्यत्र यदि निकारः तिरस्कारवाची तदा करोतेर्घञ्, अत ( ? अत्र ) 'कृत् विक्षेपे' इति धातोः प्रयोगः ॥७३॥

## नेर्वृः ॥५।३।७४॥

म० वृ०—निपूर्वाद् [1]वृधातोर्धान्यविशेषेऽर्थे 'घञ्' स्यात् । [2]नीवारा वनव्रीहयः । धान्य इति किम् ? [3]निवरा कन्या ॥७४॥

अव०—[1]'वृग्ट् वरणे' 'वृङ्श् सम्भक्तौ' । [2]निव्रियन्ते इति नीवाराः, 'घञ्युपसर्गस्य बहुलम्' ( ३।२।८६ ) इति दीर्घः । [3]नितरां व्रियते=भज्यते परिणीता (सती) इति निवरा । निवरः शब्दः स्वभावादलन्तोऽपि स्त्रियां वर्तते, येऽलन्ताः शब्दाः ते प्रायेण पुंलिङ्गा एव, 卐 पुंलिङ्गे आदौ 'इमनलौ' इति पाठात्,परं वृद्धैरयं स्त्रीलिङ्गः प्रयुक्तः--निवरा। अत्र बहुलाधिकारात् न क्तिः ॥७४॥

## इणोऽभ्रेषे ॥५।३।७५॥

म०वृ०—स्थितेरचलनमभ्रेषः । निपूर्वादिणोऽभ्रेष-

卐श्रीहैमलिङ्गानुशासने पुंलिङ्गप्रकरणे,सम्पूर्णश्लोक इत्थम्— पुंलिङ्गं कटणथपभ,-मयरषसस्वन्तमिमनलौ किश्चिद्। ननडौ घञबौ दः कि,-र्भावे स्रोऽकर्तरि च कः स्यात् ॥

विषये (भावाकर्त्रोः) 'घञ्' स्यात् । न्यायः । अभ्रेष इति किम् ? न्ययं गतश्चोरः ॥७५॥

प्रब०–'स्थितेरचलनम्', कोऽर्थः ? शोभनाचारात्=सन्मार्गात् न पतनम्, "कल्याभ्रेषौ नये न्याय्यम्" इति शब्दानुशासने ❀ । शास्त्रलोकदेशकुलप्रसिद्धया नियतमयनम्=आचरणं न्याय इति व्युत्पत्तिः । 'न्ययं (गतः)', कोऽर्थः ? निर्गमनवारं प्राप्तः ॥७५॥

## परेः क्रमे ॥५।३।७६॥

म० वृ०–परिपूर्वादिणः क्रमविषये 'घञ्' स्यात् । तव [१]पर्यायो भोक्तुम् । क्रम इति किम् ? पर्ययः स्वाध्यायस्य, अतिक्रम् इत्यर्थः, [२]विपर्ययो मतेः ॥७६॥

प्रब०–[१]क्रमेण पदार्थानां क्रियासम्बन्धः पर्याय उच्यते । 'क्रमेण पर्ययणं भोजने' इति वाक्ये 'परेः क्रमे' इत्यनेन घञ्, तव पर्याय इति सिद्धम् । भोक्तुमित्यत्र 'शकधृषज्ञारभलभसहार्हग्लाघटास्तिसमर्थार्थे च तुम्' ( ५।४।९० ) इत्यनेन तुम्, ततः सप्तमी, तस्या 'अव्ययस्य' ( ३।२।७) इति लुप् । [२]अन्यथा भवनमित्यर्थः ॥७६॥

## व्युपाच्छीङः ॥५।३।७७॥

म० वृ०–वि-उपपूर्वात् शीङो भावाकर्त्रोः क्रमविषये 'घञ्' स्यात् । तव राजविशायः, मम राजोपशायः । क्रमप्राप्तं पर्यायसाध्यं शयनमुच्यते ॥७७॥

प्रब०–क्रमप्राप्तं पर्यायसाध्यं यत् शयनं=स्वापः स तव राजविशाय इत्युच्यते, अस्यायं भावार्थः,-अन्येषु बहुषु विजातीयेषु कार्येषु उपस्थितेषु हे चैत्र ! साम्प्रतं तव शयितुं प्रस्तावोऽस्ति इति परमार्थः, इति सर्वकार्यमध्ये शयनकार्यं प्रधानमिति सूचितम् ॥७७॥

## [१]हस्तप्राप्ये चेरस्तेये ॥५।३।७८॥

म० वृ०–[२]हस्तप्राप्यविषयाच्चिनोतेर्भावाकर्त्रोः 'घञ्' स्याद्, अस्तेये=धात्वर्थः स्तेये=चौर्ये चेन्न । पुष्पप्रचायः, फलावचायः, फलोच्चायः । हस्तप्राप्य इति किम् ? पुष्पप्रचयं करोति वृक्षाग्रे । अस्तेये इति किम् ? स्तेयेन (चौर्येण) पुष्पप्रचयं करोति ॥७८॥

प्रब०–[१]प्राप्तुं शक्यं=प्राप्यम्, हस्तेन=करेण उपायान्तरनिरपेक्षेण प्राप्तुं शक्यं=हस्तप्राप्यम्, तस्मिन् । [२]चिनोतेर्धातोर्हस्तप्राप्यविषयात् इति विशेषणम् । हस्तप्राप्यशब्देन प्राप्यस्य फलादिवस्तुनः प्रत्यासत्तिविषये धात्वर्थे सति घञ्विधानमित्यर्थः ॥७८॥

## चिति-देहा-ऽऽवासोपसमाधाने कश्चादेः ॥५।३।७९॥

म० वृ०–चित्याद्यर्थेषु चिधातोर्भावाकर्त्रोः 'घञ्', तद्योगे चादेः ककारादेशश्च । [१]चितौ,-[२]आकायमग्निं चिन्वीत । देहे,- कायो देहः । आवासे,- ऋषिनिकायः । [३]उपसमाधाने,-गोमयनिकायः,[४] गोमयपरिकायः । कथं काष्ठनिचयः ? बहुत्वमात्रविवक्षया । चेः क इत्येव सिद्धे आदिग्रहणमादेरेव [= धातुचकारस्यैव ] यथा स्यात्, तेन चेर्यङ्लुपि 'निकेचाय' इत्येव ॥७९॥

प्रब०–[१]चीयते इति चितिः, यज्ञेऽग्निविशेषः अग्न्याधारो वा भाजनम्, तत्र चित्यर्थे । [२]आकायमग्निं चिन्वीत' अत्र सामान्यविशेषप्रयोगास्तथाहि-- अग्निं चिन्वीत=पुष्पेत इति सामान्यम्, कम् ? आकायम्=यज्ञे अग्निविशेषमिति विशेषप्रयोगः । [३]उपरि उपरि कस्यापि गोमयादे राशीकरणमुपसमाधानमुच्यते । [४]कयापि स्त्रिया आर्द्रगोमय एकत्र मेल्यते =राशीक्रियते, अथवा शुष्कगोमय'छाणा' उपरि उपरि ध्रियन्ते स गोमयनिकाय इत्युच्यते, एवं गोमयपरिकायः ॥७९॥

❀ अभिधानचिन्तामणिकोशे-तृतीयकाण्डे ।

## सङ्घेऽनूर्ध्वे ॥५।३।८०॥

म० वृ०—अनूर्ध्वे संघे प्राणिसमुदायेऽर्थे भावाकर्त्रोश्चिनोते-'घञ्, तद्योगे चादेः कश्च'। वैयाकरणनिकायः, एवं तार्किकनिकायः। संघ इति किम्? सूकरनिचयः ॥८०॥

अव०—'सूकरनिचयः', कोऽर्थः? सूकरा हि उपरि उपरि चीयन्ते इति उपसमाधानेऽर्थे पूर्वेणापि न घञ्, व्यावृत्तिबलात् ॥८०॥

## मानो ॥५।३।८१॥

म० वृ०—[1]माने गम्यमाने धातो-'घञ्' [भावाकर्त्रोः] स्यात्। एको निघासः, [2]एकस्तण्डुलावक्षायः, [3]एकः कारः, [4]द्वौ सूर्यनिष्पावौ, समित्संग्राहः, तन्दुलसंग्राहः, मुष्टिरित्यर्थः। मान इति किम्? निश्चयः। [5]अल एवापवादोऽयम्, क्त्यादिभिस्तु घञपि बाध्यते,— एका तिलोच्छ्रितिः, [ 'उदः श्रेः' इत्यस्य विषयः ] द्वे प्रसृती [अत्र माने] ॥८१॥

अव०—[1]मानमियत्ता, सा च इयत्ता द्वेधा,— सङ्ख्या परिमाणं च। सङ्ख्यायाम्— एको निघासः, द्वौ निघासौ.बहवो निघासाः। [2]एवमेक....(तण्)डुलनिश्चायः, क्रे·······(त) व्यो विक्रेतव्यो वा इत्यर्थः। [3]एकः कारः, द्वौ कारौ, त्रय काराः। [4]तथा 'द्वौ सूर्यनिष्पावौ', अत्र पवने= पावौ, निश्चितौ पावौ निष्पावौ इति परिणा वाक्यं कार्यम्, न तु निष्पवने= निष्पावौ, एवं कृते 'निरभेः पूल्वः' (५।४।२१) इत्यस्य विषयः स्यात्। प्रसरति जलादिकमस्या इति प्रसृतिः, 'पसइ' इति प्रसिद्धिः। [5]"मध्येऽपवादाः पूर्वान् (विधीन् बाधन्ते नोत्तरान्") इति बलात् ॥ ८१ ॥

## स्थादिभ्यः कः ॥५।३।८२॥

म० वृ०—स्थादिधातुभ्यो 'भावाकर्त्रोः कः प्रत्ययः' स्यात्। [1]आखूत्थो वर्त्तते, [2]एवं शलभोत्थः, [3]प्रस्थः सानुः, [4]संस्था, [5]व्यवस्था, [6]प्रस्नः, [7]प्रपा, [8]विधः, [9]विघ्नः।[10] [11]। कथम् आत्याधः, (घातः) विघातः, उपघातः? बहुलाधिकारात्। [12]बहुवचनं प्रयोगानुसरणार्थम् ॥८२॥

अव०—[1]"उदः स्थास्तम्भः सः' (१।३।४४) इति सलोपः। आखूनामुत्थानम्=आखूत्थः। एवं [2]शलभानामुत्थानं शलभोत्थः। [3]प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः, 'प्रस्थं तीर्थं प्रोथम्' ❀ इति पुंनपुंसकः। [4]तथा सन्तिष्ठन्तेऽस्यामिति संस्था, अत्र 'उपसर्गादातः' (५।३।११०) इत्यङं बाधित्वा ★ स्त्रियाः खलनाविति वचनात् नित्यमनट् स्यात् इत्यत्र सूत्रे पाठः कृतः। तथा [5]व्यवतिष्ठन्तेऽनयेति व्यवस्था। [6]प्रस्नात्यस्मिन्निति प्रस्नः तीर्थविशेषः। [7]प्रपिबन्त्यस्यामिति प्रपा। [8]विध्यतेऽनेनेति विधः। [9]विहन्यतेऽनेनास्मिन् वा इति विघ्नः, अत्र स्थादिगणपाठबलात् करणेऽपि कप्रत्ययः, अन्यथा 'व्यधजपोऽ'० (५।३।३८) इत्यल् एव स्यात्। [11]एवमायुध्यन्तेऽनेन इत्यायुधम्, आध्यायन्ति तमित्याढ्यः,··········· (पृषोदरादित्वात्) धस्य ढः। सर्वत्र कप्रत्ययः। अयं कप्रत्ययः सर्वापवादत्वादनटमपि बाधते। [12]आचार्यस्येयं शैली। यत्र प्रयोगबाहुल्यं तत्र बहुवचनं निर्दिश·······(ति अतोऽत्र) सूत्रप्रान्ते बहुवचनं प्रयोगानुसरणार्थम्= बहुवचनमाकृतिगणार्थम् (इत्युक्तम्), यत्र प्रयोगे इयत्ता तत्र एकवचनमेव निर्दिशति इत्यर्थः ॥८२॥

## ट्वितोऽथुः ॥५।३।८३॥

म० वृ०—ट्वितो धातोर्भावाकर्त्रोरथुः स्यात्। वेपथुः, श्वयथुः, वमथुः, नन्दथुः, [क्षवथुः,] दवथुः। असरूपत्वाद् घञलावपि,— वेपः, क्षवः ॥८३॥

## ड्वितस्त्रिमक् तत्कृतम् ॥५।३।८४॥

म० वृ०—ड्वितो= डुकारानुबन्धाद्धातोः 'त्रिमक् प्रत्ययः' [भावाकर्त्रोः] स्यात्, तत्कृतेऽर्थे। पाकेन

❀ श्रीहैमलिङ्गानुशासने पुंनपुंसकलिङ्गप्रकरणेऽष्टादशे श्लोके।

★ "स्त्रीखलना अलो बाधकाः स्त्रियाः खलनौ" इति न्यायात्।

निर्वृत्तं= पक्त्रिमम्, [1]कृत्रिमम, [लाभेन निर्वृत्तम्=] लब्धिमम्, [2]याचित्रिमम्, [3]विहित्रिमम् [ककारः कित् कार्यार्थः] ॥८४॥

अव०–[1]करणेन निर्वृत्तं=कृत्रिमम्। [2]याचनेन निर्वृत्तं='याचित्रिमम्'। [3]'विहित्रिमम्' इत्यत्र 'डुधांग्क् धारणे' विपूर्वः, विधानेन निर्वृत्तं=विहित्रिमम्, 'धागः' (४।४।१५) इति सूत्रेण धास्थाने हि (इति) आदेशः ॥८४॥

## यजि-स्वपि-रक्षि-यति-प्रच्छो नः ॥५।३।८५॥

म० वृ०–एभ्यो भावाकर्त्रोः 'नः प्रत्ययः' स्यात्। [1]यज्ञः, स्वप्नः, रक्षणः, यत्नः, प्रश्नः ॥८५॥

अव०–[1]'तवर्गस्य श्रवर्ग०' (१।३।६०) इति नस्य ञः ॥८५॥

## विच्छो नङ् ॥५।३।८६॥

म० वृ०–विच्छे–'र्नङ्' स्यात्। विश्नः ॥८६॥

अव०–प्रश्नः,विश्नः उभयत्र 'अनुनासिके च०' (४।१।१०८) इति छस्य शः ॥८६॥

## उपसर्गाद्दः किः ॥५।३।८७॥

म० वृ०–उपसर्गपूर्वाद्दासंज्ञधातोर्भावाकर्त्रोः 'किः प्रत्ययः' स्यात्। आदिः, आधिः, प्रधिः, निधिः, विधिः, सन्धिः, समाधिः। कित्करणमाकारलोपार्थम् ॥८७॥

## व्याप्यादाधारे[1] ॥५।३।८८॥

म० वृ०–व्याप्यात्परादासंज्ञकादाधारे[2] 'किः' स्यात्। [3]जलधिः,[बालधिः] शरधिः,[4]शेवधिः ॥८८॥

अव०–[1]अर्थान्तरनिवृत्त्यर्थमाधारग्रहणम्। [2]अधिकरणे। [3]जलं धीयतेऽस्मिन्निति जलधिर्घटः समुद्रो वा। [4]शेते निधाविति शेवम्, 'शीङापो ह्रस्वश्च वा' (उणा० ५०६) इत्युणादिसूत्रेण वप्रत्ययः, शेवः (? म्) कोऽर्थः ? स्थापनीयं धनम्, शेवं धीयतेऽस्मिन्निति शेवधिः, शिवशब्दस्याप्यनेन (शीङापो ह्रस्वश्च इति सूत्रेण) निष्पत्तिः ॥८८॥

## अन्तर्द्धिः ॥५।३।८९॥

म० वृ०–अन्तर्पूर्वाद् दधातेर्भावाकर्त्रोः 'किः' निपात्यते। अन्तर्द्धिः ॥८९॥

## अभिव्याप्तौ भावेऽनञिन् ॥५।३।९०॥

म० वृ०–अभिव्याप्तौ [1]गम्यमानायां भावे धातोः 'अन ञिन्' इति प्रत्ययौ स्याताम्। समन्ताद्रावः= संरवणं [2]सांराविणं सेनायां वर्तते। संकुटनम्, सांकोटिनम्। भावग्रहणं कर्मादिनिषेधार्थम्। [3]असरूपविधिना क्घञादिनिवृत्त्यर्थमनग्रहणम् ॥९०॥

अव०–[1]क्रियायाः स्वसम्बन्धिनः कारकस्य सामस्त्येनाभिसम्बन्धोऽभिव्याप्तिः। [2]समन्तात् रावः=संराविणम्, 'अभिव्याप्ता'- वित्यनेन ञिन्, 'ञ्णिति' (४।३।५०इति) वृद्धिः, संराविणमेव सांराविणम्, 'नित्यं ञिनोऽण्' (७.३।५८) इति सूत्रेण अण्, वृद्धिः। 'अनपत्ये' (७।४।५५) इति प्रतिषेधात् 'नोऽपदस्य०' (७।४।६१) इत्यनेन नाऽन्त्यस्वरादिलोपः। अभिव्याप्ताविति किम् ? संरवणं= संरावः, अत्र सम इत्यस्य समन्तादिति नार्थः। यथा ह्यनट् असरूपविधिना भवति तथा ··········· (असरूपविधिनैव क्तः) घञ् ····(वाऽत्र मा भूत् इति अनप्रत्यय··············(ग्रहणं कृतम्) ॥९०॥

## स्त्रियां क्तिः ॥५।३।९१॥

म० वृ०–धातोर्भावाकर्त्रोः स्त्रीलिङ्गे 'क्तिः प्रत्ययः' स्यात्। घञादेरपवादः। कृतिः, नीतिः, भूतिः [नुतिः] ॥९१॥

अव०–'स्त्रियां क्ति'- रित्यादि 'भावे' (५.३। १२२) इत्यन्तं यावत् स्त्रियामित्यधिकारसूत्राणि ३२ ज्ञातव्यानि ॥९१॥

## श्र्वादिभ्यः ॥५।३।९२॥

म० वृ०—श्रुगोत्यादिधातुभ्यः स्त्रीलिङ्गे भावाकर्त्रोः 'क्तिः' स्यात् । वक्ष्यमाणैः [1]क्विबादिभिः सह समावेशार्थं वचनम् । श्रु– श्रुतिः, प्रतिश्रुत् [ =प्रतिज्ञा] । पद्– सम्पत्तिः, सम्पत् । संवित्तिः, संवित् । वित्या[2], [3]वेदना । लब्धिः, लभा । प्रशस्तिः, [4]प्रशंसा । पक्तिः, [5]पचा । कण्डूतिः, [6]कण्डूः, [7]कण्डूया । इष्,- [8]इष्टिः, [9]इच्छा । यज्- [10]इष्टिः, इज्या[11] । [ मन्-- मतिः, [12]मन्या ] आस् - आस्या, [ आस्यटि० (५।३।९७) इति क्यप् ] उपास्तिः, उपासना [ 'णिवेत्त्यास० (५।३।१११) इति अनः] । शास् -अनुशिष्टिः, आशीः ॥९२॥

अव०—[1]क्विबादिभिरित्यत्र आदिशब्दात् क्यप्प्रत्यय-अप्रत्यय-यप्रत्यय-अङ्प्रत्यय- अनप्रत्ययानां संग्रहः । क्तिप्रत्ययस्थाने क्विबादीनां समावेशः= प्रवेशो भवति, कोऽभिप्रायः ? श्रुवादिगणात्परतः क्तिप्रत्ययः क्वापि, क्वापि च वक्ष्यमाणसूत्रैः क्विप् क्यप् अ-अङ्-य-अनप्रत्यया अपि प्रवर्त्तन्ते क्तिस्थाने । उदाहरणेषु यथासम्भवं क्विबाद्यो दर्शिताः सन्ति । श्रुवादिराकृतिगणः,तेन श्रु,-श्रुतिः,प्रतिश्रुत् ; सद्,-आसत्तिः, संसत् , उपनिषत् , निषद्या, अत्र 'समजनिपन्निषद्०' ( ५।३।९९ ) इत्यनेन क्यप् , विद्,-संवित्तिः, संवित् , वित्या, वेदना, [2]'वित्या' इत्यत्र 'समज०' इति क्यप् , [3]'वेदना' इत्यत्र 'णिवेत्त्यासश्र०' (५।३।१११) इत्यनेन अनप्रत्ययः, अर्द्,- शिरोर्त्तिः, अर्दिका इत्यत्र अर्द्यतेऽस्याः– 'नाम्नि पुंसि च' (५।३।१२१) इति णकः, व्युत्क्रुश्,-व्युत्क्रुष्टिः, व्यात्क्रोशी इत्यत्र मिथःसमयेनाक्रोशनमिति वाक्ये 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) इत्यनेन ञप्रत्ययः, ततो 'नित्यं ञ्जिनोऽण्' (७।३।५८ इति ) अण् , अणञे० (२।४।२०इति ङी ) । [4]शंस्, 'शंसिप्रत्ययात्'(५।३।१०५ इति ) अः । [5]'षितोऽङ्' ( ५।३।१०७ ) । [6]कण्डूग् *गात्रकषणे, कण्डूयनम् ( =कण्डूः ), भ्यादिभ्यो वा ( ५।३।११५ ) क्विप् । [7]कण्डूग् गात्रकषणे , 'धातोः कण्ड्वादेर्यक्' (३।४।८), कण्डूयनं=कण्डूया, 'शंसिप्रत्ययात्'.......... ( इत्यप्रत्ययः ) । [9]इच्छा इत्यत्र मृगयेच्छायाच्ञा०'(५।३।१०१) इति शप्रत्ययः, क्याभावः (च) । [11]'इज्या', अत्र 'आस्यटिव्रज०' (५।३।९७) इति क्यप् । [12]ग्रीवायाः पश्चाद्भागे शिरा मन्या। यद्वपुनः (?) । स्तूयतेऽनया इतिस्तुतिः, [10]इज्यतेऽनया इति इष्टिः, [8]इष्यतेऽनया इति इष्टिः । इत्थं विवेदः वार्त्ताश्रवणं कर्णश्च ग्राह्यः तदा (?) । एषां संज्ञाशब्दत्वात् करणेऽपि क्तिरेव, नानट् , एवं स्तुतिः । अन्यत्र स्पर्द्धे परत्वात् "स्त्रीप्रत्ययक्तयादिखलना अलो बाधकाः" । 'श्रुवादिभ्यः'इति सूत्रप्रान्तेऽवचूरिरियम् ॥९२॥

## समिणा सुगः ॥५।३।९३॥

म० वृ०—सम्पूर्वादण आङ्पूर्वाच्च सुनोतेर्भावाकर्त्रोः स्त्रियां 'क्तिः' स्यात् । क्यपोऽपवादोऽयम् । समितिः, आसुतिः ॥९३॥

## साति-हेति-जूति-यूति-ज्ञप्ति-कीर्त्तिः ★ ॥५।३।९४॥

म० वृ०—एते शब्दाः भावाकर्त्रोः 'क्त्यन्ता' निपात्यन्ते । [1]सातिः, [2]हेतिः, [3]जूतिः, [4]यूतिः, [5]ज्ञप्तिः, [6]कीर्त्तिः ॥९४॥

अव०—[1]सिनोतेः सुनातेर्वा क्तिः, आत्वमित्वाभावश्च निपात्यते, सातिः इत्थं सिध्यति । [2]हिनोतेः क्तिः, गुणे सति, हन्तेर्वा अन्त्यस्वरादेरत्वे कृते हेतिरिति । [3]जु इति सूत्रधातोर्योतेः[4] (च) क्तिः, दीर्घत्वे जूतिः, यूतिः । [5]ज्ञपयतेर्ज्ञप्तिः, [6]कीर्त्तयतेः कीर्त्तिः, आभ्यां परो 'णिवेत्त्यास०' ( ५।३। १११) इत्यनेन अनप्रत्ययो न भवति, निपातनवशात् ॥९४॥

## [1]गा-[2]पा-पचो भावे ॥५।३।९५॥

म० वृ०—एभ्यो भावे स्त्रियां 'क्तिः' स्यात् । प्रगीतिः, सङ्गीतिः, प्रपीतिः, पक्तिः । भावग्रहण-

* गात्रविघर्षणे इति लघुवृत्त्यादिषु ।

★ लघुवृत्त्यादिग्रन्थेषु 'सातिहेतियूतिजूति०' इति ।

मर्थान्तरनिरासार्थम् । [३]बाधकस्याङोऽपवादोऽयम् ॥९५॥

प्रव०–[१]'गापा०' इति सूत्रे गा इति सामान्येन ग्रहणम् । 'गाङ् गतौ' 'कैं गैं' इति द्वयमपि गा (गृह्यते) । [२]पचिसाहचर्यात् पा इत्युक्ते पिबतेर्ग्रहणम् । [३]'षितोऽङ्' (५।३।१०७) 'उपसर्गादातः' (५।३।११० इति) प्रयुक्तस्याङो बाधकोऽयम् ॥९५॥

## स्थो वा ॥५।३।९६॥

म० वृ०–स्थाधातोर्भावे स्त्रियां क्तिर्वा स्यात् । प्रस्थितिः, उपस्थितिः । वावचनादङपि,-आस्था, व्यवस्था, संस्था । [पूर्ववदङोऽपवादोऽयम्] ॥९६॥

प्रव०–आस्थेत्यादिषु 'उपसर्गादातः' (५।३।११० इति) अङ् ॥९६॥

## आस्यटि-व्रज्-यजः क्यप् ॥५।३।९७॥

म० वृ०–एभ्यो भावे स्त्रियां 'क्यप्' स्यात् । [ कः कित्कार्यार्थः ] आस्,-आस्या; अट्,-अट्या; व्रज्या, इज्या । पित्करणमुत्तरत्र तागमार्थम् ॥९७॥

प्रव०–'आस्यटि०' इति सूत्रोक्तक्यप्प्रत्ययस्य न कृत्यसंज्ञा, प्रकरणविहितस्यैव क्यपो भवति कृत्यसंज्ञा ॥९७॥

## भृगो नाम्नि ॥५।३।९८॥

म० वृ०–भृधातोर्भावे स्त्रियां नाम्नि = संज्ञायां 'क्यप्' स्यात् । भरणं भृत्याः । नाम्नीति किम् ? भृतिः । भावे इत्येव- भ्रियते [=पोष्यते] इति भार्या [ =पत्नी ] ॥९८॥

## समज-निपन्निषद-शीङ्-सुग्--विदि-चरि-मनीणः ॥५।३।९९॥

म० वृ०–योगविभागाद्भावे एव निवृत्तम् । एभ्यः स्त्रियां भावाकर्त्रोर्नाम्नि 'क्यप्' स्यात् । [१]समज्या, [२]निपत्या, [३]निपद्या, [४]निषद्या, [५]शय्या, [६]सुत्या, [७]विद्या, [८]चर्या, [९]मन्या, [१०]इत्या । नाम्नीत्येव-[११]संवीतिः, निपत्तिः ॥९९॥

प्रव०–[१]सम्पूर्वः अज् , समजति अस्यामिति समज्या=सभा । सूत्रे [२]निपत् [३]निपद् (?निपन्निषद्) इति संहितानिर्देशात् पतेः पदेश्च ग्रहणम् । निपतन्त्यस्यामिति निपत्या,निपद्या । यत्र स्थाने यस्मात् स्थानकात् पत्यते पद्यते च तत् निपत्या,निपद्या । कोर्थोभिरवपातः(?) । [४]निषदनं निषीदन्त्यस्यामिति वा निषद्या★हट्टः पूज्यासनं च । [५]शेरतेऽस्यामिति शय्या पर्यङ्कः शब्दरचना च । [६]सुग्धातुः सवनं=सुत्या, सुन्वन्त्यस्यामिति वा सुत्या । तथा [७]विद् वेदनं= विद्या,विदन्ति तस्यां तया वा हिताहितमिति विद्या । [८]चरणं चरन्त्यनया वा चर्या=भ्रमणम् । [९]मननं मन्यतेऽनया वा मन्या ग्रीवायाः पश्चा··· (दू भागे सिरा)● । [१०]इण् ,अयनम्=इत्या,अथवा एति अनया इति इत्या=शिबिका । [११]समजनं संवयनं वा, 'अघञ्क्यबलच० (४।४।२ इत्यजेः) वी ॥९९॥

## कृगः श च वा ॥५।३।१००॥

म० वृ०–करोतेः स्त्रियां भावाकर्त्रोः 'शप्रत्ययो वा' स्यात्, [चकारात्] क्यप् च । [१]क्रिया, [२]कृत्या । पक्षे कृतिः ॥१००॥

प्रव०–[१]यदि क्रिया इति शब्दो भावकर्मणोः साध्यते तदा धातुशप्रत्ययात् 'शिति' (३।४।७० इति) क्यः,यदा तु क्रियतेऽस्मादित्येवमपादानार्थे शप्रत्ययः तदा क्यो न भवति, अप्राप्तेः; तदा शे 'रिः शक्या०' (४।३।११०) रिः, 'संयोगात्' (२।१।५२) इति इय् । [२]कृत्या=मारिः देवताविशेषः ❀ ॥१००॥

## मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धा-ऽन्तर्धा ॥५।३।१०१॥

★पण्यशाला निषद्याऽट्टो, हट्टो विपणिरापणः' इत्यभिधानचिन्तामणौ, 'निषद्या आपणः' इति सिद्धान्तकौमुद्याम् , "निषद्या आसनम्" इति श्रीहैमलिङ्गानुशासनविवरणे ।

● "मन्या गलपार्श्वसिरा इति सिद्धान्तकौमुद्याम्" ।

❀ 'कृत्याकृतिः मारिदेवता च' इति श्रीहैमलिङ्गानुशासनविवरणे, 'कृत्या क्रियादेवतयोः' इत्यमरकोशे ।

म० वृ०—एते स्त्रियां निपात्यन्ते । तत्र इच्छा भावे एव, शेषास्तु भावाकर्त्रोः । मृगया, इच्छा, याच्ञा, तृष्णा, कृपा, भा, श्रद्धा, अन्तर्द्धा ॥१०१॥

अव०—अन्तर्द्धा इत्यत्र सूत्रत्वान्न'क्लीबे' (२।४।९७इति) ह्रस्वः । मृगयतेः परतो मृ····(ग्य)ते हिंसकैः इति........(मृगया) ॥१०१॥

## परेः सृ-चरेर्यः ॥५।३।१०२॥

म० वृ०—परिपूर्वाभ्यां सृचरिभ्यां परतः स्त्रियां 'यः प्रत्ययः' स्यात्, भावाकर्त्रोः । परिसर्या, परिचर्या । ॥१०२॥

## वा-ऽटाट्यात् ॥५।३।१०३॥

म० वृ०—अटतेर्यङन्तात् स्त्रियां भावाकर्त्रो–'यः स्याद्वा' । अटाट्या, पक्षे अटाटा ['शंसिप्रत्ययात्' (५।३।१०५) इति अप्रत्ययः] ॥१०३॥

## जागुरश्च ॥५।३।१०४॥

म० वृ०—जागर्त्तेः स्त्रियां भावाकर्त्रोः 'अप्रत्ययः स्यात् यश्च' । जागरा, जागर्या ॥१०४॥

## शंसि-प्रत्ययात् ॥५।३।१०५॥

म० वृ०—शंसेः प्रत्ययान्ताद्धातोश्च भावाकर्त्रोः स्त्रियाम् 'अः प्रत्ययः' स्यात् । (प्रशंसनम्=) प्रशंसा, (गोपायनम्=)गोपाया, मीमांसा, कण्डूया, लोलूया चिकीर्षा [२]गवा, गल्भा[३], [४]पटपटाया ॥१०५॥

अव०—[१]कण्डूग् गात्रकषणे, ❀ कण्डूधातोः कण्ड्वादेर्यक् (३।४।८ इति यक् प्रत्ययः), कण्डूयनं =कण्डूया, 'शंसिप्रत्ययात्' (इति) अः, 'अतः' (४।३।८२) इत्यनेन प्रकृत्यकारस्य लोपः, एवमग्रेपि । [२]गो, गौरिवाचरति । [३]गल्भ धार्ष्ट्ये, गल्भते, 'कर्तुः क्विप् गल्भक्लीबहोडात्तु'० (३।४।२५) इत्यनेन क्विप्, क्विपो लोपः, ततोऽप्रत्ययः । [४] पटत्, अपटत् पटत् भवति(इति) 'अव्यक्तानुकरण०' (७।२।१४५) इति डाच्, अनत्र (?) द्विर्वचनम्, 'डाच्यादौ' (७।२।१४९) इत्यनेनाद्यन्तलोपः, 'डित्यन्त्यस्वरादेः'(२।१।११४) इत्यनेन अन्त्यस्वरादिलोपः, पटपटा इति शब्दः, 'डाच्लोहितादिभ्यः षित्' (३।४।३० इति....(क्यङ्), 'शंसिप्रत्यया'० इति अः ॥ १०५ ॥

## क्तेटो गुरोर्व्यञ्जनात् ॥५।३।१०६॥

म० वृ०—[१]क्तेटो गुरुमतो व्यञ्जनान्ताद्धातोर्भावाकर्त्रोः स्त्रियाम् 'अप्रत्ययः' स्यात् । ईहा, ऊहा, ईक्षा, कुण्डा,हुण्डा,शिक्षा,भिक्षा । क्तेट इति किम् ? आप्तिः,दीप्तिः, अपचितिः, [२]स्फूर्त्तिः [३]मूर्त्तिः (एवं ध्वस्तिः) । गुरोरिति किम् ? स्फुर,- स्फुर्त्तिः ॥१०६॥

अव०—[१]क्तस्य इट् यस्माद्धातोः स क्तेट्,तस्मात् । [२]स्फूर्तिः[३]मूर्तिः इत्यत्र स्फूर्छ मुर्छ धातुः, क्तिः, 'राल्लुक्' (४।१।११०) इत्यनेन छस्य लोपः, भ्वादेर्नामिनो दीर्घो० (२।१।६३) इति दीर्घः ॥१०६॥

## षितोऽङ् ॥५।३।१०७॥

म० वृ०—षितो (षकारानुबन्धात्) धातोः 'स्त्रियामङ्' स्यात् (भावाकर्त्रोः) । पचा,क्षमा,(क्षान्तिरित्ययं क्षाम्यतेः) घटा, त्वरा, प्रथा, (व्यथा, जरा, जरा इत्यत्र 'ऋवर्णदृशोऽङि' (४।३।७ इति गुणः) ॥ १०७ ॥

## भिदादयः ॥५।३।१०८॥

म० वृ०—भिदादिशब्दा भावाकर्त्रोः स्त्रियामङन्ता यथादर्शनं निपात्यन्ते । [१]भिदा, [२]छिदा, [३]विदा, [४]मृजा★ [५]क्षिपा, [६]दया, [७]रुजा, [८]चुरा, [९]पृच्छा; एतेऽर्थविशेषे,अन्यत्र भित्तिः, छित्तिः, विच्छित्तिः । भिदादिराकृतिगणः, तेन चूडा इत्यपि सिद्धम् ।

"अकृतस्य क्रिया चैव, प्राप्तेर्बाधनमेव च ।
अधिकार्थविवक्षा च, त्रयमेतन्निपातनात्" ।१०८।

❀ 'गात्रघर्षणे' इति लघुवृत्त्यादिषु ।

★ निपातनसामर्थ्यादेव "ऋतः स्वरे वा" इति वृद्धिर्न भवति ।

**अव०–**[१]भिदाशब्दो विदारणेऽर्थे निपात्यते । एवमग्रेऽपि । [२] द्वैधीकरणे छिदा। [३]विचारणेऽर्थे विदा। [४]शरीरसंस्कारे मृजा। [५]प्रेरणे क्षिपा। [६]अनुकम्पायां दया। [७]रोगे रुजा । [८]चौर्ये चुरा । [९]प्रश्ने पृच्छा। एते शब्दा अर्थविशेषे। अन्यत्र– भित्तिः कुड्यम् ,छित्तिः चौर्यादिकरणाद्राजापराधः,विछित्तिः प्रकारः,एवमन्येऽपि।तथा ऋकृहृधृतृभ्यः संज्ञायामङ् वृद्धिश्च– आरा शस्त्री,कारा गुप्तिः, हारा मानम् ,धारा प्रपातः खड्गादेर्वा, तारा ज्योतिः, अन्यत्र ऋतिः, कृतिः, हृतिः,धृतिः,तीर्णिः। तथा गुहिकुहिवशिवपितुलिक्षपिक्षिभ्यश्च संज्ञायामङ् , गुहा गिरिगुहा, औषधिश्च,गूढिरन्या;कुहा नाम नदी,कुहनान्या; वशा स्नेहनद्रव्यम् धातुविशेषश्च, उष्टिरन्या; वपा मेदोविशेषः, उप्तिरन्या; तुला उन्मानम् , क्षपा रात्रिः,क्षिया आचारभ्रंशः। रिखिलिखिशुभिसिधिमिधिगुधिभ्योऽङ् गुणश्च । रिखिलिखेः समानार्थः। रिखिः सौत्रो धातुः। रेखा लेखा राज्यर्थः, शोभा कान्तिः,सेधा सत्त्वम् ,मेधा बुद्धिः,गोधा प्राणिविशेषः, दोषो=भुजस्य त्राणं वा ★। चूडा इत्थं साध्यते-'णुदंत् प्रेरणे (इति) नुद् , णिग् ,अने प्राप्ते अङ् , णेर्लुक् निपातनात् , नुस्थाने चूदस्य···रुः(?डकारः) , चूडा गृहस्योपरि कुटी शिम्म च (?) ॥१०८॥

### भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोलिभ्यः ॥५।३।१०९॥

म० वृ०–एभ्यो ण्यन्तेभ्यो भावाकर्त्रोः 'स्त्रियामङ्' स्यात्। ण्यन्तत्वादने प्राप्ते वचनम्। [१]भीषा, [२]भूषा, चिन्ता, पूजा, कथा, [३]कुम्बा, [४]चर्चा, [५]स्पृहा, [६]तोला, [७]दोला । बहुवचनाद् यथालक्ष्यम् [यथादर्शनम्] अन्येभ्योऽपि [अङ्],– [८]पीडा, [९]ऊना ॥१०९॥

**अव०–**[१]'भीषा' इत्यत्र 'ञिभीक् भये' (इति) भी, ञि....(भयन्)तं प्रयुङ्क्ते-, णिग्, 'बिभेतेर्भीष् च' (३।३।९२) इति सूत्रेण भीस्थाने भीष् , भीषणम्=भीषा, अङ् । [२]भूष तसुण् अलङ्कारे । [३]कुबुण् आच्छादने ( इति ) कुब् , उदितः० (४।४।९८ इति) नोऽन्तः, 'चुरादिभ्यो णिच्' (३।४।१७ इति णिच् प्रत्ययः,) कुम्बनं=कुम्बा, धृतिरित्यर्थः❀। [४]चर्चण् अध्ययने चर्च्। [५]स्पृहण् ईप्सायाम् । [६]तुलण् उन्माने। [७]दूलण् उत्क्षेपे । [८]पीडण् गहने। [९]ऊनण् परिहाणे ॥१०९॥

### उपसर्गादातः ॥५।३।११०॥

म० वृ०–उपसर्गपूर्वाद्दन्ताद् [=आकारान्तात् ] धातोर्भावाकर्त्रोः 'स्त्रियामङ्' स्यात्। [उपदानम्=] उपदा, (उपधानम्=) उपधा, प्रदा, विधा, [एवमाधा, प्रधा, सन्धा,] [प्रमाणम्=] प्रमा, श्रद्धादित्वात् क्तौ– प्रमितिः ॥११०॥

### णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः ॥५।३।१११॥

म० वृ०–ण्यन्तात् वेत्त्यादिधातोश्च भावाकर्त्रोः 'स्त्रियामनः प्रत्ययः' स्यात्। कारणा (करणं=कारणा नरकपीडा), कामना, लक्षणा, भावना, (भूण् अवकल्कने) वेदना, आसना, उपासना, श्रन्थना, घट्टना वन्दना ॥१११॥

**अव०–**卐 'विदिण् चेतनाख्याननिवासनेषु' 'णिवेत्त्यास'० इति सूत्रे वेत्तीत्यत्र तिव्निर्देशो ज्ञानार्थधातुपरिग्रहार्थः यङो लुपि अनप्रतिषेधार्थश्च, तेन यङ्लुबन्ताद्वेत्तेः परतः 'श्रद्धादिभ्यः' (५।३।९२ इति) क्तौ सत्यां 'वेवेत्ति' इति प्रयोगः ॥१११॥

### इषोऽनिच्छायाम् ॥५।३।११२॥

म० वृ०–इषेरनिच्छायां (वर्त्तमानात्) भावाकर्त्रोः 'स्त्रियामनः' स्यात्। अन्वेषणा, एषणा, पिण्डै-

★ हस्तस्योपरि जायमानस्य धनुर्ज्याघातस्य निवारणाय कृतश्चर्मणो बाहुबन्धः।

❀ तदुक्तममरकोशे द्वितीयकाण्डेऽष्टादशश्लोकस्यामरविवेकाभिधटीकायाम्---"योगभूमावन्त्यजादिदर्शननिवारणाय सुगहना वृतिर्वेष्टनं स्यात्"।

卐 अत्र विदिण्धातुरसङ्गतः, सूत्रे 'वेत्ति' इति तिवा निर्देशस्य ज्ञानार्थधातुपरिग्रहार्थत्वात् । 'विदंक् ज्ञाने' इत्यादादिकधातुः ग्राह्यः।

षणा । अनिच्छायामिति किम् ? इष्टिः ॥११२॥

अव०—'इषोऽनिच्छायाम्' सूत्रे प्राप्ते कथं प्राणैषणा, वित्तैषणा परलोकैषणा ? बहुलाधिकारात् ॥११२॥

## पर्यधेर्वा ॥५।३।११३॥

म० वृ०—परि-अधिपूर्वादिषेरनिच्छायां'स्त्रिया-मनो वा' स्यात् । पर्येषणा, परीष्टिः, अध्येषणा, अधीष्टिः ॥११३॥

## क्रुत्सम्पदादिभ्यः क्विप् ॥५।३।११४॥

म० वृ०—क्रुधादिभ्योऽमुपसर्गेभ्यः पदादिभ्यश्च समादिपूर्वेभ्यो भावाकर्त्रोः 'स्त्रियां क्विप्' स्यात् । क्रुत् [युधेः—] युत्, (क्षुधेः) क्षुत्, (तृषेः) तृट्, (रुषच् रोषे) रुट्, [१]रुक्, शुक्, (मुदेः) मुत्, (मृदेः) मृत्, गीः, त्राः, दिक्, (सृजेः) स्रक्, तथा पदेः सम्पत्, विपत्, (आपत्, व्यापत्,) प्रतिपत्, षद्लृ-संसत्, (उपसत्) परिसत्, उपनिषत्, आशीः, (उपश्रुतेः) उपश्रुत्, प्रतिश्रुत्, नहेः—[२]उपानत्, [३]प्रावृट्, नीवृत्, [४](यतेः) संयत्, इणः- समित्, इन्धेः- समित्। क्रुधादिः सम्पदादिश्चाकृतिगणः ॥११४॥

अव०—[१]'रुचि अभिप्रीत्यां च' 'रुजोंत् भङ्गे' द्वयस्यापि रुक् इति प्रयोगः । एवं त्विषेः त्विट् । एवं विदेः वित् । [२]उपनह्यते=उपानत्, 'नहाहोर्धतौ' (२।१।८५) हस्य ध् ; [३]प्रवर्षन्ति मेघा अस्यामिति प्रावृट् वर्षा, 'धुटस्तृतीयः' (२।१।७६) षस्य ड्, 'विरामे वा' (१।३।५१) प्रथमः; [४]नितरां व्रियते =निवृत्, सम्पदादित्वात् क्विप्, 'गतिकारकस्य नहिवृतिवृषिव्यधिरुचिसहितनौ क्वौ' (३।२।८५) इत्यनेन पूर्वपदस्य दीर्घः (उपानदादिषु त्रिषु) ॥११४॥

## भ्यादिभ्यो वा ॥५।३।११५॥

म० वृ०—भी इत्यादिभ्यः स्त्रियां (भावाकर्त्रोः)'क्विब् वा' स्यात् । [पक्षे क्तिः,'श्वादिभ्यः ५।३।९२] भीः, भीतिः ; ह्रीः, (ह्रीतिः ;) लूः लूतिः ; भूः भूतिः; कण्डूः, कण्डूया; कृत्, (कृतिः ;) भित्, (भित्तिः ;) छित्, (छितिः ;) तुत्, (तुत्तिः ;) दृक्, दृष्टिः; [१]नक्, नष्टिः ; युक्, युक्तिः ; [२]जूः, जूर्त्तिः ; [३]तूः, तूर्त्तिः; [४]ऊः, ऊतिः; [५]श्रूः, श्रुतिः; [६]मूः,मूतिः; (एवं नौतेः नुत्, नुतिः ;) शक्, शक्तिः ॥ ११५ ॥

अव०—[१]नशधातुः, नशनं=नक्, क्विप्, प्रथमासिः, 'नशो वा' (२।१।७०) इति सूत्रेण शस्य गकारः, ('विरामे वा' इति कत्वे- ) नक् । [२]ज्वरेः जूः, जूर्त्तिः; [३]त्वरेः तूः, [४]अवतेः ऊः, [५]श्रिवेः श्रूः, [६]मवतेः मूः, एषु सर्वत्र 'मव्यविश्रिविज्वरित्वरेरुपान्त्येन' (४।१।१०९) इति ऊः । ननु ये क्विबन्ताः ते क्रुधादिगणे पठ्यन्ताम्, ये च क्त्यन्ताः ते श्वादौ पठ्यन्ते इति साध्यं सिद्धम् ,किम् 'भ्यादिभ्य' इत्यनेन सत्यम्, कण्डूया इति तृतीयरूपार्थम्, (तेन) कण्डूः, कण्डू······················(तिः, कण्डूया इति रूपत्रयं) सिद्धम् ॥११५॥

## [२]व्यतिहारेऽनीहादिभ्यो ञः[१] ॥५।३।११६॥

म० वृ०—व्यतिहारविषयेभ्यो धातुभ्य ईहादिवर्जेभ्यः 'स्त्रियां ञः प्रत्ययः' स्यात्, बाहुलकाद्भावे एव । परस्परमाक्रोशनम्= व्यावक्रोशी, व्यावहासी, व्यातिचारी[३] । अनीहादिभ्य इति किम् ? व्यतीहा, व्यतीक्षा, ['क्तेटो गुरो०' (५।३।१०६) इत्यः ] व्यवहृतिः । (स्त्रियामित्येव- व्यतिपाको वर्त्तते ) । 'श्वादिभ्यः' (५।३।९२) इत्यत्र समावेशाभिधानात् व्यवकृष्टिः, व्यावकुष्टिरित्यपि ॥११६॥

अव०—[१]'व्यतिहारेऽनीहादिभ्य' इति सूत्रं क्त्यादीनामपवादः । [२]व्यतिहरणं=व्यतिहारः,घञ्, परस्परस्य कृतप्रतिकृतिर्व्यतिहार उच्यते । [३]एवं व्याक्रोशी, व्यावमोषी, व्यावलेखी, व्यावचर्ची । व्यावक्रोशीत्यादिप्रयोगाः केवलञप्रत्ययान्ता नहि, किन्तु तद्धिते 'नित्यं ञञिनोऽण्' (७।३।५८)········ ········[इत्यण्प्रत्ययसहिता एव भवन्ति] ॥११६॥

## नञोऽनिः शापे ॥५।३।११७॥

म० वृ०—नञ्पराद्धातोः शापे गम्यमाने भावाकर्त्रोः 'स्त्रियामनिः प्रत्ययः' स्यात्। अजननिस्ते वृषल ! भूयात् (= न जन्म भूयात् तव), अजीवनिः (=न जीवितव्यम्), अकरणिः, (अप्रयाणिः,) अगमनिः (=न गमनं भूयात्)। नञ इति किम्? मृतिस्ते जाल्म भूयात्। शाप इति किम्? अकृतिः पटस्य ॥११७॥

## ग्ला-हा-ज्यः ॥५।३।११८॥

म० वृ०—एभ्यः स्त्रियां भावाकर्त्रोः 'अनिः' स्यात्। ग्लानिः, हानिः, ज्यानिः (म्लानिरित्यपि केचिदाहुः) ॥११८॥

## प्रश्नाख्याने वेञ् ॥५।३।११९॥

म० वृ०—प्रश्ने आख्याने (=प्रत्युत्तरदाने) च गम्यमाने 'स्त्रियां धातोरिञ् वा' स्यात्। (प्रश्ने-) कां त्वं [2]कारिं, कारिकां, [3]क्रियां, कां [4]कृत्यां, कां [5]कृतिमकार्षीः[1]? । [6]आख्याने,-सर्वां कारिं,कारिकां, सर्वां क्रियां, सर्वां कृत्यां सर्वां कृतिमकार्षम्[7] ॥११९॥

अव०—[1]इति केनापि पृष्टम्। [2]कारिः, अत्र इञ्प्रत्ययो विकल्पेन, पक्षे उत्तरसूत्रेण णकः– कारिका, कां त्वं कारिकामकार्षीः, एवं सर्वत्र पृच्छा। [3]'क्रियाम्', अत्र 'कृगः श च वा' (५।३।१००। इति) शः। [4]'कृत्याम्', अत्र क्यप्। [5]कृतिः, (अत्र) क्तिः। कां क्रियां कां कृत्यां कां कृतिमकार्षीः इति प्रश्ने। [6]अथाख्याने=उत्तरदाने– सर्वां कारिमकार्षम्, एवं सर्वां कारिकामित्यादि, सर्वां कृतिमकार्षम्। [7]एवं कां त्वं गणिमजीगणः? कां गणिकाम्, कां गणनाम्। व्याख्याने,-सर्वां गणिमजीगणम्,सर्वां गणिकां,गणनामजीगणम्। एवं कां पाठिमपाठीः? कां त्वं पाठिकाम्, पठितिम् (अपाठीः)। सर्वां पाठिमपाठम्, एवमग्रेऽपि ॥ ११९ ॥

## [1]पर्यायार्हर्णोत्पत्तौ च णकः ॥५।३।१२०॥

म० वृ०—एष्वर्थेषु प्रश्नाख्यानयोश्च गम्यमानयोः स्त्रियां भावाकर्त्रोः 'धातोर्णकः प्रत्ययः' स्यात्। क्त्याद्यपवादः। [1]भवतः आसिका, भवतः शायिका, भवतोऽग्रगामिका। [2]अर्हे,- अर्हति भवानिक्षुभक्षिकाम्, [भक्षण् अदने] ओदनभोजिकाम्, पयःपायिकाम्। [3]ऋणे,– इक्षुभक्षिकां मे धारयसि। [4]उत्पत्तौ,– इक्षुभक्षिका मे उदपादि। प्रश्ने,–कां त्वं कारिकामकार्षीः? [एवं कां त्वं गणिकामजीगणः] । आख्याने,- सर्वां कारिकामकार्षम् [सर्वां गणिकामजीगणम्] बहुलाधिकारात् क्वचिन्न णकः,– चिकीर्षा, बुभुक्षा मे उदपादि[5] ॥१२०॥

अव०—[1]पर्यायः=क्रमः, परिपाटिः। [2]अर्हमर्हः=योग्यता। [3]ऋणं=यत्परस्मै धार्यते। [4]उत्पत्तिर्जन्म। पर्याये [1]भवत आसिका इत्यादीनामयमर्थः,-भवत आसितुं शयितुमग्रे ग............(न्तुं च क्रमः)। [5]'बुभुक्षा मे उदपादि' इत्यस्याग्रेऽयं विशेषः– प्रत्याख्यानयोगेऽपि पर्यायादिषु परत्वात् णक एव भवति, न इञ्। यथा– कुत्र भवत आसिका? आसितुं पर्याय इत्यर्थः ॥ १२० ॥

## नाम्नि पुंसि च ॥५।३।१२१॥

म० वृ०—नाम्नि=संज्ञायां स्त्रियां भावाकर्त्रोर्धातो–'र्णकः' स्यात्, यथादर्शनं पुंसि च। प्रच्छर्दनं प्रच्छर्दयतेऽनयेति वा- प्रच्छर्दिका (=वमनम्), एवं [1]प्रवाहिका, विपादिका [=पादस्फोटः], उद्दालकपुष्पाणि भज्यन्ते यस्यां [क्रीडायां] सा [2]उद्दालकपुष्पभञ्जिका, वारणपुष्पप्रचायिका, अभ्योषखादिका[3], [4]सालभञ्जिका, एवंनामानः क्रीडाः। बहुलाधिकारादिह न णकः,– [शिरसोऽर्दनम्=] [5]शिरोर्त्तिः, तथा [6]चन्दनतक्षा क्रीडा। पुंसि च-- [7]अरोचकः, [8]अनाशकः, [9]उत्कन्दकः, उत्कर्णकः ॥ १२१ ॥

अव०—[1]स्त्रीणामतिरक्तप्रवाहः प्रवाहिका, 卐। एवं विचर्चिका=पामा, प्रस्कन्दिका= शोषरोगः।

卐 अभिधानचिन्तामण्यमरकोशादिबहुग्रन्थेषु प्रवाहिकाया अर्थो 'ग्रहणी' रोगः कृतः, परमत्र हैमप्रकाशे च प्रवाहिकाया अर्थः 'स्त्रीणां रजः' कृतः।

[२]उद्दालकपुष्पभञ्जिका इत्यत्र 'कृति' (३।१।७७) इति सूत्रेण षष्ठीतत्पुरुषसमासः, यतो वृत्तौ उद्दालकपुष्पाणीति वाक्यं तदर्थकथनमात्रम् । भज्यन्ते यस्यां= भञ्जिका, उद्दालकपुष्पाणां भञ्जिका इति वाक्यं कार्यम् । इत्थं षष्ठीतत्पुरुषसमासोऽत्र । 'अकेन क्रीडाजीवे' (३।१।८१) इत्यनेन (न)षष्ठीसमासः, कर्तृविहिताऽकप्रत्ययान्तेन सह "अकेनक्रीडा०" (३।१।८१) इत्यनेन षष्ठीसमासविधानात्, उद्दालकपुष्पभञ्जिकेत्यत्र तु भावाकर्त्रोः= भावे कर्तृवर्जिते कारके च णको विहितत्वात् । [३]अभ्योषाः=पोलिकाः खाद्यन्तेऽस्यामिति सा अभ्योषखादिका । [४]साला भज्यन्ते यस्यां सा सालभञ्जिका । [५]'शिरोर्त्तिः', एवं शीर्षार्त्तिः, शिरोऽभितप्तिः, बहुलाधिकारादेव च ( ? न णकः), अर्त्तिरित्यत्र अर्दतेः अर्दयतेश्च यथाक्रमममप्रत्ययमनप्रत्ययं बाधित्वा क्तिप्रत्यय एव भवति । [६]चन्दनास्तक्ष्यन्ते यस्यां सा चन्दनतक्षा, बाहुलकात् पुन्नाम्नि विहितोऽपि स्त्रियामपि व्यञ्जनाद् घञ् । [७]अरोचनमरोचकः, अथवा न रोचतेऽस्मिन्निति अरोचकः । [८]न अश्यते= भुज्यतेऽस्मिन्निति अनाशकोऽशनव्रतम् । [९]उत्कन्दनमुत्स्कद्यतेऽनेनेति वा पृषोदरादित्वात् सलोपः ॥१२१॥

## भावे ॥५।३।१२२॥

म० वृ०–भावे धात्वर्थनिर्देशे स्त्रियां 'णकः' स्यात् । आसिका, शायिका, जीविका, कारिका । बहुलाधिकारात् ईक्षा, ईहा ऊहा, स्मरणा । भावाकर्त्रोः स्त्रियामिति च निवृत्तम् ॥१२२॥

---

अव०–भावाकर्त्रोः स्त्रियामिति निवृत्तम् (इति) 'भावे' इति सूत्रे लिखितमस्ति, परं 'नाम्नि पुंसि च' (५।३।१२१) इत्यत्रैव भावाकर्त्रोः स्त्रियामधिकारः स्थितः, 'भावे' इत्यत्र केवले भावे एवाधिकारः ॥१२२॥

## क्लीबे क्तः ॥५।३।१२३॥

म० वृ०–भावेऽर्थे धातोः 'क्लीबे क्तः' स्यात् । नृत्तं नटस्य, हसितं छात्रस्य, गतं गजस्य ॥१२३॥

अव०–घञ्थुत्रिमकाद्यपवादोऽयं योगः ॥१२३॥

## अनट् ॥५।३।१२४॥

म० वृ०–भावे 'क्लीबेऽनट्' [१]स्यात् । गमनम्, भोजनम्, वचनं छात्रस्य[२] ॥१२४॥

अव०–[१]टकारः उत्तरत्र ङ्यर्थः, अत्र न प्रयोजनम् । [२](एवम्) हसनम् ॥१२४॥

## [१]यत्कर्म्मस्पर्शात् [२]कर्त्रङ्गसुखं ततः ॥५।३।१२५॥

म० वृ०–येन कर्मणा संस्पृश्यमानस्य कर्त्तुरङ्गस्य सुखमुत्पद्यते ततः कर्मणः पराद्धातोः क्लीबे भावेऽनट् स्यात् । पूर्वेणैव सिद्धे नित्यसमासार्थं वचनम् । [३]पयःपानं सुखम् । कर्मेति किम ? अपादानादिस्पर्शे मा भूत्,– [४]तूलिकाया उत्थानं सुखम् । स्पर्शादिति किम् ? अग्निकुण्डस्योपासनं सुखम् । कर्त्रेति किम् ? [५]शिष्येण गुरोः स्नापनं सुखम् । सुखमिति किम् ? कण्टकानां मर्दनम् ॥१२५॥

---

अव०–[१]यच्च तत् कर्म च=यत्कर्म, यत्कर्मणः स्पर्शो=यत्कर्मस्पर्शः, तस्मात् । [२]कर्त्तुरङ्गं=कर्त्रङ्गम्, कर्त्रङ्गस्य सुखं= कर्त्रङ्गसुखम् । [३]अनट्प्रत्यये 'ङस्युक्तं कृता' (३।१।४९) इत्यनेन (समासः) । ओदनभोजनं सुखमित्यपि । [४]तूलिकाया इत्यादिष्वावृत्त्युदाहरणेषु असमासः प्रत्युदाहार्यः । [३]पयःपानमित्यस्य पयसः पीतिः=पयःपानमिति वाक्यं कार्यम् । एवं कृते हि शब्दान्तरेणार्थः कथ्यते । पयसां पानं=पयःपानमिति तु वाक्यं न कार्यम्, नित्यसमासत्वात् । [५]'शिष्येण गुरोः' अत्र प्रयोगे स्नापयतेः न गुरुः कर्त्ता, किं तर्हि ? कर्म । [६]पुत्रस्पर्शात्र शरीरे सुखम्, किं तर्हि ? मानसी प्रीतिः, अन्यथाऽपरपुत्रपरिष्वङ्गेऽपि स्यात् ॥१२५॥

## रम्यादिभ्यः कर्त्तरि ॥५।३।१२६॥

म० वृ०–रम्यादिधातोः कर्त्तरि 'अनट्' स्यात् । रम्,– रमणी, कमनी, नन्दनी, ह्लादनी, [१]इध्मव्रश्चनः, पलाशशातनः । बहुवचनं प्रयोगानुसारार्थम्, तेन कुट्टनी, [चितप् -] चेतनः ॥१२६॥

अव०—[1]वृश्चतीति व्रश्चनः, इध्मानां व्रश्चनः । एवं पलाशशातनः ॥१२६॥

## कारणम् ॥५।३।१२७॥

म० वृ०—कृगः कर्त्तरि 'अनट् वृद्धिश्च' निपात्यते । करोतीति कारणम् । कर्त्तरीति किम् ? करणम् ॥१२७॥

## [1]भुजि-पत्यादिभ्यः कर्मा-ऽपादाने ।५।३।१२८।

म० वृ०—भुज्यादिधातोः कर्मणि पत्यादिधातोश्चापादाने- 'ऽनट्' स्यात् । [कर्मणि--] भुज्यते इति भोजनम्, निरदन्ति तदिति निरदनमित्यादि । अपादाने,-- प्रपतत्यस्मादिति प्रपतनः, अपादानम् । ॥ १२८ ॥

अव०—[1]भुज्यादिभ्यः पत्यादिभ्यश्च धातुभ्यो यथासङ्ख्यं कर्मण्यपादाने चानड् भवति इति बृहद्वृत्तौ सूत्रार्थः । 'निरदनमित्यादि', आदिशब्दात् आच्छादनम्, अवश्रावणम्, अवसेचनम्, अशनम्, वसिक्- वसनम्, आभृग्-- आभरणम्, इति भुज्यादिप्रयोगाः । पत्यादिगणे-- प्रस्कन्दनः, प्रश्च्योतनः, प्रस्रवणः, निर्झरणः,..................(शङ्खोद्धरणम्) अपादानम् । बहुवचनं.........( प्रयो)गानुसरणार्थम् ॥ १२८ ॥

## करणा-ऽऽधारे ॥५।३।१२९॥

म० वृ०—करणाधारयोरर्थयोरनट् स्यात् । घञाद्यपवादः । करणे-- [1]एषणी, [2]लेखनी, [3]विचयनी, पलाशशातनः, [इध्मव्रश्चनः] आधारे- गोदोहनी, सक्तुधानी, [एवं तिलपीडनी.] शयनम्, आसनम्, [एवमास्थानम्,] अधिकरणम् ॥१२९॥

अव०—[1]इष्यतेऽनया=एषणी । [2]लिख्यतेऽनया =लेखनी । [3]विचीयते.......(ऽनया=) विचयनी= वैद्यशलाका । इध्मव्रश्चनः, पलाशशातनः, श्मश्रुकर्त्तनः इति करणे विशेषप्रयोगाः ॥ १२९ ॥

## पुन्नाम्नि घः ॥५।३।१३०॥

म० वृ०—पुंसो नाम्नि गम्यमाने [ धातोः परतः] 'करणाधारयोर्घः प्रत्ययः' स्यात् । करणे-- [1]प्रच्छदः, [2]उरश्छदः, [3]दन्तच्छदः, [4]प्लवः, [5]प्रणवः, करः, प्रत्ययः, शरः । आधारे-- [6]आकरः, भवः, लयः, विषयः, प्रहरः, अवसरः, परिसरः । पुंग्रहणं किम् ? [7]विचयनी, [8]प्रधानम् । बहुलाधिकारात् क्वचिन्न घः-- [9]प्रसाधनः, दोहनः ॥ १३० ॥

अव०—[1]छदण् संवरणे, 'चुरादिभ्यो णिच्' ( ३।४।१७इति णिच् ), प्रच्छाद्यतेऽनेन इति प्रच्छदः, 'पुन्नाम्नि घः', 'एकोपसर्गस्य च घे' (४।२।३४) इति सूत्रेण ह्रस्वः । एवं परिच्छदः, उपच्छदः । [2]तथा छाद्यतेऽनेन इति छदः, 'पुन्नाम्नि घः', 'एकोपसर्ग०' (४।२।३४) इति ह्रस्वः, तदनन्तरमुरसश्छदः (=उरश्छदः), [3]दन्तानां छदः=दन्तच्छदः । [4]प्लवः उडुप उच्यते । [5]प्रणव ओङ्कारः । [6]एत्य कुर्वन्ति अस्मिन्निति आकरः । एवमालवः =क्षेत्रम्, आपवः= 'तीर्थविशेषः, भरः= तृणानां समूहः, प्रसरः=वेगः, विसरः=समूहः , प्रतिसरः =कङ्कणं हस्तसूत्रं च. एते आधारे प्रयोगाः। [7]विचीयतेऽन्विष्यतेऽनया इति विचयनी, 'करणाधारे' अनट्, वैद्यशलाका। [8]सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः=प्रधानं साङ्ख्यमने । '[9]प्रसाधनः, दोहनः' इत्यत्र णिगन्तधातोरनट् । नाम्नीति किम् ? प्रहरणो दण्डः । घकारः 'एकोपसर्गस्य०' इत्यत्र विशेषणार्थः ॥ १३० ॥

## गोचर-सञ्चर-वह-व्रज-व्यज-खला-ऽऽपण-निगम-बक-भग-कषा-ऽऽकष-निकषम् ॥५।३।१३१॥

म० वृ०—एते शब्दाः करणाधारे 'पुन्नाम्नि घान्ता' निपात्यन्ते । [1]गोचरो=देशः, [2]सञ्चरः, [3]वहः, [4]व्रजः, [5]व्यजः, [6]खलः, [7]आपणः, [8]निगमः, [9]बकः, [10]भगः, [11]कषः, आकषः, निकषः ॥१३१॥

अव०—कृ.......। [1]गावश्चरन्ति अस्मिन् प्रदेशे इति गोचरः, व्युत्पत्तिमात्रं चेदं दर्शितमस्ति,विषयस्यापि गोचर इति संज्ञा, यथा-"अनेकान्तात्मकं वस्तु

गोचरः सर्वसंविदाम्'' एकदेशविशिष्टोऽर्थो चान···· ····। [२]सञ्चरन्तेऽनेन सञ्चरः। [३]वहन्ति तेन इति वहः वृषभस्कन्धः । [४]व्रजत्यस्मिन्निति व्रजो=मार्गः । [५]विपूर्वोऽज, व्यजत्यनेन व्यजः, निपातनान्न 'वी' आदेशः। [६]खलन्त्यस्मिन्निति खलः=दुर्जनः। [७]एत्य पणायन्ति अस्मिन्निति आपणः । [८]निगच्छन्ति त........(त्रेति निगमः)........भदनावदावा (?)। [९]वक्तीति बकः,अत्र बाहुलकात् कर्त्तर्य्यपि घप्रत्ययः। [१०]भज्यतेऽनेन अस्मिन् वा इति भगः। 'भगम्' इत्यत्र तु क्लीबे बाहुलकात् घः। [११]कषत्यस्मिन्निति कषः, एवमाकषः, निकषः ॥१३१॥

## व्यञ्जनाद् घञ् ॥५।३।१३२॥

म० वृ०—व्यञ्जनान्ताद्धातोः 'पुन्नाम्नि करणाधारे घञ्' स्यात्। घस्यापवादः। [१]वेदः, [चेष्टतेऽनेन=) चेष्टो बलम् ,(एवमापाकः,) आरामः, लेखः, बन्धः, [२]नेगः, [३]वेगः, रागः, रङ्गः, [क्ते ऽनिटश्चजोः कगौ घिति' (४।१।१११) इति गः) क्रमः, प्रासादः, [४]अपामार्गः, [५]एवं विमार्गः ॥१३२॥

---

अव०–[१]'वेद' इत्यत्र 'विदंक् ज्ञाने' विदन्त्यनेन=वेदः, अथवा 'विद्लृंती लाभे' विन्दति विन्दते वा ( अनेन ) इति वेदः, ( यद्वा ) 'विदिंप् विचारणे' विन्दतेऽनेन वेदः । [२]नेनेक्त्यनेन= नेगः । [३]वेवेक्त्यनेन=वेगः । [४]अपमृज्यन्ते रोगा अनेन=अपामार्गः।[५]विमृज्यन्ते रोगाअनेन=विमार्गः, अङ्घाटकः साटडी पुनर्नवा इति लोकरूढिः, (?) 'क्तेऽनिटश्चजोः (कगौ) घिति'(४।१।१११) इति गकारः ॥ १३२ ॥

## अवात् तृ-स्तृभ्याम् ॥५।३।१३३॥

म० वृ०—अवपूर्वात् तृस्तृभ्यां करणाधारे 'पुन्नाम्नि घञ्' स्यात् [ अवतरन्त्यनेन अवतरन्त्यस्मिन् वा= अवतारः, अवस्तारः। बहुलाधिकारादसंज्ञायामपि घञ् ,– अवतारो नद्याः, (उत्पूर्वादपि–) नद्युत्तारः ॥ १३३ ॥

## न्याया-ऽऽवाया-ऽध्यायोद्याव-संहारा-ऽवहारा-ऽऽधार-दार-जारम् ॥५।३।१३४॥

म० वृ०–एते शब्दाः 'पुन्नाम्नि करणाधारे घञन्ता' निपात्यन्ते । [स्वरान्तार्थं आरम्भोऽयम् 'पुन्नाम्नि घः' (५।३।१३०) इति घे प्राप्ते] [१]न्यायः, [२]आवायः, [३]अध्यायः, [४]उद्यावः, [५]संहारः, [६]अवहारः, [७]आधारः, दाराः, जारः ॥१३४॥

---

अव०–[१]निपूर्वस्य इणधातोः नीयतेऽनेन इति न्यायः पञ्चावयवं वाक्यम् । [२]तत्र एत्य वयन्ति वायन्ति वा तत्र इति आवायः= तन्तुवयशाला । [३]अधीयतेऽनेन अस्मिन् वा इत्य··········(ध्यायः) । ···············[४](उद्युवन्ति तेन) तस्मिन् वा उद्यावः जज्ञि (? यज्ञे) पात्रविशेषः। [५]संहरन्ति तेन=संहारः कालः । [६]अवहरन्ति तेन तस्मिन् वा= अवहारः ग्राहः । [७]द्यूतादिव्यसनं वा आध्रियते तत्रेत्याधारः ॥ १३४ ॥

## उदङ्कोऽतोये ॥५।३।१३५॥

म० वृ०–उत्पूर्वादञ्चेः 'पुन्नाम्नि करणाधारे घञ्' निपात्यते, [१]अतोये=तोयविषयो धात्वर्थो यदि न स्यात्। तैलोदङ्कः, घृतोदङ्कः। अतोय इति किम्? [२]उदकोदञ्चनः ॥१३५॥

---

अव०–[१]'अतोये' इत्यस्यायं भावार्थः–यदि तेन भाजनेन जलं नोदच्यते=न व्यापार्यते, किन्तु तैलघृतादिकं ततः उदच्यते। 'व्यञ्जनान्ताद् घञ्' (५।३।१३२) इत्यनेनापि सिद्धे तोयविषये प्रतिषेधार्थम् 'उदङ्कोऽतोये' इति सूत्रं कृतम्। [२]रूपाविशेषात् घप्रत्ययोऽपि न भवति ॥१३५॥

## आनायो जालम् ॥५।३।१३६॥

म० वृ०–आङ्पूर्वान्नियः 'करणे पुन्नाम्नि घञ् निपात्यते, जालं चेद्वाच्यं स्यात्। (आनयन्ति तेन इति आनायः,) आनायो मत्स्यानाम्, आनायो मृगाणाम् ॥१३६॥

## खनो ड-डरेकेकवक-घं च ॥५।३।१३७॥

म० वृ०–खनेः 'पुन्नाम्नि करणाधारे ड-डर-इक-इकवक-घा घञ् च भवन्ति। ड,- [1]आखः, डर,-आखरः, इक,- आखनिकः, इकवक,-आखनिकवकः, घ,-आखनः, घञ्,-आखानः ॥१३७॥

अव०– [1]आखायतेऽनेन अस्मिन्नथवा इति आखः, अथवा आखन्यते अनेन अस्मिन् वा इति आखः । एवं परि (?) आखराखनिकादीनां सर्वेषां वाक्यम् ॥१३७॥

## इ-कि-श्तिव् स्वरूपार्थे ॥५।३।१३८॥

म० वृ०–धातोः स्वरूपे अर्थे च वाच्ये 'इ कि श्तिव्' इत्येते प्रत्यया भवन्ति। स्वरूपे,-[1]भञ्जिः, [2]क्रुधिः, वेत्तिः। [4]अर्थे,-यजेरङ्गानि,भजिः क्रियते, पचतिर्वर्त्तते ॥१३८॥

अव०–[1]'भञ्जिः', कोऽर्थः ? भञ्जधातुः, [2]'क्रुधिः',कोऽर्थः ? क्रुध् धातुः, [3]वेत्तीति विद् धातुः, इतिस्वरूपं (? इतिस्वरूपा) धातुशब्दाः। [4]अथ अर्थविषयः,-यजेः, कोऽर्थः ? यज्ञस्य, 'भजिः'=सेवा, पचतिः=पाकः। अत्र बाहुलकात् भावेऽप्यर्थे शब् भवति, क्यश्च न भवति ॥१३८॥

## दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् ॥५।३।१३९॥

म० वृ०–कृच्छ्रं=दुःखम्। अकृच्छ्रं सुखम्। कृच्छ्रार्थवृत्तेर्दुर्शब्दात् सामर्थ्यादकृच्छ्रार्थवृत्तिभ्यां सु-ईषत्शब्दाभ्यां पराद्धातोर्भावकर्मणोरर्थयोः 'खल् प्रत्ययः' स्यात् । [भावे,–] [1]दुःशयम्, [2]सुशयम्, [3]ईषच्छयं भवता। [कर्मणि,–] [4]दुष्करः, [5]सुकरः, [6]ईषत्करः कटस्त्वया। [भावे,–] दुष्करं, सुकरम्, ईषत्करं त्वया। कृच्छ्रादीति किम् ? [7]ईषल्लभ्यं धनं कृपणात् । [8]इह [शास्त्रे] स्त्रीप्रत्ययात्प्रभृत्यसरूपविधेरभावात् [9]स्पर्द्धे [10]'अलः स्त्रीखलनौ' भवन्ति, 'स्त्रियास्तु खलनौ' परत्वाद् भवतः। तत्र चयः,जयः, लवः इत्यादावलोऽवकाशः, कृतिरित्यादौ स्त्रीप्रत्ययस्य [अवकाशः], चितिः, स्तुतिरित्यादौ तूभयं [अलूक्ती] प्राप्नोति, अलो विशेषेणाभिधानात् तत्र परत्वात् स्त्रीप्रत्ययः। तथा 'दुर्भेदः, सुभेद' इत्यादौ खलोऽवकाशः, अलस्तु पूर्व एव, दुश्रयम्, सुचयम्, दुर्लवम् इत्यादौ [11]तूभय- [अल्खल्] प्राप्तौ परत्वात् खल् इत्यादि ॥१३९॥

अव०–[1]दुःखेन शय्यते=दुःशयम् । [2]सुखेन शय्यते इति सुशयम्। [3]ईषत्=अनायासेन शय्यते= ईषच्छयं भवता इति भावार्थः। [4]दुःखेन क्रियते कटस्त्वया इति दुष्करः कटस्त्वया। [5]एवं सुखेन क्रियते कट इति सुकरः। [6]ईषदनायासेन क्रियते कट इति ईषत्करः कटस्त्वया इति कर्मणि प्रयोगाः। दुःस्वीषत इति किम् ? कृच्छ्रसाध्यः, सुखसाध्यः । [7]'ईषल्लभ्यं धनं कृपणाद्' इति कोऽर्थः ? अल्पलभ्यमित्यर्थः। [8]'असरूपोऽपवादे वोत्सर्गः प्राक्क्तेः' (५। १।१६) इति सूत्रे 'स्त्रियां क्तिः' इत्यारभ्य असरूपविधिर्न प्रवर्त्तते इत्युक्तमस्ति । [9]युगपदनेकसूत्रप्राप्तौ सत्यां यत् परं तत् प्रवर्त्तते इति स्पर्द्धशब्दार्थः। अतः अल् सामान्यतः प्रवाहतोऽस्ति अल्प्रत्ययात् ❀ स्त्रिया क्त्यादयः परतः स्त्रीप्रत्ययवास् खल् अनट् इत्यन्ता प्रवर्त्तन्ते इति भावः । [10]स्त्रीप्रत्ययाः खलनाप्रत्ययाश्च (? खलनौ प्रत्ययौ च) अलो बाधकाः स्त्रीप्रत्ययस्य तु खलनौ बाधकौ इति परमार्थः। [11]आदिशब्दात् इध्मप्रव्रश्चनः, पलाशशातन इत्यादावनटोऽवकाशः, अलस्तु पूर्वक एव, पलाशशातनः, अविलवन इत्यादौ तु 'अल् अनट्' इत्युभयप्राप्तौ परत्वादनट्। (एवं हृतिःकृतिरित्यादौ स्त्रीप्रत्ययस्यावकाशः, दुर्भेदः सुभेद इत्यादौ खलः,) दुर्भेदा सुभेदा इत्यादौ 'स्त्रीप्रत्ययः खल्' इत्युभयप्राप्तौ सत्यां परत्वात् खल् भवति ॥१३९॥

## च्व्यर्थे कर्त्राप्याद् भूकृगः ॥५।३।१४०॥

म० वृ०–कृच्छ्राकृच्छ्रार्थेभ्यो दुःस्वीषद्भ्यः पराभ्यां च्व्यर्थे वर्तमानाभ्यां कर्तृकर्मवाचिभ्यां शब्दा-

❀ अत्र 'अलप्रत्ययात्' इत्यत आरभ्य 'इति भावः' इति यावत् पाठोऽशुद्धः प्रतीयते ।

भ्यां पराभ्यां यथासङ्ख्यं भूकृग्भ्यां परः 'खल्' स्यात् । खानुबन्धबलात्कर्तृकर्मणोरेवानन्तर्यम् । [1]दुराढ्यंभवम् , [2]स्वाढ्यंभवम् , [3]ईषदाढ्यंभवं भवता [4]दुराढ्यंकरः , [5]स्वाढ्यंकरः, [6]ईषदाढ्यंकरश्चैत्रस्त्वया। [7]सुकटंकराणि वीरणानि । [8]सुकरः कटो वीरणैरत्र तु करणविवक्षा । च्व्यर्थ इति किम् ? [9]दुराढ्येन, स्वाढ्येन, ईषदाढ्येन भूयते;आढ्य एव सन् (मैत्रः) किञ्चिद्विशेषमापद्यते इत्यर्थः । एवं दुराढ्यः क्रियते इत्यादि, [10]अभूतप्रादुर्भावेऽपि वा प्रकृतेरविवक्षणात् च्व्यर्थो नास्ति ॥१४०॥

अव०–[1]कर्त्तरि,-दुःखेनानाढ्येन आढ्येन भूयते इति वाक्ये 'दुराढ्यंभवं भवता' इति प्रयोगः । [2]एवं सुखेन आढ्येन भूयते=स्वाढ्यंभवं भवता । [3]ईषत्= अनायासेनानाढ्येनाढ्येन भूयते=ईषदाढ्यंभवं भवता । अथ कर्मणि-, [4]दुःखेनानाढ्यः आढ्यः क्रियते=दुराढ्यंकरो मैत्रो भवता । सुखेनानाढ्य आढ्यः क्रियते=स्वाढ्यंकरश्चैत्रो भवता । [6]एवमीषदाढ्यंकरश्चैत्रो भवता । [7]सुखेनानायासेन कटः क्रियन्ते= सुकटंकराणि वीरणानि । [8]ननु सुकरः कटो वीरणैरयं लोकप्रसिद्धः प्रयोगः कथम् ? सत्यम् , यद्यप्यत्र वीरणानि अकटः कटः क्रियन्ते तथाप्यत्र करणत्वेन विवक्षा। [9]आढ्येन सता दुःखेन भूयते इत्यर्थो,एवमग्रेपि । [10]अथवाऽभूतप्रादुर्भावविवक्षितेऽपि प्रकृतेरनाढ्य इत्येवंरूपायाः (अविवक्षणात् च्व्यर्थो नास्ति) ॥१४०॥

## शासू-युधि-दृशि-धृषि-मृषा--ऽऽतोऽनः ॥५।३।४१॥

म० वृ०–कृच्छ्राकृच्छ्रार्थदुःस्वीषत्पूर्वेभ्यः शासादिधातुभ्यः आकारान्तधातुभ्यश्च 'भावकर्मणोरनः प्रत्ययः' स्यात् । दुःखेन शिष्यते=दुःशासनः, एवं [1]सुशासनः, [2]ईषच्छासनः, एवं [3]दुर्योधनः, [4]दुर्दर्शनः, [5]दुर्द्धर्षणः, [6]दुर्मर्षणः । आदन्त,-[7]दुरुत्थानम् ,[8]सूत्थानम् , [9]ईषदुत्थानम् ; एवं [10]दुष्पानम् , [11]सुपानम् , [12]ईषत्पानं पयस्त्वया । [13]कथमीषद्दरिद्रः ? विषयेऽन्त्याकारलोपेनादन्तत्वाभावात् खलेव । खलोऽपवादो योगः । इति पञ्चमाध्यायस्य तृतीयः पादः । ग्रन्थाग्र– २३७ ॥१४१॥

अव०–[1]सुखेन शिष्यते। [2]ईषत् शिष्यते । ❀विशेषं दुःखस्थानं सुखावस्थानमापद्यते लभते इति भावः । [3]दुःखेन युध्यते=दुर्योधनः । [4]दुःखेन दृश्यते= दुर्दर्शनः । [5]दुःखेन धृष्यते=दुर्द्धर्षणः । [6]दुःखेन मृष्यते=दुर्मर्षणः। [7]दुःखेन उत्थीयते=दुरुत्थानं भवता । [8]सुखेनोत्थीयते=सूत्थानम् । [9]ईषदनायासेन (उत्थीयते=ईषदुत्थानम् । [10]दुःखेन पीयते= दुष्पानं पयस्त्वया [11]सुखेन पीयते=सुपानम् । [12]ईषदनायासेन पीयते=ईषत्पानं पयो भवता । ईषद्दरिद्रायते=ईषद्दरिद्रः, 'अशित्यस्सन्णकचणकानटि' (४।३।७७) इत्यनेन प्रत्ययविषये एव अन्तस्य लोपः, पश्चात् पूर्वसूत्रेण खल् ,आदन्तत्वाभावादनो न प्राप्नोति,यथा दरिद्र इत्यत्र प्रत्ययविषये एवान्तलोपः, पश्चादच् , नत्वाकारान्तलक्षणप्रत्ययः 'तन्व्यधीण्श्वसातः' (५।१।६३) इति । अथवा दुर्दरिद्रः अत्रापि प्रत्ययविषये एव अन्ताकारलोपेऽनो न प्राप्नोति, पश्चात् खल् भवति । एवमीषद्दरिद्र इत्यत्रापि अनोऽप्राप्तौ खल् । केचित्तु आदन्तवर्जितेभ्यः शासादिभ्यो विकल्पेन अनमिच्छन्ति । तन्मते-दुःशासः, दुर्योधः, दुर्दर्शः, दुर्द्धर्षः, दुर्मर्ष इत्याद्यपि भवति, एषु खल् "दुर्दर्शो हि राजा कार्याकार्यविपर्यासमासन्नैः कार्यते" इति पूर्वकविप्रयोगः, अन्यस्य पक्षे खल् ॥१४१॥

अत्र सूत्रे अवचूरिश्लोक–३८०, अक्षर–२ ।

❀ 'विशेषम्' इत्यतः 'इति भावः इति यावदवचूरिः प्रस्तुतसूत्रेऽसङ्गता, गतानन्तरसूत्रे 'विशेषमापद्यते' इत्यस्य सम्भाव्यते ।

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने पञ्चमाध्यायस्य तृतीयः पादः समाप्तः ॥

॥ अर्हम् ॥

# ॥ पञ्चमोऽध्यायः ॥

## [ चतुर्थः पादः ]

卐

### [1]सत्सामीप्ये [2]सद्वद्वा ॥५।४।१॥

म० वृ०–सतो=वर्त्तमानस्य सामीप्ये भूते भविष्यति चार्थे वर्त्तमानाद्धातोः "सद्वत्=वर्त्तमानवत् प्रत्यया वा" भवन्ति । कदा चैत्र ! आगतोऽसि ? अयमागच्छामि, आगच्छन्तमेव मां विद्धि [जानीहि]; वावचनाद् [3]यथाप्राप्तं च– अयमागमम् , एषोऽस्म्यागतः । कदा मैत्र गमिष्यसि ? एष गच्छामि, गच्छन्तमेव मां विद्धि; पक्षे– एष गमिष्यामि, गन्तास्मि, गमिष्यन्तमेव मां विद्धि । सामीप्ये इति किम् ? परुदगच्छत् । वर्षेण गमिष्यति ।१।

---

अव०–[1]समीपमेव सामीप्यम् , सतो= वर्त्तमानस्य सामीप्यं (= सत्सामीप्यम् ), तस्मिन् । [2]'सद्वत्' इति कोऽर्थः ? कृति द्वितीयपादे 'श्रुसदवस०' इति सूत्रे 'सति' (५।२।१९) इति सूत्रमापादपरिसमाप्त्यधिकारबद्धमस्ति, 'सति' इति सूत्रादारभ्य ये प्रत्यया विहिताः, तेऽत्र सूत्रे भूते भविष्यति काले निजं कालमतिक्रम्यापि वा=विकल्पेन अतिदिश्यन्ते। उदाहरणेषु पूर्वं भूतविवक्षा, अतीतप्रत्ययाः, तत उत्तरप्रदाने सति वर्त्तमाने वर्त्तमानप्रत्ययाः । एवं भविष्यति प्रत्ययाः, तदनन्तरं सति प्रत्ययाः, एवं प्रयोगयुक्तिः । वत्करणस्य सादृश्यार्थत्वात् येनैव प्रकृत्युपपदोपाधिकर्तृविशेषेण वर्त्तमाने विहितास्तेनैव प्रकृत्यादिविशेषेण भूतभविष्यतोरपि प्रत्यया भवन्ति, यथा-कदा भवान सोमं पूतवान पविष्यते वा ? एषोऽस्मि पवमानः; कदा भवान इष्टवान् यक्ष्यते वा ? एषोऽस्मि यजमानः, अत्र 'पूङ्यजेः शानः' (५।३।२३) इत्यनेन प्रकृतिविशेषेण प्रत्ययः। कदा भवान् कन्यामलंकृतवान् अलङ्करिष्यते वा ? एषोऽस्म्यलङ्करिष्णुः, अत्र उपपदविशेषेण शीलाद्यर्थोपाधिविशेषेण (च) प्रत्ययः सञ्जातः । एषाऽवचूरिः 'गमिष्यन्तमेव मां विद्धि' इत्यस्याग्रे ज्ञातव्या । [3]'यथाप्राप्तम्' इति कोऽर्थः ? भूतानद्यतने ह्यस्तन्यपि भवति, यथाऽयमागच्छम् ; एवं सामान्यभविष्यति भविष्यती श्वस्तन्यपि भवति, (इति) यथाप्राप्तमुच्यते ॥१॥

### [4]भूतवच्चाशंस्ये वा ॥५।४।२॥

म० वृ०–[1]आशंस्येऽर्थे वर्त्तमानाद्धातोर्भूतवत [चकारात् ] सद्वच्च प्रत्यया वा भवन्ति । आशंस्यस्य भविष्यत्त्वादयमतिदेशः । वाग्रहणाद्यथाप्राप्तं च । [2]उपाध्यायश्चेदागमत् एते [वयम् ] [3]तर्कमध्यगीष्महि [अद्यतनी]। उपाध्यायश्चेदागतः एतैस्तर्कोऽधीतः। पाठकश्चेदागच्छति एते तर्कमधीमहे । पक्षे-पाठकश्चेदागमिष्यति एते तर्कमध्येष्यामहे । आशंस्य इति किम् ? पाठक आगमिष्यति तर्कमध्येष्यते मैत्रः [अत्र आशंसा नास्ति, किन्तु स्वभावोक्तिः]॥२॥

---

अव०–[1]अनागतस्य प्रियस्यार्थस्य आशंसनम् , कोऽर्थः ? प्राप्तुमिच्छा आशंसा उच्यते, आशंसाविषय आशंस्यः, तस्मिन्नीदृशे आशंस्येऽर्थे । [2]"उपाध्यायश्चेदागमत् एते तर्कमध्यगीष्महि',उभयत्राप्याशंस्यस्य विद्यमानत्वात् भविष्यन्त्याः प्राप्तौ सत्यां 'भूतवच्च'०इत्यनेन भूतप्रत्ययः । [3]'एते तर्कमध्यगीष्महि', अत्र 'इङ् अध्ययने' अधिपूर्वः, अद्यतनीमहि, सिच्, 'वाऽद्यतनीक्रियातिपत्त्योर्गीङ्' (४।४।२८) इत्यनेन इङ: स्थाने गी आदेशः। [4]'भूतवत्प्रत्ययो भवति इत्युक्ते अद्यतनी, न ह्यस्तनीपरोक्षे; इदं कथं ज्ञायते ? तत्राह-(बृहद्वृत्तौ)"सामान्यातिदेशे विशेषस्यानतिदेशात्",

इति ह्यस्तनीपरोक्षे न भवतः । एष विशेषो "व्याख्यानतो विशेषार्थप्रतिपत्ति-"रिति न्यायात् ज्ञायते । (एवम्) पाठकश्चेदागन्ता एते तर्कमध्येतास्महे; इदं श्वस्तनीविषये ज्ञेयम्। एषावचूरिर्मूलोदाहरणसम्बन्धे ज्ञातव्या ॥२॥

## क्षिप्रा-ऽऽशंसार्थयोर्भविष्यन्ती-सप्तम्यौ ॥५।४।३॥

म०वृ०-(क्षिप्रार्थे आशंसार्थे चोपपदे आशंस्येऽर्थे) वर्त्तमानाद्धातोर्यथासंख्यं 'भविष्यन्तीसप्तम्यौ' भवतः।[ "भूतवच्च०" इत्यस्यापवादोऽयम् ] पाठकश्चेदागच्छति, आगमत्, आगमिष्यति, आगन्ता, क्षिप्रं त्वरितं शीघ्रमेते [ वयम् ] सिद्धान्तमध्येष्यामहे । क्षिप्रार्थे नेति[१] वक्तव्ये भविष्यन्तीवचनं श्वस्तनीविषयेऽपि भविष्यन्ती यथास्यादित्येवमर्थम् । गुरुश्चेत् श्वः शीघ्रमागमिष्यति एते [वयम्] श्वः क्षिप्रमध्येष्यामहे। आशंसार्थे-पाठकश्चेदागच्छति, आगमत्, आगमिष्यति, आगन्ता, आशंसे सम्भावये [२]युक्तोऽधीयीय । [३]द्वयोरुपपदयोः सप्तम्येव, शब्दतः परत्वात्, आशंसे क्षिप्रमधीयीय ॥३॥

---

अव०-[१]"आशंसार्थे सप्तमी' 'क्षिप्रार्थे न' इति सूत्रद्वयं कर्त्तुं युक्तमिति परप्रश्ने सूरिराह-भविष्यन्तीत्यादि। [२]युक्तो मेलितः समाहितो वा। [३]सूत्रे पूर्वं भविष्यन्ती ततः सप्तमी इति शब्दपरत्वम् ॥३॥

## सम्भावने सिद्धवत् ॥५।४।४॥

म०वृ०-[१]सम्भावनविषयेऽसिद्धेऽपि वस्तुनि 'सिद्धवत्[२] प्रत्यया' भवन्ति। समये चेत्प्रयत्नोऽभूत् उदभूवन् विभूतयः इत्यादि[३] ॥४॥

---

अव०-[१]'भूण् अवकल्कने' णिच्, सम्भाव्यते इति सम्भावनम्; हेतोः शक्तिश्रद्धानं सम्भावनमुच्यते, तस्मिन् सम्भावनविषये । [२]कोऽर्थः ? भूतप्रत्यया भवन्तीत्यर्थः । [३]आदिशब्दात् इषे चेन्माधवोऽवर्षीत समपत्स्यत शालयः, गतं च वसुदेवस्य कुलं नामावशेषताम्* ॥४॥

## नानद्यतनः प्रबन्धासत्त्योः ॥५।४।५॥

म० वृ०-धात्वर्थस्य=प्रबन्धे आसत्तौ च गम्यमानायां धातोरनद्यतनविहितः[१] प्रत्ययो न स्यात्[२]। यावज्जीवं भृशमन्नमदात् [ अद्यतनी ] दत्तवान् दास्यति वा[२]। आसत्तौ-येयं पौर्णमास्यतिक्रान्ता, [३]एतस्यां जिनमहः प्रावर्त्तिष्ट प्रवृत्तः (वा)। येयं पौर्णमासी आगामिनी, अस्यां जिनमहः प्रवर्त्तिष्यते ॥५॥

---

अव०-[१]भूतानद्यतने ह्यस्तनी भविष्यदनद्यतने च श्वस्तनी विहितास्ति पूर्वम्, तयोर्ह्यस्तनीश्वस्तन्योरत्रसूत्रे प्रतिषेधः क्रियते इति भावः । अनद्यतनविहितः प्रत्ययो न स्यादित्यस्य कोऽर्थः ? पूर्वं हि 'अनद्यतने ह्यस्तनी' (५।२।७) इति सूत्रेण भूतानद्यतने ह्यस्तनी विहितास्ति [ "अनद्यतने श्वस्तनी" (५।३।५) इति सूत्रेण भविष्यदनद्यतने श्वस्तनी विहितास्ति] इति'नानद्यतनः प्रबन्धासत्त्यो'-रित्यनेन ह्यस्तनीश्वस्तन्योः प्रतिषेधः क्रियते इत्यर्थः । [२]एवं यावज्जीवं युक्तोऽध्यापिपत्, यावज्जीवं युक्तोऽध्यापयिष्यति इत्यपि ज्ञेयम् । सर्वत्र यावज्जीवमन्नं दत्तवान् यावज्जीवं दास्यति । [३]'एतस्याम्'इत्यस्यायमभिप्रायः- यथा वर्त्तमानपूर्णिमास्यां (? पूर्णिमायां)जिनपूजा प्रवर्त्तमानास्ति, तथा व्यवहितायां पाश्चात्त्यपूर्णिमायां प्रावर्त्तिष्टेत्यर्थः ॥५॥

## एष्यत्यवधौ[२] देशस्यार्वाग्भागे[१] ॥५।४।६॥

म० वृ०-देशस्य योऽवधिस्तद्वाचिन्युपपदे देशस्यैवार्वाग्भागे य एष्यन्नर्थस्तत्र वर्त्तमानाद्धातोरनद्यतनविहितः[३] प्रत्ययो न स्यात्। योऽयमध्वा गन्तव्य आ शत्रुञ्जयात्, तस्य यदवरं वलभ्यास्तत्र [४]द्विरोदनं भोक्ष्यामहे; द्विः सक्तून् पास्यामः । एष्यतीति किम् ? योऽयमध्वातिक्रान्त आ शत्रुञ्जयात्, तस्य यदवरं वलभ्यास्तत्र [५]युक्ता द्विरध्यैमहि[६] ॥६॥

---

अव०-[१]अर्वं अर्वाचीनं भावमञ्चति- अर्वाङ्, अर्वाङ् चासौ भागश्च । [२]देशः प्रदेशमात्रम्,तेनाध्व-

---

* नामैवावशेषो यस्य स नामावशेषः, तस्य भावः।

नोऽपि देशता। [३]यद्यपि अनद्यतन इति प्रकृतमस्ति तथापि इह सूत्रे एष्यतीति वचनात् श्वस्तन्या एवात्र प्रतिषेधः, न ह्यस्तन्याः। अप्रबन्धार्थमनासत्त्यर्थं (च) वचनम्। [४]द्वौ वारौ=द्विः। [५]'युजूंपी योगे' 'युजिंच् समाधौ' (इति) युज्, युज्यमः स्म अथवा युञ्ज्यामहे स्म इति युक्ताः, 'गत्यर्था०' (५।१।११) इति क्तः, युक्ताः, कोऽर्थः? मिलिताः अथवा समाहिताः सन्तो वयमध्यैमहि। [६]द्विः सक्तून् पिबाम इत्यपि। अवधाविति किम्? योऽयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्विः सक्तून् पातास्मः। अर्वाग्भाग इति किम्? योऽयमध्वा गन्तव्य आ शत्रुञ्जयात्तस्य यत् परं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्विः सक्तून् पातास्मः। सूत्रान्ते व्यावृत्तिद्वयमिदम् ॥६॥

## कालस्यानहोरात्राणाम्[१] ॥५।४।७॥

म० वृ०—कालस्य योऽवधिस्तद्वाचिन्युपपदे [सति कालस्यैवार्वाग्भागे य एष्यन्नर्थस्तत्र वर्त्तमानाद्धातो- 'रनद्यतनविहितः प्रत्ययो न' स्यात्, अनहोरात्राणां =सोऽर्वाग्भागो यद्यहोरात्राणां सम्बन्धी न भवति। [यत्र प्रयोगे अहःशब्दो रात्रिशब्दो वा प्रयुज्यते तत्राहोरात्रत्वम् ईदृशः शब्दो वर्ज्यते] योऽयमागामी संवत्सरस्तस्य यदवरमाग्रहायण्याः,[२]तत्र जिनपूजां करिष्यामोऽतिथिभ्यो दानं दास्यामहे। अनहोरात्राणामिति किम्? योऽयं मास आगामी, तस्य योऽवरः पञ्चदशरात्रः, [तादात्म्यरूपसम्बन्धः] तत्र युक्ता द्विरध्येतास्महे[३]। योगविभाग उत्तरार्थः ॥७॥

अव०—[१]अहानि च रात्रयश्च=अहोरात्राणि, 'ऋक्साम०' (७।३।९७) इति साधुः। [२]मार्गशीर्षस्य पूर्णिमा आग्रहायणी। 'कालस्यानहोरात्राणाम्', अत्र सूत्रे एष्यतीत्येव—योऽयं संवत्सरोऽतीतस्तत्र यदवरमाग्रहायण्यास्तत्र युक्ता द्विरध्यैमहि। अवधावित्येव- योऽयमागामी निरवधिकः कालस्तत्र यदवरमाग्रहायण्यास्तत्र युक्ता अध्येतास्महे। अर्वाग्भागे इत्येव- परस्मिन् भागे 'परे वा' (५।४।८) इत्यनेन विभाषा वक्ष्यति। [३]अथवा योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरोऽर्द्धमासस्तत्र द्विरोदनं भोक्तास्महे। अन्वयवायविरूपसम्बन्धः ॥७॥

## परे वा ॥५।४।८॥

म० वृ०—कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैव परस्मिन् भागेऽनहोरात्रसम्बन्धिनि य एष्यन्नर्थस्तत्र वर्त्तमानाद्धातो—'रनद्यतनः प्रत्ययः स्यात् वा'। आगामिनो वर्षस्य आग्रहायण्याः परस्तात् द्विः सूत्रमध्येष्यामहे [पक्षे=] अध्येतास्महे। प्रबन्धासत्तिविवक्षायामपि परत्वादयमेव विकल्पः[१] ॥८॥

अव०—'परे वा' इति सूत्रे कालस्येत्येव— आ शत्रुञ्जयाद् गन्तव्येऽध्वनि वलभ्याः परस्ताद् द्विरोदनं भोक्तास्महे। प्रबन्धासत्त्योस्तु नित्यं भविष्यन्ती, यथा—आ शत्रुञ्जयाद्गन्तव्येऽस्मिन्नध्वनि वलभ्याः परस्तादविच्छिन्नं सूत्रमध्येष्यामहे। तथा पर इत्येव- अर्वाग्भागे पूर्वेण "कालस्य०" (५।४।७ इत्यनेन) नित्यं प्रतिषेधः। एष्यतीत्येव अवधावित्येव इति व्यावृत्तिद्वयं पूर्ववत् ज्ञातव्यम्। अनहोरात्राणामित्येव- योऽयं त्रिंशद्रात्र आगामी तस्य यः परः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे। [१]न तु "नाद्यतनप्रबन्ध०" (५।४।५) इत्यनेन नित्यं निषेधः। 'अयमेव विकल्प' इत्यस्येदमुदाहरणम्- आगामिनो वर्षस्याग्रहायण्याः परस्तादविच्छिन्नं सूत्रमध्येष्यामहे अध्येतास्महे वा इति ॥८॥

## [१]सप्तम्यर्थे [२]क्रियातिपत्तौ क्रियातिपत्तिः ॥५।४।९॥

म० वृ०—क्रियातिपत्तौ सत्यामेष्यत्यर्थे वर्त्तमानाद्धातोः सप्तम्यर्थे 'क्रियातिपत्तिविभक्तिः' स्यात्। स यदि गुरूनुपासिष्यत शास्त्रान्तमगमिष्यत। अभोक्ष्यत भवान् घृतेन यदि मत्समीपमागमिष्यत् ॥९॥

अव०—[१]'कथमि सप्तमी च वा' (५।४।१३) 'वर्त्स्यति हेतुफले' (५।४।२५) इति वक्ष्यमाणसूत्र-

द्वयस्य सप्तमीविधानहेतोरर्थः सप्तम्यर्थः, तस्मिन् सति गम्यमाने वा। [२]कुतश्चिद्वैगुण्यात् क्रियाया अतिपतनम्=अनिष्पत्तिः क्रियातिपत्तिः, तस्याम् ।९।

## भूते ॥५।४।१०॥

म० वृ०–भूतेऽर्थे वर्त्तमानाद्धातोः क्रियातिपत्तौ सत्यां [१]सप्तम्यर्थे 'क्रियातिपत्तिः'स्यात् । 'सप्तम्युताप्योर्बाढे' (५।३।२१) इत्यारभ्य सप्तम्यर्थेऽनेन क्रियातिपत्तिविधानम्, ततः प्राग् 'वोतात् प्राक्' (५।४।११) इति विकल्पो वक्ष्यते । दृष्टो मया तव पुत्रोऽन्नार्थी चंक्रम्यमाणः, अपरश्चातिथ्यर्थी, यदि स तेन दृष्टोऽभविष्यत, उताभोक्ष्यत, अप्यभोक्ष्यत, न तु दृष्टोऽन्येन पथा स गत इति न भुक्तवान् ।१०।

---

अव०–[१]या सप्तमी विहितास्ति, तस्याः सप्तम्या अर्थः=सप्तम्यर्थस्तस्मिन् ॥१०॥

## वोतात् प्राक् ॥५।४।११॥

म० वृ०–[वक्ष्यमाणसूत्रे] 'सप्तम्युताप्योर्बाढे' इत्यत्र यदुतशब्दसङ्कीर्तनं ततः प्राक् सप्तमीनिमित्ते क्रियातिपत्तौ सत्यां भूतेऽर्थे 'क्रियातिपत्तिर्वा' स्यात्। कथं नाम संयतः सन् [१]अनागाढे तत्रभवान् आधायाकृतम् [आधाकर्मिकाहारम्] [२]असेविष्यत, धिग् गर्हामहे; वावचनाद्यथाप्राप्तं च– कथं [३]सेवेत ! कथं सेवते ! । उतात् प्रागिति किम्? [४]कालो यदभोक्ष्यत भवान् ॥११॥

---

अव०–[१]आगाह्यते स्म संयतैरित्यागाढोऽपवादपदम्, न आगाढम्=अनागाढमुत्सर्गपदं जिनाज्ञामूलपदम्, अनागाढे मूलमार्गे । [२]'कथमि सप्तमी च वा' (५।४।१३) इत्यनेनात्र प्रयोगे सप्तम्यर्थः, सप्तम्यर्थे असेविष्यतेत्यत्र क्रियातिपत्तिः सिद्धा । [३]अत्रापि धिग् गर्हामहे इति पदं योज्यम् । [४]कालो यदभोक्ष्यत भवानित्यत्र "सप्तमी यदि" (५।४।३४) इति सूत्रोक्तसप्तमीविषयोऽस्ति, परं व्यावृत्तिबलात्र भवति, पश्चात् 'भूते' (५।४।१०) क्रियातिपत्तिः ॥११॥

## क्षेपेऽपिजात्वोर्वर्त्तमाना ॥५।४।१२॥

म० वृ०–भूते इति निवृत्तम् । क्षेपे गम्यमानेऽपिजातुशब्दयोरुपपदयोर्धातो–'र्वर्त्तमाना विभक्तिर्भवति । अपि तत्रभवान् [=पूज्यः] जन्तून् हिनस्ति, जातु तत्रभवान् भूतानि हिनस्ति । अपि साधुः [=संयतः] सन्ननागाढे [=उत्सर्गपदे] आधायकृतं [आधाकर्मिकाहारम्] सेवते, धिग्गर्हामहे ॥१२॥

---

अव०–"क्षेपेऽपिजात्वो"-रित्यनेन कालसामान्ये वर्त्तमानाविधानात् कालविशेषविहिता अपि "स्मे ·······(च वर्त्त)माना" (५।२।१६) इत्यादि सूत्रो·······क्ताः "भूत·······[वच्चाशंस्ये वा" (५।४।२) इति सूत्रो] क्ताः प्रत्ययाः परत्वादनेन बाध्यन्ते । अपिशब्दः प्रश्ने समुच्चये वा·······॥१२॥

## कथमि सप्तमी च वा ॥५।४।१३॥

म० वृ०–कथंशब्दे उपपदे क्षेपे [गम्यमाने] सर्वेषु कालेषु 'सप्तमी [चकारात्] वर्त्तमाना च भवतो वा' [वावचनाद् यथाप्राप्तं च]। कथं नाम तत्रभवान् मांसं भक्षयेत् [सप्तमी], मांसं भक्षयति, गर्हामहे, अन्याय्यमेतत्, पक्षे-अबभक्षत्, अभक्षयत् [ह्यस्तनी], भक्षयिता [भक्षयाञ्चकार] । भविष्यति तु क्रियातिपतने नित्यमेव क्रियातिपत्तिः,– कथं नाम तत्रभवान् मांसमभक्षयिष्यत् ॥१३॥

---

अव०–अत्र सप्तमी कर्त्री निमित्तमस्ति इति भूते क्रियातिपतने क्रियातिपत्तिर्वा भवति, तथाहि कथं नाम भवान् मांसमभक्षयिष्यत्, अत्र 'वोतात् प्राक्' (५।४।११) इत्यनेन क्रियातिपत्तिर्वा भवति; पक्षे भक्षयेत्, भक्षयति, अबभक्षयत्, अभक्षयत्, भक्षयाञ्चकार इत्यक्षराणि वृत्तिमध्यस्थे । भविष्यति तु क्रियातिपतने नित्यमेव क्रियातिपत्तिः इति पाठो विचारणीयः चिन्तनीयः (?) । इयमवचूरिः'कथमि०' इति सूत्रे सर्वमूलोदाहरणाग्रे ज्ञातव्या । 'अबभक्षत्', 'भक्षिण् अदने' 'चुरादि०' (३।४।१७इति) णिच्, अद्यतनीदि, 'णिश्रिद्रुस्रुकमः०' (३।४।५८इति)

कप्रत्ययः । 'नित्यमेव क्रियातिपत्तिः' इत्यस्याग्रे न तु वर्त्तमानासप्तमीभविष्यन्तीश्वस्तन्यः । 'कथमि०' इति सूत्रान्ते क्षेपे इत्येव– कथं नाम भवान् साधून् अपूपुजत् ॥ १३ ॥

## [1]किंवृत्ते सप्तमीभविष्यन्त्यौ ॥५।४।१४॥

म० वृ०–किंवृत्ते उपपदे क्षेपे "सप्तमीभविष्यन्त्यौ" भवतः । किं तत्र भवाननृतं ब्रूयात् वक्ष्यति वा ? । को नाम ? कतरो नाम ? कतमो नाम ? यस्मै भवाननृतं ब्रूयात् वक्ष्यति वा । [2]अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने क्रियातिपत्तिर्वा भवति,-किं तत्रभवाननृतमवक्ष्यत, [3]पक्षे-ब्रूयात् वक्ष्यति वा । क्षेपे इत्येव–किं तत्रभवान् देवानपूपुजत् ॥ १४ ॥

अव०–[1]विभक्त्यन्तस्य डतरडतमान्तस्य च किम्शब्दस्य वृत्तं किंवृत्तमिति वैयाकरणसमयः । कः, कतरः, कतम इतिशब्दाः सूत्रे ज्ञातव्याः, तेन किंतरां किंतमामिति किंवृत्तं नोच्यते । सर्वविभक्त्यपवादः । [2]अत्रापि='किंवृत्ते'इति सूत्रेऽपि'कथमि'० (५।४।१३) इति पूर्वसूत्रवत सप्तमीनिमित्तमस्तीत्यादिपाठो विमर्शनीयः । [3]क्रियातिपत्तिः । भविष्यति तु क्रियातिपतने नित्यं क्रियातिपत्तिः, किं भवाननृतमवक्ष्यत् इत्येक एव प्रयोगः ॥१४॥

## [1]अश्रद्धा-ऽमर्षे[2]ऽन्यत्रापि ॥५।४।१५॥

म०वृ०–क्षेप इति निवृत्तम् । अन्यत्र, कोऽर्थः ? अकिंवृत्ते, अपिशब्दात् किंवृत्ते चोपपदेऽश्रद्धामर्षयोर्गम्यमानयोः 'सप्तमीभविष्यन्त्यौ' भवतः । अश्रद्धायाम्,-न श्रद्दधे, न सम्भावयामि तत्र भवान्नामादत्तं [3]गृह्णीयात् ग्रहीष्यति (वा) । [4]किंवृत्ते,-न श्रद्दधे किं तत्रभवानदत्तम् [5]आददीत (सप्तमी), अदत्तमादास्यते । [6]अमर्षे,-न मर्षयामि, न क्षमे,[धिग् मिथ्या नैतदस्ति] तत्र भवानदत्तं गृह्णीयात् ग्रहीष्यति (वा)। किंवृत्तेऽपि [अमर्षेऽपि]- न मर्षयामि धिग् मिथ्या नैतदस्ति किं तत्रभवान् अदत्तं गृह्णीयात् ग्रहीष्यति ॥१५॥

अव०–[1]अश्रद्धा=असम्भावना । [2]अमर्षोऽक्षमा । सर्वविभक्त्यपवादः । अश्रद्धायामकिंवृत्तोपपदे सति प्रत्ययं दर्शयति वृत्तिकृत्- न श्रद्दधे इत्यादि । [3]सप्तमी । [4]अश्रद्धायां किंवृत्तोपपदे'किंवृत्ते न श्रद्दधे' इत्याद्युदाहरणं दर्शयति । [5]'श्नश्चातः' (४।२।९६) इत्याकारलोपः । [6]अमर्षेऽपि अकिंवृत्तोपपदे उदाहरणम् अमर्षे इत्यादि । अत्रापि सप्तमी कर्त्री निमित्तमस्तीति भूते क्रियातिपतने क्रियातिपत्तिर्वा भवति,-न श्रद्दधे, न मर्षयामि तत्रभवानदत्तमग्रहीष्यत, पक्षे गृह्णीयात् ग्रहीष्यति च । भविष्यति तु क्रियातिपतने नित्यं क्रियातिपत्तिः,- न श्रद्दधे, न मर्षयामि तत्र भवानदत्तमग्रहीष्यत । इयमवचूरिः 'अश्रद्धा'० इति सूत्रान्ते ज्ञेया ॥१५॥

## किंकिलास्त्यर्थयोर्भविष्यन्ती ॥५।४।१६॥

म० वृ०–[1]किंकिलेति समुदायशब्दे [2]अस्त्यर्थे च शब्दे उपपदेऽश्रद्धामर्षयोर्गम्यमानयो-'भविष्यन्ती' स्यात् । सप्तम्यपवादः । न श्रद्दधे, न मर्षयामि किंकिलनाम तत्रभवान् परदारानुपकरिष्यते [3] । [4]अस्ति नाम तत्रभवान् परदारानुपकरिष्यते ॥१६॥

अव०–[1]किंकिलशब्दः किलशब्दवत् कोमलामन्त्रणे वर्त्तते । [2]अस्तिभवतिविद्यतयोऽस्त्यर्थाः शब्दाः । [3]उपकरिष्यते इत्यत्र 'गन्धना०' (३।३।७६) सूत्रेण साहसे आत्मनेपदम् । [4]एवं भवति नाम, विद्यते नाम, न श्रद्दधे, न मर्षयामि । किंकिलेति सूत्रे सप्तमीनिमित्तं नास्तीति क्रियातिप..........(तने क्रियातिपत्तिर्न भवतीत्य)र्थः ॥१६॥

## जातु-यद्-यदा-यदौ सप्तमी ॥५।४।१७॥

म० वृ०–जातु-यद्-यदा-यदि इत्युपपदेषु अश्रद्धामर्षयोः [गम्यमानयोः धातोः परतः] 'सप्तमी' स्यात् । भविष्यन्त्यपवादः । न श्रद्दधे, न क्षमे जातु तत्र भवान् सुरां पिबेत्, एवं यत् यदा यदि भवान् सुरां पिबेत् [यत्तत्रभवान् सुरां पिबेत्, यदा तत्रभवान् सुरां पिबेत्, यदि तत्रभवान् सुरां पिबेत्] ॥ १७ ॥

अव०-'जातुयद्यदा०' इति सूत्रे अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने क्रियातिपत्तिर्वा भवति,-अश्रद्दधे, न मर्षयमि जातु तत्रभवान् सुरामपास्यत्, पक्षे पिबेत्। भविष्यति तु क्रियातिपतने नित्यं क्रियातिपत्तिः,-जातु भवान् सुरामपास्यत्। सूत्रान्ते विशेषोऽयम् ॥१७॥

## क्षेपे च यच्चयत्रे ॥५।४।१८॥

म० वृ०-यच्चयत्रशब्दयोरुपपदयोः क्षेपे [गम्यमाने] अश्रद्धामर्षयोश्च 'सप्तमी' स्यात्। धिग् गर्हामहे, यच्च तत्र भवानस्मानाक्रोशेत, एवं यत्र तत्रभवान् [अस्मान् आक्रोशेत]। न श्रद्दधे, न क्षमे यच्च भवान् परिवादं कथयेत्, एवं यत्र भवान् [परिवादं कथयेत्] ॥१८॥

अव०-अश्रद्धामर्षयोर्भविष्यन्त्याः क्षेपे तु सर्वविभक्तीनामपवादोऽयम् ॥१८॥

## चित्रे ॥५।४।१९॥

म० वृ०-चित्रे [=आश्चर्ये] गम्यमाने यच्चयत्रयोरुपपदयोः 'सप्तमी' स्यात्। चित्रमाश्चर्यम् यच्च तत्रभवानकल्प्यं (=अकलनीयं) सेवेत, एवं यत्र (तत्रभवानकल्प्यं सेवेत) ॥१९॥

## शेषे भविष्यन्त्ययदौ ॥५।४।२०॥

म० वृ०—शेषे=यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रे गम्यमाने 'भविष्यन्ती' स्यात्, चेत् यदिशब्दो न प्रयुज्यते। सर्वविभक्त्यपवादः। चित्रम् अन्धो नाम गिरिमारोक्ष्यति ! मूको नाम धर्मं कथयिष्यति !। शेष इति किम् ? यच्चयत्रयोः पूर्वेण सप्तम्येव। अयदाविति किम् ? [1]चित्रं यदि स भुञ्जीत, (चित्रं यदि) सोऽधीयीत ॥२०॥

अव०-क्षेपे च यच्चयत्रे (५।४।१८) इति सूत्रेऽत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने क्रियातिपत्तिर्वा,- धिग् गर्हामहे, न श्रद्दधे, न क्षमे यच्च यत्र वा तत्रभवान् परिवादानकथयिष्यत्, पक्षे कथयेत्। भविष्यति तु नित्यं प्रयोगः पूर्व एव। एवं 'चित्रे'ऽपि सूत्रे सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने क्रियातिपत्तिर्वा,-चित्रं यच्च यत्र वा तत्रभवानकल्प्यमसेविष्यत, पक्षे सेवेत। भविष्यति तु नित्यं प्रयोगः पूर्व एव। 'शेषे०' इति सूत्रे सप्तमी ............(निमित्तं ना)स्तीति न क्रियातिपत्तिः। [1]'चित्रं यदि स०' इति प्रयोगे न केवलं यदिशब्दप्रयोगः, अश्रद्धार्थोऽप्यस्ति इति 'जातुयद्यदा'० (५।४।१७) इति सूत्रेण सप्तमी भवति ॥२०॥

## सप्तम्युताप्योर्बाढे ॥५।४।२१॥

म० वृ०--बाढेऽर्थे वर्त्तमानयोरुत-[1]अपिशब्दयोरुपपदयोर्धातोः 'सप्तमी' स्यात्। (सर्वविभक्त्यपवादः) उत कुर्यात्, अपि कुर्यात्; बाढं [2]करिष्यतीत्यर्थः। बाढ इति किम् ? उत दण्डः पतिष्यति, अपिधास्यति द्वारम्; (अत्र) प्रश्नः पिधानम् [=ढंकनम्] च यथाक्रमं गम्यते। 'वोतात् प्राग्' (५।४।११) इति निवृत्तम् ॥२१॥

अव०-[1]अपिशब्दः प्रश्ने समुच्चये वा। [2]अन्या अपि विभक्तयो द्रष्टव्याः, संनिहितत्वात् भविष्यन्त्येव दर्शिता। 'सप्तम्युताप्योर्बाढे' इत्यतः सूत्रादारभ्य सप्तमीनिमित्ते सति भूते भविष्यति च काले क्रियातिपतने नित्यं क्रियातिपत्तिर्भवति,- उताकरिष्यत्, अप्यकरिष्यत्। एषाऽवचूरिः "वोतात् प्राग् इति निवृत्त"- मित्यस्याग्रे द्रष्टव्या ॥२१॥

## सम्भावनेऽलमर्थे तदर्थानुक्तौ ॥५।४।२२॥

म० वृ०-अलमोऽर्थः सामर्थ्यम्, तद्विषये सम्भावने=श्रद्धाने गम्यमाने तदर्थस्य=अलमर्थार्थस्य शब्दस्यानुक्तावप्रयोगे 'सप्तमी' स्यात्। (सर्वविभक्त्यापवादः) शक्यसम्भावने,-अपि मासमुपवसेत्, (उपवासं कुर्यात्) अपि पुण्डरीकाध्यायमह्ना(=दिवसेन) अधीयीत[1]। अशक्यसम्भावने,-अपि शिरसा पर्वतं भिन्द्यात्, अपि समुद्रं दोर्भ्यां तरेत्। अलमर्थे इति किम् ? [2]निदेशस्थायी मे मैत्रः प्रायेण यास्यति। तदर्थानुक्ताविति किम् ? वसति चेत् सुराष्ट्रेषु वन्दिष्यतेऽलमुज्जयन्तम्, शक्तश्चैत्रो धर्मं करिष्यति।

'सम्भावने०' इति सूत्रे अत्रापि सप्तमीनिमित्तमस्तीति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिः इति पाठो ज्ञातव्यः, प्रयोगोऽयम्,-अपि शिरसा पर्वतमभेत्स्यत् ॥२२॥

अव०–[1]एवं स्कन्दकोद्देशं यामेन =प्रहरमध्ये अधीयीत। [2]निदेशे= आज्ञायां तिष्ठतीति 'ग्रहादिभ्यो णिन्' (५।१।५३) ॥२२॥

## अयदि श्रद्धाधातौ नवा ॥५।४।२३॥

म० वृ०–श्रद्धार्थे धातावुपपदेऽलमर्थविषये सम्भावने गम्यमाने 'सप्तमी [1]नवा' स्यात्, अयदिः=यच्छब्दश्चेन्न प्रयुज्यते[2]। श्रद्दधे, सम्भावयामि भुञ्जीत भवान्; पक्षे यथाप्राप्तम्,-भोक्ष्यते, अभुक्त [ अद्यतनी ] अभुङ्क्त [ ह्यस्तनी ] भवान्। अयदीति किम्? सम्भावयामि यद् भुञ्जीत भवान्। श्रद्धाधाताविति किम्? अपि शिरसा पर्वतं भिन्द्यात्। उभयत्र पूर्वेण सप्तमी ॥२३॥

अव०–[1]पूर्वेण नित्यं प्राप्ते विकल्पोऽयम्। [2]क्रियाविशेषणत्वेन चेत् यच्छब्दः प्रयुज्यते तदा न भवति सप्तमी, हेत्वर्थे भवत्येव। अयदिश्रद्धा० इति सूत्रप्रान्ते अत्रापि सप्तमीनिमित्तमस्तीत्यादिपाठो द्रष्टव्यः। प्रयोगोऽयम्,–सम्भावयामि नाभोक्ष्यत भवान् ॥२३॥

## सतीच्छार्थात् ॥५।४।२४॥

म० वृ०–सति=वर्त्तमानेऽर्थे वर्त्तमानादिच्छार्थाद्धातोः 'सप्तमी वा' स्यात्, पक्षे वर्त्तमानैव। इच्छेत्, इच्छति; [वशक् कान्तौ–] उश्यात्, वष्टि; कामयेत, कामयते; वाञ्छेत्, वाञ्छति ॥२४॥

अव०–'सतीच्छार्थात्' इति सूत्रे विशेषोऽयम्- 'क्षेपेऽपिजात्वोर्वर्त्तमाना' (५।४।१२) इत्यादिसूत्रेष्वपि इच्छादिप्रयोगेषु सत्सु 'सतीच्छार्थात्' इति सूत्रेण परत्वात् विकल्पेन सप्तमी भवति; पक्षे वर्त्तमाना;तथाहि– अपि संयतः सन्नकल्प्यं सेवितुमिच्छेत्, अपि संयतोऽकल्प्यं सेवितुमिच्छति, धिग् गर्हामहे। तथा भूतभविष्यतोरभावात् सत्यपि सप्तमीनिमित्ते सत्यपि च (क्रियातिपतने) क्रियातिपत्तिर्न भवति। इयमवचूरि 'सतीच्छे'-ति सूत्रान्ते ज्ञातव्या ॥२४॥

## वर्त्स्यति हेतुफले ॥५।४।२५॥

म० वृ०–हेतुः=कारणम्। फलं=कार्यम्। हेतुभूते फलभूते च वर्त्स्यत्यर्थे वर्तमानाद्धातोः 'सप्तमी वा' स्यात्। पक्षे भविष्यन्ती। यदि गुरूनुपासीत शास्त्रान्तं गच्छेत्; यदि गुरूनुपासिष्यते शास्त्रान्तं गमिष्यते। अत्र गुरूपासनं हेतुः, शास्त्रान्तगमनं फलम् ॥२५॥

अव०–'वर्त्स्यति०' इति सूत्रेऽत्रापि सप्तमीनिमित्तमस्तीति भविष्यति क्रियातिपतने नित्यं क्रियातिपत्तिः– दक्षिणेन चेदयास्यत्, न शकटं पर्याभविष्यत्। तथा कथम्

"अमङ्क्ष्यद् वसुधा तोये, च्युतशैलेन्द्रबन्धना;
नारायण इव श्रीमान्, यदि त्वं नाधरिष्यथाः" ।१।

इति? वर्त्स्यत्येवायं प्रयोगः ॥२५॥

## कामोक्तावकच्चिति ॥५।४।२६॥

म० वृ०–नवेति निवृत्तम्। [1]कामः=इच्छा, तस्योक्तिः=प्रवेदनम्, तस्यां गम्यमानायां सप्तमी स्यात्, अकच्चिति=यदि कच्चिच्छब्दो न प्रयुज्यते। कामो मे भुञ्जीत भवान्, इच्छा मे अधीयीत भवान्। अकच्चितीति किम्? कच्चिज्जीवति मे माता ।२६।

अव०–[1]काम इच्छा वाञ्छा श्रद्धा अभिलाष इति कामार्थाः शब्दाः। कामो मे भुञ्जीत इत्याद्युदाहरणेषु अर्थकामनमात्रकारणे कामेच्छादिशब्दाः प्रयुक्ताः। भुञ्जीत भवान् अधीयीत भवान् इति परिण (?) उदाहरणानि सम्यक् ज्ञेया (नि), अन्यथा उत्तरसूत्रेण पञ्चमी स्यात्, तस्मादत्र सूत्रे कामोक्तौ गम्यमानायामे·······(व सप्तमी विभक्तिः) भवति, न प्रयुक्तायां कामोक्तौ। कामप्रवेदने विभक्त्यन्तरप्रयोगादर्शनात् 'वेति निवृत्तम्' इति ज्ञापितम्। एवं श्रद्धा मे कुर्वीत भवान्, अभिलाषो मे वदेत् (भवान्)।

'कामोक्ता०' इति सूत्रेऽत्रापि सप्तमीनिमित्तमस्तीति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिः,-कामो मेऽभोक्ष्यत भवान् ॥२६॥

## इच्छार्थे सप्तमीपञ्चम्यौ ॥५।४।२७॥

म० वृ०–[1]इच्छार्थे धातावुपपदे कामोक्तौ गम्यायां 'सप्तमीपञ्चम्यौ' भवतः । इच्छामि [2]भुञ्जीत भवान्, इच्छामि भुङ्क्तां भवान् [3]॥२७॥

अव०–'इच्छार्थे सप्तमी०' इति सूत्रे विशेषो लिख्यते,-अत्र सत्यपि सप्तमीनिमित्ते इच्छार्थे उपपदे कामोक्तौ सत्यां क्रियातिपतनस्य असा········ ···········[मर्थ्येनासम्भवात् क्रिया] तिपत्तिर्न भवति । केचित्तु "सप्तम्युतोर्वाढे" (५।४।२१) इत्यत आरभ्य यत्र स्थाने केवलायाः ···· सप्तम्या निमित्तमस्ति, न विभक्त्यन्तरसहि( तायास्तत्रैव क्रियातिपतने क्रियातिपत्तिर्भवति इति मन्यन्ते) । [1]इच्छामि कामये प्रार्थये अभिलषामि वश्मि इति इच्छार्था धातवः । [2]सप्तमी । [3]त्वमधीयीत, अधीताम् ॥२७॥

## विधि-निमन्त्रणा-ऽऽमन्त्रणा-ऽधीष्ट-सम्प्रश्न-प्रार्थने ॥५।४।२८॥

म० वृ०–विध्यादिविशिष्टेषु कर्तृकर्मभावेषु प्रत्ययार्थेषु [ धातोः परतः ] 'सप्तमीपञ्चम्यौ' भवतः । [ सर्वप्रत्ययापवादौ ] । विधौ,-कटं कुर्यात् करोतु भवान् । निमन्त्रणे,- द्विसन्ध्यमावश्यकं कुर्यात् करोतु । आमन्त्रणे– इहासीत इहास्तां भवान् [ यदि रोचते ] । अधीष्टे,-व्रतं रक्षेत् रक्षतु भवान् । सम्प्रश्ने,-किं नु खलु व्याकरणमधीयीय अध्ययै । प्रार्थने[=याञ्चायाम् ],-प्रार्थना मे सिद्धान्तमधीयीय अध्ययै ॥२८॥

अव०–[1]विधिरप्राप्ते नियोगः, क्रियायां प्रेरणा इत्यभिप्रायः । अज्ञातज्ञापनम्, इदं कर्त्तव्यम् इदं न कर्त्तव्यमित्यादिकल्पनामित्येके प्राहुः । ईदृशे विधौ– कटं कुर्यात्, कटं करोतु, प्राणिनो न हिंस्यात्, न हिनस्तु भवान्, उदाहरणानि चत्वारि । [2]अथ प्रेरणायामेव यस्यां प्रत्याख्याने प्रतिषेधे प्रत्यवायो····( ऽस्ति ) तन्निमन्त्रणम्, इच्छामन्तरेणापि नियोगतः कर्त्तव्य इत्यर्थः । अत्र निमन्त्रणे द्विसन्ध्यमाव०, द्वे सन्ध्ये यत्र अथवा द्वयोः सन्ध्ययोः समाहारः । [3]यत्र प्रेरणायामेव प्रत्याख्याने कामचारस्तदामन्त्रणम्, अत्रामन्त्रणे इहासीत, इहास्तां भवान्; इह शयीत, इह शेतां भवान् इत्यस्याग्रे यदि रोचते तदा इहासीत इति वाक्यसम्बन्धः । [4]तथा प्रेरणैव सत्कारपूर्विकाधीष्टम्= अध्येषणम्, व्रतं रक्षेत्, रक्षतु; एवं तत्त्वज्ञानं नः प्रसीदेयुः प्रसीदन्तु गुरुपादाः; तत्त्वज्ञानं कर्मतापन्नमस्मभ्यमस्माकं वा गुरुपादाः प्रसादपूर्वकं दद्युरित्यर्थः । [5]सम्प्रश्नः, सम्प्रधारणा, निरूपणा, विचारणा, विमर्शः इत्येकार्थाः इति यावत् ॥२८॥

## प्रैषा-ऽनुज्ञा-ऽवसरे कृत्य-पञ्चम्यौ ॥५।४।२९॥

म० वृ०–प्रैषादिविशिष्टे कर्त्रादावर्थे धातोः परतः 'कृत्यप्रत्ययाः पञ्चमी च' स्यात् । प्रैषे,-त्वया खलु कटः कार्यः, कर्त्तव्यः, करणीयः, कृत्यः; भवान् कटं करोतु, भवान् हि प्रेषितोऽनुज्ञातः, भवतोऽवसरः कटकरणे । यद्यपि कृत्यप्रत्ययाः सामान्येन भावकर्मणोर्विहितास्तथापि सर्वप्रत्ययापवादभूतया पञ्चम्या बाध्येरन्निति पुनर्विधीयन्ते ॥२९॥

अव०–[1]न्यत्कार-[ पराभव ]पूर्विका प्रेरणैव प्रैषः उच्यते । [2]अनुज्ञा कामचारः । [3]अवसरः प्राप्तकालता । त्रिष्वपि अर्थेषु त्वया खलु कटः कार्यः कर्त्तव्यः करणीयः कृत्यः, भवान् कटं करोतु इति एकमेव उदाहरणं सम्भाव्यते, भवान् हि प्रेषितोऽनुज्ञातः, भवतोऽवसरः कटकरणे इत्यर्थदर्शनात् ॥२९॥

## सप्तमी चोर्ध्वमौहूर्त्तिके ॥५।४।३०॥

म० वृ०–प्रैषादिषु गम्यमानेषु ऊर्ध्वमौहूर्त्तिकेऽर्थे 'सप्तमी पञ्चमी कृत्याश्च' भवन्ति ।

ऊर्ध्वं मुहूर्त्तात् कटं कुर्यात् भवान्, करोतु; कार्यः, कृत्यः, कर्त्तव्यः, करणीयः कटस्त्वया ॥३०॥

अव०--मुहूर्त्तादूर्ध्वम्=ऊर्ध्वमुहूर्त्तम्, ऊर्ध्वमुहूर्त्ताद् भवः=ऊर्ध्वमौहूर्त्तिकः,'अध्यात्मादिभ्य इकण्' (५।३।७८) इत्यनेन इकण्, अस्मादेव निर्देशादुत्तरपदवृद्धिः। ऊर्ध्वं मुहूर्त्तात् कटं कुर्यात् इत्याद्युदाहरणप्रान्ते भवान् प्रेषितोऽनुज्ञातः, भवतोऽवसरः कटकरणे इत्यक्षराणि द्रष्टव्यानि ॥३०॥

## स्मे पञ्चमी ॥५।४।३१॥

म० वृ०--स्मे उपपदे प्रैषादिषु गम्येषु ऊर्ध्वमौहूर्त्तिकेऽर्थे 'पञ्चमी' स्यात्। [स्मशब्दः स्पष्टार्थः] कृत्यानां सप्तम्याश्चापवादः। ऊर्ध्वं मुहूर्त्ताद् भवान् कटं करोतु स्म ॥३१॥

## अधीष्टौ ॥५।४।३२॥

म० वृ०--अधीष्टावध्येषणायां गम्यमानायां स्मे उपपदे 'पञ्चमी' स्यात्। सप्तम्यपवादः। अङ्ग स्म हे विद्वन् अणुव्रतानि रक्ष, शिक्षाः प्रतिपद्यस्व ॥३२॥

अव०--'अधीष्टौ' इत्यत्र सूत्रे ऊर्ध्वमौहूर्त्तिक इति निवृत्तम्, पृथग्योगात्; 'स्मे पञ्चमी' इति सूत्रे 'स्मेऽधीष्टौ च पञ्चमी' इति सूत्राऽकरणात् ॥३२॥

## काल-वेला-समये तुम् वाऽवसरे ॥५।४।३३॥

म० वृ०--कालवेलासमयेषूपपदेषु अवसरे गम्यमाने धातो-'स्तुम्' प्रत्ययो वा स्यात्। ['प्रैषानुज्ञा'० (५।४।२९) इति प्राप्तविकल्पोऽयम्] कालो भोक्तुम्, वेला भोक्तुम्, समयो भोक्तुम्; पक्षे-कालो भोक्तव्यस्य[1]। अवसर इति किम्? कालः पचति भूतानि, कालोऽत्र द्रव्यं नत्ववसरः ॥३३॥

अव०--[1]'कालो भोक्तव्यस्य' इत्यत्र 'प्रैषानुज्ञावसरे०' इति सूत्रेण तव्यप्रत्ययः कार्यः, भुज्यतामिति भोक्तव्यमिति वाक्यं कर्त्तव्यम्। तथा ऊर्ध्वं मुहूर्त्तात् कालो भोक्तुम्, ऊर्ध्वं मुहूर्त्ताद् भोक्तुं स्म कालः, अङ्ग स्म राजन्! भोक्तुं काल इत्येतेषु (त्रिषूदाहरणेषु) परत्वात् तुमेव भवति। ननु सूत्रे तुम् वा भवतीत्युक्तं तत्कथं परत्वात्तुमेव भवतीत्युक्तम्? उच्यते, तुमेवेत्यत्र एवकारः स्वयोगव्यवस्थापने, ततः कोऽर्थः? विकल्पेन तुमेव भवति, नानडादयः; 'सप्तमी चोर्ध्व०' (५।४।३०) 'स्मे पञ्चमी' 'अधीष्टौ' इति सूत्रत्रयस्यात्र प्राप्तिरस्ति, प्राप्तौ सत्यामपि परत्वात्तुमेव भवति इत्युक्तम्। न सप्तमीपञ्चम्यौ प्रवर्त्तेते (?) ॥३३॥

## सप्तमी यदि ॥५।४।३४॥

म० वृ०--यदि=यच्छब्दप्रयोगे सति, कालादिषूपपदेषु 'सप्तमी' स्यात्। तुमोऽपवादः। कालो यदधीयीत भवान्, वेला यद् भुञ्जीत, समयो यच्छयीत भवान्। बहुलाधिकारात् कालो यदध्ययनस्य, वेला यद् भोजनस्य, समयो यच्छयनस्येत्याद्यपि ॥ ३४ ॥

## शक्तार्हे कृत्याश्च ॥५।४।३५॥

म० वृ०--शक्ते अर्हे च कर्त्तरि गम्यमाने 'सप्तमी कृत्याश्च' भवन्ति। शक्ते,-त्वया खलु भारो वाह्यः, वोढव्यः,[1] उह्येत[2], वहेत् भारं भवान्; भवान् हि शक्त इत्यर्थः। अर्हे,- भवता खलु कन्या वाह्या, वोढव्या, भवान् खलु कन्यां वहेत्, भवानेतदर्हति ॥ ३५ ॥

अव०--सप्तम्या बाधो मा भूदिति कृत्यग्रहणं कृतम्। सर्वत्र उह्यते इति वाक्यं कर्त्तव्यम्। [1](एवम्) वहनीयः। [2]'उह्येत', अत्र सप्तमी-ईत, क्य, यजादिवचेः०' (४।१।७९।इति) य्वृत् ॥३५॥

## णिन् चावश्यकाधमर्ण्ये ॥५।४।३६॥

म० वृ०-[1]आवश्यके [2]आधमर्ण्ये च गम्यमाने कर्त्तरि वाच्ये धातो-'र्णिन् कृत्याश्च' स्युः। अवश्यं करोतीति कारी, [3]अवश्यंकारी। अवश्यशब्दप्रयोगे तु अवश्यकारी। अकारान्तोऽपि हि अनव्ययमवश्यशब्दोऽस्ति,- अवश्यं भव्यश्चैत्रः। आधमर्ण्ये,- शतं दायी,[4] सहस्रं दायी; कारी मे शक-

टमसि, गेयो गाथानाम् । णिना बाधो मा भूदिति कृत्यविधानम् । कृत्त्वाच्च कर्त्तरि णिनो विधानात् कृत्यानामपि [४]कर्त्तर्येव विधानम् । भावकर्मणोस्तु सामान्येन विधानात् सिद्धा एव, [५]बाधकाभावात् ॥ ३६ ॥

अव०–[१]अवश्यं भावः= आवश्यकम् । [२]ऋणेऽधमोऽधमर्णस्तस्य भाव आधमर्ण्यम् । [३]यदा तु अवश्यमूशब्दस्यापि उदाहरणे प्रयोगः (तदा) उभाभ्यामपि द्योतनात् अवश्यंका... (रीत्यत्र मयूरव्यं)– सकादित्वात्समासः । [४]दास्यतीति दायी । [५]ये पूर्वं "भव्यगेय०"इत्यादिषु कर्त्तरि विहिताः प्रत्ययाः त एवेह ज्ञायन्ते । अथवा भावकर्मणोरपि ये प्रत्यया विहितास्तेऽपि कर्त्तरि भवन्ति । [६]"बाधकाभावात्", कोऽर्थः ? कर्त्तर्येव णिना बाध्यन्ते, न भावकर्मणोः, भावकर्मणोस्तु स्वभावात् कृत्यानां विधेयत्वात् न तत्र कस्यापि बाधाऽस्ति ॥३६॥

## अर्हे तृच् ॥५।४।३७॥

म० वृ०–अर्हे कर्त्तरि वाच्ये 'तृच्' स्यात् । भवान् कन्याया वोढा ॥३७॥

अव०–'अर्हे तृच्' इत्यत्र सप्तम्याः उपलक्षणत्वात् कर्तृविहितैः कृत्यैरपि बाधा मा भूत् इति अर्हेऽर्थे तृच् विधानम ॥३७॥

## आशिष्याशीःपञ्चम्यौ ॥५।४।३८॥

म० वृ०–आशीर्विशिष्टेऽर्थे वर्त्तमानाद्धातो-'राशीःपञ्चम्यौ' स्याताम् । जीयात्, जीयासुः [आशीः]; जयतात्, जयन्तु [पञ्चमी]; ॥३८॥

## माङ्यद्यतनी ॥५।४।३९॥

म० वृ०–माङि उपपदे धातो–'रद्यतनी' स्यात् । [सर्वविभक्त्यपवादः] मा कार्षीत् पापम् । कथं मा भवतु तस्य पापं मा भविष्यति ? असाधुरेवायं प्रयोगः, [१]केचिदाहुरङित्तो [२]माशब्दस्यायं प्रयोगः ॥३९॥

अव०–[१]स्वमतेऽपि अङित्माशब्दप्रयोगोऽस्ति, किन्तु क्रियायोगेऽङित्माशब्दप्रयोगो नेष्यते इत्यर्थः । [२]केवलो माशब्दोऽत्र, न माङ् इति यावत् ॥ ३९ ॥

## सस्मे ह्यस्तनी च ॥५।४।४०॥

म० वृ०–स्मसहिते माङि उपपदे ह्यस्तनी चकारादद्यतनी च भवति । मा स्म करोत्, मा स्म कार्षीत्; मा चैत्र स्म हरः परद्रव्यम्, मा चैत्र स्म हार्षीः ॥४०॥

## धातोः सम्बन्धे प्रत्ययाः ॥५।४।४१॥

म० वृ०–धात्वर्थानां सम्बन्धे विशेषणविशेष्यभावे सति 'अयथाकालमपि प्रत्यया साधवो' भवन्ति । विश्वदृश्वाऽस्य पुत्रो भविता, अत्र [दृश्वा इत्यत्र] भूतकालप्रत्ययो भवितेति भविष्यत्कालेन प्रत्ययेनाभिसम्बध्यमानः साधुर्भवति । भाविकृत्यमासीत्, अत्र तु भावीति भविष्यत्कालः प्रत्यय आसीदिति भूतप्रत्ययेनेन सह सम्बध्यमानः साधुः स्यात् । तथा त्याद्यन्तमपि यदाऽपरं त्याद्यन्तं प्रति विशेषणत्वेनोपादीयते [= गृह्यते ] तदा तस्यापि समुदायवाक्यार्थापेक्षया कालान्यत्वं भवत्येव । यथा– [१]'साटोपमुर्वीमनिशं नदन्तो' इत्यादि, अत्र-प्लावयिष्यन्तीति भविष्यदर्थस्य ददर्शेति भूतानुगमः । [२]तथा गोमान् आसीत्, गोमान् भविता; अस्तिविवक्षायां हि मतुरुक्तः, स कालान्तरे न स्यात् ॥४१॥

अव०–[१]"साटोपमुर्वीमनिशं नदन्तो,
यैः प्लावयिष्यन्ति समन्ततोऽमी ;
तान्येकदेशान्निभृतं पयोधेः,
सोऽम्भांसि मेघान् पिबतो ददर्श" ॥१॥

इति माघे । [२]'धातोः सम्बन्धे प्रत्ययाः' अत्र सूत्रे प्रत्यया इति बहुवचनादधात्वधिकारविहिता अपि प्रत्ययास्तद्धिता धातुसम्बन्धे सति कालभेदे साधवो भवन्ति । तथाहि– गोमानासीत्, गोमान् भविता इति ॥ ४१ ॥

## [१]भृशा-ऽऽभीक्ष्ण्ये [२]हिस्वौ यथाविधि तध्वमौ च तद्युष्मदि ।।५।४।४२।।

म० वृ०—भृशाभीक्ष्ण्यविशिष्टे सर्वकालेऽर्थे वर्त्तमानाद्धातोः सर्वविभक्तिसर्ववचनविषये [३] हिस्वौ पञ्चमीसम्बन्धिनौ भवतः, यथाविधि धातोः सम्बन्धे, यत एव धातोर्यस्मिन्नेव कारके हिस्वौ क्रियेते तस्यैव धातोस्तत्कारकविशिष्टस्यैव सम्बन्धेऽनुप्रयोगे सति, तथा तध्वमौ हिस्वसाहचर्यात् पञ्चम्या एव, तयोस्तध्वमोः सम्बन्धी बहुत्वविशिष्टो युष्मद् (=तद्युष्मद्), तस्मिन् तद्युस्मदि वाच्ये, [४] चकारात् हिस्वौ च भवतः, यथाविधि धातोः सम्बन्धे। लुनीहि लुनीहि[५] [६]इत्येवायं लुनाति। [७]अनुप्रयोगात्कालवचनभेदोऽभिव्यज्यते। लुनीहि लुनीहि इत्येवेमौ लुनीतः । इमे लुनन्ति। त्वं लुनासि, युवां लुनीथः, यूयं लुनीथ। एवं लुनीहि लुनीहि इत्येवायमलावीत्, लुलाव लविष्यति। लुनीहि लुनीहि इत्येवायं लुनीयात्, लुनातु। एवमधीष्व अधीष्व इत्येवायमधीते, इमावधीयाते, [८]'इमेऽधीयते' इत्यादि । एवं भावकर्मणोरपि। हिस्वौ,-शय्यस्व शय्यस्व इत्येव शय्यते, अशायि, शायिष्यते भवता । लूयस्व लूयस्व इत्येव लूयते, अलावि,लविष्यते केदारः। तध्वमौ च तद्युस्मदि चकारात् हिस्वौ च,-लुनीत लुनीतेत्येव यूयं लुनीथ,लुनीहि लुनीहि इत्येव यूयं लुनीथ;अधीध्वमधीध्वमित्येव यूयमधीध्वे,अधीष्व अधीष्वेत्येव यूयमधीध्वे इत्यादि[६]। यथाविधीति किम ? लुनीहि लुनीहि इत्येवायं लुनाति। छिनत्ति लूयते वा (इति धातोः सम्बन्धे मा भूत्)। एवमधीष्व अधीष्व इत्येवायमधीते। पठति अधीयते वा इति धातोः सम्बन्धे मा भूत्।४२।

---

अव०—[१]गुणक्रियाणामधिश्रयणादीनां क्रियान्तरैरव्यवहितानां साकल्यं फलातिरेको वा भृशत्वमुच्यते। [२]तथा प्रधानक्रियाया विक्लेदादेः क्रियान्तरैरव्यवहितायाः पौनःपुन्यमाभीक्ष्ण्यमुच्यते । [३]'सर्ववचनविषये' इति कोऽर्थः? हिस्वौ वचनरूपौ इति सर्ववचनानां बाधकौ। हिः परस्मैपदमिति परस्मैपदिभ्य एव धातुभ्यः (भवति),स्व आत्मनेपदमिति आत्मनेपदिभ्य एव धातुभ्यो भवति स्वः। [४]भवत इति सम्बन्धः । [५]लुनीहि लुनीहीत्यादौ भृशाभीक्ष्ण्ये द्विर्वचनं विधीयते। ननु भृशाभीक्ष्ण्ययोर्यङपि क्रियमाणोऽस्ति, यङि सति द्विर्वचनं क्रियते,(न तु भृशाभीक्ष्ण्ये,) इह तु भृशाभीक्ष्ण्ये द्विर्वचनं क्रियमाणमस्ति; नन्वत्र किं कारणम्? उच्यते, यङ् स्वार्थिकत्वात् प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये द्योतयितुं समर्थः इति भृशाभीक्ष्ण्याभिव्यक्तये यङ् द्विर्वचनं नापेक्षते। हिस्वादयस्तु कर्तृकर्मभावार्थत्वेन अस्वार्थिकत्वात् प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये द्योतयितुं न समर्थाः इति तदभिव्यक्तये द्विर्वचनमपेक्षन्ते इति हेतोरत्र भृशाभीक्ष्ण्ये द्विर्वचन भवतीत्यर्थः। इयमवचूरिः 'भृशाभीक्ष्ण्ये०' सूत्रे लुनीहीति प्रस्ता....... (वेऽवगन्तव्या)। [६]इतिशब्दः सम्बन्धोपादानार्थः, अन्यथाऽसत्त्वभूतयोराख्यातपदयोः परस्परेण सम्बन्धो नावगम्यते। 'भृशमयं मैत्रो लुनाति' इति प्रयोगे वक्तव्ये 'भृशाभीक्ष्ण्ये हिस्वौ' इति सूत्रेण 'लुनीहि लुनीहि इत्येवायं लुनाति' इति प्रयोगोऽपूर्वरचनया निष्पाद्यते इति परमार्थः सर्वोदाहरणानाम्। [७]अनुप्रयोगेण कालवचनभेदोऽभिव्यज्यते। [८]'इमेऽधीयते' इत्यस्याग्रे आदिशब्दात् इमे प्रयोगा द्रष्टव्याः,-तथाहि अधीष्व अधीष्व इत्येव त्वमधीषे, युवामधीयाथे, यूयमधीध्वे अधीष्व अधीष्व इत्येवाहमधीये, आवामधीवहे, वयमधीमहे। अथ कालभेदे,-अधीष्व अधीष्व इत्येवायमध्यगीष्ट। अधीष्व अधीष्व इत्येव अयमध्यैत। अधीष्व अधीष्व (इत्येवायम्) अधिजगे। अधीष्व अधीष्व (इत्येव) अयमध्येष्यते, अध्येता। अधीष्व अधीष्व इत्येवायम् अधीयीत। अधीष्व अधीष्व (इत्येव) अयमधीताम्। अधीष्व अधीष्व (इत्येव) अयमध्येषीष्ट। [९]आदिशब्दात् लुनीत लुनीत इत्येव यूयमलाविष्ट। लुनीहि लुनीहि (इत्येव) यूयमलाविष्ट। अधीष्व अधीष्व इत्येव यूयमध्यैढ्वम्। अधीष्व अधीष्व इत्येव यूयमध्यगीढ्वम्। एवं ह्यस्तन्यादिष्वपि उदाहरणम्।।४२।।

## [1]प्रचये नवा सामान्यार्थस्य ॥५।४।४३॥

म० वृ०–प्रचये=समुच्चये गम्यमाने सामान्यार्थस्य धातोः सम्बन्धे सति धातोः परौ "हिस्वौ तध्वमौ च तद्युस्मदि वा" स्याताम्। [2]व्रीहीन् वप, लुनीहि, पुनीहि इत्येव यतते, चेष्टते, समीहते; यत्यते, चेष्टयते, समीह्यते : पक्षे व्रीहीन् वपति, लुनाति, पुनातीत्येव यतते, यत्यते। [3]देवदत्तोऽद्धि, गुरुदत्तोऽद्धि इत्येव भुञ्जते, भुज्यते; पक्षे देवदत्तोऽत्ति, गुरुदत्तोऽत्ति इत्येव भुञ्जते, भुज्यते । ग्राममट, वनमट, गिरिमटेत्येवाटसि, घटते ; अटयते, घटयते[4]; पक्षे ग्राममटति० [4]इत्येव अटति, घटते; अट्यते, घट्यते । एवं सूत्रमधीष्व, भाष्यमधीष्व[5] इत्येवाधीते, पठति; अधीयते, पठयते; पक्षे सूत्रमधीते, भाष्यमधीते निर्युक्तिमधीते इत्येवाधीते, पठति ; अधीयते, पठ्यते। तध्वमौ च तद्युस्मदि,– व्रीहीन् वपत, लुनीत पुनीत इत्येव यतध्वे, चेष्टध्वे, समीहध्वे; व्रीहीन वप, लुनीहि, पुनीहीत्येव यतध्वे,[7] पक्षे व्रीहीन् वपथ, लुनीथ, पुनीथ इत्येव यतध्वे[8] इत्यादि[9] । सामान्यार्थस्येति किम् ? व्रीहीन् वप, लुनीहि इत्येव वपति, लुनाति इति मा भूत् ॥४३॥

---

अव०–[1]स्वतः,कोर्थः ? स्वरूपेण, साधनभेदेन (वा) भिद्यमानस्य एकस्मिन् वाक्येऽनेकस्य धात्वर्थस्य न्यसनं प्रचयः, तस्मिन्नीदृशे प्रचये गम्यमाने । 'प्रचये नवा०' इति सूत्रे भृशाभीक्ष्ण्ये यथाविधि चेति नानुवर्त्तते, प्रचये इति भणनात् , सामान्यार्थस्येति भणनाच्च । [2]स्वतो भिद्यमानस्योदाहरणं दर्शयति व्रीहीन् वपेत्यादि । [3]कारकभेदेन दर्शयति । एवं जिनदत्तोऽद्धि, जिनदत्तोऽत्ति । [4]'अट्यते घट्यते' इत्य……… (स्याग्रे सक्तून्) पिब, धानाः खाद, ओदनं भुङ्क्ष्वेत्येवाभ्यवहरति अभ्यवह्रियते: पक्षे……………… (सक्तून् पिबति, धानाः खाद)ति इत्यादि स्वतः कारकभेदयोरुदाहरणं ज्ञातव्यम् । इति उ………(?) । [4]वनमटति, गिरिमटति । [5](एवम्) निर्युक्तिमधीष्व । [7](एवम्) चेष्टध्वे, समीहध्वे । [8](एवम्) चेष्टध्वे, समीहध्वे । [9]'प्रचये०' इति सूत्रे आदिशब्दात् ग्राममटत, वनमटत, गिरिमटते………(त्ये)वाटथ, घटध्वे………(पक्षे–) ग्राममटथ, वनमटथ, (गिरिमटथ) इत्येवा ………(टथ,) घटध्वे । सूत्रमधीध्वम् , निर्युक्तिमधीध्वम् , भाष्यमधीध्वमित्ये– ………(वाधी)ध्वे, पठथ । सूत्रमधीष्व, निर्युक्ति………मधीष्व, भा)ष्यमधीष्व इत्येवाधीध्वे, पठथ। पक्षे सूत्रमधीध्वे निर्युक्तिमधीध्वे इत्येवाधीध्वे, पठथ ॥ ४३ ॥

## निषेधेऽलंखल्वोः क्त्वा ॥५।४।४४॥

म० वृ०–निषेधे वर्त्तमानयोरलंखलुशब्दयोरुपपदयोर्धातोः 'क्त्वा वा' स्यात्। अलं कृत्वा, खलु कृत्वा, न कर्त्तव्यमित्यर्थः । पक्षे[1] यथाप्राप्तम्– अलं रोदनेन, अलं रुदितेन, [2]अलं रुदितम् । निषेधे इति किम् ? [3]अलङ्कारः [4]स्त्रियाः, सिद्धं खलु ॥४४॥

---

अव०–अलम् खलु (इत्येतयोः) अग्रे प्रथमासिः, प्रधानत्वात् । अलं कृत्वा, खलु कृत्वा इत्यत्र खलु विधाय खलु कृत्वा इति धात्वन्तरेण वाक्यं कर्त्तव्यम् । [1]तथा पक्षे उदाहरणेषु अलं रोदनेनेत्यादि उदाहरणत्रयम्। क्त्वान्तयोगे एव खलु शब्दो निषेधवाची भवति इति पक्षोदाहरणेषु खलुशब्दो नोदाहृतः । [2]'अलं रुदितम्', कोऽर्थः ? निषिद्धम् । [3]'अलङ्कारः', अत्र घञ् । [4]'स्त्रिया' इत्यत्र कर्मणि षष्ठी ॥ ४४ ॥

## परा-ऽवरे ॥५।४।४५॥

म० वृ०–परे अवरे च गम्यमाने धातोः 'क्त्वा-वा' स्यात्। परे,– [1]अतिक्रम्य नदीं पर्वतः । अवरे,- अप्राप्य नदीं पर्वतः, नद्या अर्वाक् पर्वत इत्यर्थः । पक्षे– नद्यतिक्रमेण[2] पर्वतः, नद्यप्राप्त्या पर्वतः ॥४५॥

---

अव०–[1]'अतिक्रम्य नदीं पर्वतः', अत्र 'अतिक्रमणेन= अतिक्रम्य' इति वाक्यम्, नद्याः परं पर्वत इति उदाहरणार्थः ; एवं बाल्यमतिक्रम्य यौव-

नम् । [२]अतिक्रम्यतेऽनेन (इति) 'व्यञ्जनाद् घञ्' (५।३।१३२), 'मोऽकमियमिरमिनमि०' (४।३।५५) इत्यादिना वृद्धिनिषेधः, अतिक्रम इति सिद्धम् ।।४५।।

## निमील्यादिमेङस्तुल्यकर्तृके[१] ।।५।४।४६।।

म० वृ०—तुल्यकर्तृकेऽर्थे वर्त्तमानेभ्यो निमील्यादिभ्यो मेङश्च धातोः 'क्त्वा वा'स्यात् । अक्षिणी निमील्य हसति. मुखं व्यादाय [=प्रसार्य] स्वपिति, पादौ प्रसार्य पतति, दन्तान् प्रकाश्य जल्पति। मेङ्,— अपमाय, अपमित्य याचते; अपमातुम्, प्रतिदातुं याचते इत्यर्थः, [२]पूर्वं ह्यसौ याचते पश्चादपमयते इति भावः । तुल्यकर्तृके इति किम् ? चैत्रस्याक्षिनिमीलने मैत्रो हसति[३] ।।४६।।

---

अव०—[१]तुल्यो धात्वर्थान्तरेण कर्त्ता यस्य स तुल्यकर्तृकस्तस्मिन् । निमील्यादीनां समानकालार्थः मेङ् स्तु परकालार्थ आरम्भः । तथास्वभावान्मेङ् धातुर्व्यतिहारे एव वर्त्तते, अन्ये.......... (धातवो व्यतिपूर्वा व्यतिहारे वर्तन्ते) । निमील्यादिभ्यो नित्यं क्त्वा, मेङः परतो विकल्पेन क्त्वा,- अपमाय, अपमित्य: पक्षे— याचित्वाऽपमयते, अपमातुं याचते इति सूत्रार्थे उदाहरणावली द्रष्टव्या । 'मेङो वा मित्' (४।३।८८) इति विकल्पेन मित् । [२]याचेः परतः पूर्वकालेऽपि सति क्त्वा न भवति, मेङः परतः परकालभाविन्या क्त्वया याचिप्राकालस्योक्तत्वात् । इयमवचूरिः पूर्वं ह्यसौ याचते पश्चादपमयते इत्यस्याग्रे ज्ञातव्या । [३]एवं चैत्रस्यापमाने मैत्रो याचते ।।४६।।

## [१]प्राक्काले ।।५।४।४७।।

म० वृ०—परकालेन धात्वर्थेन तुल्यकर्तृके प्राक्कालार्थे वर्त्तमानाद् धातोः धातोः सम्बन्धे 'क्त्वा वा' स्यात् । [२]आसित्वा भुङ्क्ते, भुक्त्वा याति; पक्षे आस्यते भोक्तुम् । तुल्यकर्तृक इत्येव— भुक्तवति गुरौ शिष्यो व्रजति । प्राक्काल इति किम् ? भुज्यते पीयते चानेन ।।४७।।

---

अव०—[१]प्राक्= पूर्वः कालो यस्य तुल्यकर्तृकस्य स प्राक्कालस्तस्मिन् । [२]'आसित्वा' इति आसिक्रियाया वर्त्तमानत्वेऽपि भुजिक्रियापेक्षया प्राक्कालत्वम्, अत एव क्त्वो विकल्पपक्षे वर्त्तमाना उदाहृता ।। ४७ ।।

## खणम् चाभीक्ष्ण्ये ।।५।४।४८।।

म० वृ०—आभीक्ष्ण्यविशिष्टे परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद्धातोर्धातोः सम्बन्धे 'खणम् चकारात् क्त्वा च' स्यात् । भोजं भोजं याति, भुक्त्वा भुक्त्वा याति: पायं पायम्,पीत्वा पीत्वा याति; अग्रे भोजं भोजम्, अग्रे भुक्त्वा भुक्त्वा याति । अत्र क्त्वाखणमोर्हिस्वादिवत् प्रकृत्यर्थोपाधिद्योतने सामर्थ्यं नास्तीत्याभीक्ष्ण्याभिव्यक्तये द्विर्वचनं भवति। खिस्त्वं चौरंकारमाक्रोशति, स्वादुंकारं भुङ्क्ते इत्युत्तरार्थम्[१] ।।४८।।

---

अव०—[१]'शापे व्याप्यात्' (५।४।५२) 'स्वाद्वर्थाददीर्घात्' (५।४।५३) इत्याद्युत्तरसूत्रार्थं वचनम् (खित्त्वम् ?)। ननु क्त्वादिभिर्भावे विधीयमानैः कर्तुरनभिहितत्वात् ओदनं पक्त्वा भुङ्क्ते चैत्र इत्यादिषु कर्त्तरि तृतीया प्राप्नोति, नैवम्, भुजिप्रत्ययेनैव कर्त्तुरभिहितत्वान्न तृतीया। "प्रधानशक्त्यभिधाने हि गुणशक्तिरभिहितवत् प्रकाशते" इति न्यायः । प्रधानेन त्यादिपदेन शक्त्यभिधानम् । गुणशक्तिः, कोऽर्थः ? अप्रधानपदशक्तिः ।।४८।।

## पूर्वा-ऽग्रे-प्रथमे ।।५।४।४९।।

म० वृ०—पूर्व अग्रे प्रथम इत्युपपदेषु परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे धातोर्धातोः सम्बन्धे 'खणम् वा' स्यात् । अनाभीक्ष्ण्यार्थं वचनम् । पूर्वं भोजं याति, पूर्वं भुक्त्वा याति । अग्रे भोजम्, अग्रे भुक्त्वा याति । प्रथमं भोजम्, प्रथमं भुक्त्वा याति । वर्त्तमानादयोऽपि,-पूर्वं भुज्यते ततो याति, [१]अग्रेऽपि एवम् ।।४९।।

---

अव०—'पूर्वाग्रे०' इति सूत्रे पूर्वादयः शब्दा व्यापारान्तरापेक्षे प्राक्कालत्वे प्रवर्त्तन्ते, व्रजनापेक्षे क्त्वाखणमौ प्रवर्त्तेते इति नोक्तार्थता; ततश्च पूर्वं भोजं व्रजति, पूर्वं भुक्त्वा व्रजति इत्यादीनामुदाहर-

णानामिदं व्याख्यानं ज्ञातव्यम्,-अन्यभोक्तृभुजिक्रियाभ्यः सकाशात् अथवा स्वेभ्यः एवाध्ययनादिभ्यः क्रियान्तरेभ्यः सकाशात् पूर्वं भोजनं कृत्वा तदनन्तरं व्रजतीत्यर्थः । [१] पूर्वप्रथमसाहचर्यादग्रेशब्दः कालवाची इत्यर्थः ॥४९॥

## अन्यथैवंकथमित्थमः कृगोऽनर्थकात् ॥५।४।५०॥

म० वृ०–एभ्यः परात्तुल्यकर्तृकेऽर्थे करोतेरनर्थकात् [१]धातुसम्बन्धे 'खणम् वा' स्यात् । अन्यथाकारम्, एवंकारम्, कथंकारम्, इत्थंकारं भुङ्क्ते; पक्षे क्त्वैव,-अन्यथा कृत्वा, एवं कृत्वा, इत्थं कृत्वा भुङ्क्ते । एवमुत्तरत्रापि । आनर्थक्यं करोतेरन्यथादिभ्यः पृथगर्थाभावात् ※ । अनर्थकादिति किम् ? अन्यथा कृत्वा शिरो भुङ्क्ते ॥५०॥

अव०–[१]'नञोऽर्थान्' (७।३।१७४) इत्यनेन कच् समासान्तः ॥५०॥

## यथा-तथादीर्ष्योत्तरे ॥५।४।५१॥

म० वृ०–यथातथाशब्दाभ्यां परात्तुल्यकर्तृकेऽर्थे [१]ऽनर्थकात् करोतेर्धातुसम्बन्धे 'खणम् वा' स्यात्, [२]ईर्ष्योत्तरे=[ पुरुषः ] यदि ईर्ष्यन् पृच्छते [=पृच्छकाय ] उत्तरं दत्ते । कथं भवान् भोक्ष्यते इति पृष्टोऽसूयया तं प्रत्याह-[३]यथाकारमहं भोक्ष्ये, तथाकारमहं भोक्ष्ये, किं तवानेन । ईर्ष्योत्तरे इति किम् ? यथाकृत्वाऽहं भोक्ष्ये तथा द्रक्ष्यसि । अनर्थकादित्येव– यथा कृत्वाहं शिरो भोक्ष्ये तथा कृत्वाहं शिरो भोक्ष्ये, किं तवानेन ॥५१॥

अव०–[१]वर्त्तमानाद् । ईर्ष्यतीति [२]ईर्ष्यः, अच्, ईर्ष्यस्य=सरोषपुरुषस्य उत्तरम्=ईर्ष्योत्तरम्, तस्मिन् । [३]किं ते मया, यथाहं भोक्ष्ये, तथाहं भोक्ष्ये इत्यर्थः ॥५१॥

## शापे व्याप्यात् ॥५।४।५२॥

म० वृ०–व्याप्यात्कर्मणः परात्तुल्यकर्तृकेऽर्थे करोतेर्धातुसम्बन्धे 'खणम् वा' स्यात्, शापे = आक्रोशे गम्यमाने । [१]चौरंकारमाक्रोशति । शाप इति किम् ? चौरं कृत्वा हेतुभिः कथयति ॥५२॥

अव०–[१]करोतिरिहोच्चारणार्थः, चौरं कृत्वा= चौरशब्दमुच्चार्य आक्रोशति, चौरोऽसि इत्याक्रोशति इति भावः । एवं व्याधंकारमाक्रोशति ॥५२॥

## स्वाद्वर्थाददीर्घात् ॥५।४।५३॥

म० वृ०–स्वादोरर्थे वर्त्तमानाददीर्घान्ताद् व्याप्यात्परस्मात्तुल्यकर्तृके करोतेर्धातुसम्बन्धे खणम् वा' स्यात् । स्वादुंकारम्, सम्पन्नंकारम्, मिष्टंकारम्, [१]लवणंकारं भुङ्क्ते, पक्षे– स्वादु कृत्वा, मिष्टं (कृत्वा), लवणं कृत्वा भुङ्क्ते । अदीर्घादिति किम् ? स्वाद्वीं कृत्वा, स्वादूकृत्य, सम्पन्नां कृत्वा यवागूं भुङ्क्ते ॥५३॥

अव०–अस्वादोः स्वादोः करणम्, च्वि, एवं स्वादूकृत्य साध्यते । तथा स्वादुंकारं यवागूं भुङ्क्ते, अस्वादु स्वादु कृत्वा स्वादुंकारं यवागूं भुङ्क्ते इति प्रयोगद्वये (?प्रयोगे) ङीप्रत्ययच्विप्रत्यययोर्विकल्पितत्वाद्दीर्घो न भवति, दीर्घाभावाच्च खणम् प्रत्ययः सिद्धः । तथा सम्पन्नंकारं यवागूं भुङ्क्ते इति अत्र तु सामान्येन पूर्वं सम्पन्नंकारमिति निष्पाद्य पश्चात् यवागूसम्बन्धे कृते सम्पन्नंकारं यवागूं भुङ्क्ते इति प्रयोगः साध्यते इत्यम् । [१]लुनाति वैरस्यमिति लवणम्, नन्द्यादित्वादनः, गणपाठात् णत्वम्, लवणेन संसृष्टम् ( इति) 'लवणादः' (६।४।६) इत्यनेन अप्रत्ययः ॥५३॥

## विद्दृग्भ्यः कात्स्न्र्ये णम् ॥५।४।५४॥

म० वृ०–कार्त्स्न्यविशिष्टाद् व्याप्यात् परेभ्यस्तुल्यकर्तृके प्राक्काले वर्त्तमानेभ्यो विदिभ्यो दृशश्च धातुसम्बन्धे 'णम् प्रत्ययो वा' स्यात् । [१]अतिथिवेदं भोजयति, [२]कन्यादर्शं [३]वरयति । बहुवचनात् [४]त्रयाणामपि विदीनां ग्रहणम् । कार्त्स्न्र्य इति किम्

※ 'अन्यथा भुङ्क्ते' इत्यस्य योऽर्थः स एव 'अन्यथाकारं भुङ्क्ते' इत्यस्येति करोतेरन्यथादिभ्यः पृथगर्थाभावः ।

? अतिथिं विदित्वा भोजयति, कन्यां दृष्ट्वा वरयति ॥५४॥

अव०–[1]अतिथीन् विदित्वा विस्त्वा वा अतिथिवेदम इति वाक्यम् । यं यमतिथिं जानाति लभते विचारयति वा तं सर्वं भोजयतीत्यर्थः । [2]यां यां कन्यां पश्यति तां तां सर्वां वरयतीत्यर्थः । [3]'वरण् ईप्सायाम्', 'चुरादिभ्यो णिच्' (३।४।१७। इति णिच्), 'अतः' ( ४।३।८२ ) इति अलोपः । [4]'विदक् ज्ञाने' 'विदॢंती लाभे' 'विदिंप् विचारणे' इति विद्त्रयं ग्राह्यम्, न 'विदिंच् सत्तायाम्', अकर्मकत्वात् । सूत्रोक्त-''निरनुबन्धग्रहणे न सानुबन्धग्रहणम्'' इत्युपतिष्ठेत इति हेतोर्बहुवचनात् त्रयोऽपि विदो ग्राह्याः । विद्यतेरकर्मकात्वारुयोपि (? विद्यतेरकर्मकत्वान्न ग्रहणम् ) ॥५४॥

## यावतो विन्द-जीवः ॥५।४।५५॥

म० वृ०–कात्स्न्र्यविशिष्टाद् व्याप्याद् यावच्छब्दात् पराभ्यां विन्दजीविभ्यामेककर्तृकेऽर्थे धातोः सम्बन्धे 'णम् वा' स्यात् । विन्देति शनिर्देशाल्लाभार्थस्य ग्रहणम् । यावद्वेदं भुङ्क्ते, यावल्लभते तावद् भुङ्क्ते इत्यर्थः । यावज्जीवमधीते, यावज्जीवति तावदधीते इत्यर्थः ॥५५॥

अव०–जीवधातोः पूर्वकालासम्भवादपूर्वकाल एव णमविधिः, एतत्रोपलक्षणं विन्देरप्यपूर्वकाले एव विधिः ; अत एव 'यावतो विन्दजीव' इत्यस्य सूत्रार्थे प्राकाले इति नोक्तम् । यावच्छब्दस्य कालवाचित्वात् 'कालाध्व०' ( २।२।२३ ) इति कर्मत्वम् । यावतो वेदनं=यावद्वेदमिति वाक्यम् ॥५५॥

## चर्मोदरात्पूरेः ॥५।४।५६॥

म० वृ०–व्याप्याभ्यां चर्मोदराभ्यां परात्तुल्यकर्तृकेऽर्थे पूरयतेर्धातोः सम्बन्धे 'णम् वा' स्यात् । चर्मपूरमास्ते, उदरपूरं शेते, उदरं पूरयित्वा शेते इत्यर्थः ॥५६॥

अव०–'चर्मपूरमास्ते' इति कोऽर्थः ? यावत् पूरणं न सम्पन्नं तावत् आसनं शयनमध्ययनं न करोति इति प्राक्कालता घटते, चर्म पूरयित्वा आस्ते इत्यर्थः ॥५६॥

## वृष्टिमान ऊलुक् चास्य वा ॥५।४।५७॥

म० वृ०–व्याप्यात्परात्पूरयतेर्धातुसम्बन्धे 'णम्' स्यात्, अस्य='पूर ऊकारस्य वा लुक्', समुदायेन चेत् वृष्टिमानं [वृष्टीयत्ता] गम्यते । [1]गोष्पदप्रम्, गोष्पदपूरं वृष्टो देवः ;[2] सीताप्रम, सीतापूरं वृष्टो मेघः[3] । गोष्पदप्रमिति प्रातेर्धातोः 'आतो डोऽह्वावामः' ( ५।१।७६ ) इति डेन, गोष्पदपूरमिति अणा च क्रियाविशेषणत्वे सिध्यति, एवं [3]सर्वे णमन्ताः प्रयोगाः । तत्र णमविधानमव्ययत्वेन तरामाद्यर्थमनुस्वारश्रवणार्थं च, तेन गोष्पदप्रंतराम्, गोष्पदप्रंतमाम् ; गोष्पदप्रंरूपमित्यादि[4] ॥५७॥

अव०–[1]गोः पदं=गोष्पदम्, ''वर्चस्कादिष्व०'' (३।२।४८) इति षोन्तः, गोष्पदस्य पूरणं=गोष्पदप्रम । [2]यावता गोष्पदं सीता वा पूर्यते=पूरणा भवति तावत्प्रमाणो मेघो वृष्ट इत्यर्थः । [3]गोष्पदप्रमित्यादयः सर्वे । [4]''गोष्पदप्रंरूपमित्यादि', आदिशब्दात् गोष्पदप्रंकल्पम्, गोष्पदप्रंदेश्यम्, गोष्पदप्रंदेशीयमित्यादयः सिद्धाः, अन्यथा प्रातेर्डे सति, पूरेः अणि सति, गोष्पदप्रतरम्, गोष्पदपूरतरमित्याद्येव स्यात् ॥५७॥

## चेलार्थात् क्नोपेः ॥५।४।५८॥

म० वृ०–चेलार्थात् परात् क्नोपयतेस्तुल्यकर्तृकेऽर्थे वृष्टिमाने गम्यमाने 'णम् नवा' स्यात् । [1]चेलक्नोपम्, [2]वस्त्रक्नोपम्, पटिकाक्नोपम्, कम्बल-[3]क्नोपं वृष्टो मेघः ॥५८॥

अव०–''चेलार्थात्.............. (क्नोपेः' इति सूत्रे अर्थ )ग्रहणादत्र स्वरूपपर्यायविशेषाणां त्रयाणामपि ग्रहणम् । तेन पटिकाक्नोपमित्यादौ चेलविशेषणादपि भवति । [1]चेलस्य क्नोपनं= चेलक्नोपम्, एवं सर्वत्र । [2]एवं वसनक्नोपम् । चेलक्नोपम् ; कोऽर्थः ? यावता चेलं वस्त्रं कम्बलं वा क्नूयते= आर्द्रीभवति तावद् वृष्ट इत्यर्थः । [3]कम्बलंक्नोपमित्यत्र चेलविशेषत्वात् णम् भवति ॥५८॥

## गात्र-पुरुषात् स्नः ।।५।४।५९।।

म० वृ०–गात्रपुरुषाभ्यां परादन्तर्भूतण्यर्थात् स्नातेर्वृष्टिमाने 'णम् नवा' स्यात् । गात्रस्नायम्, पुरुषस्नायं वृष्टो मेघः[१] । [गात्रस्य स्नापनं पुरुषस्य स्नापनम् (इति) वाक्यम् ] ।।५९।।

अव०–[१]यावता गात्रं=शरीरं पुरुषश्च स्नाप्यते तावत् वृष्टो मेघः ।।५९।।

## शुष्क-चूर्ण-रूक्षात् पिषस्तस्यैव ।।५।४।६०।।

म० वृ०–एभ्य परात् पिषे–'णम् नवा', तस्यैव पिष्धातोः सम्बन्धे सति । [१]शुष्कपेषम्, [२]चूर्णपेषम्, [३]रूक्षपेषं पिनष्टि; एवं [४]शुष्कपेषं पिष्टः, शुष्कपेषं पेष्टव्यः । अत्र प्रकरणे प्रयोगानुप्रयोगक्रिययोरैक्यात्तुल्यकर्तृकत्वम् प्राक्कालत्वं नास्ति इति पक्षे क्त्वा न भवति, घञादय एव तु भवन्ति,– [५]शुष्कस्य पेषं पिनष्टि ।।६०।।

अव०–[१]शुष्कं पिनष्टीत्यर्थः, एवं [२]चूर्णं पिनष्टि, [३]रूक्षं पिनष्टीत्यर्थः । '[४]शुष्कपेषं पिष्ट' इत्यादौ क्तप्रत्ययादिभिरुक्तेऽपि व्याप्ये तदुपपदता, कोऽर्थः ? पिष्धातुसम्बन्धताऽस्त्येव इत्यक्षराणि पूर्वम्, पश्चात् अत्र प्रकरणे प्रयोगेत्याद्यक्षराणि पठितव्यानि । 'शुष्कचूर्ण०' इत्यारभ्य 'उपात् किरो लवने' (५।४।७२) इत्यन्तं यावत् 'तस्यैव धातोः सम्बन्धे' इत्यधिकारो ज्ञातव्यः । तस्यैव धातोः सम्बन्धे सति प्रायस्तत्र क्रियाविशेषणमेव भवतीत्यर्थः । [५]तथा 'शुष्कस्य पेषं पिनष्टि', अत्र सामान्यविशेषभावविवक्षया च धातुसम्बन्धः । यदाहुः– "सामान्यपुषेरवयवपुषिः कर्म भवति" इति । शुष्कस्य पेषं पिनष्टि इदमुदाहरणं णम्विकल्पपक्षे घञन्तं ज्ञातव्यम्, इदं सम्भाव्यते ।।६०।।

## कृग्ग्रहोऽकृतजीवात् ।।५।४।६१।।

म० वृ०–अकृतजीवपराभ्यां [ व्याप्याभ्यां ] यथासङ्ख्यं कृग्ग्रहिभ्यां 'तस्यैव धातोः सम्बन्धे णम् वा' स्यात् । [१]अकृतकारं करोति [अकृतं करोतीत्यर्थः], [२]जीवग्राहं गृह्णाति [जीवं गृह्णातीत्यर्थः ।६१।

अव०–[१]'अकृतकारम्', अकृतस्य करणमिति वाक्यम् । [२]जीवस्य ग्रहणम् (इति) वाक्यम् ।।६१।।

## निमूलात्कषः ।।५।४।६२।।

म० वृ०–निमूलात् [ व्याप्यात् ] परात्कषेः 'तस्यैव धातोः सम्बन्धे णम् वा' स्यात् । [१]निमूलकाषं कषति, पक्षे निमूलस्य काषं कषति ।।६२।।

अव०–[१]निमूलमित्यत्र अत्ययेऽर्थेऽव्ययीभावसमासः, निर्गतानि मूलान्यस्येति बहुव्रीहिर्वा । निमूलस्य कषणम्= निमूलकाषम्, निमूलं कषतीत्यर्थः ।।६२।।

## हनेश्च समूलात् ।।५।४।६३।।

म० वृ०–समूलशब्दात् [ व्याप्यात् ] पराद् हन्तेः कषेश्च 'तस्यैव धातोः सम्बन्धे णम्' वा स्यात् । समूलघातं हन्ति, समूलकाषं कषति ।।६३।।

अव०–समूलस्य हननं=समूलघातम्, 'ञ्णिति घात्' (४।३।१००) । समूलम् (इति) अत्र साकल्येऽव्ययीभावः, बहुव्रीहिर्वा । समूलं कषणमथवा समूलस्य कषणमिति वाक्ये समूलकाषम् ।।६३।।

## करणेभ्यः ।।५।४।६४।।

म० वृ०–करणात् कारकात् पराद्धन्तेः 'तस्यैव धातोः सम्बन्धे णम् वा' स्यात् । [१]पाणिघातं कुड्यम् [भित्तिम्] आहन्ति, पादघातं शिलां हन्ति । बहुवचनं व्याप्त्यर्थम्, तेन करणपूर्वात् हिंसार्थादपि हन्तेरनेनैव णम्,– अस्युपघातमरीन् हन्ति[२] ।।६४।।

अव०–[१]पाणिना=हस्तेन पादेन कुड्यं शिलां हन्तीत्यर्थः । [२]एवं शरोपघातं मृगान् हन्ति ।।६४।।

## [१]स्व-स्नेहनार्थात् पुष-पिषः ।।५।४।६५।।

म०वृ०–स्वार्थात् स्नेहनार्थाच्च करणात् [करणवाचिनः] पराद् यथासङ्ख्यं पुषः पिषश्च 'तस्यैव धातोः सम्बन्धे णम् वा' स्यात् । स्वपोषम्, आत्मपोषम्, गोपोषम्, [महिषीपोषम्,] पितृपोषम्,

[मातृपोषम् ,] धनपोषम् , रैपोषं [2]पुष्णाति, [3]पुष्यति, [4]पोषति वा । स्नेहनार्थात् ,- उदपेषम् , घृतपेषं [तैलपेषं] पिनष्टि ॥६५॥

अव०-[1]स्निह्यतेऽनेनेति स्नेहनम् , स्निह्यते सिच्यते येनोदकादिना तत् स्नेहनमुच्यते, स्वश्च स्नेहनं च स्वस्नेहने ; स्वस्नेहने..........(ऽर्थो यस्य) स स्वस्नेहनार्थः, तस्मात् । आत्मा, आत्मीयम् , ज्ञातिः धनं च स्वमुच्यते । [2]'पुषश् पुष्टौ', [3]'पुषंच् पुष्टौ, [4]'पुष पुष्टौ', स्वादिभिः पुष्णातीत्यर्थः ॥६५॥

## हस्तार्थाद् ग्रह-वर्त्ति-वृतः ॥५।४।६६॥

म० वृ०-हस्तार्थात् करणात् परेभ्यो ग्रहवर्त्ति-वृद्भ्यः "तस्यैव धातोः सम्बन्धे वा णम्" स्यात् । [1]हस्तग्राहम् , करग्राहम् , पाणिग्राहं गृह्णाति । वर्त्ति-वृत इति वर्त्ततेर्ण्यन्तस्याण्यन्तस्य च ग्रहणम् । [2]हस्तवर्त्तं वर्त्तयति, एवं करवर्त्तं वर्त्तते, तथा हस्त-वर्त्तं वर्त्तते [हस्तेन वर्त्तते इत्यर्थः] ॥६६॥

अव०-[1]हस्तेन ग्रहणमिति वाक्ये हस्तग्राहम् । [2]हस्तेन वर्त्तयतीत्यर्थः ॥६६॥

## बन्धेर्नाम्नि ॥५।४।६७॥

म० वृ०-[1]बन्धेर्बन्धनस्य यन्नाम=संज्ञा तद्-विषयात्करणात्परात् बन्धिधातो-'र्धातुसम्बन्धे णम् वा' स्यात् । क्रौञ्चबन्धं बद्धः इत्यादि[2] । क्रौञ्चा-दीनि बन्धनविशेषनामानि । क्रौञ्चाद्याकारो बन्धः क्रौञ्चादिरित्युच्यते, तेन बन्धेन बद्ध इत्यर्थः ॥६७॥

अव०-[1]बन्धिरिति प्रकृतिर्नामविशेषणं च । तत्र यदा प्रकृतिस्तदा स्वरूपे इप्रत्ययः । यदा नाम-विशेषणं विवक्ष्यते तदा अर्थे इप्रत्ययः । [2]'क्रौञ्च-बन्धं बद्धः इत्यादि', आदिशब्दात् मयूरिकाबन्धं बद्धः, महिषीबन्धं बद्धः, मर्कटबन्धं बद्धः, गोबन्धं बद्धः, महिषीबन्धं बद्धः, अट्टालिकाबन्धं बद्धः, च-ण्डालिकाबन्धं बद्धः इति ॥६७॥

## आधारात् ॥५।४।६८॥

म० वृ०-आधारवाचिनः परात् बन्धेः 'तस्यैव धातोः सम्बन्धे णम् वा' स्यात् । चक्रबन्धं बद्धः, चारकबन्धं बद्धः इत्यादि ॥६८॥

अव०-'चारकबन्धं बद्धः इत्यादि', आदि-शब्दात् कूटबन्धं बद्धः, गुप्तिबन्धं बद्धः । एषामुदा-हरणानां चक्रादिषु बद्ध इत्यर्थः । ग्रामे बद्धः, हस्ते बद्धः इत्यत्र बहुलाधिकारात् 'णम् न' भवति ॥६८॥

## कर्त्तुर्जीव-पुरुषान्नश्वहः ॥५।४।६९॥

म० वृ०-कर्तृवाचिभ्यां जीवपुरुषाभ्यां पराभ्यां यथासङ्ख्यं नशिवहिभ्यां 'तस्यैव (धातोः) सम्बन्धे वा णम्' स्यात् । [2]जीवनाशं नश्यति, जीवन्नश्य-तीत्यर्थः ; पुरुषवाहं वहति पुरुषः[3] । कर्त्तुरिति किम् ? जीवेन नश्यति, पुरुषं वहति ॥६९॥

अव०-[1]पुरुष इति क्रियाशब्दार्थो अप्रत्ययोऽ-नेकार्थत्वात् धातूनाम् । [2]जीवस्य कर्तुर्नशनं=जीवना-शमिति वाक्यम् । [3]पुरुषः प्रेष्यो भूत्वा वहती-त्यर्थः ॥ ६९ ॥

## ऊर्ध्वात् पूः-शुषः ॥५।४।७०॥

म० वृ०-कर्तृवाचिनः ऊर्ध्वशब्दात् [परात्] पूरः शुषश्च '(तस्यैव) धातोः सम्बन्धे णम् वा' स्यात् । [1]ऊर्ध्वपूरं पूर्यते, [2]ऊर्ध्वशोषं शुष्यति ।७०।

अव०-[1]'ऊर्ध्वपूरम्' इत्यत्र पूर् धातुर्दैवादिकः 'पूरैचि आप्यायने' इत्ययं ग्राह्यः, न तु 'पूरण् आप्या-यने' इति चुरादिः, सूत्रे 'पूरि' इति अकरणात् । 'ऊर्ध्वपूरं पूर्यते', कोऽर्थः ? ऊर्ध्वः पूर्यते इत्यर्थः । [2]'ऊर्ध्वशोषम्', कोऽर्थः ? ऊर्ध्व एव सन् शुष्यती-त्यर्थः ॥७०॥

## व्याप्याच्चेवात् ॥५।४।७१॥

म० वृ०-व्याप्यात् चकारात् कर्तुश्च इवात्= [1]इवार्थात् परात् धातोः 'तस्यैव धातोः सम्बन्धे वा णम्' स्यात् । [2]सुवर्णनिधायं निहितः, एवं [3]रत्न-निधायम् , एवमोदनपाकं पकः, कर्तुश्च,- [4]काक-नाशं नष्टः, जमालिनाशं नष्टः, [5]अभ्रविलायं विलीनः ॥ ७१ ॥

अव०–[1]उपमानार्थात् इत्यर्थः । [2]सुवर्णमिव निहित इत्यर्थः । [3]एवं घृतनिधायम्, शाकक्लेशं क्लिष्टः । [4]काक इव नष्ट इत्यर्थः । [5]अभ्रमिव विलीन इत्यर्थः ॥७१॥

## उपात् किरो लवने ॥५।४।७२॥

म० वृ०–उपपूर्वात् किरतेर्लवनेऽर्थे वर्त्तमानस्य [1]"अन्यस्य धातोः सम्बन्धे सति णम्वा" स्यात्। [2]लवन इति वचनात्तस्यैवेति निवृत्तम्। [3]उपस्कारं मद्रका लुनन्ति । लवन इति किम् ? उपकीर्य गच्छति ॥७२॥

---

अव०–[1]इतः "सूत्रादारभ्य अन्यस्य धातोः सम्बन्धे" इत्यधिकारः सर्वसूत्रेषु आ पादसमाप्तेर्ज्ञातव्यः। [2]लवने इति करणात् तस्यैव धातोः सम्बन्धे इति निवृत्तम्। [3]उपकीर्य= उपस्कारम्, सिः, 'अव्ययस्य' (३।२।७। इति सिलोपः), 'उपस्कारं मद्र०' इति कोऽर्थः ? पूर्वं विक्षिपन्तः पश्चात् लुनन्तीत्यर्थः ॥ ७२ ॥

## दंशेस्तृतीयया ॥५।४।७३॥

म० वृ०–तृतीयान्तेन योगे तुल्यकर्तृकार्थादुपपूर्वाद् दंशे-'रन्यस्य धातोः सम्बन्धे णम् वा' स्यात् । मूलकेनोपदंशं भुङ्क्ते, [1]मूलकोपदंशं भुङ्क्ते; पक्षे मूलकेनोपदश्य भुङ्क्ते ॥७३॥

---

अव०– मूलकेनोपदंशमित्यादिकमुदाहरणद्वयं ज्ञातव्यम्, परमत्र 'तृतीयोक्तं वा' (३।१।५०) इत्यनेन विकल्पेनान्यस्ततपुरुषसंज्ञः समासः इति एकत्र तृतीया स्थिता, पक्षे तृतीया लुप्यते; इत्थमुदाहरणद्वयं भवति । एवमार्द्रकोपदंशं भुङ्क्ते । उपदंशिधात्वपेक्षया मूलकादि कर्मापि घटते, परं प्रधानाया भुजिक्रियाया अपेक्षया करणमेव भवति इति मूलकादिशब्दात् तृतीयैव भवति। यतः त्यादिप्रधानक्रियाप्रयुक्ते हि कारके गुणक्रिया कृत्प्रत्ययोत्पन्ना न स्वानुरूपां विभक्तिमुत्पादयितुमलम्, अप्रधानत्वात्; यथा– इष्यते ग्रामो गन्तुम्, ओदनः पक्त्वा भुज्यते इति । [1]मूलकेनोपदंश्य इति वाक्यम् ॥७३॥

## हिंसार्थादेकाप्यात् ॥५।४।७४॥

म० वृ०–[1]हिंसार्थाद्धातोः सम्बध्यमानेन धातुना सहैकाप्यात्[2] तृतीयान्तेन योगे 'तुल्यकर्तृकेऽर्थे वर्त्तमानाण्णम् वा' स्यात्। [3]दण्डेनोपघातम्, [4]दण्डोपघातं गाः सादयति; पक्षे दण्डेनोपहत्य । एकाप्यादिति किम् ? दण्डेनाहत्य चोरं गोपालो गाः खेटयति ॥७४॥

---

अव०–[1]प्राणिविनाशवाचिनो धातोः। [2]'एकाप्यात्', कोऽर्थः ? एककर्मकात्। [3]दण्डेनोपघातमित्यादिष्वपि 'तृतीयोक्तं वा' (३।१।५०। इति विकल्पेन समासः), दण्डेन उपहननम् (इति) वाक्यम्। 'सादयति', अत्र षद् धातुः, णिग्। [4]'ञ्णिति घात्' (४।३।१००) (इति हन्तेर्घातादेशः), दण्डेनोपघातमित्युदाहरणाग्रे एवं खड्गेन प्रहारम्, खड्गप्रहारं शत्रून् विजयते; दण्डेनाताडम्, दण्डाताडं गाः कलयति इत्यपि ज्ञेयम् ॥७४॥

## उपपीड-रुध-कर्षस्तत्सप्तम्या[1] ॥५।४।७५॥

म० वृ०–तृतीयायुक्तसप्तम्यन्तेन योगे उपपूर्वेभ्यः पीडरुधकर्षतिभ्यस्तुल्यकर्तृकेऽर्थे [ वर्त्तमानेभ्यः] 'धातोः सम्बन्धे वा णम्' स्यात् । [तृतीया-] [2]पार्श्वोपपीडम्, [ सप्तमी- ] [3]पार्श्वोपपीडं शेते । व्रजोपरोधं गाः स्थापयति। पाण्युपकर्षं धानाः पिनष्टि गृह्णाति वा ॥७५॥

---

अव०–'उपपीड०' इति सूत्रे कर्म ( ? कर्ष ) इत्यत्र ड ( ? नि)……………………( देशस्य सौत्रत्वा)त् अकारलोपः । [1]तया तृतीयया युक्ता सप्तमी =तत्सप्तमी, तया । तृतीयान्तोपपदेन इत्यर्थः । [2]पार्श्वाभ्यामुपपीडनम्, [3]पार्श्वयोः उपपीडनमिति तृतीयासप्तम्योर्वाक्ये कृते पार्श्वाभ्यामुपपीडं शेते, पार्श्वोपपीडं शेते; सप्तमी-पार्श्वयोरुपपीडं शेते, पार्श्वोपपीडं शेते; इत्थमुदाहरणावली ज्ञातव्या, वृत्तौ संक्षिप्य उदाहरणावली लिखिताऽस्ति। एवं व्रजेनो-

परोधम् , व्रजोपरोधम ; व्रजे उपरोधम् , व्रजोपरोधं गाः स्थापयति । पाणिना उपकर्षम् , पाण्युपकर्षं धानाः पिनष्टि, पाणावुपकर्षं पाण्युपकर्षं धाना गृह्णाति । कर्ष इति शब्निर्देशात् भौवादिकस्य स्वभावादाकर्षणार्थे वर्त्तमानस्य द्विकर्मकस्य ग्रहणम् , कर्षन्ति शाखां ग्रामं कुटुम्बिनः । तौदादिकस्य विलेखनार्थस्य कृषेर्न ग्रहणम् ,-भूमावुपकृष्य तिलान् वपति इत्यत्र न णम् । केचिदन्योपसर्गादपि,-व्रजानुरोधम् । उपेति किम् ? पार्श्वेन निपीड्य तिष्ठति ॥७५॥

## [1]प्रमाणसमासत्त्योः[2] ॥५।४।७६॥

म० वृ०–प्रमाणसमासत्त्योर्गम्यमानयोस्तृतीयान्तेन सप्तम्यन्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे [वर्त्तमानात् ] 'धातुसम्बन्धे णम् वा' स्यात् । प्रमाणे,- [3]द्व्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति । समासत्तौ,-केशग्राहं युध्यन्ते, एवं हस्तग्राहम् , अस्यपनोदं युध्यन्ते[4] ॥७६॥

अव०–[1]प्रमाणमायाममानम् । [2]समासत्तिः संरम्भपूर्वकः सन्निकर्षः, कोऽर्थः ? सामीप्यम् । [3]द्वयोरङ्गुल्योः समाहारः द्व्यङ्गुलम् , 'संख्याऽव्ययादङ्गुलेः' (७।३।१२४) इत्यनेन डसमासान्तः । अत्रापि पूर्वसूत्रवत् द्व्यङ्गुलेनोत्कर्षम् , द्व्यङ्गुलोत्कर्षम् ; सप्तमी,-द्व्यङ्गुले उत्कर्षम् , द्व्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति; गण्डिकाः इक्ष्वादेः पर्वसम्बन्धिनः; समासत्तौ,-केशैः ग्राहम् , केशग्राहम् : केशेषु ग्राहम् , केशग्राहम , एवमुदाहरणावली ज्ञातव्या । [4]युद्धसंरम्भादत्यन्तं सन्निकृष्य=अत्यासन्नीभूय भटा युद्ध्यन्ते इत्यर्थः ॥७६॥

## पञ्चम्या त्वरायाम् ॥५।४।७७॥

म० वृ०–त्वरायां गम्यमानायां पञ्चम्यन्तेन योगे तुल्यकर्तृकेऽर्थे वर्त्तमानाद्धातो-'र्धातुसम्बन्धे णम् वा' स्यात् । शय्याया उत्थायम् , शय्योत्थायं धावति; पक्षे- शय्याया उत्थाय धावति । त्वरायामिति किम् ? आसनादुत्थाय याति ॥७७॥

अव०–एवं नाम त्वरते यदावश्यकादिकृत्यमपि नापेक्षते इत्यर्थः ॥७७॥

## द्वितीयया ॥५।४।७८॥

म० वृ०–द्वितीयान्तेन योगे त्वरायां गम्यमानायां तुल्यकर्तृकेऽर्थे[1] धातो-'र्णम् वा' स्यात् । लोष्टग्राहं युध्यन्ते, एवं यष्टिग्राहम [युध्यन्ते], दण्डोद्यामं धावति । पक्षे लोष्टान् , यष्टीर्गृहीत्वा युध्यन्ते ॥७८॥

अव०–अत्रापि लोष्टान् ग्राहम् , लोष्टग्राहम् ; एवं यष्टीर्ग्राहम् , यष्टिग्राहम : दण्डमुद्यामम , दण्डोद्याममित्येव । एवं नाम योद्धुं भटास्त्वरन्ते यदायुधग्रहणमपि नाद्रियन्ते, यत् किञ्चिदासन्नं हस्ते चटितं तद् गृहीत्वा युद्ध्यन्ते इत्युदाहरणार्थः । [1]वर्त्तमानात् धातुसम्बन्धे । त्वरायामित्येव– खड्गं गृहीत्वा युद्ध्यन्ते । योगविभाग उत्तरार्थः ॥७८॥

## [1]स्वाङ्गेनाध्रुवेण[2] ॥५।४।७९॥

म० वृ०–अध्रुवेण स्वाङ्गेन द्वितीयान्तेन योगे[3] धातो-'र्णम् वा' भवति । [4]भ्रूविक्षेपं जल्पति, [5]अक्षिनिकाणं हसति, [6]पादावनुलेपं नमति; पक्षे भ्रुवौ विक्षिप्य वक्ति (इत्यादि) ।स्वाङ्गेनेति किम् ? कफमुन्मूल्य [लङ्घित्वा] जल्पति । अध्रुवेणेति किम् ? शिर उत्क्षिप्य वक्ति ॥७९॥

अव०–[1]'अविकारोऽद्रवं मूर्त्तं, प्राणिस्थं स्वाङ्गमुच्यते ।
च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु' ॥१॥
इति स्वाङ्गलक्षणम । [2]तथा यस्मिन्नङ्गे छिन्ने भिन्ने वा प्राणी न म्रियते तद् अध्रुवमुच्यते । [3]तेन ईदृशेन स्वाङ्गेन अध्रुवेण विशेषणेन युक्तेन द्वितीयान्तेन उपपदेन सह योगे सति तुल्यकर्तृकेऽर्थे वर्तमानाद् धातोः सम्बन्धे । [4]अत्रापि भ्रुवौ विक्षेपम् , भ्रूविक्षेपमिति युक्तिः । [5]अक्षिणी निकाणम् , अक्षिनिकाणम् । (एवम् ) केशान् परिधायम् , केशपरिधायं नृत्यति । (एवम् ) [6]प्रतिमायाः पादानुलेपम् ॥७९॥

## परिक्लेश्येन ॥५।४।८०॥

म० वृ०–[1]परिक्लेश्येन स्वाङ्गेन द्वितीयान्तेन धातो 'र्णम् वा' स्यात् । ध्रुवार्थोऽयमारम्भः । [2]उरःप्रतिपेषं युध्यन्ते, पक्षे उरांसि प्रतिपिष्य ॥८०॥

अव०–[1]परि=समन्तात् क्लिश्यमानं=पीड्यमानं परिक्लेश्यमुच्यते । परिक्लेश्येन=पीड्यमानेन ईदृशेन स्वाङ्गेन द्वितीयान्तेन योगे तुल्यकर्तृकेऽर्थे वर्त्तमानाद्धातोर्धातुसम्बन्धे इत्यर्थः । [2]अत्रापि उरांसि प्रतिपेषम्, उरःप्रतिपेषम्; एवं शिरांसि छेदम्, शिरश्छेदं युध्यन्ते इत्येवं प्रयोगा द्रष्टव्याः । उरांसि परितो पीडयन्तो युध्यन्ते, शिरांसि छिन्दन्तो युध्यन्ते इत्यर्थः ॥८०॥

## विश-पत-पद-स्कन्दो [1]वीप्साभीक्ष्ण्ये[2] ॥५।४।८१॥

म० वृ०–द्वितीयान्तेन योगे तुल्यकर्तृकेऽर्थे वर्त्तमानेभ्यो विशयादिभ्यो वीप्सायामाभीक्ष्ण्ये गम्यमाने [धातुसम्बन्धे] 'णम् वा' स्यात् । वीप्सायामुपपदस्य द्वित्वम्, आभीक्ष्ण्ये तु धातोर्द्वित्वमिति विशेषः । वीप्सायाम्,– गेहं गेहमनुप्रवेशम्, गेहानुप्रवेशमास्ते । आभीक्ष्ण्ये,– गेहमनुप्रवेशमनुप्रवेशम्, गेहानुप्रवेशमास्ते, एवमग्रेऽपि गेहानुप्रपातम्, गेहानुप्रपादमास्ते, [3]गेहावस्कन्दमास्ते । पक्षे गेहं गेहमनुप्रविश्यास्ते, गेहमनुप्रविश्यानुप्रविश्यास्ते इत्यादि ॥८१॥

अव०–श्रुतत्वात् [1]विशयादिक्रियानां साकल्येन उपपदार्थानां व्याप्तुमिच्छा वीप्सा । [2]प्रकृत्यर्थस्य पौनःपुन्येनासेवनम्=आसक्तिराभीक्ष्ण्यम् । यदाहुः वृद्धाः,-"·······(सुप्)सु स्याद्यन्तेषु वीप्सा प्रव·······(र्तते), तीति (?) तिङ्षु स्याद्यन्तेषु अव्यय···(कृ)त्सु च आभीक्ष्ण्यं प्रवर्त्तते" । [3]स्कन्द, (एवम्) गेहमवस्कन्दमवस्कन्दमास्ते···('ख्ण)म् चाभीण्ये' (५।४।४८) इत्यनेन णम्·······(सिद्धः) एव, विकल्पे·······(नोप)पदसमासा···(र्थं वच)–नमिदं क्र···(तम्), अन्यथा समासो·······(न स्या)त् ॥८१॥

## कालेन तृष्यस्वः क्रियान्तरे ॥५।४।८२॥

म० वृ०–क्रियान्तरे वर्त्तमानाभ्यां तृषि-असूभ्यां धातुभ्यां द्वितीयान्तेन कालवाचिना योगे [धातुसम्बन्धे] 'वा णम्' स्यात् । [1]द्व्यहं तर्षं द्व्यहतर्षम् [द्व्यहं तर्षित्वा गावः पिबन्ति; [2]द्व्यहमत्यासं द्व्यहात्यासम् [द्व्यहमत्यस्य ] गावः पिबन्ति । कालेनेति किम्? योजनं तर्षित्वा अत्यस्य गावः पिबन्ति । तृष्यस्व इति किम्? [3]द्व्यहमुपोष्य भुङ्क्ते । क्रियान्तर इति किम्? [4]अहरत्यस्य इषून् गतः ॥८२॥

अव०–[1]द्वि, अहन्, द्वयोरह्नोः समाहारः द्व्यहम्, 'द्विगोरन्नह्नोऽट्' (७।३।९९) अट्, 'नोऽपदस्य तद्धिते' (७।४।६१) अन् लुप्यते, 'कालाध्वनोर्व्याप्तौ' (२।२।४२) इति द्वितीया, द्व्यहं तर्षित्वा इति वाक्यम्, द्व्यहंतर्षं द्व्यहतर्षम् (इति) उदाहरणे । [2]द्व्यहमत्यस्य इति वाक्यम् । तर्षेण अत्यासेन च गवां पानक्रिया व्यवधीयते । अद्य पीत्वा द्व्यहमतिक्रम्य पिबन्तीत्यर्थः । एवमन्तमुहूर्त्तमत्यासमन्तर्मुहूर्तात्यासं सम्यक् पश्यन्ति इदमपि उदाहरणं ज्ञातव्यम्, अस्यार्थः– सम्यक् दृष्ट्वा अन्तर्मुहूर्त्तं मिथ्यात्वमनुभूय पुनः सम्यग्दृष्टयो भवन्तीत्यर्थः । [3]द्वितयमुपवासं कृत्वा भुङ्क्ते इत्यर्थः । [4]अहन्, द्वितीयाऽम्, 'अनतो लुप्' (१।४।५९ इत्यमो लुप्), 'रो लुप्यरि' (२।१।७५) इत्यनेन नस्थाने रोऽन्तः । अत्रात्यासेन अहः इषवश्च व्याप्यन्ते, न तु गतिक्रिया व्यवधीयते ॥८२॥

## नाम्ना ग्रहा-ऽऽदिशः ॥५।४।८३॥

म० वृ०–नामशब्देन द्वितीयान्तेन योगे [1]ग्रहिधातोः आदिशश्च धातोः [धातुसम्बन्धे] 'वा णम्' स्यात् । नामानि ग्राहम्, नामग्राहमाह्वयति; [2]नाम्नी देवदत्तो ग्राहम्, नामग्राहं देवदत्त आह्वयति; नामान्यादेशम्, नामादेशं दत्ते । पक्षे नाम गृहीत्वा, नामादिश्य दत्ते ॥८३॥

**अव०**–[१]तुल्यकर्तृकेऽर्थे वर्त्तमानात् । [२]'नाम्नी देवदत्त' इत्यत्र "यस्य येन सह सम्बन्धोऽस्ति दूरस्थस्यापि तेन सह स सम्बन्धो भवति" इति न्यायादत्रापि प्रयोगे देवदत्त इति व्यवधाने सत्यपि णम् भवतीत्यर्थः ॥८३॥

## कृगोऽव्ययेनानिष्टोक्तौ क्त्वा-णमौ ॥५।४।८४॥

**म० वृ०**–अव्ययेन योगे करोतेरनिष्टायामुक्तौ गम्यमानायां 'क्त्वाणमौ' स्याताम् । हे ब्राह्मण ! पुत्रस्ते जातः, किं तर्हि [हे] वृषल ! नीचैः कृत्वा, नीचैःकृत्य कथयसि ; किं तर्हि नीचैर्वृषल ! कारम् वृषल ! नीचैःकारं कथयसि । उच्चैर्नाम प्रियं वाच्यम् । [हे] विप्र ! कन्या ते गर्भिणी, किं तर्हि [हे] वृषल ! उच्चैः कृत्वा, उच्चैःकृत्य कथयसि ; किं तर्हि उच्चैर्वृषल ! कारं हे वृषलोच्चैःकारं वदसि । नीचैर्नाम अप्रियमाख्येयम् । अनिष्टोक्ताविति किम् ? उच्चैः कृत्वाचष्टे विप्र ! पुत्रस्ते जात इति । [१]अव्ययेनेति किम् ? विप्र ! पुत्रस्ते जातः, किं तर्हि वृषल ! मन्दं कृत्वा वदसि । [२]क्त्वा चेत्यकृत्वा णम्-विधानमुत्तरत्रोभयानुवृत्त्यर्थम् ॥८४॥

**अव०**–[१]एवं ब्राह्मण ! कन्या ते गर्भिणी सञ्जाता इति नीचैः कृत्वाचष्टे । [१]बाधिकारेणैव पक्षे क्त्वाया सिद्धौ समासार्थं क्त्वाणमौ इति विधानं कृतम् ; अन्यथा हि णम एव पाक्षिकः समासः स्यात् न तु क्त्व इत्यक्षराग्रे क्त्वा चेत्यकृत्वा णम्विधान-मित्यक्षराणि ज्ञातव्यानि ॥८४॥

## [१]तिर्यचाऽपवर्गे ॥५।४।८५॥

**म० वृ०**–अपवर्गे गम्यमाने तिर्यच् इत्यनेना-व्ययेन योगे [तुल्यकर्तृके वर्त्तमानात् धातुसम्बन्धे] कृगः 'कत्वाणमौ' भवतः । [२]तिर्यक् कृत्वा, तिर्यक्-कृत्य; तिर्यक्कारमास्ते ॥८५॥

**अव०**–..........................................................

[[१]'तिर्यचा' इत्यत्र तिरोऽञ्चतीति क्विप्, अञ्चेर्न-कारः 'अञ्चोऽनर्चायाम' (४।२।४६) इत्य]नेन लुप्यते । (यद्यपि) 'तिरसस्तिर्यति' (३।२।१२४) इत्यनेन तिरि आदेशः, तृतीयाटा, 'अच्च् प्राग् दीर्घश्च' (२।१।१०४।इति) अच्स्थाने च् आदेशः, 'सो रुः' (२।१।७२।इति) सः स्थाने र्, ..............
('चटते सद्वितीये' इति......(अने)न श्, एवं तिरश्चा इति सिद्ध्यति, परं तिर्यचा इति शब्दानु-करणाद् भवति । [२]'तिर्यक् कृत्वा' इत्यादीनामर्थोऽ-यम्,– समाप्य विरम्य वा उत्सृज्य वा आस्ते इत्यर्थः ॥८५॥

## स्वाङ्गतस्च्व्यर्थे[१] नाना-विना-धार्थेन[२] भुवश्च ॥५।४।८६॥

**म० वृ०**–तसूप्रत्ययान्तेन स्वाङ्गेन, च्व्यर्थ-वृत्तिभिर्नानाविनाभ्यां धार्थप्रत्ययान्तैश्च योगे भुवः कृगश्च[३] 'क्त्वाणमौ' भवतः । [४]मुखतो भूत्वा, मुखतोभूय, मुखतोभावमास्ते । [५]मुखतः कृत्वा, मुखतःकृत्य, मुखतःकारमास्ते । एवं पार्श्वतो भूत्वा, भूय, [६]भावं शेते । [७]नाना भूत्वा, नानाभूय, नाना-भावं गतः । एवं नाना कृत्वा, कृत्य, कारम् । एवं विना कृत्वा (इत्यादि) । धार्थः,–[८]द्विधा भूत्वा, द्विधा-भूय, द्विधाभावमास्ते । एवं द्विधा कृत्वा, द्विधाकृत्य, द्विधाकारं गतः । स्वाङ्गेति किम् ? सर्वतो भूत्वास्ते । च्व्यर्थेति किम् ? नाना कृत्वा भक्ष्याणि भुङ्क्ते, द्विधा कृत्वा काष्ठानि गतः ॥८६॥

**अव०**–[१]च्वेरर्थो यस्य स च्व्यर्थः । [२]धा-ऽर्थो येषां ते धार्थाः । ★ नानाश्च विनाश्च धार्थाश्च नाना विनाधार्थी – गात्तस् स्वाङ्गतस् स्वाङ्गतस् स्वा– श्च च्व्यर्थी नानाविनाधार्थं च स्वाङ्गतश्चा-र्थनानाविनाधार्थाः तेन (?) । [३]तुल्यकर्तृकेऽर्थे धातुसम्बन्धे सति । [४]मुखतो भवनम् (इति) वाक्यम् । स्वाङ्गत उदाहरणावली । [५]मुखतः करणम् (इति) वाक्यम् । [६]पार्श्वतोभूय, पार्श्वतोभावं शेते । एवं पार्श्वतः कृत्वा पार्श्वतःकृत्य पार्श्वतःकारं शेते । एते स्वाङ्गत इत्यर्थे उदाहरणावली १२ । [७]नाना-

★ अत्र 'नानाश्च' इत्यत आरभ्य 'तेन' इति यावत् पाठोऽशुद्धः, च्युतकियदंशोऽसङ्गतश्च ।

विनाशब्दावव्ययौ । अत्र नाना विना इति क्रियाविशेषणमिति द्वितीयाऽम्, 'अव्ययस्य' (३।२।७) इति अम् लुप्यते। अनाना नाना भूत्वा इति वाक्यम्। नाना भूत्वा, नानाभूय, नानाकारं (?भावं) गतः। एवमनाना (नाना) कृत्वा इति वाक्ये नाना कृत्वा, नानाकृत्य, नानाकारं गतः। एवं विना कृत्वा विनाकृत्य, विनाकारं गतः इत्यपि द्रष्टव्यम्। [५]द्वाभ्यां प्रकाराभ्यां=द्विधा। एवं द्वैधं भूत्वा, भूय, भावमास्ते। द्वैधं कृत्वा, (द्वैधं)कृत्य, द्वैधंकारं गतः। द्वेधा भूत्वा, (द्वेधा) भूय, द्वेधाभावमास्ते। द्वेधा कृत्वा द्वेधाकृत्य द्वेधाकारं गतः।·······(ऐक)ध्यं भूत्वा, भूय, भावमास्ते। एवम् ऐकध्यं कृत्वा ऐकध्यंकृत्य, ऐकध्यंकारं गतः। तथाऽव्ययाधिकारादेव च मुखे तस्यति=मुखतः कृत्वा गतः इत्यत्र न भवति ॥८६॥

## तूष्णीमा ॥५।४।८७॥

म० वृ०–तूष्णींशब्देन योगे भूधातोः धातुसम्बन्धे 'क्त्वाणमौ' भवतः। तूष्णीं भूत्वा, तूष्णींभूय, तूष्णींभावमास्ते [ तूष्णीं भवनम् (इति) वाक्यम् ] ॥८७॥

## [१]आनुलोम्येऽन्वचा[२] ॥५।४।८८॥

म० वृ०–अन्वच् इत्यनेन अव्ययेन योगे आनुलोम्येऽनुकूलेऽर्थे, गम्यमाने भूधातोः [३][धातुसम्बन्धे] 'क्त्वाणमौ' स्याताम्। अन्वग् भूत्वा, अन्वग्भूय, अन्वग्भावमास्ते; अनुकूलो भूत्वा तिष्ठतीत्यर्थः। आनुलोम्य इति किम्? अन्वग् भूत्वा विजयते शत्रुः, पश्चाद् भूत्वेत्यर्थः ॥८८॥

---

अव०–[१]आनुलोम्यम्=अनुकूलता, परचित्ताराधनमित्यर्थः। [२]'अन्वचा' इत्यत्र अनुपूर्वमञ्च्, अन्वञ्चतीति क्विप्, 'अञ्चोऽनर्चायाम्' (४।२।४६। इति) नलोपः, तृतीयाटा, 'अच्च् प्राग् दीर्घश्च' (२।१।१०४।) इत्यनेन अचस्थाने च्, अनु इत्यस्य दीर्घः नू इति, ततोऽनूचा इति सिद्ध्यति, परं शब्दानुकरणात् अन्वचा इति भवति। [३]तुल्यकर्तृके वर्तमानात्। तिर्य·············(चा अन्व)चा इति सूत्रे पाठे शब्दानुकरणात् तिरश्चा अनूचा इति शब्दप्रयोगे क्त्वाणमौ न भवत इत्यर्थः (?) ॥८८॥

## इच्छार्थे कर्मणः सप्तमी ॥५।४।८९॥

म० वृ०–इच्छार्थे धातावुपपदे तुल्यकर्तृकेऽर्थे वर्तमानात् कर्मभूताद्धातोः 'सप्तमीविभक्ति'र्भवति। [१]भुञ्जीय इतीच्छति, भुञ्जीय इति वाञ्छति, [अभिलषति] कामयते। इच्छार्थे इति किम्? भोजको याति। कर्मण इति किम्? इच्छन् करोति[२]। तुल्यकर्तृके इत्येव- इच्छामि भुञ्जतां भवान् ॥८९॥

---

अव०–इच्छार्थे क्रियाः पूर्वं दर्शिताः सन्ति। उप=समीपे पदम्=उपपदमिति व्युत्पत्तौ सत्यामपि इच्छार्थे इति पदे अग्रेऽपि स्थिते भवतीत्यर्थः। कर्मत्वं तुल्यकर्तृत्वं च धातोः श्रुतत्वादुपपदापेक्षं ज्ञातव्यम्। [१]'भुनजोऽत्राणे' (३।३।३७) इत्यनेन भुजेरात्मनेपदमिति सप्तमीय। [२]इच्छन् करोतीत्यत्र ·················(करोतीच्छत्योर्लक्ष्यलक्षणभावो न तु कर्मक्रियाभावः) ॥८९॥

## शक-धृष-ज्ञा-रभ-लभ-सहा-ऽर्ह-ग्ला-घटा-ऽस्ति-समर्थार्थे च तुम् ॥५।४।९०॥

म० वृ०–शक्याद्यर्थेषु धातुषु समर्थार्थेषु नामसु च, चकारादिच्छार्थेषु धातुषूपपदेषु कर्मभूताद्धातोस्तुम् भवति। शक्नोति पारयति वा भोक्तुम्[१]। एवं [२]धृष्णोति, [३]जानाति, [४]आरभते, [५]लभते, [६]सहते, [७]अर्हति, ग्लायति म्लायति वा भोक्तुम्, [८]घटते, अस्ति, विद्यते वा भोक्तुम्। [९]समर्थार्थे,- अलं भवति, इष्टे वा भोक्तुम्। शक्त्या भुज्यते, सामर्थ्येन भुज्यते इत्यादौ त्वनभिधानान्न तुम्। इच्छार्थेषु,- इच्छति भोक्तुम्, भोक्तुं वाञ्छति [कामयते], भोक्तुं वष्टि, भोक्तुमभिलषति। [१०]अतादर्थ्यार्थमक्रियोपपदार्थं चेदं वचनं प्रस्तूयते ॥९०॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ पञ्चमाध्यायस्य चतुर्थः पादः समाप्तः ॥

। इति पञ्चमाध्यायः समाप्तः ।

पादश्लोकसंख्या २५६ । कृतः सर्वपादसंख्या एवम् ९९०।

। शुभं भवतु सर्ववैयाकरणलोकस्य ।

जयति श्रीशब्दानुशासनं श्रीहेमचन्द्राभिधानम् ।

। मङ्गलमस्तु लेखकपाठकयोः । श्री ।

---

अव०—[1]भोजनं भोक्तुम् (इति) वाक्यम् । [2]धृष्णोति अध्यवसति वा भोक्तुम् । एवं [3]जानाति वेत्ति वा भोक्तुम् । [4]आरभते प्रक्रमते वा भोक्तुम् । [5]लभते विन्दते वा भोक्तुम् । [6]सहते क्षमते वा भोक्तुम् । [7]अर्हति प्राप्नोति वा भोक्तुम् । [8]घटते युज्यते वा भोक्तुम् । [9]समर्थार्थे प्रतीतावपि तुम् भवति,—द्रष्टुं चक्षुः, योद्धुं धनुः, कोऽर्थः ? चक्षुर्द्रष्टुं समर्थः । समर्थार्थत्वादेव सिद्धे शकग्रहणमसमर्थार्थं कृतम् । तथा कर्मण इति च सामर्थ्यात् शकादिषु अर्हपर्यन्तेषु इच्छार्थेषु चोपपदेषु सत्सु सम्बन्धनीयम्, न ग्ला इत्यादिषु ; अकर्मकत्वात् । इयमवचूरिः भोक्तुमभिलषतीत्यस्याग्रे द्रष्टव्या । [10]अताद्र्थ्यार्थमिति भणनात् इदं सम्भाव्यते,-भोजनाय भोक्तुमिति वाक्यं न कार्यम् ॥९०॥

अत्र सूत्रे (? पादे) अवचूरिश्लोक– ३७०, अक्षर २१॥ कृत संख्या ( ? कृतः सर्वपादानाम् ) अवचूरिश्लोक-ग्रन्थाग्रम् १५८१, अक्षर २२ ।

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने पञ्चमाध्यायस्य चतुर्थः पादः समाप्तः ॥

॥ अर्हम् ॥

# ॥ षष्ठोऽध्यायः ॥

## [ प्रथमः पादः ]

卐

### तद्धितोऽणादिः ॥६।१।१॥

म० वृ०–इत ऊर्ध्वं योऽणादिः प्रत्ययो वक्ष्यते स 'तद्धितसंज्ञो' विज्ञेयः । औपगवः ॥१॥

---

अव०–तस्मै लौकिकवैदिकशब्दसन्दर्भाय अथवा ताभ्यः प्रकृतिवृत्तिभ्यो हितस्तद्धितः । आद्यं मतं जैनेन्द्रस्य व्याकरणस्य द्वितीयमुत्पलस्य । 'हितादिभिः' (३।१।७१) इति समासः ॥१॥

### [1]पौत्रादि[2] वृद्धम् ॥६।१।२॥

म० वृ०–[3]परमप्रकृतेर्यत् पौत्राद्यपत्यं तद् 'वृद्धसंज्ञं' ज्ञातव्यम् । [4]गार्ग्यः । पौत्रादीति किम् ? अनन्तरापत्ये [=पुत्रे वाच्ये]–[5]गार्गिः ॥२॥

---

अव०–[1]'पौत्रादि वृद्धम्' इत्यत्रापत्यग्रहणाभावेऽपि आदिशब्दस्य प्रकारार्थत्वात् पौत्रस्यापत्यत्वात् तदाद्यपत्यमेव विज्ञायेत, न भ्रात्रादिः इति विशेषः । [2]पुत्रस्यापत्यमनन्तरं पौत्रः, 'पुनर्भूपुत्र०' (६।१।३९) इति अञ् प्रत्ययः, [पौत्र आदौ यस्य तत्पुत्रादि,] सिः, 'अनतो लुप्' (१।४।५९) । [3]परमप्रकृतेरित्यस्याग्रेऽपत्यवत इत्याध्याहार्यम्, ततोऽपत्यवत इति विशेष्यपदम्, परमप्रकृतिरिति विशेषणम्, परमा=प्रकृष्टा प्रकृतिर्यस्य सः, यस्माद् वंश्यपुरुषादन्यः पुरुषो न ज्ञायते । यद्यपि पितामहप्रपितामहादिनीत्या वृद्धसन्तानस्यानन्त्यम्, तथापि यन्नाम्ना कुलं विख्यातं स एव परमप्रकृति ❀ स उच्यते । [4]गर्गस्यापत्यं पौत्रादि गार्ग्यः, 'गर्गादेर्यञ्' (६।१।४२) । [5]गर्गस्यापत्यं पुत्रो गार्गिः, 'अत इञ्' (६।१।३१) ॥२॥

### [1]वंश्य-[2]ज्यायो[3]भ्रात्रोर्जीवति[4] प्रपौत्राद्यस्त्री युवा ॥६।१।३॥

म०वृ०–वंश्यः=पित्रादिरात्मन कारणम्[4] । ज्यायोभ्राता= ज्येष्ठबान्धवः [ वयोऽधिक एकमातृक (एक)पितृकः वा] । जीवति वंश्ये ज्यायोभ्रातरि च प्रपौत्राद्यपत्यं स्त्रीवर्जितं 'युवसंज्ञं' भवति । गार्ग्यायणः[6] । वंश्यज्यायोरिति किम् ? अन्यस्मिन् [उपाध्यायादौ] जीवति– गार्ग्यः [गर्गस्यापत्यं पौत्रादि] । ज्यायोग्रहणं किम् ? लघौ भ्रातरि– गार्ग्यः । जीवतीति किम् ? मृते– गार्ग्यः । प्रपौत्रादीति किम् ? पौत्रो गार्ग्यः ॥३॥

---

अव०–अपत्यवतः परमप्रकृतेश्चतुर्थः पुरुषः प्रपौत्र इत्युच्यते इति प्रपन्नः पौत्रं जनकत्वेन, तथा स्त्रीवर्जितं प्रपौत्राद्यपत्यं प्रपन्नः कारणत्वेन प्रपौत्रः । [1]वंशे भवो=वंश्यः पित्रादिः । [2]वृद्धः अयम्, अनयोरतिशयेन प्रशस्यो वृद्धो= ज्यायान्, 'गुणाङ्गा०' (७।३।९) (इति) ईयस्, वृद्धस्य ज्या इत्यादेशः, ज्यायान् इतीकारस्य आकारः । [3]'सप्तमी चा०' (२।२।१०९ इति) सप्तमी, ओस् । [4]साक्षात् पिता पारम्पर्येण पितामहः तथा प्रपितामहोऽप्यात्मनः कारणम् । 'वंश्यज्यायो०' इति सूत्रे सूत्रार्थः परेणेत्थं कृतः– जीवति वंश्ये ज्यायोभ्रातरि च सति, परमेवं सर्वथा न घटते । इत्थं च सत्यः सूत्रार्थः– वंश्ये ज्येष्ठे भ्रातरि च जीवति सति इति । [5]जीवतीति विशेषणे एकवचनं पृथग्निमित्तत्वद्योतनार्थम्; अत्र पृच्छा– ननु 'वंश्यज्यायोभ्रात्रो'– रिति विशेष्यपदे

---

❀ अत्र "परमप्रकृतिरित्युच्यते" इति पाठेन भाव्यम् ।

द्विवचनम्, जीवतीति विशेषणपदे एकवचनम्; किमर्थमेवं वचनभेदः ? सूरिराह-वचनभेदं (?दः) पृथग्निमित्तत्वद्योतनार्थः, पृथग्=पार्थक्येन वंश्यस्य ज्यायोभ्रातुश्च प्रत्येकं युवसंज्ञां प्रति यन्निमित्तत्वं तस्य द्योतनार्थम्; अन्यथा उभयोरपि जीवतोरियं संज्ञा स्यात्। नैवं व्याख्यानं ज्यायोभ्रातरि जीवत्येव योजनीयमेवं सत्यं व्याख्यानम् (?)। "'गार्ग्यायण' इत्यत्र पूर्वं गर्गशब्दः, गर्गस्यापत्यं वृद्धं गार्ग्यः, 'गर्गादेर्यञ्' (६।१।४२) गार्ग्यः, पश्चात् गार्ग्यस्यापत्यं युवा जीवन् गार्ग्यायणः; 'यञिञः' (६।१।५४) इत्यनेनायनण् ॥३॥

## [1]सपिण्डे वयःस्थानाधिके जीवद्वा ॥६।१।४॥

म० वृ०-[2]वयःस्थानाभ्यां [3]द्वाभ्यामप्यधिके सपिण्डे= समानगोत्रे जीवति [ सति परमप्रकृतिसत्के ] प्रपौत्राद्यपत्यं स्त्रीवर्जितं [पौत्रादि] जीवदेव 'युवसंज्ञं' वा स्यात्। गार्ग्यायणः गार्ग्यो वा। सपिण्डे इति किम्? अन्यत्र मातुलादौ गार्ग्यः। अस्त्रीत्येव- गार्गी ॥४॥

प्रव०-[1]समानः पिण्डः सप्तमपुरुषो यस्य सः, 'समानस्य धर्मादिषु' (३।२।१४९) इत्यनेन समानस्य सभावः। ययोः पुरुषयोरेकः साधारणः पूर्वजः सप्तमः पुरुषो विद्यते तौ पुरुषावन्योन्यस्य सपिण्डौ भवतः। [2]वयः यौवनादिः। [3]स्थानं पिता पुत्रादि 卐 इत्यादि। अस्त्रीति किम्? स्त्री गार्गी। इयं व्यावृत्तिः 'वंश्यज्यायो०' (६।१।३) 'सपिण्डेवय०' (६।१।४) इति सूत्रद्वयोरपि ज्ञेया। गर्गस्यापत्यं पौत्रादि गार्ग्यः, स्त्री चेत् गार्गी, ङी, 'अस्य ङ्यां लुक्' (२।४।८६) इत्यनेन तद्धितप्रत्यये अकारलोपः, 'व्यञ्जनात्तद्धितस्य' (२।४।८८) इत्यनेन तद्धितयस्य लुक् ॥४॥

## [1]युववृद्धं कुत्सार्चे[2] वा ॥६।१।५॥

म० वृ०-युवा च वृद्धं चापत्यं यथासङ्ख्यं कुत्सायामर्चायां च विषये 'युवसंज्ञं' वा स्यात्। गार्ग्यस्यापत्यं युवा कुत्सितो गार्ग्यः गार्ग्यायणो वा जाल्मः, गुर्वायत्तो भूत्वा [3]स्वतन्त्रो यः स एवमुच्यते। कुत्सायामन्यत्र गार्ग्यायण एव। गर्गस्यापत्यं वृद्धमर्चितं तत्रभवान् (= पूज्यः) गार्ग्यायणः गार्ग्यो वा। अर्चायामन्यत्र गार्ग्य एव। अस्त्रीत्येव- गार्गी ॥५॥

प्रव०-[1]'युववृद्ध०' इति सूत्रे युवसंज्ञाविधाने यूनः कुत्सायां गम्यमानायां पक्षे युवत्वं निवर्त्त्यते =निवार्यते, ततो युवत्वनिवृत्तौ सत्यां वृद्धप्रत्ययेन यूनेत्यभिधानं भवति। गार्ग्यस्यापत्यं युवा कुत्सितो गार्ग्यः गार्ग्यायणो वा जाल्मः। कुत्साया अन्यत्र गार्ग्यायण एवेत्यादि। वृद्धस्यार्चायां पक्षे युवत्वं प्रयुज्यते, तत्र युवप्रत्ययेनाभिधानं भवति। तथाहि-गर्गस्यापत्यं वृद्धमर्चितं तत्रभवान् इति वाक्यं सूरिणा वृत्तौ दर्शितमस्ति। 'वंश्यज्यायो०' (६।१।३) इत्यनेन नित्यं प्राप्तौ सत्यां विकल्पार्थं वचनं'युववृद्ध'-मिति। [2]कुत्सा चअर्चा च=कुत्सार्चम्,क्लीबे (२।४।९७)ह्रस्वः। [3]'स्वतन्त्रः', कोऽर्थः अवधीरितगुरुत्वात् स्वच्छन्दचारीत्यर्थः ॥५॥

## [1]संज्ञा दुर्वा ॥६।१।६॥

म० वृ०-या संज्ञा [निमित्तनिरपेक्षा] व्यवहाराय हठात् प्रयुज्यते सा 'दुसंज्ञा' वा स्यात्। [2]देवदत्तीयाः, दैवदत्ताः[3]। दुप्रदेशाः 'दौरीयः' (६।३।३२) इत्यादयः ॥६॥

प्रव०-[1]सम्यग् ज्ञायतेऽनया इति संज्ञा, 'स्थादिभ्यः कः' (५।३।८२। इति कप्रत्ययः), बाहुलकात् स्त्रीत्वम्; अथवा संज्ञानं=संज्ञा, 'उपसर्गादातः' (५।३।११०) इत्यनेन अङ्। [2]देवदत्तस्येमे=देवदत्तीयाः, अत्र दुसंज्ञत्वात् 'दौरीयः' (६।३।३२। इतीयप्रत्ययः)। [3]पक्षे 'प्राग्जितादण्' (६।१।१३) इति भणित्वा 'तस्येदम्' (६।३।१६०) इत्यण्। ६॥

## त्यदादिः[1] ॥६।१।७॥

म० वृ०-सर्वाद्यन्तर्गतास्त्यदादयो 'दुसंज्ञा'

卐 अत्र "स्थानं पिता, पुत्र इत्यादि" इति पाठेन भाव्यम्।

भवन्ति। त्यदीयम्, तदीयम्, यदीयमित्यादि; यादायनिः[२] ॥७॥

अव०–[१]त्यदीयम्, तदीयम्, यदीयम्, इदमीयम्, अदसीयम्, एतदीयम्, एकीयम्, द्वीयम्, युष्मदीयम्, अस्मदीयम्, किमीयम्, भवदीयम्, इति त्यदादिशब्दाः। [२]एवं त्यादायनिः, तादायनिः, यादायनिः इत्यादि। तस्येदं=तदीयमिति वाक्यम्। अस्येदम्=इदमीयम्। अमुष्येदम्=अदसीयम् ॥७॥

## वृद्धिर्यस्य स्वरेष्वादिः ॥६।१।८॥

म० वृ०–यस्य शब्दस्य स्वरेषु मध्ये आदिस्वरो वृद्धिसंज्ञः स शब्दो 'दुसंज्ञः' स्यात्। [१]आम्रगुप्तायनिः, [२]ऐतिकायनीयः, औपगवीयः। वृद्धिरिति किम्? दत्तस्येमे दात्ताः। आदिरिति किम्? [३]साभासंनयनः ॥८॥

अव०–[१]आम्रगुप्तस्यापत्यमाम्रगुप्तायनिः, 'अवृद्धाद्दोर्नवा' (६।१।११०) इत्यनेन आयनिञ्। [२]इतकशब्दः, इतकस्यापत्यं वृद्धमैतिकायनः, 'नडादिभ्य आयनण्' (६।१।५३) इत्यायनण्, ऐतिकायनस्येमे छात्रा ऐतिकायनीयाः, 'दोरीयः' (६।३।३२) ईयः। [३]सभायां संनयनं–सम्यग् नयनं=सभासंनयनम्, सभासंनयने भवः=साभासंनयनः ॥८॥

## एदोद्देश एवेयादौ ॥६।१।९॥

म० वृ०–देशे एव वर्त्तमानस्य यस्य शब्दस्य स्वरेष्वादिः स्वर एकार ओकारो वा स ईयादौ प्रत्यये कर्त्तव्ये 'दुसंज्ञः' स्यात्। [१]सैपुरिका, सैपुरिकी; स्कौनगरिका, स्कौनगरिकी। देशे इति किम्? [२]दैवबाचकं नन्द्यध्ययनम्। ईयादाविति किम्? आयनिञादौ न भवति ॥९॥

अव०–[१]सेपुर इति स्कोनगर इति वाहीकदेशे ग्रामविशेषौ। सेपुरे (स्को)नगरे भवा जाता वा, 'वाहीकेषु ग्रामात्'(६।३।३६) इति सूत्रेण णिकः (तथा) इकण्, इकणन्तस्य 'अणञेयेकण्०' (२।४।२०) इत्यनेन ङी। [२]देवान् वक्ति=देवबाचकः, बाहुलकाण्णकः, देवबाचकेन कृतम्=दैवबाचकम्, 'कृते' (६।३।१९२) इति सूत्रेण अण्। अवश्यं नन्दतीति नन्दी, 'णिन्चावश्यकाधमर्ण्ये' (५।४।३६) णिन्; (नन्दिनोऽध्ययनम्=नन्द्यध्ययनम्) अथवा नन्दन्ति प्राणिनोऽनया इति नन्दी, 'ग्रहादिभ्यो णिन्' 卐 (५।१।५३), नन्दी चासावध्ययनं च=नन्द्यध्ययनम्। 'एदोद्देश एव०' इति सूत्रे एवकारोऽन्यत्र वृत्तिव्यवच्छेदार्थः, तेन देशेऽन्यत्र वर्त्तमानस्य शब्दस्य दुसंज्ञा न भवति; दुसंज्ञाभावान्न णिकेकणौ– क्रोडं नाम उदग्ग्रामः, तत्र भवः=क्रौडः; देवदत्तं नाम वाहीकग्रामः, तत्र भवो=दैवदत्तः। क्रोडशब्दः स्वाङ्गेऽपि वर्त्तते, देवदत्तशब्दः पुरुषेऽपि वर्त्तते; देवदत्त इति शब्दः क्रियाशब्दश्च– देवैर्दत्त इत्येवम् ॥९॥

## प्राग्देशे ॥६।१।१०॥

म० वृ०–प्राग्देशे[१] [=पूर्वदेशे] वर्त्तमानस्य यस्य शब्दस्य स्वरेष्वादिः स्वर एत् ओद्वा स ईयादौ विषये 'दुसंज्ञः' स्यात्। यः शरावतीनद्याः पूर्वोत्तरेण वहन्त्याः पूर्वतो दक्षिणतो वा स प्राग्देशः, [पूर्वोत्तरेण, कोऽर्थः? ईशानतो नैरृतं गच्छन्त्याः पूर्वदक्षिणामाश्रित्य यो देश स प्राग्देशः इत्यर्थः] यस्तु पश्चिमात् उत्तरतो वा स उदग्देशः। यदाहुः–
"प्रागुदञ्चौ विभजते, हंसः क्षीरोदके यथा;
विदुषां शब्दसिद्ध्यै या, सा वः पायाच्छरावती" ॥१॥
[२]एणीपचनीयः, [३] गोनर्दीयः[४] ॥१०॥

अव०–[१]प्राचां देशः=प्राग्देशः, प्राङ् चासौ देशश्चेति वा प्राग्देशः, शरावत्याः नद्याः पूर्वदिशि देशः प्राग्देशः=पूर्वदेशः। [२]एण्यो=हरिण्यः पच्यन्ते यत्र,-'अनट्' (५।३।१२४), एणीपचने भवः। [३]गां

卐 अत्रेदं सूत्रं चिन्त्यम्, "नन्दन्ति प्राणिनोऽनया" इति स्त्रीलिङ्गे विग्रहस्य सत्त्वाद्। "ग्रहादिभ्यो णिन्" इति' सूत्रेण नन्दिन्' इति भवति। तस्य स्त्रीत्वविवक्षायां 'नन्दिनी' इति भवति, न तु 'नन्दी' इति।

नर्दयति इत्यण् , गोनर्द इति प्राग्देशः (? देशस्य) ग्रामः, गोनर्दे भवः,-'दोरीयः' ( ६।३।३२ ), (एवं )[४] भोजकटीयः, क्रोडीयः, दैवदत्तिका, दैवदत्तिकी इति । पूर्वकं (पूर्वसूत्रे ) देशग्रहणमेवकारेण सम्बद्धमिति पुनर्देशग्रहणम् । देश एवेति नियमनिवृत्त्यर्थं वचनम् ॥१०॥

## वाद्यात् ॥६।१।११॥

म० वृ०-वा इति आद्यात् इति च द्वयमप्यधिकृतं ज्ञेयम् । तत्र वाधिकारादित ऊर्ध्वं [१]वक्ष्यमाणाः प्रत्यया विकल्प्यन्ते, तेन पक्षे यथाप्राप्तं वाक्यं समासश्च भवति- उपगोरपत्यम् [वाक्यम् ], उपगवपत्यमिति (समासः) । आद्यादित्यधिकारात् सूत्रे यदादौ निर्दिष्टं [२]तस्मात् प्रत्ययो भवति.-ऐन्द्रं हविः, ऐन्द्रो मन्त्रः ॥११॥

अव०-[१]एते प्रत्ययाः तद्धितसप्तमपादे 'प्रकृते मयट्' (७।३।१) इति सूत्रपादे 'नित्यं ञ्ञिनोऽण्' (७।३।५८) इति सूत्रं यावत् प्रत्यया विकल्पेन क्रियन्ते । [२]तस्मात् प्रत्ययो भवति इत्यक्षराग्रे नान्यस्मात् ; तेन 'साऽस्य' (६।२।९८) इत्यधिकारे 'देवैता' (६।२।१०१) इत्यादौ सेति प्रकृतिरस्येति प्रत्ययार्थो व्यवस्थितो भवति इत्यक्षरावधिर्ज्ञातव्या। तदनन्तरम् ऐन्द्रं हविः,ऐन्द्रो मन्त्रः । इन्द्रो देवताऽस्य =ऐन्द्रः, 'प्राग्जितादण्' (६।१।१३) इति सूत्रेण अण् । एतेन इन्द्रशब्दादण् सिद्धः । देवताशब्दात्परो नाण् इति ज्ञेयम ॥११॥

## गोत्रोत्तरपदाद् गोत्रादिवाजिह्वाकात्यहरितकात्यात् ॥६।१।१२॥

म० वृ०गोत्रमपत्यम् । जिह्वाकात्यहरितकात्यवर्जिताद् गोत्रप्रत्ययान्तोत्तरपदात् गोत्रप्रत्ययान्तादिव' (गोत्रप्रत्ययान्तं यत् उत्तरपदं तस्मादिव इत्यर्थः) वक्ष्यमाणस्तद्धितः स्यात् । [३]यथा-[१]चारायणीयाः, [२]पाणिनीयाः, तथा कम्बलचारायणीयाः, (कम्बलचारायणस्येमे वाक्यम्) ओदनपाणिनीयाः । अजिह्वेत्यादि किम् ? यथा इह ईयः- कात्यस्य छात्राः कातीयाः, तथा इह न भवति- [४]जैह्वाकाताः, हारितकाताः[५] ॥१२॥

अव०-[१]चर, चरस्यापत्यं वृद्धं=चारायणः, 'नडादिभ्य आयनण्' ( ६।१।५३ ); [२]पणिन्, पणिनोऽपत्यं=पाणिनः, 'ङसोऽपत्ये' (६।१।२८) अण् , पाणिनस्यापत्यं युवा=पाणिनिः, 'अत इञ्' (६।१।३१) इत्यनेन इञ् ,'यूनि लुप् '(६।१।१३७) इति इञ् लुप्यते; तदनन्तरं चारायणस्येमे छात्राश्चारायणीयाः, पाणिनस्येमे छात्राः पाणिनीयाः ; 'दोरीयः' (६।३।३२) । [३]अथ सूत्रभावना दर्श्यते-'यथा' इत्यादि, यथाऽत्रोदाहरणद्वये गोत्रप्रत्ययान्तात् शब्दात् ईयप्रत्ययो वक्ष्यमाणः सम्पन्नः, तेन प्रकारेण कम्बलचारायणीयाः ओदनपाणिनीयाः (इति) अत्रापि गोत्रप्रत्ययान्तोत्तरपदादीयः प्रत्ययो वक्ष्यमाणः सिद्धः । कम्बलप्रधानश्चारायणः=कम्बलचारायणः । ओदनभक्ष्योदनप्रधानो वा पाणिनः ओदनपाणिनः, 'मयूरव्यंसकेत्यादयः' ( ३।१।११६ ) इति समासः । एतेन वृत्तौ गोत्रप्रत्ययोत्तरपदात् वक्ष्यमाणतद्धिताः साध्यन्ते, । कस्मादिव ? गोत्रप्रत्ययान्तादिव इति विशेषणम् । [४]कत, कतस्यापत्यं वृद्धं= कात्यः, 'गर्गादेर्यञ्' (६।१।४२), तथा जिह्वाचपलः कात्यो=जिह्वाकात्यः ; [५]हरितं भक्षयतीति हरितभक्षः 'कर्मणोऽण्' (५।१।७२) इत्यस्य बाधकः 'शीलिकामि०' (५।१।७३) इत्यादिना णः, हरितभक्षः कात्यो= हरितकात्यः, ततः पृषोदरादित्वात् चपलभक्षशब्दयोर्लोपः । जिह्वाकात्यस्येमे छात्राः= जैह्वाकाताः,हरितकात्यस्य इमे छात्रा हारितकाताः ; अत्र 'दोरीयः' इति ईयो न भवति, किन्तु 'तस्येदम्' ( ६।३।१६० ) इत्यण् , 'अवर्णेवर्णस्य' (७।४।६८) इत्यकारलोपः, तद्धितयस्वरेऽनाति' (२।४।९२) इति सूत्रेण यकारलोपः ॥१२॥

## प्राग् जितादण्[१] ॥६।१।१३॥

म० वृ०- प्राग् जितशब्दसंकीर्त्तनात् पादत्रयं यावद् येऽर्था अपत्यादयः तेष्वपवादविषयं परिहृत्य [औत्सर्गिकः] 'अण् प्रत्ययो वा' स्यात् । [२]औपगवः, [३]माङ्गिष्ठम् [[४]भैक्षम् । पक्षे वाक्यमेव तिष्ठति] ॥१३॥

अव०–[1]'प्राग् जितादण्' इत्ययं योगः अधिकारार्थः, परिभाषा विधिर्वाऽयम् । विधौ नियमकारिणी परिभाषा उच्यते । अधिकारपक्षे प्राग्जितेत्युत्तरार्थम्, अन्यथा इकणप्रत्ययादिवत् अण् इत्येव सिद्धम् । ननु यद्यधिकारार्थं तर्हि इकण् इत्यादिवत् अण् इत्येवास्तु, किं 'प्राग् जितादण्' इत्यनेन ? इत्याह– उत्तरार्थम्, तेन 'द्विगोरनपत्ये०' (६।१।२४) इत्यादिना प्राग्जितादित्यधिकारोक्तस्यैव प्रत्ययस्य लुप् भवति इत्यर्थः । [2]उपगोरपत्यम्, [3]मञ्जिष्ठया रक्तं वस्त्रम्,[4] एवं भिक्षाणां समूहः, इत्येवं विकल्पपक्षे वाक्यमेव तिष्ठति ॥१३॥

धनादेः पत्युः ॥६।१।१४॥

म० वृ०–धनादेर्गणात्परो यः पतिशब्दस्तदन्ताद्धनपतीत्यादेः 'प्राग्जितीयेऽर्थेऽण् वा' स्यात् । धनपतेरपत्यम् तत्र भवः तत आगतो वा=धानपतः । एवमाश्वपतः ॥१४॥

अव०–धन, अश्व, पशु, गज, शत, गण, कुल, गृह, सेना, धर्म, धन्वन्, सभा, क्षेत्र, अधि, राष्ट्र, धान्य, प्राण इति धनादिगणः । केचित् गृहसेनाशब्दौ न पठन्ति । तन्मते गार्हपत्यम्, सेनापत्यम्; उत्तरेण ञ्य एव ॥१४॥

अनिदम्यणपवादे च दित्यदित्यादित्ययमपत्युत्तरपदाञ्ञ्यः ॥६।१।१५॥

म० वृ०–दिति-अदिति आदित्य-यमशब्देभ्यः पत्युत्तरपदाच्च "प्राग्जितीयेऽर्थे इदमर्थवर्जितेऽ[यत्रेदमर्थो न कथितो भवति इत्यर्थः] पत्यादावर्थे योऽणोऽपवादः प्रत्ययस्तद्विषये च ञ्यः" स्यात्[1] । [2]दैत्यः, [3]आदित्यः, आदित्यः, दैत्यम्, [4]आदित्यम्; याम्यः । पत्युत्तरपद,-प्राजापत्यः[5] । अणपवादे च -[6]आदित्यः, [7]वनस्पतीनां समूहो=वानस्पत्यम् । अनिदमीति किम् ? आदितीयम् ॥१५॥

अव०–[1]ञ्यप्रत्ययो प्राग्जितीयमणं बाधित्वा वर्तमानः सावकाश इति अणोऽपवादस्तद्विषये च ञ्यो भवति इति सूत्रार्थे उक्तम्, अणि प्राप्ते ञ्यः स्यादित्यर्थः । ※ ञ्यविधानं 'ञिदार्षादणिञोः' (६।१।१४०) इति अत्र प्रयोजनम् । [2]दितेरपत्यं=दैत्यः । [3]अदितेरपत्यं=आदित्यः । [4]आदित्यस्यापत्यमिति वाक्ये 'अनिदमि०' इत्यनेन ञ्यः, आदित्यो देवताऽस्येति पुनर्ञ्यः, 'अवर्णेवर्णस्य' (७।४।६८)★इ-अलोपः, तद्धितयस्वरेऽनाति' (२।४।९२) इत्यनेन आदित्यसम्बन्धियलोपः, 'ततोऽस्याः, (१।३।३४) इति सूत्रेण यस्य द्वित्वम्, आदित्य्य इति लिपिः, अथवा दितिर्देवताऽस्य=आदित्यम्, आदित्यो देवताऽस्येति वाक्ये 'अनिदमि०' इति ञ्यः, 'अवर्ण०' इत्यनेन इलोपः (? इकाराकारलोपः), अत्र न यलोपः, अनपत्यत्वात् । [5]प्रजापतेरपत्यं=प्राजापत्यः, प्रजापतिर्देवताऽस्येति वाक्ये प्राजापत्यम् । [6]अणपवादे चेत्यत्रोपरि– यमस्यापत्यं याम्यः । आदित्यस्यापत्यमिति वाक्ये 'ङसोऽपत्ये' (६।१।२८) इत्यौत्सर्गिकोऽण् प्रथमं प्राप्नोति, तस्य बाधकः 'अत इञ्' (६।१।३१), तमिञं बाधित्वा 'अनिदम्यण०' इत्यनेन ञ्यो भवति । तथा [7]वनस्पतीनां समूहो इति वाक्ये प्रथमं 'षष्ठ्याः समूहे' (६।२।९) इत्यण् प्राप्नोति, तमणं बाधित्वा 'कवचिहस्त्यचित्ता०' (६।२।१४) इत्यनेन इकण् प्राप्नोति, तमपीकणं बाधित्वा 'अनिदम्य०' इति ञ्यः क्रियते । एतेनापत्यादावर्थेऽणोऽपवादस्तद्विषयेऽपि ञ्यः प्रत्ययः स्यात् इति सूत्रार्थोदाहरणानि प्रदर्शितानि ॥१५॥

बहिषष्टीकण् च ॥६।१।१६॥

म० वृ०–बहिस्शब्दात् 'प्राग्जितीये टीकण् चकारात् ञ्यश्च' स्यात् । बहिर्जातो=बाहीकम्, बाह्यः; ['प्रायोऽव्ययस्य' (७।४।६५) इत्यन्त्यस्वरादिलोपः] बाह्या, बाहीकी । टकारो ङ्यर्थः, तेन बाहीकीति सिद्धम् ॥१६॥

※ "ञकारस्य वृद्धिः 'ञिदार्षादणिञोः' (६।१।१४०) इति च प्रयोजनम्" इति बृहद्वृत्तौ ।

★ दितेरपत्यमित्यादिष्विकारलोपः, आदित्यस्यापत्यमित्यादिष्वकारलोपः ।

अव०–'गम्भीरपञ्चजनबहिर्देवात्' (६।३।१३५) इत्यनेन भवेऽर्थे परत्वात् ञ्यप्रत्ययविधानात् टीकण् न प्राप्नुयात, 'बहिषष्टीकण् चे'-ति सूत्रकरणात् सूत्रेऽनुक्तेऽपि जाते बहिस्शब्दात् टीकण्ञ्यौ द्वावपि प्रत्ययौ जातेऽर्थे भवतः इत्यर्थः ॥१६॥

## कल्यग्नेरेयण् ॥६।१।१७॥

म० वृ०–कलि-अग्निभ्यां 'प्राग्जितीये अनिदम्यणपवादे च एयण्' स्यात्। [1]कालेयम्, [2]आग्नेयम्। अणोऽपवादे च,–कलेरागतं=कालेयम्। ['नृहेतुभ्यः' (६।३।१५६। इति सूत्रेण अणं बाधित्वा रूप्यमयटौ, तावपि बाधित्वा एयण्] ॥१७॥

अव०–[1]कलिर्देवताऽस्य, [2]अग्निर्देवताऽस्य; अथवा कलौ भवम्, अग्नौ भवम्; यद्वा कलिना ऋषिणा दृष्टं साम कालेयम्, आग्नेयम्; कलेरियं वा, अग्नेरिदं वा; इत्थं सर्वैरपि वाक्यैः कालेयम, आग्नेयमिति प्रयोगः। तथा अणोऽपवादे इदमप्युदाहरणं- कलेर्निमित्तमुत्पातः संयोगो वा– कालेयः, आग्नेयः; अत्र 'हेतौ संयोगोत्पाते' (६।४।१५३) इति इकण्प्राप्तिः, तमिकणं बाधित्वा एयण् भवति।१७।

## पृथिव्या आञ् ॥६।१।१८॥

म० वृ०–पृथिवीशब्दात् 'प्राग्जितीयेऽनिदम्यणपवादे च ञ अञ्' भवतः। पार्थिवः। ञाञोः स्त्रियां विशेषः– पार्थिवा, पार्थिवी; ['अजादेः' (२।४।१६) इत्याप्, 'अणञेयेकण्नञ्स्नञ्टिताम्' (२।४।२०) इति ङी] अणपवादे च– पृथिव्या अपत्यं=पार्थिवः, पार्थिवा; पार्थिवी। सञ्ज्ञादिष्वणिति प्रयोजनमञ्विधानस्य ॥१८॥

अव०–पृथिव्यां भवः=पार्थिवः। पृथिव्यां भवा=पार्थिवा, पार्थिवी। तथा अणोऽपवादोऽयं प्रयोगः। 'पार्थिव' इत्यादि, पृथिव्या अपत्यमिति वाक्ये 'ङसोऽपत्ये' (६।१।२८। इति) अण्प्राप्तिः, तस्याप्यणो बाधको 'ङ्याप्त्यूङः' (६।१।७०) इत्यनेन एयण्, एयणोऽपि बाधकः 'पृथिव्या आञ्' इति अत्रेव ॥१८॥

## उत्सादेरञ् ॥६।१।१९॥

म० वृ०–उत्सादिगणात् प्राग्जितीयेऽनिदम्यणपवादे च 'अञ्' स्यात्। उत्सस्येदमौत्सम् [एवमौदपानम्]। [1]अणपवादे च– उत्सस्यापत्यमौत्सः, एवं [2]तारुणः, [3]पाञ्चालः ॥१९॥

अव०–[1]अणपवादे चेति प्रयोगाः, तथाहि- औत्सः, औदपानः। उदकः, पां पाने, उदकं पीयतेऽस्मिन्-'करणा०' (५।३।१२९) इत्यनट्, 'नाम्युत्तरपदस्य च' (३।२।१०७) इति सूत्रेण उदकस्य उद आदेशः, उदपानम्=निपानम् कूपादि, उदपानस्यापत्यमौदपानः। [2]तरुणी, तरुण्या अपत्यं=तारुणः। [3]पञ्चालेषु जातः=पाञ्चालः। एषु प्राग्जितीयमणं बाधित्वा औत्स औदपान इत्यत्र 'अत इञ्' (६।१।३१। इति इञ्), तारुण इत्यत्र 'ङ्याप्त्यूङः' (६।१।७०) इति एयण्, पाञ्चाल इत्यत्र 'बहुविषयेभ्यः' (६।३।४५) इत्यनेन अकण्, एषां प्राप्तिः, इञ्-एयण्-अकञ्ं बाधित्वा उत्सादेरञ् भवतीत्यर्थः। उत्स, उदपान, विकर, विनद, महानद, महानस, महाप्राण, तरुण, तलुन, धेनु, पङ्क्ति, जगती, बृहती, त्रिष्टुप्, अनुष्टुप्, जनपद, भरत, उसीनर, ग्रीष्म, अच्छन्दसि, पीलकुण, उदस्थान, वृषदंश, भल्लकीय रथन्तर, मध्यंदिन, बृहन्, महत्, महिमन्, सत्वत्, कुरु, पञ्चाल, इन्द्रावसान, उष्णिह, ककुभ्, सुवर्ण, हंसपथ, वर्धमान इत्युत्सादिः ॥१९॥

## बष्कयादसमासे ॥६।१।२०॥

म० वृ०–बष्कयादसमासे वर्त्तमानात् 'प्राग्जितीयेऽनिदम्यणपवादे च अञ्' स्यात्। बाष्कयः। असमास इति किम्? सौबष्कयिः ॥२०॥

अव०–बष्कयो=वत्सः, बष्कयस्यापत्यं बाष्कयः; 'बष्कयाद्०' इति अञ्प्रत्ययः। सुबष्कयस्यापत्यम् ॥ २० ॥

### देवाद्यञ् च ॥६।१।२१॥

म० वृ०—देवात् 'प्राग्जितीयेऽनिदम्यणपवादे यञ् चकारादञ् च' स्यात् । देवस्येदं देवादागतं वा=दैव्यम्, दैवम् । यञन्ताच्च अञन्ताच्च ङ्यां दैवी वाक् [अञि कृतेऽपि ङी] ॥२१॥

अव०—देवस्येयं देवादागता वा इति वाक्ये 'देवाद्यञ् च' इति यञ्, 'यञो डायन् च वा' (२।४।६७) इत्यनेन सूत्रेण ङी, डायन् अन्तागमः (वा)। यञ्प्रत्ययान्तात् ङी, तत्र 'अस्य ङ्यां लुक्' (२।४।८६।इत्यकारलुक्), 'व्यञ्जनात्तद्धितस्य' (२।४।८८) इति सूत्रेण य लुप्यते, 'दैवी' इति रूपम् । 'यञो डायन च वा' इति दैव्य–ङीविचाले डायन्, तत्र 'दैव्यायनी' इत्यपि । इति रूपद्वयम् ॥ २१ ॥

### अः स्थाम्नः ॥६।१।२२॥

म० वृ०—स्थामनशब्दात् 'प्राग्जितीये अः' प्रत्ययः स्यात् । अश्वत्थामः ॥ २२ ॥

अव०—अश्व इति तिष्ठतीति 'मन्वन्क्वनिप्॰' (५।१।१४७) इत्यनेन मन्, पृषोदरादित्वात् सस्य त् । अश्वत्थाम्नोऽपत्यं अश्वत्थामः, ततोऽप्रत्ययः, 'नोऽपदस्य तद्धिते' (७।४।६१) अन् लुप्यते ॥२२॥

### लोम्नोऽपत्येषु ॥६।१।२३॥

म० वृ०—लोमन्शब्दात् 'प्राग्जितीये बह्वपत्यार्थे अः' स्यात् । [उडुवत् लोमान्यस्य स उडुलोमा] उडुलोम्नोऽपत्यानि= उडुलोमाः । बहुवचनं किम् ? औडुलोमिः ॥२३॥

अव०—अपत्येषु इति बहुवचनात् एकस्मिन् अपत्ये द्वयोरपत्ययोर्वा वाक्ययोर्बाह्वादित्वादिञेव– औडुलोमिना, औडुलोमिभ्याम् ॥२३॥

### द्विगोरनपत्ये य-स्वरादेर्लुबद्विः ॥६।१।२४॥

म० वृ०—अपत्यादन्यस्मिन् प्राग्जितीयेऽर्थे उत्पन्नस्य द्विगोः परस्य यकारादेः स्वरादेश्च प्रत्ययस्य सकृद् (=एकवारं) लुप् स्यात्, न तु द्विः (=न तु द्विवारम्)। द्विरथः,[1] [2]पञ्चकपालः, [3]पञ्चेन्द्रः, [4]चतुरनुयोगः । द्विगोरिति किम् ? [5]पौर्वशालः । अनपत्य इति किम् ? [6]द्वैमातुरः । अद्विरिति किम् ? [7]त्रैवेदम् । प्राग्जितादित्येव– [8]द्विरथ्यः ॥२४॥

अव०—[1]द्वयो रथयोर्वोढा=द्विरथः, अथवा द्वयो रथयोः समाहारो= द्विरथी, 'द्विगोः समाहारात्' (२।४।२२) ङी, द्विरथ्या वोढा= द्विरथः, 'रथात्सादेश्च वोढ्रङ्गे' (६।३।१७५) इत्यर्थे 'यः' (६।३।१७६) इति सूत्रेण यप्रत्ययः, 'द्विगोरनपत्ये॰' इत्यनेन यप्रत्ययो लुप्यते, यत्र च ङी कृताऽस्ति तत्र 'ङ्यादेर्गौणस्य॰' (२।४।९५) इति ङीलोपः, द्विरथ इति रूपम् । [2]पञ्चसु कपालेषु संस्कृता, पञ्चकपालानां समाहारः, ङी, पञ्चकपाल्यां वा संस्कृतः, 'संस्कृते भक्ष्ये' (६।२।१४०) अण्, तस्य लुप् । [3]इन्द्रस्य भार्या =इन्द्राणी, 'वरुणेन्द्ररुद्र॰' (२।४।६२) इत्यनेन ङी आन् अन्तागमश्च– इन्द्राणी, पञ्च इन्द्राण्यो देवताऽस्य=पञ्चेन्द्रः, 'देवता' (६।२।१०१) इति सूत्रेण अण्, 'द्विगोरनपत्ये॰' इत्यनेनाणो लुप्, 'ङ्यादे॰' (२।४।९५) इत्यनेन ङीनिवृत्तिः, ततो 'निमित्ताभावे (नैमित्तिकस्याप्य) भावः इत्यानो निवृत्तिः; अथवा पञ्चानां इन्द्राणीनां समाहारः= पञ्चेन्द्राणि, पञ्चेन्द्राणि देवता अस्य– अण्, तस्य लुप्, ङीलोपश्च ; आनस्यापि निवृत्तिः । [4]चतुरनुयोगानधीते, (अथवा) चतुर्णामनुयोगानां समाहारः=चतुरनुयोगी, 'द्विगोःसमाहारात्' (२।४।२२) ङी, चतुरनुयोगीमधीते, 'तद् वेत्त्यधीते' (६।२।११७) इत्यण्, तस्य 'द्विगोरनपत्ये॰' इत्यनेन लुप्; यत्र च ङी प्रत्ययस्तत्र 'ङ्यादे॰' (२।४।९५) इत्यनेन ङीनिवृत्तिः । [5]पूर्वस्यां शालायां भवः= पौर्वशालिकः, 'दिक्पूर्वादनाम्नः' (६।३।२३) इति सूत्रेण णः प्रत्ययः, अत्र 'दिगधिकं संज्ञातद्धितोत्तरपदे' (३।१।९८) इत्यनेन तत्पुरुषसमासः । [6]द्वयोर्मात्रोरपत्यं,– 'सङ्ख्यासम्भद्रान्मातुर्मातुर् च' (६।१।६६) इत्यनेन अण्, मातृशब्दस्य 'मातुर्' आदेशः । [7]त्रीन् वेदानधीते,- 'तद्वेत्त्यधीते' (६।२।११७) इत्यनेन अण्, पश्चात् 'द्विगोरनपत्ये॰'

इत्यनेन अण् लुप्यते, ततः त्रिवेदस्येदं= त्रैवेदम्, 'तस्येदम्' ( ६।३।१६० ) इत्यण्, अणो न लोपः, अद्विरिति वचनात् । [८]द्वौ रथौ वहति=द्विरथ्यः, 'वहति रथयुगप्रसङ्गात्' (७।१।२) इति यः ॥२४॥

[१]प्राग्वतः [२]स्त्री-पुंसान्नञ्-स्नञ् ॥६।१।२५॥

म० वृ०—"वत्प्रत्ययादर्वागर्थेषु अनिदम्यणपवादे च स्त्रीशब्दात् पुम्स्शब्दाच्च यथासङ्ख्यं नञ्-स्नञ् प्रत्ययौ भवतः" । स्त्रिया अपत्यं=स्त्रैणः, पौंस्नः; [३]स्त्रैणम्, पौंस्नम्; [४]स्त्रैणी, पौंस्नी; [५]स्त्रैणः, पौंस्नः । प्राग्वत इति किम् ? [६]स्त्रीवत्, [७]पुंवत् ।२५।

---

प्रव०—[१]'तस्यार्हे क्रियायां वत्' (७।१।५१) 'स्यादेरिवे' (७।१।५२) इति वत्प्रत्ययात् प्राग्=अर्वाक् । [२]स्त्री च पुमांश्च-'स्त्रियाः पुंसो द्वन्द्वाच्च' (७।३।९६) इति (अत्) समासान्तः, तस्मात् । [३]स्त्रीणां समूहः=स्त्रैणम्, पुंसां समूहः=पौंस्नम्, अथवा स्त्रीषु भवं=स्त्रैणम्, पुंसु भवं=पौंस्नम् । तथा [४]स्त्रीणामियं=स्त्रैणी, पुंसामियं पौंस्नी । [५]स्त्रीणां निमित्तं संयोग उत्पातो वा स्त्रैणः, (एवं) पौंस्नः; (एवं) स्त्रीभ्यो हितं=स्त्रैणम्,(एवं)पौंस्नम् । पञ्च एतानि स्त्रिया अपत्यमिति तु षष्ठमेवं 'स्त्रैणः पौंस्न' इति प्रयोगषट्कम् । तत्र स्त्रिया अपत्यं स्त्रीणां समूह इति वाक्यद्वयोपरि प्राग्वत इति विषये "स्त्रैणः पौंस्नः" १ "स्त्रैणं पौंस्नम्" २ इति प्रयोगद्वयं ज्ञेयम् । अनिदम्यणपवादविषये च- स्त्रीषु भवम् ( इत्यर्थे) 'भवे' ( ६।३।१२३ ) इत्यनेनाणेयणोः प्राप्तौ सत्यां तदपवादौ नञ् स्नञ्- स्त्रैणम् पौंस्नम् ।१। स्त्रीणामियं पुंसामियमिति वाक्ये 'तस्येदम्' (६।३।१६०) इत्यणेयणप्राप्तौ नञ् स्नञ्- स्त्रैणी पौंस्नी ।२। स्त्रीणां निमित्तमिति वाक्ये 'हेतौ संयोगोत्पाते' (६।४।१५३) इति उक्तप्रत्ययं बाधित्वा नञ् स्नञ्- स्त्रैणः पौंस्नः ।३। स्त्रीभ्यो हितमिति वाक्ये च 'तस्मै हिते' (७।१।३५ ) इत्युक्तं बाधित्वा नञ् स्नञ्- स्त्रैणम् पौंस्नम् ।४। इत्थं प्रयोगचतुष्कं भवति । पौंस्न इत्यत्र 'पदस्य' (२।१।८९) इति सूत्रेण सलोपः, 'तौ मुमौ व्यञ्जने स्वौ' (१।३।१४) इत्यनेन 'म्' इत्यस्यानुस्वारः, पौंस्न इति सिद्धम् । [६]स्त्रिया अर्हं कृत्यं=स्त्रीवत्, 'तस्यार्हे क्रियायां वत्' (७।१।५१) इति वत्, अथवा स्त्रिया तुल्यं वर्त्तते इति स्त्रीवत्, 'स्यादेरिवे' (७।१।५२) इति वत्; एवं [७]पुंवत्, 'पदस्य' इति सलोपः, 'तौ मुमौ व्यञ्जने स्वौ' इत्यनुस्वारः ॥२५॥

त्वे वा ॥६।१।२६॥

म० वृ०—स्त्रीपुम्स्शब्दात् त्वे तु प्रत्ययविषये भावे यथासङ्ख्यं 'नञ् स्नञ् वा' भवति । स्त्रिया भावः=स्त्रैणम्, स्त्रीत्वम्, स्त्रीता; पौंस्नम्, पुंस्त्वम्, पुंस्ता ॥२६॥

---

प्रव०—'पुंस्त्वम्, पुंस्ता' इत्यत्र 'पदस्य' (२।१।८९) इति सलोपः, 'पुमोऽशिट्यघोषे०' (१।३।९) इति अनुस्वारपूर्वः सकारः, 'चटते सद्वितीये' (१।३।७। इति) रस्थाने स् आदेशः ॥२६॥

[१]गोः स्वरे यः ॥६।१।२७॥

म० वृ०—गोशब्दात् स्वरादितद्धितप्रत्ययप्राप्तौ "यः प्रत्ययः" स्यात् । [२]गव्यम्, [३]गव्यः । स्वरे इति किम् ? [गोभ्यो हेतुभ्य आगतम्, "नृहेतुभ्यो रूप्यमयटौ वा" (६।३।१५६)]गोरूप्यम्, गोमयम् ॥२७॥

---

प्रव०—[१]गोरिदं=गव्यम्, 'तस्येदम्' (६।३।१६०) इत्यणप्राप्तौ: गोरपत्यं=गव्यः, 'चतुष्पाद्भ्य एयञ्' (६।१।८३) प्राप्तौ; गवि भवं=गव्यम्, अत्र 'भवे' ( ६।३।१२३ ) इत्यण् एयणप्राप्तौ; गौर्देवताऽस्य=गव्यः, अत्र 'देवता' ( ६।२।१०१ ) इत्यनेन अणादिप्राप्तौ; गवा चरति=गव्यः, 'चरति' (६।४।११) इति अनेन इकणप्राप्तौ; सर्वत्र 'गोः स्वरे यः' इति सूत्रेण यप्रत्यय एव भवति, नान्यः । [२]'य्यक्ये' (१।२।२५) इति सूत्रेण अवादेशः ॥२७॥

ङसोऽपत्ये ॥६।१।२८॥

म० वृ०—अणादयोऽनुवर्त्तन्ते । ङसः=षष्ठ्यन्तान्नाम्नोऽपत्यार्थे 'यथाभिहितमणादयो' भवन्ति ।

-औपगवः, धानपतः, दैत्यः, ['प्राग् जितादण्' (६।१।१३) 'धनादेः पत्युः' (६।१।१४) 'अनिदमि०' इति] औत्सः, स्त्रैणः, पौंस्नः। अपत्ये इति किम्? भानोरयं=भानवीयः ['दोरीयः' (६।१।३२),] ॥२८॥

अव०–'यथाभिहितम्', कोऽर्थः? अभिहितस्य=उक्तस्यानतिक्रमेण 'प्राग् जितादण्' (६।१।१३) इति सूत्रादारभ्य ये प्रत्यया उक्ता त एत्रापत्यार्थे भवन्तीत्यर्थः। 'तस्येदम्' (६।३।१६०) इत्यनेन अणादिसिद्धावपत्यविवक्षायां 'तस्येदम्' (६।३।१६०) इत्यस्यापवाद–'दोरीयः' (६।१।३२) सूत्रम्, तस्य बाधनार्थं 'ङसोऽपत्ये' इदं वचनं कृतम्, अन्यथा दुसंज्ञकादपत्यविवक्षायामपि 'ईय' एव स्यात्, तेन★ भानोरपत्यं=भानवः, अत्र 'दोरीयः' इतीयो न भवति ॥२८॥

## आद्यात् ॥६।१।२९॥

म० वृ०–अपत्ये येऽणादयः [येऽणादयः प्रत्ययाः पूर्वं विहिताः] ते आद्यात् परमप्रकृतेरेव भवन्ति। सर्वपूर्वजानां पौत्राद्यपत्यमापरमप्रकृतेः पारम्पर्येण सम्बन्धादपत्यं भवति। तत्र तैस्तैः [पुत्रपौत्राद्यपत्यैः सह पूर्वजानां] सम्बन्धविवक्षायामनन्तरवृद्धयुवभ्योऽपि प्रत्ययः प्राप्नोति इति नियमार्थमारम्भोऽयम्। उपगोरपत्यमनन्तरं वृद्धं वा=औपगवः, तस्यापि औपगविः, औपगवेरपि औपगवः ॥२९॥

अव०–[1]'अनन्तरवृद्धयुवभ्योऽपी'त्यक्षराणामयं भावार्थः–गर्गस्यापत्यमनन्तरं=गार्गिः इतीञन्तात् गर्गस्यापत्यं वृद्धं=गार्ग्यः इति यञन्तात् गार्ग्यस्यापत्यं युवा गार्ग्यायण इति आयनणन्ताच्चापत्यार्थे विहितोऽणादिः प्रत्ययो मा भूत्, किन्तु मूलप्रकृतेः उपगु गर्ग इत्येवंरूपादेव (इत्येवंरूपाया एव ?) अपत्यप्रत्यय उत्पद्यते; न गार्गि-गार्ग्य-गार्ग्यायणात् परतोऽपत्यप्रत्ययः। तथा युवार्थापत्यप्रत्ययं प्रति च वृद्धापत्यप्रत्ययैरेव प्रकृतिराश्रीयते वृद्धापत्यप्रत्ययान्तप्रकृतेः परतो युवार्थापत्यप्रत्यय उत्पद्यते ❈नथैव 'वृद्धाद् यूनि' (६।१।३०) इति वक्ष्यमाणसूत्रे वक्ष्यते। एतेनापत्यप्रत्ययोऽनुत्पन्नप्रत्ययान्ताया एव प्रकृतेर्भवतीत्यर्थः। 'आद्या'दिति सूत्रे (एवं) ज्ञापितं ततः परोऽनन्तरवृद्धयुवप्रत्ययो भवतु मा वा भवतु परमयं विशेषः-एकस्मिन् प्रत्यये कृते ततः परेऽन्यस्मिन् प्रत्यये क्रियमाणे प्राक्तनो लुप्यते। अनन्तराद् योऽपि परमप्रकृतिरूपेणैवाऽपत्येऽर्थे प्रत्ययमुत्पादयन्ति। अस्यार्थः– न केवलमुपगु गर्ग इत्येवंरूपायाः परमप्रकृतेः परतोऽपत्यप्रत्ययः, किन्तु अनन्तरापत्यार्थप्रत्ययः, वृद्धार्थापत्यप्रत्ययः, युवार्थापत्यप्रत्ययः इत्येतेऽपत्यप्रत्ययाः परमप्रकृतेरेव भवन्ति इति 'आद्यात्' इति सूत्रे विशेषो ज्ञेयः ॥२९॥

## वृद्धाद् यूनि ॥६।१।३०॥

म० वृ०–यून्यपत्यविवक्षिते यः प्रत्ययः स आद्याद् वृद्धात्= परमप्रकृतेर्यो वृद्धप्रत्ययस्तदन्तात् स्यात्। आद्यादित्यस्यापवादः। वृद्धादिति यूनि प्रकृतिर्विधीयते। गर्गस्यापत्यं वृद्धं= गार्ग्यः, गार्ग्यस्यापत्यं युवा गार्ग्यायणः, 'यञिञः' (६।१।५४) इत्यायनण्। यूनीति किम्? गार्ग्यः ॥३०॥

अव०–'वृद्धाद्यूनि' इति सूत्रे आद्यादिति किम्? उपगोरपत्यं वृद्धम्= औपगवः, औपगवस्यापत्यं युवा औपगविः, औपगवेरपत्यं युवा औपगविः; गार्ग्यायणस्यापत्यं युवा गार्ग्यायणः, अत्रायनण् इञ् च न भवति इति ज्ञेयम् ॥३०॥

## अत इञ् ॥६।१।३१॥

म० वृ०–ङसोऽपत्ये इति वर्त्तते। अकारान्तात् ङसन्तान्नाम्नो-'ऽपत्येऽर्थे इञ्' स्यात्। अणोऽपवादः। दाक्षिः, अस्यापत्यमिः (कामः), कथं 'प्रदीयतां दाशरथाय[1] मैथिली',[2] ? 'तस्येदम्' (६।३।१६०) इति [3]विवक्षायामण् भविष्यति। अथ काकबकशुकादेः कथं नेञ्? जात्यैवापत्यार्थस्य पौत्रादेरनन्तरस्य च उक्तत्वात्। यत्र [4]स्वर्थप्रकरणादेर्विशेषप्रतीतिरस्ति तत्रेञ् स्यादेव, यथा "कुतश्चरति

★ 'तस्येदम्' (६।३।१६०) इत्यनेनाणादिसिद्धावपत्यविवक्षायां तदपवादबाधनार्थमिदं वचनं कृतं तस्मादित्यर्थः।
❈ इत्येवमेवेत्यर्थः।

मायूरिः,[५] केन कापिञ्जलिः[६] कृशः"; [७]एतेन काक्यादिभ्य एयणादयोऽपि व्याख्याताः[८] । कथं तर्हि क्रौञ्चः कौकिलः ['शिवादेरण्' (६।१।६०)] चाटकैरः ['चटकाण्णैरः०' (६।१।७९)] ? जातिशब्दा एवैते, यथाकथञ्चिद् व्युत्पाद्यन्ते: यथा [९]क्षत्रं–[१०]क्षत्रियाः, राजा– [११]राजन्यः, [१२]मनुः– मनुष्यः, मानुषः । शतसर्वंवृद्धकारकराजपुरुषमाथुरकुररादिभ्योऽनभिधानान्न इञ् ॥३१॥

अव०–[१]मिथिलाया अयं स्वामी– 'तस्येदम्' (६।३।१६०) अण्, मैथिलस्यापत्यम्, 'ऋषिवृष्ण्य०' अण्, ततो ङी । [२] "त्यजस्व कोपं कुलकीर्त्तिनाशनं, भजस्व धर्मं कुलकीर्त्तिवर्द्धनम्; प्रसीद जीवेम सबान्धवा वयम्" इत्युदाहरणपादत्रयं ज्ञेयम् । [३]दशरथस्यायमिति दाशरथः, अपत्यविवक्षायां तु 'दाशरथिः' इत्येव भवति । [४](आदिशब्दात्) शब्दान्तरसन्निधेः । [५]नियतस्य कस्यचित् पुरुषस्य मयूर इति संज्ञा, मयूरस्यापत्यं=मायूरिः । [६]कपिञ्जलस्यापत्यं=कापिञ्जलिः, 'अत इञ्' (६।१।३१) । [७]पूर्वोक्तप्रकारेण । [८]विशेषप्रतीतौ सत्यामेयणादयो भवन्तीत्यर्थः, अन्यत्र तु जात्यभिहितत्वान्न भवति । [९]क्षणूयी हिंसायाम् (इति) क्षण् : क्षणनं क्षत्, 'क्रुत्सम्पदादिभ्यः क्विप्' (५।३।११४),★'यमिरमिनमिगमि०' (४।२।५५) इत्यनेनान्तलोपः, ततस्तोऽन्तः, क्षतस्त्रायते– क्षत्रम्, 'स्थापास्नात्रः कः' (५।१।१४२) इति कः, हिंसार्थात् सौत्रछदिधातोः वा 'हुयामा०' (४५१) इत्यौणादिकः त्रः ❀ । [१०]क्षत्रस्यापत्यं=क्षत्रियः, 'क्षत्रादियः' (६।१।९३) । [११]राज्ञोऽपत्यं=राजन्यः, 'जातौ राज्ञः' (६।१।९२) इति सूत्रेण यः प्रत्ययः, 'अनोऽटये ये' (७।४।५१) इत्यन्तस्वरादिलोपनिषेधः । [१२]मनु, मनोरपत्यं–'मनोर्याणौ षश्चान्तः' (६।१।९४) इति सूत्रेण य-अण्प्रत्ययौ षोऽन्तश्च ।३१।

**बाह्वादिभ्यो गोत्रे[१] ॥६।१।३२॥**

म०वृ०–बाह्वादिभ्यो 'गोत्रेऽपत्येऽर्थे इञ्' स्यात् । [२]अनकारान्तार्थः बाधकबाधनार्थश्चायमारम्भः । बाहोरपत्यं=बाहविः । गोत्रे इति किम् ? योऽप्यत्वे[३] बाहुर्नाम तस्यापत्यं=बाहवः । सम्भवापेक्षं च गोत्रग्रहणम्, तेन पञ्चानामपत्यं=पाञ्चिः, सात्तिः आष्टिः इत्यादि सिद्धम् ॥३२॥

अव०–[१]स्वापत्यसन्तानस्य स्वव्यपदेशकारणमृषिरनृषिर्वा यः प्रथमः पुरुषस्तदपत्यं गोत्रम्, तस्मिन्नेवंविधे गोत्रे । [२]न अकारान्तः=अनकारान्तः, अकारान्तशब्दं वर्जयित्वा शेषस्वरा तेभ्य इञ् भवतीत्यर्थः । [३]अखण्डमव्ययं त्वप्रत्ययान्तो वा अपशब्दः सप्रत्ययः । बाहु, उपबाकु, निवाकु, वटाकु, चाटाकु, चटाकु, उपबिन्दु, वृकला, कृकला, चूडा, बलाका, जङ्घा, छगला, भगला, लगहा, ध्रुवका, धुवका, मूषिका, सुमित्रा, दुर्मित्रा । वृकलादिशब्देभ्यो यथासम्भवमेयण्, एयणं बाधित्वा 'दोर्नदीमानुषी-'ति सूत्रेणाण्, तस्याप्यपवादः 'बाह्वादिभ्य इञ्', इति बाधकबाधनार्थश्चायमारम्भः इति घटितम् । युधिष्ठिर, अर्जुन, राम, सङ्कर्षण, कृष्ण, गद, प्रद्युम्न, शाम्ब, सत्यक, शूर इत्यष्टौ ( ? दश ) वृष्णयो यादवाः; एषु 'ऋषिवृष्ण्यन्धक०' इत्यणोऽपवाद इञ् । असुर, अजीगर्त्त, मध्यंदिन ; एते त्रय ऋषयः । सुधावत्, स्वधावत्, पुष्करसद्, अनुरहत्, अनडुह्, पञ्चन्, सप्तन्, अष्टन्, क्षेमधन्विन्, माषशराविन्, शृङ्खलकोदिन्, (शृङ्खलतोदिन्,) नगरमर्दिन्, इन्द्रशर्मन्, भद्रशर्मन्, अग्निशर्मन्, देवशर्मन्, उपदङ्क, उदङ्क, कुनामन्, सुनामन्, (सुदामन्,) शिरस्, लोमन्; एतौ तदन्तौ, हास्तिशीर्षिः, औडुलोमिः, शाल्लोमिः इति बाह्वादिगणः । बहुवचनमाकृतिगणार्थम्, तेन सख्युरपत्यं=साखिः, सांवेशिः, उदङ्कस्यापत्यम्=औदङ्किः, औदा-

❀ इदं चिन्त्यम्, 'गमां क्वौ' (४।२।५८) इत्यनेनान्तलोपसद्भावात् ।

★ अथवा क्षणनं=क्षतः, क्लीबे क्तः, 'यमिरमि०' (४।२।५५) इत्यन्तलोपः, क्षतात् त्रायते इति स्थापास्नात्रः कः (५।१।१४२) इति कः, पृषोदरादित्वादस्य लोपः ।

लकिः, वाल्मिकिः, आरुणिः । इत सूत्रादारभ्य गोत्रे सति इञ्, अगोत्रे 卐 निषेधः ॥३२॥

## वर्मणोऽचक्रात् ॥६।१।३३॥

म० वृ०—चक्रशब्दवर्जितात्परो यो वर्मन् तदन्तादपत्येऽर्थे 'इञ्' स्यात् । [इन्द्रवर्मणोऽपत्यम्=] ऐन्द्रवर्मिः । अचक्रादिति किम् ? चाक्रवर्मणः ।३३।

## अजादिभ्यो धेनोः ॥६।१।३४॥

म० वृ०—अजादिभ्यः परो यो धेनुस्तदन्तादपत्येऽर्थे 'इञ्' स्यात् । [1]आजधेनविः, बाष्कधेनविः [अजादयः प्रयोगगम्याः ] ।।३४॥

अव०–[1]अजा चासौ धेनुश्च, 'पोटायुवति०' (३।१।१११) इति समासः, 'पुंवत् कर्मधारये' (३।२।५७) पुंवद्भावः । यदि पुनरजा धेनुर्यस्य बष्का धेनुर्यस्येति बहुव्रीहिः क्रियते तदा 'स्वाङ्गाद्ङीर्जाति०' (३।२।५६) इत्यनेन पुंवन्निषेधः स्यात् ।३४।

## ब्राह्मणाद्वा ॥६।१।३५॥

म० वृ०—ब्राह्मणशब्दपरात् धेनुशब्दादपत्येऽर्थे 'इञ् वा' स्यात् । ब्राह्मणधेनविः, ब्राह्मणधेनवः ['उत्सादेरञ्' ।६।१।१९ ] ॥३५॥

## भूयःसम्भूयोऽम्भोऽमितौजसः स्लुक् च ॥६।१।३६॥

म० वृ०—भूयस्, सम्भूयस्, अम्भस्, अमितौजस्- एभ्यः परोऽपत्ये 'इञ् सकारलोपश्च' स्यात् । भूयसोऽपत्यं=भौयिः, भूयोभिः सङ्गतः=सम्भूयः, सम्भूयसोऽपत्यं=साम्भूयिः, आम्भिः, आमितौजिः ॥३६॥

## शालङ्क्यौदि-षाडि-वाड्वलि ॥६।१।३७॥

म० वृ०—एते शब्दा अपत्ये 'इञन्ता' निपात्यन्ते । [1]शालङ्किः, [2]औदिः, [3]षाडिः, [4]वाड्वलिः, ॥३७॥

अव०–[1]शलङ्कु शब्दः, शलङ्कोरपत्यम्, अत्रेञ्, निपातनात् उकारलोपः । [2]उदकस्यापत्यमौदिः, इञ् कलोपश्च निपात्यते । [3]षण्णामपत्यं षाडिः, इञ्, अन्तस्य च डत्वं निपात्यते । [4]वाचं वदति= वाग्वादः, 'कर्मणोऽण्' (५।१।७२), वाग्वादस्यापत्यं =वाड्वलिः, इञ्, वाचोऽन्तस्य डत्वम्, उत्तरपदस्य वादशब्दस्य वल इति च निपात्यते ॥३७॥

## व्यास-वरुट-सुधातृ-निषाद-बिम्ब-चण्डालाद-न्त्यस्य चाक् ॥६।१।३८॥

म० वृ०—व्यासादिभ्योऽपत्ये 'इञ् तद्योगे च एषामक् इत्यन्तादेशः' स्यात् । व्यासस्यापत्यं=वैयासकिः,[1] वारुटकिः, सौधातकिः, नैषादकिः, बैम्बकिः, चाण्डालकिः ॥३८॥

अव०–[1]'वैयासकिः',इञि 'य्वःपदान्तात् प्रागैदौत्' (७।४।५) इत्यनेन व्या इति विचाले ऐकारः । कर्मार-व्याघ्राग्निशर्मभ्योऽपीच्छन्त्येके–कार्मारकिः, वैयाघ्रकिः, आग्निशर्मकिः ॥३८॥

## पुनर्भू-पुत्र-दुहितृ-ननान्दुरनन्तरेऽञ् ॥६।१।३९॥

म० वृ०—एभ्यो-'ऽनन्तरेऽपत्यार्थेऽञ्' स्यात् । पुनर्भ्वा अनन्तरमपत्यं=पौनर्भवः, पौत्रः, दौहित्रः, नानान्द्रः ॥३९॥

## परस्त्रियाः परशुश्चासावर्ण्ये ॥६।१।४०॥

म० वृ०—परस्त्रीशब्दादनन्तरेऽपत्येऽञ् स्यात्, तद्योगे परस्त्रीशब्दस्य परशुभावश्च; असावर्ण्ये=यदि परस्त्रीशब्दो ब्राह्मणत्वादिपुरुषेण समानवर्णो न स्यात् । परा पुरुषाद्भिन्नवर्णा स्त्री=परस्त्री, तस्या अनन्तरापत्यं=पारशवः । असावर्ण्ये इति किम् ? परस्य स्त्री=परस्त्री, तस्या अनन्तरापत्यं=पारस्त्रैणेयः[1] ॥४०॥

卐 अत्रायं भावः–यत्र गोत्रमगोत्रं च संभवति तत्र गोत्रादन्यत्रेञ्प्रतिषेधः, यत्र च गोत्रं न संभवति तत्र त्वगोत्रेऽपीञ् भवति ।

अव०–¹परस्त्रीशब्दात् 'कल्याणादेरिन् चान्तस्य' (६।१।७७) इत्यनेन एयण्, प्रकृतेरन्तस्य 'इन्' आदेशः; 'अनुशतिकादीनाम्' (७।४।२७) इति सूत्रेण परशब्दस्य स्त्रीशब्दस्य च एवमुभयपदवृद्धिः ॥४०॥

## विदादेर्वृद्धे ॥६।१।४१॥

म० वृ०–¹विदादिभ्यो 'वृद्धेऽपत्येऽर्थे अञ्' स्यात् । विदस्यापत्यं वृद्धं=वैदः, वैदौ, विदाः;² काश्यपः, काश्यपौ, कश्यपाः । वृद्ध इति किम् ? विदस्यापत्यमनन्तरं= वैदिः³ ॥४१॥

अव०–¹विद, उर्व, कश्यप, कुशिक, भरद्वाज, उपमन्यु, किलात, कीदर्भ, विश्वानर, ऋष्टिषेण, ऋतभाग, हर्यश्व, प्रियक, पियक, अपस्तम्भ, कुवाचर, कूवाचर, शरद्वत्, शुनक, धेनु, धेनुशब्द उत्सादिगणेऽपि पठ्यते, तत्र स धेनुर्नवप्रसूतगव्यादिवाचकः, अत्र तु गणे धेनुः ऋषिवाचकः, अश्व, शङ्ख; एतावश्वादिगणेऽपि; तथा गोपवन, शिग्रु, बिन्दु, ताजम, अश्वावतान, श्यामाक, श्यामाकम्, श्यापर्ण एवं शब्दाः ८, तथा हरित, किन्दास, वस्यस्क, अर्कलुश, बध्योग, विष्णुवृद्ध, प्रतिबोध, रथीतर, रथन्तर, गविष्ठिर, गविष्ठिल, निषाद, शबर, मठर, सृदाकु, पृदाकु एवं शब्द १६, इति विदादिगणः । ²विदा इत्यत्र बहुत्वे उत्पन्नस्य अञ्प्रत्ययस्य 'यञञोऽश्यापर्णान्तगोपवनादेः'(६।१।१२६) इत्यनेन लुप् । ³(एवम्) गर्गस्यापत्यमनन्तरं गार्गिः, 'बाह्वा०' (५।१।३२) इञ् ॥४१॥

## गर्गादेर्यञ् ॥६।१।४२॥

म० वृ०–गर्गादिभ्यो 'वृद्धेऽपत्ये यञ्' स्यात् । गर्गस्यापत्यं वृद्धं=गार्ग्यः । वृद्ध इत्येव– गार्गिः । गोत्रे इत्येव गर्गो नाम कश्चित्, तस्यापत्यं वृद्धं गार्गिः (अत इञ्) (६।१।३१) । कथम् "अनन्तरो रामो जामदग्न्यः स पाराशर्यः"; ? पुत्रेऽपि पौत्रादिकार्यकरणात्तथोच्यते । अनन्तरापत्यविवक्षायां 'जामदग्न्यः पाराशरिः' । कथं पाराशरः ? 'तस्येदम्' (६।३।१६०) इति भविष्यति । ४२॥

अव०–ननु मनुशब्दो गर्गादिगणमध्ये लोहितादिगणे पठ्यते ततो 'लोहितादिशकलान्तात्' (२।४।६८) इत्यनेन ङीडायन्प्रत्यये 'मानव्यायनी' इति प्रयोगः प्राप्नोति, (अतः) कथं "मानवी प्रजाः" इति सिद्धिः; ? उच्यते, अपत्यसामान्यविवक्षायां मनोरपत्यमिति वाक्ये 'ङसोऽपत्ये' (६।१।२८) अण् भविष्यति । गर्गादिगणे मनायीशब्दः पठ्यते, मनायीशब्दस्य मानुषीनामत्वविवक्षायाम् 'अदोर्नदीमानुषी०' (६।१।६७) इत्यनेन अण् प्राप्नोति, ❀ अन्यथा तु मनोर्भार्या=मनायी, 'मनोरौ च वा' (२।४।६१) इत्यनेन ङी, ऐत्वं च; मनायी इति सिद्धम्, मनाय्या अपत्यम्– 'ङयाप्त्यूङः' (६।१।७०) इत्यनेन एयण् प्राप्नोति, इत्थमण्-एयणोः प्राप्तौ सत्यां यञ्प्रत्ययार्थमत्र पाठः, ततो 'मानाय्य' इत्येव भवति प्रयोगः । मानाय्य इत्यत्र 'जातिश्च णि०' (३।२।५१) इत्यनेन पुंवद्भावः कथं न भवति ? पुंवद्भावे हि मानव्य इति स्यात्, तत्राह सूरिः– कौण्डिन्यागस्त्ययोः०' (६।१।१२७) इत्यत्र 'कौण्डिन्य' इति निर्देशाद्गित्यः पुंवद्भाव इति न भवति । गर्ग, वत्स, वाज, अज, संकृतिः, संकृतेर्गर्गादिपाठात् सद् न भवति इत्यर्थः, व्याघ्रपाद्, विदभृत्, पितृबध्, प्राचीनयोग, पुलस्ति, रेभ, शङ्ख, शट, धूम, अवट, नभस, चमस, धनञ्जय, वृक्ष, विश्वावसु, जरमाण, कुरकत, (बृहद्वृत्तौ कुरुकत) अनडुह, लोहित, संशित, (वक्र,) बभ्रु, बम्लु, मण्डु, मङ्क्षु, मङ्खु, शंखु, शङ्कु, लतु, लिगु, गूहलु, जिगीषु, मनु, तन्तु, मनुतन्तु, ★मन्तु मनायी, सुनु, श्रुव, कच्छक, ऋक्ष, ● रूक्ष, तरुक्ष,

❀ मानुषीनामत्वविवक्षाभावे त्वित्यर्थः । 'अन्यथा तु' इत्यस्य 'मनाय्या अपत्यम्' इत्यादिना सह सम्बन्धः । 'मनोर्भार्या' इत्यादि तु प्रसङ्गाद् 'मनायी' शब्दसिद्ध्यर्थमुक्तम् ।

★ 'मन्तु' इति बृहद्वृत्त्यादिषु न विद्यते । ● बृहद्वृत्त्यादिषु 'रुक्ष' इत्यपि ।

तलुक्ष, तण्डिन्, वतण्ड, कपि, कत, शकल इति लोहितादिगणः शकलान्तः, शब्दाः ३१, 'लोहितादि शकलान्तात्' (२।४।६८) इति सूत्रे फलम् । कण्व, वामरथ, गोकक्ष, कुण्डिनी, यज्ञवल्क, पर्णवल्क, अभयजात, विरोहित, वृषगण, रहोगण, शण्डिल, मुद्गर, मुद्गल, मुसर, मुसल, पराशर, जतूकर्ण, मन्द्रित, अश्मरथ, शर्कराक्ष, पूतिमाष, स्थूर, स्थूरा, अरराका, पिङ्ग, पिङ्गल, कृष्ण, गोलुन्द, उलूक, तितिम्भ, भिष, भिषज, [ भिष्णज, ] भण्डित, भडित, दल्भ, चिकित, देवहू, इन्द्रहू, यज्ञहू, एकलू, पिप्पलू, परयलू, [वृहलू, ५ष्कलू,] वृहदग्नि, जमदग्नि, शुलाभिन, कुटीगु, उक्थ, कुटल, चणक, चुलुक, कर्कट, अलापिन्, सुवर्ण, सुलाभिन् इति गर्गादिगणः ।।४२।।

## मधु-बभ्रोर्ब्राह्मण-कौशिके ।।६।१।४३।।

म० वृ०—मधुशब्दाद् बभ्रुशब्दाच्च यथासङ्ख्यं 'ब्राह्मणे कौशिके च वृद्धेऽपत्ये यञ्' स्यात् । माधव्यो ब्राह्मणः, माधवोऽन्यः [ 'ङसोऽपत्ये' (६।१।२८) ] । बाभ्रव्यः कौशिकः, बाभ्रवोऽन्यः ।।४३।।

अव०—बभ्रु-कपि-वतण्डशब्दानां गर्गादिपाठादेव यञि सिद्धेऽपि, 'बभ्रुशब्दात् कौशिकार्थे एव' नियमार्थम् - 'कपिशब्दादाङ्गिरसे एवार्थे' इति नियमार्थम् 'मधुबभ्रोर्ब्राह्मण०' 'कपिबोधादा०' (६।१।४४) इति सूत्रे बभ्रु-कपिपाठः कृतः ; अथवा लोहितादिकार्यार्थश्च गणपाठः, तेन 'बाभ्रव्यायणी, काप्यायनी' इति सिद्धम्; अत्र 'लोहितादिशकलान्तातादु' (२।४।६८) इति डायन्, ङी ।।४३।।

## कपि-बोधादाङ्गिरसे ।।६।१।४४।।

म० वृ०—कपिबोधशब्दाभ्यामाङ्गिरसे 'वृद्धेऽपत्ये यञ्' स्यात् । कपेरपत्यं वृद्धमाङ्गिरसः काप्यः, बौध्यः । अन्यः कापेयः [इतोऽनिञः (६।१।७२) ], बौधिः ।।४४।।

---

अव०—तथा मधुबोधयोस्तु पूर्वं यञ्, यञन्ताच्च 'यञो डायन् च वा' ( २।४।६७ ) इति सूत्रेण ङी नित्यं डायन् चान्तो विकल्पेन, तेन माधवी ब्राह्मणी, माधव्यायनी च; बौधी आङ्गिरसी, बौध्यायनी ।।४४।।

## वतण्डात् ।।६।१।४५।।

म० वृ०—वतण्डशब्दादाङ्गिरसेऽपत्ये 'यञेव' स्यात् । वतण्डस्यापत्यं वृद्धमाङ्गिरसः वातण्ड्यः ।।४५।।

अव०—वतण्डादाङ्गिरसे एव शिवाद्यण्बाधनार्थं वतण्डात् इति सूत्रे पाठः । आङ्गिरसादन्यत्र गर्गादिशिवादिपाठान् यञ् अण् च भवतः,- वातण्ड्यः, वातण्डः ।।४५।।

## स्त्रियां लुप् ।।६।१।४६।।

म० वृ०—वतण्डादाङ्गिरसेऽपत्ये [ वृद्धे ] 'स्त्रियां यञो लुप्' स्यात् । वतण्डस्यापत्यं वृद्धं स्त्री आङ्गिरसी=वतण्डी[1] । अनाङ्गिरसे तु शिवादिपाठाद्वातण्डी, लोहितादिपाठाद्वातण्ड्यायनी ।।४६।।

अव०—[1]'वतण्डी' इत्यत्र 'जातेरयान्तनित्यस्त्रीशूद्रात्' ( २।४।५४ ) इत्यनेन ङीप्रत्ययः । वतण्डीत्यत्र ङीप्रत्यये विषये'जातेरयान्त०' (२।४।५४) इति सूत्रे कारणं ज्ञापितमस्ति ततोऽवधार्यम् ।।४६।।

## कुञ्जादेर्ञायन्यः ।।६।१।४७।।

म० वृ०—कुञ्जादिभ्यो 'वृद्धेऽपत्ये ञायन्यः' स्यात् । कौञ्जायन्यः । वृद्धे इत्येव- कुञ्जस्यापत्यमनन्तरं कौञ्जिः ।।४७।।

अव०—कुञ्ज, ब्रध्न, गण, भस्मन्, लोमन्, लोमायन्य, तदन्तादपि औडुलोमायन्यः, शट, शटो गर्गादावपि, शाक, शुण्डा,शुभा, विपाश्, अयं शिवादावपि, स्कन्ध, स्कम्भ, शङ्ख, शङ्खशब्दो गर्गादौ अश्वादौ विदादौ च; इति कुञ्जादिगणः । ञकारो वृद्धयाद्यर्थः ।।४७।।

## स्त्रीबहुष्वायनञ् ।।६।१।४८।।

म० वृ०—कुञ्जादिभ्यो 'बहुत्वविशिष्टे वृद्धे स्त्रियां चाबहुत्वेऽप्यायनञ्' स्यात् । कुञ्जस्यापत्यं स्त्री =कौञ्जायनी ['जातेरयान्त०' (२।४।५४) इति ङी]। कुञ्जस्यापत्यानि कौञ्जायनाः ।।४८।।

## अश्वादेः ॥६।१।४९॥

**म० वृ०**–अश्वादिगणादपत्ये वृद्धे 'आयनञ्' स्यात्। [अश्वस्यापत्यं वृद्धम्]आश्वायनः, शाङ्खायनः। वृद्धे इत्येव- आश्विः ॥४९॥

**अव०**–अश्व, शङ्ख, जन, उत्स, ग्रीष्म, अर्जुन, वैल्य, अश्मन्, विद, कुट, पुट, स्फट, (? स्फुट) रोहीण, खर्जुल, खर्जूल खर्जूर, पिञ्जूर, भण्दिल, भटिल भडिल, भण्डिल, भटक, भडित, भण्डित, प्राहृत, राम; उद, क्षान्ध, ग्रीव, रामोद, रामोदक्ष, अन्धग्रीव, काश, काण, गोल, आह्व, गोलाह्व, अर्क, स्वन, अर्कस्वन, ( सुन, ) वन, पत, पद, चक्र, कुल, ग्रीवा, श्रविष्ठा, पावित्र, पावित्रा, पवित्न्दा, गोमिन्, श्याम, धूम, धूम्र, वल, वाग्मिन्, विश्वानर, विश्वतर, वत, सनख, सन, खड, जड, गद, अर्ह, वीक्ष, विशम्य, विशाल, गिरि, चपल, गिरिचपल, चुप, दासक, चुपदासक, उपदासपाक, धान्य ( ? धाय्या ), धन्य, धर्म्य, पुंसिजात, शूद्रक, सुमनस्, दुर्मनस्,आतव, उत्सातव, कितव, किव, शिव, खिव, खिप, खदिर, आनडुह्य इति अश्वादिगणः। अश्वशब्द इह सूत्रे गणे(विदादौ)च पठ्यते; तेन आश्वायनः, आश्व इति प्रयोगः। शङ्खशब्दोऽत्र सूत्रगणे, विदादौ, गर्गादौ, कुञ्जादौ पठ्यते: तेन यथाक्रमं शाङ्खायनः, शाङ्खः, शाङ्ख्यः, शाङ्खायन्यः इति प्रयोगाः ४। जनशब्दोऽत्र सूत्रगणे नडादिगणे च, तेन जानायनो युवा, जानायनिः ; अत्र यूनि प्रत्यये कर्त्तव्ये 'ञिदार्षा०' (६।१।१४०) इत्यनेन इञो लोपलक्षणो विशेषः,*जानायनस्यापत्यम्,- 'अत इञ्' (६।१।३१), 'ञिदार्षा०' इत्यनेन इञ्लुप् ॥४९॥

## शप-भरद्वाजादात्रेये ॥६।१।५०॥

**म० वृ०**–शपशब्दात् भरद्वाजशब्दादात्रेयेऽपत्ये वृद्धे 'आयनञ्' स्यात्। शापायनः, भारद्वाजायनः आत्रेयः। आत्रेय इति किम्? शापिः, भारद्वाजः ॥५०॥

## भर्गात् त्रैगर्त्ते ॥६।१।५१॥

**म० वृ०**–भर्गशब्दात् 'त्रैगर्त्ते वृद्धेऽपत्ये आयनञ्' स्यात्। भार्गायणः त्रैगर्त्तः ॥५१॥

## आत्रेयात् भारद्वाजे ॥६।१।५२॥

**म० वृ०**–आत्रेयशब्दाद् वृद्धप्रत्ययान्तात् 'भारद्वाजे यून्यपत्ये 'आयनञ्' स्यात्। आत्रेयायणो भारद्वाजो युवा ॥५२॥

## नडादिभ्य आयनण् ॥६।१।५३॥

**म० वृ०**–नडादिभ्यो 'वृद्धेऽपत्ये आयनण्' स्यात्। नडस्यापत्यं वृद्धं=नाडायनः, चारायणः। वृद्धे इत्येव– नडस्यापत्यमनन्तरं=नाडिः ॥५३॥

**अव०**–नड, चर, बक, मुञ्ज, इतिक, इतिश, उपक, लमक, सप्तल, सत्वल, वाज, व्यलिकेत्येके, प्राण, नर, सायक, दाश, मित्र, दाशमित्र, द्वीप, पिङ्गर, पिङ्गल, किङ्कर, किङ्कल, कातर, काथल, काश्यप, काश्य, नाव्य, अज, अमुष्य, लिगु, चित्र, अमित्र, कुमार, लोड्, स्तम्ब, स्तम्भ, अग्र, शिंशपा, तृण, शकट, (भिकट,) भिमत, सु-

---

* अत्रायं भावः–अश्वादिगणस्थजनशब्दाद् वृद्धाऽपत्येऽर्थे 'आयनञ्' नडादिगणस्थजनशब्दाद् वृद्धाऽपत्येऽर्थे 'आयनण्' भवति। उभयगणस्थजनशब्दमाश्रित्य जनस्य वृद्धाऽपत्यं=जानायन इत्येकमेव रूपं भवति, अतो जनशब्दस्याश्वादिनडादिद्विगणयोः पाठे कृतेऽपि वृद्धापत्येऽर्थे नास्ति कश्चिद् विशेषः, परं यदा वृद्धाऽपत्यप्रत्ययान्त-जानायनशब्दाद् युवाऽपत्यप्रत्ययः क्रियते तदाऽस्ति विशेषः,तद्यथा– अश्वादिगणस्थजनशब्दमाश्रित्य जानायनस्यापत्यं युवा=जानायनः,अत्रायनञो ञित्त्वाद् 'अतइञ्'(६।१।३१) इत्यनेनोत्पन्नस्येञ्प्रत्ययस्य 'ञिदार्षा०' (६।१।१४०) इत्यनेन लुब्, नडादिगणस्थजनशब्दमाश्रित्य जानायनस्यापत्यं युवा=जानायनिः,अत्रायनणो ञित्त्वाऽभावाद्'अत इञ्' (६।१।३१) इत्यनेनोत्पन्नस्येञ्प्रत्ययस्य ञिदार्षा० (६।१।१४०) इत्यनेन लुब् न भवति।

मत, जन, ऋच्, इन्ध, ऋगिन्ध, मित, जनन्धर, जलन्धर, युगन्धर, हंसक, दण्डिन्, हस्तिन्, पञ्चाल, चमसिन्, सुकृत्य, स्थिरक, ब्राह्मण, चटक, अश्वल, खरप, बद्र, शोण, दण्डम, छाग, दुर्ग, अलोह, (आलोह,) कामुक, ब्रह्मदत्त, उदुम्बर, सण, लङ्क, केकर, नाड्य, आऌाह, ऋग, वृषगण, अम्बर, बालिश, दण्डप इति नडादिगणः ॥५३॥

## यञिञः ॥६।१।५४॥

म० वृ०—वृद्ध इति यञिञोर्विशेषणम् । वृद्धे विहितौ यौ यञिञौ तदन्ताद् यून्यपत्ये "आयनण्" स्यात् । 'वृद्धाद् यूनि' (६।१।३०) इति वचनाद् यूनीति लभ्यते । गार्ग्यस्यापत्यं युवा=[1]गार्ग्यायणः, दाक्षेरपत्यं युवा=[2]दाक्षायणः ॥५४॥

अव०—[1]'गार्ग्यायण' इत्थं साध्यते,— गर्गः, गर्गस्यापत्यं वृद्धं=गार्ग्यः, 'गर्गादेर्यञ्' (६।१।४२), तदनन्तरं गार्ग्यस्यापत्यं युवा इति वाक्ये गार्ग्यायणः, 'यञिञः' (६।१।५४) इति सूत्रेण यञन्तात् परत आयनण् । [2]दक्षस्यापत्यं पौत्रादि=दाक्षिः, 'अत इञ्' (६।१।३१), ततो दाक्षेरपत्यं युवा=दाक्षायणः ॥५४॥

## हरितादेरञः ॥६।१।५५॥

म० वृ०—विदाद्यन्तर्गणो हरितादिः । वृद्धे विहितो योऽञ् तदन्तेभ्यो हरितादिभ्यो यून्यपत्ये 'आयनण्' स्यात् । हरितस्यापत्यं युवा=[1]हारितायनः ॥५५॥

अव०—[1]प्रथमं हरितशब्दादञ्प्रत्ययमानीय तदनन्तरं हारितस्यापत्यं युवा इति वाक्ये आयनण् क्रियते इति सूत्रार्थाभिप्रायः । अञ इति किम् ? हरितस्यापत्यं वृद्धमिति वाक्ये कृते अत्र आयनण् न भवति ततोऽण् भवति, हारित इति व्यावृत्त्युदाहरणं ज्ञेयम् । [1]हरितस्यापत्यं वृद्धं हारितः, 'विदादेर्वृद्धे' (६।१।४१) इत्यञ्, ततो हारितस्यापत्यं युवा इति वाक्ये 'हरितादेरञः' (६।१।५५) इत्यायनण् ॥५५॥

## क्रोष्टृ-शलङ्कोर्लुक् च ॥६।१।५६॥

म० वृ०—क्रोष्टृशब्दात् शलङ्कुशब्दात् वृद्धेऽपत्ये 'आयनण्' स्यात्, तयोश्चान्तस्य लुक् च । क्रोष्टुरपत्यं वृद्धं=क्रोष्टायनः, शालङ्कायनः ॥५६॥

## दर्भ-कृष्णा-ऽग्निशर्म-रण-शरद्वच्छुनकादाग्रायण-ब्राह्मण-[1]वार्षगण्य-वासिष्ठ-भार्गव-वात्स्ये[2] ॥६।१।५७॥

म० वृ०—दर्भादिभ्यः आग्रायणादिषु यथासङ्ख्यं 'वृद्धेऽपत्ये आयनण्' स्यात् । [3]दार्भायणः, आग्रायणः, [4]दार्भिरन्यः । [5]कार्ष्णायनो ब्राह्मणः, कार्ष्णिरन्य । [6]आग्निशर्मायणो वार्षगण्यः, आग्निशर्मिरन्यः । [रणाद्वासिष्ठेऽर्थे–] राणायनो वासिष्ठः । [शरद्वत्शब्दात् भार्गवे–] शारद्वतायनो भार्गवः । [शुनकशब्दात् वात्स्ये–] शौनकायनो वात्स्यः, शौनकोऽन्यः [विदादेर्वृद्धे (६।१।४१)] ॥५७॥

अव०—[1]वृषगणशब्द-[2]वत्सशब्दौ गर्गादिगणे । [3]दर्भादाग्रायणेऽर्थे आयनण्, दर्भस्यापत्यमाग्रायणो=दार्भायणः, एवमग्रेऽपि । [4]दार्भिरित्यादिभ्यो बाह्वादित्वादिञ् सर्वत्र । [5]कृष्णाद् ब्राह्मणेऽर्थे । [6]अग्निशर्मात् वार्षगण्येऽर्थे ॥५७॥

## जीवन्त-पर्वताद्वा ॥६।१।५८॥

म० वृ०—जीवन्तपर्वताभ्यां 'वृद्धेऽपत्ये आयनण्' वा स्यात् । जैवन्तायनः, जैवन्तिः ; पार्वतायनः, पार्वतिः ['बाह्वा० (६।१।३२)] ॥५८॥

## द्रोणाद्वा ॥६।१।५९॥

म० वृ०—योगविभागाद् वृद्ध इति निवृत्तम् । द्रोणाद् 'अपत्यमात्रे आयनण् वा' स्यात् । द्रौणायनः, द्रौणिः ॥५९॥

## शिवादेरण् ॥६।१।६०॥

म० वृ०—शिवादिभ्यो-'ऽपत्यमात्रेऽण्' स्यात् । अत इञादेरपवादः । शैवः ॥६०॥

प्रव०–शिव, प्रोष्ठ, प्रोष्ठिक, चण (? चण्ट) जम्व, जम्भ, ककुभ, कुथार, अनभिम्लान, ककुत्थ, कोहड, कहूय, रोध, विलखर, खतण्ड, तृण, कर्ण, क्षीरहद, जलहद, परिषक, शिलन्द (? शिलिन्द), गोफिल, गोहिल, कपिलक, जटिलक, बधिरक मञ्जिरक, वृष्णिक, खञ्जार, खञ्जाल, रेख, लेख, आलेखन, वर्त्तन, ऋक्ष, वर्त्तनर्क्ष, विकट, पिटाक, तृक्षाक, नभाक, ऊर्णनाभ, सुपिश (? सुपिष्ठ), पिष्ठ-कर्णक, ( पर्णक, ) मसुरकर्ण, मसूरकर्ण, खडूरक, गहेरक, गडेरक, वस्क, लह्य, द्रुह्य, अवस्थूण, भलन्द, भलन्दन, विरूप, विरूपाक्ष, भूरि, सन्धि, भूमि, मुनि, कुब्जा, कोकिला, इला, सपत्नी, जरत्कारु, उत्केशा, काय्या, सुरोहिका, पीठीनासा, महित्री आर्यश्वेता, ऋषिषेण, गङ्गा, पाण्डु, विपाश्, तक्षन् इति शिवादिगणः । अत्र गणे शिवादिविरूपाक्षान्तं यावत् 'अत इञ्' (६।१।३१) प्राप्तौ भूर्यादीना-मार्यश्वेतां यावत् 'ङयाप्त्यूङः' (६।१।७०) इति एय-णप्राप्तौ शिवादेरिति सूत्रं कृतम् । पाण्डुशब्दः 'शुभ्रादिभ्यः' (६।१।७३) इति एयणोऽपि प्रवृत्त्य-र्थम् । गङ्गाशब्दपाठस्तु 'तिकादेरायनिञ्' (६।१।१०७) इति आयनिञोऽपि प्रवृत्त्यर्थमत्र पाठः । तेन पाण्डोर्द्वि (? त्रै)रूप्यम्–पाण्डवः, पाण्डवेयः । गङ्गाया अपि त्रैरूप्यं सिद्धम्– गाङ्गः, गाङ्गायनिः, गाङ्गेयः । विपाश्पाठः कुञ्ज्ञादिगणमध्ये लक्षणेन आयन्येन समावेशार्थः– वैपाशः, वैपाशायन्यः । इति शिवादिः ॥६०॥

## [1]ऋषि-वृष्ण्यन्धक-कुरुभ्यः ॥६।१।६१॥

म० वृ०–ऋष्यादिवाचिभ्यः शब्देभ्यो–'ऽप-त्येऽण्' स्यात् । इञोऽपवादः । ऋषि,– वासिष्ठः, [ वैश्वामित्रः ] गौतमः । वृष्णि [यादवाः]– वासु-देवः, बाभ्रः । अन्धक,– श्वाफल्कः, चैत्रकः । कुरु,– नाकुलः, साहदेवः, दौर्योधनः [दौःशासनः] । [2]अत्र्यादिभ्यस्तु परत्वादेयण् ञ्येञौ च भवतः– आत्रेयः, जातसेन्यः , जातसेनिः ; औग्रसेन्यः औग्र-सेनिः । कथं दौर्योधनिः ['अत इञ्' । ३।१।३१] ? क्रियाशब्दत्वात् , [क्रियाशब्दत्वं दर्शयति–] दुःखेन योध्यते (? युध्यते) इति । एवं यौधिष्ठिरिः ॥६१॥

प्रव०–[1]ऋषयो लौकिका वसिष्ठविश्वामित्रगौतमाद्याः अपत्ययोगात् , तथा वृष्णयः अन्धकाः कुरवः एते त्रयोऽपि प्रसिद्धाः । वंश्याख्या वंशेना-ख्या येषां क्षत्रियाणां ते वंश्याख्याः क्षत्रियाः कथ्यन्ते । वंशमाचष्टे,'दश्वाङः' (५।१।७८) । [2]अत्र्यादिशब्देभ्यो-ऽपि ऋषिद्वारेण अण् प्राप्नोति इत्याह अत्र्यादिभ्य इत्यादि, परत्वात् , कोऽर्थः ? इतोऽनिञः (६।१।७२) इति सूत्रेण एयण् भवति– आत्रेय इतिसिद्धम् ; तथा ऋषिवाचिभ्यः शब्देभ्यः परत्वात् 'सेना-न्तकारुलक्ष्मणादिञ् च' (६।१।१०२) इति सूत्रेण ञ्यप्रत्यय इञ्प्रत्ययश्च भवति ; यथा– जातसेन्यः, जातसेनिः, जातसेनो नाम ऋषिः ; औग्रसेन्यः, औग्रसेनिः ; भीमसेन्यः, भीमसेनिः । 'यौधिष्ठिरिः आर्जुनिः' इत्यत्र तु बाह्वादित्वात् इञ् ॥६१॥

## [1]कन्या-त्रिवेण्याः कनीनत्रिवणं च ॥६।१।६२॥

म० वृ०–कन्याशब्दात् त्रिवेणीशब्दाच्चा–'ऽपत्येऽण्' स्यात् तत्संयोगे यथासंख्य 'कनीन त्रिवण'इत्यादेशौ चभवतः । [2]कन्याया अपत्यं=कानीनो व्यासः कर्णश्च , त्रैवणः । [3]एयणोऽपवादः ॥६२॥

प्रव०–[1]कन्यया युक्ता त्रिवेणी=कन्यात्रिवेणी, तस्याः, पञ्चमीङसिः, 'स्त्रीदूतः' (१।४।२९) इत्यनेन दास् । [2]उपचारात् देवताप्रभावाद्वा कन्याया अपि कदापि अपत्यसम्भवो घटते । [3] 'ङयाप्त्यूङः' (६।१।७०) इत्यस्य ।६२॥

## [1]शुङ्गाभ्यां भारद्वाजे ॥६।१।६३॥

म० वृ०–शुङ्गशुङ्गाशब्दात् पुंस्त्रीलिङ्गाद्'भार-द्वाजेऽपत्येऽण्' स्यात् । शुङ्गस्य शुङ्गाया वा अपत्यं =शौङ्गो भारद्वाजः । शौङ्गिः [2]शौङ्गेयश्चान्यः ॥६३॥

प्रव० [1]शुङ्गश्च शुङ्गा च=शुङ्गौ, 'पुरुषः स्त्रिया' (३।१।१२६) इति सूत्रेण पुरुषवाची शब्दः शिष्यते ।

"नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहण"-मिति सिद्धेऽपि परत्वाद् 'द्विस्वरादनद्याः' (६।१।७१) इत्येयण् प्राप्नोति,तद्बाधनार्थं द्विवचनेन स्त्रीलिङ्गः शुङ्गाशब्द उपादीयते इति भावः । [२]शौङ्गेय इत्यत्र 'द्विस्वरादनद्या' इति एयण् [शौङ्गिरित्यत्र 'अत इञ्' (६।१।३१) इत्यनेनेञ् ] ॥ ६३ ॥

## विकर्ण-छगलाद्वात्स्या-ऽऽत्रेये ॥६।१।६४॥

म० वृ०-विकर्णात् छगलाद्यथासंख्यं 'वात्स्ये आत्रेयेऽपत्येऽण्' स्यात् । वैकर्णो वात्स्यः, छागल आत्रेयः ॥६४॥

## णश्च विश्रवसो विश्लुक् च वा ॥६।१।६५॥

म० वृ०-विश्रवसोऽपत्ये'ऽण्' स्यात्, तद्योगे णोऽन्तादेशः ; णयोगे च विश् इत्यस्य वा लुक् । विश्रवसोऽपत्यं=वैश्रवणः, रावणः,[१] ॥ ६५ ॥

अव० [१]विश्रवस्शब्दस्य विश् इत्यक्षरद्वयं लुप्यते, तदनन्तरं रावण इति प्रयोगः सिद्धः । विश्लुकि सत्याम् ॥६५॥

## सङ्ख्यासम्भद्रान्मातुर्मातुर्च ॥६।१।६६॥

म० वृ०-संख्यावाचिनः सम् भद्र इत्येताभ्यां च परो यो मातृशब्दस्तदन्तादपत्येऽण् स्यात्, मातृशब्दस्य 'मातुर्' इत्यादेशश्च स्यात् । [१]द्वैमातुरः, [२]षाण्मातुरः, [३]सांमातुरः, [४]भाद्रमातुरः ॥६६॥

अव० [१]द्वयोर्मात्रोरपत्यं=द्वैमातुरः । [२]षण्णां [२]मातॄणामपत्यं=षाण्मातुरः । शतस्य माता=शतमाता, शतमातुरपत्यं=शातमातुरः । [३]संगता माता=संमाता, संमातुरपत्यं=सांमातुरः । [४]भद्र, भद्रस्य माता=भद्रमाता, तस्य अपत्यं=भाद्रमातुरः । 'भाद्रमातुर'इत्यस्याग्रे संख्यासम्भद्रादिति किम् ? सौमात्रः, वैमात्रेयः, विरुद्धा माता= विमाता, तस्यापत्यम् ( ? तस्या अपत्यम् ),-'शुभ्रादिभ्य' एयण् भवति ॥६६॥

## अदो-र्नदी-मानुषीनाम्नः ॥६।१।६७॥

म० वृ०-अदुसंज्ञकान्नदीनाम्नो मानुषीनाम्नश्चापत्ये-'ऽण्' स्यात् । एयणोऽपवादः ['ङ्याप्त्यूङः ६।१।७०] । यामुनः प्रणेता, नार्मदो नीरुः, मानुषी-दैवदत्तः, [१]सौदर्शनः, [२]सौतारः । अदोरिति किम् ? [३]चान्द्रभागेयः [एवं वासवदत्तेयः] । नदीमानुषीग्रहणं किम् ? [४]शौभनेयः ॥६७॥

अव०-[१]सुदर्शनाया अपत्यं=सौदर्शनः । [२] सुताराया अपत्यं=सौतारः । [३]चन्द्रभागा चन्द्रभागी वा नाम नदी, 'नवा शोणादेः' ( २।४।३१ ) इत्यनेन विकल्पेन ङी, चन्द्रभागायाः चन्द्रभाग्या वा अपत्यम् ; (एवं ) सुपर्ण्याः सुपर्णाया वा अपत्यं=सौपर्णेयः । [४]शोभनाशब्दो नद्यां मानुष्यां च वर्त्तते, (परं) न नामधेयत्वेन ॥६७॥

## पीला-साल्वा-मण्डूकाद्वा ॥६।१।६८॥

म० वृ०-पीलासाल्वामण्डूकशब्देभ्यो-'ऽपत्येऽण् वा' स्यात् । पैलः, पैलेयः ; [ 'द्विस्वरा०' (६।१।७१) एयण् ] साल्वः, साल्वेयः ; [ 'द्विस्वरा०' (६।१।७१) एयण् ] माण्डूकः, माण्डूकिः ॥६८॥

अव०-पीलासाल्वाभ्यां 'द्विस्वरा०' (६।१।७१) एयणि प्राप्ते मण्डूकादिञि च प्राप्ते 'पीलासाल्वा०' इति सूत्रं विदधे । 'पीलासाल्वा०' इति सूत्रे वाशब्दग्रहणं मण्डूकात् इञः प्राप्त्यर्थम् ,अन्यथा वाशब्दग्रहणं विनापि उत्तरसूत्रेण 'दितेश्चैयण् वा' (६।१।६९ ) इत्यनेन मण्डूकात् एयण् भवति, 'पीलासाल्वा०' इत्यनेन अण् भवति मण्डूकात् , ततो मण्डूकात् कथमपि इञ् न स्यात् , इति इञ्प्राप्त्यर्थं वाग्रहणमिति भावः ॥६८॥

## दितेश्चैयण् वा ॥६।१।६९॥

म० वृ०-दितिशब्दान्मण्डूकाच्चापत्ये 'एयण् वा' स्यात् । दैतेयः, दैत्यः ; माण्डूकेयः, माण्डूकिः ॥६९॥

अव०-'दितेश्चै०' इत्यत्र चकारो मण्डूकाकर्षणार्थः । तथा पीलासाल्वाभ्यां पूर्वसूत्रेण विकल्पेन अण् , पक्षे 'द्विस्वरा०' (६।१।७१ ) इत्यनेन एयण्

भवतीति द्वैरूप्यम्; मण्डूकादपि पूर्वसूत्रेण अण्, पक्षे 'अत इञ्' (६।१।३१), 'दितेश्चै०' इत्यनेन एयण्, इति मण्डूकशब्दात् त्रैरूप्यम् ॥६९॥

ङ्याप्त्यूङः ॥६।१।७०॥

म० वृ०–ङ्यन्तात्, आबन्तात्, त्यन्तात् ऊङन्ताच्चापत्ये 'एयण्' स्यात्। [ङ्यन्तात्,-] सौपर्णेयः, [आबन्तात्,-] वैनतेयः [त्यन्तात्,] यौवतेयः, [ऊङन्तात्,-] कामण्डलेयः ॥७०॥

[1]द्विस्वरादनद्याः ॥६।१।७१॥

म० वृ०–द्विस्वराद् ङ्याप्त्यूङन्तादनदीवाचिनोऽपत्ये 'एयण्' स्यात्। दात्तेयः [गौप्तेयः]। अनद्या इति किम्? सीतादयो नद्यः, सीताया अपत्यं=सैतः, वैण्णः,[2] सैप्रः, रैवः [सर्वेषु एषु 'अदोर्नदी०' (६।१।६७) इत्यण्] ॥७१॥

प्रव०–[1]'अदोर्नदी०' (६।१।६७) इत्यस्यापवादोऽयं 'द्विस्वरादनद्याः' (६।१।७१) इति योगः कृतः। 'ङ्याप्त्यूङः' (६।१।७०) इत्येयणो बाधकस्य 'अदोर्नदीमानुषी०' इत्युक्तस्य 'अण्' इत्येतस्य 'द्विस्वरादनद्या' इति एयण्प्रत्ययोऽयं बाधको ज्ञातव्यः। [2]वेण्णाया अपत्यं=वैण्णः ॥७१॥

इतोऽनिञः ॥६।१।७२॥

म० वृ०–इञन्तवर्जिताद् द्विस्वरादिकारान्तादपत्ये 'एयण्' स्यात्। नाभेरपत्यं=नाभेयः, आत्रेयः, बलेरपत्यं बालेयः, निधेर्नैधेयः। कथमातिथेयः, [शकुनेरपत्यं] शाकुनेयः, पारिधेयः? शुभ्रादित्वाद्भविष्यति ॥७२॥

प्रव०–'इतोऽनिञ' इति सूत्रे इत इति किम्? दाक्षिः। अनिञ इति किम्? दाक्षायणः, द्विस्वरादित्येव– मरीचेरपत्यं मारीच इति व्यावृत्त्युदाहरणानि ॥ ७२ ॥

शुभ्रादिभ्यः ॥६।१।७३॥

म० वृ०–शुभ्रादिभ्योऽपत्ये 'एयण्' स्यात्। यथायोगमिञादीनामपवादः। शौभ्रेयः ॥७३॥

प्रव०–शुभ्र, विष्टपुर, विष्टपर, ब्रह्मकृत, शतद्वार शलाहार, शालावल, किट, शाङ्क, कृकलास, प्रवाहण, भाण, भारत, भारम, कुदत्त, कर्पूर, इतर, अन्यतर, आलीढ, सुदत्त, सुदक्ष, तुद, अकशाप, वादन, शतल, शकल, शवल, खङ्कर, कुशाम्ब, शुक्र, विग्र, बीज, अश्व,बीजाश्व, अजिर, मवक्र,मखण्डू, मकष्टु, मघष्टु, सृकण्डु, मृकण्डु, जिह्माशिन्, अजवस्ति, शकन्धि, परिधि, अणीचि, कणीचि, शकुनि, अतिथि, अनुदृष्टि, शलाकाभ्र, लेखाभ्र, रोहिणी, रुक्मिणी, विवशा, विवशा, गन्धपिङ्गला, खडोन्मत्ता, कुमारिका, कुबेरिका, अम्बिका, अशोका, श्वन्, गङ्गा, पाण्डु, विमातृ, विधवा, कद्रू, गोधा, सुदामन् इति शुभ्रादयः। बहुवचनमाकृतिगणार्थम्। एवमन्यत्रापि। शुभ्रादिमवक्रशब्दान्तानामिञोऽपवादे च एयण् भवति। मखण्डवादिविमात्रन्तानां च 'शिवादेरण्' 'ङसोऽपत्ये' (इति) अणो बाधक एयण् भवति। विधवाशब्दात् एरण्बाधक एयण्। कद्रूगोधयोः एयञोऽपवाद एयण्। सुदामनसुनाम्नोर्बाह्वादित्वादिञा, शुभ्रस्य 'कुर्वादेर्ञ्यः' (६।१।१००) इति ञ्येन सह समावेशार्थः पाठोऽत्र गणे। रोहिण्यादशोकान्तानां दशानां मानुषीद्वारेण अणोऽपवादः। पाण्डुविमातृविधवाशब्दानां त्रयाणामौत्सर्गिकोऽणोऽपवादः। यस्तु पाण्डव इत्यत्राण् स शिवादित्वात् स्यादेव। गङ्गाशब्दात्तु 'ङ्याप्त्यूङः' (६।१।७०) इत्येयणोऽपवादः 'अदोर्नदीमानुषी०' (६।१।६७) इत्यण् अस्ति, तस्याप्यणोऽपवादः 'तिकादेरायनिञ्' (६।१।१०७) इत्यस्ति, ततो गङ्गाशब्दोऽणः प्रतिप्रसवार्थं 'शिवादौ' पठितः, इति युक्त्या च 'शुभ्रादिभ्यः' (६।१।७३) इत्यनेन (विना) एयण् न प्राप्नुयात् इति शुभ्रादिगणे गङ्गाशब्दः पठितः येन एयण् सिद्ध्यति ॥७३॥

श्याम-लक्षणाद्वाशिष्ठे ॥६।१।७४॥

म० वृ०–श्यामलक्षणाभ्यां वाशिष्ठेऽपत्ये [अपत्यविशेषे] 'एयण्' स्यात्। श्यामेयो लाक्षणेयो वाशिष्ठः। [1]श्यामायनोऽन्यः। [2]अवृद्धे तु श्यामिः लाक्षणिरन्यः ॥७४॥

अव०–'अवृद्धाद्दोर्नवा' (६।१।११०) इत्यायनिञ्, अथवा अश्वादित्वात् वृद्धेऽर्थे 'अश्वादेः' (६।१।४९) इत्यनेन आयनञ्। [२]अवृद्धे तु श्यामिरित्यत्र 'बाह्वादि०' (६।१।३२) इञ् ॥७४॥

## विकर्ण-कुषीतकात् काश्यपे ॥६।१।७५॥

म० वृ०–आभ्यां काश्यपेऽपत्ये [अपत्यविशेषे] 'एयण्' स्यात्। वैकर्णेयः, कौषीतकेयः काश्यपः ॥७५॥

## भ्रुवो भ्रुव् च ॥६।१।७६॥

म० वृ०–भ्रूशब्दादपत्ये 'एयण्' स्यात्, भ्रूशब्दस्य 'भ्रुव्' इत्यादेशश्च। भ्रौवेयः ॥७६॥

---

अव०–भ्रुवोऽपत्यं=भ्रौवेयः। यथा चुलुकस्य अपत्यं सम्भवः (? अपत्यसम्भवः), चौलुक्यः इति लोकापवादः, तथा भ्रुवोऽपत्यसम्भवः ॥७६॥

## कल्याण्यादेरिन् चान्तस्य ॥६।१।७७॥

म० वृ०–कल्याणी इत्यादिभ्योऽपत्ये 'एयण्' स्यात्, 'इन्' इत्ययं चान्तस्यादेशः। काल्याणिनेयः [एवं सुभगाया अपत्यं=सौभागिनेयः, 'हृद्भगसिन्धोः' (७।४।२५) इति उभयपदस्य वृद्धिर्भवति] ॥७७॥

---

अव०–कल्याणी, सुभगा, दुर्भगा, बन्धकी, जरती, बलीवर्दी, ज्येष्ठा, कनिष्ठा, मध्यमा, परस्त्री, अनुदृष्टि, अनुसृष्टि इति कल्याण्यादिगणः। कल्याण्यादिपरस्त्र्यन्तानां 'ङ्याप्त्यूङः' (६।१।७०) इत्यनेन अनुदृष्टेः 'शुभ्रादिभ्यः' (६।१।७३) इत्यनेन एयण् सिद्ध एव, इनादेशार्थं वचनम्। अनुसृष्टेर्द्वयमपि साध्यम् ॥७७॥

## कुलटाया वा ॥६।१।७८॥

म० वृ०–कुलटाशब्दादपत्ये 'एयण्' स्यात्, तत्संयोगे इनन्तादेशो वा। आबन्तादेयण् सिद्धः, आदेशार्थं वचनम्, अत एवादेशस्यैव[१] विकल्पः, नत्वेयणः। कौलटिनेयः, कौलटेयः, कौलटेरः इत्यपि ॥७८॥

अव०–[१]इनादेशस्यैव विकल्पः, अत एव वृत्तौ इन् अन्तादेशो वा भवतीत्यर्थः इत्युक्तम्। कुलानि स्वैरमटति भ्रमति सा कुलटा दुश्चारिणी, या हि नारी कुलान्यटन्ती शीलं भिनत्ति, ईदृग्विधलक्षणात् कुलटाशब्दात् वक्ष्यमाणः 'क्षुद्राभ्य एरण् वा' (६।१।८०) इत्यनेन एरण्प्रत्ययः, ततः कौलटेरः इत्यपि सिद्धं (? सिद्धः)क्षुद्रस्त्रीविषये प्रयोगः; अन्यत्र द्वयमेव भवतीति भावः ॥७८॥

## चटकाण्णैरः स्त्रियां तु लुप् ॥६।१।७९॥

म० वृ०–चटकात् अपत्यमात्रे 'णैरः प्रत्ययः' स्यात्, 'स्त्रियां त्वपत्ये विहितस्य णैरप्रत्ययस्य लुप्' स्यात्। [१]चाटकैरः। स्त्रियां तु लुप्– चटका[२] ॥७९॥

---

अव०–[१]'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति न्यायात् चटका इति शब्दस्यापि चटकाया अपत्यं चाटकैर इति प्रयोगः। [२]चटकस्य चटकाया वाऽपत्यं स्त्री=चटका, अत्र अपत्यस्त्रीवाच्ये प्रयोगः। चटकेति जातिशब्दोऽस्त्येव, स्त्र्यपत्यवाच्ये प्रत्ययाश्रवणार्थं सूत्रे लुप्वचनं कृतम्। अस्त्रियामित्येव सिद्धे प्रत्ययान्तरबाधनार्थं णैरप्रत्ययविधानं ज्ञातव्यम् ॥ ७९ ॥

## क्षुद्राभ्य एरण् वा ॥६।१।८०॥

म० वृ०–क्षुद्रा अङ्गहीनाः, अनियतपुंस्का[१] वा स्त्रियः क्षुद्राः। [२]बहुवचनं क्षुद्रार्थपरिग्रहार्थम्। क्षुद्रवाचिशब्देभ्यो स्त्रीलिङ्गेभ्य 'एरण् वा' स्यात्। अणेयणोरपवादः[३]। काणाया अपत्यं= काणेरः, काणेयः; ['ङ्याप्त्यूङः' ।६।१।७०] दासेरः, दासेयः; नटी,– नाटेरः, नाटेयः[४] ॥८०॥

---

अव०– [१]अनियता अनिश्चिता वा पुमांसो यस्या सा अनियतपुंस्का, बहुपुरुषसेवनशीला असतीत्यर्थः। [२]क्षुद्राभ्य इति वचनम्। [३]'अदोर्नदी०' (६।१।६७) (इति) अणः 'द्विस्वरादे०' (६।१।७१) 'ङ्याप्त्यूङः' (६।१।७०।इति) एयणः इत्यणेयणोरपवादः।

[4]नादेय इत्यस्याग्रे कार्दनेरः, कार्दनेयः इति प्रयोगौ। कर्दना वंशोपरि नर्त्तिका, तदपत्यं कार्दनेयः ॥ ८० ॥

## गोधाया दुष्टे णारश्च ॥६।१।८१॥

म० वृ०—गोधाशब्दाद् दुष्टेऽपत्ये 'णारः प्रत्ययः' स्यात्, चकाराद् एरण् च। गोधाया अपत्यं दुष्टं =गौधारः, गौधेरः। योऽहिना गोधायां जन्यते [स गोधारः]। [1]गौधेयोऽन्यः ॥८१॥

अव०—[1]'गौधेयः', 'शुभ्रादिभ्यः (६।१।७३) एयण् ॥८१॥

## जण्ट-पण्टात् ॥६।१।८२॥

म० वृ०—आभ्यामपत्ये 'णारः' स्यात्। जाण्टारः, पाण्टारः ॥८२॥

## चतुष्पाद्भ्य एयञ् ॥६।१।८३॥

म० वृ०—[1]चतुष्पाद्वाचिशब्देभ्योऽपत्ये 'एयञ्' स्यात्। अणादीनामपवादः। [2]कामण्डलेयः, [3]माद्रबाहेयः, [4]शाबलेयः, [5]बाहुलेयः, [6]सौरभेयः ॥८३॥

अव०—[1]चत्वारः पादा यासां स्त्रीणामिति स्त्रीलिङ्गे एव वाक्यं कार्यम्, न तु चत्वारः पादा येषामिति पुंलिङ्गे। स्त्रीलिङ्गशब्दानामेव एयञ् क्रियते। 'सुसङ्ख्यात्' (७।३।१५०) इति पादस्य पाद्भावः। [2]कमण्डलू, कमण्डल्वा अपत्यम्। [3]मद्रबाह्वा अपत्यम्। [4]शम्, शाम्यति वर्णैकत्वमस्यामिति शबला, शबलायाः अपत्यम्। [5]बहुलायाः अपत्यम्। [6]सुरभेरपत्यं=सौरभेयः ॥८३॥

## गृष्ट्यादेः ॥६।१।८४॥

म० वृ०—गृष्ट्यादिभ्योऽपत्ये 'एयञ्' स्यात्। गार्ष्टेयः ॥ ८४ ॥

अव०—'गृष्ट्यादेः' इत्यपि सूत्रमणादीनामपवादकम्। तथाहि—'ऋषिवृष्ण्यन्धक०' (६।१।६१) इत्यनेन अण् प्राप्नोति, अस्य अणो बाधकेन 'इतोऽनिञः' (६।१।७२) इत्यनेन एयणप्राप्तिः, अण् एयण् इति द्वयोर्बाधको गृष्ट्यादिरिति। यो गृष्टिशब्दश्चतुष्पाद् गोविशेषवचनः तस्य 'चतुष्पाद्भ्यः०' इति पूर्वेण सिद्ध्यति। अत्र तु अचतुष्पादर्थं ग्रहणम्। गृष्टि, हृष्टि, हलि, बालि, विश्रि, कुद्रि, अजबस्ति, मित्रयुः इति गृष्ट्यादिगणः। ञकारस्य ञित्कार्यार्थत्वात् मैत्रेयः पिता, मैत्रेयः पुत्रः। (अत्र) मित्रयुशब्दः, मित्रयोरपत्यम्—'गृष्ट्यादेः' एयञ्, 'सारवैक्ष्वाकमैत्रेयभ्रौणहत्यधैवत्यहिरण्मयम्' (७।४।३०) इति सूत्रेण यु इति लुप्यते, इति प्रथममैत्रेयशब्दसिद्धिरियम्; मैत्रेयस्यापत्यं=मैत्रेयः, 'अत इञ्' (६।१।३१), 'ञिदार्षादणिञोः' (६।१।१४०) इत्यनेन इञ् लुप्यते। ऋष्यण्बाधकः 'इतोऽनिञः' (६।१।७२इति) एयण्, तस्य बाधको गृष्ट्यादिः ॥८४॥

## वाडवेयो वृषे ॥६।१।८५॥

म० वृ०—वडवाशब्दात् वृषेऽर्थे 'एयञ् एयण् वा' निपात्यते। वृषो यो गर्भे बीजं निषिञ्चति स [1]वाडवेयः। अपत्येऽणेव— वाडवः ॥८५॥

अव०—[1]वडवाया वृष इति वाक्यम्, वाडवेयः इति प्रयोगः ॥८५॥

## रेवत्यादेरिकण् ॥६।१।८६॥

म० वृ०—रेवती इत्यादिभ्योऽपत्ये 'इकण्' स्यात्। एयणादीनामपवादः। [1]रैवतिकः ॥८६॥

अव०—रेवती, अश्वपाली, (मणिपाली, द्वारपाली,) वृकवञ्चिन्, वृकग्राह, कर्णग्राह, दण्डग्राह, कुक्कुटाक्ष इति रेवत्यादिगणः। द्वारपाल्यन्तानामेयणोऽपवादोऽत्र इकण्। [1]रेवती, रेवत्या चन्द्रयुक्तयाऽहो रेवती, 'चन्द्रयुक्तात् काले लुप्त्वप्रयुक्ते' (६।२।६) इति सूत्रेण अण् लुप् च, 'ङयादेर्गौणस्याक्विपस्तद्धित०' (२।४।९५) इत्यनेन ङीनिवृत्तिर्भवति, पुनः 'रेवतरोहिणाद् भे' (२।४।२६) इत्यनेन ङी, रेवत्यां जाता =रेवती, 'भर्तुसन्ध्यादेरण्' (६।३।८९), 'चित्रारेवतीरोहिण्याः स्त्रियाम्' (६।३।१०८) इति अण् लुप्यते, 'ङ्यादेर्गौणस्या०' (इति) ङीनिवृत्तिः, पुनः रेवतरोहिणाद् भे' इति ङी, रेवत्या अपत्यं=रैवतिकः, 'रेवत्यादेरिकण्', 'जातिश्च णितद्धितयस्वरे (३।२।५१) इति पुंवद्भावः, रेवत इति शब्दः, 'अवर्णेवर्णस्य' (७।४।६८) ॥८६॥

## [1]वृद्धस्त्रियाः क्षेपे णश्च ॥६।१।८७॥

म० वृ०–वृद्धप्रत्ययान्तात् स्त्रीवाचिनः शब्दादपत्ये 'णः प्रत्ययः स्यात्, चकारादिकण् च' क्षेपे गम्यमाने। [2]पितुरसंविज्ञाने मात्रा व्यपदेशोऽपत्यस्य क्षेपः [निन्दा]। [3]गार्ग्या अपत्यं युवा=गार्गः गार्गिको वा जाल्मः। 'वृद्धाद् यूनि' (६।१।३०) इति यून्यर्थे इमौ प्रत्ययौ [णेकणौ]। वृद्धग्रहणं किम्? [4]कारिकेयो जाल्मः। क्षेप इति किम्? गार्गेयो माणवकः ॥८७॥

अव०–[1]वृद्धं चासौ स्त्री च=वृद्धस्त्री, तस्याः। [2]लोके पिता प्रकटो न ज्ञायते, माता प्रसिद्धा लोके भवति, यः पुरुषो मात्रीकृत्वा भाष्यते=मातृनाम्ना लोके प्रसिद्धो भवति स एवं निन्द्यो लोके भवतीत्यर्थः। [3]गर्ग, गर्गस्यापत्यं वृद्धं गार्ग्यः, 'गर्गादेर्यञ्' (६।१।४२), 'यञो डायन् च वा'(२।४।६७), इत्यनेन ङी- गार्गी, गार्ग्या अपत्यं युवा इति वाक्ये 'वृद्धस्त्रियाः क्षेपे णश्च' (६।२८७) इत्यनेन एकत्र णः प्रत्ययः,अन्यत्र इकण्; 'जातिश्च णितद्धितयस्वरे' (३।२।५१) इत्यनेन पुंवद्भावः, गार्ग्य इति शब्दः, 'तद्धितयस्वरेऽनाति' (२।४।९२) इत्यनेन तद्धितयकारो लुप्यते, ततो 'गार्गः, गार्गिक' इति सिद्धम्। [4]कारिका, कारिकाया अपत्यम्, 'ङयात्यूङः' (६।१।७०) एयण्, 'तद्धिताककोपान्त्यपूरण्याख्याः' (३।२।५४) इति पुंवद्भावनिषेधः।८७।

## भ्रातुर्व्यः ॥६।१।८८॥

म० वृ०–भ्रातृशब्दादपत्ये 'व्यः प्रत्ययः' स्यात्। [1]भ्रातृव्यः ॥८८॥

अव०–[1]शत्रुरपि भ्रातृव्यो य उच्यते स उपचारात्। एकद्रव्याभिलापश्चोपचारहेतुः ॥८८॥

## ईयः स्वसुश्च ॥६।१।८९॥

म० वृ०–भ्रातुः स्वसृशब्दाच्चापत्ये 'ईयः प्रत्ययः' स्यात्। भ्रात्रीयः, स्वस्रीयः ॥८९॥

## [1]मातृ-पित्रादेर्डेयणीयणौ ॥६।१।९०॥

म० वृ०–मातृपितृशब्दावादी अवयवौ यस्य स्वसुः स्वस्रन्तस्य तस्मात् मातृष्वसृशब्दात् पितृष्वसृशब्दात् चापत्ये 'डेयण्-ईयणौ' भवतः। वचनभेदात् अत्र न यथासङ्ख्यम्। मातृष्वसेयः, मातृष्वस्रीयः; ['मातृपितुः स्वसुः' (२।३।१८) इति षकारः] पैतृष्वसेयः, पैतृष्वस्रीयः ॥९०॥

अव०–[1]माता च पिता च=मातृपितरौ, मातृपितरावादी यस्य स मातृपित्रादिः, शब्दप्रधानत्वात् निर्देशस्य अत्र 'आ द्वन्द्वे' (३।२।३९) इत्यनेन मातृशब्दस्य न आकारः, मातापितरौ इति प्रयोगो न भवति, विद्यायोनियोगाभावः (?योगाभावाद्)॥९०॥

## श्वशुराद्यः ॥६।१।९१॥

म० वृ०–श्वशुरशब्दात् अपत्ये 'यः' स्यात्। श्वशुर्यः ॥९१॥

अव०–'सम्बन्धिनां सम्बन्धे' (७।४।१२१) इति न्यायादिह न प्रत्ययः,-श्वशुरो नाम कश्चित्, तस्यापत्यं श्वाशुरिः, 'अत इञ्' (६।१।३१) ॥९१॥

## जातौ राज्ञः ॥६।१।९२॥

म० वृ०–राजन्शब्दात् अपत्ये जातौ गम्यमानायां 'यः प्रत्ययः' स्यात्। [राज्ञोऽपत्यम्-] राजन्यः[1] क्षत्रियो जातिश्चेत्। जाताविति किम्? [2]राजनोऽन्यः ॥९२॥

अव०–[1]'राजन्य' इत्यत्र 'अनोऽट्ये ये' (७।४।५१) इति प्रतिषेधात् 'नोऽपदस्य तद्धिते' (७।४।६१) इत्यनेन नस्य न लोपः। [2]राजन् इति नाम कश्चित्तस्यापत्यं राजनः, 'ङसोऽपत्ये' (६।१।२८) अण्, 'अणि' (७।४।५२) इति सूत्रेण नान्त्यस्वरादेर्लोपो भवति ॥९२॥

## क्षत्रादियः ॥६।१।९३॥

म० वृ०–क्षत्रशब्दादपत्ये 'इयः' स्यात् जातौ। क्षत्रस्यापत्यं=क्षत्रियो जातिश्चेत्। [1]क्षात्रिरन्यः ॥ ९३ ॥

प्रव०--[1]क्षत्रो नाम कश्चित्, तदपत्यम्, 'अत इञ्' (६।१।३१) ॥९३॥

## मनोर्याणौ षश्चान्तः ॥६।१।९४॥

म० वृ०-मनुशब्दादपत्ये 'यः प्रत्ययः अण् प्रत्ययश्च' स्यात्, तद्योगे मनुशब्दस्य 'षकारोऽन्तश्च' जातौ गम्यमानायाम्। मनोरपत्यानि=मनुष्याः, मानुषाः [अण्]; मानुषी। जातावित्येव-मनोरपत्यं=मानवः, ['ङसोऽपत्ये' (६।१।२८) अण्] मानवाः, मानवीः प्रजाः पश्य। वृद्धापत्यविवक्षायां तु लोहितादिपाठाद् यञेव-[1]मानव्यः, [2]मानव्यौ, [3]मनवः; [4]मानव्यायनी। [5]मनुष्यमानुषशब्दाभ्यां सत्यसति चापत्येऽर्थेऽनभिधानादपत्ये पुनरन्यः प्रत्ययो न भवति ॥९४॥

---

प्रव०-यदि मानुषीनाम तदा 'अञोनेञी०' (६।१।६७) इत्यणोऽपि बाधकः। वृद्धापत्येत्यक्षरोपरि मानव्यः इत्यादयो ज्ञेयाः। [1]मनु, मनोरपत्यं वृद्धं=मानव्यः, [2]मनोरपत्ये वृद्धे मानव्यौ; [3]मनोरपत्यानि वृद्धानि मनवः; सर्वत्र 'गर्गादेर्यञ्' (६।१।४२), वृद्धिः, मनव इत्यत्र 'यञञोऽश्यापर्णान्तगोपवनादेः' (६।१।१२६) इत्यनेन यञ् लुप्यते, ततो जस्। [4]'मानव्यायनी', अत्र मनोरपत्यम्-'गर्गादेर्यञ्', ततो 'लोहितादिशकलान्तात्' (२।४।६८) अनेन नित्यं ङी, डायनन्तादेशः। [5]मनुष्यमानुषशब्दाभ्यामुणादिप्रत्ययनिष्पन्नाभ्यां परतः पुनरन्यस्तद्धितप्रत्ययोऽनभिधानान्न भवतीत्यर्थः ॥९४॥

## माणवः कुत्सायाम् ॥६।१।९५॥

म० वृ०-'माणव' इति मनुशब्दस्याण्प्रत्यये कुत्सायां [गम्यमानायां] नस्य णादेशो निपात्यते। मनोरपत्यं कुत्सितं मूढं माणवः ॥९५॥

## कुलादीनः ॥६।१।९६॥

म० वृ०-कुलशब्दान्तात् केवलाच्च कुलशब्दादपत्ये 'ईनः' स्यात्। कुलीनः, ईषदपरिसमाप्तं कुलं=बहुकुलम्, तस्यापत्यं=[1]बहुकुलीनः, [2]क्षत्रियकुलीनः, राजकुलीनः[3]। ॥९६॥

प्रव०-[1]'नाम्नः प्राग्बहुर्वा' (७।३।१२) इत्यनेन बहुः पूर्वं कार्यः, बहुकुलीनः, [2]क्षत्रियकुलीनः, [3]राजकुलीनः, एषु 'अत इञ्' (६।१।३१) 'अदोरायनिः०' (६।१।११३) इति सूत्रद्वयबाधक ईनो भवति इत्यर्थः ॥९६॥

## यैयकञावसमासे वा ॥६।१।९७॥

म० वृ०-कुलशब्दान्तात् केवलाच्च कुलादपत्ये 'यः प्रत्यय एयकञ् प्रत्ययश्च वा' भवतः, ताभ्यां मुक्ते [पक्षे] ईनश्च, कुलशब्दो यदि समासे न वर्त्तते। कुल्यः, [यः], कौलेयकः [एयकञ्], कुलीनः [ईनः]; [1]बहुकुल्यः, बाहुकुलेयकः, बहुकुलीनः। असमास इति किम्? आढ्यकुलीनः ॥९७॥

---

प्रव०-[1]ईषदपरिसमाप्तं कुलं=बहुकुलमिति नायं समासः, किन्तु तद्धितवृत्तिरियम्, ईषदपरिसमाप्तं कुलम्, 'नाम्नः प्राग् बहुर्वा' (७।३।१२), बहुकुलस्यापत्यम् ॥९७॥

## दुष्कुलादेयण् वा ॥६।१।९८॥

म० वृ०-दुष्कुलादपत्ये 'एयण् वा' स्यात्। दौष्कुलेयः, दुष्कुलीनः ॥९८॥

## महाकुलाद्वाऽञीनञौ ॥६।१।९९॥

म० वृ०-महाकुलादपत्ये 'अञ्-ईनञ्प्रत्ययौ वा' भवतः, पक्षे [ताभ्यां मुक्तपक्षे] ईनश्च। [1]माहाकुलः [अञ्], माहाकुलीनः [ईनञ्], महाकुलीनः [ईन] ॥ ९९ ॥

---

प्रव०-[1]'माहाकुल' इत्यत्र महच्च तत् कुलं च=महाकुलम्, 'जातीयैकार्थे०' (३।२।७०) इति सूत्रेण डान्तादेशः। सूत्रे महाकुलेति आकारनिर्देशात् महतां कुलं महत्कुलम्, महत्कुलस्यापत्यं=महत्कुलीन इति ईन एव भवति, अत्र हि 'जातीयैकार्थेऽच्वेः' इत्यनेन डा न प्राप्नोति, एकार्थवृत्तेरभावात् ॥ ९९ ॥

## कुर्वादेर्ञ्यः ॥६।१।१००॥

म० वृ०-कुरु इत्यादिभ्योऽपत्ये 'ञ्यः' स्यात्।

[कुरोर्ब्राह्मणस्यापत्यं–] कौरव्यः । अक्षत्रियवचनस्येह [सूत्रे] कुरुशब्दस्य ग्रहणम् । क्षत्रियवचनात्तु कुरुशब्दात् 'दुनादिकुर्वित्०' (६।१।११८) इत्यनेन ञ्यो विधास्यते [1]अयं च विशेषः ॥१००॥

अव०–कुरुशब्दस्य क्षत्रियवचनस्य "दुनादिकुर्वित्०" (६।१।११८) इति ञ्यः, विप्रविशेषवाचिनश्च कुरोः 'कुर्वादेर्ञ्यः' (६।१।१००) इति ञ्यः, उभयथापि कौरव्य इति प्रयोगः । [1]अयं चानयोः क्षत्रियवाचिब्राह्मणादिविशेषवाचिकुरुशब्दयोर्विशेषो दर्श्यते, तथाहि– क्षत्रियवाची कुरुः, कुरूणामपत्यानि= कुरवः, 'दुनादिकुर्वित्०' (६।१।११८) ञ्यः प्रत्ययः, स च द्रिसंज्ञः , 'बहुष्वस्त्रियाम्' (६।१।१२४) इत्यनेन ञ्यो लुप्यते, 'कुरवः' इति प्रयोगः, यदि च (बहुत्वविवक्षाभावे ञ्यो न लुप्यते तदा कौरव्य इति प्रकृतिः,कौरव्यस्यापत्यम् ,'तिकादेरायनिञ् '(६।१।१०७) इति आयनिञ् ,कौरव्यायणिः। विप्रादिविशेषवाची कुरुशब्दः, तस्य कुरोरपत्यम् ,'कुर्वादेर्ञ्यः', कौरव्यः, कौरव्यस्यापत्यम् , 'अत इञ्' (६।१।३१), 'ञिदार्षादणि०' (६।१।१४०) इति इञ् लुप्यते, 'कौरव्य' इति प्रयोगः ; अथवा कुरोरपत्यम् ,– 'उत्सादेरञ्' ( ६।१।१९ ) इति अञ् तु ञ्यानिञ्भ्यां बाधितः, ततः 'तिकादेरायनिञ्', 'कौरवायणिः' इति प्रयोगः । कुरु, शङ्कु, शकन्धु, शाकभू , पथिकारिन् , मतिमत् , पितृमत् , पितृमन्तु, वाच् , हन्तृ, हृदिक, शलाका, कालाका, एरका, पदका, खदाका, केशिनी, मति, कवि, हन्ति, पिण्डी, ऐन्द्रजाली, धातुजि, वैराजकि, दामोष्णीषि, गाणकारि, कैशोरि, कापिञ्जलादि, गर्गर, हन्त (बृह० हनू), मञ्जूष, अविमारक, अजमारक, चफट्टक, कुट, कुटल, मुर, दभ्र, सूर्पणाय, श्यावनाय, श्यावरथ, श्याप्रथ, श्यावप्रथ, श्यापत्र, श्यापुत्र, सत्यङ्कार, वलभीकार, कर्णकार, पथिकार, बृहतीकार, वान्तवृक्ष, आर्द्रवृक्ष, मूढ, शाक, इन, रथकार, नापित, तक्षन् , शुभ्र इति कुर्वादिगणः । अत्र कुर्वादिहन्त्रन्तानां सामान्याणः, हृदिकशब्दस्य 'ऋषिवृष्ण्यणः,शलाकादीनां केशिन्यन्तानामेयणः,मतिकविहन्तिपिण्डीनामेयण, एवमन्येषामपि यथादर्शनं सर्वप्रत्ययबाधको ञ्यो विहितः ॥१००॥

## सम्राजः क्षत्रिये ॥६।१।१०१॥

म० वृ०–'सम्राज्' इति शब्दात् क्षत्रियेऽपत्ये 'ञ्यः' स्यात् । सम्राजोऽपत्यं=साम्राज्यः क्षत्रियश्चेत् । अन्यत्र अणेव-[1]साम्राजः ॥१०१॥

अव०–[1]साम्राजः क उच्यते ? वाराङ्गनावेश्यादीनां यो जातकः स साम्राजः, परं स नोभयपक्षविशुद्धः क्षत्रियः ॥१०१॥

## सेनान्त-कारु-लक्ष्मणादिञ् च ॥६।१।१०२॥

म० वृ०–सेनान्तशब्देभ्यः, कारुवाचिशब्देभ्यो लक्ष्मणाच्चापत्ये 'इञ् चकारात् ञ्यश्च' भवति। सेनान्त,-[1]हारिषेणि , हारिषेण्यः; एवं [2]वारिषेणिः, वारिषेण्यः। [3]कारु,-[4]तान्तुवायिः, तान्तुवाय्यः; [वर्द्धकेरपत्यम् =] वार्द्धकिः,वार्द्धक्यः ; कौम्भकारिः, कौम्भकार्यः । [5]रथकारनापिततक्षभ्यो ञ्य एव, नेञ्, कुर्वादिपाठात् । लक्ष्मणः, लाक्ष्मणिः, लाक्ष्मण्यः । 'ऋषिवृष्ण्यन्धक०' ( ६।१।६१ ) इति अण् , 'ङ्याप्त्यूङः' (६।१।७०) इति एयण् ,इमौ द्वावपि आभ्यामिञ्ञ्याभ्यां परत्वात् बाध्येते । [6]जातसेनिः, जातसेन्यः ; [एवं वैष्वक्सेनिः, वैष्वक्सेन्यः ; ] औग्रसेनिः, औग्रसेन्यः; भैमसेनिः, भैमसेन्यः । [7]तन्तुवाय्या अपत्यं=तान्तुवायिः,[8] तान्तुवाय्य इत्यादि ॥१०२॥

अव०–[1]हारिषेणो [2]वारिषेणो राजानौ, 'एत्यकः' (२।३।२६) इति सूत्रेण सस्य षः, हरिषेणस्यापत्यम् , वारिषेणस्यापत्यम्; हरयः सेनायां यस्य स हरिसेनः । [3]कारवो शिल्पिजातयः । [4]तन्तून् वयतीति 'कर्मणोऽण् (५।१।७२), तन्तुवायस्यापत्यम्; एवं तौन्नवायिः, तौन्नवाय्यः । [5]कुर्वादिगणप्रान्ते रथकारादयः शब्दाः सन्ति । [6]जातसेन्यादिषु 'ऋषिवृष्ण्य०' इति अणप्राप्तौ सत्याम् 'इञ्ञ्यौ' विहितौ । [7]तन्तुवायी इत्यत्र 'ङ्याप्त्यूङः' इति एयणप्राप्तौ इञ्ञ्यौ विहितौ । [8]'तान्तुवायिः' इत्यत्र 'जातिश्च णि०' (३।२।५१) इति पुंवद्भावः ॥१०२॥

## सुयाम्नः सौवीरेष्वायनिञ् ॥६।१।१०३॥

म० वृ०–सुयामन्शब्दात [1]सौवीरदेशेषु वर्त्तमानादपत्ये 'आयनिञ्' स्यात् । [2]सौयामायनिः । सौवीरेभ्योऽन्यत्र [3]सौयामः ॥१०३॥

अव०–[1]'सौवीरदेशेषु वर्त्तमानात्', कोऽर्थः ? सौवीरदेशस्थितपुरुषाद्यर्थवाचकात् शब्दात् । [2]'सुयाम्नः सौवीरदेशवासिनो नरस्यापत्यं=सौयामायनिः । [3]सुयामा कश्चिन्नरः,तस्यापत्यम् ,'ङसोऽपत्ये' (६।१।२८) अण् , 'अवर्मणो मनोऽपत्ये' (७।४।५९) इति सूत्रेणान्त्यस्वरादिलोपः ॥१०३॥

## पाण्टाहृति-मिमताण्णश्च ॥६।१।१०४॥

म० वृ०–[1]पाण्टाहृतेरिञन्तात् मिमताच्च सौवीरार्थवृत्तेरपत्ये 'णः चकारादायनिञ्' स्यात् । पाण्टाहृतेरपत्यं युवा सौवीरगोत्रः=पाण्टाहृतः; पाण्टाहृतायनिः ; [2]मैमतः, मैमतायनिः ॥१०४॥

अव०–[1]पण्टेन आह्रियते स्म=पण्टाहृतः, ( पण्टाहृतस्यापत्यं पाण्टाहृतिः, ) अथवा पाण्टेन अनायाससाध्येन आह्रियते स्म, पाण्टाहृतशब्दः, पाण्टाहृतस्यापत्यं=पाण्टाहृतिः, 'अत इञ्' (६।१।३१), इत्थमिञन्तात् पाण्टाहृतिशब्दात् णः, आयनिञ् । [2]मिमतस्यापत्यं युवा सौवीरगोत्रः= मैमतः ॥१०४॥

## भागवित्ति-तार्णविन्द-आकशापेयान्निन्दायामिकण् वा ॥६।१।१०५॥

म० वृ०–भागवित्तितार्णविन्दवाकशापेयशब्देभ्यः सौवीरवृत्तिभ्यो यून्यपत्ये 'निन्दायामिकण् वा' स्यात् । [1]भागवित्तिकः, भागवित्तायनो जाल्मः ; [2]तार्णविन्दविकः, तार्णविन्दविः ; [3]आकशापेयिकः, आकशापेयिः ॥१०५॥

अव०–[1]भगेन वित्तो भगवित्तः, भगवित्तस्यापत्यं भागवित्तिः, 'अत इञ्' (६।१।३१), भागवित्तिशब्दः, भागवित्तेरपत्यं युवा निन्दितो भागवित्तिकः,एकत्र सूत्रेण इकण् ;पक्षे 'यञिञः' (६।१।५४) इति सूत्रेण आयनण् । [2]तृणे विन्दवः पेया अस्य=तृणविन्दः (? तृणविन्दुः),तृणविन्दोरपत्यं वृद्धम् ,'ङसोऽपत्ये' (६।१।२८) (इत्यणि तार्णविन्दवः), तार्णविन्दवस्यापत्यं युवा निन्दित इति वाक्ये 'भागवित्ति०' (६।१।१०५) इत्यनेन इकण् , पक्षे इञ् । [3]अकं=दुःखं शपति=आक्रोशति,– 'कर्मणोऽण्' (५।१।७२) इति अण् , अकशापः, तस्यापत्यं वृद्धम् ,– 'शुभ्रादिभ्यः' (६।१।७३) एयण् ,(आकशापेयः,) आकशापेयस्यापत्यमाकशापेयिकः ॥१०५॥

## सौयामायनि-यामुन्दायनि-वार्ष्यायणेरीयश्च वा ॥६।१।१०६॥

म० वृ०–एभ्य आयनिञन्तेभ्यः सौवीरवृद्धवृत्तिभ्यो यून्यपत्ये 'निन्दायामीयः प्रत्ययश्चकारादिकण् वा' स्यात् । [1]पक्षेऽणप्रत्ययोऽपि । सुयाम्नोऽपत्यं=सौयामायनिः, तस्यापत्यं युवा निन्दितः सौयामायनीयः, सौयामायनिकः, सौयामायनिर्वा[2] । यामुन्दायनीयः, यामुन्दायनिकः, यामुन्दायनिः [3] । [4]वार्ष्यायणीयः, वार्ष्यायणिकः, वार्ष्यायणिर्वा १०६

अव०–[1]ताभ्यां मुक्तपक्षे । [2]सुष्ठु यातीति मन्प्रत्ययः, सुयाम्नोऽपत्यम् , 'सुयाम्नः सौवीरेष्वायनिञ्' (६।१।१०३), सौयामायनिः इति शब्दः सौयामायनेरपत्यम् ,'ङसोऽपत्ये' (६।१।२८) अण् , 'विदार्षादणि०' (६।१।१४०) इत्यनेन अण् लुप्यते । [3]यामुन्दस्यापत्यं=यामुन्दायनिः, 'तिकादेरायनिञ्' (६।१।१०७),यामुन्दायनेरपत्यं युवा निन्दितः=यामुन्दायनीयः ; यामुन्दायनेरपत्यम् ,'ङसोऽपत्ये'(इति) अण् , 'ञिदार्षा०' इति अण्लोपः । [4]वृषस्यापत्य= वार्ष्यायणिः, 'दगुकोशलकर्मार०' (६।१।१०८) इत्यनेन यायनिञ् , तस्यापत्यम् ॥१०६॥

## तिकादेरायनिञ् ॥६।१।१०७॥

म० वृ०–तिकादिशब्देभ्योऽपत्ये 'आयनिञ्' स्यात् । इञादेरपवादः । तिक,-तैकायनिः ॥१०७॥

अव०–तिक, कितव, संज्ञा, वाल, शिखा,

( बालशिख. ) उरश, शाक्य, सैन्धव, यमुन्द, रूप्य, पूर्णिक, ग्राम्य, नील, अमित्र, गोकक्ष्य, कुरु, देवर, दैवर, षेवर, धैवर, देवरथ, तैतिल, शैलाल, औरश, कौरव्य, भौरिकि, (भौलिकि,) चौपयत,चैतयत, चैटयत,शैकयत,क्षैतयत,ध्याज,वत,(ध्वाजवत,)चन्द्रमस् ,शुभ, श्रुभ, स्र भ, गङ्गा,वरेण्य, वन्ध्या, बिम्बा, अरद्ध, अरद्धा, आरद्ध, वह्मका, खल्य, लोमका, उदन्य, यज्ञ, नीड, आरब्ध, लङ्कव, भीत, उतथ्य, सुयामन्, उरवा, खल्वका, शल्यका, जाजल, वसु, उरस् इति तिकादिगणः । उरिः सौत्रो धातुर्गत्यर्थः, उरति प्रतिष्ठामिति औरशः, 'उरेरशक्' (उ०५३१) इति सूत्रेण अशक्, उरशस्यापत्यम्– 'राष्ट्रक्षत्रिया०' (६।१।११४) इति अञ् । औरशशब्देन क्षत्रियप्रत्ययान्तेन साहचर्यात् कौरव्यशब्द इहगणे क्षत्रियप्रत्ययान्त एव गृह्यते, अन्यस्मात् ब्राह्मणवाचिनः कौरव्यात् इञ एव, तस्य 'ञिदार्षा०' (६।१।१४०) इति लुप् ; तथाहि– कुरोर्ब्राह्मणस्यापत्यं 'कुर्वादेर्ञ्यः' (६।१।१००) कौरव्यः, कौरव्यस्यापत्यम्– 'अत इञ्' (६।१।३१), तत इञ् लुप्यते, कौरव्यः पिता, कौरव्यः पुत्रः । कुरूणां राजा कुरुः, कुरो राज्ञोऽपत्यम्– 'दुनादि०' (६।१।११८) इति ञ्यः, कौरव्यः, कौरव्यस्यापत्यं युवा– 'तिकादेरायनिञ्', कौरव्यायणिः पुत्रः ; अत्रापि 'अब्राह्मणात्' (६।१।१४१) इत्यनेन आयनिञो लुप् प्राप्तोऽपि न भवति, विधानसामर्थ्यात् ; न हि इञ आयनिञो वा लुपि कृतायां कश्चिद्विशेषः क्षत्रियब्राह्मणवाचिनोः कौरव्यशब्दयोः ॥ १०७ ॥

## दकु-कोशल-कर्मार-च्छाग-वृषाद् यादिः ॥६।१।१०८॥

म० वृ०–एभ्योऽपत्ये 'यकारादिरायनिञ्' स्यात् । [१]दाकव्यायनिः, [२]कौशल्यायनिः, [३]कार्मार्यायणिः, [४]छाग्यायनिः, [५]वार्ष्यायणिः ॥१०८॥

अव०–[१]दगोरपत्यम् । [२]कोशलस्यापत्यम्, तथा एकेनैव शब्देन देशा राजानोऽप्युच्यन्ते, तत ईदृशात् जनपदसमानशब्दात् क्षत्रियात् कोशलशब्दात् 'दुनादि०' (६।१।११८) इत्यनेन ञ्यः प्रत्ययोऽपि भवति, कौशल्य इत्यपि प्रयोगो मन्तव्यः । [३]कर्मारस्यापत्यं= कार्मार्यायणिः । [४]छागस्यापत्यम् । [५]वृषस्यापत्यं= वार्ष्यायणिः ॥१०८॥

## [१]द्विस्वरादणः ॥६।१।१०९॥

म० वृ०–द्विस्वरादणन्तादपत्ये 'आयनिञ्' स्यात् । [२]कार्त्रायणिः, [३]पौत्रायणिः । द्विस्वरादिति किम् ? औपगविः ('अत इञ्' (६।१।३१) । अण इति किम् ? [४]दाक्षायणः । [५]वृद्धादेवायं विधि ॥ १०९ ॥

अव०–[१]'द्विस्वर०' इति सूत्रोदाहरणेषु पूर्वं 'ङसोऽपत्ये' (६।१।२८) इत्यौत्सर्गिकोऽण्, ततोऽणन्तात् 'द्विस्वरादण' इत्यनेन आयनिञ् विधीयते इति विधिः । [२]कर्तृशब्दः, कर्तुरपत्यं=कार्त्रः, 'ङसोऽपत्ये' (इति) अण्, कार्त्रस्यापत्यं= कार्त्रायणिः ; एवं हर्तृ,– हार्त्रायणिः । [३]पोतुरपत्यं वृद्धं= पौत्रायणिः । [४]दक्ष, दक्षस्यापत्यम्, 'अत इञ्' (६।१।३१), दाक्षेरपत्यम्, 'यञिञः' (६।१।५४) आयनण् । [५]'वृद्धादेवायं विधिः', अयं भावः,– यत्र वृद्धप्रत्ययः तदन्तात् द्विस्वरादण इति प्रवर्त्तते, यत्र च अवृद्धार्थप्रत्ययस्तत्रोत्तरसूत्रेण विकल्प एव, यथा– अङ्गानां राजा=आङ्गः, 'पुरुमगध०' (६।१।११६) इति अण्, आङ्गस्यापत्यम्– 'अत इञ्', आङ्गेरपत्यम्–'अवृद्धाद् दोर्नवा' (६।१।११०) इतिआयनिञ्, आङ्गायनिः ॥१०९॥

## अवृद्धाद्दोर्नवा ॥६।१।११०॥

म० वृ०–अवृद्धवाचिनो दुसंज्ञकाद् [दुसंज्ञकात् कीदृशात् ? अवृद्धवाचिनः] अपत्ये 'आयनिञ्' (वा) स्यात् । आम्रगुप्तायनिः, ['वृद्धिर्यस्य स्वरे०' (६।१।८) इति दुसंज्ञा] आम्रगुप्तिः ; ['अत इञ्' ] पाञ्चालायनिः, [ पञ्चालानां राजा, 'राष्ट्रक्षत्रिया०' (६।१।११४) इति अञ्, तस्यापत्यम् ] पाञ्चालिः ; [१]नापितायनिः, नापित्यः । अवृद्धादिति किम् ? [२]दाक्षायणः ॥११०॥

**अव०**–[1]नापितस्यापत्यं नापितायनिः, पक्षे नापित्य इति, नापितस्यापत्यं= नापित्यः, 'कुर्वादेर्ञ्यः' (६।१।१००), 'सेनान्तकारु०' (६।१।१०२) इत्यनेन नापितशब्दात् इञ् न भवति, यत इञ्-प्रत्ययबाधनार्थमेव कुर्वादिगणे नापितशब्दः पठितोऽस्ति इति नापितात् ञ्यः कार्यः, न इञ् । [2]दक्षस्यापत्यम्, 'अत इञ्', दाक्षेरपत्यम्, 'यञिञः' (६।१।५४) आयनण् ॥११०॥

## पुत्रान्तात् ॥६।१।१११॥

**म० वृ०**–पुत्रान्ताद् दुसंज्ञकादपत्ये 'आयनिञ् वा' स्यात् । [1]गार्गीपुत्रायणिः, गार्गीपुत्रिः ; [2]गार्गीपुत्रकायणिरित्यपि ॥१११॥

---

**अव०**–[1]गार्गी, गर्गस्यापत्यं वृद्धम्,–'गर्गादेर्यञ्' (६।१।४२), 'यञो डायन् च वा' ( २।४।६७ ) इत्यनेन ङी, 'व्यञ्जनात्तद्धितस्य' (२।४।८८) इत्यनेन तद्धितयञ् लुप्यते, गार्गी इति शब्दः सम्पन्नः, गार्ग्याः पुत्रो=गार्गीपुत्रः, गार्गीपुत्रस्यापत्यम्, 'पुत्रान्तात्' ( इति ) आयनिञ्, गार्गीपुत्रायणिरिति सिद्धम् । पूर्वेणायनिञि सिद्धेऽपि 'पुत्रान्ता'-दिति वचनमुत्तरसूत्रप्राप्तककारागमाभावार्थम् । [2]भवत्यपि उत्तरेण ककारागमः, तत्र 'गार्गीपुत्रकायणिः' इति तृतीयरूपमपि ज्ञेयम् ॥१११॥

## चर्मि-वर्मि-गारेट-कार्कट्य-काक-लङ्का-वाकिनाच्च कश्चान्तोऽन्त्यस्वरात् ॥६।१।११२॥

**म० वृ०**–एभ्यः पुत्रान्ताच्च दुसंज्ञकादपत्ये 'आयनिञ् वा' स्यात्, तद्योगे चैषामन्त्यस्वरात्परः ककारोऽन्तः स्यात् । [ककारस्यान्त्यस्वरात्परतो विधानं चर्मिवर्मिणोः नकारस्य लोपार्थम् ] [1]चर्मिन्,-चार्मिकायणिः, चार्म्मिणः ['ङसोऽपत्ये' (६।१।२८) अण् ], [2]वर्मिन्,-वार्मिकायणिः, वार्मिणः । 'ङसोऽपत्ये']; [3]गारेट,-गारेटकायनिः ; [4]कार्कट्यायनिः, कार्कट्यायनः ['यञिञः' (६।१।५४) इति आयनण्], [4]कार्कट्यिरित्यपि ; काककायनिः [ ऋषिविशेषः ], काकिः ['बाह्वा०' (६।१।३२); [5]लाङ्काकायनिः, लाङ्केयः; ['द्विस्वरादनद्याः' (६।१।७१) एयण्, ऋषिविशेषः ] वाकिन,-वाकिनकायनिः, वाकिनिः ; अथ पुत्रान्तादोः,-गार्गीपुत्रकायणिः, गार्गीपुत्रिः [गार्गीपुत्रायणिः इति तृतीयं रूपं ज्ञातव्यम् ] ॥११२॥

---

**अव०**–[1]चर्म [2]वर्म अस्यास्ति, 'शिखादिभ्यः०' (७।२।४) इति सूत्रेण इन्, चर्मिन्, वर्मिन् ; चर्मिणो वर्मिणोऽपत्यम्, 'चर्मिवर्मिगारेट०' इत्यनेन आयनिञ्, प्रकृतिप्रत्ययविचाले ककारो नकारात् पूर्वं क्रियते, पश्चात् 'नोऽपदस्य०' (७।४।६१) इति अन्त्यस्वरादिलोपः, चार्मिकायणिः, वार्मिकायणिः इति सिद्धम् । [3]'गारेट' इति, 'कर्मणोऽण्' ( ५।१।७२ ), पृषोदरादित्वान्निपात्यते, गारेटस्यापत्यम्, आयनिञ्, पक्षे 'अत इञ्' ( ६।१।३१ ) । [4]कर्कटस्यापत्यम्, 'गर्गादेर्यञ्' ( ६।१।४२), [4]यदा तु कार्कट्यशब्दोऽव्युत्पन्नस्तदा पक्षे इञेव, यथा-कार्कट्यिः । [5]तथा केचिल्लङ्कशब्दमकारान्तमिच्छन्ति, तन्मते लाङ्ककायनिः, लाङ्किः, 'अत इञ्' (६।१।३१) ॥११२॥

## अदोरायनिः प्रायः ॥६।१।११३॥

**म० वृ०**–अदुसंज्ञकादपत्ये 'आयनिर्वा प्रायः' स्यात् । ग्लुचुकायनिः, ग्लौचुकिः ; [एवमहिचुम्बकायनिः, आहिचुम्बकिः ; ] त्रिपृष्ठायनिः, त्रैपृष्ठिः ; श्रीविजयायनिः, श्रैविजयिः । अदोरिति किम् ? [1]औपगविः [उपगवस्यापत्यं युवा ] । प्रायोग्रहणात् क्वचिन्न भवति- दाक्षिः ॥११३॥

---

**अव०**–[1]'औपगविः' इत्यस्याग्रे रामदत्तिः, रामदत्तायनिः पिता, रामदत्तायनिः पुत्रः ; अत्र आयनिञन्तात् अणो लुप् ॥११३॥

## राष्ट्र-क्षत्रियात् सरूपाद्राजापत्ये द्रिरञ् ॥६।१।११४॥

**म० वृ०**–[1]क्षत्रियवाचिसरूपात् राष्ट्रवाचिनो राष्ट्रवाचिसरूपाच्च क्षत्रियवाचिनो यथासङ्ख्यं राज-

नि [२]क्षत्रियेऽपत्ये च 'अण्' स्यात्, स च द्रिसंज्ञः। नवेति निवृत्तम् [ अपत्ये इत्यनुवर्त्तमाने राजनि इत्यधिकारार्थस्य भणनान्नवेति निवृत्तम ]। विदेहानां राष्ट्रस्य राजा=वैदेहः, वैदेहौ, विदेहाः[३]। विदेहस्य राज्ञोऽपत्यम् वैदेहः, वैदेहौ, विदेहाः[४]। [५]ऐक्ष्वाकः, [६]ऐक्ष्वाकौ, [७]इक्ष्वाकवः। राष्ट्रक्षत्रियादिति किम्? [८]पाञ्चालः, पाञ्चालिः[९]। सरूपादिति किम्? सुराष्ट्राणां राजा=सौराष्ट्रकः[१०] ['बहुविषयेभ्यः' (६।२।४५) इति अकञ् ], दशरथस्य क्षत्रियस्यापत्यं=दाशरथिः, त्रिपृष्ठस्य त्रैपृष्ठिः। द्रिप्रदेशा 'द्रेरञणोऽप्राच्य०' (६।१।१२३) इत्यादयः॥११४॥

अव०-[१]राष्ट्रक्षत्रिययोरयं भावार्थः- यदि स एव देशनाम राष्ट्रनाम, यदि स एव राजनाम क्षत्रियनाम भवति तत्र अञादिप्रत्ययो भवति इति परमार्थः। [२]क्षत्रिये इति विशेषणम्। [३]'विदेहा' इत्यत्र विदेहानां राष्ट्रस्य राजानो=विदेहाः, 'राष्ट्रक्षत्रिया०' इत्यनेन अण्, 'बहुष्वस्त्रियाम्' ( ६।१।१२४ ) इति सूत्रेण अञ् लुप्यते, ततो जस्, विदेहाः सिद्धम्। [४]एवमग्रेऽपि विदेहस्य राज्ञोऽपत्यानि=विदेहाः। [५]इक्ष्वाकूणां राष्ट्रस्य राजा अथवा इक्ष्वाकोरपत्यम्=ऐक्ष्वाकः। [६]इक्ष्वाकूणां राष्ट्रस्य राजानौ इक्ष्वाकूणामपत्ये इति द्वित्वे वाक्यम्। [७]इक्ष्वाकूणां राष्ट्रस्य राजानः इक्ष्वाकोरपत्यानि इति बहुत्वे वाक्यम्। 'ऐक्ष्वाक' इत्याद्युदाहरणेषु 'राष्ट्रक्षत्रिया०' इत्यनेन अञ्, 'सारवैक्ष्वाक०' (७।४।३०) इत्यनेन उकारलोपः, बहुत्वे 'बहुष्वस्त्रियाम्' इत्यनेन अञ् लुप्यते, इति द्रिसंज्ञाक (? द्रिसंज्ञाया) इदं फलं यत् अञ् लुप्यते। [८]पञ्चालस्य ब्राह्मणस्य राजा=पाञ्चालः, 'तस्येदम्' (६।३।१६०) इत्यण्। [९]पञ्चालस्य ब्राह्मणस्यापत्यं=पाञ्चालिः, 'अत इञ्' (६।१।३१)। [१०]एवमादर्शकः, आदृश्यते श्रीमद्भिः, 'भावा०' (६।३।१८) घञ्- आदर्शः, आदर्शस्य राष्ट्रस्य राजा=आदर्शकः। सुराष्ट्राऽऽदर्शशब्दौ देश एव वर्त्तेते। दशरथत्रिपृष्ठशब्दौ तु राजन्येव वर्त्तेते, न देशे। ॥ ११४ ॥

[१]गान्धारि-साल्वेयाभ्याम् ॥६।१।११५॥

म० वृ०-गान्धारिसाल्वेयौ इञेयणन्तौ सरूपौ राष्ट्रक्षत्रियवचनौ। ताभ्यां राष्ट्राद्राजनि क्षत्रियादपत्ये-'ऽञ्' [२]स्यात्, स च द्रिः। [३]दुलक्षणस्य ञ्यस्यापवादः। [४]गान्धारीणां राजा गान्धारे राज्ञोऽपत्यं च= गान्धारः, [५]गान्धारौ, [६]गान्धारयः। [७]साल्वेयः, साल्वेयौ, साल्वेयाः॥११५॥

अव०-[१]वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः। [२]गान्धारिः (इति) इञन्तशब्दात् साल्वेय (इति) एयणन्तशब्दात् परोऽञप्रत्ययो भवतीति सम्बन्धः। [३]'दुनादिकुर्वित्कोशल०' (६।१।११८) इति सूत्रविहितस्य ञ्यप्रत्ययस्यापवादोऽयम्। अयमञ् इत्यर्थः। [४]राष्ट्रक्षत्रियवचनो गन्धार इति शब्दोऽप्यस्ति, ततः परो नेञ्, 'राष्ट्रक्षत्रिया०'(६।१।११४) इति अञ्-बाधितत्वात्, इति गन्धमियर्त्ति=गन्धार इति व्युत्पत्तिप्रधानादेवापत्येऽर्थे गन्धारस्यापत्यम् (इति) 'अत इञ्' (६।१।३१) भवति, उपचारान्निवासेऽपि गान्धारिः इत्यु...............................(च्यते, तेनापत्यप्रत्ययान्ता गान्धारि इति) मूलप्रकृतिः, गान्धारीणां राजा अथवा गान्धारे राज्ञोऽपत्यं गान्धारः। [५]गान्धारीणां राजानौ। [६]गान्धारीणां राजानोऽपत्यानि(वा)इति बहुत्वे वाक्यम्, तत्र 'बहुष्वस्त्रियाम्' (६।१।१२४) इति अञ् लुप्यते, गान्धार इति वाक्यम्(?)बहुत्वे प्रयोगोऽयम्, इति द्रिसंज्ञाफलं यल्लोपोऽञः। [७]साल्वा नाम जनपदः, साल्वाया अपत्यं 'द्रिस्वरादन०' (६।१।७१) इति एयण्, साल्वेयानां राजा साल्वेयस्यापत्यं युवा वा। ॥११५॥

पुरु-मगध-कलिङ्ग-शूरमस-द्रिस्वरादण्
॥६।१।११६॥

म० वृ०-एभ्यो द्विस्वरेभ्यश्च राष्ट्रक्षत्रियार्थेभ्यः सरूपेभ्यो यथासङ्ख्यं राजन्यपत्ये-'ऽण्' स्यात्, स च द्रिः। अञोऽपवादः। पुरोरपत्यं=पौरवः, पौरवौ, पुरवः। मगधस्यापत्यं मगधानां राजा (वा)= मागधः, मागधौ, मगधाः [ बहुषु अण्लोपः ];

कालिङ्गः, कलिङ्गाः ; शौरमसः, शूरमसाः । द्विस्वर,-अङ्गानां राजा अङ्गस्यापत्यं वा=आङ्गः, अङ्गाः ; वाङ्गः, वङ्गाः ;दारदः, दरदः [दरदो राजा दरदोऽपत्यं वा] । [1]साल्वः, सल्वाः । पुरुग्रहणमराष्ट्रसरूपार्थम् । [2]अस्ति राजा पुरुर्नाम ॥११६॥

---

प्रव०–[1]'साल्वः, साल्वाः' इत्यत्र साल्वानां राजा साल्वस्य राज्ञोऽपत्यं वा साल्वः, साल्वाः । [2]अस्ति राजा पुरुर्नाम, न तु राष्ट्रम् , अत्र विशेषो लिख्यते– यः पुरुशब्दो राजवाची तस्य 'ङसोऽपत्ये' (६।१।२८) इति सामान्याणा सिद्धेऽपि बहुषु लुबर्थं 'पुरुमगध०' इत्यनेन अण्विधानं कृतम् , किंच अधिकारायातेन अञ्प्रत्ययेनैव सिद्धौ सत्यामपि यत् पुरुमगधादिशब्देभ्योऽण्विधानम् , तत् 'संघघोषाङ्कलक्षणेऽञ्यञिञः' (६।३।१७२) इति सूत्रोक्ताणो बाधनार्थम् , तेन संघघोषोक्तमणं बाधित्वा 'गोत्राददण्डमाणवशिष्ये' (६।३।१६९) इति सूत्रेण अकञ् भवति, तथाहि एषु 'गोत्राददण्ड०' इति अकञ् , एवं प्रयोगाः सिद्धयन्ति ॥११६॥

## [1]साल्वांश-प्रत्यग्रथ-कलकूटा-ऽश्मकादिञ् ॥६।१।११७॥

म० वृ०–साल्वा नाम देशस्तदंशास्तदवयवा उदुम्बरादयः, तेभ्यः प्रत्यग्रथादिभ्यः(च)राष्ट्रक्षत्रियवाचिभ्यः सरूपेभ्यो [ यथासङ्ख्य ] राजन्यपत्ये इञ् स्यात् , स च द्रिसंज्ञः । उदुम्बराणां राजा उदुम्बरस्यापत्यं वा औदुम्बरिः, उदुम्बराः[2] । प्रात्यग्रथिः, प्रत्यग्रथाः । कालकूटिः, कलकूटाः [बहुषु लुप् ]। आश्मकिः, अश्मकाः ['बहुष्वस्त्रियाम्' (६।१।१२४] ॥११७॥

---

प्रव०–[1]"उदुम्बरास्तिलखला मद्रकारा युगन्धराः । भुलिङ्गाः शरदण्डाश्च साल्वांशा इति कीर्त्तिताः"॥१॥ अजमीढ, अजकुन्द, बुध इति उदुम्बरादिविशेषाः, तेऽपि साल्वांशा एव । तिला एव खला यत्र प्रचुरत्वात् , यद्वा तिला खल्यन्तेऽत्र गौचरे । [2]उदुम्बरा इत्यस्याग्रे एवं [तैलखलिः, तिलखलाः ;] माद्रकारिः, मद्रकाराः ; यौगन्धरिः, युगन्धराः ; शारदण्डिः, शरदण्डाः ; आजमीढिः, अजमीढाः ; आजकुन्दिः, अजकुन्दाः ; बौधिः, बुधाः इति साल्वांशविषया उदाहरणावली । उदुम्बराणां राजानः उदुम्बरस्यापत्यानि (वा) 'साल्वांश०' इत्यनेन इञ् , 'बहुष्वस्त्रियाम्' ( ६।१।१२४ ) इत्यनेन इञ् लुप्यते, उदुम्बरा इति सिद्धम् ॥११७॥

## दुनादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः ॥६।१।११८॥

म० वृ०–दुसंज्ञकेभ्यः, नकारादिभ्यः, कुरुशब्दात्,इकारान्तेभ्यः कोशलाजादाभ्यां च राष्ट्रक्षत्रियवाचिभ्यः सरूपेभ्यो राजन्यपत्ये 'ञ्यः' स्यात् , स च द्रिः । दु,-आम्बष्ठानां राजाऽपत्यं वा=आम्बष्ठ्यः, आम्बष्ठाः, [बहुत्वे लुप् ]; सौवीराणां राजा सौवीरस्यापत्यं वा=सौवीर्यः, सौवीराः । नादि,-नैषध्यः, निषधाः, कुरूणां राजा कुरोरपत्यं (वा) कौरव्यः, कुरवः । इत् ,-[1]आवन्त्यः, [2]अवन्तयः ; [3]कौन्त्यः, [4]कुन्तयः ; चैद्यः, चेदयः ; काश्यः, काशयः । [5]कौशल्यः, कोशलाः ; [6]आजाद्यः, अजादाः ॥११८॥

---

प्रव०–[1]अवन्तीनां राजा अवन्तेरपत्यम् [2]अपत्यानि वा । [3]कुन्तिशब्दः, कुन्तीनां राजा [4]अपत्यानि वा; एवं चेदि, काशि ; सर्वत्र बहुत्ववाक्ये 'बहुष्वस्त्रियाम्' (६।१।१२४। इति) प्रत्ययलोपः । [5]कोशलानां कोशलस्य वा राजा अपत्यं वा । [6]अजादानां अजादस्य वा (राजा अपत्यं वा) ॥११८॥

## पाण्डोर्ड्यण् ॥६।१।११९॥

म० वृ०–पाण्डुशब्दात् क्षत्रियवाचिनः सरूपाद्राजन्यपत्ये चार्थे 'ड्यण् , स च द्रिसंज्ञः' । [1]पाण्ड्यः, पाण्ड्यौ, पाण्डवः ॥११९॥

---

प्रव०–[1]पाण्डूनां राजा पाण्डोरपत्यं वा । कथं पाण्डवा यस्य दासाः ? अत्र पाण्डोः परतो ड्यण् कथं न भवतीति पृच्छा ; उच्यते, तस्य प्रसि-

द्रस्य क्षत्रियस्य राष्ट्रसरूपस्य य ईश्यो स्वेच्छया नियोक्तव्यो जनपदः यश्च तस्य क्षत्रियसरूपस्य राष्ट्रस्य ईशिता स्वेच्छया विनियोक्ता क्षत्रियः स एव गृह्यते प्रत्यासत्तेः; कोऽभिप्रायः ? यदि स देशः स एव राजा भवति तदैव ड्यण् प्रत्ययो भवति, अत्र तु कुरवो जनपदः, तस्य कुरो राजा पाण्डुरिति शिवाद्यण् अत्र भवति। णकारो वृद्धिनिमित्तपुं-वद्भावप्रतिषेधार्थः, यथा- पाण्डु, पाण्डोरपत्यं स्त्री राज्ञी वा' (पाण्ड्या, पाण्ड्या भार्या यस्यासौ पाण्ड्या-भार्यः) ॥११९॥

## शकादिभ्यो द्रेर्लुप् ॥६।१।१२०॥

म० वृ०-शकादेः परस्य [1]'द्रिसंज्ञप्रत्ययस्य लुप्' स्यात्। शकानां राजा शकस्यापत्यं वा=[2]शकः, एवं यवनः,[3] जार्त्तः, कम्बोजः, चोलः, केरलः[4] इत्यादयः ॥१२०॥

---

अव०-राष्ट्रक्षत्रियेत्यादिसूत्रपञ्चकेन अञ्, अण्, इञ्, ञ्य, ड्यण् इति प्रत्ययपञ्चकं द्रिसंज्ञकमुक्तम्। तेषां द्रिसंज्ञप्रत्ययानां 'शकादिभ्यो द्रेर्लुप्' इत्यादिसूत्रे लोपः। [2]'शक' इत्यत्र 'पुरुमगध०' (६।१।११६) इत्य............(नेन सूत्रेणा)ण्। [3]'यवन' इत्यादिषु 'राष्ट्रक्षत्रिया०' (६।१।११४) इत्यनेन अञ्, 'शकादिभ्यो०' इत्यनेन लोपः। [4]'केरल' इत्यस्याग्रे आधारयः, विधारयः, उपधारयः, अपधारयः, मुरलः, खस इति शकादयः प्रयोगगम्याः। आचार्यस्य इयं शैली- यत्र गणे शब्दबाहुल्यं तत्र बहुवचनं निर्दिशति, यथा-'शकादिभ्य' इत्यत्र, 'बहुवचनमाकृतिगणार्थम्' इत्यक्षराणि गणप्रान्ते आचार्यो निर्दिशति ; यत्र च गणे शब्दतावत्त्वं नियतत्वं तत्र आचार्यः सूत्रे एकवचनं प्ररूपयति, यथा 'भर्गादेः' 'गर्गादेः' 'बिदादेः' इत्यत्र ॥१२०॥

## कुन्त्यवन्तेः स्त्रियाम् ॥६।१।१२१॥

म० वृ०-कुन्ति-अवन्तिशब्दाभ्यां परस्य 'द्रिसंज्ञस्य ञ्यस्य लुप्' स्यात्, स्त्रियां वाच्यायाम्। कुन्तेरपत्यं स्त्री=[1]कुन्ती, [2]अवन्ती। स्त्रियामिति किम् ? [3]कौन्त्यः, आवन्त्यः ॥१२१॥

अव०-.......[[1]कुन्ती] [2]अवन्ती इत्य........ [त्र कुन्तेरपत्यं] स्त्री अ...[वन्]तेरपत्यं स्त्री, दुनादिकुर्वित्० (६।१।११८) ञ्यः, तस्यानेन लुप्, 'नुजातेः' (२।४।७२) ङी। [3]कुन्तीनां राजापत्यं वा 'दुनादि०' (६।१।११८) ञ्यः, एवमावन्त्यः ॥१२१॥

## कुरोर्वा ॥६।१।१२२॥

म० वृ०-कुरुशब्दात् परस्य 'द्रेर्ञ्यस्य स्त्रियां वा लुप्' स्यात्। कुरोरपत्यं स्त्री=कुरुः, कौरव्यायणी ॥१२२॥

## द्रेरञणोऽप्राच्यभर्गादेः ॥६।१।१२३॥

म० वृ०-[1]प्राच्यान् [2]भर्गादींश्च वर्जयित्वाऽन्यस्मात्परस्या-'ऽञोऽणश्च द्रेः स्त्रियां लुप्' स्यात्। अञः- शूरासनस्यापत्यं स्त्री=शूरासनी। अणः,-मद्री,[3] [4]दरद्, [5]मत्सी। द्रेरिति किम् ? औत्सी। द्रावनुवर्त्तमाने पुनर्द्रिग्रहणं भिन्नप्रकरणस्यापि द्रेर्लुबर्थम्,[6] तेन [7]पर्शूः, [8]रक्षाः, [9]असुरी। अञण इति किम्। ? [10]औदुम्बरी। अप्राच्यभर्गादेरिति किम् ? [11]पाञ्चाली, [12]वैदेही, [13]पैप्पली, [14]मागधी, कालिङ्गी, वैदर्भी, आङ्गी, वाङ्गी, पौण्ड्री, शौरमसी। पाञ्चालादयः प्राच्या राष्ट्रसरूपाः क्षत्रियाः। भर्गादि,-[15]भार्गी ॥१२३॥

---

[1]'राष्ट्रक्षत्रियात् सरूपाद्' (६।१।११४) इत्यारभ्य ये प्रत्यया पूर्वमुक्तास्ते प्राच्या उच्यन्ते, प्राच्य सूत्रेष्वपि अञणप्रत्ययान्तविषयो निषेधः। [2]भर्ग, करुष, करूश, केकय, कश्मीर, सल्व, सुस्थाल, उरश, यौधेय, शौक्रेय, शौभ्रेय, धार्त्तेय, धार्त्तेय, ज्यावानेय, त्रिगर्त्त, भरत, उशीनर इति भर्गादिगणः। [3]मद्राणामपत्यं स्त्री। [4]दरदोऽपत्यं स्त्री। [5]मत्स्यः, मत्स्यस्यापत्यम्, 'पुरुमगध०' (६।१।११६) इति अण्, 'द्रेरञ०' (इति) लोपः। मद्र इत्यत्र 'जाते०' (२।४।५४) मत्स्य इत्यत्र 'गौरा०' (२।४।१९) ङी, 'मत्स्यस्य यः' (२।४।८७) इति यलोपः। [6]'राष्ट्रक्षत्रिया०' (६।१।११४) इत्यादिसूत्रैरस्मिन्नेव प्रथमपादे अञणादिप्रत्ययपञ्चकं द्रिसंज्ञकमुक्तम्, प्रक-

रणान्तरे 'प्रकृते मयट्' (७।३।१) इति सप्तमपादे 'पूगादमुख्यकाञ्ञ्यो द्रिः' (७।३।६०) इत्यादिसूत्रैःञ्यः, ञ्यट्, टेण्यण्, अञ्, अण्, अञ्, ईय एते प्रत्यया द्रिसंज्ञका वक्ष्यन्ते, ततो 'द्रेरञणो०' इत्यत्र पुनर्द्रिग्रहणात् प्रथमपादे सप्तमपादोक्तद्रिसंज्ञकप्रत्यया अपि लुप्यन्ते; एवं 'बहुष्वस्त्रियाम्' (६।१।१२४) इत्यनेनापि अत्रपादोक्तसप्तमपादोक्तद्रिसंज्ञप्रत्यया लुप्यन्ते, तेन पर्शु, राक्षस, असुर, [९]पर्शोरपत्यं बहवो माणवका इति वाक्ये 'पुरुमगध०' (६।१।११६) इति अण्, 'शकादिभ्यो द्रेर्लुप्' (६।१।१२०) इति अण् लुप्यते, इति पुंल्लिङ्गे ; स्त्रियां तु पर्शवः) ते माणवकाः शस्त्रजीविसंघः स्त्रीत्वविशिष्टोऽर्थो विवक्षितः, पर्शोरपत्यं स्त्रीसंघ इति वाक्ये 'पर्श्वादेरण्' (७।३।६६) इति अण्, 'द्रेरञणोऽप्राच्य०' इत्यनेन अण् लुप्यते, ततः 'उतोऽप्राणिन०' (२।४।७३) ऊङ्, [८]एवं रक्षाः, [९]असुरी (इति) एतयोरपि वाक्यानि पूर्ववत् कर्त्तव्यानि, प्रत्ययश्च लोपश्च। पर्शूः, रक्षाः, असुरी (इति) एषां सिद्धिः 'पर्श्वादेरण्' (७।३।६६) अस्मिन् सूत्रेऽस्ति, ततो ज्ञातव्या । [१०]उदुम्बरम्, उदुम्बराणां राज्ञी अपत्यं स्त्री 'सालवांशत्वाद्' इञ्, इञ, इतः' (२।४।७१) इति ङी। अत्र ………… 'नुर्जाते' (२।४।७२) ङी (?) । [११]पाञ्चाली, [१२]वैदेही [१३]वैप्पली-एषु त्रिषु 'राष्ट्रक्षत्रिया०' (६।१।११४) इति अञ्। [१४]मागधीत्यादिषु सर्वत्र 'पुरुमगध०' (६।१।११६) इति अण्, 'अणञेये०' (२।४।२०), 'अस्य ङ्यां लुक्' (२।४।८६)। [१५]भर्गाणां राज्ञी अपत्यं स्त्री वा 'पुरुमगध०' इति अण् ॥१२३॥

## बहुष्वस्त्रियाम् ॥६।१।१२४॥

म० वृ०–ञ्यन्तशब्दस्य बहुषु वर्त्तमानस्य यो द्रिः प्रत्ययस्तस्य 'लुप्' स्यात्, अस्त्रियाम्। पञ्चालानां राजानः पञ्चालस्यापत्यानि वा=पञ्चालाः, एवं पुरवः, अङ्गाः, [१]लोहध्वजाः। द्रेरिति पूर्ववदेव भिन्नप्रकरणस्यापि परिग्रहः। बहुष्विति किम् ? पाञ्चालः, लौहध्वज्यः, प्रियो वाङ्गो येषां ते प्रियवाङ्गा इत्यत्र द्र्यन्तं न बहुषु वर्त्तते किन्तु समासे, (अतः) 'बहुषु' इति न लुप्। अस्त्रियामिति किम् ? [२]पाञ्चाल्यः स्त्रियः। तथा [३]पञ्चभिः पाञ्चालीभिः क्रीतः पञ्चपाञ्चालः, अत्र इकणो लुपः पित्त्वात् पुंवद्भावेन स्त्रीत्वनिवृत्तेर्लुप् स्यादेव ॥१२४॥

प्रव० [१]'लोहध्वजा एव लोहध्वजाः, 'पूगादमुख्यकाञ्ञ्यो द्रिः' (७।३।६०) इति सप्तमपादसूत्रे ञ्यः प्रत्ययः, स च द्रिसंज्ञः, 'बहुष्वस्त्रियाम्' ञ्यो लुप्यते । [२]पञ्चालस्यापत्यानि स्त्रियः 'राष्ट्रक्षत्रिया०' (६।१।११४) इति अञ्, 'अणञेये०' (२।४।२०) (इति ङी), एकत्व द्वित्व बहुत्वे वा उत्पन्नः प्रत्यय इति समान्येन उक्तम् (?)। पञ्चभिः[३] पाञ्चालीभिरित्यत्र पूर्वं 'पुरुमगध०' (६।१।११६) इत्यण्, ततो पञ्चभिः पञ्चालीभिः क्रीतः इत्येवं वाक्ये कृते 'मूल्यैः क्रीते' (६।४।१५०) इति इकण्, 'अनाम्न्यद्विः०' (इत्यनेन इकण् लुप्यते, इकणो लोपस्य पित्त्वात् 'क्यङ्मानिपित्तद्धिते (३।२।५०) इत्यनेन पुंवद्भावः, तदनन्तरं पुंस्त्वात् 'बहुष्वस्त्रियाम्' इत्यनेनाण् लुप्यते, ततः 'अत्र इकणो' इत्याद्यक्षरार्थो युक्त्या मेलनीयः ॥१२४॥

## यस्कादेर्गोत्रे ॥६।१।१२५॥

म० वृ०–[१]यस्कादिभ्यो यः प्रत्ययो विहितः, तदन्तस्य बहुत्वविशिष्टे गोत्रेऽर्थे वर्त्तमानस्य यस्कादेर्यः स प्रत्ययः तस्य 'लुप्' स्यादस्त्रियाम्। यास्कः, यास्कौ, यस्काः ॥१२५॥

प्रव० यस्कादेरिति किम् ? उपगोरपत्यानि औपगवाः। यस्कस्यापत्यं वृद्धं यास्कः, 'शिवादेरण्' (६।१।६०), यास्कस्यापत्यानि युवानः-'द्विस्वरा'०(६।१।१०९) इत्यनेन आयनिञ्, यास्कायनयः इति व्यावृत्तिर्ज्ञातव्या। अण् वा, आयनण् वा, आयनञ् वा, एयण् (वा) यः कोऽपि बहुत्वे उत्पन्नः स प्रत्ययो लुप्यते इति सूत्रार्थः। [१]यस्क, लह्य, द्रुह्य, अयःस्थूण, तृणकर्ण, भलन्दन, तलन्द, खरप, भडिल, भण्डिल, भडित, भण्डित, सद्यामत्त, कम्बलहार, पर्णाढक, कर्णाढक, पिण्डीजङ्घ, बकसक्थ, रक्षो-

मुख, जङ्घारथ, उत्काश, कटुमन्थ, विषपुट, निकष, कषक, उपरिमेखल, कडम, कुश, पटाक, क्रोष्टुपाद, क्रोष्टुमाय, शीवमाय, स्थगल, पदक, वर्मक, पुष्करसद्, विश्रि, कुद्रि, अजबस्ति, मित्रयु इति यस्कादिगणः । यस्कादिभलन्द यावत् एषु शिवादिगणपाठात् अण् , तस्य अणो लोपोऽनेन । खरपो नडादिगणे इति अत्र स आयनण् लुप्यते । भडिलादिचतुर्भ्यः (अश्वादौ) पाठात् आयनञ् । सदामत्तादिवर्मकान्तेभ्यः 'अत इञ्' (६।१।३१), 'यस्कादेर्गोत्रे' इत्यनेन स इञ् लुप्यते । पुष्करसद् (इति) अत्र 'बाह्वादि०' इञ् , स इञ् लुप्यते । विश्रि, कुद्रि, अजबस्ति, मित्रयु-एते चत्वारो गृष्टयादिगणे, एभ्य एयञ् , 'यस्कादेः' इत्यनेन स एयञ् लुप्यते ॥१२५॥

## यञञोऽश्यापर्णान्तगोपवनादेः ॥६।१।१२६॥

म०वृ०—यञन्तस्य अञन्तस्य च बहुत्वविशिष्टे गोत्रेऽर्थे वर्त्तमानस्य यः स प्रत्ययस्तस्य लुप् , अस्त्रियाम् , गोपवनादिभ्यः श्यापर्णान्तेभ्यो विहितं वर्जयित्वा । गोपवनादिगणो विदादिगणे ज्ञेयः । गार्ग्यः, गार्ग्यौ, गर्गाः[१] । वैदः, वैदौ, [२]विदाः । गर्गमयम् , गर्गरूप्यम् [गर्ग इति प्रकृतिः, गर्गेभ्य आगतः 'नृहेतुभ्यो०' (६।३।१५६)] । अश्यापर्णान्तगोपवनादेरिति किम् ? गोपवनाः, श्यापर्णाः । [३]अस्त्रियामित्येव—गार्ग्यः [गर्गस्यापत्यानि स्त्रियः गार्ग्यः स्त्रियः] । गोत्रे इत्येव-औत्साश्छात्राः [उत्सस्येमे-'उत्सादेरञ्' ६।१।१९)] एवं पौत्राः [ पुत्रस्यानन्तराण्यपत्यानि ], दौहित्राः, एवं नानान्द्राः [ननान्दुरनन्तराण्यप० 'पुनर्भूपुत्र०' (६।१।३९) इति अञ् ] ॥ १२६ ॥

अव०—'यञञोऽश्याप०' इति सूत्रे विशेषोऽयं लिख्यते,—कश्यप, कश्यपस्यापत्यानि काश्यपाः, विदाद्यञ् । काश्यपप्रतिकृतयः काश्यपा इत्यत्र यद्यपि अञ् प्रत्ययो गोत्रे उत्पन्नः तथापि अञन्तं न इदानीं गोत्रबहुत्वे किं तर्हि प्रतिकृतिषु विषये इति अञ् न लुप्यते । [१] गर्गस्यापत्यानि गर्गाः, 'गर्गादेर्यञ्' (६।१।४२), अत्र बहुत्वे 'यञञोऽश्याप०' इत्यनेन यञ् लुप्यते । [२]एवं विदाः इत्यत्रापि 'विदादे०' (६।१।४१) अञ् , 'यञञो०' अञ् लुप्यते । [३]अस्त्रियामित्येव-गार्ग्यः स्त्रियः इत्येव ज्ञेयम् । पञ्चभिः गार्गीभिः क्रीतः=पञ्चगार्गः पटः, अत्र 'मूल्यैः क्रीते' (६।४।१५०) इकण् ,'अनाम्न्य०'(६।४।१४१) इकणो लोपः, स च यित् , 'क्यङ्मानि०' (३।२।५०) इति पुंवत् , स्त्रीत्वं निवृत्तम् इति हेतोः पञ्चगार्ग इत्यत्र यञो लोपो भवत्येव । अयं विशेषः यञञो० इति सूत्रे ॥ १२६ ॥

## कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च ॥६।१।१२७॥

म० वृ०—कौण्डिन्यागस्त्ययोर्बहुत्वगोत्रेऽर्थे 'यञोऽणश्च लुप्' स्यादस्त्रियाम् , कुण्डिन्यगस्त्यशब्दयोः 'कुण्डिन् अगस्ति' इत्यादेशौ भवतः । आगस्त्यशब्दस्य ऋष्यणन्तत्वाद् यञञौ न सम्भवतः । [अगस्त्यो नाम ऋषिः, ऋषित्वात् 'ऋषिवृष्ण्यन्धक०' (६।१।६१) इत्यनेनाण् एव भवति, न यञ् ] कुण्डिन्या अपत्यं गर्गादित्वात् यञ् , अत एव निर्देशान्न [१]पुंवद्भावः, कौण्डिन्यः, कौण्डिन्यौ, कुण्डिनाः । अगस्तस्यापत्यम् आगस्त्यः, आगस्त्यौ, अगस्तयः । प्रत्ययलुपं कृत्वा आदेशकरणमगस्तीनामिमे [२]आगस्तीया इत्येवमर्थम्[३] । अस्त्रियामित्येव-[४]कौण्डिन्यः, [५]आगस्त्यः स्त्रियः ॥१२७॥

अव० [१]सति हि पुंवद्भावे 'नोऽपदस्य तद्धिते' (७।४।६१) इत्यन्तस्वरादिलोपे कौण्डय इति प्रयोगः स्यात् । [२]आगस्तीया' इत्यत्र 'दोरीयः' (६।३।३२) ईयः, 'सूर्यागस्त्ययोरीये च' (२।४।८९) इत्यनेन यकारो लुप्यते । [४]कुण्डिनी, कुण्डिन्या अपत्यम् , 'गर्गादेर्यञ्' (६।१।४२), 'यञो डायन्०' (२।४।६७) ङी, 'व्यञ्जनात्तद्धितस्य' (२।४।८८) इति यलोपः ; [५]अगस्तस्यापत्यम्—ऋष्यण् , 'अणञेये०' (२।४।२०) इति ङी, 'सूर्यागस्त्ययोरीये च' (२।४।८९) इति यलोपः, तदनन्तरं जस् । [३]प्रत्ययान्तादेशे, कोऽर्थः ?

सप्रत्ययस्यादेशे हि कृते अगस्तिशब्दस्य आदेराकारस्य वृद्धिरूपस्याभावात् 'वृद्धिर्यस्य स्वरे०' (६।१।८) इत्यनेन दुसंज्ञा न स्यात्, दुसंज्ञाभावेन 'दौरीयः' इति ईयः प्रत्ययोऽपि न स्यात्, यदा तु अगस्त्यशब्दात् अण्प्रत्ययस्य पूर्वं लोपः क्रियते, तदा भाविनि ईयप्रत्ययनिमित्ते 'न प्राग्जितीये स्वरे' (६।१।१३५)इति सूत्रेण प्रत्ययलोपप्रतिषेधात् प्रत्ययलुप् न भवति, तथा च सति दुसंज्ञत्वात् ईयः सिद्धो भवति इति एषा अवचूरिः अग्यारमी ओलिका ( ? आगस्तीया ) इत्येवमर्थम् इत्यक्षराग्रे ज्ञातव्या ॥१२७॥

## भृग्वङ्गिरस्-कुत्स-वसिष्ठ-गोतमा-ऽत्रेः ॥६।१।१२८

म०वृ०-एभ्यो यः प्रत्ययस्तदन्तस्य बहुत्वे गोत्रेऽर्थे वर्त्तमानस्य यः स प्रत्ययस्तस्यास्त्रियां 'लुप्' स्यात्। [१]भार्गवः,[२]भार्गवौ, [३]भृगवः, [४]एवमङ्गिरसः, [५]कुत्साः, [६]वसिष्ठाः, [७]गोतमाः, [८]अत्रयः। अस्त्रियामित्येव- [९]भार्गव्यः, [१०]आत्रेय्यः स्त्रियः ॥१२८॥

अव० [१]भृगोरपत्यम्, [२]अपत्ये, [३]अपत्यानि, [४]एवमङ्गिरसः, [५]कुत्सस्य, [६]वसिष्ठस्य, [७]गोतमस्य, [८]अत्रेरपत्यम् ,अपत्ये, अपत्यानि, भृग्वादिभ्यो गोतमं यावत् 'ऋषि०'(६।१।६१) इत्यण् , अत्रेः परतः 'इतोऽनिञः' (६।१।७२) एयण्, बहुत्वे सर्वत्र 'भृग्वङ्गिरस०' इत्यनेन अण् एयण् लुप्यते, भृगवः, अङ्गिरसः, कुत्साः, वसिष्ठाः, गोतमाः, अत्रय इति उदाहरणानि। [९]भृगोरपत्यानि स्त्रियः 'ऋषिवृष्ण्य०' (६।१।६१)अण्, [१०]अत्रेरपत्यानि स्त्रियः 'इतोऽनिञः' एयण्; 'अणञेये०' (२।४।२०), जस् ॥१२८॥

## [१]प्राग्भरते बहुस्वरादिञः ॥६।१।१२९॥

म० वृ०-बहुस्वरान्नाम्नो य इञ् तदन्तस्य बहुत्वे प्राग्गोत्रे भरतगोत्रे च वर्त्तमानस्य यः स प्रत्ययस्तस्यास्त्रियां 'लुप्' स्यात्। [२]क्षीरकलम्भाः, [३]पन्नागाराः, भरत,-[४]युधिष्ठिराः, [५]अर्जुनाः। प्राग्भरत इति किम्? [६]बालाकयः ॥१२९॥

अव०-[१]प्राग्भरते इति सूत्रे भरताः प्राच्या एव, तेषां सूत्रे यत् पृथगुपादानं तदन्यत्र 'प्राच्येभ्योऽतौल्व०' (६।१।१४३) इति वक्ष्यमाणसूत्रे प्राग्ग्रहणेन अग्रहणार्थम्, तेन "यौधिष्ठिरिः पिता युधिष्ठिरायणः पुत्रः" इत्यत्र'प्राच्येभ्योऽतौल्व०' इत्यनेन आयनण् न लुप्यते, 'प्राच्येभ्यो०' इति सूत्रे प्राच्यशब्देन ब्राह्मणगोत्रं गृह्यते, न भरतगोत्रमिति प्रतिषेधः इति विशेषः। [२]क्षीरमिश्रं कं=जलं लम्भयति=क्षीरकलम्भः, 'कर्मणोऽण्' (५।१।७२), क्षीरकलम्भस्यापत्यम्, अपत्ये, अपत्यानि; 'अत इञ्' (६।१।३१), एकत्वे क्षैरकलम्भिः, द्वित्वे क्षैरकलम्भी, अत्र इञ् न लुप्यते, बहुत्वे तु क्षीरकलम्भाः, अत्र बहुत्वे 'प्राग्भरते०' इत्यनेन इञ् लुप्यते; एवं [३]पान्नागारिः पान्नागारी पन्नागाराः। [४]युधिष्ठिरस्यापत्यम्, अपत्ये, अपत्यानि- यौधिष्ठिरिः, यौधिष्ठिरी, युधिष्ठिराः; [५]एवमार्जुनिः, आर्जुनी, (अर्जुनाः) 'बाह्वादि०' (६।१।३२) इञ्। [६]बलाकाशब्दः, बलाकाया अपत्यम्, ………………(अपत्ये, अपत्यानि– बालाकिः, बालाकी, बालाकयः; बाह्वादित्वात् इञ् ॥१२९॥

## वोपकादेः ॥६।१।१३०॥

म० वृ०-[१]उपकादिभ्यो यः स प्रत्ययस्तदन्तस्य बहुत्वे गोत्रे वर्त्तमानस्य यः स प्रत्ययस्तस्यास्त्रियां 'लुब् वा' स्यात्। उपकाः, [२]औपकायनाः ॥१३०॥

अव०-[१]उपक, लमक, भ्रष्टक, कपिष्ठल, कृष्णाजिन, कृष्णसुन्दर, पिङ्गलक, कृष्णपिङ्गल, कलशी, कण्ठ, दामकण्ठ, जतुक, कनक, मदाघ, अपजग्ध, अडारक, वटारक, प्रतिलोम, (अनुलोम,) प्रतान, अनुपद, अभिहित, अनभिहित, खारीजङ्घ, कशकृत्स्न, शलाथल, कमन्दक, कमन्तक, कवन्तक, पिञ्जलक, अडडुक, अवव्यक, पतञ्जल, पदञ्जल, पर्णक, वर्णक, कठेरित, कुषीतक, लेखाभ्रू, पिष्ट, सुपिष्ट, मसुरकर्ण, पर्णक, जटिलक, बधिरक, कठेलिति, पतञ्जलि, खरीखन इति उपकादिगणः। [२]'उपकाः उपकायनाः', अत्र नडाद्यायनण्, तस्य लुप् ॥ १३० ॥

## तिककितवादौ द्वन्द्वे ॥६।१।१३१॥

म०वृ०–[1]तिककितवादिषु द्वन्द्ववृत्तिषु बहुषु वर्त्तमानेषु तैकायनिकैतवायनीत्यादीनां यः स प्रत्ययस्तस्याऽस्त्रियां 'लुप्' स्यात्। [2]तैकायनयश्च कैतवायनयश्च=तिककितवाः ॥१३१॥

अव०–[1]तिक–कितव, उब्ज ककुभ, उरश–लङ्कट, अग्निवेश–दशेरक, शण्डिल–कशकृत्स्न, उपक–लमक, भ्रष्टक–कपिष्ठल, कृष्णाजिन–कृष्णसुन्दर, वङ्कर–भण्डीरथ, पहक–नरक, बकनख–स्वगुदपरिणद्ध, लङ्क–शान्तमुख इति शब्दद्वयद्वययोगे तिककितवादिगणः। [2]तिकस्यापत्यं=तैकायनिः, कितवस्यापत्यं= कैतवायनिः, तैकायनयश्च कैतवायनयश्च, 'तिकादेरायनिञ्' (६।१।१०७), तस्य लोपः ॥१३१॥

## द्व्यादेस्तथा ॥६।१।१३२॥

मवृ०–[1]द्व्यादिप्रत्ययान्तानां द्वन्द्वेऽबह्वर्थे वर्त्तमाने यः स द्व्यादिः प्रत्ययस्तस्य 'लुप्' स्यात्। तथा =[2]यथापूर्वम्। [3]वार्केण्यश्च [4]लौहध्वज्यश्च [5]कौण्डीवृश्यश्च=वृकलोहध्वजकुण्डीवृशाः[6]। एवमाङ्गश्च[7] [8]वाङ्गश्च=[9]सौह्मश्च [10]अङ्गवङ्गसुह्माः[11]। अबह्वर्थं वचनम् ॥१३२॥

अव०–[1]'बहुष्वस्त्रियाम्' (६।१।१२४) इत्यादिसूत्रादारभ्य ये केचित् लोपनीयाः प्रत्ययाः ते द्व्यादयो विज्ञेयाः, 'द्रेरञणोऽप्राच्य'० (६।१।१२३) इत्यनेन तु एकत्वद्वित्वबहुत्वसामान्ये लुप् उक्ता, 'द्व्यादेस्तथा' अनेनापि तथैव इति तत्र 'द्रेरञणो०' (६।१।१२३) इति सूत्रे अस्य 'द्व्यादेः' सूत्रस्य न कोऽपि उपयोगः इति★'बहुष्वस्त्रियाम्' (६।१।१२४) इत्यारभ्योक्तम् (इति) विशेषः। [2]यथापूर्वम्, कोऽर्थः? पूर्वप्रत्ययान्तबहुत्वे यस्य लुप् भवति द्वन्द्वे अबहुत्वेऽपि तस्यैव भवति, यस्य न भवति तस्य न भवत्येव, यस्यादेशेन सह तस्यादेशेनैव सह, यस्य विकल्पः उक्तः तस्यात्रापि विकल्प एवेत्यर्थः। [3]वृकाट्टेण्यण् (७।३।६४), [4]'पूगादमुख्य'० ७।३।६०) इति ञ्यः, [5]वाहीकेष्वब्राह्मण'० (७।३।६३) इति ञ्यट्, [6]त्रयस्यापि अत्र लोपः। [7]'पुरुमगध०' (६।१।११६) इत्यण्, तस्य लोपः। [8](एवम्) गर्गवत्सवाजाः॥१३२॥

## वाऽन्येन ॥६।१।१३३॥

म०वृ०–द्व्यादेरन्येन [1]सह द्व्यादीनां द्वन्द्वेऽबहुत्वेऽर्थे यः स द्व्यादिः प्रत्ययः तस्य लुप् वा [भवति], तथा=यथापूर्वम्। अङ्गवङ्गदाक्षयः, आङ्गवाङ्गदाक्षयः। गर्गवत्सौपगवाः, गार्ग्यवात्स्यौपगवाः ॥ १३३ ॥

अव०–[1]अन्येन सह, कोऽर्थः? द्विसंज्ञवर्जितप्रत्ययान्तरेण उत्तरेण सह। पूर्वेण नित्यं लोपे प्राप्ते विकल्पार्थं 'वाऽन्येन' इति सूत्रम् ॥१३३॥

## [1]द्व्येकेषु षष्ठ्यास्तत्पुरुषे यञादेर्वा ॥६।१।१३४॥

म०वृ०–षष्ठीतत्पुरुषे यत्पदं तस्याः षष्ठ्या विषये द्वयोरेकस्मिंश्च वर्त्तते तस्य यः स यञादिप्रत्ययस्तस्य 'लुप् वा' तथा=यथापूर्वम्। गार्ग्यस्य गार्ग्ययोर्वा कुलं=गर्गकुलम्, गार्ग्यकुलम्; विदकुलम्, वैदकुलम्; [2]अगस्तिकुलम्, आगस्त्यकुलम्; [3]भृगुकुलम्, भार्गवकुलम्। द्व्येकेष्विति किम्? गर्गाणां कुलं गर्गकुलम्। षष्ठ्या इत्येव– गार्ग्यहितम्[4]। तत्पुरुषे इति किम्? [5]उपगार्ग्यम् ॥१३४॥

अव०–[1]द्वौ च एकश्च=द्व्येके, तेषु। [2]अगस्त्यस्यापत्यमपत्ये वा, 'ऋषि०' (६।१।६१) अण्, आगस्त्यस्य कुलमागस्त्ययोर्वा कुलमिति समासे सति 'कौण्डिन्यागस्त्ययोः०' (६।१।१२७) इति अगस्त्यादेशः। [3]भृगोरपत्यमपत्ये वा, ऋष्यण्, भार्गवस्य भार्गवयोर्वा कुलम्। [4]गार्ग्याय……(यगार्ग्याभ्यां) वा हितम्। [5]गार्ग्यस्य समीपमुपगार्ग्यम् ॥ १३४ ॥

★ उदाहरणेष्विति गम्यते।

## न प्राग्जितीये स्वरे ॥६।१।१३५॥

**म० वृ०**–गोत्रे इति वर्त्तते। गोत्रे उत्पन्नस्य प्रत्ययस्य या लुबुक्ता 'सा [1]प्राग्जितीयेऽर्थे यः स्वरादिस्तद्धितः क्रियते तस्मिन् विषयभूते न' स्यात्। [2]गार्गीयाः, [3]आगस्तीयाः। प्राग्जितीये इति किम्? [4]अत्रीयः, [5]अगस्तीयः। स्वरे इत्येव– गर्गेभ्य आगतम्] गर्गमयम्, गर्गरूप्यम्। गोत्रे इत्येव–[6]कौवलम् ॥१३५॥

**अव०**–[1]जितात् प्राक्=प्राग्जितम्, 'पर्यपाङ्०' (६।१।३२) इति समासः, प्राग्जिते भवः=प्राग्जितीयः, 'दोरीयः' (६।३।३२)। [2]गर्ग, गर्गस्यापत्यानि गर्गाः, गर्गाणामिमे छात्राः गार्गीयाः, 'दोरीयः' (६।३।३२), 'बहुष्वस्त्रियाम्' (६।१।१२४) इति लोपप्राप्तिः। (एवम्) अत्रेरपत्यानि अत्रयः,'इतोऽनिञः' (६।१।७२) एयण्, अत्रीणामिमे छात्राः, 'भृग्वङ्गि०' (६।१।१२८) इति लोपप्राप्तिः। [3]अगस्तेरपत्यानि अगस्तयः, अगस्तीनामिमे छात्राः, 'दोरीयः' (६।३।३१), 'सूर्यागस्त्ययोरीये च' (२।४।८९) इति यकारो लुप्यते, 'कौण्डिन्या०' (६।१।१२७) इति लोपप्राप्तिः। [4]'अत्रीयः', अत्रेरपत्यानि अत्रयः,'ऋषि०'(६।१।६१) अण्, 'भृग्व०' (६।१।२२८) इति अण्लोपः, पुनः अत्रिशब्द उत्पन्नः,[5]'अगस्तीयः', अगस्तस्यापत्यानि, ऋष्यण्, 'कौण्डिन्या०'(६।१।१२७) इति अण्लोपः, अगस्त्यादेशः, अत्रिभ्यो हितः, अगस्तिभ्यो हितः, 'तस्मै हिते' (७।१।३५) ईयः। गर्ग्याश्च भार्गवाश्चेति द्वन्द्वः पश्चाद्गर्गाणां०' (?)। [6]कुवली, कुवल्या फलं =कुवलम्, 'हेमादिभ्योऽञ्' (६।२।४५), 'फले' (६।१।५८) लुप्, 'ङ्यादेर्गौण०' (२।४।९५) इति ङीनिवृत्तिः, कुवलम्, तस्येदम्=कौवलम्, 'तस्येदम्' (६।३।१६०) अण् ॥१३५॥

## गर्गभार्गविका ॥६।१।१३६॥

**म० वृ०**–गर्गभार्गविकेति द्वन्द्वात् प्राग्जितीये विवाहे योऽकल् तस्मिन् विषये 'अणो लुप्प्रतिषेधो' निपात्यते। गर्गभार्गविका ॥१३६॥

**अव०**–'गर्गभार्गविका', अत्र गर्गस्यापत्यानि 'गर्गादेर्यञ्' (६।१।४२), 'यञञो ऽश्यापर्णा०'(६।१।१२६) इति यञ् लुप्यते, पुनर्गर्गशब्दः। भृगोरपत्यानि वृद्धानि, ऋष्यण्, भार्गव इति शब्दः सञ्जातः, भार्गवस्यापत्यानि युवानः 'अत इञ्' (६।१।३१), 'त्रिदार्षाद्णिञोः' (६।१।१४०) इत्यनेन इञ् लुप्यते, यथा इञ् लुप्तः तथा 'त्रिदार्षा०' इत्यनेन अण्लोपोऽपि प्राप्नोति, परं'गर्गभार्गविका' इत्यनेन अण्लोपः प्रतिषिध्यते, अकल्प्रत्ययस्य विधास्यमानत्वात्, तथाहि- गर्गाणां वृद्धानां भृगूणां वृद्धानां यूनां च विवाह इति वाक्ये 'विवाहे द्वन्द्वादकल्' (६।१।१६३।इति) अकल्। भृगोरपत्यं ऋष्य……… भार्गवयो लुब् न भवति (?) ॥१३६॥

## यूनि लुप् ॥६।१।१३७॥

**म० वृ०**–यून्यपत्ये विहितप्रत्ययस्य प्राग्जितीये स्वरादौ विषये भूतेऽनुत्पन्न एव 'लुप्' स्यात्। लुपि सत्यां यो यतः प्राप्नोति स तत उत्पद्यते। पाण्टाहृताः[1] ॥१३७॥

**अव०**–[1]पाण्टाहृतः, पाण्टाहृतस्यापत्यं वृद्धम्, 'अत इञ्' (६।१।३१), पाण्टाहृतेरपत्यं युवा पाण्टाहृतः,'पाण्टाहृतिमिमता०' (६।१।१०४)इत्यनेन यून्यपत्येऽर्थे णप्रत्ययः, पाण्टाहृतस्य छात्रा इति वाक्यानन्तरं 'वृद्धेञः' (६।३।२८) इति सूत्रोक्तप्राग्जितीये स्वरादौ अञ् प्रत्यये चिकीर्षिते एव 'यूनि लुप्' इत्यनेन पूर्वं यून्यपत्यार्थं कृतस्य णप्रत्ययस्य लोपः क्रियते, णप्रत्यये लुप्ते सति पाण्टाहृति इति इञन्तं प्रकृतिरूपं सम्पन्नम्, पश्चात् लुपि सत्यां यो यतः प्राप्नोतीत्यक्षरयुक्त्या 'वृद्धेञः' (६।३।२८) इति अञ् कार्यः, ततो जस् ॥१३७॥

## वाऽऽयनणायनिञोः ॥६।१।१३८॥

**म०वृ०**–आयनण आयनिञश्च यून्यपत्ये कृतस्य प्राग्जितीये स्वरादौ च [तद्धिते] विषयभूते 'वा लुप्' स्यात्। गार्गीया [1]गार्ग्यायणीया वा। आयनिञः– हौत्रीयाः [2]हौत्रायणीया वा ॥१३८॥

अव०-[1]गर्गस्यापत्यम्, 'गार्गादेर्यञ्'(६।१।४२), गार्ग्यस्यापत्यं युवा=गार्ग्यायणः, 'यञिञः' (६।१।५४) इति यून्यपत्येऽर्थे आयनण्; गार्ग्यायणस्य छात्रा इति वाक्ये पूर्वं 'वायनणा०' (६।१।१३८) इति विकल्पेन आयनण् लुप्यते, ततो 'दोरीयः' (६।३।३२), यत्र आयनण् लुप्तः तत्र गार्गीया इति प्रयोगः, पक्षे गार्ग्यायणीयाः। [2]होतुरपत्यं वृद्धम्, 'ऋसोऽपत्ये' (६।१।२८) अण्, हौत्र इति शब्दः, हौत्रस्यापत्यं युवा, 'द्विस्वरादणः' (६।१।१०९) इति आयनिञ्, हौत्रायणस्य छात्राः, अत्रापि पूर्वमायनिञो लोपः, पश्चात् 'दोरीयः' (६।३।३२)। एवमात्रेयीयाः ॥१३८॥

## द्रीञो वा ॥६।१।१३९॥

म० वृ०-[द्रिश्चासाविञ् च]। प्रागूजितीये स्वरे इति निवृत्तम्। द्रिसंज्ञो य इञ् तदन्तात्परस्य युवप्रत्ययस्य 'लुब् वा' स्यात्। [1]औदुम्बरिः औदुम्बरायणो वा। द्रिग्रहणं किम्? [दाक्षेररपत्यं] दाक्षायणः ॥१३९॥

अव०[1]-उदुम्बर, उदुम्बरस्यापत्यम्, 'साल्वांश०' (६।१।१११) इत्यनेन इञ्, औदुम्बरेरपत्यं युवा, 'यञिञः'(६।१।५४) इति आयनण्, ततो 'द्रीञो वा' इति सूत्रेण विकल्पेन आयनण् लुप्यते, यत्र लोपः तत्र औदुम्बरिः ॥१३९॥

## ञिदार्षादणिञोः ॥६।१।१४०॥

म० वृ०-ञित् आर्षश्च योऽपत्यप्रत्ययस्तदन्तात्परस्य युवप्रत्ययस्य 'अण इञश्च लुप्' स्यात्। वचनभेदात् यथासङ्ख्याभावः। ञितः-[1]तैकायनिः पिता, तैकायनिः पुत्रः; बैदः पिता, [2]बैदः पुत्रः, [3]कौरव्यः पिता, कौरव्यः पुत्रः। आर्षात्,-[4]वासिष्ठः पिता पुत्रश्च[5] ॥१४०॥

अव०-[1]तिक, तिकस्यापत्यं=तैकायनिः, 'तिकादेरायनिञ्' (६।१।१०७), तैकायनेरपत्यं युवा, 'ऋसोऽपत्ये' (६।१।२८) अण्, ततो 'ञिदार्षा०' इत्यनेन अण् लुप्यते। एवं [2]बिदस्यापत्यम्, बिदादञ्, बैदस्यापत्यं युवा, 'अत इञ्' (६।१।३१), तस्य लोपः। [3]कुरोरपत्यम्, 'कुर्वादेर्ञ्यः' (६।१।१००), कौरव्यस्यापत्यम्(युवा), 'अत इञ्', (प्रकृत-)सूत्रेण इञ् लुप्यते। [4]वसिष्ठस्यापत्यम्, 'ऋषि०' (६।१।६१) अण्, वासिष्ठस्यापत्यं युवा, 'अत इञ्', (प्रकृत-)सूत्रेण (इञ्) लुप्यते। [5]एवं वैश्वामित्रः पिता, वैश्वामित्रः पुत्रः ॥१४०॥

## अब्राह्मणात् ॥६।१।१४१॥

म० वृ०-अब्राह्मणवाचिनो वृद्धप्रत्ययान्ताद् यूनि विहितप्रत्ययस्य 'लुप्' स्यात्। [1]आङ्गः पिता, आङ्गः पुत्रः। [2]मागधः पिता पुत्रश्च। एवं [3]कालिङ्गादिः। [4]साहदेवः पिता पुत्रो वा। [5]वासुदेवः पिता पुत्रो वा ॥१४१॥

अव०-[1]अङ्गस्यापत्यम्, [2]मगधस्यापत्यम्, [3]कलिङ्गस्यापत्यम्, सर्वत्र 'पुरुमगध०'(६।१।११६) इत्यण्, तस्यापत्यं युवा, 'द्विस्वरादणः' (६।१।१०९) इत्यायनिञ्, 'अब्राह्मणात्' (६।१।१४१) इत्यनेन आयनिञ् लुप्यते। नाकुलः पिता पुत्रश्च, [4]साहदेवः पिता पुत्रश्च, [5]वासुदेव इत्यादिषु 'ऋषिवृष्ण्यन्धक०' (६।१।६१) इति अण्, तत इञ्, तस्य लोपः ॥१४१॥

## पैलादेः ॥६।१।१४२॥

म० वृ०-पैलादिभ्यो यून्यर्थे प्रत्ययस्य 'लुप्' स्यात्। ब्राह्मणार्थमप्राच्यार्थं च वचनम्। पीलाया अपत्यं= पैलः, 'पीलासाल्वा०' (६।१।६८) इत्यण्, पैलस्यापत्यं युवा ['द्विस्वरादणः' (६।१।१०९)] इत्यायनिञ्, तस्य लोपः; पैलः पिता, पैलः पुत्रः ॥१४२॥

अव०-पैल, शालङ्कि, सात्यकि, सात्यंकामि, औदन्यि, औदञ्चि, औदमज्जि, औदव्रजि, औदभृज्जि, औदमेघि, औदशुद्धि, दैवस्थानि, पैङ्गलौदयनि, राणि, राहक्षिति, भौलिङ्गि, औद्राहमानि, औजहानि, औज्जिहानि इति पैलादिगणः ॥१४२॥

## प्राच्येञोऽतौल्वल्यादेः ॥६।१।१४३॥

**म० वृ०**–[प्राच्यात् इञ्, तस्मात्]। प्राच्यगोत्रे य इञ् तदन्तात्तौल्वल्यादिवर्जिताद् यून्यर्थे प्रत्ययस्य 'लुप्' स्यात्। ब्राह्मणार्थं वचनम्। [1]पान्नागारिः पिता, पान्नागारिः पुत्रः। क्षैरकलम्भिः पिता पुत्रश्च। प्राच्यग्रहणं किम्? दाक्षिः पिता, दाक्षायणः पुत्रः। तौल्वल्यादिवर्जनं किम्? [2]तौल्वलिः पिता, तौल्वलायनः पुत्रः; ([3]तैल्वलिः पिता, तैल्वलायनः पुत्रः;) दालीपिः पिता, दालीपायनः पुत्रः; अत एव निपातनाद्दिलीपस्येञि वृद्धिराकारः। ग्रन्थाग्रम्– २७८ ॥१४३॥

**अव०**–तौल्वलि, तैल्वलि, तैल्वकि, धारणि, रामणि, दालीपि, दैवाति, दैवमति, दैवयज्ञि, प्राटाहृति, प्रादाहति, चाफट्टकि, आसुरि, पौष्करसादि, आनुराहति, आनुति, नैमिश्रि, नैमिश्लि, नैमिशि, आशि, बान्धकि, यासि, बाद्धकि, वैङ्कि, पौष्पि, आर्हिंसि, वैरकि, वैलकि, वैशीति, वैहति, वैकर्णि, वार्कोलि, कारेणुपालि इति तौल्वल्यादिगणः। सर्वत्र 'अत इञ्' (६।१।३१), ततो, 'यञिञः' (६।१।५४) इत्यायनण्, तस्य लोपः। [1]पन्नं पतितमगारं यस्य= स पन्नागारस्तस्यापत्यम्, 'अत इञ्'। [2]तौल्वल, [3]तैल्वल, तौल्वस्यापत्यम्, एवं तैल्वलस्यापत्यम्, 'अत इञ्' इति इञ्, तदनन्तरं तौल्वलेरपत्यं युवा= तौल्वलायनिः, (तैल्वलेरपत्यं युवा तैल्वलायनिः, 'यञिञः' (६।१।५४) इत्यायनण्। दिलीपस्यापत्यम्, 'अत इञ्'। केचित् दलीप इति प्रकृत्यन्तरमाहुः ॥१४३॥

तद्धितप्रथमसूत्रे अवचूरिश्लोक ६८१, अक्षर १८॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने षष्ठाध्यायस्य प्रथमः पादः समाप्तः॥



॥ अर्हम् ॥

# ॥ षष्ठोऽध्यायः ॥

## [ द्वितीयः पादः ]

卐

### रागाट्टो रक्ते ॥६।२।१॥

म० वृ०–[1]रज्यतेऽनेनेति रागः=कुसुम्भादिः। रागविशेषवाचिनो नाम्नः ट इति [2]'तृतीयान्ताद्रक्तमित्यर्थे [3]यथाविहितं प्रत्ययः' स्यात्। कुसुम्भेन रक्तं वस्त्रं कौसुम्भम्, एवं काषायम्, कौङ्कुमम्, माञ्जिष्ठम्, हारिद्रम्। [4]वाधिकारात्पक्षे वाक्यं समासश्च भवति,– कुसुम्भेन रक्तम् [वाक्यमिदम्], कुसुम्भरक्तमित्यादि [समासोऽयम्]। रागादिति किम्? चैत्रेण रक्तम्। रागशब्देन प्रसिद्धा एव कुसुम्भादयो रागा गृह्यन्ते, तेनेह न भवति,– कृष्णेन रक्तम्, लोहितेन रक्तम्, पीतेन रक्तम्; [5]एते हि वर्णा द्रव्यवृत्तयः, न तु रागाख्याः[6]। कथं काषायौ गर्दभस्य कर्णौ, हारिद्रौ कुक्कुटस्य पादौ; ? काषायाविव काषायौ, हारिद्राविव हारिद्रावित्युपमानोपमेयभावेन तद्गुणारोपाद् भविष्यति ॥१॥

अव०–[1]शुक्लस्य वर्णान्तरापादनमिह रञ्जेरर्थः, ततो रज्यतेऽनेनेति रागः कुसुम्भादिः, अन्येषामपि उपलक्षणम्। [2]ट इति एकदेशेन समुदायोऽत्र लक्षणात्। [3]यथा पूर्वं प्रागजिते अणादयः प्रोक्ताः त एव अणादयोऽत्र विधीयन्ते इत्यर्थः। [4]'तद्धितोऽणादिः' (६।१।१) इति प्रथमपादे 'वाद्यात्' (६।१।११) इति सूत्रम्, तत्रेदमुक्तम्– "वा इति, आद्यादिति च द्वयमप्यधिकृतं सर्वत्र वेदितव्यम्", इति 'रागाट्टो रक्ते' इति सूत्रे स एव वाधिकारो ज्ञातव्यः। [5]द्रव्येषु कुसुम्भमञ्जिष्ठादिषु वस्तुषु वृत्तिः=प्रवर्त्तनं येषां वर्णानां ते द्रव्यवृत्तयः। 'द्रव्याश्रयी गुण' इति वृद्धाः प्राहुः। [6]अन्यथा रज्यतेऽनेनेति रागशब्दव्युत्पत्तिर्न घटते ॥ १ ॥

### लाक्षा–रोचनादिकण् ॥६।२।२॥

म० वृ०–लाक्षारोचनाशब्दाभ्यां तृतीयान्ताभ्यां रक्तमित्यर्थे 'इकण्' स्यात्। अणोऽपवादः। लाक्षिकम्, रौचनिकम् ॥ २ ॥

अव०–लाक्षया रक्तं=लाक्षिकम्। रोचनया रक्तं=रौचनिकम् ॥ २ ॥

### [1]शकल-कर्दमाद्वा[2] ॥६।२।३॥

म० वृ०–आभ्यां तृतीयान्ताभ्यां रागविशेषवाचिभ्यां 'रक्तार्थे इकण् वा' स्यात्। शकलेन रक्तं=शाकलिकम्, शाकलम्; [शाकलमित्यत्र 'रागाट्टो रक्ते' (६।२।१) अण्] कार्दमिकम्, कार्दमम्[3] ॥ ३ ॥

अव०–[1]शकलं रक्तचन्दनं चित्रवर्णो वा। [2]कर्दमं मृद्विकारः, स च पाण्डुदेशे प्रसिद्धः। [3]पक्षे 'रागाट्टो०' (६।२।१) अण् ॥ ३ ॥

### नील-पीतादकम् [1]॥६।२।४॥

म० वृ०–नीलपीतशब्दाभ्यां तृतीयान्ताभ्यां रागविशेषवाचिभ्यां 'रक्तार्थे यथासङ्ख्यमप्रत्ययकप्रत्ययौ भवतः। नीलेन लिङ्गविशिष्टग्रहणान्नील्या[2] वा रक्तं= नीलम्। पीतेन रक्तं= पीतकम् ॥४॥

अव०–[1]अश्च कश्च=अकम्। [2]नीलशब्दः, 'क्ताच नाम्नि वा' (२।४।२८) इति ङी, नीलीशब्दः, गुणवचनत्वात् स्वार्थे कुत्सितार्थे वा इति कप्रत्ययेनापि सिद्धे 'रागाट्टो रक्ते' (६।२।१) इत्युक्ताऽणोपवादार्थं 'नीलपीता०' इति सूत्रं कृतम् ॥ ४ ॥

## उदितगुरोर्भाद् युक्तेऽब्दे ॥६।२।५॥

म० वृ०–उदितो गुरुर्बृहस्पतिर्यस्मिन् भे नक्षत्रे तद्वाचिनस्तृतीयान्ताद् 'युक्तेऽर्थे [1]यथाविहितं प्रत्यया' भवन्ति, यदि युक्तोऽर्थोऽब्दः= संवत्सरः स्यात् । पुष्येण उदितगुरुणा युक्तं वर्षं= [2]पौषं वर्षम् , [3]फाल्गुनः संवत्सरः । उदितगुरोरित्येव– उदितशनिना पुष्येण युक्तं वर्षम् , अत्र नाण् । भादिति किम् ? उदितगुरुणा [4]पूर्वरात्रेण युक्तं वर्षम् ॥ ५ ॥

अव०–[1]"प्राग्जिता०' (६।१।१३) अण् उक्तः, सोऽत्रापीत्यर्थः । [2]पौषमित्यत्र 'तिष्यपुष्ययोर्भाणि' ( २।४।९० ) इत्यनेन यलोपः । [3]फल्गुनशब्दः, 'गौरादि०' (२।४।१९) ङी, फल्गुनी, फल्गुनीभिरुदितगुरुभिर्युक्तः=फाल्गुनः । [4]पूर्वो रात्रेः, 'पूर्वापराधरो०' (३।१।५२) इति समासः, 'सङ्ख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत्' (७।३।११९) ॥ ५ ॥

## चन्द्रयुक्तात्काले लुप् त्वप्रयुक्ते ॥६।२।६॥

म० वृ०–'चन्द्रेण युक्तं यन्नक्षत्रं तद्वाचिनस्तृतीयान्तात् युक्तेऽर्थे' यथाविहितं प्रत्यया भवन्ति ; 'यदि युक्तोऽर्थः कालः' स्यात् ; 'अप्रयुक्ते तु कालवाचके शब्दे [1]लुप्' स्यात् । पुष्येण चन्द्रयुक्तेन युक्तमहः=पौषमहः ; एवं पौषः कालः, पौषी रात्रिः, पौषोऽहोरात्रः,[2] माघमहः,[3] माघी रात्रिः, माघः कालः । लुप्त्वप्रयुक्ते,– [4]अद्य पुष्यः, अद्य मघाः, दिवा कृत्तिकाः, रात्रौ [5]फल्गुन्यः । चन्द्रयुक्तादिति किम् ? शुक्रयुक्तेन पुष्येण युक्तः कालः । काले इति किम् ? चन्द्रयुक्तेन पुष्येण युक्तो ग्रहः [मङ्गलादिः] ॥ ६ ॥

अव०–[1]अण्प्रत्ययस्य लोपो भवति । [2]अहश्च रात्रिश्च= अहोरात्रः, 'ऋक्सामर्ग्यजुष०' (७।३।९७) इत्यादिना अत् । [3]अहन् , प्रथमासिः, 'अनतो लुप्' (१।४।५९) सिलोपः, 'रो लुप्यरि' (२।१।७५) इति नस्य र् । [4]यद्यपि 'अद्य पुष्य' इत्यत्रापि कालोऽस्ति, तथापि प्रत्यासत्तेः प्रत्ययवाच्यो यो मुहूर्त्तादिः स एव इह कालो ग्राह्यः, यथा पौषमह इत्यादि । अद्यशब्देनानेन च स्पष्टः कालो न ज्ञायते, अद्यशब्दस्याधिकरणक·······························( त्वमेवात्र, न समानाधिकरणकत्वम् ) । अद्यपुष्यः इत्यादिषु वाक्यं पूर्ववदेव, परं वाक्यप्रान्ते ············(दिन)-रात्रिकालशब्दा न प्रयुज्यन्ते । '[5]फाल्गुन्य' इत्यत्र 'फल्गुनीप्रोष्ठपदस्य भे' (२।२।१२३) इत्यनेन बहुवद्भावः, ततो बहुवचनम् ॥६॥

## द्वन्द्वादीयः ॥६।२।७॥

म० वृ०–चन्द्रयुक्तं यन्नक्षत्रं तद्द्वन्द्वात् तृतीयान्तात् युक्ते 'कालेऽर्थे ईयः' स्यात् । [1]राधानुराधाभिश्चन्द्रयुक्ताभिर्युक्तमहः = राधानुराधीयमहः , अद्य राधानुराधीयम्[2] ॥७॥

अव०–[1]राधाश्च अनुराधाश्च=राधानुराधाः , ततो राधानुराधाभिरित्यादि, 'चन्द्रयुक्तात्काले०' (६।२।६। इत्यण् ), राधाविशेषो अनुराधा, अनुराध (? धा) नक्षत्रम् । [2]राधानुराधीयमित्यस्याग्रे एवं तिष्यपुनर्वसवीया रात्रिः, अद्य तिष्यपुनर्वसवीयम् , तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू, 'पुष्यार्थाद् भे पुनर्वसुः' (३।१।१२९ ) इति पुनर्वसुशब्दस्य एकत्वम् , तिष्यपुनर्वसुभ्यां चन्द्रयुक्ताभ्यां युक्ता रात्रिः तिष्यपुनर्वसवीया रात्रिः, तिष्यपुनर्वसुभ्यां युक्तं मुहूर्तं तिष्यपुनर्वसवीयम् , 'क्लीबे' (२।४।९७) ह्रस्वः ॥ ७ ॥

## श्रवणा-ऽश्वत्थान्नाम्न्यः ॥६।२।८॥

म० वृ०–चन्द्रयुक्तनक्षत्रवाचिनः श्रवणशब्दात् अश्वत्थशब्दाच्च [ तृतीयान्तात् ] युक्ते काले 'अः प्रत्ययो' भवति, नाम्नि=प्रत्ययान्तं चेत् कस्यचित् कालविशेषस्य नाम भवति । श्रवणेन चन्द्रयुक्तेन युक्ता=श्रवणा रात्रिः, श्रवणा पौर्णमासी, श्रवणो मुहूर्त्तः । अश्वत्थेन चन्द्रयुक्तेन युक्ता=[1]अश्वत्था रात्रिः, [2]अश्वत्था पौर्णमासी, अश्वत्थो मुहूर्त्तः । नाम्नीति किम् ? श्रावणमहः, श्रावणी रात्रिः ; आश्वत्थमहः, आश्वत्थी रात्रिः ॥८॥

अव०–[1]अश्वत्था अश्विनिरुच्यते । [2]अश्वत्था आश्विनी पौर्णमासीति, आश्वयुजपूर्णिमा, आश्विनमासस्य पूर्णिमा तिथिरित्यर्थः ॥८॥

## षष्ठ्याः समूहे ॥६।२।९॥

म० वृ०–'षष्ठ्यन्तान्नाम्नः [1]समूहेऽर्थे' [2]यथाविहितं प्रत्ययाः स्युः । गोत्रादकञ्, अचित्तादिकण्, केदाराण्ण्यश्चेत्येवमादयः । ततोऽन्यदिहोदाहरणं द्रष्टव्यम् । चापाणां समूहश्चापम् ,एवं [3]काकम्, [4]बाकम्, [5]शौकम्, [6]भैक्षुकम्, [7]वानस्पत्यम्, [8]स्त्रैणम्, [9]पौंस्नम् ॥९॥

अव०–[1]'षष्ठ्याः समूहे' (६।२।९) इत्यारभ्य 'पुरुषात् कृतहित०' ( ६।२।२९) इत्यन्तं यावत् सूत्र २१ समूहार्थप्रत्ययाधिकारः । [2]यथा 'प्राग्जिता०' (६।१।१३) सूत्रेऽणादय उक्तास्त एवात्राणादयो ज्ञेयाः । एवं [3]काकानाम्, [4]बकानाम्, [5]शुकानाम्, [6]भिक्षूणाम्, [7]वनस्पतीनाम्, [8]स्त्रीणाम्, [9]पुंसां समूहः । 'वानस्पत्यम्', 'अनिदम्यण०' (६।१।१५) इति ञ्यः । [8-9]'प्राग्वतः स्त्रीपुंसा०' (६।१।२५) इति नञ्–स्नञ् ॥९॥

## भिक्षादेः ॥६।२।१०॥

म० वृ०–भिक्षादिभ्यः 'समूहेऽर्थे यथाविहितं प्रत्ययः' स्यात् । [1]भिक्षाणां समूहो=भैक्षम्, [2]गार्भिणम् । अचित्तेकणो बाधनार्थं वचनम् ॥१०॥

---

अव०–भिक्षा. भिक्षशब्दोऽकारान्तोऽप्येके प्राहुः, गर्भिणी, युवति, क्षेत्र, करीष, अङ्गार, चर्मन्, वर्मन्, चर्मिन, वर्मिन, पद्धति, सहस्र, अथर्वन्, दक्षिणा, खण्डिक, युग, वरत्रा, युगवरत्रा, हल,बन्ध, हलबन्ध, औलुक्य इति भिक्षादिः । युवतेरण् सिद्ध एव, पुंवद्भावबाधनार्थस्तु अत्र गणे पाठः । अन्ये तु अत्र गणे युवतिशब्दं न पठन्ति, तन्मते पुंवद्भावे सति युवतीनां समूहो यौवनमित्येव प्रयोगः ।

'सुरूपमतिनेपथ्यं, कलाकुशलयौवनम् ।
यस्य पुण्यकृतः प्रेष्यं, सफलं तस्य यौवनम्' ॥१॥

अतिनेपथ्यम्=अतिशायिवेषं सालङ्कारम् । युवतीनां समूहः । प्रेष्यम्=आज्ञाकारी । तस्य यौवनम्,यूनो भावो=यौवनम्, 'युवादेरण्' (७।१।६७) । औलुक्यस्य 'गोत्रोक्ष०' (६।२।१२) इत्युत्तरेणाकञ् प्राप्नोति तद्बाधनार्थमत्र पाठः । [1]'भिक्षि याचनायाम्' भिक्षणं=भिक्षा, 'क्तेटो गुरो०' (५।३।१०६) इत्यङ्, आप्; भिक्षाणां समूहः । [2]तथा गर्भोऽस्त्यासाम्, 'अतोऽनेकस्वरात्' ( ७।२।६ ) इन्, गर्भिणीनां समूहः । गर्भिणीशब्दो मेघमालाशालिपङ्क्त्यादिषु अर्थेषु वर्त्तते, (अतः) अचित्तविशेषवाचित्वात् इकण् उत्तरसूत्रेण प्राप्नोति इत्यत्र पाठोऽणर्थः, 'जा……… ………(तिश्च णितद्धितयस्वरे' इति पुंवद्भावे सति, 'संयोगादिनः' इत्यन्तलोपप्रतिषेधः । गर्भवतीस्त्रीवचनात्तु इकणोऽप्राप्तेरौत्सर्गिक एवाण् ) ॥१०॥

## क्षुद्रकमालवात्सेनानाम्नि ॥६।२।११॥

म० वृ०–क्षुद्रकमालवशब्दात् समूहे 'यथाविहितमण्' स्यात्, सेनाया नाम्नि । क्षौद्रकमालवी, एवंनामा काचित्सेना ॥११॥

अव०–क्षुद्रकाः शस्त्रजीविसङ्घः, क्षुद्रकाणां राजानः, क्षुद्रकस्यापत्यानि वा-'राष्ट्रक्षत्रिया०' (६।१।११४) इति अञ्, अथवा 'शस्त्रजीविसङ्घा०' (७।३।६२) ञ्यट्, 'बहुष्वस्त्रियाम्' (६।१।१२४) लुप्, एवं माल………………(वानां राजानोऽथवा माल)वस्यापत्यानि-'दुनादि०' (६।१।११८) इति ञ्यः, 'बहुष्व०' इति लुप्, क्षुद्रकाश्च मालवाश्च ते ……………………(क्षुद्रकमालवास्तेषां समूहः,) सेनानामत्वात् स्त्रीत्वम् ॥११॥

## गोत्रोक्ष-वत्सोष्ट्र-वृद्धाजोरभ्र-मनुष्य-राज-राजन्य-राजपुत्रादकञ् ॥६।२।१२॥

म० वृ०–स्वापत्यसन्तानस्य स्वव्यपदेशकारिणः प्रथमपुरुषस्यापत्यं गोत्रम् । गोत्रप्रत्ययान्तेभ्यः उक्षादिभ्यश्च 'समूहेऽकञ्' स्यात् । अणोऽपवादः । गोत्र,– औपगवानां समूहः=औपगवकम्, [1]गार्गकम्, गार्ग्यायणकम्; उक्षन्,–औक्षकम्, वात्सकम्, औष्ट्रकम्, वार्द्धकम्, आजकम्, औरभ्रकम्, [2]मानुष्यकम्, [4]राजकम्, [3]राजन्यकम्, राजपुत्रकम् ॥१२॥

**अव०**–[१]गर्गस्यापत्यानि, 'गर्गादेर्यञ्' (६।१।४२), 'यञञोऽश्यापर्णा०' (६।१।१२६) इति यञ् लुप्यते, ततो गर्गाणां समूहो=गार्गकमिति लघुवृत्त्यभिप्रायः । बृहद्वृत्तौ त्वेवम्,– गार्ग्याणां समूहो गार्गकम्, 'गोत्रोक्ष०' इति अकञ् . 'न प्रागजितीये०' (६।१।१३५) इति प्रतिषेधाद् यञो न लुप्, ततः 'तद्धितयस्वरेऽनाति' (२।४।९२) इत्यनेन यकारो लुप्यते । [२]मनुष्य [३]राजन्यशब्दावौणादिकावेव ज्ञेयौ, अन्यथा गोत्रद्वारेण सिद्धम् । [२]'बुधि मनि च ज्ञाने' (इति) मन्, मन्यते=जानाति हेयोपादेयविभागमिति मनुष्यः, 'शिक्यास्या०' (उ.३६४) इति उणादिसूत्रेण निपातः, निपातनात् यः प्रत्ययः, उष् अन्तः । [३]'हिरण्यपर्जन्यादयः' ( उ.३८० ) इत्युणादिना निपातः । अत्राकञि सति 'न राजन्यमनुष्ययोरके' (२।४।९४) इति यलोपप्रतिषेधः । [४]'नोऽपदस्य०' (७।४।६१) इति अनो लुप्यते ॥१२॥

## केदाराण्ण्यश्च ॥६।२।१३॥

**म० वृ०**–केदारशब्दात् समूहे 'ण्योऽकञ् च' स्यात् । अचित्तेकणोऽपवादः । कैदार्यम्, कैदारकम् ॥ १३ ॥

## कवचि-हस्त्यचित्ताच्चेकण् ॥६।२।१४॥

**म० वृ०**–कवचिन्हस्तिनशब्दाभ्यामचित्तवाचिभ्यश्च [शब्देभ्यः चकारात् ] केदाराच्च समूहे 'इकण्' स्यात् । [१]कावचिकम् । हस्तिनां लिङ्गविशिष्टस्यापि ग्रहणात् हस्तिनीनां वा समूहो=हास्तिकम्[२] । अचित्तात्,– [३]आपूपिकम् , [४]शाष्कुलिकम् । केदारात्,– कैदारिकम् ॥ १४ ॥

---

**अव०**–[१]कवचान्येषां सन्ति, 'अतोऽनेकस्वरात्' ( ७।२।६ ) इन्, कवचिनां समूहः । [२]'जातिश्च णि०' (३।२।५१) इति पुंवद्भावः, 'नोऽपदस्य तद्धिते' (७ ४।६१) इन्लोपः । [३]'आपूपिकम्', अत्र 'अशश् भोजने' अश्यते जनैः–'अश ऊपः पश्च' (उ. ३१२) इत्युणादिना ऊपप्रत्ययः, शस्थाने पः, अपूपानां समूहः=आपूपिकम् । [४]शष्कुलीनां समूहः । 'केदाराण्ण्यश्च' (६।२।१३) इत्यनेन ण्याकञ्भ्यां बाधो मा भूदिति (केदारात् ) 'कवचिहस्त्य०' इति सूत्रे इकण्विधानम्, अतः केदारस्य त्रैरूप्यं सिद्धम् ॥ १४ ॥

## धेनोरनञः ॥६।२।१५॥

**म० वृ**–धेनुशब्दात् समूहे 'इकण्' स्यात्, यदि धेनुर्नञ्परो न भवति । धेनूनां समूहो=धैनुकम्[१] । अनञ इति किम्? [२]अधेनूनां समूहः=आधैनवम्[३], उत्सादित्वादञ् । धेनोरनञ इति प्रतिषेधो लिङ्गम् [ज्ञापकम्]– "समूहे तदन्तस्यापि भवति प्रत्ययः", तेन [ब्राह्मणाश्च राजन्याश्च ब्राह्मणराजन्याः, ब्राह्मणराजन्यानां समूहः=] ब्राह्मणराजन्यकम्, वानहस्तिकम्, गौधेनुकम् ॥१५॥

---

**अव०**–[१] 'ऋवर्णोवर्णदोसि०' (७।४।७१) इत्यादिना इकस्य इर्लुप्यते । [२]न धेनवोऽधेनवः, ततोऽधेनूनां समूह इति । [३]'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः ॥१५॥

## ब्राह्मण-माणव-वाडवाद्यः ॥६।२।१६॥

**म० वृ०**–एभ्यः समूहे 'यः' स्यात् । [१]ब्राह्मण्यम्, [२]माणव्यम्, [३]वाडव्यम् ॥१६॥

---

**अव०**–[१]ब्रह्मणोऽपत्यं=ब्राह्मणः, 'ङसोऽपत्ये' (६।१।२८); तथा [२]मनु, मनोरपत्यं कुत्सितं मूढं– 'माणवः कुत्सायाम्' इति अण्, नकारस्य णः, अस्वयम्भुवोऽव्' (७।४।७०) इत्यव्; [३]वडवाया अपत्यं= वाडवोऽश्वो विप्रो वा; ततो ब्राह्मणानां समूह इत्यादि ॥ १६ ॥

## गणिकाया ण्यः ॥६।२।१७॥

**म० वृ०**–गणिकाशब्दात् समूहे 'ण्यः' स्यात् । [१]गाणिक्यम् ॥१७॥

---

**अव०**–ब्राह्मणादीनां यप्रत्ययविधानं पुंवद्भावार्थम्, तथाहि– ब्राह्मणाः प्रकृता अस्यां यात्रायाम्– 'तयोः समूहवच्च बहुषु' (७।३।३) इति सूत्रेण यः प्रत्ययः, ब्राह्मण्या यात्रा यस्य=स ब्राह्मण्ययात्रः, एषु 'परतः स्त्री पुंवत्०' (३।२।४९) इत्यनेन पुंवद्भावो भवति,

ब्राह्मणादीनां ण्यप्रत्यये हि सति 'तद्धितः स्वरवृद्धि०' (३।२।५५) इत्यनेन पुंवद्भावो न स्यात्, यथा गाणिक्यायात्रः, अयं विशेषो 'गणिकाया ण्य' इति सूत्रे ज्ञातव्यः । [१]गणयति धनागममिति गणिका, णकः, गणिकानां समूहो=गाणिक्यम् ॥१७॥

## केशाद्वा ॥६।२।१८॥

म० वृ०–केशात् समूहे 'ण्यः' स्यात् वा । कैश्यम्, कैशिकम् ॥१८॥

अव०–'कैशिकम्', अत्र अचित्तलक्षण इकण् ॥ १८ ॥

## वाऽश्वादीयः ॥६।२।१९॥

म० वृ०–अश्वात्समूहे 'ईयो वा' स्यात् । अश्वीयम्, आश्वम् ॥१९॥

अव०–'आश्वम्,' अत्र 'षष्ठ्याः समूहे' (६।२।९) अण् ॥१९॥

## पर्श्वा ड्वण् ॥६।२।२०॥

म० वृ०–पर्शुशब्दात् समूहे 'ड्वण्' स्यात् । इकणोऽपवादः । [१]पर्शूनां समूहः=पार्श्वम् ॥२०॥

अव०–[१]पार्श्वस्थिवाचकात् पर्शुशब्दात् ऊङ्, पर्शू, पर्शूनां राजानोऽपत्यानि वा– 'पुरुमगध०' (६।१।११६) इत्यण्, 'द्रेरञणो०' (६।१।१२३) इति अणो लोपः, ततः 'उतोऽप्राणिनश्चा०' (२।४।७३) इति ऊङ्, ततः पर्शूनां समूह इति कार्यम् ॥२०॥

## ईनोऽह्नः क्रतौ ॥६।२।२१॥

म० वृ०–अहन्शब्दात् समूहे क्रतौ वाच्ये 'ईनः' स्यात् । अह्नां समूहोऽहीनः क्रतुः । क्रताविति किम् ? [१]आह्नमन्यत् ॥२१॥

अव०–[१]अह्नां समूहः आह्नम्, 'श्वादिभ्योऽञ्' (६।२।२६), अनीनाऽदह्नोऽतः' (७।४।६६) इति सूत्रेणाहन्शब्दस्य ह्रस्य अकारो लुप्यते ॥२१॥

## पृष्ठाद् यः ॥६।२।२२॥

म० वृ०–पृष्ठात्समूहे क्रतौ 'गतिश्च णितद्धित०' २६॥ ठानां समूहः=पृष्ठ्यः क्रतुः । [क्रताविति किम् ] पृष्ठशब्दोऽहःपर्यायः ॥२२॥

## चरणाद्धर्मवत् ॥६।२।२३॥

म० वृ०– चरणं कठकलापादि, तस्माद् यथा धर्मे प्रत्यया भवन्ति तथा समूहेऽपि । वत् सर्वसादृश्यार्थः, तेन यकाभ्यः प्रकृतिभ्यो यः प्रत्ययो यथा धर्मे भवति, ताभ्य एव प्रकृतिभ्यः स एव प्रत्ययः तथैवेह भवति ; यथा कठानां धर्मः=काठकम्, कालापकम्, तथा समूहेऽपि- काठकम्, कालापकम् ॥२३॥

अव०–कठाः, कठेन प्रोक्तं वेदं विदन्त्यधीयते वा कठाः इति वाक्यं पूर्वं 'तेन प्रोक्ते' (६।३।१८१) इत्यनेन अण्, अस्याप्यणोऽग्रे 'तद्वेत्त्यधीते' (६।२।११७) इत्यनेन अण् क्रियते, एवमण् लुप्यते, इति कठः प्रकृतिः, ततः कठानां धर्म आम्नायः सङ्घो वा काठकः, 'चरणादकञ्' (६।३।१६८) इति सूत्रेण अकञ्, काठक इति निष्पन्नः, तथा समूहेऽप्यर्थे काठकः, साम्प्रतं कठानां समूहे 'चरणाद्धर्मवत्' इति अकञ् ॥२३॥

## गो-रथ-वातात् त्रल्-कट्यल्-ऊलम् ॥६।२।२४॥

म० वृ०–गोरथवातशब्देभ्यः समूहे यथासङ्ख्यं 'त्रल्, 'कट्यल्, ऊल' इति प्रत्यया भवन्ति । [गवां समूहः=] गोत्रा, रथकट्या, वातूलः । लकारौ स्त्रीत्वार्थौ ॥२४॥

## पाशादेश्च ल्यः ॥६।२।२५॥

म० वृ०–[१]पाशादिभ्यो गोरथवातेभ्यश्च समूहे 'ल्यः' स्यात् । [२]इकणादेरपवादः । [३]पाश्या, [४]तृण्या, [५]रथ्या, [६]वात्या[७] । लकारः स्त्रीत्वार्थः ॥२५॥

अव०–[१]पाश, तृण, खल, धूम, वात, गो, अङ्गार, पोटगल, पिटक, पिटाक, शकट, हल, नल, वन इति पाशादिगणः । भिक्षादिपाठादङ्गारहलाभ्यां परतोऽणपि– आङ्गारम्, हालम् । [१]'क्वचिद्स्त्य०'

(६।२।१४) इत्युक्तेकणः भिक्षादेरित्युक्ताऽणः द्वयोरप्ययं योगो बाधकः । [3]पाश्यते बध्यते एभिः प्राणिनः इति पाशः, पाशानां समूहः पाश्या । [4]तृणानाम्, [5]रथानाम्, [6]वातानां समूहः । [7]( एवं ) खल्या, गव्या ॥२५॥

## श्वादिभ्योऽञ् ॥६।२।२६॥

म० वृ०–श्वनप्रकारेभ्यः समूहे 'अञ्' स्यात् । शूनां समूहः=शौवम् ,अह्नां समूहः=आह्नम्, [दण्डिनां समूहः= ] दाण्डम्, चाक्रम् । श्वादयः प्रयोगगम्याः ॥२६॥

---

अव०–अणैव सिद्धे 'नोऽपदस्य तद्धिते' (७।४।६१) इत्यन्त्यस्वरादिलोपार्थं श्वादिभ्यो वचनम्, अणपवादबाधनार्थं च । अन्यथा 'अणि' (७।४।५२) इत्यादिसूत्रैरन्त्यस्वरादिलोपप्रतिषेधः स्यात् ॥२६॥

## खलादिभ्यो लिन् ॥६।२।२७॥

म० वृ०–खलप्रकारेभ्यः समूहे 'लिन्' स्यात् । लः स्त्रीत्वार्थः । खलानां समूहः=खलिनी । पाशादित्वाद्ययोऽपि– खल्या । खलादयः प्रयोगगम्याः।२७।

## ग्राम-जन-बन्धु-गज-सहायात्तल् ॥६।२।२८॥

म० वृ०–एभ्यः समूहे 'तल्' स्यात् । लः स्त्रीत्वार्थः । ग्रामाणां समूहो=ग्रामता,जनता, बन्धुता, गजता, सहायता ॥२८॥

## पुरुषात् कृत-हित-वध-विकारे चैयञ् ॥६।२।२९॥

म० वृ०–पुरुषशब्दात् कृते हिते वधे विकारेऽर्थे चकारात् समूहेऽर्थे 'एयञ्' स्यात् । कृतादौ यथाविधानं विभक्तियोगः । पुरुषेण कृतः=पौरुषेयो ग्रन्थः । पुरुषाय हितं=पौरुषेयमार्हतं शासनम् । पुरुषस्य वधः=पौरुषेयः । पुरुषस्य विकारः= पौरुषेयो विकारः । पुरुषाणां समूहः=पौरुषेयम् ।२९।

## विकारे ॥६।२।३०॥

म० वृ०–षष्ठ्यन्ताद्विकारे 'यथाविहितं' [1]प्रत्ययाः स्युः । द्रव्यस्यावस्थान्तरं विकारः । अश्मनो विकारः=[2]आश्मनः, [2]आश्मः; [3]भास्मनः, मार्त्तिकः, [4]आर्द्रः, हालः, त्रैगर्त्तः[5] ॥३०॥

---

अव०–[1]प्रत्यया इत्यत्र बहुवचनात् कलेर्विकारः=कालेयः, 'कल्यग्नेरेयण्' (६।१।१७); उत्सस्य विकारः=औत्सः, 'उत्सादेरञ्' ( ६।१।१९); स्त्रीणां विकारः=स्त्रैणः, पुंसां विकारः पौंस्नः, 'प्राग्वतः स्त्रीपुंसा'० ( ६।१।२५ ) इत्यादयोऽपि वेदितव्याः । [2]'वाऽश्मनो विकारे'(७।४।६३) इति विकल्पेनान्त्यस्वरादिलोपः । [3]'भास्मन' इत्यत्र 'अणि' (७।४।५२) इति निषेधः । [4]अर्द्रस्य विकारः । [5]त्रिगर्त्तानां विकारः, 'तस्येदम्' ( ६।३।१६० ) इत्येव इकणादिसिद्धौ अर्द्रादिशब्देषु विकारेऽर्थे सति अणपवादबाधनार्थं विकारे इति वचनं कृतम् ॥३०॥

## प्राण्यौषधिवृक्षेभ्योऽवयवे च ॥६।२।३१॥

म० वृ०–प्राणिन्-औषधि-वृक्षवाचिभ्योऽवयवे विकारे चार्थे 'यथाविहितं प्रत्ययाः' स्युः । कापोतं सक्थि, कापोतं मांसम् । औषधि,– दौर्वं काण्डम्, दौर्वं भस्म । वृक्ष,– कारीरं काण्डम्, कारीरं भस्म । प्राण्यौषधिवृक्षेभ्य इति किम् ? पाटलिपुत्रकः प्राकारः,–पाटलिपुत्रकाः प्रासादाः । इतः परं 'विकारे' 'प्राण्यौषधिवृक्षेभ्योऽवयवे च'– इति द्वयमप्यधिक्रियते, तेनोत्तरे प्रत्ययाः प्राण्यौषधिवृक्षेभ्योऽवयवविकारयोः [ अर्थयोः ] अन्येभ्यस्तु विकारमात्रे [अर्थे] भवन्तीति ज्ञेयम् ॥३१॥

---

अव०–प्राणिनामौषधिवृक्षाणां मिथो विशेषो लिख्यते,– प्राणिनश्चेतनावन्तः, औषधयः फलपाकान्ताः, वृक्षाः पुष्पवन्तः फलवन्तश्च । कोऽर्थः ? ये पुष्पित्वा फलति (फलन्ति ?) ते वृक्षाः वृक्षविशेषत्वात् , एकदेशेन फलवत्तया ··············( ऐक्यम्,. न तु पुष्पवत्तया अतो वनस्पतिवीरुधामपि ) वृक्षग्रहणेन ग्रहणं भवति । पुष्पैर्विना फलवान् वृक्षो वनस्पतिरुदुम्बरादिर्ज्ञातव्यः । वीरुधो लता गुल्माश्च । तत्र लताः केतकाद्याः, गुल्माश्च सस्तूपाः वंशेक्षु-

प्रभृतयः । प्राणिग्रहणेनैव चेतनावत्त्वेन वृक्षौषधि-ग्रहणे सिद्धे तदुपादानमिह.............. शास्त्रे प्राणिग्रहणेन त्रसा एव) प्राणिनः गृह्यन्ते, न च स्थावराः इति ज्ञापनार्थम् । पाटलिपुत्रस्यावयवः=पाटलिपुत्रकः. पाटलिपुत्रस्यावयवाः=पाटलिपुत्रकाः प्रासादाः; अस्मिन् वाक्येऽवयवोऽपि इदमर्थो विवक्षितः कल्पनीयः, ततः 'तस्येदम्' (६।३।१६०) इति सूत्रप्रत्ययप्राप्तावपि 'रोपान्त्यात्' (६।३।४२) इति सूत्रस्य विशेषविधिप्रत्ययविध- 'रोपान्त्यात्' इत्यनेनैव अकञ् प्रत्ययो भवति अत्रोदाहरणे.......... इत्यर्थः ( ? )।।३१।।

## तालाद्धनुषि ।।६।२।३२।।

म० वृ०–तालशब्दाद्धनुषि विकारे–'ऽण्' स्यात् । दुलक्षणस्य ['दोरप्राणिनः' (६।२।४९) इत्युक्तस्य] मयटोऽपवादः । तालस्य विकारः=तालं धनुः । धनुषीति किम् ? तालमयं काण्डम् ['दोरप्राणिनः' इति मयट्] ।।३२।।

## त्रपुजतोः षोऽन्तश्च ।।६।२।३३।।

म० वृ०–त्रपुजतुशब्दाभ्यां विकारे–'ऽण्' स्यात् । तयोश्च षोऽन्तः । त्रापुषम्, जातुषम ।।३३।।

## शम्या लः ।।६।२।३४।।

म० वृ०–शमीशब्दाद्विकारेऽवयवे चा– 'ऽण्' स्यात्, तद्योगे च लोऽन्तः । शम्या विकारोऽवयवो वा=शामीलं भस्म । शामीली शाखा ।।३४।।

## पयो-द्रोर्यः ।।६।२।३५।।

म० वृ०–पयस्- द्रुशब्दाभ्यां विकारे 'यः' स्यात् । पयसोऽणोऽपवादः,द्रोरेकस्वरमयटः । पयसो विकारः =पयस्यम् । द्रोर्दारुणो विकारो=द्रव्यम् [ 'अस्वयम्भुवोऽव्' (७।४।७०) ] ।।३५।।

## उष्ट्रादकञ् ।।६।२।३६।।

म० वृ०–उष्ट्राद्विकारेऽवयवे चा'–ऽकञ्' स्यात् । उष्ट्रस्य उष्ट्र्या वा विकारोऽवयवो वा औष्ट्रकं मांसम् । औष्ट्रिका जङ्घा ।।३६।।

अव०–'औष्ट्रिका' इत्यत्र 'जातिश्च णितद्धित०' (३।२।५१) इत्यादिना पुंवद्भावः ।।३६।।

## उमोर्णाद्वा ।।६।२।३७।।

म० वृ० -उमा-उर्णाशब्दाभ्यां यथासम्भवं विकारेऽवयवे वा–'ऽकञ्'स्यात् वा । औमकम्, [1]औमम् । और्णकम, [1]और्णः कम्बलः ।।३७।।

अव०–[1]उमा=अतसी, तस्या विकारोऽवयवो वा=औमकम्, औमम् । [2]उर्णाया विकार और्णः इत्यत्र 'विकारे' (६।२।३०) इत्यनेन अण् ।।३७।।

## एण्या एयञ् ।।६।२।३८।।

म० वृ०–[1]एणीशब्दाद्विकारेऽवयवे (वा) 'एयञ्' स्यात् । [1]अणोऽपवादः । ऐणेयं मांसम, ऐणेयी जङ्घा । ।।३८।।

अव०–[1]'प्राण्यौषधिवृक्ष'० (६।२।३१) इत्युक्तस्याणः । 'एण्या एयञ्' इति सूत्रे स्त्रीलिङ्ग एणी इति निर्देशात् पुंल्लिङ्गैणशब्दादणेव भवति, यथा–ऐणं मांसम, ऐणी जङ्घा; अत्र 'प्राण्यौषधि'० इत्यण् ।। ३८ ।।

## कौशेयम् ।।६।२।३९।।

म० वृ०–कोशाद्विकारे 'एयञ्' निपात्यते । कोशस्य विकारः=कौशेयं वस्त्रं सूत्रं (वा) ।।३९।।

अव०–निपातनं रूढ्यर्थम्, तेन वस्त्रसूत्रयोर्वाच्ययोः कोशादेयञ्, अन्यत्र भस्मादौ न एयञ् ।।३९।।

## परशव्याद् यलुक् च ।।६।२।४०।।

म०वृ०–परशव्याद् विकारे 'यथाविहितमण्' स्यात्, यकारस्य च लुक् । परशव्यस्यायसो विकारः पारशवम् । अण् सिद्ध एव, यलुगर्थं वचनम् ।।४०।।

अव०–परशु, परशवे इदं=परशव्यम्, उवर्णयुगादेर्यः' (७।१।३) इति यः, 'अस्वयंभुवोऽव्' (७।४।७०) इति अव् ।।४०।।

## कंसीयाञ्ञ्यः ॥६।२।४१॥

**म० वृ०**–कंसीयाद्विकारे 'ञ्यः' स्यात्, तद्योगे 'यकारस्य लुक्' च । कांस्यम् ॥४१॥

**अव०**–कंस, कंसाय इदं=कांसीयम्, 'परिणामिनि तदर्थे' (७।१।४४) इति सूत्रेण ईयः, कंसीयस्य विकारः=कांस्यम् ॥४१॥

## [1]हेमार्थान्माने ॥६।२।४२॥

**म० वृ०**–हेमवाचिनः शब्दान्माने विकारे वाच्ये 'यथाविहितमण्' स्यात् । [ 'दोरप्राणिनः' (६।२।४९) इति] द्रुमयटोऽपवादः । हाटकस्य विकारो हाटको [2]निष्कः, हाटकं कार्षापणम्; [3]हैमो निष्कः, हैमं [4]कार्षापणमत्र परत्वाद् [ 'हेमादिभ्योऽञ्' (६।२।४५) इति] हेमादिलक्षणोऽञेव । मान इति किम्? हाटकमयी यष्टिः [ 'दोरप्राणिनः' (६।२।४९) इति मयट् ] ॥४२॥

**अव०**–[1]हेमं हेमो हेम वाऽर्थो यस्य स हेमार्थः । [2]अष्टोत्तरपलशतं निष्कः । [3]हेमन् शब्दः, हेम्नो विकारो हैमो निष्कः, हैमं कार्षापणम्; हेमादिभ्योऽञ्' इति सूत्रेण अञ्, 'नोऽपदस्य तद्धिते' (७।४।६१) इति अन् लुप्यते, यदि च 'हेमार्थान्माने' इति सूत्रेण अण् स्यात् तदा 'अणि' (७।४।५२) इति सूत्रेण अन्त्यस्वरादिलोपप्रतिषेधः स्यात्, हैममिति न सिद्ध्येत इति अञेव । एवं [4]जातरूपो निष्कः, जातरूपं कार्षापणम् ॥४२॥

## द्रोर्वयः ॥६।२।४३॥

**म० वृ०**–द्रुशब्दान्माने विकारे 'वयः' स्यात् । यस्यापवादः । [1]द्रुवयं मानम् ॥४३॥

**अव०**–[1]द्रोर्विकारो द्रुवयम् । 'पयोद्रोर्यः' (६।२।३५) इत्यनेन विकारे यः प्रत्ययः, 'द्रोर्वयः' इत्यनेन च माने विकारे वयः प्रत्ययः, माने विकारे 'द्रोर्वय' इदमेव प्रवर्त्तते ॥४३॥

## मानात् क्रीतवत् ॥६।२।४४॥

**म० वृ०**–[1]मानवाचिनः शब्दाद्विकारे 'क्रीतवत् [2]प्रत्ययविधिः'–र्भवति । [3]शतेन क्रीतं=शत्यम्, शतिकम्; शतस्य विकारः=शत्यः, शतिकः; [अनुक्रमेण यप्रत्यय इकप्रत्ययः] एवं [4]साहस्रः । वत् सर्वविधिसादृश्यार्थः, तेन लुबादिकस्याप्यतिदेशो भवति– द्विशतः, द्विसहस्रः ॥४४॥

**अव०**–[1]मीयते=परिच्छिद्यते वस्तु येन तन्मानम् । पदार्थस्य इयत्तापरिच्छित्तिहेतुः सङ्ख्यादिरुच्यते । [2]यथा क्रीतेऽर्थे 'शतात्केवलादतस्मिन् येकौ' (६।४।१३१) इति सूत्रेण य-इकौ, यथा च सहस्रशब्दात् 'सहस्रशतमानादण्' (६।४।१३६) इति अण्, यथा च निष्कशब्दात् 'मूल्यैः क्रीते' (६।४।१५०) इतीकण्, तथा 'मानात्क्रीतवत्' इत्यपि विकारे प्रत्ययविधौ प्रवर्त्तते इत्यर्थः । [3]शतेन क्रीतमस्मिन् वाक्ये 'शतात्केवला'० इत्यनेन यप्रत्यय इकप्रत्ययश्च । [4]सहस्रेण क्रीतः सहस्रस्य विकारो वा साहस्रः, 'सहस्रशतमानादण्', एवं नैष्किकः । [5]द्विशतः, त्रिशतः, द्विसहस्रः, द्विसाहस्रः; द्विनिष्कः, द्विनैष्किकः; एषु उदाहरणेषु लुपोऽतिदेशो दर्श्यते– द्वाभ्यां शताभ्यां क्रीतः– 'शताद्यः' (६।४।१४५) इति सूत्रेण विकल्पेन यः क्रियते, एकत्र यः, परं तस्य यप्रत्ययस्य विधानबलात् लुप् न भवति इति हेतोः 'संख्याडते'० (६।४।१३०) इत्यनेन कप्रत्ययः, एव कार्यः, 'संख्याडतेश्चाश०' इत्यनेन कप्रत्ययः 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इति सूत्रेण कप्रत्ययो लुप्यते, ततो द्विशतः, त्रिशत इति सिद्धम्; तथा द्वाभ्यां सहस्राभ्यां क्रीतः– 'सहस्रशतमानादण्' (६।४।१३६) इत्यनेन अण्, 'नवाणः' (६।४।१४२) इति सूत्रेण विकल्पेन अण् लुप्यते, यत्राणो लोपः तत्र द्विसहस्रः इति भवति, यत्र अण् स्थितः तत्र 'मानसंवत्सरस्याशाणकुलिजस्यानाम्नि' (७।४।१९) इति सूत्रेण उत्तरपदवृद्धिः; एवं द्विनिष्कः, द्विनैष्किकः ॥४४॥

## हेमादिभ्योऽञ् ॥६।२।४५॥

**म० वृ०**–हेमादिशब्देभ्यो यथायोगं विकारेऽ-

यवे चार्थे 'नित्यमञ्' स्यात् । हेम्नो विकारो= हैमं धनुः, हैमी यष्टिः, राजतः ॥४५॥

---

अव०–हेमन्, रजत, उदुम्बर, नीदुदार, रोहीतक, बिभीतक, कण्डकार, गवीधुका, पाटली, श्यामाक, बर्हिण इति हेमादिगणः । बहुवचनमाकृतिगणार्थम् । हेमन्शब्दस्य विकारेऽण्बाधनार्थमञ्वचनम् । अणि हि सति 'अणि' (७।४।५२) इति अन्त्यस्वरादिलुग् न स्यात् । पाटलीश्यामाकबर्हिणानां दुलक्षणस्य शेषाणां तु विकल्पमयटो बाधनार्थमत्र गणे पाठः । 'हेमादिभ्योऽञ्' इति सूत्रे हेमन्शब्दो नकारान्तो ग्राह्यः, अकारान्तहेमशब्दात्तु यथाप्राप्तप्रत्ययो भवतीत्यर्थः ॥४५॥

## अभक्ष्याच्छादने वा मयट् ॥६।२।४६॥

म० वृ०–षष्ठ्यन्ताद् भक्ष्याच्छादनवर्जिते यथायोगं विकारेऽवयवे च 'मयट्'वा' भवति । भस्मनो विकारो=भस्ममयम्, भास्मनः ['विकारे' (६।२।३०) अण् ]; कपोतस्य विकारोऽवयवो वा कपोतमयम्, कापोतम् ['प्राण्यौ०' (६।२।३१) इति अण् ]; एवं दूर्वामयम्, दौर्वम् । अभक्ष्याच्छादन इति किम् ? मौद्गः सूपः, कार्पासः पटः । भक्ष्याच्छादनयोर्मयड्भावपक्षे च 'तालाद्धनुषि' (६।२।३२) इत्यादिको विधिः सावकाशः अयं च विधिः [=इदं च सूत्रं] भस्ममयमित्यादौ [ सावकाशम् ]; तत्रोभयप्राप्तौ परत्वादनेन मयड् भवति– [१]तालमयम्, त्रपुमयमित्यादि ॥४६॥

---

अव०–[१]तालमयम्, त्रपुमयम्, जतुमयम्, शमीमयम्, पयोमयम्, द्रुमयम्, उष्ट्रमयम्, उमामयम्, ऊर्णामयम्, एणीमयम्, काशमयम्, परशव्यमयम्, कंसीयमयम्, शतमयम्; एषु 'तालाद्धनुषि' इत्यादीनामनुक्रमेण प्राप्तौ सत्यां परत्वात् 'अभक्ष्याच्छादने०' इत्यनेनैव मयट् भवति ॥४६॥

## शर-दर्भ-कूदी-तृण-सोम-बल्वजात् ॥६।२।४७॥

म० वृ०–शरादिभ्यो यथायोगं भक्ष्याच्छादनवर्जिते विकारेऽवयवे च नित्यं 'मयट्'स्यात्। अणोऽपवादः । शरमयम्, दर्भमयम्, कूदीमयम्, तृणमयम्, सोममयम्, बल्वजमयम् ॥४७॥

## एकस्वरात् ॥६।२।४८॥

म० वृ०–एकस्वरान्नाम्नो भक्ष्याच्छादनवर्जिते विकारेऽवयवे च नित्यं 'मयट्' स्यात्। [१]वाङ्मयम्, मृन्मयम्, [२]गीर्मयम् [३]धूर्मयम् ॥४८॥

---

अव०–[१]वाचां विकारोऽवयवो वा=वाङ्मयम्, एवं सर्वत्र वाक्मयम्, 'प्रत्यये च' (१।३।२) इति सूत्रेण पञ्चमः । [२]'गीर्मयम्, [३]धूर्मयम्'; अत्र गिरां विकारो=गीर्मयम्, धुरां विकारो=धूर्मयम्, 'पदान्ते' (२।१।६४) इत्यनेन दीर्घः ॥४८॥

## दोरप्राणिनः ॥६।२।४९॥

म० वृ०–दुसंज्ञकादप्राणिवाचिनो यथायोगं भक्ष्यादिवर्जिते विकारेऽवयवे 'मयट्' स्यात् । आम्रमयम्, शालमयम्, [१]यन्मयम्, तन्मयम् । अप्राणिन इति किम् ? [२]चाषम्, [३]चाषमयम्; चासम्, चासमयम् ॥४९॥

---

अव०–[१]यस्य विकारो यन्मयम्, 'प्रत्यये च' (१।३।२) इति पञ्चमः । [२]'चाषम्', अत्र प्राण्यौषधि०' (६।२।३१) इति अण् । [३]'चाषमयम्', अभक्ष्याच्छादने०' (६।२।४६) इति मयट् । एवं चासम्, चासमयम् ॥४९॥

## गोः पुरीषे ॥६।२।५०॥

म० वृ०–गोशब्दात् पुरीषेऽर्थे 'मयट्' स्यात् । गोः पुरीषं=गोमयम् । पुरीष इति किम् ? गव्यं पयः ॥ ५० ॥

---

अव०–'एकस्वरात्' (६।२।४८) इत्येव सिद्धे, पुरीषे नियमार्थं 'गोः पुरीषे' इति वचनम् । गोरिदमथवा गोर्विकारोऽवयवो वा=गव्यम्, 'गोः स्वरे यः' (६।१।२७), 'य्यक्ये' (१।२।२५) इति अव् ॥५०॥

## व्रीहेः पुरोडाशे ॥६।२।५१॥

**म० वृ०**–व्रीहिशब्दात् पुरोडाशे विकारे नित्यं 'मयट्' स्यात् । अणोऽपवादः । व्रीहिमयः [1]पुरोडाशः । पुरोडाश इति किम् ? व्रैहः ओदनः ॥५१॥

---

**प्रव०**–[1]पुरो दाश्यते इति पुरोडाशः, 'दाशृग् दाने' 'भावाकर्त्रोः' (५।३।१८) घञ्, दाशः 'पृषोदरा०' (३।२।१५५) दस्य डः ॥ ५१ ॥

## तिल-यवादनाम्नि ॥६।२।५२॥

**म०वृ०**– तिलयवाभ्यां विकारेऽवयवे 'मयट्' स्यात्; अनाम्नि [ अणोऽपवादः ] । तिलमयम्, यवमयम् । अनाम्नि इति किम् ? तैलम् । यवानां विकारो= यावः, स एव यावकः ॥५२॥

## पिष्टात् ॥६।२।५३॥

**म० वृ०**–पिष्टाद्विकारे 'मयट्' स्यात्, अनाम्नि । अणोऽपवादः । पिष्टमयम् ॥५३॥

## नाम्नि कः ॥६।२।५४॥

**म० वृ०**–पिष्टान्नाम्नि विकारे 'कः प्रत्ययः' स्यात् । पिष्टस्य विकारः=पिष्टिका ॥५४॥

## ह्योगोदोहादीनञ् हियङ्गुश्चास्य ॥६।२।५५॥

**म० वृ०**–ह्योगोदोहशब्दाद्विकारे नाम्नि 'ईनञ्' स्यात्, तत्संयोगे च [1]प्रकृतेः 'हियङ्गु' इत्यादेशः । [2]हैयङ्गवीनं नवनीतं घृतं वा ॥५५॥

---

**प्रव०**–नाम्नीत्येव– ह्योगोदोहस्य विकार इदमुदश्वित् तक्रं ह्योगोदोहम्, अत्र 'विकारे' (६।२।३०) इत्यणेव । [1]ह्योगोदोहस्य प्रकृतेः स्थाने हियङ्गु । [2]दुह्यते इति दोहः, गवां दोहः (गोदोहः), ह्यो-गतदिने गोदोहः= ह्योगोदोहः, ह्योगोदोहस्य विकारो=हैयङ्गवीनम्, 'अस्वयम्भुवोऽव्' (७।४।७०) ॥५५॥

## [1]अपो यञ् वा ॥६।२।५६॥

**म० वृ०**–अप्शब्दाद्विकारे 'यञ् वा' स्यात् । अपां विकारः=आप्यम्, [2]अम्मयम् ॥५६॥

---

**प्रव०**–[1]एकस्वरमयटोऽपवादः । [2]'एकस्वरात्' (६।२।४८) मयट्, 'प्रत्यये च' (१।३।२) इति पञ्चमः ॥५६॥

## लुब् बहुलं पुष्पमूले ॥६।२।५७॥

**म० वृ०**-विकारावयवयोर्विहितस्य । [ अणो वा मयटो वा अञो वा ] प्रत्ययस्य पुष्पे मूले वा वाच्ये 'लुप् स्याद् बहुलम्' । मल्लिकाया विकारोऽवयवो वा पुष्पं [1]मल्लिका, [2]मालती, [3]जातेर्जातिः, [4]पाटलं पाटला वा, पाटलीत्यपि, [5]कुन्दम्, कदम्बम्, अशोकम्, चम्पकम्, विदार्या मूलं=विदारी, [6]हरिद्रा, मुस्ता । क्वचिन्न लुप्– वरणस्य पुष्पाणि वारणानि, एरण्डस्य मूलानि ऐरण्डानि । क्वचिद्विकल्पः– [7]शिरीषाणि, शैरीषाणि; [8]ह्रीबेराणि, ह्रैबेराणि । क्वचित् पुष्पमूलाभ्यामन्यत्रापि लुप्- आमलकस्य विकारो वृक्ष आमलकी, [9]बदरी; व्रीहेर्विकारः स्तम्बः व्रीहिः ॥५७॥

---

**प्रव०**–[1]'मल्लिकाया विकारो०', [2]एवं मालत्या विकारोऽवयवो वा पुष्पं मालती, एवं नवमालिका; एषु उदाहरणेषु 'प्राण्यौषधि०' (६।२।३१) इत्यण्, अभक्ष्याच्छादने०' (६।२।४६) अनेन मयट्; उभयत्रापि प्रत्ययस्य 'लुप् बहुलम्०' इति सूत्रेण लोपः कार्यः, तदनन्तरं 'ङ्याद्गौणस्य०' (२।४।९५) इत्यनेन स्त्रीप्रत्ययापङीनिवृत्तिः क्रियते, लुबन्तस्य स्त्रीत्वात् पुनः स्त्रीप्रत्यय आप् ङी क्रियेते, मल्लिका, मालती, नवमल्लिका, यूथिका इति सिद्धम् । [3]जातेर्विकारोऽवयवो वा पुष्पं जातिः । [4]पाटल, 'नवा शोणादेः' (२।४।३१) ङी– पाटली, अथवा पाटलाशब्दः, पाटल्याः पाटलाया वा विकारोऽवयवो पुष्पम्– 'दोरप्राणिनः' (६।२।४९) मयट्, 'लुब् बहुलम्०' (६।२।५७) इति मयट् लुप्यते– पाटलं पाटला वा, पुष्पे क्लीबेऽपि, पाटला न केवलं पुष्प(? पुष्पे वर्तमानः स्त्री(लिङ्गः); [5]एवं कुन्दादि-

शब्दनिष्पत्तिरपि । नवरं कुन्दकदम्बाशोकादिभ्यः 'प्राण्यौषधि०' (६।२।३१) इत्यण् , तस्य 'लुब् बहुलम्०' इति लोपः । कुन्दकदम्बादयो मूलप्रकृतिरूपाः सम्पन्नाः पुष्पे वर्त्तन्ते, पूर्वं प्रत्ययात् वृक्षे कुन्दादिशब्दाः प्रवर्त्तिता आसन् । [६]विदार्यादयः मूले वर्तन्ते । तथा [७]शिरीषस्य पुष्पाणि विकारोऽवयवो वा- 'प्राण्यौ०' ( ६।२।३१ ) अण् । [८]ह्रीबेरस्य बालकस्य मूलानि- 'प्राण्यौ०' अण । [९]आमलकी बदरी' इत्यत्र 'गौरादि०' ङी, 'दोरप्राणिनः' ( ६।२।४९) मयट् , 'प्राण्यौष०' अण् ॥५७॥

## फले ॥६।२।५८॥

म० वृ०–विकारेऽवयवे वा फले विवक्षिते प्रत्ययस्य 'लुप्' स्यात् । आमलक्या विकारोऽवयवो वा. [१]फलमामलकम् , एवं [२]बदरम् , [३]कुवलम् , एवं[४]व्रीहिः,[५]यवः,[६]मुद्गः,माषः, गोधूमः, निष्पावः [वल्लकः,] तिलः, [७] हरीतकी, [८] पिप्पली, ।कर्कटी, दण्डी, दोडी, दाडी इत्यादि[९] ॥५८॥

अव०–[१]आमलक, [२]बदर, [३]कुवल ; स्त्री चेत् गौरादित्वात् ङी–आमलकी, बदरी, कुवली ; आमलक्याः बदर्याः कुवल्याः विकारोऽवयवो वा फलमामलम् , बदरम् , कुवलम् ; 'दोरप्राणिनः' (६।२।४९) इति मयट् , 'बदरकुवलयोर्हेमादिभ्योऽण्' (६।२।४५), अथवा 'प्राण्यौषधि०(६।२।३१) इत्यण् , 'फले' ( ६।२।५८ ) इति सूत्रेण मयटवणां लुप् , तद्धितलुपि 'ङ्यादेर्गौणस्य०' ( २।४।९५ ) इत्यनेन ङीनिवृत्तिः ; आमलकम् , बदरम् , कुवलमिति सिद्धम् । एवमनया युक्त्या[४]व्रीहेः[५]यवस्य [६]मुद्गादेर्विकारोऽवयवो वा– क्वापि 'प्राण्यौषधि०' इत्यण् , (क्वापि ) 'तिलयवादनाम्नि' ( ६।२।५२ ) मयट् । [७]हरीतकी, [८]पिप्पली ; हरीतक्याः पिप्पल्या फलं विकारोऽवयवो वा 'प्राण्यौ०' (६।२।३१) अण् ,'फले' लुप् । हरीतकीपिप्पल्यादिशब्दाः फले वाच्ये नित्यस्त्रीलिङ्गा एव, वृक्षे तु त्रिलिङ्गाः । व्रीह्यादिसर्वधान्यवाचकशब्दानां हरीतक्यादिसर्वफलवाचिशब्दानां च इत्थं निष्पत्तिः कर्त्तव्या । [९]आदिशब्दात् पथ्या, अम्लिका, चिञ्चा, द्राक्षा, मृद्वीका, कणावला, एला, कण्टकारिका, शेफालिका, ओषधिः, शष्कण्डी, नखरञ्जनी । हरीतक्यादिशब्देभ्यः परतो यथाप्राप्तमणमयडादिप्रत्ययं कृत्वा 'फले' लुप् कृत्वा स्त्रीप्रत्ययनिवृत्तिं च कृत्वा पुनः स एव स्त्रीप्रत्ययः, लुबन्तस्त्रीलिङ्गमेव इति स्त्रीप्रत्ययः ॥५८॥

## प्लक्षादेरण् ॥६।२।५९॥

म० वृ०–प्लक्ष इत्येवमादिभ्यो विकारेऽवयवे वा फले विवक्षिते-'ऽण्' स्यात् । मयटोऽपवादः । विधानसामर्थ्याच्चास्याणो न लुप् । [१]प्लाक्षम् ॥५९॥

अव०–प्लक्ष, न्यग्रोध, अश्वत्थ, इङ्गुदी, वेणु, बृहती, सगु, सकु, ककतु इति प्लक्षादिगणः । [१]प्लक्षस्य विकारोऽवयवो वा फलं=प्लाक्षम् । एवं नैयग्रोधम् ॥५९॥

## जम्ब्वा वा ॥६।२।६०॥

म० वृ०–जम्बूशब्दाद्विकारेऽवयवे फले विवक्षिते– 'ऽण्' वा स्यात् । पक्षे यथाप्राप्तं प्रत्ययस्तस्य च लुप् । [१]जाम्बवम । पक्षे[२] जम्बु, जम्बूः॥६०॥

अव०–[१]जम्ब्वा विकारोऽवय० फलं=जाम्बवम् , अत्राण् । [२]पक्षे जम्बु, जम्बूः ; अत्र 'अभक्ष्याच्छाद०' ( ६।२।४६ ) इति मयट् , अथवा 'प्राण्यौषधि०' ( ६।२।३१ ) अण् , 'फले' (६।२।५८) इति लुप् , ततो–'ऽलाबुजम्बू'❀ इति पाठात् स्त्रीत्वं नपुंसकत्वं च, 'क्लीबे वा卐(२।१।९३) इति सूत्रेण ह्रस्वः जम्बु इति नपुंसकः, जम्बू इति स्त्री,(लिङ्गः) ॥६०॥

## न द्विरद्रुवय-गोमय-फलात् ॥६।२।६१॥

म० वृ०–द्रुवयं गोमयं फलवाचि च शब्दं वर्जयित्वाऽन्यस्मान्नाम्नो विकारावयवयोर्द्विः [१]प्रत्ययो न स्यात् । कपोतस्य विकारोऽवय०=कापोतः, कापोतस्य विकारोऽवयवो [२]वेति [ 'दोर०' (६।२।४९ ) इत्यनेन ] पुनर्मयट् न भवति, एवमैणेयः, शा-

❀ पश्यन्तु श्रीहैमलिङ्गानुशासनविवरणे स्त्रीनपुंसकलिङ्गप्रकरणे षष्ठं श्लोकम् ।

卐 चिन्त्यमिदम्, 'क्लीबे' (२।४।९७) इति सूत्रेण ह्रस्वसद्भावात् ।

मील इत्यादि[२]। अद्रुवयगोमयफलादिति किम् ? [३]द्रौवयं खण्डम्, [४]गौमयं भस्म, [५]कापित्थो रसः ॥६१॥

अव०–[१]'द्विः प्रत्ययः', कोऽर्थः ? द्वितीयवारं पुनः प्रत्ययो न भवतीत्यर्थः। [२]आदिशब्दात् औष्ट्रकः, कांस्य इति। [३]द्रोर्विकारो मानं द्रुवयम्, 'द्रोर्वयः' (६।२।४३) इति वयः प्रत्ययः, द्रुवयस्यापि विकारो द्रौवयम्, 'विकारे'(६।२।३०) इत्यण्, तथा [४]गोः पुरीषं गोमयम्, 'गोः पुरीषे' (६।२।५०) इति मयट्, गोमयस्य विकारो– 'विकारे' इत्यण्, वृद्धिः। तथा [५]कपित्थस्य विकारोऽवयवो वा फलं– 'प्राण्यौ०' (६।२।३१) अण्, 'फले' (६।२।५८) लुप्, कपित्थस्य विकारो– 'विकारे' अण् ॥६१॥

## पितृ-मातुर्व्य-डुलं भ्रातरि ॥६।२।६२॥

म० वृ०–पितृमातृशब्दाभ्यां [षष्ठ्यन्ताभ्यां] भ्रातरि वाच्ये यथासङ्ख्यं 'व्य'प्रत्ययो डुलप्रत्ययश्च स्यात्। पितुर्भ्राता=पितृव्यः, मातुर्भ्राता=मातुलः ॥६२॥

## पित्रोर्डामहट् ॥६।२।६३॥

म० वृ–पितृमातृभ्यां [षष्ठ्यन्ताभ्यां] मातापित्रोर्वाच्ययो–'डामहट्' स्यात्। [टकारो ङ्यर्थः] पितुः पिता=पितामहः, पितुः माता=पितामही, मातुः पिता=मातामहः, मातुर्माता=मातामही ॥६३॥

अव०–'पित्रोर्डामहट्' अत्र पिता च माता च– 'पिता मात्रा वा' (३।१।१२२) इत्यनेन एकशेषः, ततो द्विवचनम्, ओस् ॥६३॥

## अवेर्दुग्धे सोढ-दूस-मरीसम् ॥६।२।६४॥

म० वृ०–अविशब्दाद् [षष्ठ्यन्तात्] दुग्धेऽर्थे 'सोढ दूस मरीमस' इति प्रत्ययाः स्युः। अवेर्दुग्धम्–अविसोढम्, अविदूसम्, अविमरीसम् ॥६४॥

## राष्ट्रेऽनङ्गादिभ्यः ॥६।२।६५॥

म० वृ०–[ राष्ट्रो देशः ] अङ्गादिवर्जितात् [षष्ठ्यन्तात्] नाम्नो [=शब्दात्] राष्ट्रे वाच्ये [देशे वाच्ये] 'यथाविहितमण्' स्यात्। [१]शिबीनां राष्ट्रं =शैबम्, [२]गान्धारम्। अनङ्गेति किम् ? अङ्गानां राष्ट्रं वङ्गानां राष्ट्रमिति वाक्यमेव भवति। अङ्ग, वङ्ग, कलिङ्ग, सुह्म, पुण्ड्र इत्यङ्गादयः प्रयोगगम्याः ॥६५॥

अव०–[१]शिबिराजा, शिबेः राज्ञोऽपत्यानि– 'दुनादिकुर्वित्०' (६।१।११८) इति ञ्यः प्रत्ययः, 'बहुष्वस्त्रियाम्' (६।१।१२४) इत्यनेन ञ्यो लुप्यते, ततः शिबीनां शिब्यपत्यजनानां राष्ट्रं शैबम्। तथा [२]गान्धारस्यापत्यम्– 'अत इञ्' (६।१।३१), ततो गान्धारेः राज्ञोऽपत्यानि गान्धारि (? गान्धारयः), 'साल्वांश०' (६।१।११७) इत्यनेन इञ्, 'अब्राह्मणात्' (६।१।४१) इत्यनेन इञ् लुप्यते, ततो गान्धारीणां राष्ट्रं गान्धारम् ॥६५॥

## राजन्यादिभ्योऽकञ् ॥६।२।६६॥

म० वृ०–राजन्य इत्यादिभ्यो राष्ट्रवाच्ये– 'अकञ्' स्यात्। अणोऽपवादः। राजन्यानां राष्ट्रं= राजन्यकम्[१] ॥६६॥

अव०–राजन्य, दैवयातव, देवयात, आवृत, आजीतक, आव्रीतक, वात्रव, शालङ्कायन, बाभ्रव्य, जालन्धरायण★कौन्ताल, आत्मकामेय, अम्बरीपुत्र, आम्बरीपुत्र, अम्बरीषपुत्र, बैल्ववन, शैलूषज, उदुम्बर, औदुम्बर, तैतल, स्निग्ध, दाक्षि, ऊर्णनाभ, ऊर्णनाभि, आर्जुनायन, विराट, मालव, त्रिगर्त्त इति राजन्यादिगणः। बहुवचनमाकृतिगणार्थम्। [१]राजन्, राज्ञोऽपत्यानि राजन्याः, 'जातौ राज्ञः' (६।१।९२) इति यः प्रत्ययः, राजन्यशब्दः, राजन्यानां राष्ट्रं= राजन्यकम्, 'राजन्यादिभ्योऽकञ्', 'न राजन्यमनुष्ययोरके' (२।४।९४) इति यकारस्य न लोपः ॥६६॥

## वसातेर्वा ॥६।२।६७॥

म० वृ०–वसातिशब्दाद्राष्ट्रे–'अकञ्' वा' स्यात्। वसातीनां राष्ट्रं=वासातकम्, वासातम् ॥६७॥

★ बृहद्वृत्तौ 'जालंधरायणः' इत्यपि।

## भौरिक्येषुकार्यादेर्विधभक्तम् ॥६।२।६८॥

म० वृ०--[१]भौरिकि इत्यादिभ्यः [२]एषुकारि इत्यादिभ्यश्च राष्ट्रेऽर्थे यथासंख्यं 'विधभक्तौ प्रत्ययौ' भवतः। भौरिकीणां राष्ट्रं=भौरिकिविधम्, एषुकारीणां राष्ट्रम्=एषुकारिभक्तम् ॥६८॥

अव०--[१]भौरिकि, भौलिकि, चौपयत, चौदयत, चैटयत, चैकयत, सैकयत, क्षैतयत, काणेय, वालिकाज्य, वाणिजक इति भौरिक्यादिगणः। [२]एषुकारि, सारसायन, चान्द्रायण,-चन्द्रस्यायनं चन्द्रायणम्, तेन निर्वृत्तं तपः चान्द्रायणम्, ताक्ष्र्यायण, द्व्याक्षायण, त्र्याक्षायण, द्व्यक्ष्यायण, त्र्यक्ष्यायण, औलायन, सौवीर, सुवीरो देवताऽस्य स सौवीरः, दासमित्रि, दासमित्रायण, शौद्रकायण, शयण्ड, शायण्ड, शायाण्ड, शायण्डायन, खादायन, गौलुकायन, विश्व, वैश्वधेनव, वैश्वमाणव, वैश्वदेव, तुण्डदेव, तुण्डदेव, शायण्डि, शायण्डि, वायोविद इति एषुकार्यादिगणः। ॥६८॥

## निवासादूरभवे इति देशे नाम्नि ॥६।२।६९॥

म० वृ०--नाम्नो [षष्ठ्यन्तात् इत्यर्थः] निवासादूरभवयोरर्थयो-'यथाविहितं' [१]प्रत्ययः' स्यात्, देशे नाम्नि=प्रत्ययान्तं यदि देशस्य नाम भवति। [२]इतिकरणो विवक्षार्थः। [३]शैबम्, वैदिशं पुरम्, [४]वैदिशो देशः ॥६९॥

अव०--निवासा'० इत्यारभ्य 'अश्वत्थादेरिकण्' (६।२।९७॥ इत्यन्तं यावत् चातुरर्थिकप्रत्ययाधिकारसूत्राणि २८ ज्ञातव्यानि ★। [१]अण् प्रत्यय इत्यर्थः। [२]क्रियतेऽसौ इति करणः शब्दः इत्यर्थः, विवक्षा च कुलवधूरिव न लौकिकीं मर्यादामतिक्रामति, कोऽर्थः? देशनाम प्रसिद्धं लोकरूढं ग्राह्यम्, न गूढम्, इतिकरणो विवक्षार्थः इत्यक्षरार्थे 'तेनानुवृत्ते=व्यवहारमनुपतिते नाम्नि विज्ञेयम्' न सङ्गीते। अस्य भावार्थोऽयम्- सर्वलोकस्य पुत्रपौत्रादिपरम्परया आगते, अत एव व्यवहारमनुपतिते, एवंविधे नाम्नि प्रत्ययो ज्ञेयः, न सङ्गीते, कोऽर्थः? कतिपयजनव्यवहृते। [३]शिवेरपत्यानि-'दुनादि'० (६।१।११८) इति ञ्यः, 'बहुष्वस्त्रियाम्' (६।१।१२४) इति ञ्यो लुप्यते, ततः शिवीनां निवासः=शैबम्। [४]तथा विदिशाया अदूरभवं=वैदिशं नगरम्, एवं वैदिशो देशः, एवं वाराणसी, वरणा च असिश्च, वरणास्योऽदूरभवा=वाराणसी, पृषोदरादित्वात् रस्य दीर्घः, णकारस्य तु ह्रस्वः, अण्, ङी। अङ्ग, वङ्ग, वरणा, मथुरा, उज्जयनी, तक्षशिला, खलतिकादीनां क्षत्रियवृक्षादिवद् देशनगरादौ स्वत एव प्रवृत्तिर्भवति, न प्रत्यययोगात्, अङ्गादिशब्दा देशनगरादौ वर्त्तमाना अपि लिङ्गसंख्यां स्वभावात् लोकरूढ्या वा भजन्ते इत्यर्थः। निवसन्त्यस्मिन् इति निवासः, निवासोदाहरणम्,-शैबम्, एवं शकलायाः=शाकलम्, अथादूरभवोदाहरणम्,-वैदिशो देशः, एवं वाराणसी, व्रीहिमत्या अदूरभवं=व्रैहिमतम्, यवमत्या यावमतम्। इह केचित् अङ्गानां निवास इति वाक्ये अङ्गाः, एवं वङ्गाः, कलिङ्गाः, मगधाः, पुण्ड्राः, कुरवः, पञ्चालाः; वरणानामदूरभवं=वरणा नगरम्, गोदयोर्ह्रदयोर्गोदो ग्रामः, जालपदाया जालपदा, मथुराया मथुरा, उज्जयिन्या उज्जयिनी, गयानां गया, तक्षशिलायाः तक्षशिला, खलतिकं वनानीत्यादिषु प्रत्ययमुत्पाद्य लुपमारभन्ते, सत्यां च लुपि प्रकृतिवत् लिङ्गवचने च मन्यन्ते; तत्सर्वमयुक्तम्, अत्र हि प्रकृतिमात्रमेव देशनाम लोकरूढम्, न प्रत्ययान्तम्। तस्य निवास इत्यादिविवक्षायां तु वाक्यमेव भवति, न प्रत्ययः ॥६९॥

## तदत्रास्ति ॥६।२।७०॥

म० वृ०--तदिति प्रथमान्तान्नाम्नोऽत्रेति सप्तम्यर्थे 'यथाविहितम् [अण्]' प्रत्ययः स्यात्, यत्तत् प्रथमान्तं तच्चेदस्तीति भवति, देशे [१]नाम्नि। उदुम्बरा अस्मिन् देशे सन्ति=औदुम्बरं नगरम्, औदुम्बरो देशः पर्वतो वा ॥७०॥

★ इदं चिन्त्यम्, "नद्यां मतुः" (६।२।७२) इत्यत आरभ्य चातुरर्थिकप्रत्ययाधिकारप्रारम्भात्।

अव०–[1]'देशे नाम्नि', प्रत्ययान्तं चेद् देशस्य नाम भवति, इति सर्वत्रोत्तरसूत्रेषु व्याख्येयम्। तद्-त्रास्ती'– ति, अत्रापि इतिशब्दो विवक्षार्थोऽनुवर्त्तते, तेन लोकरूढो नास्ति वक्ष्यमाणो भूमिनिन्दाप्रशंसादौ चार्थेऽण्, अत एव अण्मतोरुभयप्राप्तौ, 'तद-स्यास्ति०' (७।२।१) इति विहितः परोऽपि मत्वर्थीयप्रत्ययः 'तदत्रास्ति' इत्यनेन बाध्यते इत्यण्, न मतुः ॥ ७० ॥

## तेन निर्वृत्ते च ॥६।२।७१॥

म० वृ०–तेनेति तृतीयान्तात् [नाम्नः] निर्वृत्तमित्यर्थे 'यथाविहितम्' [अण्] प्रत्ययः स्यात्, देशे नाम्नि। कुशाम्बेन निर्वृत्ता=कौशाम्बी, ककन्देन निर्वृत्ता=काकन्दी, माकन्दी, सगरैर्निर्वृत्तः =सागरः [सहस्रेण निर्वृत्ता=साहस्री परिखा]। चकारश्चतुर्णां [1]योगानामुत्तरत्र [उत्तर सूत्रेषु] अनुवृत्त्यर्थः, तेनोत्तरे [वक्ष्यमाणाः] प्रत्यया [2]यथायोगं चतुर्ष्वर्थेषु भवन्ति ॥७१॥

अव०–[1]युज्यन्ते प्रत्ययेन सह इति योगाः अर्थाः सूत्राणि वा, अत्र अर्थापेक्षया योगानामिति ज्ञातव्यम्, कोऽर्थः चतुर्णां योगानां=चतुर्णामर्थानां निवासः १ अदूरभवः २ अस्मिन् सन्ति ३ तेन निर्वृत्तम् ४ इतिरूपाणामित्यर्थः। यथायोगम्, कोऽर्थः? चतुरर्थमध्यात् यः कश्चिदर्थो घटते तेनार्थेन वाक्यं कृत्वा प्रत्ययाः कर्त्तव्याः ॥७१॥

## नद्यां मतुः ॥६।२।७२॥

म० वृ०–तस्य निवासः, १ तस्यादूरभवः, २ तदत्रास्ति ३ तेन निर्वृत्तं ४ चेति चतुरर्थेषु यथायोगं 'मतुः' प्रत्ययः स्यात्, नद्यां देशे नाम्नि=प्रत्ययान्तं चेन्नदीविषयं A[नदीनाम्ना] देशस्य नाम भवति। Aनदीनामेत्यर्थः। [1]अणोऽपवादः। उदुम्बरा अस्यां सन्ति=[2]उदुम्बरावती नदी, [3]पुष्करावती, [4]मशकावती, [5]इक्षुमती, शरावती, [इरावती,] भगीरथेन निर्वृत्ता =भागीरथी ['तेन निर्वृत्ते' अण्], [6]जाह्नवी [सात्वा-स्तवी]। अमत्वन्तान्येव भागीरथ्यादीनि नदीनामानि इति मतुर्न भवति [किन्तु अणेव भवति ।७२।

अव०–[1]निवासादूरभवे इत्युक्तागः। [2]उदुम्बरावतीपुष्करावतीमशकावतीशरावतीषु 'अनजिरादिबहुस्वरशरा०' (३।२।७६) इत्यादीना दीर्घो भवति। [3]पुष्कराण्यत्र सन्ति। [4]मशका अत्र सन्ति। [5]इक्षवः सन्ति अस्याम्, 'नोर्म्यादिभ्यः' (२।१।९९) इत्यनेन मकारस्य वकारो न भवति। [6]जह्नुना निर्वृत्ता=जाह्नवी, 'तेन निर्वृत्ते च' इत्यण् ॥७२॥

## मध्वादेः ॥६।२।७३॥

म० वृ०–मध्वादिभ्यश्चातुरर्थिको [1]मतुः स्याद्, देशे नाम्नि। [अणोऽपवादः] अनयर्थआरम्भः। [2]मधुमान्, [[2]बिसवान्] [3]स्थाणुमान् ॥७३॥

अव०–[1]चतुर्ष्वर्थेषु भवश्चातुरर्थिकः, 'अध्यात्मादिभ्य इकण्' (६।३।७८)। [2]मधूनि सन्त्यत्र= मधुमान्। एवं [2]बिसानि [3]स्थाणूनि अत्र सन्ति। मधु, बिस, स्थाणु, ऋषि, इक्षु, वेणु, कर्कन्धु, कर्कन्धू, शमी, करीर, हिम, किसर, सार्पण, रुवत्, पार्दा, कीशरु, इष्टका, पार्गाकी, शरु, शुक्ति, आसुति, सुत्या, आसंदी, शकली, वेट, पीडा, अक्षशिळ, अक्षशिळा, तक्षशिळा, आमिषी इति मध्वादिगणः ॥७३॥

## नड-कुमुद-वेतस-महिषाड्डित् ॥६।२।७४॥

म० वृ०–नडादिभ्यो 'मतुः' स्यात्, स च डित्, चातुरर्थिकः, देशे। नड्वान्, कुमुद्वान्, वेतस्वान्, महिष्मान् देशः, तत्र भवा=माहिष्मती नगरी ॥७४॥

अव०–'निवासा०' (६।२।६९) इत्यण्, 'नड-शादा०' (६।२।७५) इति वलः, 'कुमुदादेरिकः' (६।२।९६), इति अण्– वल– इकबाधको 'नडकुमुदवेतस०' इति योगः ॥७४॥

## नड-शादाड्वलः ॥६।२।७५॥

म० वृ०–नडशादाभ्यां 'वलः' स्यात्, स च डित्, चातुरर्थिकः। नड्वलम्, शाद्वलम् ॥७५॥

## शिखायाः ॥६।२।७६॥

म० वृ०—शिखाशब्दाद् 'वलः' स्याच्चातुरर्थिकः, देशे नाम्नि । पृथग्योगाड्डिदिति निवृत्तम् । शिखावलं नाम पुरम् ॥७६॥

## शिरीषादिक-कणौ ॥६।२।७७॥

म० वृ०—शिरीषादिकप्रत्ययः कण् प्रत्ययश्च स्याच्चातुरर्थिकः, देशे नाम्नि । शिरीषिकः [इक], शैरीषकः [कण्] ॥७७॥

अव०—शिरीषवृक्षाणामदूरभवो ग्रामः=शिरीषिकः, शैरीषकः ॥७७॥

## शर्कराया इकणीयाण् च ॥६।२।७८॥

म० वृ०—शर्कराशब्दात् 'इकण्, ईय, अण्, चकारात् इक 'कण्' भवन्ति, चातुरर्थिकः, देशे नाम्नि । शर्करा अस्मिन् देशे सन्ति=शार्करिकः, शर्करीयः, शार्करः, शर्करिकः, शार्करकः ['ङ्यापो बहुलं नाम्नि' इतीदूतः के' (२।४।१०४) इति ह्रस्वत्वम् ] ॥७८॥

## रोऽश्मादेः[1] ॥६।२।७९॥

म० वृ०—अश्मादिभ्यो 'रः' प्रत्ययश्चातुरर्थिकः स्याद् देशे । [2]अश्मरः ॥७९॥

अव०—[1]अश्मन्, यूष, ऊष, यूथ, मीन, गुद, दर्भ, कूट, गुहा, वृन्द, नग, कण्ड, गह्व, कन्द, पामन् इत्यस्मादिगणः । [2]अश्मनां निवासः ॥७९॥

## प्रेक्षादेरिन् ॥६।२।८०॥

म० वृ०—प्रेक्षादिभ्य 'इन्' स्यात्, चातुरर्थिको देशे । [1]प्रेक्षी, [2]फलकी ॥८०॥

अव०—[1]प्रेक्षया निर्वृत्तम्, [2]फलकैर्फलकाभिः (वा) निर्वृत्तमिति वाक्यम्, तत इन् । प्रेक्षा, फलका, बन्धुका, ध्रुवका, धुवका, क्षिपका, कूप, सुक, [धुक, पुक, ऽकट, कङ्कट, सङ्कट, मह, गर्त्त, न्यग्रोध, परिवार, हिरण्य इति प्रेक्षादि ॥८०॥

## तृणादेः सल् ॥६।२।८१॥

म० वृ०—तृणादिभ्यः 'सल्' चातुरर्थिकः स्यात्, देशे । [1]तृणसा ॥८१॥

अव०—तृण, नद, जन, पर्ण, वर्ण, अर्णस्, अर्णशब्दोऽकारान्तोऽप्यस्ति, वरण, बिल, तुस, वन, पुल इति तृणादिगणः । [1]तृणान्यत्र सन्ति=तृणसा, आप् ॥८१॥

## काशादेरिलः ॥६।२।८२॥

म०वृ०—काशादिभ्यश्चातुरर्थिकः 'इलः' स्यात्, देशे । काशिलम्[1] ॥८२॥

अव०—काश, वाश, अश्वत्थ, पलाश, पीयुक्षा, पाश, विश, तृण, नल, वन, नलवन, कर्दम, कर्पूर, बर्बर, वतुंल शीपाल, कण्टक, गुहा, कपित्थ इति काशादिगणः । [1]काशाः सन्त्यत्र काशिलम् । (एवम्) वाशाः सन्त्यत्र वाशिलम् ॥८२॥

## अरीहणादेरकण् ॥६।२।८३॥

म० वृ०—अरीहणादिभ्योऽकण् स्याच्चातुरर्थिकः, देशनाम्नि । [1]आरीहणकम् ॥८३॥

अव०—[1]अरीणामी (?अरीणां) हनः, 'पूर्वपदस्था०' (२।३।६४) इति णत्वम्, अरीहणा अत्र सन्ति अरीहणैर्निर्वृत्तम्=आरीहणकम् । अरीहण, खण्डु, खण्डू, द्रुवण, किरण, रुदिर, भगल, भलन्दन, उलुन्द, खाबरायण, खापुरायण, खानुरायण, कौष्ठायन, कौद्रायण, भास्त्रायण, त्रैगर्त्तायन, रैवत, रायस्पोष, विपथ, विपाश, उद्दण्ड, उदञ्चन, ऐडायन, जाम्बवत, जाम्बवत, शिंशपा, वीरण, (धौमतायन) यज्ञदत्त, सुयज्ञ, बधिर, बिल्व, जम्बू, (साम्बुरायण, सौशायन, सौमायन, शाण्डिल्यायन, श्विरायणि, साम्बरायण,) कश, सुशर्मन् इति अरीहणादिगणः ॥८३॥

## सुपन्थ्यादेर्ञ्यः ॥६।२।८४॥

म० वृ०—सुपन्थिन् इत्यादिभ्यो 'ञ्यः' स्यात्, चातुरर्थिकः, देशे नाम्नि । [1]सौपन्थ्यम्, साङ्काश्यम्, काम्पील्यम् ॥८४॥

अव०—सुपन्थिन्, सुवन्थिन्, सङ्काश, कम्पील, सुपरि, यूप, अश्मन्, अश्व, अङ्ग, नाथ, (कुण्ट,) कुट, कूट, मादित, मृष्टि, आगस्त्यA, शूर, विरन्त, विकर, नासिका, प्रगदिन्, मगदिन्, कटिद, कटिप, कटिव, चूदार, मदार, मजार, कोविदार, कश्मीर, शूरसेन, कुम्भ, सीर, सर, कसमल, अंस, नासा, रोमन्, लोमन्, तीर्थ, पुलीन, मलिन, अगस्ति, सुपथिन्, दश, नल, सकर्ण, कलिव इति सुपन्थ्यादिगणः। A 'अगपुलाभ्याम् [स्तम्भेर्डित्' (उ०३६३) इति डिद्यः] अगस्त्यः, अगस्त्यस्यापत्यम् 'ऋषि०'(६।१।६१) अण्। 'सुपथिन्, सुपथोऽदूरभवं=सौपन्थ्यम्, सौवन्थ्यम्, 'सुपन्थ्यादेर्ण्यः', सुपथिन्शब्दस्य अत एव निपातनात् पकारात् परो नोऽन्तः, पकारस्य विकल्पेन वकारः इति प्रयोगद्वयम्- सौपन्थ्यम्, सौवन्थ्यम्॥८४॥

## सुतङ्गमादेरिञ् ॥६।२।८५॥

म० वृ०–सुतङ्गमादिभ्यश्चातुरर्थिक 'इञ्' स्यात् देशे। सौतङ्गमिः, मौनिचित्तिः ॥८५॥

अव–सुतङ्गम, मुनिचित्त, विप्रचित्त, महाचित्त, महापुत्र, शुक्र, श्वेत, विग्र, श्वन्, विप्रश्वन्, अर्जुन, आजिर, गदिक, बीज, वाप, बीजवाप, कर्ण इति सुतङ्गमादिगणः ॥८५॥

## बलादेर्यः ॥६।२।८६॥

म० वृ०–बलादिभ्यश्चातुरर्थिको 'यः' स्याद् देशे नाम्नि। [बलेन निर्वृत्तं=]बल्यम् ॥८६॥

अव०—बल, पुल, मुल, उल, कुल, दुल, नल, दल, उरल, लकुल, वन इति बलादिः।✽कच्छप तृण खण्ड वनं जलं काननं वा (?) ॥८६॥

## अहरादिभ्योऽञ् ॥६।२।८७॥

म०वृ०–अहन्[१] इत्यादिभ्यश्चातुरर्थिकः 'अञ्' स्यात् देशे। आह्नम[१]। अहन्, लोमन्, वेमन्, गङ्गा इत्यहरादिराकृतिगणः ॥८७॥

अव० [१]अहन्, अह्ना निर्वृत्तम्= आह्नम, 'अहरादिभ्योऽञ्','अनीनादट्यह्नो०'(७।४।६६) इत्यनेन हकारस्य अकारलोपः। अत्र 'इकण्'-पादोक्तेन 'निर्वृत्ते'(६।४।१०५) इति सूत्रेणापि इकण् प्राप्नोति, 'अहरादिभ्यो० इत्युक्तोऽयमञ् चातुरर्थिको देशे नाम्नि विहित इति अनेन अञा सामान्यकाले विहितो 'निर्वृत्ते' (६।४।१०५) इति इकण् बाध्यते ॥८७॥

## सख्यादेरेयण् ॥६।२।८८॥

म०वृ०–[सखि आदिर्यस्य]सखि इत्यादिभ्यश्चातुरर्थिको देशे 'एयण्' स्यात्। साखेयः ॥८८॥

अव०– सखि, सखिदत्त, दत्त, (अग्नि) अग्निदत्त, (वादस्त) वायुदत्त, गोफिल, भल्ल, भल्लिपाल, चक्र, चक्रवाक, छगल, अशोक, सीरक, सरक, वीर, वीरसरस, समल, रोह, तमाल, कदल, करवीर, सुरस, सरम, सपूल इति सख्यादिगणः ॥८८॥

## पन्थ्यादेरायनण् ॥६।२।८९॥

म० वृ०–पन्थ्यादिभ्यश्चातुरर्थिक 'आयनण्' स्याद् देशनाम्नि। पान्थायनः ['नोऽपदस्य तद्धिते' (७।४।६१) इत्यन्त्यस्वरादेर्लुक्] पथिन्शब्दस्य प्रत्यययोगे पकारात्परो नागमोऽत एव निपातनात् ॥ ८९ ॥

अव०–पथिन्, पक्ष, तुष, अण्डक, बलिक, पाक, चित्र, चित्रा, (अतिश्व) कुम्भ, सीरक, लोमन्, रोमन्, लोमक, हंसक, सकर्ण, (सकर्णक) सरक, सहक, सरस, समल, अंशुक, कुण्ड, यमल, हस्त, हस्तिन्, सिंहक इति पन्थ्यादि ॥८९॥

## कर्णादेरायनिञ् ॥६।२।९०॥

म० वृ०–कर्णादिभ्यश्चातुरर्थिक 'आयनिञ्' स्याद् देशे। [१]कार्णायनिः ॥९०॥

✽ 'कच्छ' इत्याद्यवचूरिः वृत्तिस्थं कं शब्दमाश्रित्य प्रदर्शितेति न ज्ञायते।

प्रव०—कर्ण, वसिष्ठ, अर्क, लुस, अर्कलुस, द्रुपद, आनडुह्य, पाञ्चजन्य, (स्फिग्, स्फिज,) कुलिश, आकनीकुम्भ, जित्वन्, जित्य, जैत्र, आण्डीवत्, जोवन्त इति कर्णादि । [१]अस्त्यर्थे, निवासे, निर्वृते वार्थे वाक्ये कार्णायनिः साध्यते ॥९०॥

## उत्करादेरीयः ॥६।२।९१॥

म० वृ०—उत्करादिभ्य 'ईयः' स्याच्चातुरर्थिको देशे । उत्करीयः, सङ्करीयः ॥९१॥

प्रव०—उत्कर, सङ्कर, सम्पर, सम्पल, संकर, संफल, (संफुल) पिप्पल, मूल, पिप्पलमूल, अर्क, अश्मन्, सुवर्ण, सुपर्ण, हिरण्यपर्ण, इडा, अजिर, इडाजिर, अग्नि, तिक, कितव, आतप, अनेक, पलाश, एकपलाश, अनेकपलाश, अंशक, पिचुक, अश्वत्थ, काश, भस्त्रा विशाल, शाला अरण्य, अजिन, जन्यजनक, नितान्त, वृक्ष, नितान्तवृक्ष, आर्द्रवृक्ष, इन्द्रवृक्ष, अग्निवृक्ष, मन्त्रणार्ह, अरीहण, वातागार, विजिगीषा, (संस्रव, रोहिद्रर्त, नीवापक,) अणक, निशात, खल, जिन, वैराणक, (अवरोहित) Aजन्य, (इन्द्रधर्म,) गर्त्त इत्युत्करादि । Aजनीं वधूं वहति—'हृद्यपद्य'० (७।१।११) इति यः ॥९१॥

## नडादेः कीयः ॥६।२।९२॥

म० वृ०—नडादिभ्यः 'कीयः' स्याच्चातुरर्थिकः देशे नाम्नि । नडकीयः ॥९२॥

प्रव०—नड, प्लक्ष, बिल्व, वेणु, वेत्र, वेतस, त्रि, तक्षन्, इक्षुकाष्ठ, कपोत, क्रुञ्च इति नडादिगणः ॥९२॥

## कृशाश्वादेरीयण् ॥६।२।९३॥

म० वृ०—कृशाश्वादिभ्यश्चातुरर्थिक 'ईयण्' स्याद् देशे । कार्शाश्वीयः, आरिष्टीयः ॥९३॥

प्रव०—कृशाश्व, अरिष्ट, विशाल, रोमक, लोमक, रोमश, शवल, कूट, पूगार, शूकर, धूकर, पूकर, सन्दश, सदश,............(पूरगा, पूरत्रा,) धूम, धूम्र, विनत, अयस्, उरस्, सायस्, इरस्, अरुष्य, ऐरास, इर, आस, मुद्गल, मौद्गल्य, सुवर्चल, प्रतर, अजिन, अभिजन, अवनत, विकुट्यास कुश, पराशर इति कृशाश्वादिगणः ॥९३॥

## ऋश्यादेः कः ॥६।२।९४॥

म० वृ०—ऋश्यादिभ्यः 'कः' स्याच्चातुरर्थिको देशे नाम्नि । ऋश्यकः, न्यग्रोधकः ॥९४॥

प्रव०—ऋश्य, न्यग्रोध, शर, निलीन, निवात, सित, नद्ध, निनद्ध, (परिगूढ,) उपगूढ, उत्तर, अश्मन्, स्थूल, बाहु, स्थूलबाहु, खदिर, अनडुह, खण्डु, वीरण, कर्दम, शर्करा, निबन्ध, अशनि, खण्ड, दण्ड, वेणु, परिवृत, वेश्मन्, अंशु इति ऋश्यादिगणः ॥९४॥

## वराहादेः कण् ॥६।२।९५॥

म० वृ०—वराहादिभ्यश्चातुरर्थिकः 'कण्' स्याद् देशे । वाराहकम्, पालाशकम् ॥९५॥

प्रव०—वराह, पलाश, विनद्ध, निबद्ध, स्थूल, बाहु, स्थूलबाहु,................(खदिर, विदग्ध, विजग्ध, विभग्न, विभक्त, पिनद्ध, निमग्न इति वराहादिः ॥९५॥

## कुमुदादेरिकः ॥६।२।९६॥

म० वृ०—कुमुदादिभ्य 'इकः' स्याच्चातुरर्थिकः देशे । [१]कुमुदिकम् ॥९६॥

प्रव०—[१]कुमुदान्यत्र सन्ति । एवमिक्कटिकम्, कुमुद, इक्कट, कङ्कट, सङ्कट, गर्त्त, निर्यास, परिवाप, कूप, अश्वत्थ, न्यग्रोध, बीज, दश, शाल्मलि, मुनि, (स्थल,) ग्राम इति कुमुदादिगणः ॥९६॥

## अश्वत्थादेरिकण् ॥६।२।९७॥

म० वृ०—अश्वत्थादिभ्यश्चातुरर्थिक 'इकण्' स्याद् देशे । [१]आश्वत्थिकम्, [१]कौमुदिकम् । इति चातुरर्थिकाधिकारः सम्पूर्णः ॥९७॥

प्रव०—अश्वत्थ, कुमुद, गोमठ, रथकार, दान,

ग्राम, शाल्मलि, मुनि, स्थल, मुनिस्थल, कूट, मुचुकर्ण, मुचुकूर्णि, कुण्डल, शुचिकर्ण इति अश्वत्थादिगणः । [1]उभयोरपि अस्त्यर्थे बहुत्वे वाक्यं कर्त्तव्यम् ॥९७॥

## साऽस्य पौर्णमासी ॥६।२।९८॥

म० वृ०–सेति प्रथमान्तादस्येति षष्ठ्यर्थे 'यथाविहितं' ['प्राग् जितादण्' (६।१।१३) ] प्रत्ययः स्यात् , यत्तत् प्रथमान्तं तच्चेत् पौर्णमासी भवति। पौषी पौर्णमासी अस्य=पौषो मासः, पौषोऽर्द्धमासः, एवं माघः इति । नाम्नीत्येव– [2]पौषी [1]पौर्णमासी ॥ ९८ ॥

---

अव०–[1]माति मिमीते वा इति मास् , 'अस्' (उ० ९५२) इत्युणादिसूत्रेण अस् , मास् शब्दः, पूर्णश्चासौ माश्च पूर्णमाः, पूर्णमाश्चन्द्रोऽस्यामस्ति इति वाक्ये 'पूर्णमासोऽण्' (७।२।५५) इत्यण् , पौर्णमासः, ङी– पौर्णमासी, अथवा पूर्णमास इयं पौर्णमासी, 'तस्येदम्' (६।३।१६०) इत्यण् , यद्वा पूर्णो मा मासो वा अस्याम , पूर्णमासा वा युक्ता, 'साऽस्य पौर्णमासी' ( ६।२।९८ ) इति पाठबलात् अण् ,ङी। 'साऽस्य०'(६।२।९८) इति सूत्रे इतिशब्दो नाम्नि इति च द्वयमनुवर्त्तते। देशे इति निवृत्तम्। अत्रापि इतिशब्दो विवक्षार्थः । तेन मासे अर्द्धमासे वा संवत्सरपर्वणो वाऽर्थेऽण् प्रत्ययः। तथा नाम्नि, कोऽर्थः ? प्रत्ययान्तं चेन्नाम भवति । तथा [2]'पुषंच् पुष्टौ', पुष्यन्त्यस्मिन् कार्याणीति पुष्यम् , 'कुप्यभिद्य०' (५।१।३९) इति क्यप् , पुष्येण चन्द्रयुक्तेन युक्ता पौर्णमासी=पौषी, 'चन्द्रयुक्तात्काले०' (६।२।६) इति अण् ,'तिष्यपुष्ययोर्भाणि' (२।४।९०) इत्यनेन यकारलोपः, ततो ङी, तदनन्तरं पौषी पौर्णमासी अस्य स पौषो मासः, अण् , प्रथमासिः, पौषो मासः ; एवं माघवैशाखाषाढादिसिद्धिः ।९८।

## आग्रहायण्यश्वत्थादिकण् ॥६।२।९९॥

म० वृ०–आग्रहायणी–अश्वत्थाभ्यां [शब्दाभ्यां परतः] [1]सेति प्रथमान्ताभ्यां [2]अस्येति षष्ठ्यर्थे 'इकण्' स्यात् । प्रथमान्तं चेत्पौर्णमासी । [नाम्नि, कोऽर्थः ? प्रत्ययान्तं यदि नाम भवति इत्यर्थः] [3]आग्रहायणी पौर्णमासी अस्य=आग्रहायणिको मासार्द्धः मासो वा। [4]एवमाश्वत्थिको मासोऽर्द्धमासो वा ॥९९॥

---

अव०–[1]स, पञ्चमीङसि, [2]अस्य, सप्तमीङि, सूत्रत्वात् ङसिङिलोपः । [3]जहाति जिहीते वा भावान् इति हायनो वत्सरः, 'हः कालव्रीह्योः' (५।२६८) इति टनण् , 'आत ऐः कृञ्चौ' (४।३।५३) ऐः, अग्रं हायनस्य, 'पूर्वपदस्था०' (२.३.६४) इत्यनेन नस्य णः,..........(अग्रहायण एव इति) वाक्ये 'प्रज्ञादिभ्योऽण्' (७।२।१६५), ङी, आग्रहायणीशब्दः । [4]तथा अश्वत्थमश्विनीनक्षत्रन् , अश्वत्थेन= अश्विनीनक्षत्रेण चन्द्रयुक्तेन युक्ता रात्रिः=अश्वत्था, 'श्रवणाश्वत्थान्नाम्न्यः, (६।२।८) इति अप्रत्ययः, अश्वत्था पौर्णमासी अस्य=आश्वत्थिकः । आग्रहायणो मार्गशीर्षमासपूर्णिमा उच्यते । आश्विनमासस्य पूर्णिमा अश्वत्था इत्युच्यते इत्यर्थः ॥९९॥

## चैत्री-कार्त्तिकी-फाल्गुनी-श्रवणाद्वा ॥६।२।१००॥

म० वृ०–एभ्य 'इकण्' वा स्यात् , 'साऽस्य पौर्णमासी' (६।२।९८) इति विषये, नाम्नि । चैत्री पौर्णमासी अस्य=[1]चैत्रिकः चैत्रो मासोऽर्द्धमासो वा । एवं [2]कार्त्तिकिकः,कार्त्तिकः। [3]फाल्गुनिकः,फाल्गुनः। श्रवणा पौर्णमासी अस्य=[4]श्रावणिकः,श्रावणः ।१००।

---

अव०–[1]चित्राभिश्चन्द्रयुक्ताभियुक्ता पौर्णमासी=चैत्री, एवं [2]कृत्तिकाभिः [3]फाल्गुनीभिः [4]श्रवणेन चन्द्रयुक्ताभिर्युक्ता पौर्णमासी– 'चन्द्रयुक्तात् काले०' (६।२।६) इत्यण् , ङी, पश्चात् चैत्री कार्त्तिकी फाल्गुनी श्रवणा पौर्णमासी अस्य इति वाक्ये 'चैत्रीकार्त्तिकी०' (६।२।१००) इति इकण् , पक्षे सा-ऽस्य पौर्णमासी (६।२।९८) इति अण् ।१००।

## देवता ॥६।२।१०१॥

म० वृ०–सेति प्रथमान्तादस्येति षष्ठ्यर्थे 'यथाविहितं' प्रत्ययः [ अण् ]स्यात् , चेत्प्रथमान्तं

देवता भवति । अर्हन् देवता अस्य=आर्हतः, [जिनो देवता अस्य=] जैनः, आग्नेयो विप्रः, ऐन्द्रो मन्त्रः ॥१०१॥

अव० 'देवता' इति सूत्रे सास्येत्यनुवर्त्तते, ततः सेति प्रथमान्तात् नाम्नः परात् अस्येति षष्ठयर्थ इति सूत्रार्थ उपपन्नः ॥१०१॥

## पैङ्गाक्षीपुत्रादेरीयः ॥६।२।१०२॥

म०वृ०-पैङ्गाक्षीपुत्रादिभ्य 'ईयः' स्यात् । सास्य देवता इति विषये नाम्नि । [१]पैङ्गाक्षीपुत्रो देवता अस्य पैङ्गाक्षीपुत्रीयं हविः पैङ्गाक्षीपुत्रादिगणः प्रयोगतो ज्ञातव्यः ॥१०२॥

अव०-[१]पिङ्गे अक्षिणी यस्य=पिङ्गाक्षः,'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) इत्यनेन टः प्रत्ययः समासान्तः, पिङ्गाक्षस्यापत्यं वृद्धं स्त्री-'अत इञ्' (६।१।३१), 'अनार्षे०' (२।४।७८) इत्यनेन ष्य आप्, पैङ्गाक्ष्यायाः पुत्रः-'ष्या पुत्रपत्योः केवलयोरीच् तत्पुरुषे' (२।४।८३) इत्यनेन ईच्, अन्तरापत्ये वा इञ्, 'नुर्जातेः' (२।४।७२) ङी, पैङ्गाक्ष्याः पुत्रः= पैङ्गाक्षीपुत्रः ॥१०२॥

## शुक्रादियः ॥६।२।१०३

म०वृ०-शुक्रात् 'इयः' स्यात्, सास्य देवताविषये । शुक्रियोऽध्यायः ॥१०३॥

## शतरुद्रात्तौ ॥६।२।१०४॥

म० वृ०-शतरुद्रात् 'तौ ईय-इयौ' भवतः, सास्य देवतार्थे । [१]शतरुद्रीयम्, शतरुद्रियम् ॥१०४॥

अव०-[१]शतं संख्या येषाम्- 'मयूरव्यंसके०' (३।१।११६) इति समासः, शतसङ्ख्या रुद्राः=शतरुद्राः, शतरुद्रा देवता अस्य=शतरुद्रीयम् ॥१०४॥

## अपोनपादपान्नपातस्तृ चातः ॥६।२।१०५॥

म०वृ०-[१]अपोनपात्- [२]अपान्नपातशब्दाभ्याम् 'ईय-इयौ' भवतः, साऽस्य देवताविषये, तद्योगे चानयोराकारस्य (? आच्छब्दस्य) 'तृ' इत्यादेशः । अपोनपाद् देवता अस्य=अपोनप्त्रीयम्, अपोनप्त्रियम् । अपान्नप्त्रीयम्, अपान्नप्त्रियम् ॥१०५॥

अव०-[१]अपकृतमूनं यस्य=अपोनम्, अपोनं पातयति=अपोनपात्, क्विप्, 'णेरनिटि' (४।३।८३) । [२]तथा न पातीति नखादित्वान्नकारलोपाभावः, ततोऽपां नपात्, षष्ठयलुप् समासः (अपान्नपात्), अत एव निर्देशात् याजकादित्वाद्वा समासः, 'षष्ठयाः क्षेपे' (३।२।३०) इति आमो न लुप् । अपोनपात् अपान्नपात्शब्दयोः पात्सम्बन्ध्याकारस्य (? आच्छब्दस्य) ॥ १०५ ॥

## महेन्द्राद्वा ॥६।२।१०६॥

म० वृ०-महेन्द्रात् सास्य देवतार्थे- 'ईय- इयौ' भवतः वा । महेन्द्रीयम्, महेन्द्रियम्; पक्षे माहेन्द्रम् ॥१०६॥

## क-सोमाट्ट्यण् ॥६।२।१०७॥

म० वृ०-[१]कशब्दात् सोमाच्च सास्य देवतेति विषये 'ट्यण्' स्यात् । अणोऽपवादः । को-ब्रह्मा देवता अस्य=[२]कायं हविः, कायी इष्टिः ; [३]सौम्यं सूक्तम्, सौमी ऋक् ॥१०७॥

अव०-[१]कायति इति कः, क्वचित् डः । [२]कशब्दं प्रति णित्त्वस्य वैयर्थ्यात् अलोपो न भवति । [३]सोमो देवता अस्य=सौम्यम् ॥१०७॥

## द्यावापृथिवीशुनासीरा-ऽग्नीषोम-मरुत्वद्-वास्तोष्पति-गृहमेधादीययौ ॥६।२।१०८॥

म० वृ०-एभ्यः साऽस्य देवतेति विषये 'ईयप्रत्यय-यप्रत्ययौ भवतः । [१]द्यावापृथिवीयम्, द्यावापृथिव्यम्; [२]शुनासीरीयम, शुनासीर्यम्; [३]अग्नीषोमीयम, अग्नीषोम्यम्; [४]मरुत्वतीयम्, मरुत्वत्यम्; [५]वास्तोष्पतीयम्, वास्तोष्पत्यम्; [६]गृहमेधीयम्, गृहमेध्यम् ॥१०८॥

अव०-[प्राग् जितादण् (६।२।१३) ] 'अनिदम्य'० (६।१।१५) इति औत्सर्गिकाणञ्ययोर्बाधकं

'द्यावापृथिवी०' इति वचनम्। [1]द्यौश्च पृथिवी च- 'दिवो द्यावा' (३।२।४४) इति सूत्रेण द्यावादेशः, द्यावापृथिव्यौ देवता अस्य=द्यावापृथिवीयम्। [2]शुनश्च वायुः सीरश्चादित्यः=शुनासीरौ, 'वेदसहश्रुत'० (३।२।४१) इत्यनेन आत्वम्, तौ देवता अस्य= शुनासीरीयम्। [3]अग्निश्च सोमश्च=अग्निषोमौ देवता अस्य। [4]मरुत्वान् देवता अस्य=मरुत्वतीयम्। [5]वास्तोष्पतिः शक्रो देवता अस्य। [6]गृहमेधते- 'कर्मणोऽण्' (५।१।७२), गृहमेधो देवताऽस्य ॥१०८॥

## वाय्वृतुपित्रुषसो यः ॥६।२।१०८॥

म० वृ०-वायु-ऋतु-पितृ-उषस्भ्यः साऽस्य देवतेति विषये 'यः' स्यात्। [अणोऽपवादः] वायुर्देवता अस्य=वायव्यम्, [1]ऋतव्यम्, [2]पित्र्यम्, [3]उषस्यम् ॥१०९॥

---

प्रव०-[1]ऋतवो देवता अस्य। [2]पितरो देवता अस्य=पित्र्यम्, 'ऋतो रस्तद्धिते' (१।२।२६) रः। [3]उषो (? उष) उषा वा देवता अस्य, सन्ध्यावाचकः स्त्रीक्लीबः प्रभातवाचकस्तु नपुंसकः ॥१०९॥

## महाराज-प्रोष्ठपदादिकण् ॥६।२।११०॥

म० वृ०-आभ्यां साऽस्य देवतेति विषये 'इकण्' स्यात्। [1]माहाराजिकः, माहाराजिकी; [2]प्रोष्ठपदिकः, प्रोष्ठपदिकी ॥११०॥

---

प्रव०-[1]महाराजो देवविशेषो न तु राजा, (महाराजो) देवता अस्य=माहाराजिकः। [2]प्रोष्ठो गौः, तस्येव पादौ यस्य- 'सुप्रात'० (७।३।१२९) इति डे (प्रोष्ठपदः) ॥११०॥

## कालाद्भववत् ॥६।२।१११॥

म०वृ०-कालविशेषवाचिभ्यो नामभ्यो 'यथा भवेऽर्थे प्रत्यया वक्ष्यन्ते तथा साऽस्य देवतेऽर्थे (?देवतार्थे) भवन्ति। यथा मासे भवं=[1]मासिकम्, [2]सांवत्सरिकम्, (हैमनम्,[3]) वासन्तम्[4], [5]प्रावृषेण्यम्, तथा मासो देवता अस्य=मासिकम्, सांवत्सरिकम्, हैमनम्, वासन्तम्, प्रावृषेण्यम् ॥१११॥

प्रव०-'कालाद्भववत्' अत्र सूत्रे वत् प्रत्ययः सर्वसादृश्यार्थः। तेन यकाभ्यः प्रकृतिभ्यो येन विशेषणेन ये प्रत्यया भवेऽर्थे भवन्ति ताभ्य एव प्रकृतिभ्यस्तेनैव विशेषणेन त एव प्रत्यया इह भवन्ति। यथा मासे भवं मासिकमित्यादि। [1]मासे भवं मासिकम्, 'वर्षाकालेभ्यः' (६।३।८०) इत्यनेन इकण्। [2]संवत्सरे भवम्- 'वर्षा'० इकण्। [3]हेमन्त, हेमन्ते भवं=हैमनम्, 'हेमन्ताद् वा तलुक् च' (६।३।९१) इत्यण्, तकारस्य लोपः। [4]वसन्ते भवं=वासन्तम्। [5]प्रावृषि भवम्- 'प्रावृष एण्यः' (६।३।९२) ॥१११॥

## आदेश्छन्दसः [1]प्रगाथे ॥६।२।११२॥

म० वृ०-[2]प्रथमान्ताद्[3]आदेश्छन्दसः अस्येति षष्ठ्यर्थे प्रगाथे वाच्ये 'यथाविहितं' प्रत्ययः स्यात्। पङ्क्तिरादिरस्य गाथस्य=पाङ्क्तः[4]प्रगाथः। आदेरिति किम्? अनुष्टुब् मध्यमस्य प्रगाथस्य ॥११२॥

---

प्रव०-[1]यत्र द्वे ऋचौ प्रग्रन्थनेन=प्रकृष्टरचनाविशेषेण प्रकर्षगानेन वा, प्रकर्षगानेन (इति) कोऽर्थः? उच्चारविशेषेण, तिस्रः क्रियन्ते स मन्त्रविशेषः प्रगाथ इत्युच्यते। [2]'आदेश्छन्दसः'० इति सूत्रे सेति प्रकृतिः अस्येति प्रत्ययार्थश्चानुवर्त्तेते, तयोर्यथाक्रमं विशेषणौ आदेश्छन्दस इति प्रगाथ इति च, ततोऽयं सूत्रार्थः- सेति प्रथमान्तादादेरित्यादि। [3]आदिभूतात्, प्रकृतिविशेषणम्। [4]एवमानुष्टुभः, जागतः ॥११२॥

## योद्धृप्रयोजनाद् युद्धे ॥६।२।११३॥

म० वृ०-सेति प्रथमान्ताद् योद्धृवाचिनः प्रयोजनवाचिनश्च अस्येति षष्ठ्यर्थे युद्धे वाच्ये 'यथाविहितं' ['प्राग् जितादण्' (६।१।१३)] प्रत्ययः स्यात्। विद्याधरा योद्धार अस्य युद्धस्य=वैद्याधरं युद्धम्, भारतं युद्धम्। प्रयोजनं प्रवृत्तिसाध्यं फलम्। सुभद्रा प्रयोजनमस्य युद्धस्य=सौभद्रं युद्धम्। सौतारम् ॥११३॥

---

प्रव०-योद्धृप्रयोजनादिति किम्? मासोऽस्य युद्धस्य। युद्ध इति किम्? सुभद्रा प्रयोजनमस्य वैरस्य ॥११३॥

भावघञोऽस्यां णः ॥६।२।११४॥

म० वृ०—सेति प्रकृतिविशेषमनुवर्तते । भावे यो घञ् तदन्तात्प्रथमान्ताद् 'अस्यामित्यर्थे [अस्यामिति स्त्रीलिङ्गे सप्तम्यर्थे] 'णः' स्यात् । प्रपातोऽस्यां तिथौ वर्त्तते=प्रापाता, एवं दाण्डाघाता । भावग्रहणं किम् ? [२]प्राकारोऽस्याम् ॥११४॥

अव०—[१]अस्यामित्यत्र स्त्रीलिङ्गग्रहणादिह प्रत्ययो न भवति— दण्डपातोऽस्मिन् दिवसे इति वाक्यमेव । [२]प्रकुर्वन्ति तमिति प्राकारः, प्रक्रियते वा— 'भावाकर्त्रोः' (५।३।१८) घञ् । [३]एवं प्रासादोऽस्याम्, प्रसीदत्यनेन=प्रासादः, 'व्यञ्जनाद् घञ्' (५।३।१३२) । क्वचिन्न भवति— द्रोणपाकोऽस्यां स्थाल्याम् ॥११४॥

श्यैनम्पाता-तैलम्पाता ॥६।२।११५॥

म० वृ०—श्येनतिलयोर्भावघञन्ते पाते परे मोऽन्तो निपात्यते । प्रत्ययः पूर्वेणैव सिद्धः । श्येनपातोऽस्यां वर्त्तते=श्यैनम्पाता । [१]तैलम्पाता तिथिः क्रियाभूमिः, क्रीडा वा ॥ ११५ ॥

अव०—[१]तिलपातोऽस्यां वर्त्तते ॥११५॥

प्रहरणात् क्रीडायां णः ॥६।२।११६॥

म० वृ०—प्रहरणवाचिनः प्रथमान्तादस्यामित्यर्थे [स्त्रीलिङ्गसप्तम्यर्थे] क्रीडायां 'णः' स्यात् । [१]दण्डः प्रहरणमस्यां क्रीडायां=दाण्डा । यत्राग्रोहेण घातिप्रतिघातौ स्यातां सा क्रीडा । क्रीडायामिति किम् ? खड्गः प्रहरणमस्यां सेनायाम् ॥११६॥

अव०—[१]दाम्यति जनोऽनेनेति दण्डः, 'पञ्चमाङ्‌'(उ. १६८) इत्युणादिसूत्रेण डप्रत्ययः ॥११६॥

तद्वेत्त्यधीते ॥६।२।११७॥

म० वृ०—तदिति द्वितीयान्तात् वेत्ति अधीते इत्यर्थयो—'यथाविहितम् (अण्)' प्रत्ययः स्यात् । मुहूर्त्तं वेत्ति=मौहूर्त्तः । छन्दोऽधीते=छान्दसः । व्याकरणं वेत्त्यधीते वा=वैयाकरणः[१] । घटं वेत्तीत्यादावनभिधानान्नाण् ॥११७॥

अव०—[१]'य्वः पदान्तात् प्रागैदौत्' (७।४।५) इति सूत्रेण ऐत आगमः ॥११७॥

न्यायादेरिकण् ॥६।२।११८॥

म० वृ—न्यायादिभ्यो वेत्त्यधीतेऽर्थे 'इकण्' स्यात् । न्यायं वेत्त्यधीते वा=नैयायिकः, एवं मौहूर्त्तिकः, [२]नैमित्तिकः ॥११८॥

अव०—न्याय, मुहूर्त्त, निमित्त, न्यास, पुनरुक्त, लोकायत, परिषद्, चर्चा, क्रमेतर, श्लक्ष्ण, संहिता, पदे, पद, क्रम, संघट, सघटा, वृत्ति, संग्रह, आयुर्वेद, गण, गुण, स्वागम, इतिहास, पुराण, भारत, ब्रह्माण्ड, आख्यात, द्विपदा, ज्योतिष, गणित, अनन्त, लक्ष्य, लक्षण, अनुलक्ष्य, सुलक्ष्य, वसन्त, वर्षा, शरद्, हेमन्त, शिशिर, प्रथम, चरम, प्रथमगुण, चरमगुण, अनुगुण, अथर्वन्, आथर्वण इति न्यायादिगणः । [१]मुहूर्त्तं वेत्ति अधीते वा[२] निमित्तं वेत्त्यधीते वा, 'न्यायादेरिकण्' (६।२।११८) ।११८।

[१]पद-कल्प-लक्षणान्त-क्रत्वाख्यानाख्यायिकात् ॥६।२।११९॥

म०वृ ०—पदकल्पलक्षणशब्दान्तेभ्यः क्रत्वाख्यानाख्यायिकावाचिभ्यश्च वेत्त्यधीतेऽर्थे 'इकण्' स्यात् । पदान्त,— [२]पौर्वपदिकः, औत्तरपदिकः[३] । बहुप्रत्ययपूर्वात् पदशब्दान्नेकण् अनभिधानात् । कल्पान्त,— [४]मातृकल्पिकः, पैतृकल्पिकः[५] । लक्षणान्त,— [६]आश्वलक्षणिकः, गौलक्षणिकः[७] । लाक्षणिक इति न्यायादिकण् । क्रतु,— [८]आग्निष्टोमिकः, राजसूयिकः । आख्यान,— [९]यावक्रीतिकः,[१०]यावक्रिकः । आख्यायिका [बृहत्कथा],— वासवदत्तिकः ॥११९॥

अव०—[१]पदादिशब्दसाहचर्यात् कल्पस्यापि नाम्न एव ग्रहणम्, न प्रत्ययस्य । पदं कल्पश्च लक्षणं च=पदकल्पलक्षणानि, तानि अन्ते यस्य शब्दस्य, ते (? स) च क्रतवश्च आख्यानं च आख्या-

यिका च । [२]पूर्वं च तत् पदं=पूर्वपदं वेत्त्यधीते वा । [३](एवम्) आनुपदिकः । [४]मातुः कल्पं=मातृकल्पं वेत्त्यधीते वा । [५]एवं श्राद्धकल्पिकः । [६]अश्वानां गवां लक्षणमश्वलक्षणं, गोलक्षणम् तं वेत्ति । [७]एवं हास्तिलक्षणिकः, सौलक्षणिकः । [८]अग्नीनां स्तोमः, अग्निष्टोमं वेत्त्यधीते, इकण्, 'ज्योतिरायुर्भ्यां च स्तोमस्य' (२।३।१७) इति सस्य षः । [९]यवैः क्रीतं यवाः क्रीता अस्मिन्निति वा इति यवक्रीतम्, यवक्रीतं नामाख्यातम्, तद्वेत्त्यधीते । [१०]यशक्रियनविकृत्य कृतमाख्यानम्, 'अमोऽधिकृत्य ग्रन्थे' (६।३।१९८) इत्यण्, यावक्रम्, तद्वेत्तीति ॥११९॥

[१]अकल्पात्सूत्रात् ॥६।२।१२०॥

म० वृ०–कल्पवर्जात्परो यः सूत्रशब्दस्तदन्ताद्वेत्त्यधीतेऽर्थे 'इकण्' स्यात् । वार्त्तिसूत्रिकः[१] । अकल्पादिति किम् ? काल्पसौत्रः[३] ॥१२०॥

---

अव०–[१]वृत्तिश्च सूत्रं च=वृत्तिसूत्रे वेत्त्यधीते वा । [२]अकल्पादित्यत्र पर्युदासेन पूर्वपदाभावे इकण् न भवति, यथा सूत्रं वेत्त्यधीते 'तद्वेत्त्यधीते' (६।२।११७) इत्यण् । [३]तथा कल्पसूत्रं वेत्त्यधीते 'तद्वेत्त्य०' अण्; 'अनुशतिकादीनाम्' (७।४।२७) इत्यनेन उभयपदवृद्धिः ॥१२०॥

अधर्मक्षत्रत्रिसंसर्गाङ्गाद्विद्यायाः ॥६।२।१२१॥

म० वृ०–धर्म-क्षत्र-त्रिसंसर्ग-ऽङ्गवर्जितात्परो यो विद्याशब्दस्तदन्ताद्वेत्त्यधीतेऽर्थे 'इकण्' स्यात् । [१]वायसविद्यिकः । अधर्मादिति किम् ? वैद्यः, धार्मविद्यः, क्षात्रविद्यः, [२]त्रैविद्यः, सांसर्गविद्यः, आङ्गविद्यः ॥१२१॥

---

अव०–[१]वायं=गतिं चटकादिपक्षिणां स्यति=हन्ति (इति) वायसः, वायसस्य विद्या, तां वेत्त्यधीते । [२]त्र्यवयवा विद्या=त्रिविद्याः, तां वेत्त्यधीते, 'तद्वेत्त्यधीते' (६।२।११७) अण्, अत्र स्थाने त्रिविद्याशब्दस्य कर्मधारयसमाससम्बन्धिन एव ग्रहणम्, न द्विगोः, तिस्रो विद्या(:)=त्रिविद्या(:),अयं द्विगुः, त्रिविद्यां वेत्तीति 'तद्वेत्त्य०' अण्, अथवा अनेन इकण्, अत्र हि 'द्विगोरनपत्ये०' (६।१।२४) इत्यनेन अणो लुपि अथवा इकणो लुपि सत्यां विशेषाभावात् त्रिविद्यः इति प्रयोगः स्यात् ॥१२१॥

याज्ञिकौक्थिकलौकायतिकम् ॥६।२।१२२॥

म० वृ०–याज्ञिकादय इकणन्ता निपात्यन्ते । [१]याज्ञिकः । [२]औक्थिकः । [३]लौकायतिकः ॥१२२॥

---

अव०–'याज्ञिकौक्थिक०' इति सूत्रे उदाहरणानामियं सिद्धिः,– यज्ञ, यज्ञं वेत्त्य०, अनेन इकणि सति याज्ञिक इति शब्दः, तदनन्तरं याज्ञिकानां धर्म आम्नायः सङ्घो वा, याज्ञिक्यः, 'छन्दोगौक्थिक०' (६।३।१६६) इति ञ्यः प्रत्ययः, यज्ञं याज्ञिक्यं वा वेत्त्यधीते वा, 'याज्ञिकौक्थिक०' (६।२।१२२) इत्यनेन इकण्, इक्य इति लुप्यते निपातनात् । [२]उक्थशब्दः केषुचित् सामसु प्रसिद्धः, उक्थमधीते, इकण्, औक्थिकानामयं धर्मः आम्नायः सङ्घो वा, 'छन्दोगौक्थिक०' (६।३।१६६) इति ञ्यः, औक्थिक्यमधीते, अनेन इकण् इक्यलोपश्च । [३]लोके आयतं=लोकायतम्, लोकायतं वेत्ति, 'याज्ञिकौक्थिक०' (६।२।१२२) इत्यनेन इकण्, निपातनात् यकाराऽकारस्य इकारो निपात्यते, लौकायितिकमिति निष्पन्नम् । लौकायतिकमिति 'न्यायादेरिकण्' (६।२।११८) इत्यनेन साध्यते ॥१२२॥

अनुब्राह्मणादिन् ॥६।२।१२३॥

म० वृ०–अनुब्राह्मणशब्दाद्वेत्त्यधीतेऽर्थे इन् स्यात् । [१]अनुब्राह्मणी, [२]अनुब्राह्मणिनौ, [३]अनुब्राह्मणिनः । मत्वर्थीयेनैव इना सिद्धेऽनभिधानाच्च [ मत्वर्थीयस्यैव ] इकस्याप्रवृत्तावण्बाधनार्थमिनो विधानम् ॥१२३॥

---

अव०–[१]ब्रह्मणा प्रोक्तो ग्रन्थो ब्राह्मणम्, 'तेन प्रोक्ते' (६।३।१८१) इत्यण्, अनु सादृश्ये, ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणम्, सदृशार्थेऽव्ययीभावः, अनुब्राह्मणं वेत्त्यधीते=अनुब्राह्मणी, इन्, सि,[२]औ,[३] जस् ॥१२३॥

## शतषष्टेः पथ इकट् ॥६।२।१२४॥

म० वृ०–शतषष्टिशब्दाभ्यां परो यः पथिन् तदन्ताद्वेत्त्यधीतेऽर्थे 'इकट्' स्यात् । [1]शतपथिकः, [2]शतपथिकी, [3]षष्टिपथिकः ॥१२४॥

अव०–[1]शतं पन्थानो अस्य-'ऋक्पूःपथ्यपोऽत्' (७।३।७६) अत्, 'नोऽपदस्य तद्धिते' (७।४।६१), शतपथं वेत्ति=शतपथिकः । '[2]अणञेये०' (२।४।२०) इति ङी । [3]षष्टिः पन्थानो अस्य । (एवम्) षष्टिपथिकी ॥१२४॥

## [1]पदोत्तरपदेभ्य इकः ॥६।२।१२५॥

म० वृ०–पदोत्तरात् पदशब्दात् पदोत्तरपदशब्दाच्च वेत्त्यधीते 'इकः' स्यात् । पदोत्तर,- [2]पूर्वपदिकः, पूर्वपदिका, [3]उत्तरपदिकः । पद,- पदिकः, पदिका । पदोत्तरपद,- पदोत्तरपदिकः [4]॥१२५॥

अव०–[1]पदशब्द उत्तरपदं यस्य, पदोत्तरपदश्च पदश्च पदोत्तरपदश्च, सूत्रत्वादेकशेषः, अत्र बहुवचनं सर्वभङ्गपरिग्रहार्थम् । [2]पूर्वं च तत् पदं च=पूर्वपदं वेत्ति । [3](एवम्) उत्तरपदिका । [4](एवम्) पदोत्तरपदिका ॥१२५॥

## पद–क्रम–शिक्षा–मीमांसा–साम्नोऽकः[1] ॥६।२।१२६॥

म० वृ०–एभ्यो वेत्त्यधीते'ऽकः' स्यात् । पदकः, क्रमकः, [2]शिक्षकः, मीमांसकः, सामकः ॥१२६॥

अव०–[1]अत्र अकस्थाने यदि कप्रत्ययं कुर्यात्, अकमपनीय क इति कृते इत्यर्थः, तदा शिक्षाका, शिक्षिका, शिक्षका, मीमांसाका, मीमांसिका, मीमांसका इति ※ रूपत्रयमनिष्टं स्यात्, शिक्षिका मीमांसिका इत्येव एकं रूपं वृद्धसम्मतमिष्यते इति अकप्रत्ययविधानम् । 'अस्यायत्तत्क्षिप०'(२।४।१११) इति नित्यमिकारः । [2]शिक्ष्यते इति शिक्षा, 'क्तेटो गुरोर्व्यञ्जनात्' (५.३.१०६) इति अः प्रत्ययः, शिक्षां वेत्ति=शिक्षकः ॥१२६॥

## [1]ससर्वपूर्वाल्लुप् ॥६।२।१२७॥

म०वृ०–सपूर्वात् सर्वपूर्वाच्च वेत्त्यधीतेऽर्थे विहितस्य प्रत्ययस्य 'लुप्' स्यात् । सवार्त्तिकमधीते [2]सवार्त्तिकः, अणो लुप्; [3]सकल्पः, अत्रेकणः (लुप्) । [4]सर्ववेदः, [5]सर्वविद्यः । कथं द्विवेदः ? 'द्विगोरनपत्ये यस्वर०' (६।१।२४) इति लुपि भविष्यति ॥१२७॥

अव०–[1]सश्च सर्वश्च ससर्वौ, ससर्वौ पूर्वौ यस्य शब्दस्य स (ससर्वपूर्वः), तस्मात् । [2]वृत्तिरेव वार्त्तिकम्, 'विनयादिभ्यः' (७।२।१६९) इकण्, सह वार्त्तिकेन वर्त्तते, 'सहस्य सोऽन्यार्थे' (३।२।१४३) सहस्य सः, सवार्त्तिकमधीते- 'तद्वेत्त्यधीते' (६।२।११७) इत्यण्, अस्य अणः 'ससर्वपूर्वा०' इत्यनेन लोपः । [3]सह कल्पेन०, सकल्पं वेत्ति- 'पदकल्प०' (६।२।११९) इत्यनेन इकण्, 'ससर्व०' इत्यनेन लुप्यते । [4]सर्वे च ते वेदाश्च=सर्ववेदाः, सर्ववेदान् अधीते-'तद्वेत्त्य०' (६।२।११७) इत्यनेन अण्; [5]सर्वविद्यां वेत्त्यधीते- 'अधर्मक्षत्र०' (६।२।१२१) इत्यनेन इकण्, 'ससर्व०' इत्यनेन अणिकण्लोपः ॥१२७॥

## सङ्ख्याकात्सूत्रे ॥६।२।१२८॥

म०वृ०–सङ्ख्यायाः परो यः कः प्रत्ययो विहितस्तदन्तात् सूत्रे वर्त्तमानान्नाम्नो वेत्त्यधीते उत्पन्नस्य प्रत्ययस्य 'लुप्' स्यात् । [1]अष्टकाः [2]पाणिनीयाः, [3]दशका [4]उमास्वातीयाः, [5]द्वादशका [6]आर्हताः । संख्येति किम् ? कालापकाः[7] । कादिति किम् ? [8]चातुष्टयाः ॥१२८॥

अव०–अप्रोक्तार्थ आरम्भोऽयं योगः । सूत्रोदाहरणान्येवम्– [1]अष्टावध्यायाः परिमाणमस्य= अष्टकम्, 'सङ्ख्यायाः सङ्घसूत्रपाठे' (६।४।१७१)

※ 'इच्चापुंसोऽनित्क्याप्परे' (२।४।१०७) इत्यनेन ।

इति सूत्रेण कप्रत्ययः, अष्टकं सूत्रं विदन्त्यधीयते वा, 'तद्वेत्त्यधीते'वा अण्। [२]पणनं=पणः,'पणेर्माने' (५।३।३२) अल् , पणोऽस्यास्ति- मत्वर्थीय इन् , पणिनोऽपत्यं पाणिनः, 'ङसोऽपत्ये' (६।१।२८) अण् , पाणिनस्यापत्यम्- 'अत इञ्' (६।१।३१), पाणिनिः, पाणिनिना प्रोक्तम्- 'यूनि लुप्' (६।१।१३७) इति इञ् लुप्यते, ततो तेन प्रोक्तम्- 'दोरीयः' (६।३।३२) ईयः, पाणिनीयं विदन्त्यधीयते वा 'तद्वेत्त्य०' (६।४।११७) अण् । तथा [३]दशाध्यायाः परिमाणमस्य=दशकं तत्त्वार्थशास्त्रम् , 'सङ्ख्यायाः सङ्घ०' (६।४।१७१) इति कः, दशकं विदन्त्यधीयते० अण् । [४]उमास्वातेरिमे छात्राः उमास्वातीयाः । [५]द्वादश अङ्गानि आर्हतमूलग्रन्थविशेषाः, ते परिमाणमस्य- 'संख्यायाः सङ्घ०' (६।४।१७१) इति कः, द्वादशकं विदन्त्यधीयते (वा) अण् । सर्वत्र अणो लुप् 'सङ्ख्याकात् सूत्रे' (६।२।१२८) इत्यनेन । [६]अर्हन् देवता एषाम्- 'देवता' (६।२।१०१) इत्यण् । [७]बृहत्तन्त्रेभ्यः कलामापिबन्ति, 'कीचकपेचक०' (उ० ३३ ) इत्याद्युणादिनिपातः, कलापकाः शास्त्राणि, तानि विदन्त्यधीयते वा;( अथवा ) कल् , पद्मा कल्यन्ते विविधवर्णा अत्र-'कलेरापः' (उणा०३०८), कलापोऽस्याऽस्ति,इन् ,कलापिना प्रोक्तं=कालापम् , अण् , 'कलापि-कुथुमि०' (७।४।६२) इत्यनेन इनो लोपः, अल्पं कालापं=कालापकम् , 'कुत्सित'० (७।३। ३३) इति कः, तद्विदन्त्यधीयते वा; इत्थमपि शब्द-सिद्धिः, परं लुप्यलुपि सत्यां विशेषो नोपलभ्यते । [८]चतुर्, चत्वारोऽध्याया मानमस्य, अत्र "अपवादात् क्वचिदुत्सर्गोऽपि" इति 'सङ्ख्यायाः सङ्घ०' इत्यस्य कप्रसङ्गेऽपि'अवयवात्तयट् '(७।१।१५१) इति तयट्, तत्र चत्वारोऽवयवा अस्य इति वाक्यम् , 'ह्रस्वान्नाम्नस्ति' (२।३।३४) षकारः,चतुष्टयं विदन्त्यधीयते वा-अण् ॥ १२८ ॥

## प्रोक्तात् ॥६।२।१२९॥

म० वृ०-प्रोक्तार्थविहितः प्रत्यय उपचारात् प्रोक्त इत्युच्यते, तदन्तान्नाम्नो वेत्त्यधीते उत्पन्नस्य प्रत्ययस्य 'लुप् ' स्यात् । [१]गौतमः, एवं [२]सौधर्म्मः, [३]भाद्रबाहवः, [४]पाणिनीयः । [५]स्त्रियां विशेषः- गौतमा, सौधर्मा [सौधर्मणा स्त्री इत्यादि] ॥१२९॥

---

अव०-[१]गास्ताम्यति इति गोतमः, 'कर्मणोऽण्' (५।१।७२), गोतमेन प्रोक्तं=गौतमम्, गौतमं वेत्त्यधीते 'तद्वेत्त्य'० (६।२।११७) अण् । [२]शोभनो धर्मोऽस्य, 'द्विपदाद्धर्मादन्'; (७।३।१४१) इत्येकेषां मते विकल्पः, सुधर्मेण सुधर्मणा वा प्रोक्तं सौधर्मं सौधर्मणं वा वेत्त्यधीते; [३]भद्रबाहुना प्रोक्तं=भाद्रबाहवं वेत्त्यधीते, सर्वत्राण् , अस्याणो लोपः सूत्रेण । [४]पाणिनिना प्रोक्तम्- 'दोरीय'- (६।३।३२) विषये एव 'यूनि लुप्' (६।१।१३७) इत्यनेन पूर्वमिञो लोपः, पश्चात् 'दोरीयः' । [५]'स्त्रियां विशेष' इत्ययं भावार्थः- अणो लोपानन्तरमणन्तत्वाभावात् ङीप्रत्ययो न भवति ॥१२९॥

## वेदेनूब्राह्मणमत्रैव ॥६।२।१३०॥

(१ २)

म० वृ०-प्रोक्तमिहानुवर्त्तते । तच्च प्रथमान्तं विपरिणम्यते । प्रोक्तप्रत्ययान्तं वेदवाचि, प्रोक्तप्रत्ययान्तमिन्नन्तं च ब्राह्मणवाचि अत्रैव=वेत्त्यधीते इति विषये एव प्रयुज्यते[३] । वेद,- कठाः[४], कालापाः[५] । [६]इन्ब्राह्मणं खल्वपि,- ताण्डिनः[७] । आरम्भसामर्थ्यादवधारणे सिद्धे उभयावधारणार्थमेवकारः । प्रोक्तप्रत्ययान्तस्यात्रैव वृत्तिर्नान्यत्र । तथात्र वृत्तिरेव, न केवलस्य प्रोक्तप्रत्ययान्तस्यावस्थानम् । अन्यत्र त्वनियमात् क्वचित्स्वातन्त्र्यं भवति,- [८]अर्हता प्रोक्तमार्हतं शास्त्रम् ; क्वचिदुपाध्यन्तरयोगः,- आर्हतं महत्सुविहितमिति; क्वचिद्वाक्यम्-आर्हतमधीते; क्वचिद् वृत्तिः-आर्हत इति ॥१३०॥

---

अव०-[१]'अत्रैव', कोऽर्थः ? वेत्त्यधीते इत्यर्थे एव इति प्रकृतिनियमः, अन्ययोगव्यवच्छेदात् ।[२]ब्रह्मणा प्रोक्तो ग्रन्थो वेदरूपो ब्राह्मणम् , 'तेन प्रोक्ते' (६।३। १८१ ) इत्यण् , "धर्मे दानाधिके तुल्यभागेऽर्द्धे

ब्राह्मणं श्रुतौ" ★इति नपुंसकत्वम् । [३]'प्रयुज्यते', कोऽर्थः ? वेत्त्यधीते इत्यर्थे एव प्रोक्तप्रत्ययान्तं नाम कर्तृपदं व्यापार्यते इत्यर्थः । प्रोक्तं वेत्त्यधीते इति मिश्रं वाक्यं क्रियते इति परमार्थः । तेन स्वातन्त्र्यम्, उपाध्यन्तरयोगो वाक्यं च निवर्त्तते । कठेन प्रोक्तो वेदोऽपि कठ इति स्वातन्त्र्यमुच्यते इति युक्त्या वाक्यं निवर्त्तितम् । उपाध्यन्तरं विशेषणान्तरं कठो महानिति । तथा परमपि वाक्यं कठं वेत्त्यधीते इत्थंमपि वाक्यं निवर्त्तितमित्यर्थः । इत्यस्याग्रे स्वातन्त्र्यमुपाध्यन्तरयोगो वाक्यं च निवर्त्तते इत्यक्षराणि ज्ञातव्यानि । [४]कठेन प्रोक्तं वेदं विदन्त्यधीयते वा कठाः, 'तद्वेत्त्यधीते' (६।२।११७) अण् । [४]कलापिना प्रोक्तं वेदं विदन्त्यधीयते वा अण्, 'कठादिभ्यो वेदे लुप्' (६।३।१८३) इत्यनेन अण् लुप्यते कठपरात् । [५]'इन्ब्राह्मणं खल्वपि', कोऽर्थः प्रोक्तप्रत्ययान्तमिन्नन्तं च ब्राह्मणवाचि यत् सूत्रार्थे उक्तं तद्दर्शयति इत्यर्थः । [६]तण्डते इति तण्डी, 'ग्रहादिभ्यो णिन्' (५।१।५३), तण्डिनोऽपत्यं=ताण्ड्यः, 'गर्गादेर्यञ्' (६।१।४२), ताण्ड्येन प्रोक्तं ब्राह्मणं विदन्त्यधीयते वा इति वाक्ये 'शौनकादिभ्यो णिन्' (६।३।१८६) इति णिन्, 'व्यञ्जनात्तद्धितस्य' (२।४।८८) इति यलोपः, ततो जस् । [८]'अर्हता प्रोक्तं'-'तेन प्रोक्ते' (६।३।१८१) अण्, आर्हतं वेत्त्यधीते वा- अण्, 'प्रोक्तात्' (६।२।१२९) इत्यनेन अणो लोपः ।।१३०।।

## तेन[१] छन्ने रथे ।।६।२।१३१।।

म०वृ०-तेन इति तृतीयान्तात् 'छन्ने रथेऽर्थे यथाविहितं [अण्] प्रत्ययः' स्यात् । वस्त्रेण छन्नो रथः=वास्त्रः । [कम्बलेन छन्नो रथः=] काम्बलः, [२]चार्मणः । रथ इति किम् ? वस्त्रेण छन्नः कायः ।। १३१ ।।

अव०-[१]छन्नशब्देन समन्ताद् वेष्टितं व्याप्तमुच्यते, तेनेह न भवति- पुत्रैः परिवृतो रथः । [२]चर्मणा छन्नो रथश्चार्मणः, 'अणि' (७।४।५३) इत्यनेनान्त्यस्वरादिलोपप्रतिषेधः ।।१३१।।

## पाण्डुकम्बलादिन् ।।६।२।१३२।।

म० वृ०-पाण्डुकम्बलात् तृतीयान्तात् 'छन्ने रथेऽर्थे इन्' स्यात् । अणोऽपवादः । [पाण्डुश्चासौ कम्बलश्च, पाण्डुकम्बलेन छन्नः=] पाण्डुकम्बली रथः ।।१३२।।

## दृष्टे साम्नि नाम्नि ।।६।२।१३३

म० वृ०-तेनेति तृतीयान्तात् 'दृष्टं साम इत्यर्थे यथाविहितमण् (एयण् वा)' स्यात्, नाम्नि=संज्ञायाम् । [१]मायूरम्, तैत्तिरम्, [३]वासिष्ठम्, वैश्वामित्रम्, [४]कालेयम्, [५]आग्नेयम्; एवं नामानि सामानि ।।१३३।।

अव०-[१]मयूरेण दृष्टं साम मायूरम् । एवं [२]तैत्तिरम् । [३]वसिष्ठेन ऋषिणा दृष्टं साम=वासिष्ठम् । [४]कलिना दृष्टं साम- 'दृष्टे साम्नि' इत्यणो बाधकः 'कल्यग्नेरेयण्' (६।१।१७) इत्येयण् । [५]अग्निना दृष्टं साम- 'कल्यग्नेरेयण्' ।।१३३।।

## गोत्रादङ्कवत् ।।६।२।१३४।।

म० वृ०-गोत्रवाचिनस्तृतीयान्तात् 'दृष्टे (? दृष्टं) साम' इत्यर्थेऽङ्कवत् प्रत्ययः' स्यात् [१] । यथा तस्यायमङ्क इत्यत्र इदमर्थे प्रत्ययः तथा दृष्टं सामेत्यर्थेऽपि[२] । औपगवं (? औपगवकम्) [३]साम ।।१३४।।

अव०-[१]अङ्केऽर्थे विशेषप्रत्ययाभावात् । [२]यथा अङ्के 'गोत्राददण्ड'० (६।३।१६९) इत्यनेन अकञ् तथात्रापि इत्यर्थः । [३]औपगव इति प्रकृतिः, औपगवस्येदं=औपगवकम्, 'गोत्राददण्डमाणवशिष्ये' इति सूत्रेण अकञ्प्रत्ययः, औपगवेन दृष्टं साम औपगवकमित्यर्थेऽपि अत्र अकञ् भवति ।।१३४।।

## वामदेवाद् यः ।।६।२।१३५।।

★श्रीहैमलिङ्गानुशासनविवरणे नपुंसकलिङ्गप्रकरणे सप्तमश्लोके ।

म० वृ०–वामदेवाद् 'दृष्टे साम्नि यः' स्यात्। [वामदेवेन दृष्टं साम=] वामदेव्यम् ॥१३५॥

## डिद्वाऽण् ॥६।२।१३६॥

म० वृ०–दृष्टे सामेऽर्थे योऽण् विहितः स 'डित् वा' स्यात्। [१]औशनम्, औशनसम् ॥१३६॥

अव०–[१]'वशक् कान्तौ' वश्, वष्टि दानवाभिमुखं– 'वश्टेः कनस्' (उ. ९८५), 'वशेरयङि' (४।१।८३) य्वृत्, उशनसा दृष्टं साम=औशनम् ॥१३६॥

## वा जाते द्विः ॥६।२।१३७॥

म० वृ०–जातेऽर्थे योऽण् द्विर्विहितः स 'वा डित्' स्यात्। [१]शातभिषः, शातभिषजः। द्विरिति किम्? हैमवतः॥ १३७॥

अव०–[१]शतं भिषजोऽस्याः सा शतभिषग्, शतभिषजा चन्द्रयुक्तया युक्तः कालः– 'चन्द्रयुक्तात्काले०' (६।२।५) इत्यण् लुप् च, शतभिषजि जातः अत्र वाक्ये प्राग्जितीयोऽण् प्राप्नोति, तमणं बाधित्वा 'वर्षाकालेभ्यः' (६।३।८०) इत्यनेन इकण् प्राप्नोति, तमपि इकणं बाधित्वा 'भर्तुसन्ध्यादेरण्' (६।३।८९) भवति, एवं द्विवारमण् कृतः, स विकल्पेन डित् भवति। केचित्तु द्वितीयवारमपि डित्त्वमिच्छन्ति, तन्मते द्विर्डित्त्वात् द्वितीयवारमप्यन्त्यस्वरादिलोपे शातभ इत्यपि भवति। एवं पूर्वसूत्रेऽपि आशं साम इति प्रयोगः। इत्थं योगद्वयेऽपि त्रैरूप्यं सिद्धम् ॥१३७॥

## तत्रोद्धृते पात्रेभ्यः[१] ॥६।२।१३८॥

म० वृ०–तत्रेति सप्तम्यन्तात्पात्रवाचिन 'उद्धृतेऽर्थे यथाविहितमण्' [२]स्यात्। शरावेषु उद्धृत ओदनः शारावः, माल्लकः[२]। पात्रेभ्य इति किम्? पाणावुद्धृत ओदनः ॥१३८॥

अव०–[१]पात्रेभ्यः इत्यत्र बहुवचनं पात्रविशेषपरिग्रहार्थम्। [२]प्रत्ययो भवतीत्यर्थः। मल्लकेषु मल्लकासु वा उद्धृत ओदनः=माल्लकः। एवं कार्परः, कल्पते यवादिकं भ्रष्टुमिति कर्परः ॥१३८॥

## [१]स्थण्डिलाच्छेते व्रती ॥६।२।१३९॥

म० वृ०–स्थण्डिलात् सप्तम्यन्तात् 'शेते व्रतीत्यर्थे यथाविहितमण्' स्यात्। स्थण्डिले एव शेते=स्थाण्डिलो=भिक्षुः। व्रतीति किम्? स्थण्डिले शेते बालः ॥१३९॥

अव०–[१]स्थण्डिलशब्दात् शेते इत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, योऽसौ शेते स यदि व्रती भवति। तत्र शयनव्रतोऽन्यत्र शयनात् मञ्चपर्यङ्कादेर्निवृत्त इत्यर्थः। स्थण्डिल एव शेते इति स्थाण्डिलः ॥१३९॥

## संस्कृते भक्ष्ये ॥६।२।१४०॥

म० वृ०–सप्तम्यन्तात् 'संस्कृते भक्ष्येऽर्थेऽण्' [१]स्यात्। सत उत्कर्षाधानं संस्कारः। भ्राष्ट्रे संस्कृताः=भ्राष्ट्रा अपूपाः, एवं [२]कैलासाः, पात्राः[३] ॥१४०॥

अव०–[१]यथाविहितः प्रत्यय इति। [२]किलासी=घटकर्परी, तस्यां संस्कृताः। [३]पात्रे संस्कृताः ॥१४०॥

## शूलोखाद् यः ॥६।२।१४१॥

म० वृ०–शूल–उखाभ्यां 'संस्कृते भक्ष्ये यः' स्यात्। [१]शूल्यं मांसम् उख्यम्[२] ॥१४१॥

अव०–[१]शूले संस्कृतं=शूल्यम्। [२]उखायां संस्कृतम्=उख्यम् ॥१४१॥

## क्षीरादेयण् ॥६।२।१४२॥

म० वृ०–क्षीरात् 'संस्कृते भक्ष्ये एयण्' स्यात्। क्षैरेयम्, क्षैरेयी यवागूः ॥१४२॥

अव०–[१]क्षीरे संस्कृतं भक्ष्यम् ॥१४२॥

## दध्न इकण् ॥६।२।१४३॥

म० वृ०–दधिशब्दात् संस्कृते 'इकण्' स्यात्। दध्नि संस्कृतं भक्ष्यं=दाधिकम् ॥१४३॥

अव०–ननु 'संस्कृते' (६।४।३) इत्यनेन संस्कृतार्थे इकण् वक्ष्यते, तेनैव सिद्धम्, किमनेन? सत्यम्, दध्ना हि तत् संस्कृतं यस्य दधिकृतमेव

उत्कर्षाधानं भवति, अत्र च दधि केवलमाधारभूतम्, द्रव्यान्तरेण तु लवणादिना संस्कारः क्रियते इत्यर्थः । अयं भावः 'दध्न इकण्' इति सूत्रे ज्ञातव्यः ॥१४३॥

उदश्वितः ॥६।२।१४४॥

म० वृ०—उदश्वित्शब्दात् संस्कृते भक्ष्ये 'इकण् वा' स्यात् । औदश्वितम्, [१] औदश्वित्कम् ॥१४४॥

अव०— [१] उदकेन श्वयति=उदश्वित्, 'उदकाच्छ्वेर्डित्' (उणा० ८८८) इत्युणादिसूत्रेण इत्प्रत्ययः, स च डित्, 'नाम्न्युत्तरपदस्य च' (३।२।१०७) इति उदकस्य उद आदेशः, अत एव सूत्रनिर्देशात्त्वृत्, उदश्विति संस्कृतं भक्ष्यम्=औदश्वितम्, अत्र 'संस्कृते भक्ष्ये' (६।२।१४०) इत्यण्; औदश्वित्कम्, अत्र तु इकण्, 'ऋवर्णोवर्ण०' (७।४।७१) इति इलोपः ॥१४४॥

क्वचित् ॥६।२।१४५॥

म० वृ०—अपत्यादिभ्योऽन्यत्राप्यर्थे क्वचित् 'यथाविहितं प्रत्ययः' स्यात् । चक्षुषा गृह्यते=चाक्षुषं रूपम्, एवं [श्रवणाभ्यां गृह्यते] श्रावणः शब्दः, [दृषदि पिष्टाः=] दाषदाः सक्तवः, [१] चातुर्दशं रक्षः, [२] चातुरं शकटम्, [३] आश्वो रथः । सम्प्रति युज्यते=साम्प्रतम्, साम्प्रतः [४] ॥१४५॥ ग्रन्थाग्र—२२७

। षष्ठस्याध्यायस्य द्वितीयः पादः ।

अव०—[१] चतुर्दश्यां दृश्यते=चातुर्दशम् । [२] चतुर्भिरुह्यते=चातुरम् । [३] अश्वैरुह्यते । [४] साम्प्रति (?साम्प्रती) इत्यपि वाक्यलिङ्गत्वात् । यत्तु 'स्वयं छेत्तुमसाम्प्रतम्, इति मन्यते तत् सामान्यभावेन ॥१४५॥

अव० श्लोक—२१६, अक्षर—६ ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने षष्ठाध्यायस्य द्वितीयः पादः समाप्तः ॥



॥ अर्हम् ॥

# ॥ षष्ठोऽध्यायः ॥

## [ तृतीयः पादः ]

卐

### शेषे ॥६।३।१॥

म० वृ०—अधिकारोऽयम् । उपयुक्ताद् [प्रागुक्तात्] अन्यः शेषः । यदित ऊर्ध्वमनुक्रमिष्यामः [विधास्यामः] तत् 'शेषेऽर्थे' वेदितव्यम् । अपत्याभ्यः संस्कृतमक्ष्यान्तेभ्यो योऽन्योऽर्थः स शेषः ।१।

अव०– 'स शेष' इत्यक्षरार्थे– तस्येदं विशेषा अपत्यसमूहादयः, तेषु वक्ष्यमाणा एयणादयो मा भूवन्निति शेषाधिकारः क्रियते, किं च सर्वेषु प्राग् जितात् कृतादिषु वक्ष्यमाणाः प्रत्यया यथा स्युः, अनन्तरेणैवार्थनिर्देशेन कृतार्थता मा विज्ञायि इति साकल्यार्थं शेषवचनम् ॥१॥

### नद्यादेरेयण् ॥६।३।२॥

म० वृ०—नद्यादिभ्यो यथासम्भवं प्राग्जितीये शेषेऽर्थे 'एयण' स्यात् । नद्यां जातो भवो वा=नादेयः, वानेयः[1] । [2]वन्य इति तु साधौ यः । शेष इति किम् ? नदीनां समूहो=नादिकम् ['कवचिहस्ति०' (६।२।१४) इतीकण् ] ॥२॥

अव०—विशेषमाह– 'नद्यादेरेयण्' इतः सूत्रादारभ्य प्रकृतिविशेषोपादानमात्रेण प्रत्यया विधास्यन्ते । तेषां तु कृतादयोऽर्था विभक्तयश्च परस्ताद् वक्ष्यन्ते । [1]वने भवः । [2]वने साधुः ॥२॥

### राष्ट्रादियः ॥६।३।३॥

म० वृ०—राष्ट्रात् प्राग्जितीये शेषेऽर्थे 'इयः' स्यात् । राष्ट्रे क्रीतः कुशलो जातो भवो वा=राष्ट्रियः । शेषे इत्येव– राष्ट्रस्यापत्यं=राष्ट्रिः ॥३॥

### दूरादेत्यः ॥६।३।४॥

म० वृ०—दूराच्छेषेऽर्थे 'एत्यः' स्यात् । दूरे भवो=दूरेत्यः ॥४॥

### उत्तरादाहञ् ॥६।३।५॥

म० वृ०—उत्तराच्छेषेऽर्थे 'आहञ्' स्यात् । औत्तराहः,[1] औत्तराही स्त्री ॥५॥

अव०—कथम् औत्तराही ? उत्तरा दिग् देशो वा रमणीयः– 'वोत्तरात्' (७।२।१२१) इत्यनेन आहिप्रत्ययः, तत 'उत्तराहि भवा' इति वाक्ये 'भवे' (६।३।१२३) इत्यण् , ततो ङी, औत्तराही इति सिद्धम् । [1]उत्तरे कुशलः, "नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति न्यायात्............(उत्तरस्यां) दिशि कुशलः (वा) औत्तराहः ॥५॥

### पारावारादीनः ॥६।३।६॥

म० वृ०—पारावारात् शेषेऽर्थे 'ईनः' स्यात् । पारावारीणः[1] ॥६॥

अव०—[1]अवारः समुद्रस्तस्य पारम् , राजदन्तादित्वात् पारावारः, पारावारे भवो जातो वा=पारावारीणः ॥६॥

### व्यस्त-व्यत्यस्तात् ॥६।३।७॥

म० वृ—पारावाराद् व्यस्ताद् विपर्यस्ताच्च 'ईनः' स्यात् । पारीणः, अवारीणः, [अवारस्य पारम् , तत्र भवः=] अवारपारीणः ॥७॥

### द्यु-प्रागपागुदक्-प्रतीचो यः ॥६।३।८॥

म० वृ०—दिव्शब्दात् प्राच्– अपाच्– उदच् (प्रत्यच्)– शब्देभ्य अव्ययानव्ययेभ्यः शेषेऽर्थे 'यः' स्यात् ।

दिवि भवं =दिव्यम्, प्राचि प्राग्वा भवं=प्राच्यम्,[१] अपाच्यम्, उदीच्यम्, प्रतीच्यम् ॥८॥

अव०–[१]प्राचीशब्दः, प्राची दिग् रमणीया प्राग्देशः प्राक्कालो वा रमणीयः इति वाक्ये 'दिग्–शब्दाद्दिग्देशकाले०' (७।२।११३) इति सूत्रेण धा प्रत्ययः, तस्य 'लुबञ्चेः' (७।२।१२३) इति सूत्रेण लुप्, धालुपि ङीप्रत्ययस्यापि 'ङयादेर्गौणस्याक्विप०' (२।४।९५) इत्यादिना लुप्, इत्थं प्राच् इत्यव्ययम्, प्राग्भवं प्राच्यम्। प्राच् क्विबन्तोऽनव्ययम्, तत्र प्राचि भवं=प्राच्यम्। एवमपाच्यादिसिद्धिः। दिग्देशवृत्तेः प्रागादेरयं यः प्रत्ययः। कालवृत्तेस्त्वव्ययत्वात्परत्वात् 'सायम्०' (६।३।८८) इत्यादिना तनट्, अनव्ययात्तु 'वर्षाकालेभ्यः' (६।३।८०) इतीकण्, प्राक्तनं प्राचिकमित्यादि ॥८॥

## ग्रामादीनञ् च ॥६।३।९॥

म० वृ०–ग्रामाच्छेषेऽर्थे 'ईनञ्' चकाराद् 'यः' प्रत्ययः स्यात्। ग्रामीणः, ग्राम्यः। ञकारः पुंवद्भावप्रतिषेधार्थः– [१]ग्रामीणाभार्यः ॥९॥

अव०–[१]ग्रामीणा भार्या अस्य=ग्रामीणाभार्यः, अत्र 'तद्धितः स्वरवृद्धिहेतुः०' (३।२।५५) इत्यादिना पुंवद्भावप्रतिषेधः ॥९॥

## कत्र्यादेश्चैयकञ् ॥६।३।१०॥

म० वृ०–कत्रि इत्यादिभ्यो ग्रामशब्दाच्च शेषेऽर्थे 'एयकञ्' स्यात्। कात्रेयकः, ग्रामेयकः[१] ॥१०॥

अव०–कत्रि, पुष्कर, पुष्कल, उम्पि, उम्भि, औम्भि, कुम्भी, कुण्डिना, नगर, महिष्मती, वर्मवती, चर्मण्वती इति कत्र्यादिगणः। महिष्मत्यादिसाहचर्यात् नगरशब्दात् संज्ञायामेव एयकञ् भवति, अन्यत्र अणेव– नागरो ब्राह्मण इति। नगर इति स्थानकविशेषवाची ज्ञातव्यः, न सामान्यनगरवाची। कुत्सिताः के वा त्रयोऽस्य=कत्रिः, अत एव निर्देशात् 'कत्रि' इति निपात्यते। अथवा कद् इति सौत्रो धातुः, 'राशदिशकिकद्यदिभ्यस्त्रिः' (उणा० ६९६) इत्युणादिसूत्रेण त्रिः। [१]पूर्वयोगेन ग्रामीणः, ग्राम्यौ; अनेन ग्रामेयकः, इति ग्रामशब्दस्य रूपत्रयम् ॥१०॥

## कुण्ड्यादिभ्यो यलुक् च ॥६।३।११॥

म० वृ०–कुण्ड्यादिभ्यः शेषेऽर्थे 'एयकञ्' स्यात्, तद्योगे चैषां 'यलुक् च'। कौण्डेयकः ॥११॥

अव०–कुण्ड्या, कुण्या, उक्ष्या, भाण्ड्या, ग्रामकुड्या, [१]तृण्या, [२]वन्या, पल्या, पुल्या, [३]मुल्या इति कुड्यादिगणः। बहुवचनं प्रयोगानुसरणार्थम्। सर्वत्र 'तत्र साधौ' (७।१।१५) यः। [१]तृणानां [२]वनानां समूहः,– 'पाशादेश्च ल्यः' (६।२।२५)। [३]मूल (? मूले) सा……………(धुः, "तत्र साधौ" इति यः, ऊकारस्य) पृषोदरादित्वात् ह्रस्वः ॥११॥

## कुल-कुक्षि-ग्रीवाभ्यः श्वास्यलङ्कारे ॥६।३।१२॥

म० वृ०–कुलकुक्षिग्रीवाभ्यो यथासङ्ख्यं श्वन्-असि–अलङ्कारविशिष्टे प्राग्जितीये शेषेऽर्थे 'एयकञ्' स्यात्। अणोऽपवादः। [१]कौलेयकः श्वा, कौलोऽन्यः। [२]कौक्षेयकोऽसिः। [३]ग्रैवेयकोऽलङ्कारः, ग्रैवोऽन्यः ॥१२॥

अव०–[१]कुले शुद्धान्वये भवति (? भवः) ……(जातो वा) कौलेयकः। [२]कुक्षौ भवः=कौक्षेयकः, यः खड्गः कङ्कप्राणिविशेषकुक्षिनिर्जिर्णेन अयसा कृतः। …………(कौक्षोऽन्यः)। ……………यकः असिः (?)। [३]ग्रीवायां जातो=ग्रैवेयकः। भवेऽर्थे तु वाच्ये "ग्रीवातोऽण् च" (६।३।१३२) ॥१२॥

## दक्षिणा-पश्चात्–पुरसस्त्यण् ॥६।३।१३॥

म० वृ०–एभ्यः शेषेऽर्थे 'त्यण्' स्यात्। [अणोऽपवादः] [१]दाक्षिणात्यः, [२]पाश्चात्त्यः, [३]पौरस्त्यः ॥१३॥

अव०–[१]दक्षिणा दिक्, तस्यां भवो दाक्षिणात्यः, अथवा दक्षिणस्यां दिशि वसति इति वाक्ये "वा दक्षिणात् प्रथमासप्तम्या आः" (७।२।११९)

इति सूत्रेण आप्रत्ययः, ततो दक्षिणायां भवो=दाक्षिणात्यः, 'दक्षिणापश्चात्०' इति त्यण् । [2]तथा अपरा दिग् देशः कालो वा रमणीय इति वाक्ये 'अधरापराच्चात्' (७।२।११८) इति सूत्रेण आत् प्रत्ययः, 'पश्चोऽपरस्य दिक्पूर्वस्य चाति (७।२।१२४) इति सूत्रेण 'पश्च' इत्यादेशः, पश्चाद् भवः, ततोऽनेन त्यण् । [3]पूर्वा पूर्वो वा दिग् देशः कालो वा रमणीयः, 'पूर्वापराधरेभ्योऽसस्तातौ पुरवधश्चैषाम्' (७।२।११५) इति सूत्रेण असप्रत्ययः, पूर्वशब्दस्य च 'पुर्' इत्यादेशः ; पुरो भव इति वाक्ये 'दक्षिणापश्चा०' इति त्यण् । पश्चात्पुरस्शब्दसाहचर्याद् दक्षिणा इति दिग्शब्दोऽव्ययं वा गृह्यते । तेनेह न भवति– दक्षिणायां भवानि दुग्धादीनि दाक्षिणानि जुहोति इति प्रयोगः । अत्र दक्षिणाशब्दो यज्ञादिषु देयवस्तुगोहेन(? हेम)धनादिवस्तुवाची । दाक्षिणात्यः, अत्र सर्वादित्वाभावात् पुंवद्भावप्राप्तिरेव नास्ति, सर्वादौ हि दक्षिण इति शब्दः, न दक्षिणा ॥ १३ ॥

## वह्ल्यूर्दि-पर्दि–कापिश्याष्टायनण् ॥६।६।१४॥

म० वृ०–वह्लि–ऊर्दि–पर्दि–कापिशीभ्यः शेषेऽर्थे 'टायनण्' स्यात् । [1]वाह्लायनः, वाह्लायनी; एवं [2]और्दायनः, [3]पार्दायनः, [4]कापिशायनं मधु, कापिशायनी द्राक्षा ॥१४॥

---

अव०–[1]वह्लिर्देशविशेषः, वह्लिषु भवो=वाह्लायनः, एवमग्रेऽपि । [2]ऊर्दिः क्रीडा । [3]पर्दिः पर्दनम् । [4]कपिशाः मर्कटाः, कपिशा अत्र सन्ति, 'तदत्रास्ति' ( ६।२।७० ) इति अण् , ङी, कापिशी अटवी, कापिश्यां भवो भवा वा ॥ १४ ॥

## रङ्कोः प्राणिनि वा ॥६।३।१५॥

म० वृ०–रङ्कुशब्दात् प्राणिनि विशिष्टे शेषेऽर्थे 'टायनण्' स्यात् । [रङ्कुषु भवः=] राङ्कवायणः । पक्षेऽण्– राङ्कवो गौः । प्राणिनीति किम् ? राङ्कवः कम्बलः ॥१५॥

---

अव०–मनुष्ये तु प्राणिन्यपि कच्छादिपाठात् 'कच्छादेर्नृनृस्थे' (६।३।५५) इति परत्वाद् अकञेव, राङ्कवको मनुष्यः ॥१५॥

## क्वेहा-ऽमा-ऽत्र-तसस्त्यच् ॥६।३।१६॥

म० वृ०–क–इह–अमा इत्येतेभ्यः त्रतस्प्रत्ययान्तेभ्यश्च शेषेऽर्थे 'त्यच्' स्यात् । क भवः=] [1]क्वत्यः, [2]इहत्यः, [3]अमात्यः, तत्रत्यः, यत्रत्यः, [4]ततस्त्यः, [5]यतस्त्यः, [6]कुतस्त्यः । चकारस्त्यण्त्यचोः सामान्यग्रहणाविघातार्थः[7] ॥१६॥

---

अव०–[1]कस्मिन् क, [2]अस्मिन् इह, 'ककुत्रात्रेह' (७।२।९३) निपातः, निपातनात् किमः स्थाने क , त्रप्स्थाने अकार आदेशः ; इह (इति) अत्रापि इदमः स्थाने इ, त्रप्स्थाने ह । [3]अमा, कोऽर्थः सह भूपालेन एकान्ते भवतीत्यमात्यः । [4]तत आगतः=ततस्त्यः । [5]यत आगतो=यतस्त्यः । [6]किम् , कस्मात् , कुतः, 'किमद्व्यादि०' (७।२।८९) इत्यादिना तस् , 'इतोऽतः कुतः' ।।७।२।९०) इति सूत्रेण किम्स्थाने कुनिपातः, कुत आगतः=कुतस्त्यः ।[7] 'स्त्रज्ञाजभस्त्राऽधातु (२।४।१०८) इत्यादिषु ॥१६॥

## नेर्ध्रुवे ॥६।३।१७॥

म० वृ०–निशब्दात् ध्रुवे 'त्यच्' स्यात् । नित्यं ध्रुवम् ॥१७॥

---

अव०–निश्चिते काले भवः=नित्यम् ॥१७॥

## निसो गते ॥६।३।१८॥

म० वृ०–निस्शब्दाद् गतेऽर्थे 'त्यच्' स्यात् । निष्ट्यश्चण्डालः ॥१८॥

---

अव०–निर्गतो वर्णाश्रमेभ्य इति 'ह्रस्वान्नाम्नस्ति' (२।३।३४) इत्यनेन सकारस्य षकारः ।१८।

## ऐषमो-ह्यः-श्वसो वा ॥६।३।१९॥

म० वृ०–ऐषमस् ह्यस् श्वस् इत्येतेभ्यः

शेषेऽर्थे 'त्यच् वा' स्यात् । [1]ऐषमस्त्यम्, ह्यस्त्यम्, श्वस्त्यम् । पक्षे ऐषमस्तनम्, ह्यस्तनम्, श्वस्तनम् । 'श्वसस्तादिः' (६।३।८४) इतीकणपि– शौवस्तिकम्[2] ॥१९॥

अव०–[1]इदम्, अस्मिन् संवत्सरे–'ऐषमःपरुत्परारि वर्षे' (७।२।१००) इति निपातः, निपातनात् समसिण् प्रत्ययः, इदम्स्थाने ऐः, ऐषमो भवम्=ऐषमस्त्यम्, एवमग्रेऽपि । [2]श्वस्, श्वो भवं=शौवस्तिकम्, 'श्वसस्तादिः' इति इकण्, विचाले त्, 'द्वारादेः' (७।४।६) इति औ आगमः ॥१९॥

## कन्थाया इकण् ॥६।३।२०॥

म० वृ०–कन्था नाम ग्रामविशेषः[1] । कन्थायाः शेषेऽर्थे 'इकण्' स्यात् । कान्थिकः ॥२०॥

अव०–[1]प्रावरणविशेषश्च ॥२०॥

## वर्णावकञ् ॥६।३।२१॥

म० वृ०–वर्णुर्नाम ह्रदः, तत्समीपो देशोऽपि वर्णु, तत्र या कन्था ततः शेषे–'ऽकञ्' स्यात् । इकणोऽपवादः । कान्थकः ॥२१॥

अव०–काम्यते परासैः इति कन्थः, 'कमिमृगार्तिभ्यस्थः' (उ० २२५), कन्थायां भवः=कान्थिकः कान्थकश्च ॥२१॥

## रूप्योत्तरपदारण्याण्णः ॥६।३।२२॥

म० वृ०–रूप्योत्तरपदात् अरण्यशब्दाच्च शेषेऽर्थे 'णः प्रत्ययः' स्यात् । [1]वार्करूप्यः, वार्करूप्या । [2]आरण्याः सुमनसः पशवश्च । अन्तग्रहणेनैव सिद्धे उत्तरपदग्रहणं [3]बहुप्रत्ययपूर्वनिवृत्त्यर्थम्– [4]बाहुरूप्यी ॥२२॥

अव०–[1]वृकैः रूप्यते (=वृकरूप्यः) । केचिदेवमाहुः– वृकाः प्रकृता अस्मिन् (वृकरूप्यः), 'नृहेतुभ्यो रूप्यमयटौ वा' (६।३।१५६।इति) रूप्यप्रत्ययः । [2]अरण्ये भवाः सुमनसः पशवो वा आरण्याः । एवं शिवे राज्ञोऽपत्यानि– 'दुनादि०' (६।१।११८) इति ञ्यः, 'बहु०' (६।१।१२४) ञ्यलोपः, शिविभी रूप्यते=शैविरूप्यम्, शिवेन रूप्यते=शैवरूप्यम् । [3]बहुप्रत्ययेति उपलक्षणम्, रूप्यप्रत्ययान्तस्यापि निषेधः । [4]ईषदूनो रूप्यो=बहुरूप्यः, 'नाम्नः प्राग्बहुर्वा' (७।३।१२) इति बहु पूर्वं क्रियते, बहुरूप्ये भवा, अण्, ङी ॥२२॥

## दिक्पूर्वपदादनाम्नः ॥६।३।२३॥

म० वृ०–दिक्पूर्वपदादनाम्नः[1] शेषेऽर्थे 'णः' स्यात् । अणोऽपवादः । [2]पौर्वशालः, पौर्वशाला; आपरशालः [आपरशाला] । अनाम्न इति किम् ? [3]पूर्वैषुकामशमः ॥२३॥

अव०–[1]न विद्यते नाम यस्य असौ अनामा, तस्मात् । [2]पूर्वश्च शालश्च=पूर्वशालः । यदा पूर्वशब्दो देशकालवाची तदा पूर्वशालायां भवा– अण्, ङी; तदा पौर्वशाली इत्येव भवति । अत्र तु दिग्वाच्येव पूर्वशब्दः, तद्धिते द्विगुसमासनियमात् । पूर्वस्यां शालायां भवः– 'दिग्पूर्वपदादनाम्नः' इति णप्रत्ययः इति भावः, 'पुंवत्कर्मधारये' (३।२।५७) इति पुंवद्भावः । [3]प्राच्ये देशे इषुकामशमी इति नाम ग्रामः, ततः पूर्वा चासौ इषुकामशमी च, अपरा चासौ इषु०, पूर्वेषुकामशम्यां भवः=पूर्वैषुकामशमः, एवमपरैषुकामशमः, 'भवे' (६।३।१२३) अण्, 'प्राग्ग्रामाणाम्' (७।४।१७) इति उत्तरपदवृद्धिः ।२३।

## मद्रादञ् ॥६।३।२४॥

म० वृ०–मद्रान्तादिक्पूर्वपदाच्छेषेऽर्थे 'ऽञ्' स्यात् । पौर्वमद्रः, पौर्वमद्री ॥२४॥

अव०–पूर्वेषु मद्रेषु भवः=पौर्वमद्रः, अयमत्र विशेषः,– वक्ष्यमाणेन 'बहुविषयेभ्यः' (६।३।४५) इत्यनेन अकञ् प्राप्नोति, तं बाधित्वा 'वृजिमद्राद् देशात्कः' (६।३।३८) इत्यनेन कः प्रत्ययः प्रवर्त्तते, उभयस्यापि बाधकं 'मद्रादञ्' इति सूत्रं विहितम् । ननु केवलादेव मद्रशब्दात् अकञ्कविधिरिति

चेत्, तर्हि इदमेव 'मद्रादञ्' सूत्रं ज्ञापकं "सुसर्वार्धदिक्शब्देभ्यो जनपदस्य" इति न्यायस्य। अनेन न्यायेन तदन्तविधिर्ज्ञाप्यते, तेन सुपाञ्चालकः, सर्वपाञ्चालकः, अर्द्धपाञ्चालकः, पूर्वपाञ्चालकः, सुमागधकः, सुवृजिकः, सुमद्रकः इत्यादि सिद्धम्। यत्र दिक्पूर्वपदो मद्रशब्दः तत्र 'मद्रादञ्' इति सूत्रं प्रवर्त्तते, यत्र तु शेषे पूर्वपदं सुसर्वादिकं मद्रस्य भवति तत्र 'वृजिमद्राद् देशात् कः" (६।३।३८ इति सूत्रं प्रवर्त्तते, यथा– पौर्वमद्रः, आपरमद्रः, सुमद्रकः, सर्वमद्रक इति ॥२४॥

## उदग्ग्रामाद् यकृल्लोम्नः ॥६।३।२५॥

अ०वृ०–उदग्ग्रामवाचिनो यकृल्लोमन्शब्दाच्छेषे–'ऽञ्' स्यात्। [1]याकृल्लोमः ॥२५॥

अव०–[1]यकृत् कालोजम् (? कालेयम्), तदाकाराणि लोमानि यस्य, यकृल्लोमनि भवः ॥२५॥

## गौष्ठी-तैकी-नैकेती-गोमती-शूरसेन-वाहीक-रोमक-पटच्चरात् ॥६।३।२६॥

अ०वृ०–गौष्ठ्यादिभ्यः शेषेऽर्थे'ऽञ्' स्यात्। [1]गौष्ठः, [2]तैकः, [3]नैकेतः, गौमतः, शौरसेनः, [बहिर्भवः इति 'बहिषष्टीकण्' (६।१।१६), 'प्रायोऽव्ययस्य' (७।४।६५) इति अन्त्यस्वरादिलोपः, वाहीके भवः=] वाहीकः, रौमकः, पाटच्चरः ॥२६॥

अव०–गौष्ठः, तैकः, नैकेतः; एषु "वाहीकेषु ग्रामात्" (६।३।३६) इति णिक-इकणोः प्राप्तिः, तैकी, इह 'कखोपान्त्यकन्थापलद०' (६।३।५९) इत्यनेन ईयस्य (च प्राप्तिः), गौमत इत्यत्र 'ईतोऽकञ्' (६।३।४१) इति प्राप्तिश्च,'शौरसेनः' अत्र 'बहुविषयेभ्यः' (६।३।४५) इत्यकञः (प्राप्तिः), 'वाहीकः रौमकः' इत्यत्र 'दोरीयः'(६।३।३२) इत्यस्य प्राप्तिः, 'पाटच्चरः' अत्र 'रोपान्त्यात्' (६।३।४२) इत्यस्य (प्राप्तिः); एषां सर्वेषां बाधको 'गौष्ठि०' इत्यादिको योगः। [1]गोष्ठः [2]तिको [3]नैकेतो देवता अस्याः, 'देवता' (६।२।१०१) इत्यण्, ङी, गौष्ठ्यां तैक्यां नैकेत्यां भवः ॥ २६ ॥

## शकलादेर्यञः ॥६।३।२७॥

अ०वृ०–[गर्गाद्यन्तर्गणः शकलादिः]। शकलादिभ्यो यञन्तेभ्यः शेषेऽर्थे 'इञ्' स्यात्। ईयस्यापवादः। [1]शाकलाः। यञ इति किम्? शाकलीयम् [2] ॥२७॥

अव०–[1]शकल, शकलस्यापत्यम, 'गर्गादेर्यञ्' (६।१।४२), शाकल्यस्य इमे च्छात्राः शाकलाः, 'शकलादेर्यञः' इत्यञ्, 'तद्धितयस्वर०' (२।४।९२) इति यञो लोपः। [2]तथा शकलो देवता अस्य शाकलः, तस्येदं शाकलीयम् ॥२७॥

## वृद्धेञः ॥६।३।२८॥

अ०वृ०–वृद्धे य इञ् विहितः तदन्तात् शेषेऽर्थे–'ऽञ्' स्यात्। ईयस्यापवादः। [1]दाक्षाः। वृद्धे इति किम्? सौतङ्गमीयः[2] ॥२८॥

अव० [1]दक्षस्यापत्यं वृद्धं दाक्षिः, दाक्षेः इमे च्छात्रा दाक्षाः। [2]सुतं गच्छति, 'नाम्नो गमः०'(५।१।१३१) खः, सुतङ्गमेन निर्वृता, 'सुतङ्गमादेरिञ्' (६।२।८५) इञ्, 'इञ इतः'(२।४।७१) ङी, सौतङ्गमी नगरी, तस्यां भवः सौतङ्गमीयः, 'दोरीयः' (६।३।३२) ॥ २८ ॥

## न द्विस्वरात् प्राग्भरतात् ॥६।३।२९॥

अ०वृ०–प्राच्यगोत्रवाचिनो भरतगोत्रवाचिनश्च नाम्नो वृद्धेञन्ताद् द्विस्वराद् 'अञ् न' स्यात्। पूर्वेण प्राप्तस्य प्रतिषेधः। प्राचः,–चैङ्कीयाः,[1] पौष्पीयाः[2]। भरतात्,–[3]काशीयाः, [4]वाशीयाः। द्विस्वरादिति किम्? [5]पान्नागाराः ॥ २९ ॥

अव० [1]चिङ्क, [2]पुष्प; चिङ्कस्य पुष्पस्यापत्यं वृद्धं– बाह्वादित्वादिञ्, चैङ्किरिमे छात्राः (पौष्पेरिमे छात्राः)। [3]काश, [4]वाश; काशस्य वाशस्य वृद्धमपत्यम्–'अत इञ्' (६।१।३१), काशिषु भवा वाशिषु भवा। [5]पन्नं पतितमगारं येषां ते पन्नागाराः, तस्यापत्यम्–'अत इञ्', पान्नागारेरिमे च्छात्राः–'वृद्धेञः' अञ् ॥२९॥

## भवतोरिकणीयसौ ॥६।३।३०॥

म०वृ०-भवतुशब्दाच्छेषेऽर्थे 'इकण् ईयस्' भवतः। ईयापवादः। [1]भवतो भवत्या वा इदं=भावत्कम्,[2] भावत्की ; भवदीयः, भवदीया। [ईयसः] सकारो 'नाम सिदय्०' (१।१।२१) इत्यत्र कार्यार्थः। [3]उकारान्तग्रहणात् शत्रन्तान्न भवति,-[ भवतीति भवन् ] भवत इदं भावतम् ॥३०॥

अव०[1]भवतुशब्दः।[2]'भावत्कम्', अत्र इकण्, 'अवर्णोवर्ण०' (७।४।७१) इकारलोपः। भावत्कम् (इति) अत्र卐 स्त्रीत्वविवक्षायां 'जातिश्च णितद्धित०' (३।२।५१) इति पुंवद्भावः। [3]सूत्रे भवतु इति पाठात् उणादिनिष्पन्नो भवतु सूत्रेऽस्ति ॥३०॥

## पर-जन-राज्ञोऽकीयः ॥६।३।३१॥

म०वृ०-एभ्यः शेषे-'ऽकीयः' स्यात्। परस्यायं परकीयः, जनकीयः, राजकीयः। अकारः पुंवद्भावार्थः,-राज्ञ्या इदं राजकीयम् ['जातिश्च णि०' (३।२।५१) इति पुंवद्भावः]। स्वकीयम्, देवकीयमिति तु स्वकदेवकयोर्गहादित्वात् सिद्धम्[1]॥३१॥

अव०-[1]स्वकदेवकशब्दौ गहादिगणे स्तः इति गहादित्वात् ईयः ॥३१॥

## दोरीयः ॥६।३।३२॥

म०वृ०-दुसंज्ञकाच्छेषेऽर्थे 'ईयः' स्यात्। [ देवदत्तस्यायं= ] देवदत्तीयः, जिनदत्तीयः। [तस्यायं=] तदीयः, यदीयः, गार्गीयः। अणपवादो योगः। [दोरिति किम्? सभासन्नयने भवः=,साभासन्नयनः] ॥३२॥

## उष्णादिभ्यः कालात् ॥६।३।३३॥

म० वृ०-उष्णादिपूर्वपदात् कालान्ताच्छेषेऽर्थे 'ईयः'। [1]उष्णकालीयम्, [2]शीतकालीयम् ॥३३॥

अव० [1]उष्णश्च कालश्च अथवा उष्णः कालो यत्र, उष्णकाले जातो भवो वा (उष्णकालीयम्)। एवं [2]शीतकालीयम् ॥३३॥

## व्यादिभ्यो णिकेकणौ[1] ॥६।३।३४॥

म० वृ०-वि इत्यादिभ्यः परो यः कालस्तदन्ताच्छेषे 'णिक-इकणौ' भवतः। उभयोः स्त्रियां [2]विशेषः। [3]वैकालिकः, वैकालिका, वैकालिकी। [4]आनुकालिकः, [आनुकालिका, आनुकालिकी]। [5]ऐदंकालिका। व्यादयः प्रयोगगम्याः ॥३४॥

अव० [1]णिकश्च इकण् च। [2]इकणि सति ङी भवति, न णिके (इति) अयं विशेषः। वैकालिकः, वैकालिका, वैकालिकी। आनुकालिकः, आनुकालिका आनुकालिकी। अतः परं प्रयोगद्वयमेव- ऐदंकालिका, ऐदंकालिकी। धौमकालिका, धौमकालिकी। आपत्कालिका, आपत्कालिकी। साम्पत्कालिका, साम्पत्कालिकी। कौपकालिका, कौपकालिकी। क्रौधकालिका, क्रौधकालिकी। और्ध्वकालिका, और्ध्वकालिकी। पौर्वकालिका, पौर्वकालिकी। तावत्कालिका, तावत्कालिकी। क्षौरकालिका, क्षौरकालिकी। इति व्यादिप्रयोगमाला। [3]विरुद्धो विगतो वा विशिष्टो वा कालः (=विकालः), विकाले भवः। [4]कालमनुगतः कालस्यानुरूपः कालस्य सादृश्यं वा=अनुकालम्, तत्र भवः। [5]अयं चासौ कालश्च इदंकालः, इदंकाले भवम्(? भवा) ॥३४॥

## काश्यादेः ॥६।३।३५॥

म० वृ०-दोरिति वर्त्तते। पूर्वयोगयोस्तु न सम्बध्यते, असम्भवात् [फलाभावात् ][1]। काश्यादिभ्यो दुसंज्ञकेभ्यः शेषेऽर्थे 'णिक-इकणौ' स्तः। काशिषु भवः=काशिकः, काशिका, काशिकी। [2]दैवदत्तिका, दैवदत्तिकी ॥३५॥

अव०-[1]पूर्वयोगयोर्गणपाठबलात् दुसंज्ञाऽदुसंज्ञकानां प्रवृत्तिर्भवति, काश्यादेः (६।३।३५) अनेन दुसंज्ञानामेव। काशि, देवदत्त, चेदि, सां-

卐 भवत्या इदमिति स्त्रीत्वविवक्षायाम्।

याति, सांवाह, अच्युत, मोदमान, श्वकुलाल, शकुलाद, (हस्तिकर्षू,) कौनाम, हिरण्य, करण, हैहिरण्य, करणे, अरिंदम, सधमित्र, दाशमित्र, दासमित्र, दासग्राम, गौवाशन, गौवासन, तारङ्गि, भारङ्गि, युवराज, उपराज, देवराज इति काश्यादिगणः । [२]देवदत्त इति नामा ग्रामः प्राग्देशे वाहीकदेशेऽपि उभयत्रास्ति, प्राग्ग्रामे देवदत्तस्य दुसंज्ञा, न वाहीके देवदत्तग्रामस्य दुसंज्ञा इत्युदाहरणानि तथा दर्शितानि सन्ति । देवदत्तशब्दस्य प्राग्देशे एव दुसंज्ञा भवति, न वाहीकदेशे । अत एव 'वाहीकेषु ग्रामा'—दिति (६।३।३६ सूत्रप्रान्ते दोरित्येव– दैवदत्त इति व्यावृत्त्युदाहरणं दर्शितम् . वाहीकेषु दुसंज्ञाभावात् देवदत्तग्रामस्य ॥३५॥

## वाहीकेषु ग्रामात् ॥६।३।३६॥

म० वृ०–वाहीकदेशे ग्रामवाचिभ्यो दुसंज्ञकेभ्यः शेषे 'णिक-इकणौ' स्तः । सैपुरिकः, सैपुरिका, सैपुरिकी; स्कौनगरिकः, [१]आरात्कः, आरात्का, आरात्की । दोरित्येव– देवदत्तं नाम वाहीकग्रामः, तत्र जातो=[२]दैवदत्तः ॥३६॥

---

प्रव०–[१]अरीणां समूहः=आरम्, आरमतति अत्ति वा क्विप्, आराति भवः=आरात्कः, 'ऋवर्णोवर्ण०' (७।४।७१) इति इकस्य इलोपः ॥३६॥

## वोशीनरेषु ॥६।३।३७॥

म० वृ०–उशीनरग्रामशब्देभ्यो दुसंज्ञकेभ्यो 'णिक-इकणौ वा' स्तः, शेषे । सौदर्शनिकः, सौदर्शनिका, सौदर्शनिकी । । पक्षे सौदर्शनीयः ॥३७॥

---

प्रव०– सुदर्शना देवता अस्य– अण्, तत्र भवः ॥३७॥

## वृजिमद्राद् देशात्कः ॥६।३।३८॥

म० वृ०–वृजिमद्रशब्दाभ्यां देशवाचिभ्यां शेषेऽर्थे 'कः' स्यात् । [१]राष्ट्राकञोऽपवादः । दोरिति निवृत्तम् । [वृजिषु भवः=] वृजिकः, केवलमद्रात् [केवलमद्रशब्दात्– मद्रेषु भवः= ] मद्रकः, सुसर्वार्धदिग्शब्देभ्यो जनपदवाचिनः प्रत्ययो भवति । तत्र दिक्पूर्वपदाच मद्रादञ् भवति ['मद्रादञ्' ( ६।३।२४ ) इत्यनेन अञ् भवतीति सम्बन्धः ] । शेषपूर्वपदान्मद्रात् अयमेव कः प्रत्ययो भवति । सुमद्रकः, सर्वमद्रकः, अर्द्धमद्रकः । सुवृजिकः, पूर्ववृजिक, अपरवृजिकः ॥३८॥

---

प्रव०–[१]'बहुविषये०' ( ६।३।४५ ) इति सूत्रविहिताकञः ॥३८॥

## उवर्णादिकण् ॥६।३।३९॥

म० वृ०–उवर्णान्ताद् देशवाचिनः शेषे 'इकण्' स्यात् । अणोऽपवादः । परत्वादयं योग ईय–णिक-इकणोऽपि ['दोरीयः' (६।३।३२) 'वाहीकेषु ग्रामात्' (६।३।३६) इति विहितान्] बाधते । [१]शावरजम्बुकः ॥३९॥

---

प्रव०–[१]'जायन्ते मधुरफलानि यस्यां सा जम्बूः, 'कमिजनिभ्यां बूः' (उ० ८४७), शबरोपलक्षिता जम्बूः=शवरजम्बूः, तत्र भवः, 'उवर्णादिकण्', 'ऋवर्णोवर्ण०' ( ७।४।७१ ) इति इकण इकारलोपः, पश्चात् 'ङ्यादीदूतः के' ( २।४।१०४ ) इति ह्रस्वः । ऐक्ष्वाकः, इक्ष्वाकोरपत्यम्, 'राष्ट्रक्षत्रियात्०' (६।१।११४ ) इत्यञ् । अथ इक्ष्वाकोरिदमैक्ष्वाकः, 'कोपान्त्याच्चाण्' ( ६।३।५६ ), 'मारवैक्ष्वाकमैत्रेय०' (७।४।३०) इत्यादिना उकारलोपः । ऐक्ष्वाक इत्यत्र अणेव, नेकण् । देशादित्येव– पटोश्छात्राः= पाटवाः, तस्येदमण् ॥ ३९ ॥

## दोरेव प्राचः ॥६।३।४०॥

म० वृ०–शरावत्याः [ शरयू नदी ] प्राच्यां दिशि देशः=प्राग्देशः, तद्वाचिन उवर्णान्ताद् दुसंज्ञकादेव शेषे 'इकण्' स्यात् । [१]आषाढजम्बुकः । एवकार इष्टावधारणार्थः । दोः प्राच एव नियमो मा भूत् ॥४०॥

---

प्र०व–[१]आषाढजम्ब्वां भवः, शेषं शावरजम्बुक इतिवत् साध्यम् ॥४०॥

## ईतोऽकञ् ॥६।३।४१॥

म॰ वृ॰–दोः प्राच इति च वर्त्तते । ईकारान्तात् प्राग्देशवाचिनो दुसंज्ञकात् शेषेऽर्थे–'ऽकञ्' स्यात् । काकन्द्यां भवः काकन्दकः, माकन्दकः ॥४१॥

## रोपान्त्यात् ॥६।३।४२॥

म॰ वृ॰–रेफोपान्त्यात् प्राग्देशवाचिनो दुसंज्ञकाच्छेषे–'ऽकञ्' स्यात् । ईयस्यापवादः । पाटलीपुत्रकः, ऐकचक्रकः [ एकचक्र इति प्राग्देशे दुसंज्ञः ] ॥४२॥

## प्रस्थ-पुर-वहान्त-योपान्त्य-धन्वार्थात् ॥६।३।४३॥

म॰ वृ॰–दोर्देशादिति च वर्त्तते । प्रस्थ, पुर, वह इत्यन्ताद्, यकारोपान्त्याद् धन्ववाचिनश्च देशवाचिन दुसंज्ञकाच्छेषे–'ऽकञ्' स्यात् । धन्वन् शब्दो मरुदेशवाची [ देशवाचित्वात् पुंल्लिङ्गः ] । प्रस्थान्त,- मालाप्रस्थकः, वाणप्रस्थकः [ मालाप्रस्थः बाणप्रस्थो देवता अस्य– अण् , तत्र भवः ] । पुरान्त,- नान्दीपुरकः, [ नान्द्याः पुरम् तत्र भवः ] । वहान्त,- [1]कौकुटीवहकः । योपान्त्य,- साङ्काश्यकः, काम्पील्यकः, माणिरूप्यकः [ माणिरूप्ये जातः ] । धन्ववाचि,- [2]पारेधन्वकः, [3]ऐरावतकः ॥४३॥

---

अव॰–कामप्रस्थीय इत्यत्र गहादित्वादीयः । [1]कुकुटीं वहति=कुकुटीवहः; लिहाद्यच् , एवं कुत्सितौ कुचौ यस्याः सा कुकुची, 'असहनञ्विद्यमान॰' (२।४।३८) इति ङी, कुकुचीं वहति– लिहाद्यच् , कुकुटीवहे कुकुचीवहे भवा– अकञ् । सूत्रे पुरग्रहणमप्राच्यार्थम् । प्राच्यपुरशब्दात् पुनः रोपान्त्यादित्यनेनैव सिद्धम् । अत एव इह 'प्रस्थपुरवहा॰' इति सूत्रे प्राच इति नानुवर्त्तते । ईयबाधनार्थं प्रस्थपुरेति वचनं कृतम् । [2]धन्वनि पारे=पारेधन्वा, "नाम्नि" ( ३।१।९४ ) इति समासः, पारेधन्वनि भवः=पारेधन्वकः । [3]इरावत्या नद्या अदूरे भवः- अण् , तत्र भवः ॥४३॥

## [1]राष्ट्रेभ्यः ॥६।३।४४॥

म॰ वृ॰–दोर्देशादिति च वर्त्तते । राष्ट्रेभ्यो देशेभ्यो दुसंज्ञकेभ्यः शेषे–'ऽकञ्' स्यात् । ईयापवादः । [2]आभिसारकः, [3]आदर्शकः । राष्ट्रसमुदायो राष्ट्रग्रहणेन न गृह्यते । तेनेह नाकञ् ,– काशिकोशलीयाः ॥४४॥

---

अव॰–[1]राष्ट्रेभ्य इत्यत्र बहुवचनं अकञ्-प्रत्ययस्य प्रकृतिबहुत्वं द्योतयत् अपवादविषयेऽपि प्रापणार्थम् । तेनेहापि अकञ् ,– अभिसारगर्त्तकः, अत्र गर्त्तोत्तरपदलक्षण ईयो न भवति इति विशेषः । [2]अभिसारस्यादूरभवः- अण् , आभिसारे भवः । [3]आदर्शे भवः ॥४४॥

## बहुविषयेभ्यः ॥६।३।४५॥

म॰ वृ॰–दोरिति निवृत्तम् , योगविभागात् । अतः परं दोरदोश्च विधानम् । देशादिति तु वर्त्तते । राष्ट्रेभ्यो [ =देशेभ्यः ] [1]बहुत्वविषयेभ्यः शेषे-'ऽकञ्' स्यात् । अणाद्यपवादः । अङ्गेषु जातः=आङ्गकः, वाङ्गकः, काळञ्जरकः, त्रैगर्त्तकः[2] ॥४५॥

---

अव॰-[1]'बहुत्वविषयेभ्य' इत्यत्र बहुवचनमपवादविषयेऽपि प्रापणार्थम् । तेन त्रिगर्त्तेषु ( जातः= ) त्रैगर्त्तकः, अत्र 'गर्त्तोत्तर॰' ( ६।३।५७ ) इति ईयो बाध्यते । [2]एवं कम्बुर्देवता एषां– 'देवता' ( ६।२।१०१) इति अणः, काम्बवेषु जातः=काम्बवकः ॥४५॥

## धूमादेः ॥६।३।४६॥

म॰ वृ॰–देशादिति वर्त्तते । धूमादिभ्यो देशवाचिभ्यः शेषे–'ऽकञ्' स्यात् । अणाद्यपवादः । धूमे भवो=धौमकः ॥४६॥

---

अव॰–धूम, ( षडण्ड, षडाण्ड, ) अवतण्ड, त्वण्डक, वतण्डव, शशादन, अर्जुन, आर्जुनाव, दाण्डायन, स्थली, दाण्डायनस्थली, मानकस्थली, आनकस्थली, माहकस्थली, मद्रकस्थली, घोषस्थली,

राजस्थली, अट्टस्थली, मानस्थली, माणवकस्थली, राजगृह, सत्रासाह, सात्रासाह, भक्ष्यादी, भक्ष्यली, भक्ष्याली, भद्राली, मद्रकुल, अञ्जीकुल, द्व्याहाव, त्र्याहाव, द्वियाहाव, त्रियाहाव, (सस्फोय, बर्बेड,) गर्त्त, बर्ज्य, शकुन्ति, विनाद, ( इमकान्त, विदेह, आनर्त, वादूर ,) खाडूर, माठर, पाठेय, पाथेय, घोष, घोषमित्र, शिष्य, वणिय, पल्ली, अराज्ञी, आराज्ञी, धार्त्तराज्ञी, धार्त्तराष्ट्री, धार्त्तराष्ट्र, तीर्थकुक्षि, समुद्रकुक्षि, द्वीप, अन्तरीप, अरुण, उज्जयिनी, दक्षिणापथ, साकेत, अवया इति धूमादिगणः ॥४६॥

## सौवीरेषु कूलात् ॥६।३।४७॥

म० वृ०–सौवीरदेशवाचिनः कूलशब्दाच्छेषेऽर्थे–'ऽकञ्' स्यात् । कौलेयः सौवीरेषु । कौलोऽन्यत्र ॥ ४७ ॥

## समुद्रान्नृ-नावोः ॥६।३।४८॥

म० वृ०–समुद्रशब्दाद् देशवाचिनः शेषेऽर्थे-'ऽकञ्' स्यात् , प्रत्ययान्तवाच्यो यदि ना=मनुष्यो नौर्वा भवति । [समुद्रे भवः=] सामुद्रको मनुष्यः, सामुद्रिका नौः । नृनावोरिति किम् ? सामुद्रं लवणम् [भवे (६।३।१२३) अण् ] ॥४८॥

## नगरात्कुत्सा-दाक्ष्ये ॥६।३।४९॥

म०वृ०–नगरशब्दाद् देशवाचिनः शेषे-'ऽकञ्' स्यात् , [1]कुत्सायां [2]दाक्ष्ये च गम्यमाने । केनाय मुषित इह नगरे मनुष्येण सम्भाव्यते [एतत्सूत्रोदाहरणम् ]। एतन्नागरके चौरा हि नागरका भवन्ति । केनेदं चित्रं लिखितमिह नगरे मनुष्येण सम्भाव्यते । एतन्नागरके दाक्षा हि नागरका भवन्ति । कुत्सादाक्ष्ये इति किम् ? नागरः पुरुषः ॥ ४९ ॥

अव०–[1]कुत्सनं=कुत्सा, 'भीषिभूषिचिन्ति०' (५।३।१०९) इति बहुवचनादङ् , कुत्सनमिति च बाहुलकात् भवति, कुत्सा=निन्दा, तस्यां गम्यमानायाम् । [2]दाक्ष्यं=नैपुण्यम् , तस्मिन् गम्यमाने । कुत्सादाक्ष्यादन्यत्र संज्ञाशब्दान्नगरात्तु कत्र्यादिपाठादेयकञ् ,– नागरेयकः ॥४९॥

## कच्छा-ऽग्नि-वक्त्र-वर्त्तोत्तरपदात् ॥६।३।५०॥

म० वृ०–कच्छ, अग्नि, वक्त्र, वर्त्त इत्येतदुत्तरपदाद् देशार्थात् [देशवाचिनः] 'अकञ्' स्यात् । ईयाणोरपवादः[1] । [2]भरुकच्छे भवो=भारुकच्छकः, [3]पैप्पलीयकच्छकः, काण्डाग्नकः, [4]ऐन्दुवक्त्रकः, [5]बाहुवर्त्तकः, [6]चाक्रवर्त्तकः । उत्तरपदग्रहणमबहुप्रत्ययपूर्वार्थम् ,– [7]बहुकच्छो देशः ॥५०॥

अव०–[1]पूर्वपदस्य दुसंज्ञकत्वे ईयस्य प्राप्तस्य अन्यत्र तु अणः प्राप्तस्यापवादोऽयं योगः । [2]भरुनामा ऋषिविशेषस्तस्य कच्छं वनं=भरुकच्छम् , भरुकच्छे भवः । [3]पिप्पलानामदूरभवः– 'उत्करादेरीयः' (६।२।९१) । [4]इन्दुवत् वक्त्रं यस्य । [5]बाहुकृतो वर्त्तो यस्य, बाहुवर्त्ते भवः । [6]चक्रवत् भ्रास्यन् वर्त्तो वृत्तिर्यस्य । [7]ईषदसमाप्तः कच्छो=बहुकच्छो देशः, 'नाम्नः प्राक्०' (७।३।१२) इति बहु पूर्वम् ।५०।

## अरण्यात्पथि-न्याया-ऽध्यायेभ-नर-विहारे ॥६।३।५१॥

म०वृ०–अरण्याद् देशवाचिनः पथ्यादिषु शेषेऽर्थे–'ऽकञ्' स्यात् । [अरण्ये भवः=] आरण्यकः पन्थाः, [1]न्यायः, अध्यायः, इभः,[2] नरो[3] विहारो वा । पथ्यादाविति किम् ? [4]आरण्याः सुमनसः पशवो वा ॥५१॥

अव०–[1]आरण्यको न्यायः । एवमग्रेऽपि । [2]आरण्यक इभो=गजः । [3]आरण्यको नरो=मनुष्यः । [4]'रूप्योत्तरपदारण्याण्णः' (६।३।२२) इत्यनेन णः– आरण्याः पशवोऽमी ॥५१॥

## गोमये वा ॥६।३।५२॥

म० वृ०-आरण्याद्गोमये वाच्ये शेषे– 'ऽकञ्' वा स्यात् । आरण्यका [अकञ् ] गोमयाः[1] । आरण्यानि गोमयानि[1] ['रूप्योत्तर०' (६।३।२२) इति णः] ॥ ५२ ॥

अव०–[१]गोमयशब्दः पुंनपुंसकः ❀ इति लिङ्ग-द्वये प्रयोगोऽयम् ॥५२॥

## कुरु-युगन्धराद्वा ॥६।३।५३॥

म० वृ०–कुरुयुगन्धरशब्दाभ्यां देशवाचिभ्यां शेषे– 'ऽकञ् (वा)' स्यात् । [कुरुषु भवः=] कौरवकः अकञ्, कौरव ['कोपान्त्याच्चाण्' ।६.३.५६]। यौगन्धरकः, यौगन्धरः [भवे (६।३।१२३) अण्] ॥ ५३ ॥

अव०–कुरुयुगन्धरशब्दावेतौ राष्ट्रबहुविषयौ च । तत्र युगन्धरशब्दात् 'बहुविषयेभ्यः' (६।३।४५) इत्यनेन नित्यमकञि प्राप्ते विकल्पोऽयं कृतः । कुरुशब्दस्य 'बहुविषयेभ्य' इत्यकञः कच्छाद्यणा बाधितस्य पुनरकञः प्रसवार्थमत्र 'कुरुयुग०' (६।३।५३) इति सूत्रे पाठः, एवं सति 'कुरुयुग०' (६।३।५३) इत्यनेन विकल्पः सिद्ध एव । युगन्धरार्थात्तु विभाषा । नृनृस्थयोस्तु कुरोः परत्वादकञेव,– कौरवको मनुष्यः, कौरवकमस्य मनुष्यस्य जल्पितम्, कच्छादेर्नृ० (६।३।५५) अकञ् । 'कुरुयुग०' (६।३.५३) इति सूत्रे अयं विशेषो मन्तव्यः ॥५३॥

## साल्वाद्गोयवाग्वपत्तौ ॥६।३।५४॥

म० वृ०–साल्वाद् देशवाचिनो गवि यवाग्वां पत्तिवर्जिते च मनुष्ये शेषेऽर्थे–'ऽकञ् वा' स्यात् । साल्वको गौः । साल्विका यवागूः । साल्वको मनुष्यो वा । गोयवाग्वपत्ताविति किम् ? साल्वा व्रीहयः, साल्वः पत्तिः ['कोपान्त्याच्चाण्' (६।३।५६) ॥ ५४ ॥

अव०–अपत्तीति पत्तिप्रतिषेधात् तत्सदृशे मनुष्ये विधिः प्रवर्त्तते ॥५४॥

## कच्छादेर्नृ-नृस्थे ॥६।३।५५॥

म० वृ०–कच्छादिभ्यो देशवाचिभ्यो नरि=मनुष्ये नृस्थे=मनुष्यस्थे शेषेऽर्थे–'ऽकञ्' स्याद् । अणोऽपवादः ['कोपान्त्याच्चाण्' (६।३।५६) इति विहितस्याणः] । काच्छको मनुष्यः । काच्छकमस्य [मनुष्यस्य] हसितम्, जल्पितम्, ईक्षितम् । काच्छिका चूला [चूला चूडा शिखा] । एवं सैन्धवको[१] मनुष्यः । सैन्धवकमस्य [मनुष्यस्य] जल्पितम् । नृनृस्थ इति किम् ? काच्छो गौः, सैन्धवं लवणम् ॥५५॥

अव०–[१]सिन्धुदेशे भवः=सैन्धवकः मनुष्यः । कच्छ, सिन्धु, वर्णु, मधुमत्, कम्बोज, साल्व, कुरु, अनुषण्ड, अनूषण्ड, कश्मीर, विजापक, द्वीप, अनूप, अजवाह, (कुलूत,) रङ्कु, गन्धार, साल्वेय, यौधेय, सस्थाल, सिन्धवन्त इति कच्छादिगणः । कच्छादयो राष्ट्रशब्दाः ये बहुविषयास्तेभ्यो 'बहुवि०' (६।३।४५) अकञ् सिद्ध एव, उत्तरेण तु अणा बाधो मा भूदिति पुनरकञ् क्रियते । वर्णुसिन्धुभ्यां 'उवर्णादिकण्' (६।३।२९।इति) प्राप्तिस्तदपवादे च कच्छादणि प्रवर्त्तमाने,कुरोस्तु 'कुरुयुग०' (६।३।५३) इत्यनेन विकल्पे, विजापकस्य 'कोपान्त्याच्चाण्' (६।३।५६) इत्यणि, कच्छस्यौत्सर्गिकाणि प्राप्तौ, अयमकञो विधिः ॥ ५५ ॥

## कोपान्त्याच्चाण् ॥६।३।५६॥

म०वृ०–देशादित्येव वर्त्तते, न नृनृस्थ इति । कोपान्त्यात् चकारात् कच्छादेश्च शेषेऽर्थे–'ऽण्' स्यात् । इकणकञोरपवादः । [१]आर्षिकः, [२]ऐक्ष्वाकः । कच्छादेः,– काच्छः, सैन्धवः ॥५६॥

अव० [१]ऋषिभिस्तुल्या=ऋषिका, 'तस्य तुल्ये कः०' (७।१।१०८), ऋषिका जनपदः, तेषु जातः आर्षिकः । [२]इक्ष्वाकौ जातः इक्ष्वाकोरयं (वा)– 'कोपान्त्या०' (६।३।५६) इत्यण्, 'सारवैक्ष्वाकमैत्रेय०' (७।४।३०) इति उकारलोपः ॥५६॥

## गर्त्तोत्तरपदादीयः ॥६।३।५७॥

म०वृ०–गर्त्तोत्तरपदाद् देशवाचिनः शेषेऽर्थे 'ईयः' स्यात् । अणोऽपवादः । वृकगर्त्तीयः, शृगाल-

❀ हैमलिङ्गानुशासने पुन्नपुंसकलिङ्गप्रकरणे चतुर्विंशतितमं श्लोकं यद्वा अमरकोशे द्वितीयकाण्डे वैश्यवर्गे पञ्चाशत्तमं श्लोकं पश्यन्तु ।

गर्गीयः । उत्तरपदग्रहणं बहुप्रत्ययपूर्वनिरासार्थम् ,– बाहुगर्गः ॥५७॥

## कटपूर्वात् प्राचः ॥६।३।५८॥

म०वृ०–कटपूर्वपदात् प्राग्देशवाचिनो नाम्नः शेषे 'ईयः' स्यात्[1] । [2]कटनगरीयः, [3]कटग्रामीयः, कटघोषीयः [4] [आभीरपल्ली] ॥५८॥

अव० [1]अणोऽपवादः । [2]कटस्य नगरम् ,[3] (कटस्य) ग्रामः, कटनगरे भवः (कटग्रामे भवः) । [4]आभीर-पल्ली ॥५८॥

## क-खोपान्त्य-कन्था-पलद-नगर-ग्राम-ह्रदोत्तर-पदाद्दोः ॥६।३।५९॥

म० वृ०–ककारखकारोपान्त्यात् कन्थापलद-नगरग्रामह्रद इत्येतदुत्तरपदाच्च देशार्थात् दुसंज्ञकाच्छेषे 'ईयः' स्यात् । [1]बाधकबाधनार्थ आरम्भः । [2][कोपान्त्यात्–] [3]आरीहणकीयः, [4]आश्वत्थिकीयः, [5]आष्टकीयः, [6]ब्राह्मणकीयः । [7]खोपान्त्यात् ,– [8]कौटशिखीयः । [9]कन्थापलदेति-, दाक्षिकन्थीयः, [10]माहकिकन्थीयः; दाक्षिपलदीयः, दाक्षिनगरीयः, दाक्षिग्रामीयः, दाक्षिह्रदीयः,माहकिह्रदीयः । दोरिति किम् ? [11]आर्षिकः, [12]माडनगरः ॥५९॥

अव० [1]'दोरीयः' (६।३।३२) इत्यस्य ये बाधकाः प्रत्ययाः तद्बाधनार्थम् ।[2]कोपान्त्यात्परतः 'कोपान्त्याच्चाण्' (६।३।५६) प्राप्तौ वचनम् । [3]आरीहणाच्चातुरर्थिकः 'अरीहणादेरकण्'(६।२।८३), तत ईयः । [4]"अश्वत्थादेरिकण्' (६।२।९७) । एवं शाल्मलिकीयः। [5]अष्टन् , 'कै गै रै शब्दे', अष्टौ कायन्ति, 'आतो डोऽह्वावामः' (५।१।७६) इति डे अष्टकाः, अष्टका अत्र सन्ति– अण् । [6]ब्राह्मण, ब्राह्मणेभ्योऽचिरोद्धृतो देशः, "ब्राह्मणाद्वाम्नि" (७।१।१८४) कः, ब्राह्मणकीयः । एवं बालकीयः, बालः एव बालकः, यावादित्वात्कः,बालके नगरे भवो=बालकीयः । [7]खोपान्त्यशब्देभ्यो वाहीकग्रामलक्षणयोर्णिकेकणोर्बाधनार्थमीयो विहित इति सम्बन्धः । [8]कूटानां शिखा अत्र सन्ति।[9]कन्थापलदोत्तरपदादपि णिकेकणोर्बाधनार्थं योगोऽयम् । [10]महतीति माहकः, माहकस्यापत्यम्– 'अत इञ्' (६।१।३१), माहकीनां कन्था, एवं पलदं नगरं ग्रामः ह्रदो वा, माहकिकन्थायां (भवः=माहकिकन्थीयः, एवं) माहकिपलदीयः, माहकिनगरीयः, माहकिग्रामीयः । [11]ऋषिकेषु भवः 'कोपान्त्या०' अण् । [12]मडनगरे भवो=माडनगरः ॥५९॥

## पर्वतात् ॥६।३।६०॥

म० वृ०–पर्वतान् देशार्थात् [=देशवाचिनः] शेषे 'ईयः' स्यात् । अणोऽपवादः । पर्वतीयो राजा पुमान् वा ॥६०॥

## अनरे वा ॥६।३।६१॥

म० वृ०–पर्वताद् देशवाचिनो नरवर्जिते शेषेऽर्थे 'ईयः' स्याद्वा । पर्वतीयानि पार्वतानि फलानि, [एवं पर्वतीयं पार्वतं जलम् । अनर इति किम् ? पर्वतीयो मनुष्यः ] ॥६१॥

## पर्ण-कृकणाद्भारद्वाजात् ॥६।३।६२॥

म० वृ०–पर्णकृकणाभ्यां भारद्वाजवाचिभ्यां [=भारद्वाजदेशवाचिभ्यां] शेषे 'ईयः' स्यात् । पर्णीयः, कृकणीयः ॥६२॥

## गहादिभ्यः ॥६।३।६३॥

म० वृ०–गहादिभ्यो देशवाचिभ्यः शेषेऽर्थे 'ईयः' स्यात् । अणाद्यपवादः । गहीयः [बहुवचनमाकृतिगणार्थम्] ॥६३॥

अव०–गह, अन्तस्थ, अन्तस्था, सम, विषम, उत्तम,अङ्गमगध, शुक्लपक्ष, पूर्वपक्ष, अपरपक्ष, कृष्णशकुन, अधमशाख, उत्तमशाख, समानशाख, एकशाल, समानग्राम, एकग्राम, एकवृक्ष, एकपलाश, ( इष्वग्र,) दन्ताग्र, इष्वनीक, अवस्यन्द, कामप्रस्थ, (सौप्रस्थः, खाडायनि.) काठेरणि,लावेरणि, (लावेरिणि,) लावीरणि, शैशिरि, शौङ्गि, (शौङ्गिशैशरि,) आसुरि, आहिंसि, आमित्रि, व्याडि, (भौङ्गि,) भौजि, आश्वत्थि, औद्राह्मानि, औपबिन्दवि, आग्नि-

शर्मि, दैवशर्मि, श्रौति, बाटारकि, वाल्मिकी, क्षैमवृत्ति, उत्तर, अन्तर, मुखतस्, पार्श्वतस्, एकतस्, अनन्तर, (आनृशंसि,) साटि, सौमित्रि, परपक्ष, स्वक, देवक इति गहादिगणः ॥६३॥

## पृथिवीमध्यान्मध्यमश्चास्य ॥६।३।६४॥

म०वृ०–पृथिवीमध्यशब्दाद् देशवाचिनः शेषे 'ईयः' स्यात्, मध्यमादेशश्चास्य [ पृथिवीमध्यशब्दस्य] भवति। पृथिवीमध्ये जातो भवो वा=मध्यमीयः ॥६४॥

## निवासाच्चरणेऽण् ॥६।३।६५॥

म०वृ०–पृथिवीमध्यान्निवासभूताद् देशवाचिनश्चरणे निवस्तरि [ निवासकर्त्तरि ] शेषेऽर्थे 'ऽण्' स्यात्, मध्यमादेशश्च। पृथिवीमध्यं निवास एषां चरणानां=[1]माध्यमाश्चरणाः। निवासादिति किम्? पृथिवीमध्यादागतो=मध्यमीयः[2] कठः ।६५।

---

अव०–[1]तथा चोक्तम्,–त्रयः प्राच्याः, त्रय उदीच्याः, त्रयो माध्यमाः। [2]'पृथिवीमध्यान्मध्यमश्चास्य' ( ६।३।६४ ) इति ईयः, मध्यमादेशश्च। चरणे इति किम्? पृथिवीमध्यं निवासोऽस्य=मध्यमीयः शूद्रः ॥६५॥

## वेणुकादिभ्य ईयण् ॥६।३।६६॥

म० वृ०–वेणुकादिभ्यो देशार्थेभ्यः शेषेऽर्थे 'ईयण्' स्यात्। [1]वैणुकीयः ॥६६॥

---

अव०–[1]वेणु, वेणवोऽत्र सन्ति इति चातुरर्थिकः 'ऋश्यादेः कः' (६।२।९४) इति सूत्रेण कः प्रत्ययः,……(वेणुके भवः=) वैणुकीयः। (एवम्) वैत्रकीयः, 'वींक् प्रजनकान्ति०' (इति) वीधातुः, वेति =प्रजायते समुद्रमध्ये इति वैत्रम्, 'हुयामाश्रुवसिभसिगुवी०'(उणा० ४५१) इत्यादिसूत्रेण त्रः प्रत्ययः, ततोऽत्र चातुरर्थिकः 'ऋश्यादेः कः' (६।२।९४), (वैत्रके भवः=) वैत्रकीय इति सिद्धिः। (एवम्) औत्तरपदीयः, औत्तरीयः, औत्तरकीयः, प्रास्थीयः, प्रास्थकीयः, माध्यमकीयः, माध्यमिकीयः, नैपुणकीयः इति वेणुकादिगणे प्रयोगाली। बहुवचनं प्रयोगानुसरणार्थम् ॥६६॥

## वा युष्मदस्मदोऽञीनञौ युष्माकास्माकौ चास्यैकत्वे तु तवक-ममकम् ॥६।३।६७॥

म० वृ०–[1]देशादिति निवृत्तम्। युष्मद्–अस्मद्शब्दाभ्यां शेषेऽर्थे 'अञ्–ईनञ्प्रत्ययौ' भवतः वा, तद्योगे तु यथासङ्ख्यं युष्मदस्मदोः[2] [स्थाने] 'युष्माक अस्माक' (इति) आदेशौ भवतः, एकत्वे वर्त्तमानयोस्तु युष्मदस्मदोः तवकममकादेशौ। युष्माकमयं युवयोर्वा=यौष्माकः [अञ्], यौष्माकीणः;[3] एवमास्माकः,[4] आस्माकीनः;[5] पक्षे– युष्मदीयः, अस्मदीयः[6]। एकत्वे तु तवायं=तावकः [अञ्], तावकीनः [ईनञ्]; ममायं=मामकः, मामकीनः। पक्षे ['दोरीयः' ।६।३।३२]– त्वदीयः, मदीयः ॥६७॥

---

अव०– [1]युष्मदस्मदोर्देशवृत्तिरसम्भवात्। [2]स्थाने इत्यध्याहार्यम्। [3]ईनञ्। [4]अस्माकमयमावयोरयं वा– अञ्। [5]ईनञ्। [6]'दोरीयः' (६।३।३२) ॥६७॥

## द्वीपादनुसमुद्रं' ण्यः ॥६।३।६८॥

म० वृ०–समुद्रसमीपे यो द्वीपस्तद्वाचिनः शेषे 'ण्यः' स्यात्। कच्छाद्यकञणोरपवादः। [द्वीपे भवः=] द्वैप्यो मनुष्यः, द्वैप्यं त्रासः [ =वस्त्रम् ]। अनुसमुद्रमिति किम्? [2]अनुनदि यो द्वीपस्तस्मात् [3]द्वैपको व्यासः, द्वैपकं[4] वसनम् [ 'कच्छादेर्नृ०' (६।३।५५) अकञ् ] ॥६८॥

---

अव०– [1]समुद्रस्य समीपम्=अनुसमुद्रम्, तस्मिन्, सप्तम्येकवचनम् ङि, 'सप्तम्या वा' (३।२।४) इति सूत्रेण ङिस्थाने अम् आदेशः विकल्पेन, पक्षे अनुसमुद्रे। [2]नद्याः समीपम्, 'क्लीबे'(२।४।९७) ह्रस्वः, कोऽर्थः? नदीमनुलक्षीकृत्य। [3]'कच्छादेर्नृस्थ०' ( ६।३।५५ ) इति अकञ्। एवं[4] द्वैपमित्यपि प्रयोगः, 'कोपान्त्याच्चाण्' (६।३।५६) ॥६८॥

## अर्द्धाद् यः ॥६।३।६९॥

म० वृ०–अर्द्धाच्छेषे 'यः' स्यात्। अर्द्ध्यम् ॥६९॥

## सपूर्वादिकण् ॥६।३।७०॥

म० वृ०–सपूर्वपदादर्द्धाच्छेषेऽर्थे 'इकण्' स्यात्। [1]पौष्करार्द्धिकः, वैजयार्द्धिकः[2] ॥७०॥

अव०–[1]पुष्करद्वीपस्यार्द्धं=पुष्करार्द्धम्, पुष्करार्द्धे भवः, एवमग्रेऽपि। [2](एवम्) क्षैत्रार्द्धिकः ।७०।

## दिक्पूर्वात्तौ ॥६।३।७१॥

म० वृ०–दिक्पूर्वपदादर्द्धात्तौ 'य-इकणौ' शेषे स्याताम्। पूर्वार्ध्यम्, पौर्वार्द्धिकम्;[1] पश्चार्ध्यम्[2] पाश्चार्द्धिकम् ॥७१॥

अव०–[1]एवं दक्षिणार्ध्यम्, दाक्षिणार्द्धिकम्। [2]अपर, अपरस्यार्द्धे भवः,– 'वोत्तरपदेऽर्द्धे' (७।२।१२५) इति सूत्रेण अपरस्य पश्च आदेशः ॥७१॥

## ग्रामराष्ट्रांशादणिकणौ ॥६।३।७२॥

म० वृ०–ग्रामराष्ट्रैकदेशवाचिनोऽर्द्धाद्दिक्पूर्वाच्छेषे 'अण्–इकणौ' भवतः। यापवादौ। पौर्वार्द्धः, पौर्वार्द्धिकः; दाक्षिणार्द्धः, दाक्षिणार्द्धिकः ।७२।

## परावराधमोत्तमादेर्यः ॥६।३।७३॥

म० वृ०–पर, अवर, अधम, उत्तम इत्येतत्पूर्वादर्द्धाच्छेषे 'यः' स्यात्। [1]इकणोऽपवादः। [2]परार्ध्यम्, अवरार्ध्यम्, अधमार्ध्यम्, उत्तमार्ध्यम् ॥७३॥

अव०–[1]'सपूर्वादिकण्' (६।३।७०) 'दिक्पूर्वात्तौ' (६।३।७१) इति विहितस्य इकणः। [2]परस्मिन्नर्द्धे भवं=परार्ध्यम्, एवमग्रेऽपि। 'परावरयोर्दिक्शब्दत्वेऽपि परत्वात् 'परावराधम०' (६।३।७३) इत्यनेनैव यप्रत्ययः, न तु 'दिक्पूर्वात्तौ' इति ॥७३॥

## अमोऽन्ता-ऽवो-ऽधसः ॥६।३।७४॥

म० वृ०–अन्त, अवस्, अधस् इत्येभ्यः शेषे 'अमः' स्यात्। [1]अन्तमः, अवमः, अधमः। [2]अकारादित्वमवोऽधसोरन्त्यस्वरादिलोपार्थम्[3] ॥७४॥

अव०–[1]अन्ते जातः=अन्तमः। अन्ते भव इति वाक्ये दिगादित्वात् य एव, अन्त्य इति प्रयोगः। [2]अम इति प्रत्ययस्य। [3]'प्रायोऽव्ययस्य' (७।४।६५ इत्यनेन) ॥७४॥

## पश्चादाद्यन्ताग्रादिमः ॥६।३।७५॥

म० वृ०–पश्चात्–आदि–अन्त–अग्रेभ्यः शेषेऽर्थे 'इमः' स्यात्। [1]पश्चिमः, [2]आदिमः, [3]अन्तिमः, [4]अग्रिमः ॥७५॥

अव०–[1]पश्चात्, पश्चात् जातः,– 'पश्चादाद्य०' इति इमः, 'प्रायोऽव्ययस्य' (७।४।६५) इत्यन्त्यस्वरादिलोपः। [2]आदौ जातः। [3]अन्ते जातः। [4]अग्रे भवः। आद्यन्तात् जाते एवार्थे इमो भवति, भवेऽर्थे तु दिगादित्वात्परत्वात् यः प्राप्नुयात् ।७५।

## मध्यान्मः ॥६।३।७६॥

म० वृ०–मध्यात् शेषे 'मः' स्यात्। [1]मध्यमः ॥ ७६ ॥

अव०–[1]मध्ये जात इत्येवं वाक्यम्, न तु मध्ये भवः, भवे 'मध्याद् दिनण्०' (६।३।१२६) इति वक्ष्यते ॥ ७६ ॥

## मध्ये उत्कर्षापकर्षयो रः ॥६।३।७७॥

म० वृ०–उत्कर्षापकर्षयोर्मध्ये वर्त्तमानान्मध्यशब्दाच्छेषे 'अः प्रत्ययः' स्यात्। मापवादः। नात्युत्कृष्टो नात्यपकृष्टो मध्यपरिणामो[1] मध्यो [2]विद्वान्, मध्या गुणाः, मध्या स्त्री[3] ॥७७॥

अव०–[1]परिणामोऽवस्थाविशेषः। [2]उत्कर्षापकर्षयोर्मध्ये जातो=मध्यो विद्वान्। [3](एवं) नातिदीर्घं नातिह्रस्वं मध्यप्रमाणं मध्यं काष्ठम्, नातिस्थूलो नातिकृशो मध्यः कायः ॥७७॥

## अध्यात्मादिभ्य इकण् ॥६।३।७८॥

म० वृ०–अध्यात्म इत्यादिभ्यः शेषे 'इकण्'

स्यात् । [१]आध्यात्मिकम्, [२]ऊर्ध्वमौहूर्त्तिकः, [३]आकस्मिकम्, अमुष्मिन् परलोके भवम्=[४]आमुष्मिकम्, [५]आमुत्रिकम्, [परत्रि भवम्=] पारत्रिकम्, [६]इह भवमैहिकम्, शैषिकम् । अध्यात्मादयः प्रयोगगम्याः ॥७८॥

अव०–[१]आत्मन्यधि=अध्यात्मम्, 'अनः' (७।३।८८) इति सूत्रेण अन् समासान्तः, 'नोऽपदस्य तद्धिते' (७।४।६१) इति न् लुप्यते, 'अवर्णेवर्णस्य' (७।४।६८), अध्यात्मं भवम्=आध्यात्मिकम्, एवमाधिदैविकम्, आधिभौतिकम्; देवेऽध्यधि=अधिदेवम्, भूतेष्वधि=अधिभूतम्, अधिदेवं भवमधिभूतं भवम्, 'अध्यात्मादिभ्य इकण्', 'अनुशतिकादीनाम्' (७।४।२७) इति उभयपदस्यापि वृद्धिः । एवमौर्ध्वदमिकः, और्ध्वदमिकः; और्ध्वदेहिकः, और्ध्वदेहिकः । अत एव पाठादूर्ध्वशब्दस्य दमदेहयोः परयोः वा मोऽन्तः । [२]तथा ऊर्ध्वं मुहूर्त्तात्=ऊर्ध्वमुहूर्त्तम्, ऊर्ध्वमुहूर्त्तं भवः=ऊर्ध्वमौहूर्त्तिकः, इकण्, 'सप्तमी चोर्ध्वमौहूर्त्तिके' (५।३।१२) इति ज्ञापकात्=इति निर्देशात् उत्तरपदस्यैव वृद्धिः, अथवा ऊर्ध्वं मुहूर्त्ताद् भव ऊर्ध्वमौहूर्त्तिकः, इकण् । ऊर्ध्वं दमात् ऊर्ध्वं देहात् 'नाम नाम्ना०' (३।१।१८) इति समासः । ऊर्ध्वदमे भवः ऊर्ध्वदेहे भवः– और्ध्वदमिकः, और्ध्वदेहिकः; और्ध्वदमिकः, और्ध्वदेहिकः । [३]अकस्मात्, कोऽर्थः हेतुशून्यः कालः, अकस्माद् भवमाकस्मिकम् । [४]अमुष्मिन्–परलोके भवम्=आमुष्मिकम्, 'नोऽपदस्य तद्धिते' (७।४।६१) इति अन् लुप्यते । [५]अमुत्र=परलोके भवम्=आमुत्रिकम् । [६]इह लोके भवमैहिकम् । पाठसामर्थ्यात् सर्वत्र सप्तम्या अलुप् ॥७८॥

## समानपूर्वलोकोत्तरपदात् ॥६।३।७९॥

म० वृ०–समानशब्दपूर्वपदेभ्यो नामभ्यः लोकशब्दोत्तरपदेभ्यश्च शेषे 'इकण्' स्यात् । [१]सामानग्रामिकः, सामानदेशिकः, [२]ऐहलौकिकः, पारलौकिकः[३] ॥७९॥

अव०–[१]समानग्रामे कृतो भवो वा=सामानग्रामिकः, [२]इहलोके कृतो भवो वा=ऐहलौकिकः, [३]एवम् पारलौकिकः, सार्वलौकिकः; 'अनुशतिकादीनाम्' (७।४।२७) इति उभयपदवृद्धिः ॥७९॥

## वर्षाकालेभ्यः ॥६।३।८०॥

म० वृ०–[१]वर्षाशब्दात् [२]कालविशेषवाचिभ्यश्च नामभ्यः शेषेऽर्थे 'इकण्' स्यात् । [३]अणपवादः । वर्षासु भवो=वार्षिकः । तथा "ऋतोर्वृद्धिमद्विधाववयवेभ्यः" इति न्यायवशात् ऋतोऽणिति प्रत्ययस्तदन्तस्य याघादेः [४]ऋत्वन्तादप्यभिधानादिकण् भवति,– [५]पूर्ववार्षिकः, [६]अपरवार्षिकः, एवमुत्तरत्रापि । कालवाचिनः– [मासे भवः=] मासिकः, [७]अर्द्धमासिकः, सांवत्सरिकः, [८]आह्निकः, दैवसिकः । वर्षाग्रहणमृत्वण्बाधनार्थम् । कालशब्दः [९]कालविशेषवाची, [१०]'भर्तुसन्ध्यादेरण्' (६।३।८९) इत्यत्र सन्ध्यादिग्रहणात् । बहुवचनं तु यथाकथञ्चित् [=गौणवृत्त्या मुख्यवृत्त्या वा] कालवृत्तिभ्यः प्रत्ययप्रापणार्थम्,– [११]नैशिकः, [१२]प्रादोषिकः, [१३]कादम्बपुष्पिकम्, [१४]व्रैहिपलालिकम् । [१५]कालशब्दाच्च कालार्थादकालार्थाच्च कालतः, अकालादपि कालार्थात् 'कालेभ्य' इति यो विधिः ॥८०॥

अव०–[१]वर्षन्ति मेघा अस्मिन् ऋतौ इति वर्षा, ❀ 'वर्षादयः क्लीबे (५।३।२९) । [२]कल किल पिलण् क्षेपे, कल्यते=क्षिप्यते आयुरिति कालः, 'भावाकर्त्रोः' (५।३।१८) । [३]'वर्षाकालेभ्य' इदं सूत्रं अणोऽपवादकं दोरीयमपि परत्वात् बाधते इत्यर्थः । [४]ऋतुवाची शब्दो अन्ते यस्य शब्दस्य, तस्मात् । [५]पूर्वासु वर्षासु भवः=पूर्ववार्षिकः, [६]एवमपरवार्षिकः; अत्र 'अंशादृतोः' (७।४।१४) इत्यनेन उत्तरपदवृद्धिः । [७]अर्द्धं मासस्य=अर्द्धमासः, अर्द्धमासे भवः । [८]अह्नि भवमाह्निकम्, इकण्, 'अनीनादट्यह्नोऽतः' (७।४।६६) इति अकारो लुप्यते । [९]कालशब्दोऽपि मासाद्यपेक्षया कालविशेषवाची इति कालिक

❀ अत्र 'वर्षादयः क्लीबे' इति सूत्रमसङ्गतम्, तस्य नपुंसकलिङ्गे प्रवर्तनात्, वर्षाशब्दस्य स्त्रीलिङ्गे सत्त्वात् । अत्र 'भिदादयः' (५।३।१०८) इति सूत्रेण वर्षाशब्दः सिध्यति ।

इत्यपि प्रयोगः । [१०]'भर्तुसन्ध्यादे०' (६।३।८९) इत्यत्र सन्ध्यादिग्रहणात् इत्यक्षरार्थे– काल इति स्वरूपग्रहणे हि काललक्षणेकण्बाधकं सन्ध्यादिग्रहणं 'भर्त्तुसन्ध्यादेरण्' (६।३।८९) अत्र सूत्रे निरर्थकं स्यात् इति हेतोः काल इत्युक्ते कालविशेषवाचिनः शब्दात् ज्ञातव्यः,न तु केवलकालशब्दात् इति विशेषाक्षरा ★ ज्ञातव्याः । [११]निशा सह चरितमध्ययनमपि निशा उच्यते उपचारात्,[१२]प्रदोषसहचरितमध्ययनं प्रदोषम्; निशायां जयी साभ्यासः प्रदोषे जयी साभ्यास इति वाक्ये 'वर्षाकालेभ्यः' (६।३।८०) इत्यनेनापि इकण् क्रियते । बहुवचनं तु यथाकथञ्चिदित्याद्यक्षरबलात् इकण् क्रियते । तथा [१३]कदम्बपुष्पसहचरितः कालः कदम्बपुष्पम्, [१४]व्रीहिपलालसहचरितः कालः व्रीहिपलालम्, कदम्बपुष्पे व्रीहिपलाले देयमृणं कदम्बपुष्पिकम् व्रीहिपलालिकम्; अत्रापि 'वर्षाकालेभ्य' (६।३।८०) इति इकण् अथवा 'कालाद् देये ऋणे' (६।३।११३) इत्यनेन इकण् । [१५]'वर्षाकालेभ्य' (६।३।८०) इति सूत्रे कालविशेषवाचिभ्य इत्युक्तं सूत्रार्थे तत्र कालविशेषविषयेषु(? यु)क्तित्रयं श्लोकेन दर्शयति– 'कालशब्दात्' इत्यादि,शब्दोऽपि कालवाची,प्रत्ययार्थोऽपि कालवाची; अत्र मासिक इति प्रयोगः ।१। यत्र च शब्दः कालवाची, प्रत्ययार्थस्तु अकालवाची; तत्र नैशिकः प्रादोषिक इति प्रयोगद्वयम् ।२। यत्र पुनः शब्दोऽकालः=अकालवाची, प्रत्ययार्थो हि कालार्थः= कालवाची; तत्र कादम्बपुष्पिकं व्रैहिपलालिकम् इति प्रयोगद्वयम् ।३। इति प्रकारत्रयेण 'कालेभ्य' इति यो विधिः='वर्षाकालेभ्य' इति सूत्रे यो विधिः= य इकण् उक्तः, स इकणविधिरित्थं प्रयोज्य इति वाक्यसम्बन्धः ।।८०।।

## शरदः श्राद्धे कर्मणि ।।६।३।८१।।

म० वृ०–शरच्छब्दात्कालवाचिनः श्राद्धे कर्मणि [पितृकार्ये शेषेऽर्थे 'इकण्' स्यात् । ऋत्वणोऽपवादः ['भर्तुसन्ध्यादे०' (६।३।८९) उक्तस्याणः] । [शरदि भवं=] शारदिकं [१]श्राद्धं कर्म । कर्मणीति किम्? शारदः ['भर्तुसं०' (६।३।८९) अण्) श्राद्धः, श्रद्धावानित्यर्थः । श्राद्ध इति किम्? शारदं ('भर्तुसं०' (६।३।८९ अण्) विरेचनम् ।।८१।।

प्रव०–[१]श्रद्धा प्रयोजनमस्य=श्राद्धम्, चूडादिभ्योऽण् (६।४।११९) ।।८१।।

## नवा रोगा-ऽऽतपे ।।६।३।८२।।

म० वृ०–शरदः शेषे रोगे आतपे च 'इकण् नवा' स्यात् । शारदिकः । (पक्षे भर्तु० (६।३।८९) अण्–] शारदो रोगः आतपो वा । रोगातप इति किम्? शारदं (भर्तु० (६।३।८९) अण्) दधि ।८२।

## निशा-प्रदोषात् ।।६।३।८३।।

म० वृ०–निशाप्रदोषाभ्यां (कालवाचिभ्यां) शेषे 'इकण् नवा' स्यात् । 'वर्षाकालेभ्य' (६।३।८०) इति नित्यं प्राप्ते वचनम् । (*निशि निशायां वा* हरति=) नैशिकः, नैशः ('भर्तु०' (६।३।८९।अण्); प्रादोषिकः, प्रादोषः (अण्) ।। ८३ ।।

## श्वसस्तादिः ।।६।३।८४।।

म० वृ०–श्वस्शब्दाच्छेषे 'इकण् नवा' स्यात्, स च तादिः । [१]शौवस्तिकः, [२]पक्षे श्वस्त्यम्, [३]श्वस्तनम् ।। ८४ ।।

प्रव०–[१]श्वो भवः=शौवस्तिकः, इकण् तकारादिः, 'द्वारादेः' (७।४।६) इति औ आगमः । [२]पक्षे 'ऐषमोह्यःश्वसो वा' (६।३।१९) इत्यनेन त्यच् । [३]पक्षे 'सायंचिरं०' (६।३।८८) इत्यनेन तनट् ।।८४।

## चिरपरुत्परारेस्त्नः ।।६।३।८५।।

म० वृ०–चिरपरुत्परारिभ्यः शेषे 'त्नः नवा' स्यात् । चिरे भवं=चिरत्नम्, परुत्नम्, परारित्नम् । पक्षे [१]चिरन्तनम्, परुत्तनम्, परारितनम् ।।८५।।

प्रव०–[१]'सायंचिरं०' (६।३।८८) इत्यनेन तनट्, निपातनात् मोऽन्तः ।।८५।।

★ अत्र 'अक्षरा' इति चिन्त्यम्, वर्णवाचिनोऽक्षरशब्दस्य क्लीबलिङ्गत्वात् ।

## [1]पुरो नः ॥६।३।८६॥

म० वृ०—[2]पुराशब्दादव्ययाच्छेषे 'नः स्याद्वा' पुराभवं=पुराणम्, पुरातनम्[3] ॥ ८६ ॥

अव०—[1]पुरा, पञ्चमीङसिः, 'लुगातोऽनापः' (२।१।१०७) इति आकारलोपः । [2]कालवाचिनः । [3]'सायंचिरं०' (६।३।८८) तनट् ॥८६॥

## पूर्वाह्णापराह्णात्तनट् ॥६।३।८७॥

म०वृ०—[1]आभ्यां शेषे 'तनट् वा'स्यात्। 'वर्षाकालेभ्यः' (६।३।८०) इति नित्यमिकणि प्राप्ते विकल्पोऽयम्। पक्षे सोऽपि[2]। [3]पूर्वाह्णेतनः, पूर्वाह्णतनः; अपराह्णेतनः, अपराह्णतनः। पक्षे ['वर्षाकालेभ्यः' इकण्—] पौर्वाह्णिकः, आपराह्णिकः । टकारो ङ्यर्थः,—पूर्वाह्णेतनी, अपराह्णेतनी ॥८७॥

अव०—[1]कालवाचिभ्याम्। [2]'सोऽपि', कोऽर्थः 'वर्षाकालेभ्य' इत्यनेन इकणपि भवतीत्यर्थः। [3]पूर्वमह्न इति वाक्ये 'सर्वांशसङ्ख्याव्ययात्' (७।३।११८) इत्यनेन अट् समासान्तः, अह्न इत्यादेशश्च; 'अतोऽह्नस्य' (२।३।७३) इति णत्वम्, तदनन्तरं सप्तमीङि। एवमपराह्णे इत्यपि साध्यम्। पूर्वाह्णे जातो भवो वा इति वाक्यं कृत्वा तनट्, 'कालात्तनतरतम०' (३।२।२४) इति सप्तम्या वा लोपः ॥८७॥

## सायं-चिरं-प्राह्णे-प्रगेऽव्ययात् ॥६।३।८८॥

म० वृ०—योगविभागान्नवेति निवृत्तम्। सायंचिरं प्राह्णे प्रगे (इत्येतेभ्यः) अव्ययेभ्यश्च [कालवाचिभ्यः] शेषे 'तनट्' स्यात्। सायं भवं=सायन्तनम्, चिरन्तनम्, अत एव निर्देशान्मान्तत्वं निपात्यते,[1]प्राह्णेतनम्, प्रगेतनम्; अनयोरेकारान्तत्वम्। अव्यय,— दिवातनम्, दोषातनम्, नक्तंतनम्, प्रातस्तनम्, प्राक्तनम्। काल इत्येव—[2]स्वर्भवं=सौवम् 卐 ॥८८॥

अव०—[1]प्राह्णे इत्यत्र प्रगतमह्नः=प्राह्णम्, 'सर्वांश०' (७।३।११८) इति अट्, सप्तमीङि, अत्र 'कालात्तनतर०' (३।२।२४) इत्यनेन विकल्पेन सप्तमीलोपः प्राप्नोति, परं सूत्रे निर्देशान्नित्यमेव एत्वम्। [2]स्वर्भवं सौवम्, 'भवे' (६।३।१२३) अण्, 'प्रायोऽव्ययस्य' (७।४।६५) इति अन्त्यस्वरादिलुप् ॥८८॥

## भर्तु सन्ध्यादेरण् ॥६।३।८९॥

म० वृ०—भं नक्षत्रम्, तद्वाचिभ्यः, ऋतुवाचिभ्यः सन्ध्यादिभ्यश्च कालवाचिभ्यः शेषे—'अण्' स्यात्। [1]इकणोऽपवादः। [2]पौषः, तैषः, [3]आश्विनः, [4]स्वातः। ऋतु,—[5]ग्रैष्मः, वासन्तः, पूर्वग्रैष्मः, [6]अपरशैशिरः। [7]सन्ध्यादि,—[8]सान्ध्यः, [9]आमावास्यः, [10]आमावस्यः। कालेभ्य इति किम्? [11]स्वातीयम् ॥ ८९ ॥

अव०—[1]'इकणोऽपवादः', कोऽभिप्रायः? 'वर्षाकालेभ्यः' इत्यनेन य इकण् कालद्वारेण उक्तोऽस्ति तस्येकणो बाधकोऽयं योगः। [2]पुष्येण चन्द्रयुक्तेन युक्तः कालः,— 'चन्द्रयुक्तात्काले०' (६।२।६) इत्यण्, तस्य लुप्, ततः पुष्ये भवः पौषः, एवं तैषः। [3]अश्व, अश्वाः सन्त्यस्याम्— मत्वर्थीय इन्, 'गौरादि०'(२।४।१९), अश्विन्या चन्द्रयुक्तया युक्तः कालः,— 'चन्द्र०' (६।२।६) इत्यण्, लुप् च; 'ङ्यादेर्गौणस्य०' (२।४।९५) इति ङीनिवृत्तिः, अश्विन्यां भवः, ततो 'भर्तु०' अण्। [4]शोभना आतिः=स्वातिः, स्वात्या चन्द्रयुक्तया युक्तः कालः,—'चन्द्र०'(६।२।६)अण्, लुप् च,स्वातौ भवः,— 'भर्तु०' अण्, 'य्वः पदान्तात्०' (७।४।५) औः। [5]तथा ग्रसते रसो रसान् इति ग्रीष्मः, अथवा सिञ्चन्ति जना अङ्गानस्मिन् काले इति ग्रीष्मः ऋतुः, 'रुक्मग्रीष्म०' (उ०३४६) इति निपातः,ग्रीष्मे वसन्ते भवः तथा ऋतोर्ण्णित् (प्रत्ययः) इति तदवयवादेरपि इति युक्त्या पूर्वग्रीष्मे भवोऽत्रापि 'भर्तु०'अण्। एवमपरग्रैष्मः। [6]अपरो भागः शिशिरस्य,(अपरशिशिरे भवः=) अपरशैशिरः, अत्राप्यण्। [7]सन्ध्या,सन्धिवेला,

---

卐 सायंचिरंप्राह्णेप्रगे इत्यव्ययेभ्योऽव्ययादित्येव सिद्धेऽपि तेषां पृथगुपादानं कालेकण्बाधनार्थम्।

अमावास्या, त्रयोदशी, चतुर्दशी, पञ्चदशी, पौर्णमासी, प्रतिपद्, शश्वत् इति सन्ध्यादिगणः। [८]सन्धौ साध्वी,-'तत्र साधौ' (७।२।१५)। [९]अमावास्याशब्दः, अमावास्यायां भवः,- सन्ध्यादिद्वारेण 'भर्तु०' इत्यनेनाण्। [१०]'एकदेशविकृतम् (अनन्यवत्)' इति न्यायात् अमावस्याशब्दादपि अण्, तत्र अमावस्य इति प्रयोगो भवति। 'ऋवर्णोवर्णदोसिसुसशश्वदकस्मादि०' (७।४।७१) इति सूत्रे अशश्वत् इति प्रतिषेधात्, कोऽर्थः? अशश्वत् इति वर्जनबलात्, 'वर्षाकालेभ्यः' (६।३।८०) इत्यनेन इकणपि भवति, 'भर्तु०' इत्यनेनाण् इति रूपद्वयम्- शाश्वतम्, शाश्वतिकम्। 'भर्तुसन्ध्यादेरण्' इति सूत्रे यत् यथाविहितं प्रत्यय इति नोक्तम्, अण् भवति इत्युक्तम्, तत् स्वातिराधाऽऽर्द्रापौर्णमासीभ्य ईयबाधनार्थम्, ❀ किं च यथाविहितमित्युच्यमाने हि 'दोरीयः' (६।३।३२) इत्यनेन ईयोऽपि प्राप्नुयात् इति अण् इत्युक्तम्। व्यावृत्त्युदाहरणेषु स्वातीयम्, राधीयम्, आर्द्रीयम् इत्यत्र ईयः प्राप्तः। [११]स्वातेरिदमुदयस्थानम्=स्वातीयम् ॥ ८९ ॥

## संवत्सरात्फलपर्वणोः ॥६।३।९०॥

म० वृ०-संवत्सरात् फले पर्वणि शेषेऽर्थे-'ऽण्' स्यात्। सांवत्सरं फलम्, सांवत्सरं पर्व। फलपर्वणोरिति किम्? सांवत्सरिकं श्राद्धम् ॥९०॥

## हेमन्ताद्वा तलुक् च ॥६।३।९१॥

म० वृ०-हेमन्ताद् ऋतुविशेषवाचिनः शेषे-'ऽण् वा' स्यात्, तद्योगे च तकारस्य वा लुक्। हैमनम्, हैमन्तम्, हैमन्तिकम्, [१]पूर्वहैमनम् ॥ ९१ ॥

अव०-'भर्तु०' (६।३।८९) इत्यनेन नित्यमणि प्राप्ते विभाषेयम्। तथा च त्रैरूप्यं- हैमनम्, हैमन्तम्, हैमन्तिकम्। [१]तथा तदन्तविधिना पूर्वहैमनमित्यपि सिद्धम् ॥ ९१ ॥

## प्रावृष एण्यः ॥६।३।९२॥

म० वृ०-प्रावृष्शब्दाच्छेषे 'एण्यः' स्यात्। अणोऽपवादः। प्रावृषि भवः=प्रावृषेण्यः। जाते तु परत्वादिक एव ['प्रावृष इकः' (६।३।९९) इत्यनेन], प्रावृषिकः ॥९२॥

## स्थामाजिनान्ताल्लुप् ॥६।३।९३॥

म० वृ०-स्थामन्शब्दान्तात् अजिनान्ताच्च परस्य शैषिकस्य प्रत्ययस्य 'लुप्' स्यात्। [१]अश्वत्थामा, सिंहाजिनः[२] ॥९३॥

अव० [१]अश्व इव तिष्ठतीति अश्वत्थामा, 'मन्वन्क्वनिप्०' (५।१।१४९) मन्, अश्वस्येव स्थाम=बलं यस्य (इति) वा, 'पृषोदराद्यः' (३।२।१५५) इत्यनेन सस्य तकारः; अश्वत्थाम्नोऽपत्यम्, 'अः स्थाम्नः' (६।१।२७) इति अः प्रत्ययः, 卐 'अः स्थाम्न' इति सूत्रे इत्थं प्रत्ययः (?) अत्र तु सूत्रे अश्वत्थामनि भवो जातो वा- 'अः स्थाम्नः' (६।१।१२२) अः 'स्थामाजिन०' इति अप्रत्ययो लुप्यते, प्रथमासिः, 'निदीर्घः (१।४।८२)। [२]सिंहाजिने भवो जातो वा, 'भवे' (६।३।१२२) अण् ॥९३॥

## तत्र कृत-लब्ध-क्रीत-सम्भूते ॥६।३।९४॥

म० वृ०-अणादयः एयणादयश्च सविशेषणा अत्रानुवर्त्तन्ते। तत्रेति [१]सप्तम्यन्तात् [२]कृते, [३]लब्धे, [४]क्रीते, [५]सम्भूते चार्थे 'यथायोगमणादय[६] एयणादयश्च' स्युः। [७]माथुरः, [८]औत्सः, [९]नादेयः, राष्ट्रियः[१०] ('राष्ट्रादियः' (६।३।३)। तत्रेति किम्? मैत्रेण क्रीतः ॥ ९४ ॥

अव०-[१]सूत्रार्थेषु सप्तम्यन्तात् इति सर्वत्र ज्ञातव्यम्। [२]तथा यत् अन्येनोत्पादितं तत्कृतम्। [३]अत्र उदकपूर्वकदानेन लाभः प्रतिग्रहः अनुग्रहः प्रतिग्रह अनुग्रहेण प्राप्तं तत् लब्धम् (?)। [४]यत्तु मूल्येन गृहीतं तत्क्रीतम्। यत् [५]सम्भाव्यते घटते संमाति वा तत्

❀ अत्र 'किञ्च' इति पाठोऽधिकः प्रतिभाति।

卐 अत्र "अः स्थाम्नः इति सूत्रे इत्थं प्रत्ययः अत्र तु सूत्रे" इति पाठोऽधिकः प्रतिभाति।

सम्भूतम् । [१]"तद्धितोऽणादिः" ( ६।१।१ ) 'रागाद्रो रक्ते' (६।२।१) इति द्वयोर्पादयोर्मध्ये 'प्रागजिताद्‌ण्' (६।१।१३) इत्यादिसूत्रैर्विहिता अणादय एयणादयश्च । [२]मथुरायां कृतो लब्धः क्रीतः सम्भूतो वा=माथुरः, अत्र,ण् ।[३] औत्सः, 'उत्सादेरञ्' (६।१।१९) । एवं बाह्यः, बाह्लीकः; बहिः कृतो लब्धः क्रीतः सम्भूतो वा,– 'बहिषष्टीकण् च' ( ६।१।१६ ) इति ट्यः, टीकण् । [४]नद्यां कृतो लब्धः अथवा नद्यां भवो जातो वा,– 'नद्यादेरेयण्' ( ६।३।२ ) । [५]एवं पारावारीणः ।।९४।।

## कुशले ।।६।३।९५।।

म० वृ०–तत्रेति सप्तम्यन्तात्कुशलेऽर्थे 'यथाविहितमणादय एयणादयश्च' स्युः । (मथुरायां कुशलः) माथुरः, नादेयः । योगविभाग उत्तरार्थः ।।९५।।

अव०–'तत्र' इति कोऽर्थः ? सप्तम्यन्तात् । अयमधिकारः 'शिक्षादेश्चाण्' (६।३।१४८) इति सूत्रं यावत् ।।९५।।

## पथोऽकः ।।६।३।९६।।

म०वृ०–[तत्रेति सप्तम्यन्तात्] पथिन्शब्दात्कुशलेऽर्थे–'ऽक': स्यात् । अणोऽपवादः । पथकः [पथि कुशलः=पथकः, 'नोऽपदस्य०' (७।४।६१) इति अन्लोपः] ।।९६।।

## कोऽश्मादेः ।।६।३।९७।।

म० वृ०–अश्मन् इत्यादिभ्यः[१] कुशलेऽर्थे 'कः' स्याद् । अणादेरपवादः । [अश्मनि कुशलः] अश्मकः[२] ।।९७।।

अव०–अश्मन्, अशनि, Aआकर्ष,त्सरु, पिशाच, पिचण्ड, पाद, शकुनि, निचय, जय, नय, ह्राद इति अश्मादिगणः । [१]तत्रेति सप्तम्यतेभ्यः । [२]( एवम् ) अशनौ (वज्रे) कुशलः=अशनिकः । Aआकर्षः कुतुपादि ।।९७।।

## जाते ।।६।३।९८।।

म०वृ०–[तत्रेति] सप्तम्यन्ताज्जातेऽर्थे यथाविहितमणादय एयणादयश्च स्युः । [१]माथुरः, [२]बाह्यः, बाह्लीकः, [३]कालेयः, [४]आग्नेयः, [५]नादेयः, ग्राम्यः, [६]ग्रामीणः । तत्रेत्येव– चैत्राज्जातः । स्वयमुत्पत्तिर्जातस्यार्थ इति कृतादिभ्यो भेदः ।।९८।।

अव०–[१]मथुरायां जातः । [२]बहिर्जातः । [३]कलौ जातः, [४]अग्नौ जातः; 'कल्यग्नेरेयण्' (६।१।१७) । [५]नद्यां जातः, 'नद्यादेरेयण्'(६।३।२) । [६]ग्रामे जातः ग्राम्यः, ग्रामीणः, 'ग्रामादीनञ् च' (६।३।९) ।।९८।।

## प्रावृष इकः ।।६।३।९९।।

म० वृ०–सप्तम्यन्तात् प्रावृष्शब्दात् जातेऽर्थे 'इकः' स्यात् । एण्यापवादः । प्रावृषि जातः=प्रावृषिकः ।। ९९ ।।

## नाम्नि शरदोऽकञ् ।।६।३।१००।।

म०वृ०–[तत्रेति सप्तम्यन्तात्] शरद्शब्दात् जातेऽर्थे– 'ऽकञ्' स्यात्, [१]नाम्नि=संज्ञायाम् । ऋत्वणोऽपवादः । [शरदि जाताः=] शारदका दर्भा मुद्गा वा, दर्भविशेषाणां मुद्गविशेषाणां चेयं संज्ञा । नाम्नीति किम् ? [२]शारदं सस्यम् ।।१००।।

अव०–[१]"नाम्नि', कोऽर्थः ? प्रकृतिप्रत्ययसमुदायश्चेत् कस्यचिन्नाम भवति । नाम्नीत्यधिकारः 'कालाद्देये ऋणे'(६।३।११३) इतिसूत्रं यावत् ज्ञेयः । [२]शरदि भवं=शारदम्,'भर्तु०'(६।३।८९)अण् ।।१००।।

## सिन्ध्वपकरात्काणौ ।।६।३।१०१।।

म० वृ०–[तत्रेति सप्तम्यन्ताभ्यां] सिन्धु-अपकराभ्यां जातेऽर्थे 'क-अणौ' भवतः, नाम्नि । वचनभेदाद् यथासङ्ख्याभावः । सिन्धौ जातः=[१]सिन्धुकः, सैन्धवः । [अपकरे कचवरे जातः=] [२]अपकरकः, आपकरः । नाम्नीत्येव– [३]सैन्धवको मनुष्यः ।।१०१।।

अव०–[१]"कच्छादेर्नृनृस्थे' (६।३।५५) इत्यनेन अकञ्, 'कोपान्त्याच्चाण्' ( ६।३।५६ ) इत्यनेन अण्, सिन्धुपरतोऽकञणोर्बाधकोऽयम् । [२]अपकरा-

च औत्सर्गिकाणो बाधकोऽयं योगः । [3]'कच्छादेर्नृ-नृस्थे' (६।३।५५) अकञ् ॥१०१॥

## पूर्वाह्णा-ऽपराह्णा-ऽऽर्द्रा-मूल-प्रदोषा-ऽवस्करादकः ॥६।३।१०२॥

म० वृ०-[तत्रेति सप्तम्यन्तेभ्यः] पूर्वाह्णादिभ्यो जातेऽर्थे 'अकः' स्यान्नाम्नि । इकणादेरपवादः । [1]पूर्वाह्णकः,अपराह्णकः,आर्द्रकः,[2] मूलकः, [3]प्रदोषकः,अवस्करकः । नाम्नीति किम् ? पौर्वाह्णिकम् ['वर्षाकालेभ्यः' (६।३।८०)], पूर्वाह्णेतनमित्यादि । केनैव सिद्धेऽकविधानमार्द्रिका[6] इत्येवमर्थम्[4] । अन्यथा खट्वाका,खट्वका,खट्विका इतिवत् के [=कप्रत्यये सति] रूपत्रयं स्यात् ॥१०२॥

अव०-'वर्षाकालेभ्य' (६।३।८०) इतीकण्, 'पूर्वाह्णापराह्णात्तनट्' (६।३।८७) इति तनट्, (इति) इकण्तनटोऽपवादोऽकः प्रत्ययः सिद्धः । [1]पूर्वाह्णे जातः, एवमग्रेपि वाक्यम् । [2]आर्द्रया मूलेन चन्द्रयुक्तेन युक्तः कालः,- 'चन्द्रयुक्तात्काले०' (६।२।६) अण्, लोपश्च ; 'ङ्यादेर्गौण०' (२।४।९५) इति आप्निवृत्तिः, पुनराप्, आर्द्रायां जातः मूले जातः, अत्र 'भर्तु०' (६।३।८९) इत्यणोऽपवादोऽकः । [3]'प्रदोषकः', अत्र 'निशाप्रदोषात्' (६।३।८२ इकणः (तथा)औत्सर्गिकाणोऽपवादोऽकः।इत्थमिकणादेरपवादोऽयंयोगः इति उपपन्नम् । [4]'अस्यायत्तत्क्षिपकादीनाम्' (२।४।१११) इत्यनेन इकारः । [5]यदि कः प्रत्ययः स्यात् तदा 'इच्चापुंसोऽनित्०' (२।४।१०७) इति ककारे आप्परे इत्वं विकल्पेन ह्रस्वत्वं(च)स्यात् ,- आर्द्रिका आर्द्रका आर्द्राका इति रूपत्रयं स्यात् । तच्चानिष्टम् । अकि सति आर्द्रिका इत्येकमेव रूपम् ।१०२।

## पथः पन्थ च ॥६।३।१०३॥

म० वृ०-[ सप्तम्यन्तात् ] पथिन्शब्दाज्जाते-'ऽकः' स्यात्, पथिन्शब्दस्य च' 'पन्थ' इत्यादेशः, नाम्नि । (पथि जातः=) पन्थकः ॥१०३॥

## अश्च वाऽमावास्यायाः ॥६।३।१०४॥

म० वृ०-[ सप्तम्यन्तात् ] अमावास्या इति शब्दाज्जाते "अकारः [ अप्रत्ययः ] अकश्च वा" स्यात् । सन्ध्याद्यणोऽपवादः । अमावास्यायां जातः= अमावास्यः [अप्रत्ययः],अमावास्यकः [अकप्रत्ययः]। पक्षे सन्ध्याद्यण्- आमावास्यः । 'एकदेशविकृतमनन्यवत्' इति न्यायात् [ एकदेशविकृतस्यानन्यत्वात् ] अमावस्याशब्दादपि अ-अकौ भवतः,- अमावस्यः, अमावस्यकः [पक्षे आमावस्यः] ॥१०४॥

## श्रविष्ठाषाढादीयण् च ॥६।३।१०५॥

म० वृ०-[सप्तम्यन्ताभ्यां] श्रविष्ठा-अषाढाभ्यां जातेऽर्थे 'ईयण् चकारादश्च' नाम्नि । भाणोऽपवादः । [1]श्राविष्ठीयः, श्रविष्ठः ; [2]आषाढीयः, अषाढः ॥१०५॥

अव०-[1]श्रविष्ठा धनिष्ठा नक्षत्रमुच्यते । श्रविष्ठाभिः [2]अषाढाभिः चन्द्रयुक्ताभिर्युक्तः कालः,- 'चन्द्रयुक्तात्०'(६।२।६) इत्यण्, लोपश्च ; श्रविष्ठासु अषाढासु जातः इति वाक्ये ईयण् ॥ १०५ ॥

## फल्गुन्याष्टः ॥६।३।१०६॥

म० वृ०-सप्तम्यन्तात् फल्गुनीशब्दाज्जाते 'टः' स्यात् नाम्नि । [ फल्गुन्योर्जातः= ] फल्गुनः, फल्गुनी स्त्री । टकारो ङ्यर्थः ॥ १०६ ॥

## बहुलानुराधापुष्यार्थपुनर्वसुहस्तविशाखास्वातेर्लुप् ॥६।३।१०७॥

म० वृ०-[सप्तम्यन्तेभ्यः] बहुलादिभ्यः परस्य भाणो जातेऽर्थे 'लुप्' स्यान्नाम्नि । [1]बहुलः, [2]अनुराधः, [3]अनूराधः, पुष्यः, तिष्यः, सिद्ध्यः, पुनर्वसुः, हस्तः, विशाखः, स्वातिः ॥ १०७ ॥

अव०-[1]बहुला कृत्तिका, बहुलाभिश्चन्द्रयुक्ताभिः युक्तः कालो बहुला, 'चन्द्र०' (६।२।६) अण्, लोपश्च; बहुलासु जातो=बहुलः, 'भर्तुसन्ध्यादेरण्' (६।३।८९), तदनन्तरं 'बहुलानुराधा०' इति सूत्रेण 'भर्तुसं०' (इत्यनेन) कृतस्य अणो लोपः कार्यः, अणो लुपि सत्यां 'ङ्यादेर्गौणस्य०' (२।४।

१५) इत्यनेन आप् लुप्यते, ततो बहुल इति प्रयोगो निष्पन्नः । [2]एवमनुराध इत्यादयोऽपि साध्याः । [3]'अनूराध' इत्यत्र 'घञ्युपसर्गस्य बहुलम्' (३।२। ८६) इति दीर्घः । तथा "मघा अपकृत्तिका बहौ" इति ★ लिङ्गपाठात् बहुलशब्दः स्त्री बहुत्वविषयश्च ॥ १०७ ॥

## चित्रा-रेवती-रोहिण्याः स्त्रियाम् ॥६।३।१०८॥

म० वृ०—सप्तम्यन्तेभ्यः चित्रादिभ्यः परस्य भाणो जातेऽर्थे स्त्रियां 'लुप्' स्यात्, नाम्नि । चित्रा, रेवती, रोहिणी स्त्री । स्त्रियामिति किम् ? चैत्रः, रैवतः, रौहिणः ॥ १०८ ॥

अव०—चित्रा, रेवती, रोहिणी; एषु पूर्वमण्, लोपः, ततोऽत्र चित्रायां जात इत्यादिवाक्ये 'भर्तु०' (६।३।८९) अण्, 'चित्रा०' (६।३।१०८) इति सूत्रेण अणो लोपः, 'ङ्यादेर्गौण०' (२।४।९५) इति आप्-ङीनिवृत्तिः, पुनराप् ङी च, 'रेवतरोहिणाद् भे' (२। ४।२६) इत्यनेन ङी । यत्र क्वापि सूत्रे नक्षत्रनाम उद्दिश्य जातार्थविहितस्य तद्धितप्रत्ययस्य लुप् उक्तोऽस्ति, तत्र प्रायेण पूर्वं नक्षत्रनाम संस्थाप्य, एतेन एतया वा चन्द्रयुक्तेन युक्तः काल इति वाक्यं कृत्वा, 'चन्द्रयुक्तात्०' (६।२।६) इति अणादिप्रत्ययः, तल्लुप्, पश्चात् जातेऽर्थे 'भर्तुसन्ध्यादे०' (६।३। ८९) अण्, तस्य प्राप्तौ सत्यां यथोक्तसूत्रेण यथायोगं लोपः कर्त्तव्य इति सिद्धिः तत्र ( ? सर्व )–सूत्रेषु ज्ञातव्या ॥ १०८ ॥

## बहुलमन्येभ्यः ॥६।३।१०९॥

म० वृ०—बहुलादिभ्यो येऽन्ये नक्षत्रशब्दास्तेभ्यः [ सप्तम्यन्तेभ्यः ] परस्य भाणो जातेऽर्थे 'लुप्' स्याद् बहुलम्,[1] नाम्नि । [2]अभिजित्, आभिजितः । [3]अश्वयुक्, आश्वयुजः । [4]शतभिषक्, शातभिषजः, शातभिषः । कृत्तिकः, कार्त्तिकः[5] । एषु वा [अणः] लोपः । क्वचिन्नित्यम्- [6]अश्विनः, अश्विनी, राधः, राधा; । कचिन्न भवति– [मघासु जातः] माघः, [7]आश्वत्थः, [8]प्रोष्ठपादः, [9]भद्रपादः ॥१०९॥

अव०—[1]बहुङ् महुङ् वृद्धौ, बह्वा 'उदित०' (४।४।९८) नोऽन्तः, बहन्तेऽस्मात्कार्यजातमिति बहुलम्, 'स्थाबह्किंवहिविन्दिभ्यः किन्नलुक् च' (उणा० ४८६) इत्युणादिसूत्रेण उलः प्रत्ययः, नोऽन्तो लुप्यते च । [2]अभिजयतीति अभिजित्, क्विप्, तोऽन्तः, नपुंसकलिङ्गः, अभिजिता चन्द्रयुक्तेन युक्तः कालः- 'चन्द्र०' (६।२।६) अण्, लुप्, अभिजिति जातः,- 'जाते' (६।३।९८) अण्, 'बहुलमन्येभ्यः' (६।३। १०९) इति विकल्पेन अणो लोपः । [3]आश्वयुक्= आश्विनी, अश्वयुजा चन्द्रयुक्तेन युक्तः कालः अश्वयुक्, 'चन्द्रयुक्तात्०' (६।२।६) अण्, लोपश्च, ततोऽश्वयुजि जातोऽश्वयुक्, 'भर्तु०'(६।३।८९) अण्, 'बहुलमन्येभ्यः' इत्यनेन अण् लुप्यते विकल्पेन । [4]शतं भिषजो=वैद्या यस्यां सा, शतभिषजा (चन्द्रयुक्तेन युक्तः कालः,–) चन्द्रयुक्ता०' (६।२।६) अण्, लुप् च; शतभिषजि जातः,–'भर्तु०' (६।३।८९) अण्, 'बहुलम०' (६।३।१०९) विकल्पेनाणो लोपः, अत्र 'वा जाते द्विः' (६।२।१३७) इत्यनेन 'भर्तुसन्ध्या०' इति विहितोऽण् वा ङित् भवति, तेन विकल्पेनान्त्यस्वरादिलोपः, एवं रूपत्रयम्– शतभिषक्, शातभिषजः, शातभिषः । [5]एवं मृगशिरसि जातो मृगशिराः, मार्गशीर्षः, 'शीर्षः स्वरे तद्धिते' (३।२।१०३) इत्यनेन शिरसः शीर्षादेशः । [6]अश्वाः सन्त्यस्याः– इन्, अथवा 'विपिनाजिनादयः' (उ० २८४) इत्युणादिना अश्विन इति निपातः, 'गौरा०' (२।४।१९) ङी, अश्विनीषु जाता,–'भर्तु०' (६।३।८९) अण्, 'जातिश्च णि०' (३।२।५१) इति पुंवद्भावः । अभ्यन्तरचन्द्रमसा इति अश्विन (?) एवं श्रवणः, श्रवणा; उत्तरः, उत्तरा । [7]आश्विनीनक्षत्रमश्वत्थः अश्वत्थमुच्यते, अश्वत्थे जातः=आश्वत्थः । अथवा अश्वत्थो मुहूर्त्तः । [8]प्रोष्ठो गौः, तस्येव पादौ यासां ताः प्रोष्ठपदाः । [9]भद्राणि पदानि या ………………… (सां ता भद्रपदाः) । प्रोष्ठपदा भद्रपदा इति निष्पाद्य, तदनन्तरं प्रोष्ठपदाभिर्भद्र-

★ श्रीहैमलिङ्गानुशासनविवरणे स्त्रीलिङ्गप्रकरणे नवमश्लोके ।

पदाभिश्चन्द्रयुक्ताभिः युक्तः कालः,– 'चन्द्र०' (६।२।६) इत्यण्, लोपश्च, 'ङ्यादेर्गौण०' (२।४।९५) इति आप्निवृत्तिः, पुनराप्, प्रोष्ठपदासु भद्रपदासु जातो माणवकः,–'भर्तु०' अण्, 'प्रोष्ठ-भद्राज्जाते' (७।४।१३) इत्युत्तरपदवृद्धिः ॥१०९॥

## स्थानान्त-गोशाल-खरशालात् ॥६।३।११०॥

म०वृ०–स्थानान्तशब्दात् गोशालखरशालाभ्यां च परस्य जातेऽर्थे प्रत्ययस्य 'लुप्' स्यात्, नाम्नि ।[1]गोस्थाने जातः गोस्थानः, [2]गोशालः, खरशालः[3] ॥११०॥

---

अव०–[1]'गोस्थानः,' एवमश्वस्थानः । [2]गोशाले जातः । [3]खरशाले जातः ॥११०॥

## वत्स-शालाद्वा ॥६।३।१११॥

म० वृ०–[ सप्तम्यन्तात् ] वत्सशालाज्जाते प्रत्ययस्य 'वा लुप्' स्यात्, नाम्नि । वत्सशालः, वात्सशालः ॥१११॥

## सोदर्य-समानोदर्यौ ॥६।३।११२॥

म० वृ०–एतौ यप्रत्ययान्तौ निपात्येते । समानोदरे जातः=सोदर्यः, समानोदर्यः [ =भ्राता ] । निपातनात् पक्षे समानस्य सभावः ॥ ११२ ॥

## कालाद्देये ऋणे ॥६।३।११३॥

म० वृ०–सप्तम्यन्तात्कालवाचिनो 'यथाविहितं' प्रत्ययः स्याद् देये ऋणार्थे । नाम्नीति निवृत्तम् । मासे देयमृणं=मासिकम्, सांवत्सरिकमृणम्, मासादिके गते सति देयमित्यर्थः । [ऋणे इति किम्? मासदेया भिक्षा,स्वातौ देयं स्वातिवाचनम्] ॥ ११३ ॥

## कलाप्यश्वत्थयवबुसोमाव्यासैषमसोऽकः ॥ ६।३।११४ ॥

म० वृ०–कलापिन्–अश्वत्थ–यवबुस–उमाव्यास–ऐषमसभ्यः [सप्तम्यन्तेभ्यः] कालवाचिभ्यो देये ऋणे–'ऽकः' स्याद् । [1]इकणादेरपवादः । [2]कलापकम्, [3]अश्वत्थकम्, [4]यवबुसकम्, [5]उमाव्यासकम्, ऐषमकम्[6] ॥११४॥

अव०–[1]'वर्षाकालेभ्यः' (६।३।८०), ऐषमस्त्यच्, 'सायंचिरं०' (६।३।८८) इति उक्तानामिकणादीनाम् । [2]'कलि शब्दसङ्ख्यानयोः' कल्यते=शब्दायते मयूरपिच्छतया,– 'कलेराप:' (उणा० ३०८) इत्युणादिसूत्रेण आपः, कलापोऽस्यास्ति,– 'अतोऽनेक०'(७।२।६) इति इन्, यस्मिन् काले मयूराः केदाराः इक्षवः कलापिनो भवन्ति स कालस्तत्साहचर्यात् कलापी इत्युच्यते, कलापिनि देयमृणं कलापकम्, अकः प्रत्ययः, 'कलापिकुथुसि०' (७।४।६२) इत्यादिसूत्रेण इन् लुप्यते । [3]यस्मिन् काले अश्वत्थाः फलन्ति स कालोऽश्वत्थः, तत्र देयमृणमश्वत्थकम् । [4]यत्र काले यवानां बुसं भवति स कालो यवबुसम्, तत्र देयमृणं यवबुसकम् । [5]उमाः=अतस्यो व्यवस्यन्ते=विक्षिप्यन्ते यत्र काले स कालः उमाव्यासः, 'व्यञ्जनाद् घञ्' (५।३।१३२), तत्र देयमृणमुमाव्यासकम् । [6]ऐषमोऽस्मिन् संवत्सरे देयमृणमैषमकम् । सर्वत्र 'कलाप्य०' इति अकः ॥११४॥

## ग्रीष्मा-ऽवरसमादकञ् ॥६।३।११५॥

म० वृ०–ग्रीष्म– अवरसमाभ्यां (सप्तम्यन्ताभ्यां) कालवाचिभ्यां देये ऋणे– 'ऽकञ्' स्यात् । अणिकणोरपवादः । ('भर्तु०' (६।३।८९) अण्, 'वर्षाका० (६।३।८०) इकण्), ग्रीष्मे देयमृणं ग्रैष्मकम्, अवरा[1] समा=अवरसमा, अथवा [2]समाया अवरस्त्वमित्यवरसमम्; अवरसमायामवरसमे वा देयमृणमावरसमकम् । [3]आपरसमकमित्यपि केचित् ॥ ११५ ॥

---

अव०–उपचारादत्र कालत्वम् । [1]'विशेषणं विशेष्ये०' (३।१।९६) इति समासः । [2]उत्तरपदार्थप्राधान्ये तत्पुरुषसमासोऽयम् । [3]अपरसम इति शब्दः ॥११५॥

## संवत्सरा-ऽऽग्रहायण्या इकण् च ॥६।३।११६॥

म० वृ०–संवत्सर-आग्रहायणीभ्यां देये ऋणे इकण् चकारादकञ् च स्यात् । अणिकणोरपवादः । संवत्सरे देयमृणं फलं पर्व वा=सांवत्सरिकम्, सांवत्सरकम्; आग्रहायणिकम्, आग्रहायणकम् ॥११६॥

अव०– 'संवत्सरात् फलपर्वणोः' ( ६।३।९० ) इत्यण् प्राप्नोति, 'वर्षाकालेभ्यः' ( ६।३।८० ) इति इकण् प्राप्नोति, उभयोरपि बाधकमिदं संवत्सराग्रहायण्या०' इति वचनम । ऋणे वाच्ये 'कालाद् देये०' (६।३।११३)अणप्राप्तिः ॥११६॥

## साधु-पुष्यत्-पच्यमाने ॥६।३।११७॥

म० वृ०–सप्तम्यन्तात् कालविशेषवाचिनः साधौ पुष्यति पच्यमाने चार्थे 'यथाविहितं' प्रत्यया भवन्ति । साधौ,– [1]हैमनमनुलेपनम्, हैमन्तम्, हैमन्तिकम्; पुष्यति,–[2]वासन्त्यः [भर्तु० (६।३।८९) अण्] कुन्दलताः, [3]ग्रैष्म्यः पाटलाः । पच्यमाने,– [4]शारदाः शाल्यः ['भर्तु०' (६।३।८९) अण्] ।११७।

अव०– [1]हेमन्ते साधु,– 'हेमन्ताद्वा तलुक् च' (६।३।९१) इति अण् तलोपश्च, हेमन्ते साधु=हैमनम् । [2]वसन्ते पुष्यन्ति=वासन्त्यः, 'भर्तु०' (६।३।८९) अण् । [3]ग्रीष्मे पुष्यन्ति=ग्रैष्म्यः । [4]शरदि पच्यन्ते=शारदाः, 'भर्तु०' (६।३।८९) अण् ॥११७॥

## उप्ते ॥६।३।११८॥

म० वृ०–सप्तम्यन्तात् कालवाचिन उप्तेऽर्थे 'यथाविहितं' प्रत्ययाः स्युः । शरद्युप्ताः शारदाः यवाः । योगविभाग उत्तरार्थः ॥११८॥

अव०–एवं हेमन्ते ( उप्ताः) हैमनाः, ग्रैष्माः, नैदाघाः, भर्तु० (६।३।८९) अण् ॥११८॥

## आश्वयुज्या अकञ् ॥६।३।११९॥

म० वृ०–सप्तम्यन्तात् आश्वयुजीशब्दादुप्तेऽर्थे-'ऽकञ्' स्यात् । इकणोऽपवादः । [1]आश्वयुजकाः माषाः ॥११९॥

अव०– [1]अश्विनीपर्यायः अश्वयुज् शब्दः, ततोऽश्वयुजा चन्द्रयुक्तया इति वाक्यं कर्तुं युक्तम्, परमर्थसुखावबोधार्थं पर्यायान्तरेण अश्विनीभिश्चन्द्रयुक्ताभिर्युक्ता या पौर्णमासी सा आश्वयुजी इत्युच्यते इति वाक्यं कृत्वा'चन्द्रयुक्ता०' (६।२।६) इति अण्, ततो ङी,आश्वयुज्यां पूर्णिमास्याम्(? पूर्णिमायाम्)उप्ता आश्वयुजका माषाः, 'आश्वयुज्या०' इति अकञ् ॥११९॥

## ग्रीष्म-वसन्ताद्वा ॥६।३।१२०॥

म० व०–आभ्यां सप्तम्यन्ताभ्यामुप्ते 'वाऽकञ्' स्यात् । ऋत्वणोऽपवादः । [ग्रीष्मे उप्तं=] ग्रैष्मकम्, ग्रैष्मं सस्यम् । [वसन्ते उप्तं=] वासन्तकम्, वासन्तम् ॥१२०॥

## व्याहरति मृगे ॥६।३।१२१॥

म० वृ०–कालवाचिनो व्याहरति [1]मृगेऽर्थे 'यथाविहितं' प्रत्ययः स्यात् । निशायां व्याहरति [भाषते]=नैशिकः नैशो वा शृगालः[2] । मृग इति किम्? वसन्ते व्याहरति कोकिलः ॥१२१॥

अव०–[1]आरण्याः पशवो मृगा इत्युच्यन्ते । [2]एवं प्रदोषे व्याहरति=प्रादोषिकः प्रादोषो वा, 'निशाप्रदोषात्' ( ६।३।८३ ) इत्यनेन विकल्पेन इकण्, पक्षे औत्सर्गिकोऽण् ॥१२१॥

## जयिनि च ॥६।३।१२२॥

म० वृ०–कालवाचिनः सप्तम्यन्तात् [1]जयिनि वाच्ये 'यथाविहितं' प्रत्ययः स्यात् । निशासहचरितमध्ययनं [2]निशा, तत्र जयी साभ्यासः नैशिकः, [3]नैशः; [4]प्रादोषिकः, प्रादोषः; [5]वासन्तः, [6]वार्षिकः ॥१२२॥

अव०–[1]जयः प्रसहनमभ्यासः, जयोऽस्यास्तीति जयी, तस्मिन् । [2]जयो हि क्रिया, सा च केवलकालस्य न घटते । केवलकालविषयस्य जयस्यायोगात् निशासहचरिताध्ययनादिवृत्तयो नि-

शादयः शब्दाः प्रत्ययमुत्पादयन्ति। [३]'भर्तु०'(६।३।८९) अण्। [४]प्रदोषसहचरितमध्ययनं प्रदोषः, तत्र जयी साभ्यासः प्रादोषिकः। [५]वसन्ते जयी। [६]'वर्षा-कालेभ्यः' (६।३।८०) ॥१२२॥

## भवे ॥६।३।१२३॥

म० वृ०-तत्रेति सप्तम्यन्ताद् भवेऽर्थे 'यथा-विहितमणादय एयणादयो' भवन्ति। सत्ता भव-त्यर्थो गृह्यते, न जन्म, जाते इत्यनेनैव गतार्थत्वात्। [मथुरायां भवः=] माथुरः, औत्सः, नादेयः, ग्राम्यः ग्रामीणः ॥१२३॥

## दिगादि-देहांशाद् यः ॥६।३।१२४॥

म० वृ०-दिगादिभ्यो देहावयववाचिनश्च सप्तम्यन्ताद्भवेऽर्थे 'यः प्रत्ययः' स्यात्। अणीया-देरपवादः। दिशि भवो= दिश्यः, [वर्गे भवः=] वर्ग्यः, [१]अप्सव्यः। देहांश-, [२]मूर्द्धन्यः, [३]दन्त्यः, तालव्यः, औष्ठ्यः, मुख्यः, [४]पद्यः, जघन्यः, [५]कण्ठ-तालव्यः, [६]दन्तोष्ठ्यः ॥१२४॥

अव०-दिगादिगणः- दिश्, वर्ग, पूग, गण, यूथ, पक्ष, धाय्या, मित्र, धाय्यमित्र, मेधा, न्याय, अन्तर; अन्तर्, पथिन्, रहस्, अलीक, उख, उखा, साक्षिन्, आदि, अन्त, मुख, जघन, मेघ, वंश, अनु-वंश, देश, काल, वेश, आकाश, अप्। मुखजघन-वंशानुवंशशब्दानामदेहांशार्थ इह पाठः, तथाहि-सेनाया यन्मुखं तत्र भवो=मुख्यः, सेनाया यज्जघनं तत्र भवो=जघन्यः, वंशोऽन्वयः, तत्र भवो=वंश्यः, अनुरूपो वंशोऽनुवंशस्तत्र भवोऽनुवंश्यः। इति दिगादिगणः। [१]अप्सु भवः अप्सव्यः, यः प्रत्ययः, 'अस्वयंभुवोऽव्' (७।४।७०) अव्, 'अपो ययोनि-मतिचरे' (३।२।२८) इति सप्तम्या अलुप्। [२]मूर्द्धनि भवः,-'अनोऽस्ये ये'(७।४।५१) इति अनो लोपाभावः। एवं[३]दन्ते भवः। एवं सर्वत्र। [४]पादयो-र्भवः=पद्यः, 'हिमहतिकाषिये पद्' (३।२।९६) इति पत्। [५]देहांशात्तदन्तादपि इच्छन्त्येके, तन्मते कण्ठतालव्य इत्यादेर्यः। कण्ठश्च तालु च, 'प्राणि-तूर्याङ्गाणाम्' (३।१।१३७) इति समाहारः, कण्ठता-लुनि भवः। एवं [६]दन्तोष्ठे भवः=दन्तोष्ठ्यः ।१२४।

## नाम्न्युदकात् ॥६।३।१२५॥

म० वृ०-[सप्तम्यन्तात्] उदकाद् भवेऽर्थे 'यः' स्यान्नाम्नि। [१]उदक्या रजस्वला [=ऋतुमती नारी] ॥ १२५ ॥

अव०-[१]उदक्या इति कोऽर्थः ? (उदकः) नैमित्तिकः आधारः,उदकनिमित्तात् जलाधार शुचिना रजस्वला=ऋतुमती स्त्री पवित्रीभवतीत्यर्थः ।१२५।

## मध्यादिनण्णेया मोऽन्तश्च ॥६।३।१२६॥

म० वृ०-[सप्तम्यन्तात्] मध्यशब्दाद् भवे-ऽर्थे 'दिनण्- ण- ईयप्रत्यया' भवन्ति, तद्योगे च मागमः स्यात्। मध्ये भवा=[१]माध्यंदिनाः, माध्यमः, मध्यमीयः ॥ १२६ ॥

अव०-[१]माध्यंदिनाः शाखाविशेषा उद्गायन्ति ॥ १२६ ॥

## जिह्वामूलाङ्गुलेश्चेयः ॥६।३।१२७॥

म० वृ०-जिह्वामूल- अङ्गुलिभ्यां मध्यशब्दाच्च भवे 'ईयः' स्यात्। [दिगादि]यापवादः। [जिह्वा-मूले भवः=] जिह्वामूलीयः, (अङ्गुलौ भवः=) अङ्गु-लीयः,मध्यीयः। चकारो मध्यशब्दानुकर्षणार्थः मोऽ-न्ताभावार्थश्च ॥ १२७ ॥

## वर्गान्तात् ॥६।३।१२८॥

म० वृ०-वर्गशब्दान्तात्सप्तम्यन्ताद् भवेऽर्थे 'ईयः' स्यात्। (अणोऽपवादः) कवर्गीयः वर्णः ।१२८।

## ईनयौ चाशब्दे ॥६।३।१२९॥

म० वृ०-[सप्तम्यन्तात्] वर्गान्ताद्भवे 'ईनयौ चकारादीयश्च' स्यात्,न शब्दे वाच्ये। [१]भरतवर्गीणः [ईनः],भरतवर्ग्यः [ यप्रत्ययः), भरतवर्गीयः (ईयः)। एवं [२]बाहुबलिवर्गीणः, [३]युष्मद्वर्ग्यः। अश-ब्द इति किम्? कवर्गीयः ('वर्गान्तात्' (६।३।१२८) ईयः) ॥१२९॥

अव०-[१]वर्गशब्दः पक्षवाची, भरतस्य वर्गः,

भरतवर्गे भवो=भरतवर्गीणः । एवं [२]बाहुबलिवर्गीण इत्यादीनामपि एवं वाक्यानि कार्याणि । बाहुबलिवर्ग्यः, बाहुबलिवर्गीयः । बाहुबलिनो बाहुबलेर्वा वर्गः । [३]युष्मद्वर्गीणः, युष्मद्वर्ग्यः, युष्मद्वर्गीयः । अस्मद्वर्गीणः, अस्मद्वर्ग्यः, अस्मद्वर्गीयः ॥१२९॥

### दृति-कुक्षि-कलशि-वस्त्यहेरेयण् ॥६।३।१३०॥

म० वृ०–[सप्तम्यन्तेभ्यः] एभ्यो भवे 'एयण्' स्याद् । अणाद्यपवादः । [१]दार्त्तेयं जलम्, [२]कौक्षेयो व्याधिः, [३]कालशेयं तक्रम्, [४]वास्तेयं पुरीषम्, [५]आहेयं विषम् ॥१३०॥

अव०–[१]दृतौ चर्मखल्लायां भवं दार्त्तेयम् । [२]कुक्षौ देहांशे भवः कौक्षेयः, 'दृतिकुक्षि'० इत्यनेन एयण् एव भवति परत्वात्, कौक्षेय इत्येव भवेऽर्थे प्रयोगः, 'धूमादेः' (६।३।४६) इत्यनेन अकञ् न भवति, अथवा खड्गे वाच्ये 'कुलकुक्षि०' (६।३।१२) इत्यनेन एयकञ् प्रत्ययोऽपि न भवति, "असिं कौक्षेयामुष्यम्य" इति पाठात । [३]कलश्यां मन्थन्यां भवम् । [४]वस्तौ पुरीषनिर्गमद्वारे भवम् । [५]अहौ भवम् ॥ १३० ॥

### आस्तेयम् ॥ ६।३।१३१॥

म० वृ०–अस्तिशब्दादस्ति अन्तप्रतिरूपकात् अव्ययात् धनविद्यमानपर्यायाद् भवे 'एयण्' निपात्यते, असृज्शब्दस्य वा अस्त्यादेशश्च । आस्तेयम् ॥१३१॥

अव०–धने वा विद्यमाने वा अस्तौ असृजि वा भवम्=आस्तेयम् ॥ १३१ ॥

### [१]ग्रीवातोऽण् च ॥६।३।१३२॥

म०वृ०–ग्रीवाशब्दाद् भवे–'ऽण् च' चकारादेयण्' स्यात् । देहांशात्वादः । [२]ग्रीवासु भवं=ग्रैवम्, ग्रैवेयम् ॥१३२॥

अव०[१]–ग्रावाभ्यो ग्रीवातः, 'अहीयरुहोऽपादाने' (७।२।८८) इति तस् । [२]ग्रीवासु भवं=ग्रैवम्, ग्रैवेयम् । अत्र ग्रीवाशब्दो यदा शिरोधमनीवचनः शिरोनाडीवाचकस्तदा तासां बहुत्वाद् बहुवचनम् १३२

### चतुर्मासान्नाम्नि ॥६।३।१३३॥

म० वृ०–चतुर्मासशब्दाद् भवेऽण् स्यान्नाम्नि । चतुर्षु मासेषु भवा=चातुर्मासी[१] आषाढी कार्त्तिकी, फाल्गुनी पौर्णमासी भण्यते । नाम्नीति किम् ? चतुर्षु मासेषु भवश्चतुर्मासः[२] ॥१३३॥

अव०–[१]चातुर्मासी इत्यत्र अण्विधानसामर्थ्यात् 'द्विगोरनपत्ये०'(६।१।२४) इत्यनेन अणो न लोपः । [२]'वर्षाकालेभ्यः' ( ६।३।८० ) इकण्, तस्य द्विगोरनपत्ये लोपः ॥१३३॥

### यज्ञे ञ्यः ॥६।३।१३४॥

म० वृ०–चतुर्मासाद्भवे यज्ञे वाच्ये 'ञ्यः' स्यात् । [चतुर्षु मासेषु भवाः= ] चातुर्मास्या यज्ञाः ॥१३४॥

### गम्भीर-पञ्चजन-बहि-र्देवात् ॥६।३।१३५॥

म० वृ०–गम्भीर, पञ्चजन, बहिस्, देव इत्येभ्यो [सप्तम्यन्तेभ्यः] भवे 'ञ्यः' स्यात् । अणाद्यपवादः । [१]गाम्भीर्यः, [२]पाञ्चजन्यः, [३]बाह्यः, [४]दैव्यः ॥१३५॥

अव०–[१]गम्भीरे भवो=गाम्भीर्यः । [२]रथकारपञ्चमस्य चातुर्वर्ण्यस्य पातालस्य वा (वाचकः) पञ्चजन इति लोकोक्तिः । पञ्च च ते जनाश्च पञ्चजनाः, अथवा पञ्च जना अस्य, पञ्चजनेषु भवः=पाञ्चजन्यः, अत्र न द्विगुः, अनाम्नि हि द्विगुविधानात्' यत एव न द्विगुः तत एव ञ(? ञ्य) इति तद्धितलुप् न भवति । [३]बहिर्भवः=बाह्यः । [४]देवेषु भवो=दैव्यः । तथा भवादन्यत्र गम्भीरे जातः=गाम्भीरः, पञ्चजने जातः =पाञ्चजन इति भवति, तथा पञ्चसु जनेषु भवः= पञ्चजन इति द्विगौ तु कृतेऽण्, अणो लुपि च सत्यां पञ्चजन इति, प्रयोगः, बहिर्जातो=बाहीकः, 'बहिषष्टीकण् च'(६।१।१६) इति टीकण्, देवस्येदमथवा देवादागतो=दैवः, 'देवाद् यञ् च' ( ६।१।२१) इति अञ्, दैव इति प्रयोगः सिध्यति । बाह्यः

बाहीक इत्यत्र 'प्रायोऽव्ययस्य' (७।४।६५) इति अन्त्यस्वरादिलोपः ॥१३५॥

## परिमुखादेरव्ययीभावात् ॥६।३।१३६॥

म० वृ०–परिमुखादिभ्यः [सप्तम्यन्तेभ्यः] अव्ययीभावेभ्यो भवे 'ञ्यः' स्यात्। [अणोऽपवादः] पारिमुख्यः[1]। परिमुखादेरिति किम्? [2]औपकूलम् औपमूलम्, औपकुम्भम, आनुकूलम्, आनुमूलम्। अव्ययीभावादिति किम्? पारिमुखः[3] ॥१३६॥

---

प्रव०–[1]परितः–सर्वतो मुखं=परिमुखम्, अत एव वचनादव्ययीभावः; अथवा परिशब्दो वर्जनार्थः, मुखात्परि=परिमुखम्, 'पर्यपाङ्' (३।१।३२) इत्यादिना अव्ययीभावः,परिमुखे भवः=पारिमुख्यः। परिमुख, परिहनु, पर्योष्ठ, पर्युलूखल, परिरथ, परिसिर, परिसीर, उपसीर, अनुसीर, उपस्थूण, उपस्थूल, उपकलाप, उपकपाल, अनुपथ, अनुगङ्ग, अनुतिल, अनुसीत, अनुमाष, अनुयव, अनुयूप, अनुवंश, अनुपद इति परिमुखादिगणः। [2]कूलस्य समीपम्=उपकूलम्, उपकूले भवम्=औपकूलम्। एवं मूलस्य समीपमित्यादि परिणा वाक्यानि। सर्वत्र 'विभक्तिसमीप' (३।१।३९) इत्यादिना अव्ययीभावः। [3]परिग्लानो मुखाय=परिमुखः, 'प्रात्यवपरिनिरा०' (३।१।४७) इति समासः, परिमुखे भवः पारिमुखः ॥१३६॥

## अन्तःपूर्वादिकण् ॥६।३।१३७॥

म० वृ०–अन्तःशब्दपूर्वपदादव्ययीभावाद् भवे 'इकण्' स्यात्। अणोऽपवादः। [1]आन्तरगारिकः, आन्तर्गेहिकः, [2]आन्तःपुरिकः। अव्ययीभावादिति किम्? [3]आन्तरगारम्, [4]आन्तःपुरम्। आन्तःकरणम् ॥१३७॥

---

प्रव०–[1]अगारस्यान्तः अन्तरगारम्, 'पारेमध्येऽग्रेऽन्तः'० (३।१।३०) इति समासः, अन्तरगारे भवः=आन्तरगारिकः। एवमान्तर्गेहिकः तथा आन्तर्वेश्मिकः, वेश्मनोऽन्तः, 'नपुंसकाद्वा' (७।३।८९) इति अत्समासान्तः, 'नोऽपदस्य'० (७।४।६१), अन्तर्वेश्मे भवः अन्तर्वेश्मनि वा भवः। [2]पुर्शब्दः पुरशब्दश्च, ततः पुरोऽन्तः पुरस्यान्तर्वा इत्यव्ययीभावः, अन्तःपुरे भवः=आन्तःपुरिक इति। [3]अन्तर्गतमगारस्य, अत्र 'प्रात्यवपरि'० (३।१।४७) इत्यनेन यद्यपि पञ्चम्यन्तेन समासः तथापि बाहुलकादत्र षष्ठ्यन्तेनापि समासः, यदि वा अन्तस्थं वा अगारं तदा 'विशेषणं विशेष्येण'० (३।१।९६) इति समासः, अन्तरगारे भवम्। [4]पुरोऽन्तर्गतम्, तत्र भवम्। ॥१३७॥

## पर्यनोर्ग्रामात् ॥६।३।१३८॥

म० वृ०–परि-अनुभ्यां परो यो ग्रामशब्दस्तदन्तादव्ययीभावाद् भवे 'इकण्' स्याद्। अणोऽपवादः। [1]पारिग्रामिकः, [2]आनुग्रामिकः ॥१३८॥

---

प्रव०–[1]ग्रामात्परि=परिग्रामम्, ग्रामस्य समीपमित्यर्थः, [2]एवमनुग्रामम्, परिग्रामे अनुग्रामे भवः ॥ १३८ ॥

## उपाज्जानु-नीवि-कर्णात् प्रायेण ॥६।३।१३९॥

म०वृ०–उपात् परे ये जानुनीविकर्णशब्दास्तदन्तादव्ययीभावा- 'दिकण्' स्यात्, प्रायेण तत्र भवे=यस्तत्र बाहुल्येन भवति, अन्यत्र कदाचित् स्यात्, तस्मिन्नित्यर्थः। [1]औपजानुकः सेवकः, [2]औपनीविकं प्रोत्रादाम,[3] औपकर्णिकः[4] सूचकः [दुर्जनः]। प्रायेणेति किम्? नित्यं भवे मा भूत्,– औपजानवं [4]मांसम् ॥१३९॥

---

प्रव०–[1]जानुनः समीपम्=उपजानु, प्रायेणोपजानु भवति अथवा उपजानौ भवः इति वाक्ये औपजानुकः इति प्रयोगः, अथवा औपजानुकं शाटकम् वस्त्रमित्यपि भवति। [2]उपनीवि भवम्। [3]माला इत्यर्थः। [4]कर्णयोः समीपम्, उपकर्णे भवः। [4]उपजानुनि भवम्=औपजानवम्। केवलो जानुशब्दो देहावयवो नायमुपजानुशब्दः इति 'दिगादिदेहांशा'० (६।३।१२४) इत्यनेन यः प्रत्ययो न भवति ॥१३९॥

**रूढावन्तःपुरादिकः ॥६।३।१४०॥**

म० वृ०—अन्तःपुरात् तत्र भवे 'इकः' स्यात् , रूढौ=स चेदन्तःपुरशब्दः [1]क्वचिद् रूढो भवति। [2]अन्तःपुरिका स्त्री। रूढाविति किम् ? [3]आन्तःपुरः ॥१४०॥

अव०—'रूढावन्तःपुरा०' इति सूत्रे रूढौ इति वचनादव्ययीभावादिति निवृत्तमसम्भवात्। [1]क्वचिद्रूढो भवति इत्यस्याग्रे क चायमन्तःपुरशब्दो रूढः ? एकपुरुषपरिग्रहे स्त्रीसमुदाये, उपचारात्तन्निवासे-(अपि) अन्तःपुरशब्दो रूढ इत्यर्थः इत्यक्षराणि ज्ञेयानि। [2]अन्तर्मध्ये पुरः (=अन्तःपुरः)। अन्तःपुरे भवा अन्तःपुरिका। [3]पुरस्यान्तर्गतमन्तःपुरम् ,यथा अन्तरङ्गुलो नखः, तत्र भवः (=आन्तःपुरः)। पुरस्यान्तः=अन्तःपुरम् , अन्तःपुरे भवा (=आन्तःपुरिकी), ('अन्तःपूर्व० इति सूत्रेण) इकण् , अव्ययीभावोऽत्र ॥१४०॥

**कर्ण-ललाटात् कल्[1] ॥६।३।१४१॥**

म० वृ०—रूढाविति वर्त्तते। कर्णललाटाभ्यां भवे 'कल्' स्यात् , रूढौ=प्रकृतिप्रत्ययसमुदायश्चेत् क्वचिद्रूढः। [2]कर्णिका कर्णाभरणविशेषः पद्माद्यवयवश्च। ललाटिका ललाटमण्डनम् ॥१४१॥

अव०—[1]कल्प्रत्यये लकारः स्त्रीलिङ्गार्थः। [2]कर्णे भवा कर्णिका इति भवार्थस्तु व्युत्पत्तिमात्रमेव, पद्माद्यवयवस्य कर्णेऽभावात् ॥१४१॥

**तस्य व्याख्याने च ग्रन्थात्[1] ॥६।३।१४२॥**

म०वृ०—तस्येति षष्ठ्यन्तात् [1]व्याख्यानेऽर्थे तत्रेति सप्तम्यन्ताच्च भवेऽर्थे ग्रन्थवाचिनो 'यथाविहितं प्रत्ययः' स्यात्। चकारस्तत्र भव इत्यस्यानुकर्षणार्थः[2]। [3]कार्त्तम् , [4]प्रातिपदिकीयम् ॥१४२॥

अव०—पञ्चमीङसिसूत्रत्वात् (?)। [1]ग्रन्थः शब्दानां सन्दर्भः रचना, स शब्दसन्दर्भो व्याख्यायते=अवयवशः कथ्यते येन तत् व्याख्यानम्। इयमवचूरिः सूत्राग्रे एव योजनीया, न सूत्रार्थतः। [2]अनुकर्षणार्थ इत्यस्याग्रे– "वाक्यार्थसमीपे चकारः श्रूयमाणः पूर्ववाक्यार्थमेव समुच्चिनोति"। [3]कृतां व्याख्यानं कृत्सु भवं वा कार्त्तम्। [4]प्रतीतं पदं=प्रतिपदम् , तत् प्रयोजनमस्य,– इकण् , प्रातिपदिकस्य व्याख्यानं तत्र भवं वा ॥१४२॥

**प्रायो बहुस्वरादिकण् ॥६।३।१४३॥**

म० वृ०—बहुस्वराद् ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे चार्थे [1]'प्राय इकण्' स्यात्। अणीयापवादः। [2]षात्वणत्विकम् , [3]नातानतिकम् , आख्यातिकम् , [4]प्राथमिकम् , [5]ब्राह्मणिकम्। प्रायोवचनात् क्वचिन्नेकण् ,– [6]सांहितम् ॥१४३॥

अव०—[1]प्रायस् इत्यत्र क्रियाविशेषणात् अम् , 'अव्ययस्य' (३।२।७) लुप्। [2]षत्वं च णत्वं च=षत्वणत्वे, षत्वणत्वयोर्व्याख्यानं तत्र भवं वा षात्वणत्विकम्। [3]उदात्तस्य नत इति संज्ञा, अनुदात्तस्य अनत इति संज्ञा पाणिनेः। अथवा नतस्यानुदात्त इति, अनतस्य उदात्त इति संज्ञा, अल्पस्वरत्वान्न तस्य पूर्वनिपातः। एवमात्मनेपदपरस्मैपदिकम् , आव्ययीभावतत्पुरुषिकम् , नामाख्यातिकम् , आख्यातिकम्। [4]प्रथमाया व्याख्यानं प्रथमायां भवं (वा) प्राथमिकम्। [5]ब्रह्मणा प्रोक्तं– 'तेन प्रोक्ते' (६।३।१८१) अण् , ब्राह्मणस्य व्याख्यानं ब्राह्मणे भवं वा। [6]संहिताया व्याख्यानं संहितायां भवम् (वा)॥ (एवम् ) प्रातिपदिकीयम् ॥१४३॥

**ऋगृद्-द्विस्वर-यागेभ्यः ॥६।३।१४४॥**

म० वृ०—ऋच्शब्दात् , ऋकारान्तात् , द्विस्वरात् , यागशब्देभ्यश्च ग्रन्थवाचिभ्यस्तस्य व्याख्याने तत्र भवे चार्थे 'इकण्' स्यात्[1]। [2]आर्चिकम् , [3]चातुर्होतृकम्। द्विस्वर,– [4]आङ्गिकम् , [5]पौर्षिकम् , [6]तार्किकम् , [7]नामिकम्। याग– [8]राजसूयिकम् १४४

अव०—[1]अणादेरपवादः। [2]ऋचां व्याख्यानमृक्षु भवं वा आर्चिकम्। [3]ऋकारान्त,– चतुर्षु होतृषु भवः, 'भवे' (६।३।१२३) अण् , 'द्विगोरनपत्ये०' ( ६।१।२४ ) इत्यनेन अण् लुप्यते, चतुर्होता नाम

न्थः, चतुर्होतृव्याख्यानं चतुर्होतरि भवं वा चातुर्होतृकम्। [४]अङ्गानां व्याख्यानमङ्गेषु भवम् (वा) आङ्गिकम्। [५]एवं पूर्वाणां व्याख्यानं पूर्वेषु भवं वा। (एवं) सूत्राणां व्याख्यानं सूत्रेषु भवं (वा) सौत्रिकम्। [६]तर्काणां व्याख्यानं तत्र भवं (वा) तार्किकम्। [७]नाम्नां व्याख्यानं तत्र भवं वा नामिकम्। [८]राजा सूयतेऽस्मिन् राजा वा सूयते, 'संचाय्यकुण्डपाय्य०' (५।१।२२) इति निपातः ॥१४४॥

## ऋषेरध्याये ॥६।३।१४५॥

म० वृ०—ऋषिशब्देभ्यो ग्रन्थवाचिभ्यस्तस्य व्याख्याने तत्र भवे चाध्याये 'इकण्' स्यात्। [१]वासिष्ठिकोऽध्यायः ॥१४५॥

---

अव०—[१]वसिष्ठस्य ग्रन्थस्य व्याख्यानस्तत्र भवो वा वासिष्ठिकः ॥१४५॥

## पुरोडाश-पौरोडाशादिकेकटौ ॥६।३।१४६॥

म० वृ०—आभ्यां ग्रन्थवाचिभ्यां तस्य व्याख्याने तत्र भवे चार्थे 'इक-इकटौ' भवतः। इकेकटोः स्त्रियां विशेषः। [१]पुरोडाशिकः, पुरोडाशिका, पुरोडाशिकी; पौरोडाशिकः[२] ॥१४६॥

---

अव०—[१]पुरो दास्यते (इति) अच्, पृषोदरादित्वात् पुरोडाश इति निपातः, पुरोडाशः पिष्टपिण्डः, तैः सहचरितो मन्त्रः पुरोडाश उच्यते। पुरोडाशस्य व्याख्यानं तत्र भवो वा पुरोडाशिकः, अत्र इकः। [२]पुरोडाश इत्ययं शब्दः, पुरोडाशानामयं पौरोडाशः,'तस्येदम्' (६।३।१६०) अण्, अथवा पुरोडाशेषु भवो वा पौरडाशः, तत्संस्कारको मन्त्रोऽपि पौरडाशः, तस्य व्याख्यानम् तत्र भवो वा पौरडाशिकः, (एवम्) पौरोडाशिका, पौरोडाशिकी। 'ऋगृद्वि०' (६।३।१४४)'प्रायो०' (६।३।१४३) इत्युक्तेकणः 'दोरीयः' (६।३।३२) इत्यस्य (?) ॥१४६॥

## छन्दसो यः ॥६।३।१४७॥

म०वृ०—छन्दस्शब्दात् ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे चार्थे 'यः' स्यात्। द्विस्वरेकणोऽपवादः। [१]छन्दस्यः ॥१४७॥

---

अव०—[१]छन्दसो व्याख्यानस्तत्र भवो वा छन्दस्यः ॥१४७॥

## शिक्षादेश्चाण् ॥६।३।१४८॥

म० वृ०—[१]शिक्षादिभ्यो ग्रन्थार्थेभ्यस्तस्य व्याख्याने तत्र भवे चा-'ऽण्' स्यात्। [२]इकणोऽपवादः। शैक्षः[३] ॥१४८॥

---

अव०—[१]शिक्षा, (ऋगयन,) पद, व्याख्यान, पदव्याख्यान, छन्दस्, छन्दोव्याख्यान, छन्दोमान, छन्दोभाष, (छन्दोविचिति, छन्दोविजिति,) न्याय, पुनरुक्त, निरुक्त, व्याकरण, निगम, वास्तुविद्या, अङ्गविद्या, क्षत्रविद्या, त्रिविद्या, विद्या, उत्पात, उत्पाद,संवत्सर, मुहूर्त्त, निमित्त, उपनिषत्, ऋचि, यज्ञ, चर्चा, क्रमेतर, श्लक्ष्ण इति शिक्षादिः। [२]इकण् (इति) उपलक्षणमीयस्य (अपि) अपवादः। [३]शिक्ष्यते अभ्यस्यते इति.............(शिक्षा, 'क्तेटो गुरो०' (५।३।१०६) इति स्त्रियामप्रत्ययः, शिक्षायाः) व्याख्यानस्तत्र भवो वा शैक्षः। एवं छान्दसः, नैयायः। 'शिक्षा.......(देश्चाण्'(६।३।१४८) इति) सूत्रं यावत् सप्तम्यन्तात् इति अधिकारः सम्पूर्णः ॥१४८॥

## तत आगते ॥६।३।१४९॥

म० वृ०—तत इति पञ्चम्यन्तादागतेऽर्थे 'यथाविहितमणादय एयणादयश्च' स्युः। [मथुराया आगतः=] माथुरः, औत्सः, [१]गव्यः, दैत्यः, बाह्यः, कालेयः, नादेयः, ग्राम्यः, ग्रामीणः ॥१४९॥

---

अव०—तत इति पञ्चम्यन्तात् इत्यधिकारः 'त्यदादेर्मयट्' (६।३।१५९) इति सूत्रं ११ यावत् सर्वसूत्रार्थेषु ज्ञातव्यः। सूत्रे मुख्यापादानपरिग्रहात् मथुराया आगच्छन् वृक्षमूलादागत इत्यत्र वृक्षमूलात् प्रासङ्गिकापादाने भवति इत्यर्थः। [१]गोभ्यः आगतः—'गोः स्वरे यः' (६।१।२७) यः प्रत्ययः, 'य्यक्ये' (१।२।२५) अव् ॥१४९॥

## [1]विद्यायोनिसम्बन्धादकञ् ॥६।३।१५०॥

म० वृ०–विद्यासम्बन्धवाचिभ्यः योनिसम्बन्धवाचिभ्यः पञ्चम्यन्तेभ्य आगते–'ऽकञ्' स्यात् । [2]विद्यासम्बन्ध– [3]आचार्यकम्, [4]औपाध्यायकम्, शैष्यकम्[5] । योनिसम्बन्ध– पैतामहकम्, पैतृव्यकम्, मातुलकम् ॥१५०॥

अव०–[1]विद्याकृतो योनिकृतश्च सम्बन्धो यस्य सः, तस्मात् । [2]अणोऽपवादः । ईयं तु प्रत्ययं परत्वादेव बाधते न तु अपवादत्वेन बाधत इति भावः । [3]आचार्यादागतम् । [4]एवमुपाध्यायादागतम् । (एवम्) [5]आन्तेवासकम् ॥१५०॥

## पितुर्यो वा ॥६।३।१५१॥

म० वृ०–[पञ्चम्यन्तात्] पितृशब्दादागते 'यः' स्यात् वा । इकणोऽपवादः । ['ऋत इकण्'(६।३।२६२) इत्यस्य] पितुरागतं [1]पित्र्यम्, [2]पैतृकम् ॥ १५१ ॥

अव०–[1]पित्र्यम्, अत्र 'ऋतो रस्तद्धिते'(१।२।२६) इति रत्वम् । [2]'पैतृकम्', अत्र पक्षे इकणपि सिद्धः, 'ऋवर्णोवर्ण'० (७।४।७१) इति इकण इलोपः ॥१५१॥

## ऋत इकण् ॥६।३।१५२॥

म० वृ०–ऋदन्तादागते 'इकण्' स्याद् [1]। अकञोऽपवादः[2] । होतुरागतं हौतृकम्, शास्तृकम् । योनिसम्बन्ध–, [पैतृकम्,] मातृकम्, भ्रातृकम्, स्वासृकम्, जामातृकम्, [दौहितृकम्, नानान्दृकम्] मातुरागता मातृकी विद्या ॥१५२॥

अव०–[1]विद्यायोनिसम्बन्धवाचिन ऋदन्तात् पञ्चम्यन्तादिति सूत्रार्थः । [2]विद्यायोन्युक्ताकञोऽपवादः ॥१५२॥

## आयस्थानाद् ॥६।३।१५३॥

म० वृ०–स्वामिग्राह्य भाग [1]आयः, स यस्मिन्नुत्पद्यते तद् आयस्थानम्, तद्वाचिन[2]आगते 'इकण्' स्यात्[3] । [4]आतरिकम्, [5]शौल्कशालिकम्, आपणिकम्, दौवारिकम् ॥१५३॥

अव०–[1]एति स्वामिनमिति आयः, 'तन्व्यधीण०' (५।१।६४) इति णः । [2]पञ्चम्यन्तात् । [3]अणोऽपवादः । ईयं तु परत्वाद् बाधते । [4]एत्य आगत्य तरन्त्यस्मिन् इति आतरः, आङ् पूर्वः तरतेः, 'युवर्ण०' (५।३।२८) इत्यल्, नदीतीर्थं घाटः,[6] आतरादागतमातरिकम् । [5]शुल्कशाला मण्डपिका ॥१५३॥

## शुण्डिकादेरण् ॥६।३।१५४॥

म० वृ०–शुण्डिकादिभ्य[1]आगते–'ऽण्' स्यात् । इकणादेरपवादः [आदिशब्दात् अकञ् ईयः] । [1]शौण्डिकम्, औदपानम्[2] ॥१५४॥

अव०–[1]पञ्चम्यन्तेभ्यः । शुण्डिका, उदपान, पर्ण, कृकण, उलप, तृण, तीर्थ, स्थण्डिल, उपल, उदक, भूमि, पिप्पल इति शुण्डिकादिः । ● शुण्डो मदनिर्भरे इत्यनेकार्थे । शुण्डो मदपूरितः, शुण्डा वा सुरा । [1]शुण्डोऽत्रास्ति–'अतोऽनेकस्वरात्'(७।२।६) इत्यनेन इकः, शुण्डास्यास्ति– 'व्रीह्यादिभ्यस्तौ' (७।२।५) इकः, शुण्डिकः शुण्डिका (वा) सुरापणः सुराविक्रयी वा उच्यते, शुण्डिकादागतं शौण्डिकम् । [2]उदकं पीयतेऽस्मिन्–'करणाधारे' (५।३।१२९) अनट्, 'नाम्न्युत्तपदस्य च' (३।२।१०७) इति उदकस्य उदभावः, उदपानादागतम् ॥१५४॥

## गोत्रादङ्कवत् ॥६।३।१५५॥

म० वृ०–गोत्रवाचिनः पञ्चम्यन्तादागतेऽर्थे 'ऽङ्क इव प्रत्ययः' स्यात् । विदेभ्य आगतं [1]वैदम्, गार्गम्[2] ॥१५५॥

● "शुण्डापि जलहस्तिन्यां मदिराकरिहस्तयोः ।
नलिन्यां वारयोषायां शुण्डस्तु मदनिर्भरे" ॥ (श्रीहैमलिङ्गानुशासनविवरणान्तर्गतश्लोकोऽयम्)

अव०–[1]विदस्यापत्यानि, 'विदादेर्वृद्धे' (६।१।४१) अञ्, 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्-लुप्, ततो विदानामयं सङ्घो घोषो वा अङ्को वा, 'सङ्घघोषाङ्क'० (६।३।१७२) इत्यनेन सङ्घादौ अर्थे अण्, यथा वेद इत्यादिषु सङ्घघोषाङ्काद्यर्थेषु अण् भवति तथा विदेभ्य आगतमिति वाक्ये ततः आगतेऽर्थे गोत्रादङ्कवत्' (६।१।१५५) इति सूत्रेणापि अण् सिद्धः। 'गोत्रादङ्कवत्' (६।३।१५५) इत्यस्यायं भावार्थो दर्शितः। एवं [2]गार्ग्यं दाक्ष्यम् (?गार्गं दाक्षम्) इत्यादयोऽपि साध्याः। तथा 'गोत्रादङ्क०'(६।३।१५५) इत्यत्र अङ्कग्रहणेन तस्येदमित्यर्थसामान्यं लक्ष्यते, तेन अकञ् प्रत्ययो 'गोत्राददण्ड'० (६।३।१६९) इत्युक्तोऽतिदिश्यते। अन्यथा 'सङ्घघोष०' (६।३।१७२) इत्युक्तोऽणेव स्यात्। तेन उपगवानामयमौपगवकः, एवं गार्ग्यायणकः इत्यत्र 'गोत्राददण्ड'० (६।१।१६९) इत्यनेन अकञ् भवति, तथा औपगवेभ्य आगत इत्यर्थेऽपि अकञ् साध्यते। एवं 'रैवतिकादेरीयः' (६।३।१७०) ★। रैवतिकेभ्यः आगतं Aरैवतिकीयम्, Bगौरग्रीवीयम्। A रेवत्या चन्द्रयुक्तया युक्तः कालः–'चन्द्र'० (६।२।६) अण्, लुप् च, ङीनिवृत्तिः, पुनर्ङी, रेवत्यां जातः, 'भर्तु०' (६।३।८९) अण्, 'चित्रारेवती०' (६।३।१०८) लुप्, रेवत्या अपत्यानि, 'रेवत्यादेरिकण्' (६।१।८६), ततो रैवतिकेभ्य आगतम्। B गौरी ग्रीवाऽस्य, गौरग्रीवाद् 'अत इञ्' (६।१।३१), तस्याङ्कः ॥१५५॥

## नृ-हेतुभ्यो रूप्य-मयटौ वा ॥६।३।१५६॥

म० वृ०–नृवाचिभ्यो हेतुवाचिभ्यश्च पञ्चम्यन्तेभ्य आगतेऽर्थे 'रूप्य मयट्' इति प्रत्ययौ वा भवतः। चैत्रादागतं=चैत्ररूप्यम्, चैत्रमयम्, चैत्रीयम्। हेतु,– समादागतं=समरूप्यम्, सममयम्; विषमरूप्यम्, विषममयम्; पक्षे ['गहादिभ्यः' (६।३।६३) ईयः]समीयम्, विषमीयम्; पापरूप्यम्, पापमयम्, पापीयम्, ['दोरीयः' (६।३।३२)]। टकारो ङ्यर्थः,–चैत्रमयी, सममयी ॥१५६॥

अव०–हेतुः कारणम्। नृग्रहणमहेत्वर्थम्। वचनभेदाद्यथासङ्ख्याभावः। बहुवचनं स्वरूपव्युदासार्थम् ॥१५६॥

## प्रभवति ॥६।३।१५७॥

म० वृ०–पञ्चम्यन्ताच्छब्दात् प्रभवति=प्रथमं प्रकाशमानेऽर्थे 'यथाविहितं प्रत्ययः' स्यात्। हिमवतः प्रभवति हैमवती गङ्गा, दारदी सिन्धुः [दरत् पर्वतः] ॥१५७॥

अव०–प्रथममुपलभ्यमानता दृश्यमानता प्रभव उच्यते। अन्ये तु प्रभवति, कोऽर्थः? जायमाने इत्याहुः। तन्मते 卐 'जाते'(६।३।९८) इत्यनेन भूते काले सप्तम्यन्तात् प्रत्ययः, हिमवति जाता इति वाक्यम्, स्वमते पञ्चम्यन्ताद्वर्त्तमाने काले प्रत्यय इति विशेषः ॥१५७॥

## वैडूर्यः ॥६।३।१५८॥

म०वृ०–विडूरशब्दात्पञ्चम्यन्तात् प्रभवत्यर्थे 'ञ्यो' निपात्यते। विडूरात् प्रभवति वैडूर्यो मणिः, विडूरग्रामे ह्ययं संस्क्रियमाणो मणितया ततः प्रथमं प्रभवति[1]। यदा तु जायमानार्थः प्रभवशब्दस्तदा [2]वालवायशब्दस्य ञ्यः, तद्योगे वालवायस्य विडूरादेशो निपात्यते। वालवाय पर्याय एव वा विडूरशब्दः[3] ॥१५८॥

अव०–[1]विडूरग्रामे मणीनामाकरः। [2]वालवायनामा पर्वतः। तस्मादपि किञ्चित् किञ्चित् उत्पद्यते परं स मणिर्जात्यो न भवति, किन्तु पाषाण एवेति लोकोक्तिः। वालवायशब्दात्तु ईयप्रत्ययो न भवत्यनभिधानात् इति। [3]प्रतिनियतविषयाश्च रूढय इति वैयाकरणानामेव प्रसिद्धिः। यथा जित्वरीशब्दस्य वाराणस्यां वणिजामेव प्रसिद्धिः।

★ 'साध्यते' इत्यध्याहारः।

卐 अत्र 'तन्मते स्वमते' इति पाठोऽधिकः प्रतिभाति।

एतान्यक्षराणि त्रिङ्कुरशब्दस्य इत्यस्याग्रे पठितव्यानि ॥१५८॥

## त्यदादेर्मयट् ॥६।३।१५९॥

म० वृ०–त्यदादिभ्यः पञ्चम्यन्तेभ्यः प्रभवत्यर्थे 'मयट्' स्यात् । तन्मयम्, तन्मयी; भवन्मयम् [भवन्मयी] ॥१५९॥

अव०– पञ्चम्यन्तादित्यधिकारः सम्पूर्णः ॥१५९॥

## तस्येदम् ॥६।३।१६०॥

म०वृ०–तस्येति षष्ठ्यन्तात् इदमित्यर्थे 'यथाविहितमणादयश्च' भवन्ति । उपगोरिदमौपगवम्, [ मथुराया इदं ] माथुरं दैत्यम्, कालेयम्, आग्नेयम्, गव्यम्, नादेयम्, भानवीयः ॥१६०॥

अव०–'तस्येदम्' इति अधिकारो 'वहेस्तुरिश्चादिः' (६।३।१८०) इति सूत्रं २१ यावत् ज्ञातव्यः । सर्वसूत्रार्थेषु तस्य इति कोऽर्थः षष्ठ्यन्तान्नाम्नः इदमोऽर्थः ॥१६०॥

## हल-सीरादिकण् ॥६।३।१६१॥

म० वृ०–आभ्यां षष्ठ्यन्ताभ्यामिदमर्थे 'इकण्' स्यात् । अणोऽपवादः । हालिकम्, सैरिकम् ।१६१।

## समिध आधाने टेन्यण् ॥६।३।१६२॥

म० वृ०–समिध्शब्दात्तस्येदमर्थे 'टेन्यण्' स्यात्, तच्चेदिदमाधानं[1] भवति । टकारो ङ्यर्थः । [2]सामिधेन्यो मन्त्रः ॥१६२॥

अव०–[1]आधीयते येन समित् तदाधानम् । [2]समिधामाधानो मन्त्रः सामिधेन्यः ॥१६२॥

## विवाहे द्वन्द्वादकल् ॥६।३।१६३॥

म० वृ०–द्वन्द्वात्तस्येदमर्थे विवाहे वाच्ये 'अकल्' स्यात् । लः स्त्र्यर्थः । [1]गर्गभार्गविका ॥१६३॥

अव०–[1]गर्गस्यापत्यानि, 'गर्गादेर्यञ्' (६।१।४२), 'यञञोऽश्यापर्णा०' (६।१।१२६) इति यञ् लुप्यते, पुनर्गर्गशब्दः । भृगोरपत्यानि वृद्धानि, 'ऋषिवृष्ण्य०' (६।१।६१) इति अण्, भार्गव इति शब्दः सञ्जातः, भार्गवस्यापत्यानि युवानः, 'अत इञ्' (६।१।३१),'ञिदार्षा०' (६।१।१४०) इति इञ् लुप्यते, यथा इञ् लुप्तः तथा 'ञिदार्षा०' (६।१।१४०) इति अण्लोपोऽपि प्राप्नोति, परं 'गर्गभार्गविका' (६।१।१३६) इत्यनेनाण्लोपः प्रतिषिध्यते । तदनन्तरं गर्गाश्च भार्गवाश्च गर्गभार्गवम् (? वाः); गर्गभार्गवाणां विवाहो गर्गभार्गविका,'विवाहे द्वन्द्वादकल्' (६।३।१६३) ॥१६३॥

## अदेवासुरादिभ्यो वैरे ॥६।३।१६४॥

म० वृ०–द्वन्द्वात् देवासुरादिवर्जितात्तस्येदमर्थे वैरे–'अकल्' स्यात् । [1]काकोलूकस्येदं वैरं काकोलूकिका, [2]श्वावराहिका, अहिनकुलिका । अदेवासुरेति किम् ? [3]दैवासुरम्, [4]राक्षोऽसुरम् ॥१६४॥

अव०–देवासुरादिगणः प्रयोगगम्यः । [1]काकाश्च उलूकाश्चेति पूर्वं द्वन्द्वः, पश्चात्तस्येदमर्थे वाक्यम् । [2]श्वा च वराहश्च (श्वावराहौ),'शुनः'(३।२।९०) इति आत्वम्, श्वावराहयोरिदं वैरम् । [3]देवाश्च असुराश्च (देवासुराः), तेषामिदं वैरम् । [4]रक्षांसि चासुराश्च (रक्षोऽसुराः), तेषामिदं वैरम् ॥१६४॥

## नटान्नृत्ते ञ्यः ॥६।३।१६५॥

म० वृ०–नटशब्दात्तस्येदमर्थे नृत्ते 'ञ्यः' स्यात् । नटानामिदं नृत्तं नाट्यम् ॥१६५॥

अव०–नृत्त इति किम् ? नटानामिदं गृहम् ॥१६५॥

## छन्दोगौक्थिक-याज्ञिक-बह्वृचाच्च धर्माऽऽम्नाय-सङ्घे ॥६।३।१६६॥

म० वृ०—छन्दोगादिभ्यश्चरणेभ्यो नटाच्च तस्येदमर्थे धर्मादौ 'ञ्यः' स्यात् । [१]छन्दोगानां धर्म आम्नायः सङ्घो वा छान्दोग्यम्, [२]औक्थिक्यम्, [३]याज्ञिक्यम्, [४]बाह्वृच्यम्, नाट्यम् ॥१६६॥

प्रव०—[१]छन्दो गायन्तीति छन्दोगाः, 'गायोऽनुपसर्गाट्टक्' (५।१।७४) । एवम् [२]उक्थं [३](यज्ञं) विदन्त्यधीयते (वा),'याज्ञिकौक्थिकलौकायितिकम्' (६।२।१२२) इत्यनेन औक्थिकयाज्ञिकौ निपात्येते, निपातनात् इकण्, औक्थिकानां याज्ञिकानां धर्मादिः । [४]बह्वयः ऋचो यस्य, तत्र 'नञ्बहोर्ऋचो माणवचरणे' (७।३।१३५) इति अप् समासान्तः, बह्वृचानां धर्म इत्यादि वाक्यम् ॥१६६॥

## आथर्वणिकादणिकलुक् च ॥६।३।१६७॥

म० वृ०—आथर्वणिकशब्दात्तस्येदमर्थे धर्मादावण् स्यात्, [१]इकलोपश्च । [२]आथर्वणः ॥१६७॥

प्रव०—चरणादकञि प्राप्ते वचनमिदम् । [१]आथर्वणिकशब्दस्य । [२]अथर्वणा प्रोक्तं वेदं वेत्त्यधीते वा=आथर्वणिकः,'न्यायादेरिकण्'(६।२।११८), अत एव निपातनात् न्यायादिगणपाठसामर्थ्याद्वा 'प्रोक्तात्' (६।२।१२९) इति सूत्रेण इकण् न लुप्यते लोपः प्राप्तोऽपि, आथर्वणिकानां धर्मादिः ॥१६७॥

## चरणादकञ् ॥६।३।१६८॥

म० वृ०—चरणशब्दो वेदशाखावचनस्तद्योगात्तदध्यायिषु[१] वर्त्तते । चरणवाचिनस्तस्येदमर्थे 'धर्मादावकञ्' स्यात् । कठानां धर्म आम्नाय सङ्घो वा=काठकः,[२] चारककः, कालापकः, मौदकः ।१६८।

प्रव०—'चरणादकञ्' इत्ययं योगोऽणोऽपवादः । ईयं परत्वाद् बाधतेऽयं योगः । [१]वेदशाखाध्ययनपाठकेषु ब्राह्मणेषु । [२]कठो वेदशाखाध्ययनविशेषः, कठेन प्रोक्तो वेदः कठः, 'तेन प्रोक्ते' (६।३।१८१) इत्यनेन अण्, 'कठादिभ्यो वेदे लुप्' (६।३।१८३) इत्यनेन प्रोक्तविहितोऽण् लुप्यते, ततः कठप्रोक्तं वेदं विदन्त्यधीयते वा कठाः,'तद् वेत्त्यधीते'( ६।२।११७) इत्यण्, 'प्रोक्तात्' (६।२।१२९) इत्यनेन वेत्त्यधीतेऽर्थे विहितोऽण् लुप्यते, तदनन्तरं कठानां धर्मः आम्नायः सङ्घो वा काठकः । इत्थं चारककः, कालापकः, मौदकः– एतेऽपि साध्याः ॥१६८॥

## गोत्राददण्डमाणव-शिष्ये ॥६।३।१६९॥

म० वृ०—गोत्रवाचिनस्तस्येदमर्थे दण्डमाणवशिष्यवर्जिते–'ऽकञ्' स्यात् । [१]औपगवकम्, [२]दाक्षकम्, [३]गार्गकम्, [४]गार्ग्यायणकम् । अदण्डमाणवशिष्ये इति किम् ? दण्डप्रधाना माणवाः=दण्डमाणवाः, आश्रमिणां [५]रक्षापरिचरणार्थाः काण्वा[६] दण्डमाणवाः [७]शिष्या वा ॥१६९॥

प्रव०–'गोत्राददण्ड०' (६।३।१६९) इति अणोऽपवादः । गोत्रेतिवचनं परत्वादीय-अञ्प्रत्ययौ बाधते । [१]औपगवस्येदमौपगवकम्, अत्र ईयप्राप्तिः। [२]दाक्षेरिदं दाक्षकम् । [३]गार्ग्यस्येदं गार्गकम् । [४]गर्गस्यापत्यं वृद्धं गार्ग्यः, 'गर्गादेर्यञ्' (६।१।४२), गार्ग्यस्यापत्यं 'यञिञः' (६।१।५४) इत्यायनण्, गार्ग्यायणस्येदं 'गोत्रा०' (६।३।१६९) इत्यकञ् । [५]रक्षाकर्मणि सेवाकर्मणि नियुक्ताः पुरुषाः । [६]काण्वस्यापत्यं काण्व्यः,'गर्गादेर्यञ्'(६।१।४२),काण्वस्य इमे दण्डमाणवाः शिष्याः काण्वाः, 'तस्येदम्' (६।३।१६०) इत्यण्, 'यञञोऽश्यापर्णा०' (६।१।१२६) इत्यनेन यञ् लुप्यते । [७]तथा शिष्या अन्तेवासिनः अध्ययनपठनकर्मणि आवृताः ॥१६९॥

## रैवतिकादेरीयः ॥६।३।१७०॥

म० वृ०—रैवतिकादेर्गोत्रवाचिनस्तस्येदमर्थे 'ईयः' स्याद् । [१]अकञादेरपवादः । [२]रैवतिकीयः सङ्घादिः, रैवतिकीया दण्डमाणवशिष्याः, [३]गौरग्रीवीयं शकटम्, गौरग्रीवीयः सङ्घादिः दण्डेति ॥१७०॥

प्रव०–[१]'गोत्राददण्ड०' (६।३।१६९) अकञ्, आदिशब्दात् अञ् । [२]रेवत, रेवतरोहिणाद् भे'

(२।४।२६) इति ङी, रेवती, रेवत्या चन्द्रयुक्तया० अण्, लुप् च, रेवत्यां जातः, 'भर्तु०' (६।३।८९) अण्, 'चित्रारेवतीरोहिण्याः स्त्रियाम्' (६।३।१०८) इत्यणो लुप्, रेवत्या अपत्यम्, 'रेवत्यादेरिकण्' (६।१।८६), रैवतिकशब्दः, रैवतिकस्यायं सङ्घो-षादिर्वा, रैवतिकस्येमे दण्डमाणवाः शिष्याः (वा), 'रैवतिकादेरीयः' (६।३।१७०)। [3]गौरा ग्रीवा अस्य, 'गोश्चान्ते०' (२।४।९६) ह्रस्वः, 'परतः स्त्री पुंवत्०' (३।२।४९), गौरग्रीवस्यापत्यम्, 'अत इञ्' (६।१।३१), 'प्राग् भरते०' (६।१।१२९) लुप्, गौरग्रीव-स्येदं शकटं सङ्घादिर्वा दण्डमाणवः (वा)। रैवतिक, गौरग्रीव, स्वापिशिष्य, क्षेमधृति, औदमेधि, औदवाहि, वैजवापि इति रैवतिकादिगणः ॥१७०॥

## कौपिञ्जल-हास्तिपदादण् ॥६।३।१७१॥

म० वृ०—आभ्यां गोत्रार्थाभ्यां तस्येदमर्थे-'ऽण्' स्यात्। [1]कौपिञ्जलाः दण्डमाणवशिष्याः, एवं [2]हास्तिपदाः ॥१७१॥

---

अव०—[1]कुपिञ्जलस्यापत्यम्, [2]हस्तिपादस्या-पत्यम्, अतो निपातनादेवाण्, अन्यथा 'अत इञ्' (६।१।३१) स्यात्, निपातनात् पादस्य पद्भावः, कौपिञ्जलस्येमे, हास्तिपदस्येमे ॥१७१॥

## सङ्घ-घोषा-ऽङ्क-लक्षणेऽञ्-यञि-ञः।६।३।१७२।

म० वृ०—अञन्तात् यञन्तात् इञन्तात् च गोत्रवाचिनस्तस्येदमर्थे सङ्घादौ वाच्ये-'ऽण्' स्यात्। अकञोऽपवादः। अञ्,—[1]वैदः सङ्घादिः। यञ्,—[2]गार्गम्। इञ्,—[3]दाक्षः सङ्घादिः, [4]दाक्षं लक्षणम्। अथाङ्कलक्षणयोः को विशेषः? लक्षणं लक्ष्यस्यैव स्वम्, यथा शिखादि,[5] अङ्कस्तु स्वामिविशेषज्ञापकः। स्वस्तिकादिर्गवादिस्थो न गवादीनामेव स्वं भवति[6] ॥१७२॥

---

अव०—'सङ्घ०' (६।३।१७२) इति सूत्रे सङ्घादिष्विति किम्? विदानां गृहम्। अञ्यञिञ इति किम्? औपगवकम्, औपगवानामयं सङ्घादिः, 'गोत्राददण्ड०' (६।३।१६९) इति। गोत्रवाचिन इति किम्? सौतङ्गमीयः, सुतङ्गमेन निर्वृत्ता, चातुरर्थिकः 'सुतङ्गमादेरिञ्' (६।२।८५), 'इञ इतः' (२।४।७१) ङी, सौतङ्गम्या अयं सङ्घादिः, 'दोरीयः' (६।३।३२)। [1]विदस्यापत्यानि वैदाः, 'विदादेर्वृद्धे' (६।१।४१) इति अञ्, 'यञञोऽश्यापर्णा०' (६।१।१२६) इति अञ् लुप्यते, ततो विदानामयं सङ्घघोषाङ्को वा विदानामिदं लक्षणमिति वा वाक्ये 'सङ्घघोषा०' इत्यनेन अण्। [2]एवं गर्ग-स्यापत्यम्, 'गर्गादेर्यञ्' (६।१।४२), 'यञञोऽश्यापर्णा०' इति यञ् लुप्यते, गर्गाणामयं सङ्घादिः, गर्गाणामिदं लक्षणम्। [3]दक्षस्यापत्यानि, 'अत इञ्' (६।१।३१), दाक्षयः, दाक्षीणामयं सङ्घादिः। [4]दाक्षीणामिदं लक्षणं दाक्षं लक्षणम्। [5]यथा शिखया परिव्राजकमद्राक्षीत्, जटाभिस्तापसम-द्राक्षीत्, शिखालक्षणं स्वं लक्ष्यस्य परिव्राज-कस्यैव, नान्यस्य। [6]यथा गवादीनां न स्वं भवति तथा स्वामिनोऽपि न स्वमिति भावः। स्वामिनो ऽभिज्ञानमात्रमस्ति ॥१७२॥

## शाकलादकञ् च ॥६।३।१७३॥

म०वृ०—शाकलात्तस्येदमर्थे 'सङ्घादावण् अकञ् च' स्यात्। शाकलः, [1]शाकलकः ॥१७३॥

---

अव०—[1]शकल, शकलस्यापत्यं शाकल्यः, 'गर्गादेर्यञ्' (६।१।४२), शाकल्येन प्रोक्तम्, 'तेन प्रोक्ते' (६।३।१८१) अण्, 'यञञोऽश्यापर्णा०' (६।१।१२६) यञ्लोपः, शाकलेन प्रोक्तं वेदं विद-न्त्य०, 'तद्वेत्त्यधीते' (६।२।११७), 'प्रोक्तात्' (६।२।१२९) इति अणो लोपः, शाकलानां सङ्घादिः, 'शाकलादकञ् च' (६।३।१७३) इत्यनेनाण् अकञ् च,—शाकलः, शाकलकः ॥१७३॥

## गृहेऽग्नीधो रण् धश्च ॥६।३।१७४॥

म० वृ०—[अग्नीद् ऋत्विग्विशेषः] अग्निध्-शब्दात्तस्येदमर्थे गृहे 'रण्' स्यात्, अन्तस्य च तृतीय-

बाधनार्थं धादेशः । अग्नीध इदं गृहमाग्नीध्रम् ॥१७४॥

## रथात्सादेश्च[२] वोढ्रङ्गे[१] ॥६।३।१७५॥

म०वृ०–[३]नियमसूत्रमेतत् । रथात् केवलात् सपूर्वाच्च तस्येदमर्थे यः प्रत्ययः,[४] स रथस्य वोढरि रथाङ्गे एव च भवति । रथस्यायं वोढा रथ्योऽश्वः । रथस्येदं रथ्यं चक्रम् । सादि,-द्वयो रथयोर्वोढा [५]द्विरथोऽश्वः, [उत्तमरथस्येदम्=] उत्तमरथ्यम्, [६]आश्वरथं चक्रम् ॥१७५॥

अव०–[१]'वोढ्रङ्गे' एव इति नियमादन्यत्र वाक्यमेव भवति, न प्रत्ययः,–रथस्येदं स्थानम्, अश्वरथस्य स्वामी । यदि सूत्रेण सह 'रथात्सादेश्च वोढ्रङ्गे यः' इति परिणा एकयोगं कुर्यात् तदाऽणादिबाधनार्थमेव सूत्रं स्यात्, न नियमार्थम् । पृथक् कृते तु सूत्रेऽणादिबाधनार्थं नियमार्थं च 'रथात्सादे०' (६।३।१७५) इति सूत्रं सिद्धम् । [२]सादेः, कोऽर्थः ? अन्यशब्दात् रथशब्दात् । [३]यः प्रत्ययस्तु उत्तरसूत्रेण'यः' (६।३।१७६) इत्यनेनैव भवति, न 'रथात्सादेश्च०' इत्यनेन इति नियमसूत्रभावार्थः एव । [४]अयं यश्च 'यः' (६।३।१७६) इत्यनेन यः प्रत्ययः सर्वत्र । [५]एवम् त्रिरथः, द्विरथः त्रिरथ इत्यत्र'यः' इत्यनेन यः प्रत्ययः, 'द्विगोरनपत्ये यस्वर०' (६।१।२४) इत्यनेन यस्य लुप् । [६]अश्वैर्युक्तो रथोऽश्वरथः, अश्वरथस्येदमाश्वरथम्, अत्र उत्तरसूत्रेण 'पत्रपूर्वादञ्' (६।३।१७७) इत्यनेन अञ् ॥१७५॥

## यः ॥६।३।१७६॥

म०वृ०–रथात्केवलात्सादेश्च तस्येदमर्थे'यः प्रत्ययः' स्यात् । अणाद्यपवादः [आदिशब्दात् ईयः]। रथस्यायं वोढा रथ्यः । द्वयो रथयोर्वोढा=द्विरथः, [१]रथ्यं चक्रम्, [२]परमरथ्यं चक्रम् ॥१७६॥

अव०–[१]रथस्येदं चक्रं रथ्यम् । [२]परमरथस्येदं परमरथ्यं चक्रम् ॥१७६॥

## पत्रपूर्वादञ् ॥६।३।१७७॥

म० वृ०–पत्रं वाहनम्, तत्पूर्वात् रथात्तस्येदमर्थे–'ऽञ्' स्यात् । यापवादः । [अश्वरथस्येदम्=] आश्वरथं चक्रम् ॥१७७॥

## वाहनात् ॥६।३।१७८॥

म० वृ०–[१]वाहनवाचिनस्तस्येदमर्थे–'ऽञ्' स्यात्[२] । [३]औष्ट्रः, [४]रासभो रथः ॥१७८॥

अव०–[१]उह्यतेऽनेनेति वहनम्, वहनमेव वाहनम्,'प्रज्ञादिभ्योऽण्' (७।२।१६५) । [२]अणादेरपवादः । आदिशब्दात् ईयञ्ययोः । [३]उष्ट्रस्यायं रथ औष्ट्रः । [४]रासभस्यायं रथः ॥१७८॥

## वाह्यपथ्युपकरणे ॥६।३।१७९॥

म० वृ०–नियमसूत्रमिदम् । वाहनाद् योऽयं प्रत्यय उक्तः स वाह्ये पथि उपकरणे एव च इदमर्थे भवति, नान्यत्र । अश्वस्यायमाश्वो रथः, आश्वः[१] पन्थाः, आश्वं पल्ययनम्[२] । वाह्यपथ्युपकरण एव नियमादन्यत्र वाक्यमेव, न प्रत्ययः,– अश्वानां घासः ॥१७९॥

अव०–अश्वस्यायं पन्थाः आश्वः । [२]एवमाश्वी कशा, अश्वस्येयं कशा आश्वी, ताजणओ★ ॥१७९॥

## [१]वहेस्तुरिश्चादिः ॥६।३।१८०॥

म० वृ०–वहेः परो यः तृ चम्तृनो वा तृशब्दस्तदन्तान्नाम्नस्तस्येदमित्यर्थे 'ऽञ्', तृशब्दस्य चादिरिकारः स्यात् । [२]सांवहित्रम् ॥१८०॥

अव०–[१]वहि, तृ, इ, च, आदि इति रचना । वहेः पञ्चमीङसिः । तृ, पञ्चमीङसिः, 'ऋतो डुर्' (१।४।३७) । इ, प्रथमासिः । [२]सं=सम्यग् वहति–'णकतृचौ' (५।१।४८), संवह् तृ इति शब्दः, संवोढुः सारथेरिदं वाक्यं कृत्वा तृ (इत्यस्य) अग्रे अञ्प्रत्य-

★ प्राचीनकाले लौकिकभाषायां 'कशा' इत्यस्य 'ताजणओ' इति प्रसिद्धिः । तदुक्तं श्रीहैमलिङ्गानुशासनविवरणस्य दुर्गपदप्रबोधवृत्तौ–"अश्वादिताडनचर्मदण्ड इति लोके ताजणओ" ।

यः, ततो वह तृ विचाले अकारः (? इकारः), वृद्धिः, सांवाहित्रमिति सिद्धम । सावाहित्रमित्यत्र परे इकारागमे कर्त्तव्ये ढत्वादिकार्यमसत् भवति । इकारागमे कृते तु ढत्वं न प्राप्नोति ॥१८०॥

## [१]तेन प्रोक्ते[२] ॥६।३।१८१॥

म० वृ०–तेन इति तृतीयान्तान्नाम्नः प्रोक्तार्थे 'यथाविहितं प्रत्यया' भवन्ति । भद्रबाहुना प्रोक्तानि भाद्रबाहवानि [३]उत्तराध्ययनानि, [४]गणधरप्रत्येकबुद्धादिभिः कृतानि तेन व्याख्यातानीत्यर्थः । [५]पाणिनीयम् । [६]आपिशलम् । [७]औशनसम् । [८]बार्हस्पत्यम् ॥१८१॥

अव०–[१]तेन, पञ्चमीङसि, सूत्रत्वात् लोपः । [२]प्रकर्षेण व्याख्यातमध्यापितं वा प्रोक्तमित्यर्थः, न तु कृतं प्रोक्तमुच्यते, प्रोक्ते कृते इत्यर्थे हि वक्ष्यमाणेन 'कृते' (६।३।१९२) इति सूत्रेण अणादिप्रत्ययस्य विधास्यमानत्वात्, इति 'तेन प्रोक्ते' ऽत्र सूत्रे प्रोक्तं व्याख्यातमध्यापितमिति व्याख्येयम् । [३]उत्तरे उत्कृष्टकालेऽधीयम्(?)इति उत्तराध्ययनम् । [४]गणधरप्रत्येकबुद्धादिभिः सूत्रतः (कृतानि) भद्रबाहुनाऽर्थतो व्याख्यातानि इत्यर्थः । [५]पणनं पणः, 'पणेर्माने' (५।३।३२) इत्यल्, पणोऽस्यातीति 'अतोऽनेक'० (७।२।६) इति इन्, पणिनोऽपत्यं पाणिनः, 'ङसोऽपत्ये' (६।१।२८), पाणिनेन प्रोक्तम् । [६]आपिशलस्यापत्यम्– 'अत इञ्' (६।१।३१), आपिशलिना प्रोक्तमापिशलम्, 'वृद्धेऽञः' (६।३।२८) इतिसूत्रेण अञ्, आपिशलस्यापत्यम्, 'अत इञ्' । [७]उशनसा प्रोक्तम् । [८]बृहतां पतिः=बृहस्पतिः, वर्चस्कादिषु निपातः ॥१८१॥

## मौदादिभ्यः ॥६।३।१८२॥

म० वृ०–[१]मौदादिभ्यस्तेन प्रोक्ते 'यथाविहितं' [अणेव] प्रत्ययः स्यात् । [२]मौदाः, [३]पैप्पलादाः, [४]जाजलाः, [५]माथुरी वृत्तिः ॥१८२॥

अव०–[१]मौदादयः प्रयोगगम्याः । [२]मोदते (इति) 'नाम्युपान्त्य'० (५।१।५४) कः, मोदयतीति वाऽच्, मुदस्य मोदस्य वाऽपत्यम्, 'ऋषिवृष्ण्यं०' (६।१।६१) इति अण्, मौदेन प्रोक्तम्, 'मौदादिभ्यः' (६।३।१८२) इत्यण्, पुनर्मौदेन प्रोक्तं वेदं विदन्त्यधीयते वा, 'तद्वेत्त्यधीते' (६।२।११७) अण्, 'प्रोक्तात्' (६।२।१२९) इत्यणो लुप् । [३]पिप्पलमत्तीति 'कर्मणोऽण्'(५।१।७२), पिप्पलादस्यापत्यम्, 'ऋषि'० अण्, पैप्पलादेन प्रोक्तम्, 'मौदादि'० अण् । [४]जजलेन प्रोक्तम्, 'मौदादि'० अण्, जाजलमस्यास्ति, इन्, जाजलिना प्रोक्तं वेदं विद० जाजलाः । [५]मथुरायां भवः, माथुरेण प्रोक्ता ॥१८२॥

## कठादिभ्यो वेदे लुप् ॥६।३।१८३॥

म० वृ०–कठादिभ्यः प्रोक्तेऽर्थे यः प्रत्ययः तस्य 'लुप्' स्यात्, स चेत् प्रोक्तो वेदो भवति । कठाः, चरकाः, गोगडाः । 'वेदेन्ब्राह्मणमत्रैव' (६।२।१३०) इति नियमाद्वेदित्रध्येत्रोरेव विषये प्रत्ययस्य लुप् । वेद इति किम् ? [चरकेण प्रोक्ताः=] चारकाः श्लोकाः । कठादयः प्रयोगगम्याः ॥१८३॥

अव०–वेदेन्ब्राह्मणमित्याद्यक्षराणां भावार्थोऽयम्– यत्र अमुकेन प्रोक्तं वेदं विदन्त्यधीयते वा इति परिणा वाक्यं कृत्वा 'तेन प्रोक्ते' (६।३।१८१) अण् कृतो भवति तस्यैव अणः 'कठादिभ्यो'० इत्यनेन लोपः क्रियते, न वेत्त्यधीते विहितस्य । तस्य वेत्त्यधीते (विहितस्य) अणः 'प्रोक्तात्' (६।२।१२९) इति लोप उक्तोऽस्ति । अतः कठेन प्रोक्तं वेदं विदन्त्यधीयते वा–'तेन प्रोक्ते'(६।३।१८१) अण्, 'कठादिभ्यो वेदे'० इत्यनेनाण् लुप्यते, पुनर्वेत्त्यधीतेऽर्थेऽण्, तस्य 'प्रोक्तात्' (६।२।१२९) इत्यनेन लोपः । एवं चरकाः । गोरिव गडोऽस्य=गोगडः, गोगडेन प्रोक्तं वेदं विदन्त्यधीयते वा, तेन प्रोक्ते (६।३।१८१) अण्, (अनेन तस्य लुप्, पुनः) वेत्त्यधीतेऽण्, प्रोक्तात् (६।२।१२९) अणो लोपः ।१८३।

## तित्तिरि-वरतन्तु-खण्डिकोखादीयण् ॥६।३।१८४॥

म० वृ०– तित्तिरि-वरतन्तु-खण्डिका-उख-

शब्देभ्यस्तेन प्रोक्तार्थे 'ईयण्' स्यात्, चेत् प्रोक्तो वेदः। तैत्तिरीयाः, वारतन्तवीयाः, खाण्डिकीयाः, औखीयाः ॥१८४॥

## छगलिनो णेयिन् ॥६।३।१८५॥

म० वृ०—छगलिन्शब्दात्तेन प्रोक्ते वेदे 'णेयिन्' स्यात्। छागलेयिनः ॥१८५॥

## शौनकादिभ्यो णिन् ॥६।३।१८६॥

म० वृ०—शौनक इत्यादिभ्यस्तेन प्रोक्ते वेदे 'णिन्' स्यात्। शौनकिनः। भाल्लविना प्रोक्तं ब्राह्मणं विदन्त्यधीयते वा=भाल्लविनः। ❀ ब्राह्मणमपि वेद एव'। मन्त्रब्राह्मणं हि वेद उच्यते ॥१८६॥

अव०—शौनक, शाङ्गरव, वाजसनेय, शापेय, शाफेय, शाष्पेय, स्कन्ध, स्कम्भ, देवदर्श, रज्जुभार, रज्जुकण्ठ, दामकण्ठ, कठ, शाठ, कुशाठ, कुशाप, कुशायन, तलवकार, पुरुषांसक, परुषांसक, तुम्बुरु, उपलप, आलम्बि, पलिङ्ग, कमल, आरुणि, ताण्ड्य, श्यामायन, खादायन, कषायतल, स्तम्भ इति शौनकादिगणः। आकृतिगणोऽयम्। तेन भाल्लविना प्रोक्तं ब्राह्मणं विदन्त्यधीयते वा=भाल्लविनः इत्यादयः सिद्धाः। 'ब्राह्मणमपि वेद एव, मन्त्रब्राह्मणं हि वेदः; अयमर्थः— मन्त्रश्च ब्राह्मणं च तयोः समुदायो वेद उच्यते। ब्रह्मणा प्रोक्तो ग्रन्थो वेदरूपो ब्राह्मणम्; 'तेन प्रोक्ते' (६।३।१८१) अण्। "धर्मे दानाधिके तुल्यभागेऽर्द्धे ब्राह्मणं श्रुतौ" ★ इति लिङ्गपाठात् नपुंसकत्वम् ॥१८६॥

## पुराणे कल्पे ॥६।३।१८७॥

म० वृ०—तेन प्रोक्ते पुराणे कल्पे वाच्ये 'णिन्' स्यात्। अणाद्यपवादः। पिङ्गेन प्रोक्तः कल्पः पुराणः पैङ्गी कल्पः। येऽपि पैङ्गिनं कल्पं विदन्त्यधीयते वा तेऽपि पैङ्गिनः ॥१८७॥

## काश्यप-कौशिकाद् वेदवच्च ॥६।३।१८८॥

म० वृ०—आभ्यां तेन प्रोक्ते पुराणे कल्पे 'णिन्' स्यात्, ['दोरीयः' (६।३।३२) इति ईयापवादः] वेदवच्चास्मिन् कल्पे कार्यं भवति। [1]काश्यपिनः, [2]कौशिकिनः। वेदवच्चेत्यतिदेशाद्[3] "वेदेन् ब्राह्मण०" इति नियमाद्वेदित्रध्येतृविषयता[4] 'चरणादकञ्' (६।३।१६८) च भवति,— [4]काश्यपकः, [5]कौशिककः। वेदवच्चेत्यतिदेशार्थं वचनम् ॥१८८॥

अव०—[1]कश्यं— मद्यं पिबन्ति, 'आतो डोऽह्वा०' (५।१।७६) इति डः, कश्यपस्यापत्यं वृद्धम्, 'विदादेर्वृद्धे' (६।१।४१) अञ्, काश्यपः, काश्यपेन प्रोक्तं पुराणं कल्पं विदन्त्यधीयते (वा)=काश्यपिनः। [2]कुशिकस्यापत्यं वृद्धम्— 'विदादे०' (६।१।४१) अञ्, कौशिकेन प्रोक्तं पुराणं कल्पं विदन्त्य०। [3]'अतिदेशात्', कोऽर्थः? भणनात्। [4]विषयता भवतीतिहेतोः 'चरणादकञ्' (६।३।१६८) इति अकञपि भवति इति परमार्थः। [4]काश्यपिनां धर्म आम्नाय सङ्घो वा काश्यपकः। [5]कौशिकिनां (धर्म आम्नायः सघो वा) कौशिकिकः ॥१८८॥

## शिलालि-पाराशर्यान्नट भिक्षुसूत्रे[1] ॥६।३।१८९॥

म० वृ०—शिलालिन् पाराशर्य इत्याभ्यां तेन प्रोक्ते यथासङ्ख्यं नटसूत्रे भिक्षुसूत्रे च 'णिन्' स्यात्, वेदवच्चास्मिन् कार्यम्। [2]शैलालिनो नटाः। [3]पाराशरिणो भिक्षवः। शैलालकम्, पाराशरकम्। ॥१८९॥

अव०—[1]नटभिक्षोः (? क्ष्वोः) सूत्रम्। अणोरपवादं 'शिलालि०' सूत्रम्। शिलालिशब्दात् 'तेन प्रोक्ते' (६।३।१८१) इत्यणो विषयः। पराशरात्तु 'शकलादेर्यञः' (६।३।२७) इत्यञः प्राप्तिः। [2]अली भूषणेति अल्धातुः, शिलामलति, 'कर्मणोऽण्' (५।१।७२), शिलालोऽस्यास्ति, 'अतो०' (७।२।६)

❀ नन्वनेन वेदे प्रत्ययोऽभ्यधायि तत्कथं भाल्लविना प्रोक्तं ब्राह्मणमित्याह— ब्राह्मणमपीत्यादि।

★ श्रीहैमलिङ्गानुशासनविवरणे नपुंसकलिङ्गप्रकरणे सप्तमश्लोकस्य पूर्वार्द्धमिदम्।

इन्, शिलालिना प्रोक्तं नटसूत्रं विदन्त्यधीयते वा शिलालिपराश०' इत्यनेन णिन्, 'नोऽपदस्य०' (७।४।६१) इति ततः, "कृशाश्वी शैलाली" ❀इति नाममालापाठात् । [3]पराशरस्यापत्यम्– 'गर्गादेर्यञ्' (६।१।४२), पाराशर्येण प्रोक्तं भिक्षुसूत्रं विदन्त्यधीयते वा– 'शिलालि०' इत्यनेन णिन्, 'यञञोऽश्यापर्णा०' (६।१।१२६) इति यञ् लुप्यते ॥१८९॥

## कृशाश्व-कर्मन्दादिन् ॥६।३।१९०॥

म० वृ०–आभ्यां तेन प्रोक्ते यथासङ्ख्यं नटसूत्रे ( भिक्षुसूत्रे ) इन् स्यात्वेदवच्चास्मिन् कार्यम् । [अणोऽपवादः, 'तेन प्रोक्ते'(६।३।१८१) अणो विषयः ] [1]कृशाश्विनो नटाः । [2]कर्मन्दिनो भिक्षवः । अतिदेशादकञ् च– [3]कार्शाश्वकम्, [4]कार्म्मन्दकम् ॥१९०॥

अव०–[1]कृशा अश्वा यस्य, कृशाश्वेन प्रोक्तं नटसूत्रं ............ ( विदन्त्यधीयते वा कृशाश्विनो नटाः) । [2]कर्म द्यति=कर्मदः, 'आतो डो०' (५।१।७६), कर्मन्द इति सूत्रनिर्देशादेव मोऽन्तः, अथवा 'नवाऽखित्कृदन्ते०' ( ३।२।११७ ) इत्यत्र योगविभागबलात् मोऽन्तः, कर्मन्देन प्रोक्तं भिक्षुसूत्रं विदन्त्यधीयते वा कर्मन्दिनो भिक्षवः, अथवा 'अदु बन्धने', कर्माण्यन्दति बध्नाति इति 'कर्मणोऽण्' (५।१।७२), पृषोदरादित्वात् अलोपः, कर्मन्देन प्रोक्तं भिक्षुसूत्रं विदन्त्यधीयते वा कर्मन्दिनो भिक्षवः । [3]कृशाश्वोऽस्यास्ति, [4]कर्मन्दमस्यास्ति, इन्, कृशाश्विनो कर्मन्दिनो धर्मरुढ्यादिः, 'चरणादकञ्' (६।३।१६८) । बाहुलकात् धर्मादावपि क्लीबत्वम् ॥१९०॥

## उपज्ञाते ॥६।३।१९१॥

म० वृ०–तेनेति वर्त्तते, न प्रोक्तम् । तेनेति तृतीयान्तादुपज्ञातेऽर्थे 'यथाविहितं' [ईय एव] प्रत्ययः स्यात् । पाणिनीयम् ॥१९१॥

## कृते ॥६।३।१९२॥

म० वृ०–तेनेति तृतीयान्तात्कृते=उत्पादितेऽर्थे 'यथाविहितमणादयः' स्युः [आदिशब्दात् ईयः] शिवेन कृतो ग्रन्थः शैवः, [ वररुचिना कृतानि ] वाररुचानि वाक्यानि, सिद्धसेनीयः स्तवः, मनसा कृता मानसी कन्या ॥१९२॥

## नाम्नि मक्षिकादिभ्यः ॥६।३।१९३॥

म० वृ०–मक्षिकादिभ्यः [तृतीयान्तेभ्यः] कृतेऽर्थे यथाविहितं प्रत्ययो नाम्नि भवति । मक्षिकाभिः कृतं माक्षिकं मधु, [सरघाभिः कृतं ] सारघम् । नाम्नीति किम् ? मक्षिकाभिः कृतं शकृत् ॥१९३॥

अव०–मक्षिका, सरघा, गर्मुत्, नर्मुका, पुत्तिका, क्षुद्रा, भ्रमर, वटर, वातप इति मक्षिकादिगणः । वातपैः कृतं वातपम्, अत्रापि अण् एव भवति, न ईयः, स्वभावात् । इदमपि व्यावृत्युदाहरणं ज्ञातव्यम् ॥१९३॥

## कुलालादेरकञ् ॥६।३।१९४॥

म० वृ०–कुलालादिभ्यस्तेन कृते–'ऽकञ्' स्यान्नाम्नि । [ कुलालेन कृतं= ] कौलालकम्, [वरुटेन कृतं=] वारुटकम् । नाम्नीत्यभिधेयनियमार्थम् । तेन घटघटीशरावोदञ्चनाद्येव भाण्डं कौलालकम्, न यत् किञ्चित् कुलालकृतम् । शुर्पपिटकपटलिकापञ्छिकाद्येव भाण्डं वारुटकम्, नान्यद् । एवमन्यत्राप्यभिधेयनियमः ॥१९४॥

अव०–कुलाल, वरुट, कर्मार, निषाद, चण्डाल, सेना, सिरन्ध्र, देवराजन्, देवराज, परिषद्, वधू, भद्र, अनडुह्, ब्रह्मन्, कुम्भकार, अश्वपाक, रुरु इति कुलालादिगणः ॥१९४॥

## सर्वचर्म्मण ईनेनञौ ॥६।३।१९५॥

❀ अभिधानचिन्तामणिकोशस्य ३२९तमे श्लोके ।

म० वृ०–सर्वचर्मन्शब्दात्तेन कृते 'ईन–ईनञौ' भवतः । सर्वश्चर्मणा कृतः [१]सर्वचर्मीणः, सार्वचर्म्मीणः ['नोऽपदस्य तद्धिते' (७।४।६१) इति अनो लोपः] ॥१९५॥

अव०–[१]सर्वः कृतः, केन ? इति यो सर्वश्चर्मणा कृतः । अत्र सर्वशब्दस्य कृतापेक्षस्य चर्मशब्देन सहायोगेऽपि 'नाम नाम्ना'० (३।१।१८) इत्यादिना समासः । ........॥१९५॥

## उरसो याणौ ॥६।३।१९६॥

म० वृ०–उरस्शब्दात्तेन कृते 'य–आणौ' भवतः, नाम्नि । [उरसा कृतः=] उरस्यः, औरसः ॥१९६॥

## छन्दस्यः ॥६।३।१९७॥

म० वृ०–छन्दस्शब्दात्तेन कृते यो निपात्यते, नाम्नि । छन्दसा इच्छया कृतः=[१]छन्दस्यः, न तु वेदेन गायत्र्यादिना वा । नाम्नीत्यधिकारादभिधेयव्यवस्था। क्वचिदन्यत्रापि भवति [निपातनवशात्]–[२]एष वै सप्तदशाक्षरश्छन्दस्यो [छन्द एव] यज्ञमनुविहितः, अत्र स्वार्थे यः [न तु तेन कृते] ॥१९७॥

अव०– [१]निजवाञ्छया यः सखादिः कृतः स छन्दस्य उच्यते । छन्दःशब्देन वेदोऽप्युच्यते, गायत्र्यादिमन्त्रोऽपि, परं वेदादिवाची छन्दःशब्दो न ग्राह्यः । [२]ॐ श्रावय इति चतुरक्षरम् , अस्तु श्रौषट् इति चतुरक्षरम् , ये यजामहे इति पञ्चाक्षरम् , यज इति द्व्यक्षरम् , द्व्यक्षरो वषट्कारः, इति प्रकारेण अयम्=एष सप्तदशाक्षरो मन्त्रः छन्दस्यः यज्ञमनु, कोऽर्थः ? लक्षीकृत्य, विहितो=रचितवान् । वै इति भाषायां वाक्यालङ्कारे स्फुटे वा वर्त्तते । अत्र छन्दस्यशब्दे निपातनात् स्वार्थे यः प्रत्ययो भवति, न तु तेन कृतेऽर्थे । छन्द एव छन्दस्य इति वाक्यं कर्त्तव्यम् । ततो यः । यथा अनुष्टुबादिरक्षरसमूहश्छन्दः, तथा एषां सप्तदशानामक्षराणां समूहः छन्दस्य इत्युच्यते ॥१९७॥

## अमोऽधिकृत्य ग्रन्थे ॥६।३।१९८॥

म० वृ०–अम् इति द्वितीयान्तादधिकृत्य[१] कृते ग्रन्थेऽर्थे 'यथाविहितं' प्रत्ययः स्यात् । [२]सौभद्रः । ग्रन्थ इति किम् ? सुभद्रामधिकृत्य कृतः प्रासादः । कथं[३]वासवदत्ता, [४]सीताहरणम् ; ? उपचाराद् ग्रन्थे तच्छब्दत्वं [५]भविष्यति ॥१९८॥

अव०–[१]प्रस्तुत्य उद्दिश्य इत्यर्थः, आश्रित्य इत्यपि, तदपेक्षया द्वितीया । [२]सुभद्रामधिकृत्य–उद्दिश्य कृतो ग्रन्थः सौभद्रः । एवं सौतारः । [३]वासवदत्तामधिकृत्य कृताख्यायिका वासवदत्ता । [४]एवं सीताहरणमधिकृत्य–उद्दिश्य कृतमुपाख्यानं सीताहरणम् । एवं बलिबन्धनम् । [५]तच्छब्दता, तेन वासवदत्तादिशब्देन व्यपदेशात् वासवदत्तासीताद्युपचारादाख्यायिकापि वासवदत्तेत्युच्यते (? इत्याद्युच्यते) ॥ १९८ ॥

## ज्योतिषम् ॥६।३।१९९॥

म० वृ०–ज्योतिस्शब्दादमोऽधिकृत्य कृते ग्रन्थे– 'ऽण् वृद्ध्यभावश्च' निपात्यते । [१]ज्योतिषम् ॥ १९९ ॥

अव०–[१]ज्योतींषि अधिकृत्य कृतो ग्रन्थः । 'द्युति दीप्तौ' द्योतन्ते इति ज्योतिषः, 'द्युतेरादेश्च जः' (उणा० ९९१) इत्युणादिसूत्रेण इस्प्रत्ययः, दस्य जः, गुणः ॥१९९॥

## [१]शिशुक्रन्दादिभ्य ईयः ॥६।३।२००॥

म० वृ०–शिशुक्रन्दादिभ्योऽमोऽधिकृत्य कृते ग्रन्थे 'ईयः' स्यात् । [२]शिशुक्रन्दीयः इत्यादि ॥२००॥

अव०–[१]शिशुक्रन्द, यमसभ, इन्द्रजनन, प्रद्युम्नप्रत्यागमन, प्रद्युम्नोदयन, सीताहरण, सीतान्वेषण इति शिशुक्रन्दादिगणः । बहुवचनमाकृतिगणार्थम् । [२]शिशून् क्रन्दयति, 'कर्मणोऽण्' (५।१।७२), शिशुक्रन्दमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः ॥ २०० ॥

## द्वन्द्वात् प्रायः[१] ॥६।३।२०१॥

म०वृ०–द्वन्द्वसमासादमोऽधिकृत्य कृते(ग्रन्थे)प्राय

'ईयः' स्यादणोऽपवादः । [२]वाक्यपदीयम् ,[३]द्रव्यपर्यायीयम् । प्राय इति किम् ? [४]दैवासुरम् ,राक्षोऽसुरम् , गौणमुख्यम् [गौणमुख्यमधिकृत्य] ॥२०१॥

अव०–[१]प्रायस् इति क्रियाविशेषणम् , अम् , 'अव्य'० (३।३।७) । [२]वाक्यं च पदं च=वाक्यपदेऽधिकृत्य कृतो ग्रन्थः । [३]एवं द्रव्यं.................. (च पर्यायश्च द्रव्यपर्यायौ, द्रव्यपर्यायावधिकृत्य कृतो ग्रन्थः । देवाश्चासुराश्च=देवासुरम् ,देवासुरमधिकृत्य) कृतो ग्रन्थो दैवासुरम् , अण् ॥२०१॥

## [१]अभिनिष्क्रामति द्वारे ॥६।३।२०२॥

म० वृ०–द्वितीयान्तादभिनिष्क्रामत्यभिनिर्गच्छत्यर्थे 'यथाविहितं' प्रत्ययः स्यात् , चेदभिनिष्क्रामत् द्वारं भवति । [२]माथुरम् , नादेयम् , राष्ट्रियं द्वारम् ॥२०२॥

अव०–[१]आभिमुख्येन गच्छतीत्यर्थः । [२]मथुरामभिनिष्क्रामति=आभिमुख्येन गच्छति सौर्यपुरद्वारम् । सर्वत्र अभिना योगे द्वितीया । 'अभिनिष्क्रामति द्वारे' इति सूत्रे बृहद्वृत्तौ स्रुघ्नमभिनिष्क्रामति कन्यकुब्जद्वारमिदं वाक्यम् , स्रौघ्नमिति उदाहरणम् । एवं माथुरं सौर्यपुरद्वारमित्यादि । एषु उदाहरणेषु द्वारस्य करणभूतस्यापि अभिनिष्क्रमणक्रियायां स्वातन्त्र्यविवक्षा, यथा साध्वसिश्छिनत्ति, अत्र रचनाबहिर्भावे वाऽर्थे निष्क्रमिधातुर्वर्त्तते, यथा गृहकोणो निष्क्रान्तः ॥२०२॥

## गच्छति पथिदूते ॥६।३।२०३॥

म० वृ०–द्वितीयान्तात् गच्छति[१]पथि दूतेऽर्थे 'यथाविहितं' प्रत्ययः स्यात् । मथुरां गच्छति [२]माथुरः पन्था दूतो वा । [एवं नादेयः पन्था दूतो वा] पथिदूत इति किम् ? पाटलिपुत्रं गच्छति नौः पण्यं वणिग् वा ॥२०३॥

अव०–[१]योऽसौ गच्छति स यदि पन्था दूतो वा भवति इति भावः इति परमार्थः । [२]माथुरः पन्थाः दूतो वा, अत्र पथः कथं कर्तृत्वम् अचेतनत्वात् ? तत्राह–पथिस्थेषु=पथि वर्त्तमानेषु पथि प्रचलत्सु चैत्रादिषु तद्धेतुः पन्थाः अभिगच्छतीत्युच्यते । मथुरादिप्राप्तिर्वा पथो गमनम् । मथुरां गच्छति प्राप्नोति सम्बध्नातीति भावना कार्या इत्यर्थः ॥२०३॥

## भजति ॥६।३।२०४॥

म०वृ०–द्वितीयान्तात् भजत्यर्थे 'यथाविहितं' प्रत्ययः स्यात् । मथुरां भजति माथुरो विप्रः । एवं नादेयः ॥२०४॥

## महाराजादिकण् ॥६।३।२०५॥

० वृ०–द्वितीयान्तात् महाराजशब्दात् भजत्यर्थे 'इकण्' स्यात् [१]माहाराजिकः ॥२०५॥

अव०–[१]महत् , राजन् , महांश्चासौ राजा च, 'राजन्सखेः' (७३।१०६) इति अत् समासान्तः; 'जातीयैकार्थेऽच्वेः' (३।२।७०) इत्यनेन महत अन्तेडादेशः, महाराजं भजति=माहाराजिकः ॥२०५॥

## अचित्तादेदेशकालात् ॥६।३।२०६॥

म० वृ०–देशकालवर्जितं यदचित्तमचेतनं तद्वाचिनो [द्वितीयान्तात् ] भजत्यर्थे'इकण्' स्यात् । [अणादेर्बाधकः] । [१]आपूपिकः, [२]मौदकिकः, [३]पायसिकः । अचित्तादिति किम् ? दैवदत्तः[४] । अदेशकालादिति किम् ? [५]आङ्गः, [६]हैमन्तः ॥२०६॥

अव०–[१]अपूपान् भजति । [२]मोदकान् [३]पयो भजति । [४]देवदत्तं भजति । [५]अङ्गम्=अङ्गदेशं भजति । [६]हेमन्तं भजति, भजत्यर्थेऽपि 'हेमन्ताद्वा तलुक् च' (६।३।९१) ॥२०६॥

## [१]वासुदेवार्जुनादकः ॥६।३।२०७॥

म० वृ०–आभ्यां भजत्यर्थे–'ऽकः' स्यात् ईयाकञोरपवादः[२] । वासुदेवकः, अर्जुनकः ॥२०७॥

अव०–[१]अर्च्यत्वात् वासुदेवस्य पूर्वनिपातः । [२]यदा वासुदेवः संज्ञाशब्दः कस्यापि पुरुषस्य नाम भव-

ति, तदा क्षत्रियवचनोऽयं वासुदेवशब्दः इत्युत्तरसूत्रेणाकञ् न प्राप्नोति, किन्तु 'दोरीयः' (६।३।३२) स्यादिति 'वासुदेवार्जुना'० इति सूत्रे वासुदेवग्रहणम्। अर्जुनशब्दः क्षत्रियवाची इत्युत्तरेणाकञ् स्यात् इत्यर्जुनग्रहणम्। तथा केनैव सिद्धे यत् णकविधानं Aवासुदेवीं भजति Aअर्जुनीं भजति वासुदेवकः अर्जुनक इति प्रयोगसिद्ध्यर्थं तत्। अन्यथा के सति वासुदेवका इत्यादिरूपत्रयं स्यात् (? वासुदेविकः, अर्जुनिक इत्यनिष्टः प्रयोगः स्यात्)। A धवायोगा० (२।४।५९) इति ङी ॥२०७॥

## गोत्रक्षत्रियेभ्योऽकञ् प्रायः ॥६।३।२०८॥

म० वृ०–गोत्रवाचिभ्यः क्षत्रियवाचिभ्यो भजत्यर्थेऽकञ्' स्यात् प्रायः। अणाद्यपवादः[१]। [२]औपगवकः, [३]गार्गकः, [४]गार्ग्यायणकः। क्षत्रिय,– नाकुलकः, साहदेवकः [नकुलं सहदेवं भजति]। [५]बहुवचनं क्षत्रियविशेषपरिग्रहार्थम्। तेन क्षत्रियकमित्यपि। प्राय इति किम्? पाणिनीयः ॥२०८॥

---

अव०–[१]आदिशब्दात् ईय-अञोरपवादः। [२]औपगवं भजति। [३]गार्ग्यं भजति, अञ्, 'यञञो०' (६।१।१२६) यञ्लोपः। [४]गार्ग्यायणं भजति। [५]क्षत्रियाः क्षत्रियाणां ये विशेषाः उभयोरपि ग्रहणार्थं बहुवचनं कृतम्। तेन क्षत्रियकमित्यपि भवति। [६]पणिनोऽपत्यं=पाणिनस्तं भजति, 'दोरीयः' (६।३।३२), अकञ्प्रतिषेधः प्रायोग्रहणात्, ततो 'दोरीय' इति प्रवृत्तम्। एवं पौरवीयः, पुरोरपत्यं 'पुरुमगध'० (६।१।११६) इत्यण्, पौरवं भजति,– 'दोरीयः' ॥२०८॥

## सरूपाद् द्रेः सर्वं राष्ट्रवत्[१] ॥६।३।२०९॥

म०वृ०–'राष्ट्रक्षत्रियात्सरूपाद्राजापत्ये द्रिरञ्'(६।१।११४) इति प्रस्तुत्य[२]सरूपाद् यो द्रिः प्रत्यय उक्तस्तदन्तस्य[३] द्वितीयान्तस्य भजत्यर्थे सर्वं प्रकृतिः प्रत्ययश्च 'राष्ट्रवत्' [४]स्यात्। वार्ज्यं वार्ज्यौ वृजीन् वा भजति=[५]वृजिकः, [६]मद्रकः, [७]पाण्डवकः, [८]आङ्गकः। सरूपादिति किम्? [९]पौरवीयम्। द्रेरिति किम्? [१०]पाञ्चालः [उत्सायञ्]। सर्वग्रहणं प्रकृत्यतिदेशार्थम्[११]। तत्र वार्ज्यमाद्रपाण्ड्यकौरव्याः प्रयोजयन्ति। अन्यत्र हि नास्ति विशेषः[१२] ॥ २०९ ॥

अव०–[१]राष्ट्रस्येव=राष्ट्रवत्, 'स्यादेरिवे' (७।१।५२) इति वत्। [२]राष्ट्रक्षत्रियात्सरूपाद्राजापत्ये० (६।१।११४) इति अधिकृत्य=इत्यारभ्य। [३]द्रिप्रत्ययान्तस्य। [४]'राष्ट्रवत् स्यात्' इत्यक्षराणामयं भावार्थः, तथाहि राष्ट्रवाचिनी या प्रकृतिः वृजि इत्यादिका, ततश्च यः प्रत्ययो 'वृजिमद्राद् देशात्कः' (६।३।३८) इत्यादिसूत्रैर्विहितः, तदुभयं प्रकृतिः प्रत्ययश्च, इदं द्वयमपि राष्ट्रसम्बन्धिवार्ज्य इत्येवमादेः सरूपस्य द्रिप्रत्ययान्तस्य भजति इत्यस्मिन् विषये भजत्यर्थेऽपि भवतीत्यर्थः। [५]वृजीनां राजा राजानौ राजानः, अथवा वृजेरपत्यमपत्ये अपत्यानि वा, 'दुनादिकुर्वित्'० (६।१।११८) इत्यनेन ञ्यः, वार्ज्य इति शब्दः, [६]मद्राणां राजा इत्यादि, मद्रस्यापत्यमित्यादि, 'पुरुमगध०' इत्यण्, माद्र इति शब्दः; [७]पाण्डूनां राजा, पाण्डोरपत्यमपत्ये अपत्यानि वा, 'पाण्डोर्ड्यण्' (६।१।११९), पाण्ड्य इति शब्दः, सर्वत्र बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) इत्यनेन ञ्य-अण्-ड्यणो लुप्यन्ते, वृजि, मद्र, पाण्डु इति शब्दा लुप्ते सति जाताः; वृजीन् मद्रान् भजति इति वाक्ये 'सरूपाद् द्रेः सर्व०' इति सूत्रबलात् 'वृजिमद्राद् देशात्कः' (६।३।३८) इत्यनेन कः प्रत्ययोऽनुक्तोऽपि भजत्यर्थे भवति, पाण्डोः परतो 'बहुविषयेभ्यः' (६।३।४५) इत्यनेन अकञ्। [८]एवमाङ्गकः, वाङ्गकः, पाञ्चालकः, वैदेहकः। अङ्गानां वङ्गानां पाञ्चालानां विदेहानां राजा, अङ्गस्यापत्यानि वा इत्यादि वाक्यं कृत्वा अङ्गवङ्गात् 'पुरुमगध०' (६।१।११६) इत्यण्, पाञ्चालविदेहपरतो 'राष्ट्रः' (६।१।११४) इत्यञ्, 'बहुष्वस्त्रियाम्'(६।१।१२४) अञ्–अणलोपः, अङ्गान् वङ्गान् विदेहान् पञ्चालान् भजति इति वाक्ये 'सरूपाद् द्रेः सर्व'० (६।३।२०९) इति सूत्रबलात् 'बहुविषयेभ्यः' (६।१।११४) इति अकञ्। एवमैक्ष्वाकः। [९]पुरु नाम राजा, पुरोरपत्यमपत्ये अपत्यानि,

'पुरुमगध० (६।१।११६)' इत्यण्, पौरवस्येदं- 'दो-रीयः' (६।३।३२), राष्ट्रवाची न पुरुः, पुरुराज्ञोऽनु-खण्डनामदेशः इति सारूप्यं नास्ति । अत एव'पुरु-मगध०' (६।१।११६) इति सूत्रे द्विस्वरत्वेन सिद्धे पुरुग्रहणमसरूपार्थं कृतम् । बृहद्वृत्तौ तु पौरवान् भजति इति वाक्यं कृतमस्ति । [१०]राष्ट्रक्षत्रियबाह्म-णवचनः पञ्चालशब्दः, पञ्चालान् बाह्मणान् भजति, अत्र 'बहुविष०' (६।३।४५) न अकञ् । [११](तेन) वृजिकः,मद्रकः,पाण्डवकः इति (सिद्धम्) । [१२]आङ्ग-कः, वाङ्गकः, वैदेहक इत्यादिप्रयोगापेक्षया ॥२०९॥

## टस्तुल्यदिशि ॥६।३।२१०॥

म० वृ०-ट इति सहार्थतृतीयान्तात्तुल्य[१]-दिश्यर्थे [एकदिश्यर्थे]'यथाविहितं' प्रत्ययः स्यात् । [२]सुदाम्ना एकदिक्=सौदामनी विद्युत् । [३]हैमवती गङ्गा[४] ॥२१०॥

अव०-[१]तुल्या=समाना दिग् यस्य सः तुल्य-दिग्, एकदिगित्यर्थः । [२]सुदामा नाम पर्वतोऽस्यां दिशि तस्यामेव दिशि विद्युदियं विद्यते, तेन कार-णेन सा सुदाम्ना सहैकदिगुच्यते (एवं) सूर्येण सह एकदिग् सौरी बलाका, अण्, ङी, 'सूर्यागस्त्य-योरीये च' (२।४।८९) यकारलोपः । [३]हिमवतः एकदिक् हैमवती गङ्गा । [४]एवं त्रैककुदी लङ्का, त्रिक-कुदा एकदिक् ॥२१०॥

## तसिः ॥६।३।२११॥

म० वृ०-तृतीयान्तात्तुल्यदिश्यर्थे 'तसिः' प्र-त्ययः स्यात् । [१]सुदामतः, [२]सूर्यतः, हिमवतः, पा-र्श्वतः, पृष्ठतः । इकारो 'वत्तस्याम्' (१।१।३४) इत्यत्र विशेषणार्थः ॥२११॥

अव०-'तसिः' (६।३।२११) इति सूत्रेऽयं वि-शेषो लिख्यते,-'टस्तुल्य०' (६।३।२१०)' इति पूर्व-सूत्रेण यथास्वं स्वस्याः स्वस्याः प्रकृतेरनतिक्रमेणा-णादय एयणादयश्च विहिताः सन्ति । इदं तु तसिः (६।३।२११) इति प्रत्ययान्तरं सर्वप्रकृतिविषयं विधी-यते । [१]सुदाम्ना एकदिक् सुदामतः । एवं [२]सूर्येण एकदिक् इति परिणा सर्वत्र वाक्यं कार्यम् ॥२११॥

## यश्चोरसः ॥६।३।२१२॥

म० वृ०-उरस्शब्दात् तुल्यदिश्यर्थे 'यः प्रत्ययः चकारात्तसिश्च' । [अणोऽपवादः] उरसा एकदिग्=उरस्यः, उरस्तः ॥२१२॥

## सेर्निवासादस्य ॥६।३।२१३॥

म० वृ०-सेरिति प्रथमान्ताद्[१] निवासार्थात् [देशवाच्यात्] अस्येति षष्ठ्यर्थे 'यथाविहितं' प्र-त्ययः स्यात् । [२]माथुरः, नादेयः ॥२१३॥

अव०-[१]निवसन्त्यस्मिन् इति निवासो देश उच्यते । [२]मथुरा निवासो देशोऽस्य स माथुरः ॥२१३॥

## [१]आभिजनात् ॥६।३।२१४॥

म० वृ०-सेः प्रथमान्तादाभिजनान्निवासाद-स्य इति षष्ठ्यर्थे 'यथाविहितं' प्रत्ययः स्यात् । [२]माथुरः ॥२१४॥

अव०-[१]अभिजनः पूर्वबान्धवाः, तेषामयमा-भिजनः, पूर्वजपुरुषभूमिरित्यर्थः । [२]मथुराऽस्याभि-जनो निवासो माथुरः ॥२१४॥

## [१]शण्डिकादेर्ण्यः ॥६।३।२१५॥

म० वृ०-शण्डिक इत्यादिभ्य [प्रथमान्तेभ्यः] आभिजननिवासवाचिभ्योऽस्यार्थे 'ण्यः' स्यात् । अणाद्यपवादः[२] । शाण्डिक्यः ॥२१५॥

अव०-[१]शण्डिक, कूचवार, सर्वसेन, सर्वकेश, शङ्क, शक, शट, रक, (चरण,) चणक, शङ्कर, बोध इति शण्डिकादिगणः । [२]'कोपान्त्याच्चाण्' (६।३।५) 'बहुविषयेभ्यः' (६।३।४४) इत्यादेः ॥२१५॥

## सिन्ध्वादेरञ् ॥६।३।२१६॥

म० वृ०-सिन्ध्वादिभ्योऽस्यार्थे 'ऽञ्' स्यात् । [१]सैन्धवः, [२]वार्णवः ॥२१६॥

**अव०**–सिन्धु, वर्णु, मधुमत्, कम्बोज,(कुलूज,) गन्धार, कश्मीर, सल्व, किष्किन्ध, गब्दिक, उरस्, दरद्, ग्रामणी, काण्डवरक इति सिन्ध्वादिगणः । साल्वन्तेभ्यः 'कच्छादे०' (६।३।५५) इत्यकञ्ः, शेषेभ्यो बहुविषय····················(राष्ट्रलक्षणस्याकञः), ग्रामणीकाण्डवरकयोरीयस्य एतेषामपवादोऽञ् भवति । ················(तक्षशिलादिभ्यस्तु अञ् नोच्यते, उत्सर्गेणैव सिद्धत्वाद् । [1]सिन्धुराभिजनो) निवासोऽस्य । [2]वर्णुराभिजनो निवासोऽस्य ।२१६।

## [1]सलातुरादीयण् ॥६।३।२१७॥

**म० वृ०**–सलातुरादस्यार्थे 'ईयण्' स्यात् । [सलातुर आभिजनो निवासोऽस्य=] सालातुरीयः पाणिनिः ॥२१७॥

---

**अव०**–[1]सालैस्ततं=सालततम्, सालततं च तत् पुरं च, पृषोदरादित्वात् सलातुर इत्यादेशः ॥२१७॥

## तूदीवर्मत्या एयण् ॥६।३।२१८॥

**म० वृ०**–[1]तूदी–[2]वर्मतीभ्यामस्यार्थे 'एयण्' स्यात् । [3]तौदेयः, [4]वार्मतेयः ॥२१८॥

**अव०**–[1]तावानायामो यस्याः तावदायामा, पृषो० तूद इत्यादेशः, 'गौरादि०' (२।४।१९)···························(इति ङी, तूदी । [2]वर्म तनोति, 'क्वचित्' (५।१।१७१) इति डः, 'गौरादि०' ङी,) वर्मती । [3]तूदी आभिजनो निवासोऽस्य । [4]वर्मती आभिजनो निवासोऽस्य ॥२१८॥

## गिरेरीयोऽस्त्राजीवे ॥६।३।२१९॥

**म०वृ०**–गिरिर्य आभिजनो निवासस्तद्वाचिनः प्रथमान्तादस्येति षष्ठ्यर्थे 'ईयः' स्यात्, अस्त्राजीवे[1] । [2]रोहितगिरीयः, [3]भोजकटीयः । गिरेरिति किम्? [4]साङ्काश्यकोऽस्त्राजीवः । अस्त्राजीव इति किम्? पृथुः पर्वतः आभिजनो निवासोऽस्य पार्थवो विप्रः [अण्] ॥२१९॥ षष्ठाध्यायस्य तृतीयपादः समाप्तः । ग्रन्थाग्र–३२०॥

---

**अव०**–[1]'अस्त्राजीवे', कोऽर्थः? अस्त्रं शस्त्रमाजीवो जीविका यस्य पुंसस्तस्मिन् अस्त्राजीवे वाच्ये ईयो भवतीत्यर्थः । [2]रोहितगिरिराभिजनो निवासोऽस्य अस्त्राजीविनः पुरुषस्य स रोहितगिरीयः । एवं [3]भोजकटीयः । [4]साङ्काश्यनगरे भवः–'प्रस्थपुरवहान्त' (६।३।४३) इति अकञ् ॥२१९॥

अवचूरिश्लोक– ५८९, अक्षर–१० ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने षष्ठाध्यायस्य तृतीयः पादः समाप्तः ॥

॥ अर्हम् ॥

# ॥ षष्ठोऽध्यायः ॥

## [ चतुर्थः पादः ]

★

### इकण् ॥६।४।१॥

म०वृ०—अणः पूर्णोऽवधिः । अधिकारोऽयमापादपरिसमाप्तेः ॥१॥

प्रव०—इतः सूत्रादारभ्य येषु सूत्रेषु विशेषप्रत्यय उक्तोऽस्ति तेषु स एव प्रत्ययः । येषु सूत्रेषु प्रत्ययो न विहितः तत्र सामान्यत इकण् एव भवतीत्ययमधिकारभावार्थः । ङसि सूत्रत्वाल्लोपः (?) । १ ।

### [1]तेन जित-जयद्दीव्यत्-खनत्सु ॥६।४।२॥

म० वृ०—तेनेति तृतीयान्तान्नाम्नो जिते, जयति, दीव्यति, खनति चार्थे 'इकण्' स्यात् । [2]आक्षिकम्, [3]आक्षिकः, [4]आक्षिकः, शालाकिकः, [5]आभ्रिकः, कौद्दालिकः । इह तेनेति करणे तृतीया ज्ञेया, न हेतौ, न कर्त्तरि । अनभिधानात् तेन धनेन जितम्, चैत्रेण जितम्, अत्र नेकण् ॥२॥

प्रव०—[1]तेनेत्ययमधिकार 'ओजःसहोऽम्भसो'० (६।४।२७) इति यावत् सूत्रेषु २६ मध्ये प्रवर्त्तते । ("ओजःसहोऽम्भसो०" इति सूत्रं यावत् ) सर्वसूत्रार्थेषु "तेनेति तृतीयान्तात्" इति व्याख्येयम् । [2]अक्षैर्जितमाक्षिकम्, (एवम्) शालाकिकम् । [3]अक्षैर्जयति । [4]अक्षैर्दीव्यति । [5]अभ्री काष्ठमयी तीक्ष्णाग्रा कुद्दालिका, अभ्र्या खनति आभ्रिकः । अभ्र्या खनन् अङ्गुल्या खनतीति प्रयोगे सत्यप्यङ्गुलेः करणत्वे मुख्यकरणभावोऽभ्र्या एव नाङ्गुलेरित्यङ्गुलिशब्दान्नेकण् । यथा मथुराया आगच्छन् वृक्षमूलादागतः । तथा जयन्, दीव्यन्, खनदिति त्रिषु कालो न विवक्षितः, जिते त्वतीतकालो विवक्षितः ॥२॥

### संस्कृते ॥६।४।३॥

म०वृ०—तेनेति तृतीयान्तात् [1]संस्कृतेऽर्थे 'इकण्' स्यात् । दध्ना संस्कृतं=दाधिकम्, मारिचकम्, औपाध्यायिकः शिष्यः, विद्यया संस्कृतः वैद्यिकः । योगविभाग उत्तरार्थः ॥३॥

प्रव०—[1]सतो विद्यमानस्य उत्कर्षाधानं संस्कार उच्यते ॥३॥

### कुलत्थ-कोपान्त्यादण् ॥६।४।४॥

म० वृ०—कुलत्थात् ककारोपान्त्याच्च शब्दात् संस्कृतेऽर्थे-'ऽण्' स्यात् । कौलत्थम्, [1]तैत्तिडीकम् ।४।

प्रव०—[1]तित्तिडीकमम्लवेतसः । तित्तिडीकेन अथवा तित्तिडीकाभिरम्लिकाभिः संस्कृतम् । एवं मारण्डूकम्, दार्दुरूकम्; इमौ (मरण्डूकदर्दुरूकशब्दौ) वेशवारविशेषवाचिनौ ॥४॥

### संसृष्टे ॥६।४।५॥

० वृ०—तृतीयान्तात् संसृष्टेऽर्थे 'इकण्' स्यात् । मिश्रणमात्रं संसर्ग इति पूर्वोक्तात् संस्कृताद् भेदः । दध्ना संसृष्टं=दाधिकम्, [पिप्पलीभिः संसृष्टं=] पैप्पलिकम्, [1]वैषिका भक्ष्याः ॥५॥

प्रव०—[1]विषेण संसृष्टाः । एवमशुचिना संसृष्टम्= आशुचिकमन्नम् ॥५॥

### लवणादः ॥६।४।६॥

म०वृ०—लवणात् संसृष्टे 'अकारः प्रत्ययः'

स्यात् । लवणेन संसृष्टो लवणः सूपः, लवणः शाकः, [लवणा] यवागूर्वा ॥६॥

---

प्रव०–लुनाति वैरस्यमिति लवणम्, 'नन्द्यादिभ्योऽनः' (५।१।५२), गणपाठाण्णत्वम्, लवणशब्दो द्रव्यशब्दो गुणशब्दश्च, गुणशब्दो लावण्यवाची, तत्र द्रव्यवाची लवणशब्दः प्रत्ययं प्रयोजयति, द्रव्यवाचिलवणशब्दात् अप्रत्ययो भवतीत्यर्थः, न गुणवाची, गुणन विश्लेषपूर्वकस्य संसर्गस्याभावात्, अप्राप्तयोः प्राप्तिः संयोगः संसर्ग उच्यते ॥ ६ ॥

## चूर्णमुद्गाभ्यामिनणौ ॥६।४।७॥

म०वृ०–आभ्यां संसृष्टे 'यथासङ्ख्यमिन् अण्' भवतः । [1]चूर्णिनोऽपूपाः, मौद्ग ओदनः [मौद्गी यवागूः] ॥७॥

---

प्रव०–[1]चूर्णैः संसृष्टाः चूर्णिनः। एवं चूर्णिन्यो धानाः ॥७॥

## व्यञ्जनेभ्य उपसिक्ते ॥६।४।८॥

म०वृ०–व्यञ्जनवाचिनः [तृतीयान्तात्][1]उपसिक्तेऽर्थे 'इकण्' स्यात् । सूपेनोपसिक्तः=सौपिक ओदनः, दाधिक ओदनः, [घृतेन उपसिक्तः=] घार्तिकः सूपः, । [तैलेनोपसिक्तं=] तैलिकं शाकम् । व्यञ्जनशब्दो रूढितः सूपादौ वर्त्तते ॥८॥

---

प्रव०–[1]यद् भोजनार्थं भोज्यं भक्ष्यादिकं गृह्यते तदुपसिक्तमुच्यते, न स्थाल्यादिभाजनकटोरादिकम् । उपसिक्तमपि परमार्थतः संसृष्टमेवोच्यते, तर्हि 'संसृष्टे' (६।४।५) इत्यनेनैव सिद्धम्, किमिदं सूत्रम्? उच्यते, नियमार्थम्। व्यञ्जनैः संसृष्टे उपसिक्ते एव, अत्र व्यतिरेकप्रयोगः– सूपेन संसृष्टा स्थाली, तथा उपसिक्ते च व्यञ्जनैरेव, अत्रापि व्यतिरेकोदाहरणमिदम्– उदकेनोपसिक्त ओदन इति ॥८॥

## तरति ॥६।४।९॥

म० वृ०–तृतीयान्तात्तरत्यर्थे 'इकण्' स्यात् । [1]औडुपिकः, [2]काण्डप्लविकः, शारप्लविकः, गौपुच्छिकः ॥९॥

---

प्रव०–[1]उडूनि पाति– 'आतो डोऽह्वावामः' (५।१।७६), उडुपेन तरति=औडुपिकः । बृहद्वृत्तौ तु उडुवेन तरति=औडुविकः इति । [2]एवं काण्डप्लवेन तरतीत्यादि । औडुपिकः, काण्डप्लविकः, शारप्लविकः इमे त्रयोऽपि तरणभेदाः ॥९॥

## नौ-द्विस्वरादिकः ॥६।४।१०॥

म० वृ०–नौशब्दात् द्विस्वराच्च नाम्नस्तरत्यर्थे 'इकः' स्यात् । नावा तरति=नाविकः [नाविका इत्यपि] । द्विस्वर,– [घटेन तरति=] घटिकः, प्लविकः, [दृतिना तरति=] दृतिकः, बाहुकः, बाहुका [ 'ऋवर्णोवर्ण०' (७।४।७१) इति इकस्य इलोपः ] ॥१०॥

## चरति ॥६।४।११॥

म० वृ०–तृतीयान्ताच्चरत्यर्थे 'इकण्' स्यात् । चरतिर्गत्यर्थो भक्ष्यर्थश्च गृह्यते । गत्यर्थ,– [1]हास्तिकः, [शकटेन चरति=] शाकटिकः, [2]आकर्षिकः, । भक्ष्यर्थ,– [दध्ना चरति=] दाधिकः ॥११॥

---

प्रव०–[1]हस्तिना चरति । [2]आकर्षः सुवर्णनिकषोपलः औषधपेषणपाषाणश्च, उधरस उच्यते (?) लोके 'ओहरस' इति प्रसिद्धिः ॥११॥

## पर्पादेरिकट् ॥६।४।१२॥

म० वृ०–पर्पादिभ्यश्चरत्यर्थे 'इकट्' स्यात् । [पर्पेण चरति=] पर्पिकः, पर्पिकी, अश्विकः ॥१२॥

---

प्रव०–पर्पशब्दः शङ्खे, समुद्रे, प्रहरणविशेषे, उडुपे च वर्त्तते । पर्प, अश्व, अश्वत्थ, रथ, अर्घ्य, व्याल, व्यासः इति पर्पादिगणः ॥१२॥

## पदिकः ॥६।४।१३॥

म० वृ०–पादशब्दाच्चरत्यर्थे 'इकट्' पद्भावश्चास्य' निपात्यते । पद्भिकः ॥१३॥

अव०–पादाभ्यां चरति=पद्भिकः, 'पद्भिक' (६।४।१३) इत्यनेन इकट्, पादस्य पद् इत्यादेशश्च। 'घञ्यपे पादः पदणिक्य०' (२।१।१०२) इत्यनेनात्र पद् आदेशो न प्राप्नोति, 'स्वरस्य परे प्राग्विधौ' (७।४।११०) इति सूत्रबलात् अकारस्य स्थानिवद्भावात् पाद् इति शब्दो नहि इति न प्राप्नोतीति 'पद्भिक' इति सूत्रं कृतम् ॥१३॥

### श्वगणाद्वा ॥६।४।१४॥

म० वृ०–तृतीयान्तात् श्वगणाच्चरत्यर्थे 'इकट्' स्यात् वा । [ टः इयर्थः ] [१]श्वगणिकः, श्वगणिकी । पक्षे [इकण्] श्वागणिकः[२] ॥१४॥

अव०–[१]श्वगणेन=श्वानवृन्देन चरति,'श्वादेः०' ( ७।४।१० ) इत्यनेन औनिषेधः । [२]एवं श्वागणिकी ॥१४॥

### वेतनादेर्जीवति ॥६।४।१५॥

म० वृ०–[तृतीयान्तेभ्यः] वेतनादिभ्यो जीवत्यर्थे 'इकट्' स्यात् । वेतनेन जीवति=वैतनिकः ॥१५॥

अव०–वेतन, वाह, Aअर्द्धवाह, धनुस्, दण्ड, धनुर्दण्ड, जाल, वेश, उपवेश, प्रेषण, भृति, Bउपवेष, उपस्था, उपास्ति, उपस्थान, आराधनार्थे द्वयम्; सुख, शय्या, सुखशय्या, शक्ति, उपनिषद्, उपनिजस्त,(उपरिजन,) स्फिज, स्फिग, बाल, पुतचाल, उपदेश, पाद, उपहस्त इति वेतनादिगणः । Aअर्द्ध वाहस्य अर्द्धस्य वहनं वा । Bउपपन्नो वेष उपवेषः ॥१५॥

### व्यस्ताच्च क्रय-विक्रयादिकः ॥६।४।१६॥

म० वृ०–क्रयविक्रयात्समस्ताद् व्यस्ताच्च जीवत्यर्थे 'इकः' स्यात् । [१]क्रयविक्रयिकः, [२]क्रयिकः, विक्रयिकः ॥१६॥

अव०–[१]क्रयविक्रयेण जीवति । [२]क्रयेण जीवति ॥१६॥

### वस्नात् ॥६।४।१७॥

म० वृ०–[तृतीयान्तात्] वस्नाज्जीवत्यर्थे 'इकः' स्यात् । [वस्नं मूल्यम्, तेन जीवति=] वस्निकः ॥१७॥

### आयुधादीयश्च ॥६।४।१८॥

म० वृ०–आयुधाज्जीवत्यर्थे 'ईयः चकारादिकश्च' स्यात् । आयुधीयः, आयुधिकः, आयुधिका । आयुधादिकेकणोः स्त्रियां विशेषः ॥१८॥

### व्रातादीनञ् ॥६।४।१९॥

म० वृ०–[१]व्राताज्जीवत्यर्थे 'ईनञ्' स्यात् । व्रातीनः । ञो वृद्ध्यर्थः । तेन 'तद्धितः स्वरवृद्धि०' (३।२।५५) इत्यनेन पुंवद्भावो न भवति,– [२]व्रातीनाभार्यः ॥१९॥

अव०–[१]नानाजातीया अनियतवृत्तयः, प्रतिदिनं प्रतिदिनं गवेष्यमाणवृत्तयोऽनियतवृत्तय इत्यर्थः, शरीरायासजीविनः, शरीरमायास्य जीवन्तो भृतकाः=भारवाहकाः इत्यर्थः,…………(संघा व्राता) उच्यन्ते, तत्साहचर्यात् तत्कर्माऽपि व्रातमुच्यते । [२]व्रातीना भार्या यस्य ॥१९॥

### निर्वृत्तेऽक्षद्यूतादेः ॥६।४।२०॥

म० वृ०–[तृतीयान्तेभ्यः] अक्षद्यूतादिभ्यो निर्वृत्तेऽर्थे 'इकण्' स्यात् । आक्षद्यूतिकं वैरम् ॥२०॥

अव०–अक्षद्यूत, जङ्घाप्रहत, जङ्घाप्रहृत, जङ्घाप्रहार, पादस्वेद, पादस्वेदन, कण्टकमर्द, कण्टकमर्दन, शर्करामर्दन, गत, आगत, गतागत, यात, उपयात, यातोपयात, गतानुगत, अनुगत इति अक्षद्यूतादिगणः ॥२०॥

### भावादिमः ॥६।४।२१॥

म० वृ०–तृतीयान्तात् भाववाचिनः शब्दान्निर्वृत्तेऽर्थे 'इमः' स्यात् । पाकेन निर्वृत्तं=पाकिमम्, [१]त्यागिमम्, कुट्टिमम्, संमूर्च्छिमम् ॥२१॥

अव०–[1]त्यागेन निर्वृत्तम्। एवं रोगिमम् ।२१

## याचिता-ऽपमित्यात्कण् ॥६।४।२२॥

म० वृ०–तृतीयान्ताभ्यां याचित-अपमित्याभ्यां निर्वृत्ते 'कण्' स्यात्। याचितेन याच्ञया निर्वृत्तं=याचितकम्। [1]अपमित्य प्रतिदानेन निर्वृत्तम् =आपमित्यकम् ॥२२॥

अव०–[1]'मेङ् प्रतिदाने', अपमानमिति वाक्ये 'निमील्यादिमेङस्तुल्यकर्तृके' (५।४।४६) अनेन क्त्वा प्रत्ययः, क्त्वाया स्थाने यप्, 'मेङो वा मित्' (४।३।८८) इति सूत्रेण मेङो विकल्पेन मित् आदेशः, अपमित्य अपमाय वा प्रतिदानेन निर्वृत्तमापमित्यकम् ॥२२॥

## हरत्युत्सङ्गादेः ॥६।४।२३॥

म० वृ०–[तृतीयान्तेभ्यः] उत्सङ्गादिभ्यो हरत्यर्थे 'इकण्' स्यात्। [1]औत्सङ्गिकः ॥२३॥

अव०–उत्सङ्ग, उत्रुप, उड्डुप, उड्डुप, उत्पुत, उत्पुट, पिटक, पिटाक इति उत्सङ्गादिगणः। [1]उत्सङ्गेन हरति ॥२३॥

## भस्त्रादेरिकट् ॥६।४।२४॥

म० वृ०–[तृतीयान्तेभ्यः] भस्त्रादिभ्यो हरत्यर्थे 'इकट्' स्यात् [भस्त्रया हरति=] भास्त्रिकः, भस्त्रिकी। [भरटेन हरति=] भरटिकः, भरटिकी ॥२४॥

अव०–भस्त्रा भरट, भरण, शीर्षभार, शीर्षेभार, अङ्गभार, अङ्गेभार, अंसभार, अंसेभार इति भस्त्रादिगणः ॥२४॥

## विवध-वीवधाद्वा ॥६।४।२५॥

म० वृ०–विवधवीवधाभ्यां हरत्यर्थे 'इकट् वा' स्यात्। [टो क्यर्थः]। विवधिकः, वीवधिकः; पक्षे वैवधिकः ॥२५॥

अव०–विवधेन हरति=विवधिका इत्यपि। इकण्,–वैवधिकी। विवध्यते दौस्थामनेन (?) 'व्यञ्जनाद् घञ्' (५।३।१३२), 'न जनवधः' (४।३।५४) इति वृद्ध्यभावः, 'घञ्युपसर्ग०' (३।२।८६) इति दीर्घः, वीवध इति सिद्धम्। विवधवीवधशब्दौ द्वावपि समानार्थौ पथि पर्याहारे च वर्त्तते। राज्ञां महाकटके कोटी इति प्रसिद्धिः (?) ॥२५॥

## कुटिलिकाया अण् ॥६।४।२६॥

म० वृ०–कुटिलिकाशब्दात् हरत्यर्थे 'अण्' स्यात्। [कुटिलिकया हरत्यङ्गारान्=] कौटिलिकः [1]कर्म्मारः [लोहकारः], मृगो[2] वा, कर्षको[3] वा, [हालिकः] [4]तापसो वा, चौरश्च [4] ॥२६॥

अव०–कुटिलमग्रमस्त्यस्या 'अतोऽनेक०' (७।२।६) इति इकः। कुटिलिकाशब्दः पञ्चार्थेषु वर्त्तते, तथाहि–[1]अग्रभागे वक्रा लोहादिमयी अङ्गाराकर्षणी यष्टिः कुटिलिका उच्यते, कौटिलिकः कर्मारः १। [2]कुटिलागतिर्वा कुटिलिका, कुटिलिकया वक्रगत्या मृगो व्याधं देशान्तरं प्रापयति कौटिलिको मृगः २। [3]पलालोत्क्षेपणोऽग्रे वक्रो दण्डः कुटिलिका, कुटिलिकया हरति पलालं कौटिलिकः कर्षकः ३। [4]तापसोपकरणविशेषो वा कुटिलिका, लोके आंकुटी इति रूढिः, कुटिलिकया हरति पुष्पाणि कौटिलिकस्तापसः ४। [5]चौराणां नौगृहकोटाद्यारोहणार्थं दामाग्रप्रतिबद्ध आयसोऽर्द्धाङ्कुशो वा कुटिलिका, कुटिलिकया हरति नावं कौटिलिकश्चौरः ५ ॥२६॥

## ओजःसहोऽम्भसो वर्त्तते ॥६।४।२७॥

म० वृ०–[तृतीयान्तेभ्यः] ओजस्-सहस्-अम्भस्भ्यो [1]वर्त्ततेऽर्थे 'इकण्' स्यात्। ओजसा बलेन वर्त्तते औजसिकः, [2]साहसिकः, [3]आम्भसिकः ।२७।

अव०–[1]वृत्तिरात्मयापना आत्मनिर्वाहः चेष्टा वा। [2]सहसा=प्रसहनेन, कोऽर्थः ? परेणापराजयेन अथवा पराभिभवेन वर्त्तते। [3]अम्भसा जलेन वर्त्तते ॥२७॥

तं प्रत्यनोर्लोमेपकूलात् ॥६।४।२८॥

म० वृ०–तेनेति निवृत्तम् । तमिति द्वितीयान्तात् प्रति-अनुभ्यां परो यो लोम-ईप-कूलशब्दस्तदन्ताद्वर्त्ततेऽर्थे 'इकण्' स्यात् । [1]प्रातिलोमिकः, [2]आनुलोमिकः; [3]प्रातीपिकः, [4]आन्वीपिकः, [5]प्रातिकूलिकः ॥२८॥

अव०–[1]प्रतिगतं लोमानि, [2]अनुगतं लोमानि, 'प्रत्यन्ववात् सामलोम्नः' (७।३।८२) इति सूत्रेण लोमनशब्दात् अत्, 'नोऽपदस्य तद्धिते' (७।४।६१) अन् लुप्यते, प्रतिलोमं वर्त्तते, अनुलोमं वर्त्तते । [3]प्रतिगता आपो यत्र, [4]अनुगता आपो यत्र, 'द्व्यन्तरनवर्णोपसर्गादप ईप्' ( ३।२।१०९ ) अपृस्थाने ईप् आदेशः, प्रतीपं वर्त्तते अन्वीपं च वर्त्तते, सर्वत्र 'तं प्रत्यनो०' (६।४।२८) इति इकण् । तथा अकर्मकस्यापि वृतिधातोर्योगे प्रतिलोमं वर्त्तते इत्यादिषु प्रतिलोमादेः परतो क्रियाविशेषत्वात् '(क्रिया)विशेषणाद्' इत्यनेन द्वितीया । [5]प्रतिगतं कूलं प्रतिकूलम्, प्रतिकूलं वर्त्तते; ( एवम् ) अनुगतं कूलं अनुकूलम् , ( अनुकूलं वर्तते इति अनुकूलिकः ), अत्रापि प्रतिकूलानुकूलपरान् क्रियाविशेषणे द्वितीया ॥२८॥

परेर्मुखपार्श्वात् ॥६।४।२९॥

म० वृ०–परिपूर्वाभ्यां मुखपार्श्वाभ्यां द्वितीयान्ताभ्यां वर्त्ततेऽर्थे 'इकण्' स्यात् । [1]परिमुखं वर्त्तते =पारिमुखिकः । परिपार्श्वं वर्त्तते=पारिपार्श्विकः । परिर्वर्जने सर्वतो भावे वा । स्वामिनो मुखं वर्जयित्वा वर्त्तमानः अथवा यतोयतः स्वामिमुखं ततस्ततो वर्त्तमानः पारिमुखिकः सेवकः । [एवं पारिपार्श्विकः] ॥२९॥

अव०–[1]यदा परिर्वर्जने तदा मुखात् परि=परिमुखम्, 'पर्यपाङ्बहिरच् पञ्चम्या' ( ३।१।३२ ) इत्यनेनाव्ययीभावो भवति । यदा च परितः सर्वतो मुखं=परिमुखं (तदा) परिमुखादेरव्ययीभावात् (६।३।१३६) इति पाठसामर्थ्यादेवात्राव्ययीभावो भवति । ततः परिमुखं वर्त्तते इति वाक्ये कृते 'परेर्मुख०' इति इकण् ॥२९॥

रक्षदुञ्छतोः ॥६।४।३०॥

म० वृ०–द्वितीयान्ताद् रक्षति उञ्छति चार्थे 'इकण्' स्यात् । समाजं रक्षति=सामाजिकः, सामवायिकः, [ नगरं रक्षति= ] नागरिकः । बदराण्युञ्छति उच्चिनोति वा=बादरिकः, [नीवारान् उञ्छति=] नैवारिकः ॥३०॥

पक्षि-मत्स्य-मृगार्थाद् घ्नति ॥६।४।३१॥

म० वृ०–[द्वितीयान्तेभ्यः ] पक्ष्यार्थमत्स्यार्थमृगार्थेभ्यो [ आरण्यपशवो मृगाः ] घ्नत्यर्थे 'इकण्' स्यात् । पक्षिणो हन्ति=पाक्षिकः, मात्स्यिकः, मार्गिकः, सौकरिकः ॥३१॥

अव०–'पक्षि०' इति सूत्रे अर्थग्रहणात् पक्षिमत्स्यमृगाणां पर्यायशब्देभ्यः पक्ष्यादीनां विशेषशब्देभ्यश्च परत इकण् भवतीत्यर्थः,– शाकुनिकः, मायूरिकः, तैत्तिरिकः, मैनिकः, शाफरिकः, शाकुलिकः, हारिणिकः, सौकरिकः, नैयङ्कुकः । 'पक्षिमत्स्य०' इति सूत्रान्तेऽयं विशेषः । अथ अजिह्मान् अनिमिषान् हन्तीत्यत्र कथं नेकण् ? नैतन्मत्स्येत्यस्य स्वरूपम्, मत्स्यशब्दोऽयं न भवति, न विशेषः । न च पर्यायः, यः पर्यायः स व्युत्पत्तिं विनापि तावन्तमर्थं गमयत्ययं तु व्युत्पत्तिसापेक्ष एव । असाधारणं हि विशेषणमिदम् । यथा जिह्मगाः सर्पाः, अनिमिषास्तु देवाः ॥३१॥

परिपन्थात्तिष्ठति च ॥६।४।३२॥

म० वृ०–परिपन्थशब्दात्तिष्ठति घ्नति चार्थे 'इकण्' स्यात् । परिपन्थं तिष्ठति हन्ति वा पारिपन्थिकश्चौरः ॥३२॥

अव०–'पारिपन्थिक' इति, सूत्रेण 'परिपन्था'-दिति निर्देशात् परिपन्थशब्दस्य इकणो विषये इकणोऽन्यत्रापि परिपन्थादेशः । तेन परिपन्थं गच्छति पश्यति वा इत्याद्यपि भवति । परिशब्दो

वर्जनार्थे सर्वतो भावे वा वर्त्तते। तत्र यदा परिर्वर्जनार्थस्तदा पथः परि परिपथमिति 'पर्यपाभ्यां वर्ज्ये' (२।२।७१) इत्यनेन समासे (? असमासे) पञ्चमी भवति, समासश्च 'पर्यपाङ्बहिरच् पञ्चम्या' (३।१।३२) इत्यनेन भवति। पश्चात् परिपन्थं परिपथं वा तिष्ठति पारिपन्थिकः पारिपथिकः इति द्वितीयान्तात् 'परिपन्थात्तिष्ठति च' (६।४।३२) 'परिपथात्' (६।४।३३) इत्यनेन वा इकण् कार्यः। यदा च परिः सर्वतो भावे व्याप्तौ अर्थे तदा परितः पन्थानं परिपथः(?म्) इति'सर्वोभयाभिपरिणा तसा'(२।२।३५) इत्यनेन द्वितीया भवति, सूत्रसामर्थ्यादत्राव्ययीभावसमासः। उभयत्रापि परिपथ इति शब्दसिद्धो (?सिद्धिः)। समासे कृते'ऋक्पूःपथ्यपोऽत्'(७।३।७६) इत्यनेन पथिन्शब्दात् अत् समासान्तः, परिपथ इति सिद्धम्। तदनन्तरं परिपन्थं परिपथं वा तिष्ठतीति वाक्ये इकण् कर्त्तव्यः ॥३२॥

## परिपथात् ॥६।४।३३॥

म० वृ०–तिष्ठतीति वर्त्तते। परिपथशब्दात्तिष्ठत्यर्थे 'इकण्' स्यात्। [१]पारिपथिकः, पन्थानं वर्जयित्वा व्याप्य वा तिष्ठतीत्यर्थः ॥३३॥

प्रब०–[१]परिर्वर्जने सर्वतो भावे वा। पथः परि परिपथः [?म्), सर्वतः पन्थानं वा परिपथम्, परिपथं तिष्ठति ॥३३॥

## अवृद्धेर्गृह्णाति गर्ह्ये ॥६।४।३४॥

म० वृ०–द्वितीयान्ताद् वृद्धिशब्दवर्जिताद् गृह्णात्यर्थे'इकण्' स्यात् योऽसौ गृह्णाति स चेदन्यायेन ग्रहणाद् गर्ह्यो निन्द्यो भवति। द्विगुणं गृह्णाति= द्वैगुणिकः, त्रैगुणिकः, [१]वार्द्धुषिकः। अल्पं दत्त्वा प्रभूतं गृह्णन् अपन्यायकारी सद्भिर्निन्द्यते। अवृद्धेरिति किम्? वृद्धिं गृह्णातीति वाक्यमेव। गर्ह्ये इति किम्? दत्तं गृह्णाति ॥३४॥

प्रब०–[१]प्रयुक्तं धनं पुष्णातीति प्रयुक्तधनपोषी, पृषोदरादित्वात् वृधुषी इत्यादेशः, वृधुषी कोऽर्थः? वृद्धिं कालान्तरं द्रव्यं गृह्णाति वार्धुषिकः ॥३४॥

## कुसीदादिकट् ॥६।४।३५॥

म० वृ०–कुसीदाद्गर्ह्ये गृह्णात्यर्थे 'इकट्' स्यात्। [टो ङ्यर्थः] [१]कुसीदिकः ॥३५॥

प्रब०–[१]कुसीदं वृद्धिं कालान्तरं द्रव्यं तदर्थमपि द्रव्यं कुसीदमुच्यते। कुसीदं गृह्णाति। एवं कुसीदिकी ॥३५॥

## दशैकादशादिकश्च ॥६।४।३६॥

म०वृ०–द्वितीयान्ताद्दशैकादशशब्दाद्गर्ह्ये गृह्णात्यर्थे 'इक' चकारादिकट् च स्यात्। [२]दशैकादशिकः [इकः], दशैकादशिका [इक], दशैकादशिकी [इकट्] ॥३६॥

प्रब०–[१]सूत्रे निपातनबलात् अकारान्तत्वम्। दशभिरेकादश दशैकादश, दश च एकादश च वा, 'नाम नाम्ना'० (३।१।१८) इति समासः, अत एव निपातनात् अकारान्तत्वम्। तच्च वाक्ये प्रयोगार्थम्। [२]दशैकादशान् गृह्णाति इतिवाक्यम् ,तत इक इकट् ॥३६॥

## अर्थ-पद-पदोत्तरपद-ललाम-प्रतिकण्ठात् ॥६।४।३७॥

म० व०–गर्ह्ये इति निवृत्तम्। अर्थात्, पदात्, पदशब्द उत्तरपदं यस्य तस्मात्, ललामात् प्रतिकण्ठाच्च गृह्णात्यर्थे 'इकण्' स्यात्। अर्थं गृह्णाति= आर्थिकः,पादिकः,पदोत्तरपद,–[१]पौर्वपदिकः,[२]औत्तरपदिकः,[३]आदिपदिकः,[४]आन्तपदिकः,[५]लालामिकः, [६]प्रातिकण्ठिकः ॥३७॥

प्रब०–[१]पूर्वं च तत् पदं च=पूर्वपदं गृह्णाति। एवम् [२]उत्तरपदम् [३]आदिपदम् [४]अन्तपदं गृह्णाति। [५]ललामशब्दः प्रधानार्थे। [६]कण्ठं कण्ठं प्रति= प्रतिकण्ठम्, 'लक्षणेनाभिप्रत्याभि'० (३।१।३३) इत्यव्ययीभावः, प्रतिकण्ठं गृह्णाति। "व्याख्यानतो विशेषार्थप्रतिपत्ति"रिति न्यायात् अव्ययीभाव-

समासाश्रयणादिह नेकण्,–प्रतिगतः कण्ठं प्रतिकण्ठस्तं गृह्णाति। तथा उत्तरपदग्रहणाद् बहुप्रत्ययपूर्वान्न भवति,– बहुपदं गृह्णाति ॥३७॥

## परदारादिभ्यो गच्छति ॥६।४।३८॥

म० वृ०–परदारादिभ्यो गच्छत्यर्थे 'इकण्' स्यात्। परदारान गच्छति[1]पारदारिकः, [2]गौरुदारिकः, [3]गौरुतल्पिकः ॥३८॥

अव०–परदारादिगणः प्रयोगगम्यः। [1]परेषां दाराः परे च ते दाराश्च (वा), ततः परदारान् गच्छति। [2]गुरूणां दाराः, तान् गच्छति। [3]तल्पशब्दः पल्यङ्के कलत्रे च वर्त्तते, तत्र पल्यङ्के तल्पः पुंक्लीवः, कलत्रे तु नपुंसकरेव, ततो गुरुणां तल्पं गुरुतल्पं गच्छति। एवं साभर्तृकिकः, भ्रातृजायिकः। सह भर्त्रा वर्त्तते,-'ऋन्नित्यदितः' (७।३।१७१) इत्यनेन कच् समासान्तः, सभर्तृकां गच्छति। भ्रातरि भ्रातुर्वा जाया=भ्रातृजाया, तां गच्छति ॥ ३८ ॥

## प्रतिपथादिकश्च ॥६।४।३९॥

म०वृ०–[द्वितीयान्तात्] प्रतिपथाद्गच्छत्यर्थे 'इकः चकाराद्यथाप्राप्तमिकण्' स्यात्। प्रतिपथिकः[1] प्रातिपथिको वा ॥३९॥

अव०–[1]पन्थानं पन्थानं प्रति=प्रतिपथम,'ऋक्पूःपथ्यपोऽत्' (७।३।७६) इत्यनेन अत् समासान्तः, अथवा पथोऽभिमुखं प्रतिपथम्, 'लक्षणेनाभि'० (३।१।३३) इत्यव्ययीभावः, प्रतिपथं गच्छति ॥३९॥

## माथोत्तरपदपदव्याक्रन्दाद्धावति ॥६।४।४०॥

म० वृ०–द्वितीयान्तात् माथोत्तरपदात्, पदवीशब्दात्, आक्रन्दशब्दाद्धावत्यर्थे 'इकण्' स्यात्। [1]दाण्डमाथिकः, [2]पादविकः, [3]आक्रन्दिकः ॥४०॥

अव०–[1]मथ्यतेऽवगाह्यते पादैरिति माथः, घञ्, माथशब्दः पथिपर्यायः, दण्ड इव माथो दण्डमाथः ऋजुमार्ग उच्यते, ततो दण्डमाथं धावति दाण्डमाथिकः। एवं शौक्रमाथिकः। दण्ड इवेत्यत्र 'उपमानं सामान्यैः' (३।१।१०१) इति नियमादप्राप्तोऽपि 'मयूरव्यंसक'० (३।१।११६) इत्यनेन 'नाम नाम्ना'० (३।१।१८) इत्यनेन समासः। [2]पदवीं धावति। [3]आक्रन्दन्ति यत्र स देश आक्रन्दः, 'व्यञ्जनाद् घञ्' (५।३।१३२), आक्रन्द्यते वा इत्युक्ते................( 'भावाकर्त्रोः'।५।३।१८ )घञ्। (आक्रन्दः) आर्त्तायनं शरणमुच्यते, कोऽर्थः? आर्त्तैरयते आश्रीयते– 'भुजिपत्यादि'० (५।३।१२८) अनट्, तदेव आर्त्तायनं निर्वक्ति नितरां ब्रूते; आक्रन्दं धावति। उत्तरपदग्रहणाद् बहुप्रत्ययपूर्वान्न भवति,– बहुमाथं धावति ॥४०॥

## [1]पश्चात्यनुपदात् ॥६।४।४१॥

म० वृ०–पश्चादर्थे वर्त्तमानाद्[2]अनुपदाद्धावत्यर्थे 'इकण्' स्यात्। पदस्य पश्चादनुपदम्, [3]अनुपदं धावति=आनुपदिकः [प्रत्यासत्त्या धावतीत्यर्थः] पश्चातीति किम्? [4]अनुपदं धावति ॥४१॥

अव०–[1]'पश्चाति इति प्रकृतिविशेषणम्। पश्चादर्थः पश्चात्, तस्मिन्, सप्तमीङि। [2]द्वितीयान्तात्। [3]'अनुपदं धावति', पदमन्वायतम् अथवा पदस्य समीपं यद्वा अनुगतं पदम्=अनुपदम्, अत्र यथाक्रमं 'दैर्घ्येऽनुः' (३।१।३४) 'समीपे' (३।१।३५) 'प्रात्यवपरि'० (३।१।४७) इत्यादिभिरव्ययीभावसमासः ॥४१॥

## सुस्नातादिभ्यः पृच्छति ॥६।४।४२॥

म० वृ०–[ द्वितीयान्तेभ्यः ] सुस्नातादिभ्यः पृच्छत्यर्थे 'इकण्' स्यात्। [1]सौस्नातिकः, [2]सौखरात्रिकः ॥४२॥

अव०–[1]शोभनं स्नातं=सुस्नातम्, सुस्नातं पृच्छति=सौस्नातिकः। [2]सुखा चासौ रात्रिश्च सुखरात्रः, 'सङ्ख्यातैकपुण्यवर्ष०' (७।३।११९) इत्यनेन अत् समासान्तः, सुखरात्रं पृच्छति सौखरात्रिकः। एवं सुखशयनं सुखशय्यां पृच्छति सौखशायनिकः सौखशाय्यिकः। सुस्नातादयः प्रयोगगम्याः ॥४२॥

## प्रभूतादिभ्यो ब्रुवति ॥६।४।४३॥

म० वृ०-प्रभूतादिभ्यो [1]ब्रुवत्यर्थे 'इकण्' स्यात्। प्रभूतं ब्रूते=प्राभूतिकः, [2]स्वागतिकः, [3]सौवस्तिकः ॥४३॥

अव०-[1]ब्रूते इत्यर्थप्रधानोऽयं निर्देशः, तेन क्वापि वदति इत्यपि प्रयुज्यते, प्रभूतं वदति इत्यपि । एवं पर्याप्तं निषिद्धं ब्रूते पार्याप्तिकः, वैपुलिकः, वैचित्रिकः, नैपुणिकः । सर्वत्र क्रियाविशेषणादेव 'प्रभूतादिभ्यो ब्रुवति' (६।४।४३) इत्यनेन इकण् इष्यते । तेनेह न भवति,- प्रभूतमर्थं ब्रूते, एवं विपुलं विचित्रं निपुणमर्थं ब्रूते इत्यत्र वाक्यमेव स्थितम्। क्वचित्तु अक्रियाविशेषणादपि इकण् भवति,- स्वर्गमनं ब्रूते सौवर्गमनिकः, 'द्वारादेः' (७।४।६) इत्यनेन औः । [2]स्वागतं ब्रूते स्वागतिकः, 'न वस्वाङ्ग०' ( ७।४।९ ) इति वृद्धयागमनिषेधः । [3]स्वस्तीति ब्रूते, 'य्वः पदान्ता०' (७।४।५) वृद्धयागम औः ॥४३॥

## माशब्द इत्यादिभ्यः ॥६।४।४४॥

म० वृ०-माशब्दादिभ्यो ब्रुवत्यर्थे 'इकण्' स्यात् । माशब्द इति ब्रूते माशब्दिकः, माशब्दः क्रियतामिति ब्रूते इत्यर्थः । कार्यशब्दिकः ॥४४॥

अव०-'माशब्द इत्या०' इत्यत्र इतिशब्दो वाक्यपरामर्शार्थः । तेनोदाहरणेषु माशब्द इति ब्रूते माशब्दिकः (इति) वाक्यमध्ये सर्वत्र इति शब्दोऽवश्यं योजनीयः । कार्यशब्द इति ब्रूते इति वाक्यम्, कार्यशब्दिकः । एवं नैत्यशब्दिकः । माशब्द इत्यादयः प्रयोगगम्याः । 'प्रभूतादि०' (६।४।४३) इत्यनेन हि पदात् प्रत्ययो विधीयते, 'माशब्द०' इत्यनेन तु वाक्यैकदेशात्परतः प्रत्ययः क्रियते इति पृथग्योगः ॥४४॥

## शाब्दिक-दार्दरिक-लालाटिक-कौक्कुटिकम् ॥६।४।४५॥

म० वृ०-एते शब्दा यथास्वं प्रसिद्धेऽर्थविशेषे 'इकणन्ता' निपात्यन्ते । शब्दं करोति [1]शाब्दिकः, [2]दार्दरिकः, [3]लालाटिकः, [4]कौक्कुटिकः ॥४५॥

अव०-[1]यः कश्चिच्छब्दं करोति स शाब्दिको नोच्यते किं तर्हि ? यः सम्यक् शब्दं जानाति ज्ञात्वा च निर्दोषं शब्दमुच्चरति वैयाकरणः स एव शाब्दिक इत्युच्यते । [2]तथा दर्दरो घटो वादित्रं च, तयोर्मध्ये वादित्रं कुर्वन् दार्दरिक उच्यते । [3]तथा ललाटं पश्यति, कोऽर्थः ललाटदर्शनेन दूरावस्थानं लक्ष्यते, तेन च कार्येष्वनुपस्थानमढौकनम्, यः सेवकः स्वामिनो ललाटं दृष्ट्वा दूरतो याति न स्वामिकार्येषु उपतिष्ठते=न ढौकते, परं कोपप्रसादपरिज्ञानायैव स्वामिनो ललाटं पश्यति स एव लालाटिकः । [4]कुक्कुटीं पश्यति कौक्कुटिकः । कुक्कुटीशब्देन कुक्कुटीपातो लक्ष्यते, तेन च देशस्याल्पता ज्ञाप्यते । तथाहि-यो हि भिक्षुरविक्षिप्तदृष्टिः पादविक्षेपदेशे चक्षुः संयम्य पुरो युगमात्रदेशप्रेक्षी गच्छति स कौक्कुटिक उच्यते । अथवा यस्तथाविधम् [तथा विधा =प्रकारोऽस्य] आत्मानं अतथाविधोऽपि सन्दर्शयति सोऽपि कौक्कुटिकः । दाम्भिकचेष्टा वा मिथ्याशौचादिः कुक्कुटी, तामाचरन् कौक्कुटिकः । हृदयावयवो वा कुक्कुटी, तां पश्यति कौक्कुटिको भिक्षुः, निभृत इत्यर्थः । तदेतत्सर्वं निपातनाल्लभ्यते ॥४५॥

## समूहार्थात्समवेते ॥६।४।४६॥

म० वृ०-समूहवाचिभ्यो द्वितीयान्तेभ्यः समवेते तादात्म्यात् [स समूह आत्मा=स्वभावो यस्य अर्थस्य स तदात्मा, तस्य भावः, तस्मात्] तदेकदेशेऽर्थे [समूहैकदेशीभूते] 'इकण्' स्यात् । समूहं समवेति [समायाति=सामूहिकः, [समाजं सभां समवेति=] सामाजिकः, सासदिकः, [समवायं मेलापकं समवेति=] सामवायिकः, [गोष्ठीं समवेति=] गौष्ठिकः ॥४६॥

## पर्षदो ण्यः ॥६।४।४७॥

म० वृ०-पर्षद्शब्दात् द्वितीयान्तात्समवेतेऽर्थे 'ण्यः' स्यात् । पर्षदं समवेति=पार्षद्यः । परिषदं समवेति समायाति पारिषद्य इत्यपि केचित् ॥४७॥

## सेनाया वा ॥६।४।४८॥

म०वृ०–सेनाशब्दात् द्वितीयान्तात्समवेतेऽर्थे 'ण्यः' स्यात् वा । सेनां समवेति सैन्यः, पक्षे इकण्–सैनिकः । सेनैव सैन्यमिति तु भेषजादित्वात्स्वार्थे ट्यण् ॥४८॥

## धर्माऽधर्माच्चरति ॥६।४।४९॥

म०वृ०– धर्माधर्माभ्यां द्वितीयान्ताभ्यां चरत्यर्थे 'इकण्' स्यात् । चरतिरत्र तात्पर्येणानुष्ठाने वर्त्तते । धर्मं चरति=धार्मिकः, [ अधर्मं चरति ] आधर्मिकः ॥४९॥

## षष्ठ्या धर्म्ये ॥६।४।५०॥

म० वृ०–षष्ठ्यन्ताद्धर्म्येऽर्थे 'इकण्' स्यात् । धर्मो न्यायोऽनुवृत्त आचारस्तस्मादनपेतं=धर्म्यम् । शुल्कशालाया धर्म्यम्=शौल्कशालिकम्, [ आपणस्य धर्म्यम्=] आपणिकम्, [1]आतरिकम् ॥५०॥

अव०–[1]आपत्य तरन्त्यस्मिन् स्यनके (?स्थानके)नरा इति आतरो नद्यवतारः, 'पुन्नाम्नि घः' (५।३।१३०), आतरस्य धर्म्यम् ॥५०॥

## ऋन्नरादेरण् ॥६।४।५१॥

म० वृ०–ऋकारान्तेभ्यो नरादिभ्यश्च षष्ठ्यन्तेभ्यो धर्म्येऽर्थे 'अण्' स्यात् । नुर्धर्म्यं=नारम्, स्त्रियां नारी; मातुर्धर्म्यं मात्रम्, [1]पैत्रम्, शास्त्रम्[2] [3]वैकर्त्रम् । नरादि,–नरस्य धर्म्यं=नारम्, नारी, माहिषम् ॥५१॥

अव०–नर, महिष, प्रजावती, प्रजापति, विलेपिका, प्रलेपिका, अनुलेपिका, वर्णक, पेषिका, मणिपाली, पुरोहित, अनुचारक, अनुवाक, यजमान, होतृयजमान इति नरादिगणः । नृशब्देनैव नारं नारी (इति) नृसम्बन्धिनरसम्बन्धिरूपद्वये सिद्धेऽपि, केवलनरशब्दात् 'षष्ठ्या धर्म्ये' इति पूर्वेण इकण् मा भूत् इति नरग्रहणं कृतम् । [1]पितुर्धर्म्यं=पैत्रम् । [2]शास्तुर्गुरोर्धर्म्यं शास्त्रम् । [3]विकर्तुर्विकारापन्नस्य धर्म्यं वैकर्त्रम् ॥५१॥

## विभाजयितृ-विशसितुर्णीड्लुक् च ॥६।४।५२॥

म०वृ०–आभ्यां षष्ठ्यन्ताभ्यां धर्म्येऽर्थे 'अण्' स्यात्, तद्योगे च विभाजयितुर्णिलुक्, विशसितुश्च इट्लुक् । [2]वैभाजित्रम्, [3]वैशस्त्रम् ॥५२॥

अव०–[1]णिग्, इट्, तयोर्लुक् । । [2]विपूर्वो 'भजण् विश्राणने', 'चुरादिभ्यो णिच्' (३।४।१७), विभाजयतीति तृच्, विभाजयितुर्धर्म्यम्, अण्, णिच्लोपश्च । [3]विशसन्ति इति तृच्, 'स्ताद्यशितो'० (४।४।३२) इट्, विशसितुर्धर्म्यमिति वाक्ये अण्, इट्लोपश्च ॥ ५२ ॥

## अवक्रये[1] ॥६।४।५३॥

म० वृ०–षष्ठ्यन्तान्नाम्नोऽवक्रयेऽर्थे 'इकण्' स्यात् । आपणस्यावक्रय आपणिकः, [2]शौल्कशालिकः, [3]आतरिकः ॥५३॥

अव०–[1]अवक्रीयते=स्वीक्रियते येन इच्छानियमितेन द्रव्येण कियन्तमपि कालं गृहं हट्टं वा क्षेत्रं वा सोऽवक्रयः, 'पुन्नाम्नि घः' (५।३।१३०), भोगनिर्वेशो भाटकमिति यावत्, भुज्यते इति भोगो गृहहट्टादिकम्, निर्विश्यते अनेन इति निर्वेश उपभोगः । लोकपीडया धर्मातिक्रमेणापि अवक्रयो भवति इत्ययमवक्रयो धर्म्याद् भिद्यते । अत एव कारणात् 'षष्ठ्या धर्म्ये' (६।४।५०) इत्यनेन इकण् न सिद्ध्यति इति 'अवक्रये' (६।४।५३) इति पृथग् योगः कृत इत्यर्थः । [2]शुल्कशालाया अवक्रयः । [3]आतरस्यावक्रयः ॥५३॥

## [1]तदस्य[2]पण्यम् ॥६।४।५४॥

म० वृ०–तदिति प्रथमान्तादस्येति षष्ठ्यर्थे 'इकण्' स्यात्, तत् प्रथमान्तं यदि पण्यं पणितव्यं विक्रेयं भवति । [3]आपूपिकः, [4]शाष्कुलिकः, [5]मौदकिकः, [6]लावणिकः ॥५४॥

अव०–[1]तद्, पञ्चमीङसि, [2]अस्य इत्यत्र सप्तमीङि, सूत्रत्वाल्लोपः । [3]'अशश् भोजने' अश्यन्ते श्रीमद्भिः 'अश ऊपः पश्च' (उणा० ३१२) इत्युणा·

दिसूत्रेण रूपप्रत्ययः, शृस्थाने प् इत्यादेशः, अपूपाः पण्यमस्य। [४]शष्कुली [५]मोदकं [६]लवणं पण्यमस्य। अत्र वाक्ये पण्यार्थस्तद्धितवृत्तावन्तर्भूत इति पण्यशब्दस्याऽप्रयोगः। एवमग्रेऽपि ॥५४॥

## किशरादेरिकट् ॥६।४।५५॥

म० वृ०-किशरादिभ्यस्तदस्य पण्यमित्यस्मिन् विषये 'इकट्' स्यात्। [टो ङ्यर्थः] किशरं किशरो वा पण्यमस्य किशरिकः, किशरिकी [तगरिकः, तगरिकी] ॥५५॥

प्रव०-किशर, तगर, स्थगर, उशीर, हरिद्रा, (हरिद्रु,)हरिद्रुपर्णी, गुग्गुलु, गुग्गुल, नलद इति किशरादिगणः। किशरादयो गन्धद्रव्यविशेषवचनाः ॥५५॥

## शलालुनो वा ॥६।४।५६॥

म० वृ०-शलालुशब्दात्तदस्य पण्यमिति विषये 'इकट्' स्यान् वा। [१]शलालुकः, शलालुकी; पक्षे 'तदस्य पण्यम्' (६।४।५४) इकण्[-] शालालुकी ॥५६॥

प्रव०-[१]शलालु गन्धद्रव्यविशेषं पण्यमस्य ।५६।

## शिल्पम् ॥६।४।५७॥

म०- वृ०-तद् इति प्रथमान्तादस्येत्यर्थे 'इकण्' स्यात्, यत्प्रथमान्तं तच्चेत् शिल्पं[१] भवति। [२]नार्तिकः, [३]गैतिकः, [४]वादनिकः, [५]मार्दङ्गिकः, पाणविकः,मौरजिकः, वैणिकः, तथा मृदङ्गकरणं शिल्पमस्य=मार्दङ्गकरणिकः, एवं [वीणाकरणं शिल्पमस्य=] वैणाकरणिकः ॥५७॥

प्रव०-[१]शिल्पं कौशलं विज्ञानप्रकर्षः। अनेन विज्ञानप्रकर्षेण तन्निर्वर्त्यः क्रियाविशेषो लक्ष्यते। मृदङ्ग-पणव-मुरज-वीणा-वेणुपटहादिशब्दाः वादनार्थवृत्तयः प्रत्ययमुत्पादयन्ति न द्रव्यवृत्तयः। द्रव्यस्य शिल्पायोगात्तद्विषयायाः क्रियायाः शिल्पत्वं ज्ञायते इति भावः। [२]नृत्तं शिल्पमस्य नार्त्तिकः।एवं [३]गीतं [४]वादनं वा (शिल्पमस्य)। तथा [५]मृदङ्गो मृदङ्गवादनं शिल्पमस्य। एवमग्रेऽपि। अत्रापि शिल्पार्थो वाक्ये कोऽर्थः ? तद्धितवृत्तावन्तर्भूत इति शिल्पशब्दस्याप्रयोगः। उत्पादनार्थवृत्तिभ्यस्तु अनभिधानान्न भवति। अत एव कुम्भकारादौ वाक्ये मृदङ्गकरणादिशब्देभ्य एव प्रत्ययो भवति, न तु मृदङ्गादिशब्देभ्यः। तथा च वृत्तौ-"मृदङ्गकरणं शिल्पमस्य कुम्भकारस्य" भवायस्य(?)। यतः केषुचिद् देशेषु ग्रामेषु मृन्मया मृदङ्गा भवन्ति, तेषां कुम्भकारादुत्पत्तिर्भवति। न द्रव्यवृत्तयः इत्यक्षराग्रे द्रव्यस्य शिल्पेत्याद्यक्षराऽवचूरिरथवा उत्पादनार्थवृत्ता (?वृत्त्याद्य)-क्षरावचूरिर्ज्ञेया ॥ ५७॥

## मड्डुक-झर्झराद्वाऽण् ॥६।४।५८॥

म० वृ०-आभ्यां तदस्य शिल्पमिति विषये-'ऽण् वा' स्यात्। [१]माड्डुकः, [२]झार्झरः। पक्षे माड्डुकिकः ॥५८॥

प्रव०-[१]मड्डुकवादनं [२]झर्झरवादनं शिल्पमस्य ॥५८॥

## शीलम् ॥६।४।५९॥

म० वृ०-तदिति प्रथमान्तादस्येत्यर्थे 'इकण्' स्यात्, यत्प्रथमान्तं तच्चेच्छीलं भवति। शीलं जीवानां स्वभावः। फलनिरपेक्षा वृत्तिरिति यावत्। [१]आपूपिकः, [२]मौदकिकः, [३]ताम्बूलिकः, [४]पारुषिकः, [५]आक्रोशिकः ॥५९॥

प्रव०-[१]अपूपः पोली, अपूपभक्षणं शीलमस्य=आपूपिकः। एवं शष्कुलीभक्षणं शीलमस्य। [२]मोदकभक्षणं [३]ताम्बूलचर्वणं शीलमस्य। तथा [४]परुषवचनं कठोरभाषणं शीलमस्य। [५]आक्रोशवचनं शीलमस्य। अत्रापि उदाहरणेषु पूर्ववत् अपूपादयः शब्दा मृदङ्गवादनादिवत् क्रियावृत्तय एव प्रत्ययमुत्पादयन्ति। शीलार्थस्तद्धितवृत्तावन्तर्भूत इति न शीलशब्दप्रयोगः ॥५९॥

## [१]अङ् स्थाच्छत्रादेरञ् ॥६।४।६०॥

म० वृ०-अङ्प्रत्ययान्तात्तिष्ठतेः छत्र इत्यादिभ्यश्च तदस्य शीलमर्थे-'ऽञ्' स्यात्। आस्था शील-

मस्य=आस्थः, सांस्थः, [अवस्था शीलमस्य=] आवस्थः, सामास्थः,[व्यवस्था शीलमस्य=] वैयवस्थः[२]। छत्रादि,– छत्रं शीलमस्य छात्रः,[३] [४]चुरा शीलमस्य चोरः, तपःशीलस्तापसः,[५] कार्मः। स्त्रियां तु छात्री, चौरी, तापसी ॥६०॥

अव०–[१]अङ् चासौ स्था च अङ्स्था। [२]एवं नैष्ठः, अन्तस्था, भिदादित्वादङ्, आन्तस्थः। [३]छत्रं शीलमस्य=छात्रः, अस्यायं भावार्थः,– छत्रशब्देन गुरुकार्येषु सावधानस्य शिष्यस्य छत्रक्रियातुल्या गुरुछिद्राच्छादनाऽपायरक्षणादिका क्रिया उच्यते। उपचारात् शिष्यो हि छत्रवद् गुरुच्छिद्रावरणादिप्रवृत्तः छात्र इत्युच्यते। अभ्यासापेक्षाऽपि क्रिया शीलमित्युच्यते, यथा शीलिता विद्या, 'ज्ञानेच्छा०' (५।२।९२) इति क्तः। छत्र, चुरा, तपस्, कर्मन्, शिक्षा, चुक्षा, (मुक्षा, दिक्षा,) चिक्षा, भिक्षा, भक्षा, तितिक्षा, बुभुक्षा, विश्रब्धा, उदस्थान, उपस्थान, पुरोडा, कृषि,मन्द्र,सत्य, अनृत, विशिका, विशिखा, प्ररोह इति छत्रादिगणः। [४]अनित्यो णिच् इति चुरः परो न णिच्, भिदाद्यङ्। [५]कर्म शीलमस्य, 'नोऽपदस्य०' (७।४।६१) इति ॥६०॥

## तूष्णीकः ॥६।४।६१॥

म० वृ०–तूष्णीम्शब्दात्तदस्य शीलविषये 'कः प्रत्ययो' मलोपश्च निपात्यते। [१]तूष्णीकः ॥६१॥

अव०–[१]तूष्णींभाव शीलमस्य। 'तुष् तुष्टौ' तूषन्ति देवा अनेन–'तूषेरीम् णोन्तश्च' (उ० ९४०) ॥६१॥

## प्रहरणम् ॥६।४।६२॥

म० वृ०–तदिति प्रहरणादस्येत्यर्थे 'इकण्' यत्प्रथमान्तं तच्चेत्प्रहरणं भवति। असिः प्रहरणमस्य आसिकः, [१]प्रासिकः,धानुष्कः,चाक्रिकः[२] ॥६२॥

अव०–प्रहरणेऽयं विशेषो लिख्यते,– चरति (६।४।११) इत्यत्र सूत्रे व्यापारसाधनशब्दात्, व्यापारः साध्यते येन स व्यापारसाधनः, तस्मात्, प्रत्ययः क्रियते, यथा अश्वेन चरति आश्विकः। 'शिल्पम्' (६।४।५७) अत्र तु सूत्रे विज्ञानातिशये सति प्रत्ययो भवति,– नृत्तं शिल्पमस्य नार्त्तिकः। 'प्रहरणम्' इति सूत्रेण तु व्यापारसाधनाभावेऽपि, परिज्ञानमात्रेऽपि, प्रत्ययो विधीयते,– असिः प्रहरणमस्य=आसिकः, अत्र न कादित (? परप्रहरणरूप )व्यापारापेक्षा, नापि शिल्पादिपरिज्ञानापेक्षास्ति। [१]प्रासः प्रहरणमस्य। [२]एवं मौष्टिकः, मौसलिकः ॥६२॥

## परश्वधाद्वाऽण् ॥६।४।६३॥

म० वृ०–परश्वधात्तदस्य प्रहरणेऽर्थे-'ऽण् वा' स्यात्। [१]पारश्वधः। पक्षे [२]पारश्वधिकः ॥६३॥

अव०–[१]परश्वधः प्रहरणमस्य। [२]पूर्वेण इकण् ॥६३॥

## शक्ति-यष्टेष्टीकण् ॥६।४।६४॥

म० वृ०– शक्तियष्टिभ्यां तदस्य प्रहरणे 'टीकण्' स्यात् [ शक्तिः प्रहरणमस्य= ] शाक्तीकः, शाक्तीकी ; याष्टिकः, याष्टिकी। कथं शाक्तिकः ? शक्त्या जीवति, वेतनादीकणा भविष्यति ॥६४॥

## वेष्ट्यादिभ्यः ॥६।४।६५॥

म० वृ०–इष्ट्यादिभ्यस्तदस्य प्रहरणे 'टीकण्' वा स्यात्। इष्टिः प्रहरणमस्य=ऐष्टिकः, ऐष्टिकी ; [पक्षे इकण्] ऐष्टिकः इत्यादि ॥६५॥

## नास्तिका-ऽऽस्तिक-दैष्टिकम् ॥६।४।६६॥

म० वृ०–एते शब्दा इकणन्ता निपात्यन्ते। [१]नास्तिकः, [२]आस्तिकः, [३]दैष्टिकः ॥६६॥

अव०–[१]नास्ति परलोकः पुण्यं पापं वा इति मतिरस्य नास्तिकः। [२]अस्ति परलोकः पुण्यं पापं वा इति मतिरस्य आस्तिकः। [३]दिष्टं=दैवम्,तत्प्रमाणमिति मतिरस्य दैष्टिकः, अथवा दिष्टा प्रमाणानुपातिनी, कोऽर्थः ? प्रत्यक्षादिप्रमाणमार्गानुयायिनी मतिरस्य। तथा नास्त्यस्तिशब्दौ तिवादिप्रतिरूपकौ अव्यये, निपातनादेव वा तदिति प्रथमाधिकारेऽपि अस्त्याख्यातात् नास्ति इति पदसमुदायाच्च प्रत्ययो भवतीत्यर्थः ॥६६॥

## वृत्तोऽपपाठोऽनुयोगे ॥६।४।६७॥

म० वृ०–तदिति प्रथमान्तादस्येति षष्ठ्यर्थे 'इकण्' स्यात्, यत्प्रथमान्तं तच्चेदनुयोगविषये [परीक्षाविषये] वृत्तोऽपपाठो भवति । एकमन्यदपपाठोऽनुयोगे वृत्तमस्य=ऐकान्यिकः, द्वैयन्यिकः । वृत्त इति किम् ? वर्त्तमाने वर्त्स्यति च न भवति । अपपाठ इति किम् ? एकमन्यदस्य दुःखमनुयोगे वृत्तम्, जयोऽनुयोगे वृत्तः [एकोऽन्यो जयोऽस्य वृत्तः इति वाक्यम्] ॥६७॥

प्रव०–एकमन्यदित्यस्यार्थः,– एकमन्यत्, कोऽर्थः ? सत्पाठात् सम्यक्पाठादपर अपपाठः कूटपाठोऽलीकपठनं गुणनं चिन्तनं वृत्तं सञ्जातमस्य मैत्रस्य अनुयोगे शास्त्रप्रकरणगुणने चिन्तने शास्त्रादिसम्यग्परीक्षाविषये । अस्य शास्त्रगुणनादिकं कुर्वतोऽन्यत् कूटमेकमपरं सञ्जातमस्तीत्यर्थः । एवं द्वे अन्येऽपपाठावनुयोगे वृत्ते अस्य, त्रीण्यन्यान्यपपाठा०; द्वैयन्यिकः, त्रैयन्यिकः; 'य्वः पदान्ता०' (७।४।५) ऐवृद्धिरागमः । तथा सङ्ख्याशब्दान्यशब्दयोस्तद्धिते विषयभूते समासो जातः । ततः परात्तद्धितप्रत्ययः इकण् विधीयते । 'वृत्तोऽपपाठोऽनुयोगे' इति शब्दस्य तु तद्धितवृत्तावन्तर्भावादप्रयोगः । अत एव 'वृत्तोऽपपाठ' इत्याद्यग्रे तद्धितप्रत्ययोऽपि न कृतः । 'वृत्तोऽपपाठो० (६।४।६७) इति सूत्रे केचिद्वैयाकरणाः अपपाठादन्यत्राप्यध्ययनमात्रेऽप्यर्थे प्रत्ययमिच्छन्ति । यथा एकं रूपमध्ययने वृत्तमस्य=ऐकरूपिकः, एको ग्रन्थोऽध्ययने वृत्तोऽस्य=ऐकग्रन्थिकः, अनेन एक एव ग्रन्थोऽधीतः इत्यर्थः । अनुयोगे इति किम् ? स्वैराध्ययने मा भूत् ॥६७॥

## [1]बहुस्वरपूर्वादिकः ॥६।४।६८

म० वृ०–बहुस्वरपूर्वात्प्रथमान्तादस्यार्थे 'इकः' स्यात्, प्रथमान्तं (चेत्)वृत्तोऽपपाठोऽनुयोगे [परीक्षावसरे] सति । एकादशान्यान्यपपाठरूपाण्यनुयोगेऽस्य वृत्तानि=एकादशान्यिकः, एकादशान्यिका स्त्री[2] ॥६८॥

प्रव०–[1]बहुस्वरं पूर्वम्, कोऽर्थः ? पूर्वं पदं यस्य, (तस्मात्) प्रथमान्तान्नाम्नः । [2]स्त्री इति शब्दाग्रे द्वादशान्यिकः, द्वादशान्यिका स्त्री; एवं त्रयोदशान्यिकः, चतुर्दशान्यिकः, चतुर्दशान्यिका स्त्री । अन्ये वैयाकरणा अपपाठादन्यत्राप्यध्ययनमात्रे इकण्प्रत्ययमिच्छन्ति । यथा द्वादश रूपाण्यध्ययने वृत्तान्यस्येति वाक्ये द्वादशरूपिकः । अन्यत्वं चापपाठस्य सम्यक्पाठापेक्षं ज्ञातव्यम् ॥६८॥

## भक्ष्यं हितमस्मै ॥६।४।६९॥

म० वृ०–तदिति प्रथमान्तादस्मै इति चतुर्थ्यर्थे 'इकण्' स्यात्, प्रथमान्तं चेद् भक्ष्यं हितं भवति । अपूपा भक्ष्यं हितमस्मै आपूपिकः, एवं [1]मौदकिकः [2]गौडधानिकः ॥६९॥

प्रव०–एवं शाष्कुलिकः । शष्कुलयो [1]मोदकाः [2]गुडधानाः भक्ष्यं हितमस्मै चैत्राय इति वाक्यानि । भक्षणक्रिया हितार्थश्च तद्धितवृत्तावेवान्तर्भूत इत्यप्रयोगः ॥६९॥

## नियुक्तं दीयते ॥६।४।७०॥

म० वृ०–तदिति प्रथमान्तादस्मै अर्थे 'इकण्' स्यात्, प्रथमान्तं चेन्नियुक्तं प्रतिपन्नमव्यभिचारेण नित्यं वा दीयते । अग्रभोजनमस्मै नियुक्तं दीयते=आग्रभोजनिकः, एवमाग्रफलिकः [अग्रं फलमस्मै नियुक्तं दीयते], आपूपिकः, शाष्कुलिकः, मौदकिकः; [अपूपाः शष्कुलयः मोदकाः अस्मै नियुक्तं दीयते] ग्रामिकः[1] । अस्मै इत्येव– रजकस्य वस्त्रं नित्यं दीयते [=अर्प्यते] ॥७०॥

प्रव०–[1]ग्रामोऽस्मै नियुक्तं दीयते । एवमग्रहारो ब्राह्मणदत्ता भूमिरस्मै नियुक्तं दीयते=आग्रहारिकः ॥७०॥

## श्राणा-मांसौदनादिको वा ॥६।४।७१॥

म० वृ०–श्राणामांसौदनाभ्यां तदस्मै नियुक्तं दीयते इति विषये 'इको वा' स्यात् । श्राणा [=यवागूः] नियुक्तमस्मै दीयते=श्राणिकः पथ्याशी ।

मांसौदनिकः । पक्षे [पूर्वेण इकण्-] आणिकी, मांसौदनिकी । इकेकणोः स्त्रियां विशेषः [इकणि सति ङी भवति] ॥७१॥

## भक्तौदनाद्वा णिकट् ॥६।४।७२॥

म० वृ-भक्त-ओदनाभ्यां यथासङ्ख्यम् 'अण्' इकटौ वा भवतः, तदस्मै नियुक्तं दीयते इति विषये । भक्तमस्मै नियुक्तं दीयते=भाक्तः, ओदनमस्मै नियुक्तं दीयते=औदनिकः, ओदनिकी । पक्षे भाक्तिकः, औदनिकः ॥७२॥

## नवयज्ञादयोऽस्मिन् वर्त्तन्ते ॥६।४।७३।

म० वृ०-प्रथमान्तेभ्यः नवयज्ञादिभ्यो वर्त्तन्ते इत्येवमुपाधिभ्य [विशेषणेभ्यः] अस्मिन्निति सप्तम्यर्थे 'इकण्' स्यात् । नवयज्ञा अस्मिन् वर्त्तन्ते=नावयज्ञिकः ॥७३॥

## तत्र नियुक्ते ॥६।४।७४॥

म० वृ०-तत्रेति सप्तम्यन्तान्नियुक्तेऽर्थे 'इकण्' स्यात्। नियुक्तोऽधिकृतो व्यापारित इत्यर्थः । शौल्कशालायां नियुक्तः=शौल्कशालिकः, [1]आतरिकः, [2]दौवारिकः ॥७४॥

---

अव०-पूर्वकस्य 'नियुक्तं दीयते' (६।४।७०) इति सूत्रोक्तनियुक्तशब्दस्य क्रियाविशेषणरूपस्य अव्यभिचारो नित्यमिति चार्थः । स पूर्वसूत्रोक्तो नियुक्तशब्दः प्रकृत्यर्थोपाधिः । अयं च 'तत्र नियुक्ते' सूत्रोक्तनियुक्तशब्दः प्रत्ययार्थो ज्ञातव्यः । [1]आतरे नियुक्तः । द्वारे[2] नियुक्तो दौवारिकः । एवमाक्षपटलिकः, अक्षाणां व्यवहाराणां पटलं समूहस्तत्र नियुक्तः=आक्षपटलिकः, आखण्डलिक इत्यस्य लोकरूढिः ॥७४॥

## अगारान्तादिकः ॥६।४।७५॥

म० वृ०-[1]अगारान्तात्तत्र नियुक्तेऽर्थे 'इकः' स्यात् । देवागारिकः, देवागारिका, [2]भाण्डागारिकः, [3]कोष्ठागारिकः ॥७५॥

---

अव०-[1]बहुप्रत्ययपूर्वादपि अगारशब्दान्त इको भवतीत्यर्थः । [2]भाण्डागारिका स्त्री । [3]कोष्ठागारिका ॥७५॥

## अदेशकालादध्यायिनि ॥६।४।७६॥

म० वृ०-अध्ययनस्य [सिद्धान्ताध्ययनस्य] यौ निषिद्धौ देशकालौ तावदेशकालौ, तद्वाचिनः सप्तम्यन्तादध्यायिन्यर्थे 'इकण्' स्यात् । अदेश,-अशुचावध्यायी=आशुचिकः, [श्मशानेऽध्यायी=] श्माशानिकः[1] । अकाल,-[2]सान्ध्यिकः, औत्पातिकः, [3]आनध्यायिकः । अदेशकालादिति किम् ? पूर्वाह्णेऽध्यायी ॥७६॥

---

अव०-[1](एवं) श्मशानस्याभ्यासो नैकट्यं (श्मशानाभ्यासः), श्मशानाभ्यासेऽध्यायी=श्माशानाभ्यासिकः । [2]सन्ध्यायामध्यायी । [3]अनध्यायेऽध्यायी ॥७६॥

## निकटादिषु वसति ॥६।४।७७॥

म० वृ०-निकटादिभ्यः सप्तम्यन्तेभ्यो वसत्यर्थे 'इकण्' स्यात् । निकटे वसति=नैकटिकः, [1]आरण्यिकः, [2]वार्क्षमूलिकः, [3]श्माशानिकः ॥७७॥

---

अव०-[1]अरण्ये वसति आरण्यिकः, अत्रायं प्रयोगः, आरण्यकेन भिक्षुणा ग्रामात् क्रोशे वस्तव्यमिति यस्य शास्त्रितः=शास्तुर्गुरोः सकाशादितः प्राप्तः शास्त्रितो वास स एव परमर्षिरारण्यक उच्यते । वार्क्षमूलिकादयस्तापसादयः सामान्याः । [2]वृक्षमूले वसति=वार्क्षमूलिकः । [3]श्मशाने वसति । एवमाभ्यवकाशिकः, अभिमतोऽवकाशो मुत्कलप्रदेशो यत्र सोऽभ्यवकाशः, तत्र वसति । आवसथिकः, आवसथे गृहे वसति । निकटादयः प्रयोगगम्याः ॥७७॥

## सतीर्थ्यः ॥६।४।७८॥

म० वृ०-समानतीर्थशब्दाद्वसत्यर्थे 'यः' प्रत्ययो निपात्यते, समानस्य च सभावः । समानतीर्थे वसति=सतीर्थ्यः । तीर्थमिह गुरुरुच्यते ॥७८॥

## प्रस्तार-संस्थान-तदन्त-कठिनान्तेभ्यो व्यवहरति ॥६।४।७९॥

म० वृ०-प्रस्तारसंस्थानाभ्यां प्रस्तारान्तात् संस्थानान्तात् कठिनान्ताच्च व्यवहरत्यर्थे 'इकण्' स्यात् । [1]व्यवहरतिरिह क्रियातत्त्वे=क्रियाया अवि-

परीते स्वभावे । यथा लौकिको व्यवहार इत्यत्र । प्रास्तारिकः, सांस्थानिकः । तदन्त,–कांस्यप्रस्तारिकः, [ लोहप्रस्तारिकः, ] गौसंस्थानिकः[२] । वांशकठिनिकः[३] । कठिनं तापसभाजनं पीठं वा ॥७९॥

प्रव०–[१]व्यवहरतिरत्र विनिमयेऽर्थे, विवादेऽर्थे, विक्षेपेऽर्थे, क्रियातत्त्वेऽर्थे, एवं चतुर्ष्वर्थेषु वर्त्तते । विनिमये यथा– शतं व्यवहरति । विवादे यथा– व्यवहारे पराजितः । विक्षेपे यथा– शलाकां व्यवहरति । क्रियातत्त्वे यथा– लौकिकोऽयं व्यवहारः । तत्रेह क्रियातत्त्वे वर्त्तमानो गृह्यते । [२]एवमाश्वसंस्थानिकः । [३]कठिनान्तोदाहरणम् ॥७९॥

## सङ्ख्यादेश्चाऽर्हदलुचः ॥६।४।८०॥

म० वृ०–अर्हदर्थमभिव्याप्येत ऊर्ध्वं या प्रकृतिर्वक्ष्यते तस्याः [प्रकृतेः] केवलायाः तदन्तायाश्च सङ्ख्यापूर्वाया वक्ष्यमाणः प्रत्ययः स्यादिति ज्ञेयम्, चेत्सा प्रकृतिः लुगन्ता न भवति । [४]चन्द्रायणं चरति चान्द्रायणिकः, द्वे चन्द्रायणे चरति [५]=द्वैचन्द्रायणिकः, पारायणमधीते=पारायणिकः[६] । सङ्ख्यादेरिति किम् ? महापारायणमधीते । आर्हत् इत्यत्र आकारोऽभिविधौ । तेनार्हदर्थेऽपि भवति, द्वे सहस्रे द्विसहस्रं वार्हति=द्विसाहस्रः[७] । अलुच इति किम् ? [८]द्विशूर्प्यम् द्विशौर्पिकम्[९] ॥८०॥

प्रव०–[१]अर्हत आ=आर्हत्, तस्मात्, पञ्चमीङसि,'अतो लुप्' (१।४।५९) इति ङसिलोपः,आर्हत् इति शब्दः, आ अर्हदर्थात् (इत्यर्थः) । [२]चकारः केवलार्थः । [३]न लुक्=अलुक्, तस्याः । [४]चन्द्रेण कृत्वाऽयते ज्ञायते=चन्द्रायणम्, 'पूर्वपदस्था०' (२।३।६४) इति णत्वम् । [५]'द्वैचन्द्रायणिक' इत्यत्र 'द्विगोरनपत्ये०' (६।१।२४) इत्यनेन इकणो लुप् न भवति, प्राग्जितीयेऽर्थे उत्पन्नतद्धितस्य लुप्विधानात् । 'अनाम्न्यद्विः०' (६।४।१४१) इत्यनेनापि लुप् न भवति, आर्हदर्थाभावात् । [६]'तुरायणपारायणं०' (६।४।९२) इति इकण् । एवं द्वैपारायणिकः । [७]द्वयोः सहस्रमथवा द्व्यधिकं सहस्रं द्विसहस्रं वाऽर्हति,अथवा द्वे सहस्रे ऽर्हति, 'मानसंवत्सरस्याशाणकुलिजस्यानाम्नि' (७।४।१९) इत्यनेन उत्तरपदस्य वृद्धिः, 'सहस्रशतमानादण्' (६।४।१३६) इत्यण्, 'नवाणः' (६।४।१४२) इति भणनाद् 'अनाम्न्य०' (६।४।१४१) इति लुपः प्राप्तिः । [८]द्वाभ्यां सूर्पाभ्यां क्रीतम्, 'सूर्पाद्वाञ्' (६।४।१३७) इत्यनेन अञ्, 'अनाम्न्य०' (६।४।१४१।इति अञ्) लुप्यते । [९]तथा द्विसूर्पेण क्रीतं द्विसौर्पिकम्, 'मूल्यैः क्रीते' (६।४।१५०) इत्यनेन इकण्, 'मानसंवत्सरस्याशाणकुलिजस्यानाम्नि' (७।४।१९) उत्तरपदवृद्धिः ॥ ८० ॥

## गोदानादीनां ब्रह्मचर्ये ॥६।४।८१॥

म० वृ०–गोदानादिभ्यो निर्देशात्[१] षष्ठ्यन्तेभ्यो ब्रह्मचर्येऽर्थे 'इकण्' स्यात् । गोदानस्य व्रतविशेषस्य ब्रह्मचर्यं गौदानिकः । गोदानादयः प्रयोगगम्याः । येभ्यो ब्रह्मचर्येऽर्थे इकण् दृश्यते ते गोदानादयः ॥ ८१ ॥

प्रव०–[१]सूत्रे 'गोदानादीनां'– मित्यत्र षष्ठ्यन्तप्रयोगस्तस्मान्निर्देशादेव इत्यर्थः । एवमादित्यव्रतिकम्, आदित्यव्रत इति नाम ऋचः, तासामृचामध्ययनं ब्रह्मचर्यम्, तेन ब्रह्मव्रतेन ता ऋचोऽधीयन्ते, आदित्यव्रतानां ब्रह्मचर्यमिति वाक्ये आदित्यव्रतिकम् ॥ ८१ ॥

## चन्द्रायणं च चरति ॥६।४।८२॥

म० वृ०–चन्द्रायणाद् [सूत्रे द्वितीयान्तनिर्देशात् द्वितीयान्तात् चन्द्रायणात्] गोदानादिभ्यश्च चरत्यर्थे 'इकण्' स्यात् । चन्द्रायणं चरति=चान्द्रायणिकः, गोदानं चरति=गौदानिकः, आदित्यव्रतिकः ॥ ८२ ॥

## देवव्रतादीन् डिन्[१] ॥६।४।८३॥

म० वृ०–[२]देवव्रतादिभ्यश्चरत्यर्थे 'डिन्' स्यात् । देवव्रतं चरति=देवव्रती, तिलव्रती, [३]अवान्तरदीक्षी, महाव्रती । देवव्रतादयो वृद्धप्रयोगगम्याः ॥८३॥

अव०–[1]'डिन्' इत्यत्र डित्करणमुत्तरत्रान्त्यस्वरादिलोपार्थम्, अत्र न प्रयोजनम्। [2]निर्देशात् द्वितीयान्तेभ्यः। [3]अवगतमन्तरं यस्या सा अवान्तरा, सा चासौ दीक्षा च, तां चरति=अवान्तरदीक्षी, सम्यक्त्वदीक्षा इत्यर्थः ॥८३॥

## डकश्चाष्टाचत्वारिंशतं[1] वर्षाणाम् ॥६।४।८४॥

म० वृ०–वर्षाणां सम्बन्धिनोऽष्टाचत्वारिंशच्छब्दात् [2]व्रतवृत्तेश्चरत्यर्थे 'डकः प्रत्ययो [चकारात्] डिन्' च भवति। अष्टाचत्वारिंशकः [डक] [3]अष्टाचत्वारिंशी [डिन्] ॥८४॥

---

अव०–[1]अष्टभिरधिका चत्वारिंशत्=अष्टाचत्वारिंशत्, 'द्वित्र्यष्टानां द्वात्रयोऽष्टा'०(३।२।९२)इत्यनेन अष्टन्शब्दस्य 'अष्टा' आदेशः। अष्टाचत्वारिंशद्वर्षसहितं व्रतमष्टाचत्वारिंशत् उच्यते, तत अष्टाचत्वारिंशद् व्रतं चरति इति वाक्यम्। [2]व्याख्यानतो विशेषार्थप्रतिपत्तिरिति न्यायवशात् व्रतवृत्तेरिति विशेषार्थो वृत्तावुक्तः। [3]सूत्रे अष्टाचत्वारिंशतमिति द्वितीयान्तनिर्देशात् परतो डिन् इत्यर्थः ॥८४॥

## चातुर्मास्यं तौ यलुक् च ॥६।४।८५॥

म०वृ०–[निर्देशात् द्वितीयान्तात्] चातुर्मास्यशब्दाद् व्रतवृत्तेश्चरत्यर्थे तौ 'डकडिनौ' भवतः, य लोपश्च। [1]चातुर्मासकः [डक]। चातुर्मासी [डिन्] ॥८५॥

---

अव०–[1]चतुर्षु मासेषु भवानि, 'यज्ञे ञ्यः' (६।३।१३४) इत्यनेन ञ्यः, चातुर्मास्यानि नाम यज्ञाः, तत्सहचरितानि व्रतानि चातुर्मास्यानि, तानि चरति इति वाक्यम् ॥८५॥

## [1]क्रोशयोजनपूर्वाच्छताद् योजनाच्चाभिगमार्हे[2] ॥६।४।८६॥

म० वृ०–क्रोशपूर्वात् योजनपूर्वाच्च शतशब्दात् योजनशब्दाच्चाभिगमार्हेऽर्थे 'इकण्' स्यात्। [3]क्रौशशतिको मुनिः, यौजनशतिको[4] मुनिः, यौजनिकः साधुः ॥८६॥

---

अव०–[1]क्रोशश्च योजनं च=क्रोशयोजने पूर्वे यस्य सः, तस्मात्। [2]'अर्हेऽच्' (५।१।९१) इत्यच्। [3]क्रोशशतादभिगमनमर्हति क्रौशशतिकः। [4]योजनशतादभिगमनमर्हति यौजनशतिकः ॥८६॥

## तद् यात्येभ्यः ॥६।४।८७॥

म०वृ०–तदिति द्वितीयान्तेभ्यः एभ्यः क्रोशशत योजनशत योजन इत्येतेभ्यो याति गच्छत्यर्थे 'इकण्' स्यात्। [क्रोशशतं याति=] क्रौशशतिकः, यौजनशतिकः, यौजनिको दूतः ॥८७॥

## पथ इकट् ॥६।४।८८॥

म० वृ०–[तदिति द्वितीयान्ताद्] पथिन्शब्दाद्यात्यर्थे 'इकट्' भवति। पन्थानं याति=पथिकः ['नोऽपदस्य'० (७।४।६१) अन् लोपः], पथिकी, द्विपथिकः ॥८८॥

---

अव०–कट् इति प्रत्यये कृतेऽपि पथिक इति सिद्धयति (तथापि) यद् इकट् इति प्रत्ययविधानं तत् 'द्विपथिकः द्विपथिकी इति सिद्धयर्थम्। अत्र हि परत्वात् पूर्वमत् समासान्तः,पश्चात् इकट्। कटे हि कृते द्विपथक इति स्यात्। द्वौ पन्थानौ याति इति वाक्ये कृते पूर्वम् 'ऋक्पूःपथ्यपोऽत्' ,(७।३।७६) इत्यनेन अत् समासान्तः, पश्चात् पथ इकट् ॥८८॥

## नित्यं णः पन्थश्च ॥६।४।८९॥

म०वृ०–पथिन्शब्दान्नित्यं [नित्यमिति प्रत्ययार्थविशेषणं] यात्यर्थे 'णः' स्यात्, पथिन्शब्दस्य च पन्थ इत्यादेशः। पन्थानं नित्यं याति=पान्थः, पान्था स्त्री; द्वैपन्थः, द्वैपन्था स्त्री। नित्यमिति किम्? पथिकः ॥८९॥

---

अव०–'द्वैपन्थ' इत्यत्रापि द्वौ पन्थानौ नित्यं याति इति वाक्ये 'ऋक्पूः' (७।३।७६) अत्, पश्चात् णः प्रत्ययः........(ज्ञातव्यः) ॥८९॥

## शङ्कूत्तर-कान्तारा-ऽज-वारि-स्थल-जङ्गलादेस्तेनाऽऽहृते च ॥६।४।९०॥

म० वृ०–शङ्कु–उत्तर–कान्तार–अज–वारि–स्थल–जङ्गल इति पूर्वपदात् पथिन्शब्दान्तात्तेनेति तृतीयान्ताद्दाहृतेऽर्थे यात्यर्थे च 'इकण्' स्यात्। [1]शाङ्कुपथिकः, [2]औत्तरपथिकः, कान्तारपथिकः, आजपथिकः, वारिपथिकः, [3]स्थालपथिकः, [4]जाङ्गलपथिकः ॥९०॥

प्रव०–[1]शङ्कूनां पन्थाः शङ्कुपथः, 'ऋक्पूः–पथ्यपोऽत्' (७।३।७६) अत्; शङ्कुपथेनाहृतो याति वा शाङ्कुपथिकः। [2]एवमौत्तरपथिकः इत्यादौ अग्रेतनोदाहरणवृन्दे इत्थमेव साधनिका कर्त्तव्या। अथवा [3]स्थलं चासौ पन्थाश्च,[4]जङ्गलश्चासौ पन्थाश्च, 'ऋक्पूःपथ्य'० (७।३।७६) अत्, तत इकण् ॥९०॥

## स्थलादेर्मधुक-मरिचेऽण् ॥६।४।९१॥

म० वृ०–स्थलपूर्वपदात् पथिन्नन्तादाहृतेऽर्थे 'अण्' स्यात्,तच्चेदाहृतं मधुकं मरिचं वा भवति। [1]स्थालपथम् ॥९१॥

प्रव०–[1]स्थलपथ इति पूर्ववत्, स्थलपथेनाहृतं मधुकं मरिचं वा स्थालपथम् ॥९१॥

## [1]तुरायण-पारायणं यजमाना-ऽधीयाने ॥६।४।९२॥

म० वृ०–तुरायणपारायणाभ्यां [2]यथासङ्ख्यं यजमानेऽधीयाने चार्थे 'इकण्' स्यात्। [3]तौरायणिकः। [4]पारायणिकः ॥९२॥

प्रव०–[1]तुराः सन्तोऽयन्तेऽस्मिन्, तुरैरय्यते स्वर्गोऽनेन वा। [2] निर्देशादेव द्वितीयान्ताभ्याम्। [3]तुरायणं नाम यज्ञस्तं यजते तौरायणिकः। [4]पारायणमधीते ॥९२॥

## संशयं प्राप्ते ज्ञेये ॥६।४।९३॥

म० वृ०–संशयमिति द्वितीयान्तात्प्राप्तेऽर्थे 'इकण्', स चेत्प्राप्तोऽर्थो ज्ञेयो भवति। [1]सांशयिकोऽर्थः ॥९३॥

प्रव०–[1]संशयं प्राप्त इति वाक्यम्, सांशयिकः। अथ ज्ञेयभावना,- सांशयिकोऽयमूर्ध्वो न जाने स्थाणुः उत पुरुषः, सांशयिकश्चैत्रः न जाने जीवति उत मृतः। जाने इत्यत्र 'ज्ञोऽनुपसर्गात्' (३।३।९६) इत्यात्मनेपदम् ॥९३॥

## तस्मै योगादेः शक्ते ॥६।४।९४॥

म० वृ०–योगादिभ्यस्तस्मै इति चतुर्थ्यन्तेभ्य शक्तेऽर्थे 'इकण्' स्यात्। योगाय शक्तो यौगिकः, सान्तापिकः ॥९४॥

प्रव०–तस्मै इत्यत्र शक्तार्थलक्षणा चतुर्थी, ततः पञ्चमी, सूत्रत्वात् लोपः। योग, सन्ताप, सन्नाह, सङ्ग्राम,संयोग, सम्पराय,सङ्घात, सम्पाद, सम्पादन, सङ्क्रम, सम्पेष, संवेश, सम्मोदन, निष्पेष, निसर्ग, निःसर्ग, विसर्ग, उपसर्ग, प्रवास, उपवास, सक्तु, निघोष, मांस, ओदन, मांसौदन, सक्तुमांसौदन इति योगादिगणः। अत्र केचित् योगादिमाकृतिगणमाहुः। तेन वैषयिकमिति सिद्धम् ॥९४॥

## योगकर्मभ्यां योकञौ ॥६।४।९५॥

म० वृ०–योगकर्मशब्दाभ्यां शक्तेऽर्थे यथाक्रमं 'योकञौ' भवतः। [1]योग्यः, कार्मुकम्[2] ॥९५॥

प्रव०–[1]योगाय शक्तो योग्यः। एवं योगशब्दस्य द्वैरूप्यम्,- यौगिकः, योग्यः। [2]कर्मणे शक्त=कार्मुकम् ॥९५॥

## यज्ञानां दक्षिणायाम्[1] ॥६।४।९६॥

म० वृ०–यज्ञवाचिभ्यो [2] दक्षिणार्थे 'इकण्' स्यात्। आग्निष्टोमिकी[3] ॥९६॥

प्रव०–[1]यज्ञकर्मकृतां वेतनादानं दक्षिणा। [2]निर्देशात् षष्ठ्यन्तेभ्यः। [3]अग्नीनां स्तोमः, 'ज्योतिरायुर्भ्यां च स्तोमस्य' (२।३।१७) इति षत्वम्, अग्निष्टोमस्य दक्षिणा=आग्निष्टोमिकी। (एवं) राजसूयिकी ॥९६॥

## तेषु देये ॥६।४।९७॥

म० वृ०-यज्ञनामभ्यः तेष्विति सप्तम्यन्तेभ्यो देयेऽर्थे 'इकण्' स्यात् । [1]आग्निष्टोमिकम् ।९७।

प्रव०-[1]अग्नीनां स्तोमः, 'ज्योतिरायुर्भ्यां च स्तोमस्य' (२।३।१७) इति षत्वम्, अग्निष्टोमे देयं भक्तम् ॥९७॥

## काले कार्ये च भववत् ॥६।४।९८॥

म० वृ०-[1]कालवाचिशब्दाद् देये कार्ये चार्थे 'भववत्' प्रत्यया भवन्ति । यकाभ्यः प्रकृतिभ्यो येन विशेषेण ये प्रत्यया भवेऽर्थे भवन्ति ताभ्यः प्रकृतिभ्यस्तेन विशेषेण कार्ये देये चार्थे ते [ प्रत्ययाः] भवन्तीत्यर्थः । यथा [2]वर्षासु भवं वार्षिकम्, तथा वर्षासु देयं कार्यं वा वार्षिकम् ॥९८॥

प्रव०-[1]निर्देशात् सप्तम्यन्तात् । [2]"वर्षासु भवं वार्षिकम्", अत्र 'वर्षाकालेभ्यः' (६।३।८०) इति भवेऽर्थे इकण्, यथाऽत्र भवेऽर्थे इकण्, तथा वर्षासु देयं वर्षासु कार्यं वार्षिकम्, अत्र देये कार्येऽप्यर्थे इकण् । एवं मासिकम्, शारदिकं श्राद्धं कर्म, शारदिकः, नैशम्, नैशिकम्, प्रादोषम्, प्रादोषिकम्, श्रौवस्तिकम्, चिरत्नम्, पुराणम्, सायंतनम्, पौषम्, शैशिरम्, सान्ध्यम्, सांवत्सरं फलं पर्व वा, हैमन्तम्, हैमनम्, प्रावृषेण्यम् । एषु उदाहरणेष्वपि(यथा)शेषे भवेऽर्थे इकणादयो भवन्ति तथा शरदि देयं शरदि कार्यमित्याद्यर्थेऽपि (इकणादयः) प्रत्यया भवन्ति इत्यर्थः । 'काले कार्ये०' (६।४।९८) इति सूत्रे प्रत्ययसद्भावोऽतिदिश्यते, न अभावः, कोऽर्थः ? लुप् ❀ । तथा ( ? तेन ) द्विगुसमासात् परस्य तद्धितस्य लुप् न भवति,- द्वयोर्मासयोर्देयं कार्यं वा द्वैमासिकम्, त्रैमासिकम् ॥९८॥

## [1]व्युष्टादिष्वण् ॥६।४।९९॥

म० वृ०-[2]व्युष्टादिभ्यो देये कार्ये चार्थे-'अण्' स्यात् । व्युष्टे देयं कार्यं वा वैयुष्टम्, नैत्यम् ॥९९॥

प्रव०-[1]विपूर्वः 'उषू श्रिषू श्लिषू प्रुषू प्लुषू दाहे' (इति) उष्, व्युष्यते स्म अस्मिन्- 'अद्यर्था०' (५।१।१२) इति क्तः । [2]सप्तम्यन्तेभ्यः । व्युष्ट, नित्य, निष्क्रमण, प्रवेशन, तीर्थ, सङ्ग्राम, सङ्घात, अग्निपद, पीलुमूल, प्रवास, उपवास इति व्युष्टादिगणः । बहुवचनादाकृतिगणोऽयम् । व्युष्टसाहचर्यान्नित्यशब्दोऽत्र कालवाची गृह्यते । ततः सप्तम्यपवादेन 'कालाध्वनोर्व्याप्तौ' (२।२।४२) इत्यनेन द्वितीयाविधानान्नित्यं देयमिति द्वितीयान्तादेव प्रत्ययः । अन्ये तु सप्तम्यन्तादपीच्छन्ति,- नित्ये विषुवति षड्भिश्चराचरैर्मुहूर्तैरनाक्रम्यमाणे देयं कार्यं वा नैत्यम् । विषुर्नाम मुहूर्त्तः, सोऽस्यास्ति विषुवत्, समरात्रिदिवः कालो विषुवत् उच्यते, विषुवत् शब्दः पुंनपुंसकः,यद् वैजयन्ती- "परीतत् महिमा हेम विषुवत् कर्म लोम दोः" ॥९९॥

## यथाकथाचाण्णः ॥६।४।१००॥

म० वृ०-यथाकथाचशब्दाद् देये कार्ये चार्थे 'णः' स्यात् । [1]यथाकथाच दीयते=याथाकथाचा दक्षिणा ॥१००॥

प्रव०-[1]यथाकथाच इति शब्दोऽखण्डोऽव्ययसमुदायोऽनादरेणेत्यर्थे वर्त्तते ॥१००॥

## तेन हस्ताद्यः ॥६।४।१०१॥

म० वृ०-तेनेति तृतीयान्तात् हस्ताद् देये कार्ये चार्थे 'यः प्रत्ययः' स्यात् । हस्तेन देयं कार्यं वा हस्त्यम् ॥१०१॥

## शोभमाने ॥६।४।१०२॥

म० वृ०-तेन तृतीयान्ताच्छब्दाच्छोभमानेऽर्थे 'इकण्' स्यात् । [1]कर्णवेष्टकाभ्यां शोभते=कार्णवेष्टकिकं मुखम्, [2]आनुगिकं शरीरम्, [3]औपानहिकौ पादौ ॥१०२॥

प्रव०-[1]कर्णौ वेष्टते- कर्मणोऽण् (५।१।७२), तावेव कर्णवेष्टकौ, ताभ्याम्, अथवा वेष्टते

❀ 'लुप् नातिदिश्यते' इत्यर्थः ।

(इति) 'पकतृचौ' (५।१।४८), कर्णयोर्वेष्टकौ कुण्डलौ, ताभ्याम्। [2]वस्त्रयुगेण शोभते। ★ 'कवर्गैकस्वरवति' ( २।३।७६ ) इति णत्वम्। [3]उपानद्भ्यां शोभते। शोभते इति क्रियासम्बद्धत्वेन 卐असमर्थनञ्समासोऽप्यस्मिन् विषये भवति,– कर्णवेष्टकाभ्यां न शोभते=अकार्णवेष्टकिकम्। कर्णवेष्टकशब्देन सह नञोऽसम्बद्धत्वान्नञोऽकारस्य न वृद्धिः। एवमग्रेऽपि ॥१०२॥

## कर्म-वेषाद् यः ॥६।४।१०३॥

म० वृ०–कर्मन्-वेषशब्दाभ्यां शोभमानेऽर्थे 'यः' स्यात्। कर्मणा शोभते=कर्मण्यं शौर्यम्। वेषेण शोभते=वेष्यो नटः। केचिद् वेषस्थाने वेशं पठन्ति। वेश्या नर्त्तकी ॥१०३॥

अव०–'वेश्याश्रयः पुरं वेशः' इति (अभि० श्लो० १००३) नाममालायाम्, वेशेन शोभते=वेश्या। तथा अत्रापि सूत्रे प्रागुक्तनञ्समासः,– कर्मणा न शोभते=अकर्मण्यः, एवमवेष्यः ॥१०३॥

## कालात्परिजय्य-लभ्य-कार्य-सुकरे ॥६।४।१०४॥

म० वृ०–कालविशेषवाचिनः [तृतीयान्तात्] शब्दात् परिजय्ये[1], लभ्ये[2], कार्ये[3], सुकरे[4] चार्थे 'इकण्' स्यात्। मासेन परिजय्यः=मासिको व्याधिः,[5] [6]सांवत्सरिकः। मासेन लभ्यः=मासिकः पटः। मासेन कार्यं=मासिकं [7]चान्द्रायणम्। मासेन सुकरो=मासिकः प्रासादः ॥१०४॥

अव०–[1]परितो जेतुं शक्यं=परिजय्यम्, 'य एचातः' (५।१।२८) इति यः, तदनन्तरं 'क्षय्यजय्यौ शक्तौ' (४।३।९०) इति सूत्रेण अय् इत्यन्तादेशो निपात्यते। [2]लभ्य–[3]कार्ययोस्तु शक्तेऽर्हे चार्थे कृत्यः, लब्धुं शक्यः, लब्धुमर्हति; 'शक्तार्हे कृत्याश्च' (५।४।३५) इत्यनेन 'शकितकिचति०' (५।१।२९) इति यः प्रत्ययः, कार्य इत्यत्र 'ऋवर्णव्यञ्जनात्०' (५।१।१७) इति घ्यण्। [4]अकृच्छ्रेण क्रियते यत् तत् सुकरम्, 'दुःस्वीषतः कृच्छ्राकृच्छ्रा०' (५।३।१३९) इति खल्। [5]एवमार्धमासिकः। [6]संवत्सरेण परिजय्यः– जेतुं शक्यः। [7]स्वार्थे 'प्रज्ञादिभ्योऽण्' (७।२।१६५) ॥१०४॥

## निर्वृत्ते ॥६।४।१०५॥

म० वृ०–कालवाचिनस्तृतीयान्तान्निर्वृत्तेऽर्थे 'इकण्' स्यात्। अह्ना निर्वृत्तमाह्निकम्,[1] [2]मासिकम्, [3]सांवत्सरिकम् ॥१०५॥

अव०–[1]आह्निकमित्यत्र 'अनीनादट्यह्नोऽतः' (७।४।६६) इत्यनेन 'अहन्' इत्यस्य अन्त्याऽकारस्य लोपः। [2]मासेन निर्वृत्तम्। [3]संवत्सरेण निर्वृत्तम्। 'निर्वृत्ते' (६।४।१४) इति पृथग्योग उत्तरसूत्रेषु निर्वृत्ते इत्यस्य अनुवृत्त्यर्थः ॥१०५॥

## तं भावि-भूते ॥६।४।१०६॥

म० वृ०–तमिति द्वितीयान्तात्कालवाचिनो [1]भाविनि [2]भूते चार्थे इकण् स्यात्। मासं भावी=मासिकः, मासं भूतो=मासिकः उत्सवः ॥१०६॥

अव०–[1]स्वसत्तया व्याप्स्यमानः कालो येन भाविना उत्सवादिना स व्याप्स्यमानकालो भावी उच्यते। [2]व्याप्तकालस्तु भूत उच्यते। स्वसत्तया इत्यत्रापि योज्यम् ॥१०६॥

## तस्मै [1]भृताऽधीष्टे[2] च ॥६।४।१०७॥

म० वृ०–तस्मै तादर्थ्यचतुर्थ्यन्तात्कालवाचिनो भृतेऽधीष्टे चार्थे 'इकण्' स्यात्। मासाय भृतो=मासिको भृत्यः, मासं [मासं यावत्] कर्म्मणे [3]भृत

★ 'वस्त्रयुगेण' इत्यत्र।

卐 'क्रियासंबद्धत्वेन' इति हेतुर्नञ्समासस्यासमर्थत्वे बोध्यः, न त्वसमर्थनञ्समासभवनविषये। असमर्थनञ्समासभवनविषये हेतुः 'गमकत्वादभिधानाद्' इति ज्ञेयः।

इत्यर्थः। मासायाधीष्टो=मासिक उपाध्यायः, मासमध्यापनाय [मासं यावत् पाठनार्थम्] अधीष्ट[४] इत्यर्थः। एवं वार्षिकः, सांवत्सरिकः। चकारः 'तेन निर्वृत्ते' 'तं भाविभूते' 'तस्मै भृताधीष्टे च' इति सूत्रत्रयस्याप्युत्तरत्रानुवृत्त्यर्थः ॥१०७॥

अव०-[१]वेतनेन मूल्येन यः कर्मकरः क्रीतः स भृत इत्युच्यते। [२]यः सत्कृत्य=बहुमान्य अध्ययनादिकार्ये उपाध्यायादिर्व्यापारितः सः अधीष्ट उच्यते। [३]गृहकार्यायावस्थापित इत्यर्थः। [४]अभिलषित इत्यर्थः ॥१०७॥

## षण्मासादवयसि ण्येकौ ॥६।४।१०८॥

म० वृ०-षण्मासात् [कालवाचिनः शब्दात्] तेन निर्वृत्ते, तं भाविभूते, तस्मै भृताधीष्टे चेति विषयेऽवयसि गम्यमाने 'ण्य-इकौ' भवतः। [१]षाण्मास्यः, षाण्मासिकः। अवयसीति किम्? [२]षण्मास्यः ॥१०८॥

अव०-[१]षड्भिर्मासैर्निर्वृत्तः षण्मासान् भावी भूतो वा षड्भ्यो मासेभ्यो भृतोऽधीष्टो वा षाण्मास्यः, षाण्मासिकः। [२]षण्मासान् भूतः शिशुः षण्मास्यः, 'षण्मासाद् य-यणिकण्' (६।४।११५) इत्यनेन यः प्रत्ययः ॥१०८॥

## समाया ईनः ॥६।४।१०९॥

म० वृ०-समाशब्दात्तेन निर्वृत्त [१]इत्याद्यर्थे 'इनः' स्यात्। समीनः[२] ॥१०९॥

अव०-[१]'तेन निर्वृत्ते' इत्याद्यर्थपञ्चकविषये। [२]समया निर्वृत्तः समां भूतो भावी वा समायै भृतोऽधीष्टो वा समीनः ॥१०९॥

## रात्र्यहःसंवत्सराच्च द्विगोर्वा ॥६।४।११०॥

म० वृ०-रात्रि-अहन्-संवत्सरान्तात् समाशब्दान्ताच्च द्विगोस्तेन निर्वृत्तेत्यादिपञ्चकविषये, 'ईनो' वा स्यात्। [१]द्विरात्रीणः, [२]द्व्यहीनः, [३]द्विसंवत्सरीणः, [४]द्विसमीनः। [५]पक्षे द्वैरात्रिकः, द्वैयह्निकः,[६] [७]द्विसांवत्सरिकः, द्वैसमिकः ॥११०॥

अव०-रात्रिश्च अहश्च संवत्सरश्च। समाशब्दान्तात् 'समाया ईनः' (६।४।१०९) इति पूर्वेण नित्यं प्राप्ते शेषेभ्योऽप्राप्ते विकल्पोऽयं विधीयते। द्विरात्रीणः द्व्यहीनः ;अत्र समासान्ताभावविषये लिख्यते-रात्र्यन्तात् अहरन्ताच्च परमपि समासान्तं बाधित्वा अनवकाशत्वादीन एव भवति। तथा च समासान्तनियोगे उच्यमानः 'सर्वांशसंख्याऽव्ययात्' (७।३। ११८) इति अह्नादेशोऽपि न भवति, समासान्तयोगाभावात्। [१]द्वाभ्यां रात्रिभ्यां निर्वृत्तः द्वे रात्री भूतो भावी वा द्वाभ्यां रात्रिभ्यां भृतोऽधीष्टो वा द्विरात्रीणः। एवं त्रिरात्रीणः,तिसृभी रात्रिभिर्निर्वृत्तः तिस्रो रात्रीर्भूतो भावी वा तिसृभ्यो रात्रिभ्यो भृतोऽधीष्टो वा त्रिरात्रीणः। द्वाभ्यामहोभ्यां निर्वृत्तः द्वेऽह्नी भूतो भावी वा द्वाभ्यामहोभ्यां भृतोऽधीष्टो वा द्व्यहीनः। एवं[३]द्वाभ्यां संवत्सराभ्यां निर्वृतः द्वौ संवत्सरौ भूतो भावी वा द्वाभ्यां संवत्सराभ्यां भृतोऽधीष्टो वा द्विसंवत्सरीणः। [४]द्वाभ्यां समाभ्यां निर्वृतः द्वे समे भूतो भावी वा द्वाभ्यां समाभ्यां भृतोऽधीष्टो वा द्विसमीनः। [५]पक्षे द्वैरात्रिकः, द्वैयह्निकः; अनयोरपि वाक्यानि मूलोदाहरणवत् कर्त्तव्यानि, परं विशेषोऽयम्,-द्वैरात्रिक इत्यत्र पूर्वं संख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत्' (७।३। ११९) इत्यनेन अत् समासान्तः,ततः पूर्वसूत्रैः'(तेन) निर्वृत्ते'(६।४।१०७)'तं भावि भूते'(६।४।१०६)'तस्मै भृताऽधीष्टे' (६।४।१०५) इत्येभिरिकण्, द्वैयह्निक (इति) अत्रापि द्वाभ्यामहोभ्यां निर्वृत्त इत्यादिवाक्ये कृते'सर्वांशसङ्ख्याऽव्ययात्'(७।३।११८) इत्यनेन अट् समासान्तः अह्न इत्यादेशश्च, ततः पूर्वसूत्रैरिकण्। [६]द्वैयह्निक इत्यस्याग्रे द्वैयहिक इति प्रयोगो ज्ञातव्यः। द्वैयहिकमिति तु कथम्? तत्राह- द्वयोरह्नोः समाहारः,'द्विगोरन्नह्नोऽट्'(७।३।९९) इत्यनेन अट्, 'नोऽपदस्य'० (७।४।६१) इति नलोपः, द्व्यहेन निर्वृत्तमिति वाक्येन समाहारद्विगोरिकण्

भवति। [३]द्विसांवत्सरिक इत्यत्र 'मानसंवत्सरस्या०' (७।४।१९) इत्यनेनोत्तरपदवृद्धिः ॥११०॥

## वर्षादश्च वा ॥६।४।१११॥

म० वृ०–वर्षशब्दान्तात्कालवाचिनो द्विगोस्तेन निर्वृत्तेत्यादिपञ्चकार्थे 'अः प्रत्ययश्चकारादीनञ्च' वा स्यात्। पक्षे इकण्। एवं च त्रैरूप्यम्। [१]द्विवर्षः [अः], द्विवर्षीणः [ईनः], [२]द्विवार्षिकः [इकण्], [३]द्वैवर्षिकः, त्रैवर्षिकः ॥१११॥

प्रव०–[१]द्वाभ्यां वर्षाभ्यां निर्वृत्तः द्वौ वर्षौ द्वे वा वर्षे भूतो भावी वा द्वाभ्यां वर्षाभ्यां भृतोऽधीष्टो वा–द्विवर्षः, द्विवर्षीणः, द्विवार्षिकः। एवं त्रिवर्षः, त्रिवर्षीणः, त्रिवार्षिकः। [२]अत्र 'सङ्ख्याधिकाभ्यां वर्षस्याभाविनि' (७।४।१८) इत्यनेन उत्तरपदवृद्धिः। [३]भाविन्यर्थे तु उत्तरपदवृद्धिप्रतिषेधो भवति, तत्र द्वैवर्षिकः त्रैवर्षिकः इत्येव प्रयोगौ ॥१११॥

## प्राणिनि भूते ॥६।४।११२॥

म० वृ०–कालवाचिवर्षशब्दान्तात् द्विगोर्भूतेऽर्थे 'अः प्रत्ययः' स्यात् ,स चेद् भूतः प्राणी भवति। द्वे वर्षे भूतो=द्विवर्षो दारकः, त्रिवर्षो वत्सः। प्राणिनीति किम्? द्विवर्षः, द्विवर्षीणः, द्विवार्षिकः सरकः ॥११२॥

प्रव०–'प्राणिनि भूते' इति सूत्रे भूते इति किम्? निर्वृत्तभाविभृताधीष्ट इति अर्थचतुष्टये वर्षात् 'निर्वृत्ते' (६।४।१०५) 'तं भाविभूते' (६।४।१०६) 'तस्मै भृताधीष्टे' (६।४।१०७) इति सूत्रैः प्रत्यया भवन्ति। यथा द्विवर्षः,…………………… (द्विवर्षीणः द्विवार्षिकः, द्वैवर्षि)को नरः। एवमुक्त-…………(ऐषु त्रिषु सूत्रेष्वपीयं) भावना कार्या। पूर्वेण विकल्पे प्राप्ते "प्राणिनि भूते" इति नित्यार्थं विधिः कृतः ॥११२॥

## मासाद्वयसि यः ॥६।४।११३॥

म० वृ०–मासान्ताद् द्विगोर्भूते 'यः' स्यात्, वयसि गम्यमाने। द्वौ मासौ भूतो द्विमास्यो दारकः ॥११३॥

प्रव०–'मासाद्वयसि यः' (६।४।११३) इति सूत्रे वयसीति किम्? द्वैमासिको व्याधिः, द्वैमासिको नायकः। भूते इति किम्? द्वौ मासौ भावी =द्वैमासिको युवा ॥११३॥

## ईनञ्च ॥६।४।११४॥

म० वृ०–द्विगोरिति निवृत्तम्, योगविभागात्। मासशब्दाद् भूतेऽर्थे 'ईनञ् चकाराद्यश्च प्रत्ययः' स्यात्, वयसि। मासं भूतो=मासीनः, [ईनञ्], मास्यः [यः] पुत्रः। वयसीत्येव–मासिको नायकः ॥११४॥

प्रव०–'ईनञ् च' (६।४।११४)' इति सूत्रे ञकारः 'तद्धितः स्वरवृद्धि०' (३।२।५५) इति सूत्रे वृद्धिहेतुप्रत्यये परे पुंवद्भावप्रतिषेधार्थः। तेन मासीना स्वसाऽस्य मासीनास्वसृकः, 'ऋन्नित्यदितः' (७।३।१७१) कः ॥११४॥

## षण्मासाद् य-यणिकण् ॥६।४।११५॥

म० वृ०–षण्मासशब्दात् भूतेऽर्थे यः, यण्, इकण् भवन्ति, वयसि गम्यमाने। षण्मासान् भूतः =षण्मास्यः [यः], षाण्मास्यः [यण्], षाण्मासिकः [इकण्] ॥११५॥

प्रव०–'षण्मासाद् यय०' (६।४।११५) इति सूत्रे भूते इति किम्? षण्मासान् भावी इति वाक्यमेव, अत्र भाविभूते इकण् प्राप्तोऽपि भूते इति व्यावृत्तिबलान्निषिध्यते। वयसीति किम्? षाण्मास्यः, षण्मासिको नायकः, 'षण्मासादवयसि ण्येकौ' (६।४।१०८) ॥११५॥

## [१]सोऽस्य[२] ब्रह्मचर्य-तद्वतोः ॥६।४।११६॥

म० वृ०–स इति प्रथमान्तात्कालवाचिनो-[२]ऽस्येति षष्ठ्यर्थे 'इकण्' स्यात्, ब्रह्मचर्ये तद्वति चार्थे, यत्तदस्येति निर्दिष्टं तच्चेद् ब्रह्मचर्यं ब्रह्मचारी

[१]या भवतीत्यर्थः। मासोऽस्य ब्रह्मचर्यस्य=मासिकं ब्रह्मचर्यम्, एवं सांवत्सरिकम्। मासोऽस्य ब्रह्मचारिणो=मासिको ब्रह्मचारी,[३]मासं ब्रह्मचर्यमस्येत्यर्थः [सांवत्सरिकः] ॥११६॥

अव०–[१]स इत्यत्र पञ्चमीङसि, सूत्रत्वात् लोपः। [२]अस्य, सप्तमीङि। [३]मासमित्यत्र 'कालाध्वनोर्व्याप्तौ' (२।२।४२) इति द्वितीया ॥११६॥

## प्रयोजनम् ॥६।४।११७॥

म० वृ०–स इति प्रथमान्तादस्येति षष्ठ्यर्थे 'इकण्' स्यात्, यत्प्रथमान्तं तच्चेत्प्रयोजनं[१] स्यात्। जिनमहः प्रयोजनमस्य=[२]जैनमहिकम्, [३]ऐन्द्रमहिकम्, [४]दैपोत्सविकम् ॥११७॥

अव०–[१]प्रयुङ्क्ते प्रयोजयति इति वा, 'नन्द्यादिभ्योऽनः' (५।१।५२)। प्रयोजनम्, प्रयोजकम्, प्रवर्त्तकम्, जनकम्, उत्पादकम् इति पर्यायाः प्रयोजनशब्दस्य। [२]जैनमहिकं देवागमनम्। [३]ऐन्द्रमहिकं जनमेलनम्। [४]दीपप्रधान उत्सवो=दीपोत्सवः, स प्रयोजनमस्य=दैपोत्सविकं गृहमण्डनादिकम् ॥११७॥

## एकागाराच्चौरे ॥६।४।११८॥

म० वृ०–एकागारशब्दात्तदस्य प्रयोजनार्थे 'इकण्' स्यात्, चौरे=यत्तदस्येति निर्दिष्टं स चेच्चौरः। [१]एकागारिकश्चौरः ॥११८॥

अव०–[१]एकमसहायमगारं प्रयोजनमस्य=ऐकागारिकः, ऐकागारिकी। चौरे नियमार्थं वचनम्, तेनान्यत्र न भवति,– एकागारं प्रयोजनमस्य भिक्षोरिति वाक्यमेव ॥११८॥

## चूडादिभ्योऽण् ॥६।४।११९॥

म० वृ०–चूडादिभ्यस्तदस्य प्रयोजनार्थे–'ऽण्' स्यात्। चूडा प्रयोजनमस्य=[१]चौडम्, चौलम्, [२]औपनयनम्, [३]श्राद्धम्। चूडादयः प्रयोगगम्याः ११९

अव०–[१]मुण्डनम्। [२]वेदपाठाचार्यार्थं माणवकस्य मुञ्जीकर्म उपनयनम्, उपनयनं प्रयोजनमस्य। [३]श्रद्धा प्रयोजनमस्य=श्राद्धम् ॥११९॥

## विशाखा-ऽऽषाढान्मन्थ-दण्डे ॥६।४।१२०॥

म० वृ०–विशाखा आषाढा इति (एता)भ्यां तदस्य प्रयोजनार्थे–'ऽण्' स्याद्यथासङ्ख्यं मन्थे[१] दण्डे चाभिधेये। वैशाखो[२]मन्थः, आषाढो[३] दण्डः ॥१२०॥

अव०–[१]मन्थो विलोडनं दण्डो वा। [२]विशाखा प्रयोजनमस्य वैशाखः। [३]आषाढा आषाढे आषाढाः प्रयोजनमस्य ॥१२०॥

## उत्थापनादेरीयः ॥६।४।१२१॥

म० वृ०–उत्थापनादिभ्यस्तदस्य प्रयोजने 'ईयः' स्यात्। [१]उत्थापनीयः, [२]उपस्थापनीयः ॥१२१॥

अव०–[१]उत्थाप्यते (इत्युत्थापनम्), उत्थापनं प्रयोजनमस्य। [२]उपस्थापनं प्रयोजनमस्य। उत्थापन, उपस्थापन, अनुप्रवचन, अनुवाचन, अनुवादन, अनुपान, अनुवासन, आरम्भण, समारम्भण इत्युत्थापनादिगणः ॥१२१॥

## विशि-रुहि-पदि-पूरि-समापेरनात् सपूर्वपदात् ॥६।४।१२२॥

म० वृ०–विशयादिभ्योऽनप्रत्ययान्तेभ्यः सपूर्वपदेभ्यस्तदस्य प्रयोजनार्थे 'ईयः' स्यात्। विशि,– [१]गृहप्रवेशनीयं दानम्, [२]संवेशनीयं रतिः। रुहि,– [३]प्रासादारोहणीयम्, प्ररोहणीयम्। पदि,– गोप्रपदनीयम्[४]। पूरि,– प्रपापूरणीयम्[५]। समापि,– [६]अङ्गसमापनीयम्, [७]श्रुतस्कन्धसमापनीयम्, [८]व्याकरणसमापनीयम् ॥१२२॥

अव०–[१]गृहप्रवेशनं प्रयोजनमस्य। [२]संवेशनं सम्भोगः प्रयोजनमस्य। [३]प्रासादस्य आरोहणं प्रयोजनमस्य। [४]प्रपदनं प्रकृष्टगतिः, (गोः प्रपदनीयं=गोप्रपदनीयम्,) तत्प्रयोजनमस्य। एवम् अश्वप्रपदनीयम्। (एवं)[५]महश्च तत्पूरणं च महापूरणम्, (महापूरणं प्रयोजनमस्य=) महापूरणीयम्। [६]अङ्गस्य समापनं

परिपूर्णीकरणम् ,तत्प्रयोजनमस्य । एवं [७]श्रुतस्कन्धस्य समापनं [८]व्याकरणस्य समापनं=परिपूर्णीकरणं प्रयोजनमस्य ॥१२२॥

## स्वर्ग-स्वस्तिवाचनादिभ्यो[१] य-लुपौ ॥६।४।१२३॥

म० वृ०–स्वर्गादिभ्यः स्वस्तिवाचनादिभ्यश्च यथासङ्ख्यं तदस्य प्रयोजनार्थे 'यः प्रत्ययो लुप् च' भवतः । स्वर्गादिभ्यो यः– स्वर्ग्यम् , आयुष्यम् , काम्यम् ,धन्यम्[२] । स्वस्तिवाचनादिभ्य इकणो लुप्– स्वस्तिवाचनं प्रयोजनमस्य=स्वस्तिवाचनम् , पुण्याहवाचनम्[३] ॥१२३॥

अव०–स्वर्गादयः शब्दाः स्वस्तिवाचनादयश्च शब्दा वृद्धप्रयोगगम्याः । [१]स्वर्गश्च स्वस्तिवाचनं च, ते आदी यस्य गणस्य, तेभ्यः । स्वर्गेति सूत्रे वचनभेदेऽपि यथासंख्यं ज्ञातव्यम् , गणद्वयोपादानात् । [२]....................(यशस्यमित्यपि) । [३]शांतिवाचनम् , शुभवाचनमित्यपि ॥१२३॥

## समयात्प्राप्तः ॥६।४।१२४॥

म० वृ०–समयात्प्रथमान्तादस्येत्यर्थे 'इकण्' स्यात् , प्रथमान्तः स चेत्प्राप्तो भवति । समयः प्राप्तोऽस्य=सामयिकं [१]कार्यम् ॥१२४॥

अव०–[१]उपनतकालं प्राप्तकालमित्यर्थः ।१२४।

## [१]ऋत्वादिभ्योऽण् ॥६।४।१२५॥

म०वृ०–ऋतु इत्यादिभ्यः सोऽस्य प्राप्तेऽर्थे–'ऽण्' स्यात् । आर्त्तवं पुष्पफलम् , [२]उपवस्ता प्राप्तोऽस्य=औपवस्त्रम्, [३]प्राशित्रम् ॥१२५॥

अव०–[१]ऋत्वादयः प्रयोगगम्याः । [२]उपवस्ता उपोषित उच्यते । [३]उपोषितपारणके यद् भक्ष्यं द्रव्यं तद् औपवस्त्रम् ॥१२५॥

## कालाद् यः ॥६।४।१२६॥

म० वृ०–कालात् सोऽस्य प्राप्तेऽर्थे 'यः प्रत्ययः' स्यात् । कालः प्राप्तोऽस्य=काल्यस्तापसः, कालः प्राप्त एषाम् =] काल्याः मेघाः ॥१२६॥

## दीर्घः ॥६।४।१२७॥

म० वृ०–कालात्सोऽस्य प्राप्ते 'इकण् ' स्यात् योऽसौ प्रथमान्तः स चेद्दीर्घो भवति । दीर्घः कालोऽस्य=कालिकमृणम् , कालिकं वैरम्[१] ॥१२७॥

अव०–[१](एवम्)कालिकी सम्पत् । दीर्घः इति पृथग् योगविभागात् इकण् विधीयते, अधिकाराग········ ········(तत्वात्तस्य, अन्यथा) यविधाने हि 'कालाद्यो दीर्घश्च' इत्यकेमेव सूत्रं क्रियेत ॥ १२७ ॥

## आकालिकमिकश्चाद्यन्ते ॥६।४।१२८॥

म० वृ–आकालिकमिति इकान्तमिकणन्तं च निपात्यते, [१]आद्यन्ते=आदिरेव यद्यन्तो गम्यते । आकालिकोऽनध्यायः, [ अस्यार्थोऽयम्- ] पूर्वेद्युर्यस्मिन् काले तृतीये चतुर्थे वा [यामे] प्रवृत्तः पुनरपरेद्युरपि आ तस्मात् कालाद् भवन् आकालिकोऽनध्याय उच्यते । [स्त्रियामिकेकणोर्विशेषः–] आकालिका आकालिकी वा वृष्टिः, तथा आकालिका आकालिकी वा विद्युत् । [३]एवं द्वेधाप्यादिरेवान्तो भवति । आद्यन्ते इति किम् ? सर्वकालभाविनि मा भूत् ॥१२८॥

अव०–[१]आकालशब्दात् इकप्रत्ययः इकण् च भवतीत्यर्थः । विद्युत्पातरक्तेश्चावादिकं (?) । [२]आदिश्चासावन्तश्च आद्यन्तः, तस्मिन् । आदिश्चासावन्तश्च आद्यन्त इति कर्मधारय एव कर्त्तव्यः, न तु आदिश्चान्तश्च इति द्वन्द्वः । द्वन्द्वनिवृत्त्यर्थमेव निपातनं विहितमस्ति इत्यर्थः । 'आकालिकमिक०' (६।४।१२८) इति सूत्रे विशेषोऽयं लिख्यते,– निपातनस्येष्टविषयत्वात् समानकाल इति शब्दस्य आकाल इति आदेशो विधीयते, आद्यन्त इत्यत्र आदिश्चान्तश्च इति द्वन्द्वसमासः कर्त्तव्यः, स च द्वन्द्वप्रकृतिविशेषणं भवति,तथाहि– आद्यन्तयोर्वर्त्तमानात् समानकालशब्दात् प्रथमान्तात् अस्येति षष्ठ्यर्थे इकेकणौ निपात्येते,समानकालशब्दस्य चाकालदेशः । समानः

कालो ययोराद्यन्तयोस्तौ । समानकालावाद्यन्तौ ), समानकालावाद्यन्तावस्य इति वाक्ये आकालिकोऽनध्यायः । समानकालता च आद्यन्तयोः पूर्ववत् ज्ञातव्या । एवमाकालिका आकालिकी वा विद्युत् । कालाद् आ=आकालम्, 'पर्यपाङ्०' (३।१।३२) इति समासः, ततः प्रथमा, अथवा क्रियाविशेषणमिदम्। आकालं भवति इति वाक्यम्, आकालिकोऽनध्याय इत्युदाहरणम्। कथमादिरेवान्तो भवति ? उच्यते, यस्मिन् काले यत् प्रवृत्तमनाध्यायादि तस्मिन्नेव काले प्रत्यावृत्ते यदि तत् उपरमेत । यदि वा यस्मिन्नेव काले क्षणादौ विद्युदादेर्जन्म यदि तस्मिन्नेव काले विनश्येत, आत्मलाभकालादूर्ध्वं न तिष्ठेदित्यर्थः । आजन्मकालमेव भवन्ती जन्मान्तरविनाशिनी=अव्यवधाने विनश्वरा ऊर्ध्वमननुवर्त्तमाना आकालिका आकालिकी वा विद्युदियमुच्यते इत्यक्षरार्थे [3]एवं द्वेधाप्याद्विरेवान्त इति सम्बन्धनीयम् ॥ १२८ ॥

## त्रिंशद्विंशतेर्डकोऽसंज्ञायामार्हदर्थे[1] ॥६।४।१२९॥

म० वृ०–त्रिंशद्विंशतिभ्यामा अर्हदर्थात् योऽर्थो वक्ष्यते तस्मिन् 'डकः' स्यादसंज्ञाविषये=चेत् प्रत्ययान्तं कस्यचित् संज्ञा न भवति । त्रिंशता क्रीतं=त्रिंशकम्, [विंशत्या क्रीतं=] विंशकम्,[2] त्रिंशतमर्हति=त्रिंशकः, [विंशतिमर्हति=] विंशकः । असंज्ञायामिति किम् ? त्रिंशत्कम् ॥१२९॥

अव०–'अर्हश्चासौ अर्थश्च अर्हदर्थः, अर्हदर्थात् आ=आर्हदर्थम्, तस्मिन्, 'तमर्हति' (६।४।१७७) इति सूत्रं यावत् । वक्ष्यमाण–'सङ्ख्याडतेः०' इति विहितकप्रत्ययापवादोऽयं डकः । [2]'त्रिंशतेस्तेर्डिति' (७।४।६७) इति सूत्रेण तिकारस्य लोपः ।१२९।

## सङ्ख्याडतेश्चाशत्तिष्टेः कः ॥६।४।१३०॥

म० वृ०–शदन्त– त्यन्त– ष्टयन्तवर्जितसङ्ख्याशब्दात् डतिप्रत्ययान्ताच्च शब्दात् त्रिंशद्विंशतिभ्यां च आर्हदर्थे 'कः' स्यात् । इकणोऽपवादः । सङ्ख्या,– द्वाभ्यां क्रीतं=द्विकम्, [त्रिभिः क्रीतं=] त्रिकम्, पञ्चकम्, बहुकम्, [1]गणकम्, [2]यावत्कम्, [तावत्कम्] अध्यर्द्धकम्[3] । डति,– कतिभिः क्रीतं=कतिकम्, [त्रिंशता क्रीतं=] त्रिंशत्कम्[4], विंशतिकम्[5] । अशत्तिष्टेरिति किम् ? चात्वारिंशत्कम्, पाञ्चाशत्कम्, साप्ततिकम्, षाष्टिकम्, [ नावतिकम्, आशीतिकम् ] ॥ १३० ॥

अव०–[1]'बहुगणं भेदे' (१।१।४०) इति सूत्रे बहुगणशब्दौ सङ्ख्यासंज्ञौ, बहुभिः गणैः क्रीतम् । [2]'यावत्कम्', 'यत्तदेतदो डावादिः' (७।१।१४९) इति अतुः, स च डावादिः । 'यावत्कम्' इत्यत्र 'डत्यतु सङ्ख्यावत्' (१।१।३९) इत्यनेन संख्या संज्ञा । [3]'अध्यर्द्धकम्', अत्र 'कसमासेऽध्यर्द्धः' (१।१।४१) इति सङ्ख्या संज्ञा, अध्यर्द्धेन क्रीतम् । [4]त्रिंशन्मानमस्य त्रिंशत्कम्, [5]विंशतिर्मानमस्य विंशतिकम्, 'सङ्ख्याडते०' इति कप्रत्ययः, वैद्यशास्त्रयोः कयोश्चित् त्रिंशत्कं विंशतिकं नाम विद्यते । अशत्तिष्टेरिति प्रतिषेधे प्राप्ते सूत्रमध्ये डतित्रिंशद्विंशतीनां ग्रहणं कृतम् ॥ १३० ॥

## शतात्केवलादतस्मिन्येकौ ॥६।४।१३१॥

म० वृ०–आर्हदर्थे केवलाच्छतशब्दाद् 'यइकौ' [ कप्रत्ययापवादौ ] भवतः, अतस्मिन्=स चेदर्थः प्रकृत्यर्थाद्वस्तुतः [परमार्थवृत्त्या] अभिन्नो न स्यात् । शतेन क्रीतं=शत्यम् [य], शतिकम् [इक] । शतमर्हति=शत्यः [य],शतिकः [इकः] । शतं वर्षाणि मानमस्य पुरुषस्य=शत्यः, शतिकः [पुरुष इत्यर्थः] । केवलादिति किम् ? [1]द्विशतकम् । अतस्मिन्निति किम् ? शतं मानमस्य=शतकं स्तोत्रम्, [2]शतकं निदानम् ॥ १३१ ॥

अव०–'द्विशतकम्', अत्र द्वाभ्यामुत्तरं शुत्तरम्, शुत्तरं शतं=द्विशतम्, द्विशतेन क्रीतं=द्विशतकम्, 'सङ्ख्याडते०' (६।४।८०) इत्यस्य प्राप्तिः, परं परत्वात्कप्रत्यय एव । [2]शतकं निदानं वैद्यकशास्त्रविशेषः । शतमध्याया मानमस्य निदानस्य वैद्यशास्त्रविशेषस्य–'सङ्ख्याडते०'(६।४।१३०) इति कः । अत्रो-

दाहरणे प्रकृत्यर्थ एव श्लोकाध्यायशतं प्रत्ययान्तेन उच्यते। अन्यस्मिंस्तु शते भवत्येव,– शतेन क्रीतं शाकटशतं=शत्यम्, शतिकम् ॥ १३१ ॥

## वातोरिकः ॥६।४।१३२॥

म० वृ०–अत्यन्तसङ्ख्याया आर्हदर्थे 'इक-प्रत्ययो वा'स्यात्। [1]यावतिकम्, [2]यावत्कम् ।१३२।

अव०–[1]'यावद्भिः क्रीतं=यावतिकम्, अत्र इकः, 'ऋवर्णोवर्ण०' (७।४।७१) इति इक इकार-लोपः प्राप्नोति, परमिकविधानसामर्थ्यात् न लोपः। [2]'यावत्कम्', अत्र तु 'सङ्ख्याडतेः०' (६।४।१३०) इति कः ॥१३२॥

## कार्षापणादिकट् प्रतिश्चास्य वा ॥६।४।१३३॥

म० वृ०–कार्षापणादार्हदर्थे 'इकट्' स्यात्, अस्य च कार्षापणस्य 'प्रति' इत्यादेशो वा स्यात्। कार्षापणिकम्, कार्षापणिकी ; प्रतिकम्, प्रतिकी । चकार आदेशस्य प्रत्ययसंनियोगशिष्टत्वार्थः । अत एव द्विगोर्लुपि न प्रत्यादेशः,– [1]द्विकार्षापणम्, अध्यर्द्धकार्षापणम् ॥ १३३ ॥

अव०–[1]कर्षापण एव कार्षापणम्, स्वार्थेऽण्, द्वाभ्यां कार्षापणाभ्यां क्रीतं– 'कार्षापणादिकट्०' इत्यनेन इकट्, ['सुवर्णकार्षापणाद्' (६।४।१४३) इत्यनेन इकट्] लुप्यते। लुपि कृतायां न प्रति आदेशः ॥ १३३ ॥

## अर्द्धात्पल-कंस-कर्षात् ॥६।४।१३४॥

म० वृ०–अर्द्धशब्दपूर्वात् पलाद्यन्तादार्हदर्थे 'इकट्' स्यात्। [1]अर्द्धपलिकम्, [2]अर्द्धकंसिकम्, [3]अर्द्ध-कर्षिकम् ॥ १३४ ॥

अव०–[1]अर्द्धं पलस्य=अर्द्धपलम्, [2]अर्द्धं कंसस्य [3]अर्द्धं कर्षस्य, 'समेंऽशेऽर्द्धं नवा' (३।१।५४) इत्यनेन अत्र समासोऽयम्, ततोऽर्द्धपलेन क्रीतमर्द्ध-पलिकम्। एवमग्रेऽपि । अर्द्धपलिकी, अर्द्धकंसिकी, अर्द्धकर्षिकी इति स्त्रियाम् ॥१३४॥

## कंसा-ऽर्द्धात् ॥६।४।१३५॥

म० वृ०–कंस-अर्द्धाभ्यामार्हदर्थे 'इकट्' स्यात् । कंसिकम्, आर्द्धिकम् [कंसिकी, आर्द्धिकी] ॥ १३५ ॥

## सहस्र-शतमानादण् ॥६।४।१३६॥

म० वृ०–सहस्र-शतमानाभ्यामार्हदर्थे–'ऽण्' स्यात्। [1]केकणोरपवादः। सहस्रेण क्रीतं=साहस्रः, शतमानेन क्रीतं शातमानः ॥१३६॥

अव०–[1]'सङ्ख्याडतेः०' (६।४।१३०) इति कस्य, 'मूल्यैः क्रीते' (६।४।१५०) इतीकणः। वक्ष्यमाण–'वसनात्' (६।४।१३८) इति सूत्रे सहस्रशतमानग्रहणे कृतेऽञ्विधाने साहस्रं शातमानमिति सिद्ध्यति, (तथापि) यद् 'वसनात्' (६।४।१३८) इत्यत्र सहस्रशतमानग्रहणं न कृतं (किन्तु) 'सहस्रशतमानादण्' (६।४।१३६) इति सूत्रे अण्विधानं कृतम् तत् वक्ष्यमाण–'नवाणः' (६।४।१४२) इति सूत्रे कार्यार्थम् । 'नवाणः' इति सूत्रेण विकल्पेन अणो लोपः । द्विशातमानं द्विशतमानम् इति प्रयोगौ 'नवाण.'(६।४।१४२) सूत्रे साधितौ स्तः। अञि कृते हि 'अनाम्न्यद्विः०' (६।४।१४१) इत्यनेन अञो लोपो नित्यं भवति, द्विशातमानमिति न सिद्ध्यति इति कारणे 'सहस्रशत०' (६।४।१३६) इति पृथग् योगः कृतः ॥१३६॥

## शूर्पाद्वाऽञ् ॥६।४।१३७॥

म० वृ०–शूर्पादार्हदर्थे–'ऽञ् वा' स्यात्। शौर्पम्, शौर्पिकम् ॥१३७॥

अव०–इकणोऽपवादः। 'मूल्यैः क्रीते' (६।४।१५०) इतीकण् ॥१३७॥

## वसनात् ॥६।४।१३८॥

म० वृ०–वसनादार्हदर्थे–'ऽञ्' स्यात्। वसनेन क्रीतं=वासनम् ॥१३८॥

## विंशतिकात् ॥६।४।१३९॥

म० वृ०–विंशतिकशब्दादार्हदर्थे–'ऽञ्' स्यात् । वैंशतिकम्[१] ॥१३९॥

अव०–[१]विंशतिर्मानमस्य=विंशतिकम्, 'सङ्ख्याडतेः०' (६।४।१३०) इति कप्रत्ययः, विंशतिकेन क्रीतं=वैंशतिकम्। 'विंशतिकात्' (६।४।१३९) इति योगविभाग उत्तरार्थः ॥१३९॥

## द्विगोरीनः ॥६।४।१४०॥

म० वृ०–विंशतिकाद् द्विगोरार्हदर्थे 'ईनः' स्यात्। द्विविंशतिकीनम्[१] ॥१४०॥

अव०–[१]विंशतिर्मानमस्य– 'सङ्ख्याडतेः०' (६।४।१३०) इति कः, द्वाभ्यां विंशतिकाभ्यां क्रीतं=द्विविंशतिकीनम्, 'द्विगोरीनः' (६।४।१४०), अत्र वक्ष्यमाण–'अनाम्न्य०' (६।४।१४१) इति ईनस्य लोपः प्राप्नोति, परमीनविधानसामर्थ्यान्न लुप् क्रियते। एवं त्रिविंशतिकीनम्, अध्यर्द्धविंशतिकीनम्, अर्द्धपञ्चमविंशतिकीनम्। त्रिभिर्विंशतिकैः क्रीतम्, अध्यर्द्धेन विंशतिकेन क्रीतम्, अर्द्धपञ्चमैर्विंशतिकैः क्रीतमिति वाक्यानि ॥१४०॥

## अनाम्न्यद्विः प्लुप् ॥६।४।१४१॥

म० वृ०–द्विगोः समासादार्हदर्थे उत्पन्नस्य प्रत्ययस्य 'पित् लुप् सकृत्' [एकवारं] स्यात्, न तु द्विः, अनाम्नि=प्रत्ययान्तं चेत् कस्यचिन्नाम न भवति। [२]द्विकंसम्, [३]अध्यर्द्धकंसम्, [४]द्विसूर्पम्, [५]अर्द्धपञ्चमसूर्पम्। अद्विरिति किम्? [६]द्विशौर्पिकम्। अनाम्नीति किम्? [७]पाञ्चलोहितिकम्, [८]पाञ्चकलायिकम्। लुपः पित्त्वात् पञ्चवर्गः [९] ॥१४१॥

अव०–[१]प् चासौ लुप् च, प्–पकारानुबन्धो लुप् वा प्लुप्। [२]द्वाभ्यां कंसाभ्यां क्रीतं द्विकंसम्, अथवा द्वयोः कंसयोः समाहारः द्विकंसी, 'द्विगोः समाहारात्' (२।४।२२) ङी, द्विकंस्या क्रीतं=द्विकंसम्, 'कंसार्द्धात्' (६।४।१३५) इकट्, 'ङ्यादेर्गौणस्य०' (२।४।९५) इत्यनेन ङीनिवृत्तिः, 'अनाम्न्य०' इति इकट् लुप्यते। एवं त्रिकंसम्। [३]तथा 'अध्यर्द्धकंसम्', अत्र 'कसमासेऽध्यर्द्धः' (१।१।४१) इत्यनेन अध्यर्द्धशब्दः सङ्ख्यावद्भवति, ततः सङ्ख्यावद्भावात् 'सङ्ख्यासमाहारे द्विगुश्चानाम्न्ययम्' (३।१।९९) इत्यनेन द्विगुसमासो भवति, अध्यर्द्धकंसेन क्रीतं– 'कंसार्द्धात्' (६।४।१३५) इकट्, 'अनाम्न्य०' इति इकट्लुप्। एवमर्द्धपञ्चमकंसम्, अत्र 'अर्द्धपूर्वपदः पूरणः' (१।१।४२) इत्यनेन सङ्ख्यासंज्ञा। [४]'द्विसूर्पम्', 'सूर्पाद्वाञ्' (६।४।१३७), 'अनाम्न्य०' इति लुप्। [५]तथा अध्यर्द्धसूर्पम्, अर्द्धपञ्चमसूर्पम्; अत्र अध्यर्द्धसूर्पेण क्रीनमर्द्धपञ्चमसूर्पेण क्रीतम्,–'सूर्पाद्वाञ्' इत्यनेन विकल्पेन अञ्, पक्षे 'मूल्यैः क्रीते' (६।४।१५०) इत्यनेन इकण्, अञिकणोः 'अनाम्न्य०' इति लुप् कर्त्तव्यः। [६]द्वाभ्यां सूर्पाभ्यां क्रीतं=द्विसूर्पम्, 'सूर्पाद्वाञ्'(६।४।१३७),'अनाम्न्य'० इति अञ् लुप्यते, द्विसूर्पेण क्रीतं– 'मूल्यैः क्रीते' (६।४।१५०) इकण्, अस्य इकणो लुप् न भवति, अद्विरिति वचनात्, 'मानसंवत्सर०' (७।४।१९) इति वृद्धिः। [७]रोहितशब्दः, 'श्येतैतहरितभरतरोहिताद्वर्णात्तो नश्च' (२।४।३६) इत्यनेन ङीप्रत्ययः, तकारस्य नकारः, 'ऋरलृलं कृपो०' (२।३।९९) रकारस्य लः, लोहिनी इति शब्दो निष्पन्नः, ततः पञ्चलोहिन्यो मानमस्य इति वाक्ये 'मानम्' (६।४।१६९) इति सूत्रेण इकण्, 'जातिश्च णितद्धितयस्वरे' (३।२।५१) इत्यनेन पुंवद्भावः, ङीनकारौ निवृत्तौ, लोहित इति शब्दो जातः, ततो वृद्धिः, पाञ्चलोहितिकम् इति सिद्धम्। [८]कलाया नाम मालवदेशे धान्यपरिमाणभेदः, पञ्चकलायाः परिमाणमस्य– 'मानम्' (६।४।१६९) इकण्, पञ्चकलायानां यावत्परिमाणं तन्मात्रस्य परिमाणविशेषस्य इदं नाम पाञ्चकलायिकमिति। एवं पाञ्चलोहितिकमपि परिमाणविशेषो मालवे। अत एव संज्ञात्वादेव 'मानसंवत्सर०' इत्यनेन लोहितकलाययोर्न वृद्धिर्जाता।

[१]पञ्चभिर्गार्गीभिः ॐ क्रीतः- 'मूल्यैः क्रीते' इकण्, 'अनाम्न्य०' इति लुप्, गर्गस्यापत्यं वृद्धं स्त्री-'गर्गादेर्यञ्' (६।१।४२), 'यञो डायन्०' (२।४।६७) इति ङी, 'व्यञ्जनात्तद्धित०' (२।४।८८) यञस् लुप्यते, गार्गी, ततो ङी, गार्ग्या अपत्यानि 'यञिञः' (६।१। ५४) गार्ग्यायणी। ततः पञ्चभिः गार्गीभिः पञ्चभिर्गार्ग्यायणीभिः क्रीतः'मूल्यैः०'इकण्, 'अनाम्न्य०' इति इकण् लुप्यते, लुप् पित् भवति, लुपः पित्त्वात् 'क्यङ्मानिपित्तद्धिते' (३।२।५०) इति सूत्रेण पुंवद्भावः, ङी निवृत्तः यः ततो 'यञञोऽश्यापर्ण०'(६। १।१२६) इत्यनेन यञ् लुप्यते, यञि निवृत्ते आयनणपि निवृत्तम् पञ्चगर्गं इति सिद्धम्। 'अनाम्न्य०' इति सूत्रेऽयं विशेषः- सङ्ख्यान्तद्विगोर्लुपं नेच्छन्त्येके। द्वाभ्यां षष्टिभ्यां क्रीतं = द्विषाष्टिकम्, त्रिभिस्त्रिसृभिर्वा षष्टिभिः क्रीतं=त्रिषाष्टिकम्, इकण्।१४१।

## नवाऽणः ॥६।४।१४२॥

**म० वृ०**—द्विगोर्विहितस्याणः 'विल्लुप् वा' स्यादार्हदर्थे, न तु द्विः। द्विसहस्रम्, [१] द्विसाहस्रम्; [अध्यर्द्धेण सहस्रेण क्रीतम्]अध्यर्द्धसहस्रम् अध्यर्द्धसाहस्रम् [२]; द्विशतमानम्, [३] द्विशातमानम्। अण इति किम्? [४]द्विद्रोणः ॥१४२॥

---

**अव०**-[१]द्वाभ्यां सहस्राभ्यां क्रीतम्, 'सहस्रशतमानादण्'(६।४।१३६)। [२]एवमर्द्धषष्ठसाहस्रम्। [३]द्वाभ्यां शतमानाभ्यां क्रीतम्, 'सहस्रशतमानादण्' (६।४।१३६)। सर्वोदाहरणेषु 'मानसंवत्सर०'(७।४। १९) इत्युत्तरपदवृद्धिः। [४]द्वौ द्रोणौ पचति चैत्रः, 'तं पचति द्रोणाद्वाञ्' (६।४।१६१) इति अञ्, 'अनाम्न्य०' (६।४।१४१) इति अञ् लुप्यते॥१४२॥

## सुवर्ण-कार्षापणात् ॥६।४।१४३॥

**म० वृ०**—सुवर्णान्तात् कार्षापणान्ताच्च द्विगोः परस्य प्रत्ययस्य 'लुप्' स्याद्वाऽऽर्हदर्थे, न तु द्विः। [द्वाभ्यां सुवर्णाभ्यां क्रीतम्=] द्विसुवर्णम्, द्विसौवर्णिकम्[१]; [२]द्विकार्षापणम्, द्विकार्षापणिकम्, द्विप्रतिकम् ॥१४३॥

---

**अव०**-[१]द्वाभ्यां सुवर्णाभ्यां क्रीतम्, 'मूल्यैः क्रीते' (६।४।१५०) इकण्। [२]कर्षापण एव कार्षापणम्, स्वार्थेऽण्, द्वाभ्यां कार्षापणाभ्यां क्रीतम्, 'कार्षापणादिकट् प्रति०' (६।४।१३३) इति इकट् प्रत्यादेशश्च ॥१४३॥

## द्वि-त्रि-बहोर्निष्क-विस्तात् ॥६।४।१४४॥

**म० वृ०**—द्वित्रिबहुभ्यः परौ यौ निष्कविस्तशब्दौ तदन्ताद् द्विगोर्विहितस्य प्रत्ययस्य'नवा लुप्', न तु द्विः। द्विनिष्कम्, द्विनैष्किकम्; त्रिनिष्कम्, त्रिनैष्किकम्; बहुनिष्कम्, बहुनैष्किकम्; एवं द्विविस्तम्, द्विवैस्तिकम् इत्यादि त्रिविस्तम्, त्रिवैस्तिकम्; बहुविस्तम्, बहुवैस्तिकम् ]॥१४४॥

## शताद् यः ॥६।४।१४५॥

**म० वृ०**—शतान्ताद् द्विगोरार्हदर्थे 'यः' स्यात्पक्षे सङ्ख्यालक्षणः कः ['सङ्ख्याडतेः०' (६।४।१३०) इत्यनेन कप्रत्ययः], तस्य लुप्, यप्रत्ययस्य तु विधानसामर्थ्यान्न लुप् [यप्रत्ययकरणबलान्न लुप्]। [१]द्विशत्यम्, [२]द्विशतम् ॥१४५॥

---

**अव०**-[१]द्वाभ्यां शताभ्यां क्रीतम्, यः। [२]अन्यत्र 'सङ्ख्याड०' (६।४।१३०) कः, 'अनाम्न्य०' (६।४।१४१) इति को लुप्यते। 'शताद्यः' इति सूत्रे (एवम्) अध्यर्द्धशत्यम्, अध्यर्द्धशतम् ॥१४५॥

---

ॐ अत्र 'पञ्चभिर्गार्गीभिः क्रीतः' इत्यतः प्रारभ्य "पञ्चगर्गं इति सिद्धम्" इति यावत् वृत्तिस्थस्य 'पञ्चगर्गं' इत्यस्य सिद्धिः प्रदर्शिता, परमत्र पाठाशुद्धिः विद्यते। 'पञ्चगर्गं' इत्यस्य सिद्धिरेवम्—

'गर्गस्यापत्यं वृद्धं स्त्री' इति वाक्ये 'गर्गादेर्यञ्' (६।१।४२) इति यञ्, 'यञो डायन्०' (२।४।६७) इति ङी, व्यञ्जनात्तद्धितस्य' (२।४।८८) इत्यनेन यञो लुपि- गार्गी, डायन्पक्षे- गार्ग्यायणी, ततः 'पञ्चभिर्गार्गीभिर्गार्ग्यायणीभिर्वा क्रीतः' इति वाक्ये 'मूल्यैः क्रीते' (६।४।१५०) इत्यनेन इकण्, 'अनाम्न्य०' इति प्रकृतसूत्रेण इकण् लुप्यते, लुपः पित्त्वात् 'क्यङ्मानि०' (३।२।५०) इति पुंवद्भावः, ङीनिवृत्तिः, ङीनिवृत्तौ 'डायन्' इत्यस्यापि निवृत्तिः, एवं 'यञञो०' (६।१।१२६) इत्यनेन यञो लुपि पञ्चगर्गं इति।

## [1]शाणात् ॥६।४।१४६॥

म० वृ०–शाणान्ताद् द्विगोरार्हदर्थे 'यः' स्याद्वा, पक्षे इकण्, तस्य [ इकणः] लुप्, यस्य न लुप्[2]। पञ्चशाण्यम्[3], पञ्चशाणम्[4] ॥१४६॥

अव०–[1]शाणः कषे ॐ मानभेदे (च)। [2]यप्रत्ययस्य न लुप्, विधानसामर्थ्यात्। [3]यः। [4]'मूल्यैः क्रीते' (६।४।१५०) इकण्, 'अनाम्न्य०' (६।४।१४१) लुप्। पञ्चशाणम् इत्यस्याग्रे अध्यर्द्धशाण्यम्, अध्यर्द्धशाणम्, अर्द्धपञ्चमशाण्यम्, अर्धपञ्चमशाणम्; सर्वत्र 'मूल्यैः०' (६।४।१५०) इकण्, लोपश्च। योगविभाग उत्तरार्थः ॥१४६॥

## [1]द्वित्र्यादेर्या-ऽण् वा ॥६।४।१४७॥

म० वृ०–द्वि त्रि इत्येतत्पूर्वो यः शाणशब्दस्तदन्तात् द्विगोरार्हदर्थे 'य–अणौ' भवतः वा, पक्षे इकण्, तस्य लुप्, याणोर्न लुप् [ विधानबलात् ]। [2]द्विशाण्यम्, द्वैशाणम् [अण्], [3]द्विशाणम् [इकण्]। वाग्रहणमुत्तरत्र नवानिवृत्त्यर्थम् ॥१४७॥

अव०–[1]द्विश्च त्रिश्च=द्वित्री, द्वित्री आदी यस्य शब्दस्य स द्वित्र्यादिः, तस्मात्। [2]द्वाभ्यां शाणाभ्यां क्रीतं=द्विशाण्यम्, द्वैशाणम्; यः, अण्। [3]द्विशाणमित्यत्र 'मूल्यैः०' (६।४।१५०) इकण्, 'अनाम्न्य०' (६।४।१४१) इति इकण्लोपः। सर्वत्र सङ्ख्यान्तद्विगोः परतः प्रत्ययस्य 'अनाम्न्य०' (६।४।१४१) इत्यनेनैव लुप् कर्त्तव्यः। एवं त्रिशाण्यम्, त्रैशाणम्, त्रिशाणमिति रूपत्रयं भवति ॥१४७॥

## पण-पाद-माषाद् यः ॥६।४।१४८॥

म० वृ०–पणान्तपादान्तमाषान्ताद् द्विगोरार्हदर्थे 'यः' स्याद्। विधानसामर्थ्यान्न लुप्। [1]द्विपण्यम्, [2]द्विपाद्यम्, द्विमाष्यम् ॥ १४८ ॥

अव०–[1]द्वाभ्यां पणाभ्यां क्रीतं=द्विपण्यम्, एवं त्रिपण्यम्, अध्यर्धपण्यम्। [2]द्वाभ्यां पादाभ्यां क्रीतं द्विपाद्यम्, त्रिपाद्यम्। माषपणसाहचर्यात् पादशब्दोऽत्र परिमाणार्थः, न प्राण्यङ्गवाची। तेन 'हिमहतिकाषिये पद्' (३।२।९६)इत्यनेन पद् इत्यादेशो न भवति। 'हिमहति०' (३।२।९६) इति सूत्रे प्राण्यङ्गस्यैव पादशब्दस्य पद्भाव उक्तोऽस्ति। अथवा 'हिमहति०' (३।२।९६) इति सूत्रे केवलपादसम्बन्धिन्येव यप्रत्यये परे पद्भावोऽस्ति, अत्र तु द्विगुसमाससम्बन्धी यप्रत्ययः (इति) न पद्भावः। एतत्सर्वं 'हिमहति०'इति सूत्रे प्रागुक्तम्। पणः कार्षापणे लोहे, पादो मूलोऽश्वतुर्यांशाद्रिषुप्रत्यन्तपर्वते माषो माने धान्यभेदे मूर्षे (?) ॥१४८॥

## [1]खारी-काकणीभ्यः कच् ॥६।४।१४९॥

म० वृ०–खारी काकणी इत्यन्ताद् द्विगोर्बहुवचनात् केवलाभ्यां च खारीकाकणीभ्यामार्हदर्थे 'कच्'स्याद्। विधानबलान्न लुप्। द्विखारीकम्,[2] द्विकाकणीकम्[3]। केवलाभ्यां– खारीकम्, काकणीकम्। चकारो 'न कचि' (२।४।१०५) इति [ह्रस्वस्य] निषेधार्थः ॥१४९॥

अव०–[1]खार्यश्च काकण्यश्च, ताभ्यः। काकणी★ मानदण्डस्य पणस्य च तुरीयांशे। [2] द्वाभ्यां खारीभ्यां क्रीतं=द्विखारीकम्, एवं) त्रिखारीकम्, अध्यर्धखारीकम्, अध्यर्धया खार्या क्रीतम्। [3](एवम्) अधिकमर्धं यस्यां साऽध्यर्धा, अध्यर्धया काकण्या क्रीतम्– के अध्यर्धकाकणीकम् ॥१४९॥

## मूल्यैः क्रीते ॥६।४।१५०॥

म० वृ०–मूल्यवाचिनो निर्देशादेव तृतीयान्तात्क्रीतेऽर्थे 'यथाविहितमिकणादयः' स्युः। प्रस्थेन क्रीतं=प्रास्थिकम्, [1]साप्ततिकम् इत्यादि[2]। मूल्यैरिति किम्? मैत्रेण क्रीतम्। वृत्तौ सङ्ख्याविशेषानवगमाद् द्विवचनबहुवचनान्तान्न भवति,– प्रस्थाभ्यां प्रस्थैर्वा क्रीतम्। यत्र तु सङ्ख्याविशेषावगमे प्रमाणमस्ति तत्र भवत्येव,– द्वाभ्यां क्रीतं=द्विकम् ['सङ्ख-

ॐ तदुक्तं श्रीहैमलिङ्गानुशासनविवरणे– "शाणः कर्षचतुर्भागः, निकषे तु स्त्रीपुंसलिङ्गो वक्ष्यते"।

★ तदुक्तं श्रीहैमलिङ्गानुशासनविवरणे– "काकणिः मानदण्डपणयोस्तुर्यांशः"।

षाडते'० (६।४।१३०) कः] द्वाभ्यां प्रस्थाभ्यां क्रीतं=द्विप्रस्थम् । तथा मुद्गैः क्रीतं मौद्गिकम्[3] ।।१५०।।

अव०-[1]सप्तत्या क्रीतम् । [2]अशीत्या क्रीतमाशीतिकम् , एवं नैष्किकम् , पाणिकम् । तथा त्रिंशता क्रीतं त्रिंशकम् ,विंशत्या क्रीतम् (विंशतिकम् ), 'त्रिंशद्-विंशतेर्डकोऽसंज्ञा०'(६।४।१२९) इति डकः । द्विकं त्रिकमित्यत्र 'सङ्ख्याडतेः०' (६।४।१३०) इति कः । शत्यम्, शतिकम् ; अत्र 'शतात्केवलात्०'(६।४।१३१) इत्यनेन येकौ । आदिशब्दस्येमे प्रयोगाः । 'मूल्यैः०' इकण् , 'अनाम्न्य०' (६।४।१४१) इति लोपः । [3]एवं माषैः क्रीतं=माषिकम् । नह्येकेन मुद्गेन माषेण वा क्रयः सम्भवति ।।१५०।।

## तस्य वापे ।।६।४।१५१।।

म०वृ०-तस्येति षष्ठ्यन्ताद् [1]वापेऽर्थे 'यथाविधि इकणादयः' स्युः । प्रस्थस्य वापः=प्रास्थिकम्[2] ।१५१।

अव०-[1]उप्यतेऽस्मिन्निति वापः क्षेत्रमुच्यते । [2]एवं द्रौणिकम् ,मौद्गिकम् ,शतस्य वापः=शत्यम् ,शतिकम् , खारीकम् ,'खारीकाकणी०' (६।४।१४९) इति ।१५१।

## वात-पित्त-श्लेष्म-संनिपाताच्छमनकोपने ।। ६।४।१५२ ।।

म० वृ०-षष्ठ्यन्तेभ्यः वातादिभ्यः [1]शमने [2]कोपने चार्थे 'यथाविहितमिकण्' स्यात् । वातस्य शमनं कोपनं वा वातिकम् , पैत्तिकम् , श्लैष्मिकम् , सान्निपातिकम् ।।१५२।।

अव०-[1]शाम्यति येन तच्छमनम् । [2]कुप्यति येन तत् कोपनम् । ततो वातस्य शमनमित्यर्थे इकण् । पित्तस्य शमनं कोपनं वा । एवमन्यत्रापि । पथ्यमपथ्यं च द्रव्यादि वातिकपैत्तिकाद्यभिधेयमुच्यते वैद्यकशास्त्रे । प्रकरणात्=प्रस्तावात् शमने कोपने औषधादिविशेषप्रत्ययो मन्तव्यः ।।१५२।।

## हेतौ संयोगोत्पाते ।।६।४।१५३।।

म० वृ०-षष्ठ्यन्तान्नाम्नो हेतावर्थे यथाविहितं प्रत्ययः स्यात् , योऽसौ [1]हेतुः स [2]संयोग [3]उत्पातो वा भवति । [4]शत्यः, शतिकः, साहस्रः । उत्पातः,-[5]सोमग्रहणिको भूकम्पः, सौभिक्षिकः परिवेषः । [6]शत्यम् , शतिकम् । संयोगोत्पात इति किम् ? शतस्य हेतुश्चैत्रः ।।१५३।।

अव०-[1]हेतुर्निमित्तम् । [2]संयोगः सम्बन्धः । [3]उत्पातः प्राणिनां शुभाशुभसूचकः पृथिव्यप्तेजोवाय्वाकाशरूपपञ्चमहाभूतपरिणाम उच्यते । [4]शतस्य हेतुरीश्वरसंयोगः शत्यः, शतिकः, (एवम्) साहस्रः । [5]सोमग्रहणस्य हेतुरुत्पातः सोमग्रहणिकः । [6]शतस्य हेतुर्दक्षिणाक्षिस्पन्दनमिति वाक्ये शत्यम् , शतिकम् , (एवं) साहस्रम् , 'सहस्रशतमानादण्' (६।४।१३६) ।।१५३।।

## पुत्राद् येयौ ।।६।४।१५४।।

म० वृ०-[ षष्ठ्यन्तात् ] पुत्रान्तात् हेतौ 'य-ईयौ' भवतः । हेतुश्चेत्संयोग उत्पातो वा भवति । [1]पुत्र्यः, पुत्रीयः ।।१५४।।

अव०-[1]पुत्रस्य हेतुः संयोग उत्पातो वा इति वाक्ये पुत्र्यः, पुत्रीयः ।।१५४।।

## [1]द्विस्वरब्रह्मवर्चसाद् योऽसङ्ख्यापरिमाणाश्वादेः ।।६।४।१५५।।

म०वृ०-सङ्ख्यापरिमाणाश्वादिवर्जितात् द्विस्वरान्नाम्नो ब्रह्मवर्चसात् [ब्रह्मवर्चसशब्दाच्च] षष्ठ्यन्ताद् हेतावर्थे यः स्यात्[2] । [3]इकणादीनामपवादः । [4]धन्यः, [5]आयुष्यः, [6]वात्या विद्युत् , ब्रह्मवर्चस्य[7] । 卐कथं गोर्हेतुः संयोग उत्पातो वा गव्यः ? 'गोः स्वरे यः' (६।१।२७) इति भविष्यति । द्विस्वरेति किम् ? [8]वैजयिकः, आभ्युदयिकः । असंख्यापरिमाणाश्वादेरिति किम् ? सङ्ख्या,-पञ्चकः, [9]परिमाण,-प्रस्थिकः, खारीकः ।।१५५।।

卐 गोशब्दस्य द्विस्वरत्वाभावादाह-'कथ'-मित्यादि ।

"ऊर्ध्वं मानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः ।१।
इति संख्यापरिमाणयोर्विशेषः । [१०]अश्वादि,-आश्विकः ॥१५५॥

अव०–[१]द्वौ स्वरौ यत्र स द्विस्वरः, ब्रह्मणो वर्चो=ब्रह्मवर्चः, 'ब्रह्महस्तिराजपल्याद् वर्चसः' (७।३।८३) इत्यत्, ब्रह्मवर्चसः, द्विस्वरश्च ब्रह्मवर्चसश्च । [२]स चेद् हेतुः संयोग उत्पातो वा भवति । [३]आदि-शब्दात् 'कंसार्द्धात्' (६।४।१३५) । [४]धनस्य हेतुः संयोग उत्पातो वा धन्यः । एवं यशसो हेतुः संयोग उत्पातो वा यशस्यः । [५]आयुषो हेतुः संयोग उत्पातो वा आयुष्यः । [६]वातस्य हेतुः संयोग उत्पातो वा वात्या । [७]ब्रह्मवर्चसस्य हेतुः संयोग उत्पातो वा । [८]विजयस्य हेतुः संयोग उत्पातो वा, 'हेतौ संयोगोत्पाते' (६।४।१५३) इतीकण् । एवमाभ्युदयिकः । [९]पञ्चानां हेतुः संयोग उत्पातो वा पञ्चकः, एवं सप्तकः, 'संख्याडतेः०' (६।४।१३०) इति कप्रत्ययः । [१०]अश्व, गण, वसु, वस्त्र, ऊर्णा, उमा, भङ्गा, वर्षा, अश्मन् इत्यश्वादिगणः ॥१५५॥

## पृथिवी-सर्वभूमेरीशज्ञातयोश्चाञ् ॥६।४।१५६॥

म० वृ०–पृथिवीसर्वभूमिभ्यामीशज्ञातार्थयोः पृथिवीसर्वभूमिविषयहेतौ संयोगोत्पाते चार्थे–'अञ्' स्यात् । पृथिव्या ईश=पार्थिवः, सर्वभूमेरीशः=[१]सार्वभौमः; [२]पृथिव्या ज्ञातः=[३]पार्थिवः, एवं सार्वभौमः । तथा पृथिव्या हेतुः संयोग उत्पातो वा पार्थिवः, एवं सार्वभौमः ॥१५६॥

अव०–[१]सर्वा चासौ भूमिश्च सर्वभूमिः, 'अनुशतिकादीनाम्' (७।४।२७) इति उभयपदवृद्धिः । [२]पृथिव्या इत्यत्र कर्त्तरि षष्ठी, सम्बन्धविवक्षायां वा । [३]ज्ञायते इति ज्ञातः, 'ज्ञानेच्छार्चा०' (५।२।९२) इति क्तः ॥१५६॥

## लोक-सर्वलोकाद् ज्ञाते ॥६।४।१५७॥

म० वृ०–लोकसर्वलोकाभ्यां षष्ठ्यन्ताभ्यां ज्ञातेऽर्थे 'इकण्' [ यथाविहितं ] स्यात् । लोकस्य [ कर्त्तरि षष्ठीयं सम्बन्धे वा ] ज्ञातो=लौकिकः, सार्वलौकिकः ॥१५७॥

## तदत्रास्मै वा वृद्ध्याय-लाभोपदा-शुल्कं देयम् ॥६।४।१५८॥

म० वृ०–तदिति प्रथमान्तादत्रेति सप्तम्यर्थे अस्मै इति चतुर्थ्यर्थे वा 'यथोक्तः [ यथाविहितं ] प्रत्ययः' स्यात्, यत्प्रथमान्तं तच्चेत् [१]वृद्धिरायो[२] [३]लाभ [४]उपदा शुल्कं[५] वा देयं स्यात् । पञ्चकं शतं (पञ्चको) ग्रामो वेत्यादि ॥ एवं शत्यमित्याद्यपि ॥१५८॥

अव०–[१]अधमर्णेन ऋणदात्रा उत्तमर्णाय द्रव्यपतये गृहीतधनातिरिक्तं देयं वृद्धिः, व्याजः कलान्तरमिति लोकरूढिः❀ । [२]ग्रामादिषु स्वामिग्राह्यो भाग आय उच्यते । एति स्वामिगृहमित्यायः, 'तन्व्यधीण्०' (५।१।६४) । [३]पटादिवस्तूनां गृहीतमूल्यातिरिक्तं प्राप्तं द्रव्यं लाभः । [४]उपदा लञ्चः । [५]वणिजां रक्षानिर्वेशः (राजभागः शुल्कम्) । (निर्विश्यते) उपभुज्यतेऽनेन वणिग्भिरिति निर्वेशो भाटकम् । भूम्यादीनां व्यवहारिभिर्मण्डपिकायां वस्तुदाणं नृपाय यद्दीयते तत् शुल्कमुच्यते । पञ्चास्मिन् शते वृद्धिर्व्याजः पञ्चकं शतम् । पञ्चास्मिन् ग्रामे आयः पञ्चको ग्रामः । पञ्चास्मिन् पटे लाभः पञ्चकः पटः । पञ्चास्मिन् व्यवहारे ऊवाटकरूपे उपदा लञ्चः पञ्चको व्यवहारः । पञ्चास्मिन् शते शुल्कं दाणद्रव्यं पञ्चकं शतम् । एवं शतमस्मिन् वृद्धिरायो लाभ उपदा शुल्कं वा देयमिति वाक्ये शत्यम्, शतिकम् । एवं साहस्रम्, प्रास्थिकम् । स्यात्र आचि……त्रयोपि……'शतात् केवल०' (६।४।१३१) इति येकौ, 'सहस्रशत०' (६।४।१३६) इत्यण् (?) । अथ अस्मै अर्थे इत्थं प्रयोगो लिख्यते,– पञ्चास्मै चैत्राय वृद्धिरायो लाभ उपदा

❀ तदुक्तं श्रीहैमलिङ्गानुशासनविवरणे–"वृद्धिरानन्दवर्धने । स्त्रियां कलान्तरेऽपि स्याद् वृद्धिनामनि चौषधे" । तदीयदुर्गपदप्रबोध एवम्—"कलान्तरे इति लोके 'व्याज' इति प्रसिद्धे" ।

शुल्कं वा देयमिति वाक्ये पञ्चकश्चैत्रः, एवं शत्यः, शतिकः, साहस्रः, प्रास्थिकः, द्रौणिकः ॥१५८॥

## [1]पूरणार्द्धादिकः ॥६।४।१५९॥

म० वृ०–पूरणप्रत्ययान्तादर्द्धशब्दाच्च तदिति प्रथमान्तादस्मिन्नस्मै वा दीयते इत्यर्थयोरिकः स्यात्, प्रथमान्तं चेद् वृद्ध्यादि भवति। [ पूरणप्रत्ययान्तेभ्यः पूर्वेण इकण् अर्द्धशब्दाच्च 'कंसार्द्धात्' (६।४।१३५) इतीकट् प्राप्त इत्ययं योगः ] इकणिकटोरपवादः। [2]द्वितीयिकः, पञ्चमिकः, अर्द्धिकः, अर्द्धिका ॥१५९॥

---

अव०–[1]पूरणं चार्द्धश्च=पूरणार्द्धः। अर्द्धः खण्डे अर्द्ध समांशे इति..........(?)। अर्धशब्दोऽत्र रूपकार्द्धे रूढः। [2]द्वितीयमस्मिन्नस्मै वा वृद्धिरायो लाभ उपदा शुल्कं वा देयं द्वितीयिकः। एवं तृतीयिकः पञ्चमिकः षष्ठिकः ॥१५९॥

## भागाद्येकौ ॥६।४।१६०॥

म० वृ०–भागशब्दात्तदस्मिन्नस्मै वा वृद्ध्याद्यन्यतमं देयमिति विषये 'य-इकौ' भवतः। इकणोऽपवादौ। [1]भाग्यः, भागिका स्त्री ॥१६०॥

---

अव०–[1]भागोऽस्मिन्नस्मै वा वृद्ध्यादीनामन्यतमं देयमिति भाग्यः, भागिकः। भागशब्दोऽपि रूपकार्द्धस्य वाचकः। "भागो रूपार्धकभाग्यैकदेशयोः" ॥१६०॥

## तं पचति द्रोणाद्वाऽञ् ॥६।४।१६१॥

म० वृ०–तमिति द्वितीयान्ताद् द्रोणशब्दात् पचत्यर्थे–'ऽञ् [1]वा' स्यात्। द्रोणं पचति=द्रौणः,[2] द्रौणिकः;[3] द्रौणी, द्रौणिकी स्थाली गृहिणी वा। द्वौ द्रोणौ पचति=द्विद्रोणी[4] ॥१६१॥

---

अव०–[1]पक्षे अनेनैव इकण् कार्यः। [2]अञ्। [3]इकण्। [4]द्वौ द्रोणौ पचति–'तं पचति द्रोणा०' (६।४।१६१) इत्यनेन इकण्, 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इत्यनेन इकण् लुप्यते, 'परिमाणात्तद्धितलुक्यविस्ता०' (२।४।२३) इत्यनेन ङी ॥१६१॥

## सम्भवदवहरतोश्च ॥६।४।१६२॥

म० वृ०–द्वितीयान्तान्नाम्नः [1]पचतिसम्भवदवहरतोश्चार्थयोर्यथोक्तमिकणादयो भवन्ति। आधेयस्य [शाल्योदनादेः] प्रमाणानतिरेकेण [प्रमाणानुसारेण] संभवः, अतिरेकेणावहारः[2]। [3]प्रास्थिकः कटाहः, प्रास्थिकी स्थाली ॥१६२॥

---

अव०–[1]सम्भवति धातुः अकर्मकः सकर्मकश्च सम्भवति। तत्र इह सूत्रे सकर्मक एव ग्राह्यः। तथा हि– स्थाल्यादिकं प्रमाणानतिरेकेण प्रस्थं द्रोणं वा सम्भवति,कोऽर्थः? धारयतीत्यर्थः। [2]'अतिरेकेणावहारः',कोऽर्थः? स्थालयां धान्यमुत्कलसत अनिकम् (?) उत्तार्यते अवह्रियते इति अवहार उच्यते। [3]प्रस्थं पचति सम्भवति–धारयति अवहरति वा कटाहः प्रास्थिकः, स्थाली वा, एवं खारीकः ॥१६२॥

## पात्रा-ऽऽचिता-ऽऽढकादीनो वा ॥६।४।१६३॥

म० वृ–पात्र-आचित-आढकेभ्यः [द्वितीयान्तेभ्यः] पचत्सम्भवदवहरदर्थेषु 'ईनो वा' स्यात [पक्षे इकण्]। [ईनः–] [1]पात्रीणः, पात्रीणा, [इकण्–] पात्रिकी स्थाली, आचितीना [ईनः], आचितिकी [इकण्], आढकीना, आढकिकी ॥१६३॥

---

अव०–[1]पात्रं पचति सम्भवति अवहरति वा पात्रीणः, पात्रीणा, पात्रिकी ॥१६३॥

## द्विगोरीनेकटौ वा ॥६।४।१६४॥

म० वृ०–पात्राचिताढकान्ताद् द्विगोः पचत्याद्यर्थे 'ईन-इकटौ वा' भवतः, पक्षे इकण्, तस्य [इकणप्रत्ययस्य] च 'अनाम्न्यद्वि०' (६।४।१४१) इति लुप्, विधानबलान्न ईनेकटोर्लोपः। द्वे पात्रे पचति सम्भवत्यवहरति वा द्विपात्रीणः [ईन], द्विपात्रिकः [इकट्], [1]द्विपात्रः, एवं द्व्याचितीना, द्व्याचितिकी,[2]द्व्याचिता, [3]द्व्याढकीना,द्व्याढकिकी, द्व्याढकी ॥१६४॥

---

अव०–[1]द्विपात्र इत्यत्र इकण्, 'अनाम्न्य'०

(६।४।१४१) इति इकण् लुप्यते द्विपात्र इति रूपं जातम्। एवं द्विपात्रीणा, द्विपात्रिकी, द्विपात्री । (द्विपात्रीति) अत्र इकण्, 'अनाम्न्य०' (६।४।१४३) इति लोपः, ततः 'परिमाणात्तद्धितलुक्य०' (२।४।२३) इत्यनेन ङी । [२]'द्वयाचिता' इत्यत्र इकणो लोपेऽपि न ङी, 'परिमाणात्तद्धित०' (२।४।२३) इति सूत्रे आचितात् परो ङीप्रतिषेध उक्तोऽस्ति । [३]"तारकाढकपिटक"(हैमलिङ्गा०) इति त्रिलिङ्गपाठात् आढकशब्दः त्रिलिङ्गोऽस्ति, परमत्र इकट्प्रत्यये टो ङ्यर्थः इत्येकमेव रूपम् ॥१६४॥

## कुलिजाद्वा लुप् च ॥६।४।१६५॥

म० वृ०—कुलिजान्ताद् द्विगोः पचत्यर्थे 'ईन-इकटौ' वा, पक्षे इकण्, [१]तस्य वा लुप् स्यात् । तेन चातूरूप्यम् । [२]द्विकुलिजीना, द्विकुलिजिकी; पक्षे [३]द्विकुलिजी, द्वैकुलिजिकी ॥१६५॥

अव०—[१]इकणप्रत्ययस्य । [२]द्वे कुलिजे पचति सम्भवत्यवहरति वा द्विकुलिजीना । [३]द्विकुलिजी इत्यत्र 'परिमाणात्तद्धित०'(२।४।२३) इति ङी ।१६५।

## [१]वंशादेर्भाराद्धरद्वहदावहत्सु[२]॥६।४।१६६॥

म० वृ०—वंशादिभ्यः परो यो भारशब्दस्तदन्तात् [३]हरति [४]वहति [५]आवहति चार्थे यथोक्तः [यथाविहितं] प्रत्ययः स्यात् । वंशभारं हरति वहति आवहति वा वांशभारिकः । [६]अथापरोऽर्थः— भारभूतेभ्यो वंशादिभ्यो द्वितीयान्तेभ्यो हरदाद्यर्थेषु प्रत्ययो भवति । भारभूतान् वंशान् हरति वहति आवहति [करोति] वा वांशिकः, कौटिकः । भारादिति किम् ? एकं वंशं हरति ॥१६६॥

अव०—[१]वंश, कुट, कुटज, वल्वज, मूल, स्थूणा, अक्ष, अश्मन्, इक्षु, खट्वा, श्लक्ष्ण इति वंशादिगणः । [२]बहुवचनमर्थत्रयसूचनार्थम् । [३]हरतिरत्र देशान्तरप्रापणे चौर्ये वा । [४]वहति, कोऽर्थः ? उत्क्षिप्य धारणे । [५]आवहतिधातुरुत्पादने करोत्यर्थे वा । [६]वृत्तिकृता 'वंशादेर्भारा०' (६।४।१६६) इत्यस्य सूत्रस्य प्रोक्तादर्थादपरोऽप्यर्थो व्याख्यायते- 'अथापरोऽर्थो' इति ॥१६६॥

## द्रव्य-वस्नात्केकम् ॥६।४।१६७॥

म० वृ०—द्रव्यवस्नशब्दाभ्यां यथासंख्यं क-इकौ हरत्याद्यर्थेषु भवतः । [१]द्रव्यकः, [२]वस्निकः।१६७।

अव०—[१]द्रव्यं हरति वहति आवहति वा । [२]एवं वस्नं हरति (इत्यादि) ॥१६७॥

## सोऽस्य भृतिवस्नांशम् ॥६।४।१६८॥

म० वृ०—स इति प्रथमान्तादस्येति षष्ठ्यर्थे यथोक्तम् [यथाविहितम्] इकणादयो भवन्ति, यत्प्रथमान्तं तच्चेत् [१]भृतिर्वस्नम्[२]अंशो[३] वा भवति । पञ्चको[४] भृत्यः, पञ्चकः [५]पटः, पञ्चकं [६]नगरम्, एवं सप्तकः, शत्यः, साहस्रः, प्रास्थिकः ॥१६८॥

अव०—[१]भृतिर्वेतनम् । [२]वस्नो नियतकालक्रयमूल्यम । [३]अंशो भागः । [४]पञ्चास्य भृतिः= पञ्चकः, 'संख्याडतेः०' (६।४।१३०) इति कः । [५]पञ्चास्य वस्नं=पञ्चकः पटः । [६]पञ्चास्यांशाः ॥१६८॥

## मानम् ॥६।४।१६९॥

म० वृ०—स इति प्रथमान्तादस्येति षष्ठ्यर्थे 'यथोक्तः' [यथाभिहितम्] प्रत्ययः स्यात्, प्रथमान्तं चेन्मानं[१] भवति । प्रस्थो मानमस्य= प्रास्थिको राशिः, द्रौणिकः, खारीकः,[२] वर्षशतं मानमस्य वार्षशतिकश्चैत्रः, [३]पाञ्चलोहितिकम्, [४]पाञ्चकलायिकम् ॥१६९॥

अव०—[१]मीयते येन तन्मानम् । [२]'खारीकः', एवं खारीशतिकः, खारीसाहस्रिकः । [३] 'पाञ्चलोहितिकम्, [४]पाञ्चकलायिकम्'; अनयोः सिद्धिः 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इति सूत्रे सविस्तरा ........................[दर्शिता । तथाहि-रोहितशब्दः, 'श्येतैत०' (२।४।३६) इत्यनेन ङी, तकारस्य नकारश्च, 'ऋरलृलम्' (२।३।९९) इति रकारस्य लत्वे 'लोहिनी' इति] शब्दः, पञ्चलोहिन्यो मानमस्य—'मानम्' इत्यनेन इकण्, 'जातिश्च णि०' (३।२।५१) इति पुंवद्भावः, ङीनकारौ निवृत्तौ, लोहित इति शब्दः पुनर्निष्पन्नः, ततो वृद्धिः, पाञ्च-

लोहितिकम्। [४]पञ्च कलायाः परिमाणमस्य, 'मानम्' (६।४।१६९) इतीकण्। लोहितीकलाये इति मालवदेशे परिमाणविशेषो। अत एव नामत्वात् 'अनाम्न्य०' इति इकणो न लोपः। अथ मासो मानमस्य वर्षं मानमस्येति वाक्ये 'मानम्' (६।४।१६९) इत्यनेन कथं न प्रत्ययः? सूरिराह– कालवाची शब्दो मानग्रहणेन न गृह्यते, 'मानसंवत्सर०' (७।४।१९) इत्यादौ मानग्रहणे सत्यपि संवत्सरग्रहणात् ॥१६९॥

## जीवितस्य सन् ॥६।४।१७०॥

म० वृ०–जीवितस्य यन्मानं ततः प्रथमान्तादस्येति षष्ठ्यर्थे 'यथोक्तं प्रत्ययो' भवति, स च सन्, तस्य 'अनाम्न्य०' (६।४।१४१) इति लुप् प्राप्तोऽपि न भवतीत्यर्थः। षष्टिर्जीवितमानमस्य षाष्टिकः, [१]साप्ततिकः, [२]वार्षशतिकः। द्वे षष्टी जीवितमानमस्य=[३]द्विषाष्टिकः ॥१७०॥

---

प्रब०–[१]सप्ततिर्जीवितमानमस्य। [२]वर्षाणां शतं वर्षशतं जीवितमस्य। [३]'मानसंवत्सर०' (७।४।१९) इत्यनेन उत्तरपदवृद्धिः ॥१७०॥

## सङ्ख्यायाः सङ्घ-सूत्र-पाठे ॥६।४।१७१॥

म० वृ०–सङ्ख्यावाचिनः प्रथमान्तादस्य मानमित्यर्थे 'यथोक्तः प्रत्ययः' [कः प्रत्ययः] स्यात्, यत्तदस्येति निर्दिष्टं तच्चेत्सङ्घः[१] सूत्रं[२] [३]पाठो वा भवति। पञ्च गावो मानमस्य [सङ्घस्य] पञ्चकः सङ्घः, अष्टावध्याया मानमस्य [पाणिनीयग्रन्थस्य] अष्टकं पाणिनीयम्, [४]शतकं निदानम् [वैद्यकशास्त्रम्], अष्टौ रूपाणि वारा मानमस्य अष्टकः पाठः। सङ्घ-सूत्रपाठ इति किम्? पञ्च वर्णा मानमस्य [५]पञ्चतयं पदम् ['अवयवात्तयट्' (७।१।१५१)], एवं [६]चतुष्टयी शब्दानां प्रवृत्तिः। पञ्चादीनां संख्येयानामवयवतया सङ्घादेर्मानत्वाद् 'मानम्' (६।४।१६९) इत्यनेनैव ['मानम्' सूत्रेणैव] सिध्यति, परत्वात् तयट् प्राप्नोति (इति) तद्बाधनार्थं वचनम्। न चातिप्रसङ्गः, [७]अभेदरूपापन्ने सङ्घादौ तयाट्बाधकमिदम् [सूत्रम्], भेदरूपापन्ने [बहुत्वरूपापन्ने सङ्घादौ] तु तयडेव,—चतुष्टये ब्राह्मणक्षत्रियविट्शूद्राः[८]। स्याद्वादाश्रयणाच्चैवात्र भेदाभेदयोः सम्भवः ॥१७१॥

---

प्रब०–[१]सङ्घः प्राणिनां समूहः। [२]सूत्रं शास्त्रं ग्रन्थः। [३]पाठोऽध्ययनं पठनम्। [४]शतमध्याया मानमस्य वैद्यकशास्त्रस्य चिकित्सारूपस्य तत् शतकम्। [५]'पञ्चतयं पदम्', अत्र पदं न सङ्घो न सूत्रं न पाठ इति 'सङ्ख्यायाः सङ्घ०' (६।४।१७२) इत्यनेन न कप्रत्ययः, अपि तु तयडेव। [६]तथा चत्वारोऽवयवा मानमस्या जातिगुणक्रियाद्रव्यभेदात्, तयट्, 'चटते सद्वितीये' (१।३।७) रस्य सः, 'ह्रस्वान्नाम्नस्ति' (२।३।३४) ति सस्य षः। [७] एकत्वरूपापन्ने अवयवावयवि(वि)शेषे। (एवं) [८]द्वये देवमनुष्याः १७१

## नाम्नि ॥६।४।१७२॥

म० वृ०–सङ्ख्यावाचिनस्तदस्य मानमित्यर्थे 'यथोक्तं प्रत्ययः' स्यात्, नाम्नि। पञ्च इति सङ्ख्या मानमेषां=पञ्चकाः शकुनयः, अष्टका राजर्षयः[१]। योगविभागकरणात्संज्ञायां पञ्चैव पञ्चका इति स्वार्थे एव वा प्रत्ययः [इदं भाष्यकारमतम्] ।१७२।

---

प्रब०–[१](एवम्) त्रिकाः शालङ्कायनाः, सप्तका ब्रह्मवृक्षाः, एकोऽपि सप्तको ब्रह्मवृक्ष उच्यते ॥१७२॥

## विंशत्यादयः ॥६।४।१७३॥

म० वृ०–विंशत्यादयः शब्दा नाम्नि विषये तदस्य मानार्थे 'साधवो' भवन्ति। [१]विंशतिः, [२]त्रिंशत्, [३]चत्वारिंशत्, [४]पञ्चाशत्, [५]षष्टिः, [६]सप्ततिः [७]अशीतिः, [८]नवतिः, [९]शतम्, [१०]सहस्रम्, [११]लक्षमित्यादि ॥१७३॥

---

प्रब०–[१]दश इति सङ्ख्यामानमनयोः सङ्ख्ययोः, 'पञ्चद्दशद्वर्गे वा' (६।४।१७५) इति सूत्रेण दशस्थाने दशन् इत्यादेशः, ततो द्वौ दशतौ मानमेषां संख्येयानां घटादीनामस्य वा संख्यानस्य इति विंशतिः,

निपातनात् द्विदशन्स्थाने विम्भावः शतिश्च प्रत्ययः, इत्थं विंशतिशब्दः सिद्धः । [२]त्रयो दशतो मानमेषां संख्येयानामस्य च संख्यानस्य = त्रिंशत्, निपातनात् त्रिदशन्स्थाने त्रिम्भावः,शत् इति प्रत्ययश्च, त्रिंशत्शब्दनिष्पत्तिः । [३]चतुर्, दशन्, चत्वारो दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य, निपातनात् चतुर्दशत्शब्दस्य चत्वारिम्भावः ; शत् प्रत्ययश्च, चत्वारिंशत्शब्दसिद्धिः । [४]पञ्चन्, दशन्, पञ्च दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य, निपातनात् पञ्चभावः, पञ्चशब्दस्य आत्वम्, शत् प्रत्ययश्च, पञ्चाशत् । [५]षष्, दशन्, षड् दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य, निपातनात् षष्भावः, तिप्रत्ययश्च, 'तवर्गस्य श्चवर्ग०' (१।३।६०) इत्यनेन तस्य टः, षष्टिः । [६]सप्त दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य, निपातनात् सप्तभावः, तिप्रत्ययः, सप्ततिः । [७]अष्टन्, दशन्, अष्टौ दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य, निपातनात् अष्टन्दशन्स्थाने अशीभावः तिश्च । [८]नव दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य, निपातनात् नवभावः तिश्च । [९]दश,दशन्,दशदशतो मानमेषां संख्येयानामस्य वा संख्यानस्य, निपातनाद् दशदशन्स्थाने श इति भावः,त इति प्रत्ययश्च, शत इति शब्दः । [१०]दश शतानि मानमेषां संख्येयानामस्य वा संख्यानस्य, निपातनात् सहस्र इति शब्दः । [११]एवं दशसहस्राणि अयुतमित्युच्यते, दश अयुतानि, कोऽर्थः ? दशसहस्राणि नियुतम्, लक्षमिति संज्ञान्तरम् । दशनियुतानि प्रयुतम्, दशलक्षमित्यर्थः । दशप्रयुतानि अर्बुदम्, कोटिः (इति संज्ञान्तरम्) । दशार्बुदानि न्यर्बुदम्, अब्जमिति संज्ञान्तरम् । तथा पाठविशेषोऽयम्– दशायुतानि लक्षम्, दशप्रयुतानि कोटिः, दशाब्जानि खर्वम्, दशखर्वाणि निखर्वम्, दशनिखर्वाणि महाम्बुजम्, दशमहाम्बुजानि शङ्कुः, दशशङ्कवो वार्द्धिः, समुद्र इति संज्ञान्तरम्, दश वार्द्धयोऽन्त्यम्, दशान्त्यानि मध्यम्, दशमध्यानि परार्ध्यमिति उच्यते । इति ······भवन्ति (?) । एवं लौकिका····(?) । तथा विंशत्यादिशब्देषु यदत्र लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धम् । त्रिंशत्यादिशब्दानां लिङ्गसंख्यानियमश्च "विंशत्याद्याशताद् द्वन्द्वे" ❀ इति लिङ्गानुशासनात् ज्ञातव्यः ॥१७३॥

## त्रैंश-चात्वारिंशम् ॥६।४।१७४॥

म० वृ०–त्रिंशच्चत्वारिंशद्भ्यां तदस्य मानमित्यर्थे डण् निपात्यते, नाम्नि[१] । [२]त्रैंशानि, [३]चात्वारिंशानि ब्राह्मणानि ॥१७४॥

अव०–[१]प्रत्ययान्तं कस्यचिन्नाम भवतीत्यर्थः । [२]त्रिंशदध्याया मानमेषां त्रैंशानि । [३]एवं चात्वारिंशानि ब्राह्मणानि । वेदवाक्यानि कानिचिच्चात्वारिंशानि उच्यन्ते ॥१७४॥

## पञ्चद्दशद्वर्गे वा ॥६।४।१७५॥

म०वृ०–पञ्चन्-दशन्शब्दौ तदस्य मानार्थे वर्गे वाच्ये अन्प्रत्ययान्तौ निपात्येते वा,पक्षे कः प्रत्ययोऽपि स्यात् । पञ्च मानमस्य वर्गस्य [राशेः]=पञ्चद्वर्गः, पञ्चको वर्गः; एवं [दश मानमस्य वर्गस्य] दशद्वर्गः, दशको वर्गः ॥१७५॥

## स्तोमे डट् ॥६।४।१७६॥

म० वृ०–संख्यावाचिप्रथमान्तात्तदस्य मानेऽर्थे 'स्तोमे [समूहे] वाच्ये'डट्' स्यात् । [२]पञ्चदशः स्तोमः, [३]विंशः, पञ्चविंशः, त्रिंशः, [पञ्चदश ऋचो मानमस्याः पङ्क्तेः] पञ्चदशी पङ्क्तिः ॥१७६॥

अव०–[१]ऋगादीनां समूहः स्तोम उच्यते । [२]पञ्चदश ऋचो मानमस्य स्तोमस्य । [३]एवं विंश इत्यादीनां वाक्यानि ॥१७६॥

## तमर्हति ॥६।४।१७७॥

म० वृ०–तमिति द्वितीयान्तादर्हदर्थे 'यथा-

❀ श्रीहैमलिङ्गानुशासने स्त्रीलिङ्गप्रकरणे षष्ठे श्लोके ।

विधि' प्रत्ययो भवति । श्वेतच्छत्रमर्हति=श्वेतच्छत्रिकः, [ 'इकण्' (६।४।१) इत्यनेन इकण्,] वैषिकः विषात् वैषाद्वा], वास्त्रिकः, वाखयुगिकः, [आभिसेचनिकः] बालीवर्दिकः, चामारिकः, [1]शत्यः, [2]साहस्रः । भोजनमर्हतीत्यादौ न स्यादनभिधानात् ।।१७७।।

प्रव०—[1]शतमर्हति, 'शतात्केवला०' ( ६।४।१३१) इत्यनेन येकौ- शत्यः, शतिकः । [2]'सहस्रशतमानादण्' (६।४।१३६) ।।१७७।।

## दण्डादेर्यः ।।६।४।१७८।।

म० वृ०—दण्डादिभ्योऽर्हदर्थे 'यः' स्यात्, इकणोऽपवादः । दण्डमर्हति=दण्ड्यः ।।१७८।।

प्रव०—दण्ड, मुसल, मेधा, वध, मधुपर्क, अर्घ, मेघ, उदक, इभ, कशा, युग इति दण्डादिगणः ।।१७८।।

## यज्ञादियः ।।६।४।१७९।।

म० वृ०—यज्ञादर्हत्यर्थे 'इयः' स्यात् । यज्ञियो देशो यजमानो वा ।।१७९।।

प्रव०—यज्ञमर्हति=यज्ञियः । यज्ञो नाम कश्चित् क्रियासमुदायः क्रियासमुदायाभिव्यङ्ग्यं प्रकाश्यं वाऽपूर्वं धर्माधर्मौ इत्याहुः ।।१७९।।

## पात्रात्तौ ।।६।४।१८०।।

म० वृ०—पात्रादर्हत्यर्थे तौ 'य-इयौ' भवतः । [1]पात्र्यः, पात्रियः ।।१८०।।

प्रव०—[1]पात्रमर्हति=पात्र्यः ओदनादिः ।१८०

## दक्षिणा-कडङ्कर-स्थालीविलादीय-यौ ।।६।४।१८१।।

म० वृ०—[1]दक्षिणा-[2]कडङ्कर-स्थालीविलशब्देभ्योऽर्हत्यर्थे 'ईय-यौ' भवतः । दक्षिणामर्हति= दक्षिणीयः, दक्षिण्यो गुरुः ; कडङ्करीयः, कडङ्कर्यो गौः ; [3]स्थालीविलीयाः, स्थालीविल्यास्तण्डुलाः ।।१८१।।

प्रव०—[1]'दक्षिः शीघ्रे च' इति दक्ष, दक्षन्तेऽस्यामिति दक्षिणा, 'द्रुहृवृहिदक्षिभ्य इणः' ( उ० १९४) । [2]कडङ्करं माषादिकाष्ठम् । [3]पाकार्हा इत्यर्थः ।।१८१।।

## छेदादेर्नित्यम् ।।६।४।१८२।।

म० वृ०—छेदादिभ्यो [1]नित्यमर्हति इत्यर्थे 'यथाविहितं' प्रत्ययः [इकण्] स्यात् । छेदं नित्यमर्हति=छैदिकः, भैदिकः ।।१८२।।

प्रव०—[1]नित्यमिति अर्हतीत्यस्य विशेषणम् । छेद, भेद, द्रोह, दोह, नर्त्त, कर्ष, विकर्ष, प्रकर्ष, विप्रकर्ष, प्रयोग, विप्रयोग, सम्प्रयोग, प्रेक्षण, सम्प्रश्न, विप्रश्न इति छेदादिगणः ।।१८२।।

## विरागाद्विरङ्गश्च ।।६।४।१८३।।

म० वृ०—विरागान्नित्यमर्हत्यर्थे 'यथाविधि' प्रत्ययः [इकण्,] तद्योगे च विरागस्य विरङ्गादेशः । नित्यं विरागमर्हति=वैरङ्गिकः ।।१८३।।

## शीर्षच्छेदाद् यो वा ।।६।४।१८४।।

म० वृ०—शीर्षच्छेदान्नित्यमर्हत्यर्थे 'यो वा' स्यात् । [1]शीर्षच्छेद्यः, [2]शैर्षच्छेदिकश्चौरः ।।१८४।।

प्रव०—[1]शीर्षच्छेदं नित्यमर्हति । [2]पक्षे इकण् ।।१८४।।

## शालीनकौपीनार्त्विजीनम् ।।६।४।१८५।।

म० वृ०—[1]शालीन कौपीन आर्त्विजीन इति शब्दा अर्हत्यर्थे [2]'ईनञन्ता' निपात्यन्ते । नित्यमिति निवृत्तम्, निपातनस्येष्टविषयत्वात् । शालीनोऽधृष्टपर्यायः[सलज्जः, शान्तः,] [3]कौपीनः, [4]आर्त्विजीनो यजमानः ऋत्विग्वा ।।१८५।।

प्रव०—[1]शालाप्रवेशनशब्दः, शालायां प्रवेशनं =शालाप्रवेशनम्, शालाप्रवेशनमर्हति इति वाक्ये निपातनात् प्रवेशनशब्दस्य लोपः कार्यः,शालीन इति सिद्धम् । [2]ईनञ् इत्यत्र ञकारस्य वृद्धिनिमित्तत्वात् पुंवद्भावो न भवति, तथाहि- शालीनाभार्या इत्यत्र

शालीना भार्या यस्य, 'तद्धितः स्वरवृद्धिहेतु'० (३।२।५५) इत्यादिसूत्रेण पुंवद्भावो न भवति । [3]कूपप्रवेशनमर्हति, निपातनात् ईनञ्, प्रवेशनलोपः । कौपीनशब्दः पापकर्मणि वर्त्तते, गोपनीयपायूपस्थे तदावरणे च चीवरखण्डे वा कौपीनशब्दो वर्त्तते ।

[४]ऋत्विज् शब्दः, अथवा ऋत्विक्कर्मशब्दः, ऋत्विजमर्हति-निपातनात् इनञ्, वृद्धिः, सर्वं निपातनात् । आर्त्विजीनो यजमानः । ऋत्विक्कर्मार्हति, ईनञ्, कर्मशब्दलोपः, ऋत्विगेव उच्यते ॥१८५॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने षष्ठाध्यायस्य तृतीयः पादः समाप्तः ॥



॥ अर्हम् ॥

# ॥ सप्तमोऽध्यायः ॥

## [ प्रथमः पादः ]

★

### यः ॥७।१।१॥

म० वृ०–अधिकारोऽयम् । यदित उर्ध्वं भणिष्यामः तत्र ईयादर्वाग् 'य' इत्यधिकृतं ज्ञेयम्[1] ॥१॥

---

अव०–[1]परिहृत्य अपवादविषयम् । यः प्रत्यय उत्सर्गेण प्रवर्त्तते इत्यर्थः ॥१॥

### वहति रथ-युग-प्रासङ्गात् ॥७।१।२॥

म० वृ०–तमित्यनुवर्त्तते[1] । तमिति द्वितीयान्तेभ्यो रथयुगप्रासङ्गेभ्यो वहत्यर्थे 'यः प्रत्ययः' स्यात् । [2]रथ्यः, [3]द्विरथ्यः, [4]युग्यः, [5]प्रासङ्ग्यः । कालसंज्ञकं युगं वहति राजा, युगं वहति मनुष्यः ; अत्रानभिधानान्न स्यात् । 'यत्त्वन्यत् प्रसङ्गात् [=गौणात्] आगतं प्रासङ्गमिति तद्वहति तत्रानभिधानान्न भवति ॥२॥

---

अव०–[1]'तमर्हति' इति सूत्रात् । [2]रथं वहति । [3]द्वौ रथौ वहति । [4]युगं 'वहति । 'वहति', कोऽर्थः ? पालयति । .....................(ननु यो रथं वहति स रथ)स्य वोढा, ततः 'रथात्सादेश्च वोढ्ङ्गे'(६।३।१७५) इति ये कृते सिद्धम्, 'वहति रथ०' (७।१।२) इत्यत्र किं रथस्य ग्रहणम् ? सत्यम्, अलुबर्थं तु रथस्य ग्रहणम्, 'रथात्सादे०' (६।३।१७५) इति अनेन हि ये क्रियमाणे 'द्विगोरनपत्ये०' (६।१।२४) इत्यनेन तस्य प्रत्ययस्य लुप्यते (? लुप् भवति)–,द्वयो रथयोर्वोढा=द्विरथः, अत्र यः, यलोपश्च, अनेन'वहति रथ' (७।१।२) इत्यादिना ये विधीयमाने लोपो न प्राप्नोति, अप्राग्जितीयत्वात्, एवं च द्विगुसमासे रूपद्वयं सिध्यति,–द्विरथ्यः द्विरथ इति । कुप्यभिद्योद्ध्यसिध्यतिष्यपुष्ययुग्याज्यसूर्यं नाम्नि' (५।१।३९) इति सूत्रनिपातनादेव युग्ये सिद्धे इदमर्थविवक्षायां सत्यामण्बाधनार्थमत्र युगग्रहणं कृतम्, तथाहि–यो हि युगं वहति स युगस्य सम्बन्धी भवति, युगस्यायमिति वाक्ये 'तस्येदम्' (६।३।१६०) इत्यण् प्राप्नोतीति भावः । [5]प्रासज्यते इति प्रासङ्गः, प्रासङ्गं वहति प्रासङ्ग्यः, यत्काष्ठं वत्सानां दमनकाले स्कन्धे आसज्यते=योज्यते तत्काष्ठं यो वत्सो वहति स प्रासङ्ग्यो वत्स उच्यते इत्यस्याग्रे प्रसङ्गादागतमित्याद्यक्षरयोजना कार्या ॥२॥

### धुरो यैयण् ॥७।१।३॥

म० वृ०–धुर्शब्दाद् वहत्यर्थे 'य–एयणौ' भवतः । धुर्यः, [1]धौरेयः ॥३॥

---

अव०–[1]धुरं वहति धुर्यः । धूःशब्दः । 卐 धूर्यानमुखभारयोः । भारं शकटं वा (?) । 'धुरो यैयण्' इति सूत्रे यद्–एयकण्प्रत्ययौ कश्चिदिच्छति, तन्मते धुर्यः, धौरेयक इति प्रयोगौ, स्त्रियां तु धुरी, धुरं वहति=धुर्य, ङी, 'व्यञ्जनात्तद्धित'० (२।४।८८)इति यलोपः, 'धुरी' इति सिद्धम् ॥३॥

### [1]वामाद्यादेरीनः ॥७।१।४॥

म० वृ–वामादिपूर्वाद् धुर्शब्दात् [द्वितीयान्तात्] वहत्यर्थे 'ईनः' स्यात् । वामधुरीणः, सर्वधुरीणः, उत्तरधुरीणः, दक्षिणधुरीणः । वामादयः प्रयोगगम्याः ॥४॥

---

अव०–[1]वामशब्द आदिर्येषां ते वामादयः, वामादय आदयो यस्य स वामाद्यादिः, तस्मात् । ........

---

卐 तदुक्तं श्रीहैमलिङ्गानुशासनविवरणे– "धूः शकटाङ्गं यानमुखं भारश्च" ।

...........(वामधुरा, सर्वधुरा, उत्तर)धुरा इत्यादौ सर्वत्र 'धुरोऽनक्षस्य' (७।३।७७) इति अत् समासान्तः, आप्, वामधुरां वहति एवं सर्वधुरां वहतीत्यादौ इति वाक्ये इनप्रत्ययः ॥४॥

## अश्चैकादेः ॥७।१।५॥

म० वृ०–एकशब्दादेर्धुरन्ताद्वहत्यर्थे 'अः प्रत्ययः चकारादीनश्च' स्यात् । [1]एकधुरः, एकधुरीणः ॥५॥

---

अव०–[1]एका एकस्य वा धूः=एकधुरा, 'धुरोऽनक्षस्य' (७।३।७७) अत् (समासान्तः), (आप्,) एकधूरस्मिंश्चक्रे=एकधुरम्, एकधुरां वहति एकधुरं वा वहति ॥५॥

## हल-सीरादिकण् ॥७।१।६॥

म० वृ०–हलसीराभ्यां [द्वितीयान्ताभ्यां] वहत्यर्थे 'इकण्' स्यात् । [हलं वहति=] हालिकः, सैरिकः, ॥६॥

## शकटादण् ॥७।१।७॥

म० वृ–द्वितीयान्तात् शकटाद्वहत्यर्थे 'अण्' स्यात् । शाकटो गौः ॥७॥

---

अव०–'शकटादण्' इति सूत्रे शकटशब्दात् 'तस्येदम्' (६।३।१६०) इत्यनेनाण्; हलसीरशब्दाभ्यां च तृतीयपादोक्तेन 'हलसीरादिकण्' (६।३।१६१) इत्यनेन इकण् भविष्यति, एवं प्रयोगसिद्धिः, यो हि यद्वहति स तस्य सम्बन्धी भवति, (इति) 'हलसीरा०' 'शकटादण्' इति सूत्रद्वयं किमर्थम् ? सत्यम्, 'वहतिरथ०' (७।१।२) इति सूत्रवदलुबर्थम्, तेनात्रापि द्वैरूप्यं द्विगौ, तथाहि द्वयोः शकटयोः हलयोः सीरयोर्वा वोढा द्विशकटः, द्विहलः, द्विशीरः, अत्र 'तस्येदम्' (६।३।१६०) अण्, न तु 'हलसीरादिकण्', केवलाभ्यामेव तस्य विधानात्, 'द्विगोरन०' (६।१।२४) अण् लुप्यते, प्राग्जितीयत्वात्, द्वे शकटे हले सीरे वा वहति=द्वैशकटः, द्वैहलिकः, द्वैसीरिकः, अत्र 'शटकादण्' 'हलसीरादिकण्' अनयोर्न लोपः, अप्राग्जितीयत्वात् ॥७॥

## विध्यत्यनन्येन ॥७।१।८॥

म० वृ०–[न अन्यत्=अनन्यत्, तेन अनन्येन] तमिति वर्त्तते । तमिति द्वितीयान्ताद् विध्यत्यर्थे 'यः' स्यात्, स चेद्विध्यन्नात्मनोऽन्येन करणेन न विध्यति । [1]पादौ विध्यन्ति=पद्याः शर्कराः [ऊरू विध्यन्ति=] ऊरव्याः कण्टकाः, [उरो विध्यन्ति=] उरस्याः वाताः । अनन्येनेति किम् ? [2]चौरं विध्यति चैत्रः ॥८॥

---

अव०–[1]पादौ विध्यन्ति पद्याः, अत्र 'हिमहति०' (६।२।९५) इत्यनेन पादस्य पद् । [2]तथा चौरं विध्यति चैत्रः, अत्र हि चैत्रश्चौरं विध्यन् धनुषा पाषाणेन वा विध्यति। शर्करादयस्तु न करणेन विध्यन्ति, यत्र मुखतैक्ष्ण्यादि करणं तत्तेषामात्मीयमेव ॥८॥

## धनगणाल्लब्धरि ॥७।१।९॥

म० वृ०–धनगणाभ्यां द्वितीयान्ताभ्यां लब्धर्यर्थे 'यः' स्यात् । धनं [1]लब्धा=धन्यः, गणं लब्धा =गण्यः ॥९॥

---

अव०–[1]'लब्धा' इत्यत्र तृन् प्रत्यय एव, न 'णकतृचौ' (५।१।४८ इति) तृच्, तृचि हि सति धनगणयोः वाक्ये षष्ठी स्यात् इति तृन् विधीयते ॥ ९ ॥

## णोऽन्नात् ॥७।१।१०॥

म० वृ०–[द्वितीयान्तात्] अन्नाल्लब्धरि 'णः' स्यात् । अन्नं लब्धा=आन्नः ॥१०॥

## हृद्य-पद्य-तुल्य-मूल्य-वश्य-पथ्य-वयस्य-धेनुष्या गार्हपत्य-जन्य-धर्म्यम् ॥७।१।११॥

म० वृ०–हृद्यादिशब्दा यथास्वमर्थविशेषेषु यप्रत्ययान्ता निपात्यन्ते । [1]हृद्यमौषधम्, हृद्यो देशः, हृद्यो वशीकरणमन्त्रः, निपातनं रूढ्यर्थम्; तेनेह न स्यात्,–हृदयस्य प्रियः पुत्रः । [2]पद्यः कर्दमः । [3]तुल्यं भाण्डम्, तुल्यः सदृशः । [4]मूल्या मुद्गाः । [5]वश्यो गौः । [6]पथ्यमोदनम्, निपातनादिह न भवति,– पथोऽनपेतं शकटादि । [7]वयस्यः

सखा । [८]धेनुष्या पीतदुग्धा इति यस्याः प्रसिद्धिः । [९]गार्हपत्य इति नामाग्निः । [१०]जन्या जामातुर्वयस्याः, जन्यः । [११]धर्म्यम् ॥११॥

अव०–[१]हृदयशब्दात् षष्ठ्यन्तात् प्रियेऽर्थे बन्धने च वशीकरणमन्त्रे यो निपात्यते । तथाहि– हृदयस्य प्रियमौषधं देशो वा हृद्यमौषधम्, हृद्यो देशः, अथ बन्धने– हृदयस्य बन्धनो=हृद्यो वशीकरणमन्त्रः, 'हृदयस्य हृल्लासलेखाण्ये' ( ३.२.९४ ) इत्यनेन हृदयस्य हृत् आदेशः । [२]पद्येति पदशब्दात् प्रथमान्तात् दृश्यत्वोपाधिकात् अस्मिन्निति सप्तम्यर्थे यः ,पदमस्मिन् दृश्यमिति वाक्यम् ,पद्यः कर्दमः,यो हि कर्दमो नातिद्रवः, नातिशुष्कः, यत्र च कर्दमे प्रतिमुद्रोत्पादनेन, कोऽर्थः ? प्रतिबिम्बोत्पादनेन, पदं द्रष्टुं शक्यते स पद्यः कर्दमः । [३]तुलाशब्दात् तुलया संमितं तुल्यं भाण्डम्, निपातनं रूढ्यर्थम्, तेन न तुलासंमिते एवोच्यते, किन्तु सदृशार्थेऽपि तुल्यशब्दो ग्राह्यः, गिरिणा तुल्यो हस्ती । [४]मूलशब्दात् षष्ठ्यर्थे यः, तत्र मूलं यदुत्पाटनयोग्यं भवति । मूलमेषामुत्पाट्यमुत्खननीयं=मूल्या मुद्गाः । तथा मूलात्तृतीयान्तादानाम्येऽर्थे समे चार्थे यः । मूलेनानाम्यं मूल्यम्, मूलं पटाद्युत्पत्तिकारणम्, तेनानाम्यं यत् पटादेर्विक्रयात् स्वर्णादिकं प्राप्यते तन्मूल्यम् । समेऽर्थे,– मूलेन समो मूल्यः=पटः, पटग्राह्यवित्तेन समानफल इत्यर्थः । [५]वशशब्दात् गतेऽर्थे यः । वशं गतो=वश्यो गौः विधेयः, इच्छानुवर्ती इत्यर्थः । [६]पथिन्शब्दादनपेतेऽर्थे यः । पथोऽनपेतं पथ्यमोदनादि । [७]वयस्शब्दात्तुल्येऽर्थे यः । वयसा तुल्यो वयस्यः सखा । निपातनादिह न,– वयसा तुल्यः शत्रुः । [८]धेनुशब्दात् प्रधानधेनावर्थे यः षोऽन्तश्च । प्रधाना धेनुरेव धेनुष्या । या गोमता– आभीरजनेन गोपालाय– धनस्वामिने अधमर्णेन च उत्तमर्णाय आ ऋणप्रदानाद्दोहार्थं धेनुर्दीयते सा धेनुरेव धेनुष्या,पीतदुग्धा इति यस्या लोके प्रसिद्धिः । [९]गृहपतेः संयुक्तेऽर्थे ञ्यः । गृहपतिना संयुक्तो गार्हपत्यः । [१०]जनीशब्दाद् वधूवाचिनो वहत्यर्थे तथा जनशब्दाच्च जल्पेऽर्थे यः । जनीं वहन्ति जन्याः जामातुर्वयस्याः, जनस्य जल्पो जन्यः । [११]धर्मशब्दात्तृतीयान्तात् प्राप्येऽर्थे धर्मशब्दात्पञ्चम्यन्ताच्चानपेतेऽर्थे यः । धर्मेण प्राप्यं=धर्म्यम्, अथवा धर्मादनपेतमरहितं=धर्म्यम्, यद्धर्ममनुवर्त्तते तद्धर्म्यमित्युच्यते ॥११॥

## नौ-विषेण तार्य-वध्ये ॥७।१।१२॥

म० वृ०–नौविषाभ्यां निर्देशात्तृतीयान्ताभ्यां यथासंख्यं तार्ये वध्ये चार्थे 'यः' स्यात् । नावा तार्यं=नाव्यं जलम् ,नाव्या नदी । विषेण वध्यो= विष्यः [वध्यः, कोऽर्थः ? वधार्हः] ॥१२॥

## न्यायार्थादनपेते ॥७।१।१३॥

म० वृ०–[निर्देशादेव पञ्चम्यन्ताभ्यां] न्यायार्थाभ्यामनपेतेऽर्थे [अरहिते] 'यः' स्यात् । न्यायादनपेतम् [अरहितं]=न्याय्यम्, अर्थ्यम् ॥१३॥

## [१]मत-मदस्य करणे ॥७।१।१४॥

म० वृ०–[निर्देशात् षष्ठ्यन्ताभ्यां] मतमदाभ्यां करणेऽर्थे 'यः' स्यात् । इष्टं साम्यं ज्ञातं मतिर्वा मतशब्देनोच्यते । मतस्य करणं=मत्यम् [मदस्य करणं=] मद्यम् ॥१४॥

अव०–मननं मतम्, धातूनामनेकार्थत्वात् मतशब्दः साम्येऽपि वर्त्तते, यथा मतीकृताः, समीकृता इत्यर्थः ॥१४॥

## तत्र साधौ ॥७।१।१५॥

म० वृ०–तत्रेति सप्तम्यन्तात्साधावर्थे यः स्यात् । साधुः प्रवीणो योग्य उपकारको वा । शरणे साधुः =शरण्यः, [ सह भया–दीप्त्या वर्तते इति सभा ] सभायां साधुः=सभ्यः, कर्मणि साधुः=कर्मण्यः ॥१५॥

## पथ्यतिथि-वसति-स्वपतेरेयण् ॥७।१।१६॥

म० वृ०–पथिन्–अतिथि–वसति–स्वपतिभ्यस्तत्र साधावेयण् स्यात् । पथि साधुः=पाथेयम्,

आतिथेयम्, वासतेयम्, [स्वस्य-द्रव्यस्य पतिः =स्वपतिः, स्वपतौ साधुः] स्वापतेयम् ॥१६॥

## भक्ताण्णः ॥७।१।१७॥

म० वृ०-भक्तात्तत्र साधौ 'णः' स्यात्। भक्ते साधुर्भाक्तः शालिः, भाक्तास्तण्डुलाः ॥१७॥

## पर्षदो ण्य-णौ ॥७।१।१८॥

म० वृ०-पर्षत् इति शब्दात्तत्र साधौ 'ण्यणौ' भवतः। पर्षदि साधुः= पार्षद्यः, पार्षदः ॥१८॥

अव०-परिषद्शब्दादपीच्छन्त्येके- परिषदि साधुः=पारिषद्यः, पारिषदः ॥१८॥

## सर्वजनाण्ण्येनञौ ॥७।१।१९॥

म० वृ०-सर्वजनात्तत्र साधौ 'ण्य- ईनञौ' भवतः। सार्वजन्यः, सार्वजनीनः ॥१९॥

## प्रतिजनादेरीनञ् ॥७।१।२०॥

म० वृ०-प्रतिजनादिभ्यस्तत्र साधावीनञ् स्यात्। [1]प्रातिजनीनः, [2]आनुजनीनः, [3]ऐदंयुगीनः॥२०

अव०-प्रतिजन, अनुजन, विश्वजन, पञ्चजन, महाजन, इदंयुग, संयुग, समयुग, परयुग, परस्यकुल, अमुष्यकुल इति प्रतिजनादिः। परस्यकुलामुष्यकुलशब्दयोर्गणपाठसामर्थ्यात् षष्ठ्या अलुप्। [1]प्रतिः प्रतिकूलो जनः=प्रतिजनः, प्रतीतो वा जनः=प्रतिजनः, (तत्र) साधुः। [2]अनुकूलोऽनुरूपो वा जनः=अनुजनः, अनुजने साधुः। [3]इदं च तत् युगं च=इदंयुगम्, इदंयुगे साधुः=ऐदंयुगीनः ॥ २१ ॥

## कथादेरिकण् ॥७।१।२१॥

म० वृ०-कथादिभ्यस्तत्र साधाविकण् स्यात्। कथायां साधुः=काथिकः, वैकथिकः ॥२१॥

अव०-कथा, विकथा, विश्वकथा, सङ्कथा, वितण्डा, जनेवाद, जनवाद, जनोवाद, भृशोवाद, वृत्ति, सङ्ग्रह, गुण, गण, आयुर्वेद, गुड, कुल्माष, गुल्मास, इक्षु, सक्तु, वेणु, अपूप, मांसौदन, मांस, ओदन, सङ्ग्राम, सङ्घात, संवाह, प्रवास, निवास, उपवास इति कथादिगणः ॥२१॥

## देवतान्तात्तदर्थे[1] ॥७।१।२२॥

म० वृ०-[2]देवतान्तात् शब्दादर्थाच्चतुर्थ्यन्तात्तदर्थेऽर्थे 'यः' स्यात्। अग्निदेवतायै इदम्=अग्निदेवत्यम्, पितृदेवत्यम्, देवदेवत्यम् ॥२२॥

अव०-[1]तस्याश्चतुर्थ्या अर्थो यस्य स तदर्थः, किञ्चिद्वस्तु सम्पादयितुं यत् प्रवृत्तं तत् तदर्थमुच्यते, तस्मिन्। देवताशब्देन[2] देयस्य हविरादेः प्रतिग्रहीता स्वामी सम्प्रदानमुच्यते ॥२२॥

## पाद्या-ऽर्घ्ये ॥७।१।२३॥

म० वृ०-पाद्य अर्घ्य इति शब्दौ तदर्थे 'यान्तौ' [यप्रत्ययान्तौ] निपात्येते। पादार्थमुदकं पाद्यम्। निपातनादेव पदादेशो[1] न भवति। अर्घो मूल्यं पूजनं वा। अर्घार्थं रत्नमर्घ्यम् ॥२३॥

अव०-[1]'हिमहतिकाषि०' (३।२।९६) इत्यनेन प्राप्तः ॥२३॥

## ण्योऽतिथेः ॥७।१।२४॥

म० वृ०-अतिथेस्तदर्थे 'ण्यः' स्यात्। अतिथ्यर्थम्=आतिथ्यम् ॥२४॥

## सादेश्चा तदः ॥७।१।२५॥

म० वृ०-अधिकारोऽयम्। इत ऊर्ध्वं यदनुक्रमिष्यामः तत्र आ तदः=तदिति सूत्रं [1]यावत्केवलस्य [2]सादेश्च विधिर्वेदितव्यः ॥२५॥

अव०-[1]केवलस्य शब्दस्य। [2]'सादेश्च, कोऽर्थः? तदन्तात् शब्दाच्च विधिर्वक्ष्यमाणप्रत्ययविधानम्॥२५॥

## हलस्य कर्षे ॥७।१।२६॥

म० वृ०-हलात्केवलात्सादेश्च [1]कर्षेऽर्थे 'यः' स्यात्। हलस्य कर्षः=[2]हल्या हल्यो वा, [3]द्विहल्या, [4]त्रिहल्या, [5]परमहल्या ॥२६॥

अव०–[१]कर्ष इत्यत्राधिकरणे घञ्। यत्र मार्गे हलं कृष्टम्, गर्तमित्यर्थः, स मार्गः कर्ष उच्यते। कृष्यते इति कर्षः क्षेत्रमित्यन्ये आहुः। [२]"ररुयान्तं नपुंसकम्" [ हैमलिङ्गानु० नपुंसकलिङ्गप्रकरणे प्रथमश्लोके ] इति पाठात् यान्तस्य नपुंसकत्वेऽपि बाहुलकात् हल्यः हल्या इति पुंस्त्रीलिङ्गः। [३]द्वयोर्हलयोः कर्षः=द्विहल्या। [४]त्रयाणां हलानां कर्षः=त्रिहल्या। [५]परमश्चासौ हलश्च, परमहलस्य कर्षः। (एवम्) उत्तमहलस्य कर्षः उत्तमहल्या। तथा ईषदपरिसमाप्तं हलं=बहुहलम्, 'नाम्नः प्राग्बहुर्वा' (७।३।१२) इत्यनेन बहु पूर्वम्, बहुहलस्य कर्षः=बहुहल्यः ॥२६॥

## सीतया सङ्गते ॥७।१।२७॥

म० वृ०–सीताशब्दात्केवलात्सादेश्च निर्देशात्तृतीयान्तात् [१]'सङ्गतेऽर्थे 'यः' स्यात्। सीतया सङ्गतं=सीत्यम्, [२]द्विसीत्यम्, परमसीत्यम्। [३]यस्य पूर्णोऽवधिः ॥२७॥

अव०–[१]सङ्गच्छते इति सङ्गतः, 'गत्यर्था०' (५।१।११) इति क्तः। [२]द्वाभ्यां सीताभ्यां सङ्गतं द्विसीत्यम्। [३]यप्रत्ययस्य,यो यप्रत्ययः 'यः' इत्यधिकारसूत्रेण आदिसूत्रेण उपात्त आसीत् ॥२७॥

## ईयः ॥७।१।२८॥

म० वृ०–इत ऊर्ध्वं यद् भणिष्यामः तत्र [१]आ तदोऽर्थेषु[२] 'ईय' इत्यधिकृतं ज्ञेयम् ॥२८॥

अव०–[१]'ईयः (७।१।२८) इति सूत्रे 'आ तद' इत्यनुवर्त्तते। [२]वक्ष्यमाणार्थेषु ॥२८॥

## हविरन्नभेदापूपादेर्यो वा ॥७।१।२९॥

म०वृ०–हविर्भेदवाचिभ्यः अन्नभेदवाचिभ्यः अपूपादिभ्यश्च आ तदोऽर्थे 'यः प्रत्ययो वाऽधिक्रियते [सम्बध्यते]। ईयाऽपवादः। [१]हविर्भेद,–आमिक्ष्यम्, आमिक्षीयम् दधि; पुरोडाश्याः, पुरोडाशीयास्तण्डुलाः। अन्नभेद,–[ओदनाय इमे=] ओदन्याः, ओदनीयास्ताण्डुलाः। अपूपादि,-[अपूपाय इदम्=] अपूप्यम्, अपूपीयम्; तण्डुल्यम्, तण्डुलीयम्; यवापूप्यम्, यवापूपीयम्; व्रीहितण्डुल्यम्, व्रीहितण्डुलीयम् ॥२९॥

अव०–अपूप, तण्डुल, ओदन, पृथुक, अभ्यूष, अभ्योष, अवोष, किण्व, मुसल, कटक, शकट, कर्णवेष्टक, ईर्गल, इलाल, स्थूणा, यूप, सूप, दीप, प्रदीप, अश्वपत्र इत्यपूपादिः। "शृते क्षीरे दधि क्षिप्तमामिक्षा कथ्यते बुधैः"। आमिक्षायै इदं दधि इति वाक्यम्। [१]हविस्शब्दात्तु परत्वाद्युगादिपाठान्नित्यमेव यः प्रत्ययः, हविष्य इत्येकमेव रूपम्। पुरोडाशाय इमे पुरोडाश्याः तण्डुला इत्यस्याग्रे एवं सूर्यायै इमे=सूर्याः, सूरीयास्तण्डुलाः। सादेश्च इत्यधिकरात् तदन्तादपि प्रत्ययो भवति,– यवापूप्यम्, यवापूपीयम्। यवानामपूपाः, अथवा यवाश्च अपूपाश्च इति द्वन्द्वः, यवापूपेभ्य इदं=यवापूप्यम्, यवापूपीयम्। ॥ २९॥

## उवर्ण-युगादेर्यः ॥७।१।३०॥

म० वृ०– उवर्णान्तशब्दात् युगादिभ्यश्चा तदोऽर्थे यः स्यात्। ईयापवादः। शङ्कवे इदं=शङ्कव्यं दारु, पिचव्यः कर्पासः, परशव्यमयः, [चरवे इमे=] चरव्यास्तण्डुलाः [सक्तुभ्यः इमाः=] सक्तव्या धानाः। युगादि,-[१]युग्यम्, [२]हविष्यम्, सुयुग्यम्। [३]'गोः स्वरे यः' (६।१।२७) इत्यनेनैव सिद्धे गोग्रहणं तदन्तार्थम्, तेन सुगव्यम्, अतिगव्यमित्यपि सिद्धम्। इह यग्रहणं बाधकबाधनार्थम्[४] ॥३०॥

अव०–[१]युगाय हितमथवा युगार्थं युगोऽस्य स्यादिति वा युग्यम्। [२]हविषे इदं हितम्। हविष्यप्रान्ते सादेश्चेत्यधिकारात् सुयुग्यमिति। युग, हविस्, अष्टका, बर्हिस्, मेधा, स्रुच्, बीज, कूप, क्षर, अक्षर, खद, स्खद, क्षिप, दाश, खर, असुर, दर, अध्वन्, गो इति युगादिगणः। [३]इह युगादिगणप्रान्ते गोशब्दोऽस्ति तमुद्दिश्य 'गोः स्वरे यः' (६।१।२७) इत्यक्षराणि ज्ञेयानि। [४]'हविरन्नभेदा०' (७।१।२९) इत्यनेन यप्रत्ययानुवृत्तौ सत्यामपि 'उवर्णयुगादे०' (७।१।३०) इत्यत्र पुनर्यग्रहणं

किमर्थमिति पराशयः,सूरिराह,–"इह यग्रहण' मिति, हविरन्नभेदशब्दमध्ये उवर्णान्तशब्दानां विकल्पेन 'हविरन्न०' ( ७।१।२९ ) इत्यनेन यः, तं विकल्पं बाधित्वा 'उव०' (७।१।३०) इत्यनेन नित्यो यः, तं नित्ययं बाधित्वा 'चर्मण्यत्र्' ( ७।१।४५ ) इति प्राप्नोति, तमपि चर्मण्यत्रं बाधित्वा उवर्णान्तानाम् 'उवर्णयुगादेर्यः' इत्ययमेव प्रवर्त्तते इति बाधकबाधनार्थमित्यभिप्रायोऽयम् ॥ ३० ॥

## नाभेर्नभ् चादेहांशात् ॥७।१।३१॥

म० वृ०–नाभिशब्दात् देहांशवाचिन आ तदोऽर्थे 'यः' स्यात्, नाभिशब्दस्य च 'नभ्' इत्यादेशः । [1]नाभ्यै नाभये वा हितं= नभ्यमञ्जनम्, नभ्योऽक्षः, [नाभये इदं=] नभ्यं दारु, [2][नभ्यो वृक्षः,] नभ्या शिंशपा । [ इति नभ्यार्थे वृक्षादौ ताच्छब्द्यान्नभ्यत्वम्, इन्द्रार्थायां स्थूणायामिन्द्रवत् । ] अदेहांशादिति किम् ? नाभये हितं=[3]नाभ्यं तैलम् ॥३१॥

अव०–[1]अरकमध्यवर्त्ती अक्षधारणः चक्रावयवः काष्ठविशेषो नाभिरुच्यते, तस्यै नाभ्यै तस्मै वा नाभये हितं = नभ्यमञ्जनम् घृतम्रक्षणम्, घृतचोपटनेन नाभिः सबलो भवति इति नभ्यमञ्जनम् । नभ्योऽक्ष इति भावनाप्रयोजनयोः ( ? ) । यत्तु अरकगण्डरहितं चक्रमेककाष्ठम् पाषाणानयनार्थम्, रहड्ड इति लोके प्रसिद्धम्, तत्र न नाभिर्भवति (इति) तदर्थे यो नभ्यशब्दः स उपचारादेव प्रवर्त्तते । [2]शाखाद्येव नाभये हितं न समस्तो वृक्ष इति प्रश्नार्थः, [तत्राह–] नभ्यो वृक्षः, नभ्या शिंशपा इति ताच्छब्द्यान्नभ्यत्वम्, इन्द्रार्थायां स्थूणायामिन्द्रवत् । [3]'नाभ्यं तैलम्', अत्र वक्ष्यमाणेन 'प्राण्यङ्गरथखलतिल०' (७।१।३७) इत्यनेन यः प्रत्ययः ॥३१॥

## न् चोधसः ॥७।१।३२॥

म० वृ०–ऊधस्शब्दादा तदोऽर्थे 'यः' स्यात्, 'न्' इत्यन्तादेशश्च । ईयापवादो योगः । ऊधसे हितं ऊधन्यम् ॥३२॥

## शुनो वश्चोदूत् [उच ऊच=उदूत्] ॥७।१।३३॥

म० वृ०–शुनः शब्दादा तदोऽर्थे 'यः' स्यात्, वकारश्च उकार ऊकाररूपो भवति । शुने हितं= शुन्यम्, शून्यम् ॥३३॥

## कम्बलान्नाम्नि ॥७।१।३४॥

म० वृ०–कम्बलादा तदोऽर्थे 'यः' स्यात्, नाम्नि=संज्ञाविषये [ ईयापवादः ] । कम्बलोऽस्य स्यात् काम्बल्यं परिमाणमूर्णापलशतमुच्यते । नाम्नीति किम् ? कम्बलीया ऊर्णा ॥ ३४ ॥

## तस्मै हिते ॥७।१।३५॥

म० वृ०–तस्मै इति चतुर्थ्यन्तान्नाम्नो हितेऽर्थे [हित उपकारक इत्यर्थे] 'यथाविकृतं' प्रत्ययो भवति । वत्सेभ्यो हितो=वत्सीयो गोधुक् । [ पित्रे मात्रे हितः] पित्रीयः, मात्रीयः, ओदन्यः, ओदनीयः, अपूप्यः, अपूपीयः इत्यादि[1] ॥३५॥

अव०–[1]आदिशब्दात् हविष्यः,युग्यः, शुन्यः, शून्यः, ऊधन्यः, वत्सेभ्यो न हितमनवत्सीयमिति ॥३५॥

## न राजा-ऽऽचार्य-ब्राह्मण-वृष्णः ॥७।१।३६॥

म० वृ०–राजन्–आचार्य–ब्राह्मण–वृषन् शब्देभ्यस्तस्मै हितेऽधिकृतः प्रत्ययो 'न' स्यात् । राज्ञे हितः, आचार्याय हितः, ब्राह्मणाय हितः, वृष्णे [वृषभाय] हितः इति वाक्यमेव ॥३६॥

## प्राण्यङ्ग-रथ-खल-तिल-यव-वृष-ब्रह्म-माषाद् यः ॥७।१।३७॥

म० वृ०–प्राण्यङ्गवाचिशब्देभ्यः रथादिभ्यश्च तस्मै हिते यः स्यात् । दन्तेभ्यो हितं दन्त्यम्, कर्ण्यम्, [ चक्षुषे हितं= ] चक्षुष्यम्, कण्ठ्यम् ओष्ठ्यम्, नाभ्यम्, रथाय हिता=रथ्या भूमिः, [1]खल्यम्, [2]तिल्यो वायुः, यव्यः तुषारः, [3]वृष्यम्, [4]ब्रह्मण्यः, माष्यः वातः । सादेश्चेत्यधिकारात् [5]राजदन्त्यम्, [6]शङ्खनाभ्यम् ॥३७॥

अव०-[1]खलाय हितं=खल्यम । [2]तिलेभ्यो हितः । [3]वृषाय सण्डाय हितं वृष्यं क्षीरपाणम । [4]ब्रह्मणे हितो=ब्रह्मण्यो देशः । [5]दन्तानां राजानौ राजदन्तं (?राजदन्तौ), राजदन्ताभ्यां हितम् । [6]शङ्खो नाभिश्च देहांशौ, ततः शङ्खश्च नाभिश्च, 'प्राणितूर्याङ्गाणाम्' (३।१।१३७) इति समाहारः, शङ्खनाभिने हितं=शङ्खनाभ्यम् । एवमश्वश्या भूमिः, कृष्णतिल्यः, राजमाष्यः, राजमाषो वल्लः, राजमाषाय हितं=राजमाष्यम् ॥३७॥

अव्यजात् थ्यप् ॥७।१।३८॥

म० वृ०-अवि-अजाभ्यां तस्मै हिते 'थ्यप्' स्यात् । अविभ्यो हितमविथ्यम् , अजथ्यम् , तथा [1]अजथ्या यूतिः ॥३८॥

अव०-[1]अजाभ्यो हिता अजथ्या, अत्र थ्यप-प्रत्ययपकारः पुंवद्भावार्थः । पित्करणसामर्थ्यात् 'स्वाङ्गान्ङीर्जातिः०' (३।२।५६) इत्यनेन पुंवद्भावो निषिद्धोऽपि, 'क्यङ्मानिपित्तद्धिते' (३।२।५०) इत्यनेन अजाशब्दस्य पुंवद्भावः क्रियते, अजथ्या इति सिद्धम् ॥३८॥

चरक-माणवादीनञ् ॥७।१।३९॥

म० वृ०-आभ्यां तस्मै हिते 'ईनञ्' स्यात् । [1]चारकीणः, माणवीनः ॥३९॥

अव०-[1]चरकेण प्रोक्तं वेदं विदन्त्यधीयते वा, तेन प्रोक्ते' (६।३।१८१) अण् , 'तद्वेत्त्य'० (६।२।११७) अण् , 'प्रोक्तात्' (६।२।१२९) इत्यणो लुप् , 'कठादिभ्यो वेदे लुप्' (६।३।१८३), चरकेभ्यो हितश्चारकीणः ॥३९॥

भोगोत्तरपदा-ऽऽत्मभ्यामीनः ॥७।१।४०॥

म० वृ०-भोगोत्तरपदाच्छब्दात् आत्मनशब्दाच्च तस्मै हिते 'ईनः' स्यात् । मातृभोगाय हितो=मातृभोगीणः,[1] [पितृभोगाय हितः=] [2]पितृभोगीणः, [3]आचार्यभोगीनः । आत्मन ,-[4]आत्मनीनः, [5]अनात्मनीनः ॥४०॥

अव०-[1]मातुर्भोगः (मातृभोगः), मातृभोगाय हितः । [2]एवं पितुर्भोगः पितृभोगः, पितृभोगाय हितः । एवं ग्रामण्यो भोगः (ग्रामणिभोगः), ग्रामणिभोगाय हितः, सेनान्यो भोगः (सेनानीभोगः), सेनानीभोगाय हितः, 'वेदूतोऽनव्यय'० (२।४।९८) इत्यनेन ह्रस्वः । [3]आचार्यस्य भोगः (आचार्यभोगः), आचार्यभोगाय हितः । ❀ग्रामणिभोगीनाद्युदाहरणत्रये क्षुभ्नादित्वान्नत्वम् । [4]आत्मनीनः, [5]अनात्मनीनः ; अत्रोदाहरणद्वये 'ईनेऽध्वात्मनोः' (७।४।४८) इत्यनेनान्त्यस्वरादिलोपाभावः , आत्मने हितः , न आत्मने हितः ॥४०॥

पञ्च-सर्व-विश्वाज्जनात् कर्मधारये ॥७।१।४१॥

म० वृ०-पञ्चसर्वविश्वेभ्यः पराज्जनात्कर्मधारये वर्त्तमानात्तस्मै हिते 'ईनः' स्यात् । [1]पञ्चजनीनः । रथकारपञ्चमस्य चातुर्वर्ण्यस्य पञ्चजन इति संज्ञा । [2]सर्वजनीनः, विश्वजनीनः । कर्मधारये इति किम ? [4]पञ्चजनीयः, [5]सर्वजनीयः [विश्वजनीयः] ॥४१॥

अव०-[1]पञ्च च ते जनाश्च=पञ्चजनाः, पञ्चजनेभ्यः पञ्चजनाय वा हितः । [2]पञ्चानां जनः=पञ्चजन इति तत्पुरुषः, तस्मै हितः, 'तस्मै हिते' (७।१।३५) इति ईयः, पञ्चजनीयः । [3]सर्वो जनोऽस्य इति बहुव्रीहिः, सर्वेषां वा जनः इति तत्पुरुषः, तस्मै हितः, 'तस्मै हिते' इति ईयः ॥४१॥

महत्सर्वादिकण् ॥७।१।४२॥

म० वृ०-महतः परात् सर्वाच्च यो जनशब्दस्तदन्तात् कर्मधारये तस्मै हिते इकण् स्यात् । [1]माहाजनिकः, [2]सार्वजनिकः । कर्मधारये इत्येव-[3]महाजनीयः, [4]सर्वजनीयम ॥४२॥

अव०-[1]महते जनाय हितः =माहाजनिकः । [2]सर्वस्मै जनाय हितः= सार्वजनिकः । एवं च सर्व-

❀ इदं चिन्त्यम् , ग्रामणिभोगीनसेनानीभोगीनयोर्णत्वाप्राप्तेः ।

जनशब्दात् पूर्वेण ईनः अनेन च इकण् इति द्वैरूप्यं सर्वजनीयः सर्वजनिक इति । [3]महान् जनोऽस्य, तस्मै हितः । [4]सर्वेषां जनाय हितम्, 'तस्मै हिते (७।१।३५) ईयः ॥४२॥

## सर्वाण्णो वा ॥७।१।४३॥

म० वृ०–जनादिति कर्मधारय इति च निवृत्तम् । सर्वशब्दात्तस्मै हिते 'णो वा' स्यात् । [सर्वस्मै हितं=] सार्वः, [पक्षे ईयः] सर्वीयः ॥४३॥

## [1]परिणामिनि तदर्थे ॥७।१।४४॥

म० वृ०–हिते इति निवृत्तम् । तस्मै इति चतुर्थ्यन्तशब्दात्तदर्थे=चतुर्थ्यन्तार्थार्थे[2] परिणामिनि =कारणद्रव्ये वाच्ये 'यथाधिकृतं' प्रत्ययः स्यात् । अङ्गारीयाणि[3] काष्ठानि, अङ्गारार्थानीत्यर्थः, [शङ्कवे इदम्] शङ्कव्यं दारु,पिचव्यः कर्पासः, ओदन्याः ओदनीयास्तण्डुलाः[4] । परिणामिनीति किम् ? [5]जलाय कूपः, असये कोशी । तदर्थे इति किम् ? [6]मूत्राय यवागूः, उच्चाराय यवान्नम्, पादरोगाय नड्वलोदकम् । यवाग्वादिमूत्रादितया परिणमति, न तु तदर्थम् । तस्मै इत्येव– [7]सक्तूनां धानाः, धानानां यवाः ॥४४॥

अव०–[1]तेनाङ्गारादिरूपेण भवनं=तद्भावः, तद्भावः परिणामः, सोऽस्यास्ति=परिणामी, तस्मिन् परिणामिनि । परिणामि कोऽर्थः ? द्रव्यं परिणामिद्रव्यमुच्यते कारणेन सामग्रीवशतः कार्यरूपपरिणमनमित्यर्थः (?) । [2]चतुर्थ्यन्तस्य शब्दस्यार्थोऽभिधेयोऽङ्गारादिः, तस्मै अयं स चतुर्थ्यन्तार्थार्थः, तस्मिन्, कोऽभिप्रायः ? चतुर्थ्यन्तं यत् पदं तस्य योऽर्थः तस्मिन् काष्ठादिके वाच्ये, अर्थात् विकृतिवाचिनोऽङ्गारादिशब्दात् परतः प्रत्ययो भवतीत्यर्थः । [3]अङ्गारेभ्य इमानि । [4](एवम्) अपूप्यम्, अपूपीयम् पिष्टम् । [5]'जलाय कूपः, असये कोशी; कोशशब्दः खड्गप्रत्याकारवाचकस्त्रिलिङ्गः, 'जातेरयान्त०' (२।४।५४) इति ङी, अत्र हि न कूपो न कोशी जलासिभावेन परिणमेते । [6]तथा मूत्राय यवागूः इत्यादिषु यवाग्वादिद्रव्यं मूत्रादितया परिणमति, न तु तदर्थम् । अथवा तदर्थे इति चतुर्थीविशेषणं ज्ञेयम्, परिणामिनि इत्यध्याहार्यः, पूर्वं हि तदर्थे इति परिणामिशब्दस्य विशेषणमासीदित्यभिप्रायः । तदर्थे या चतुर्थी तदन्तात्प्रत्ययो भवति इति व्याख्यानं सूत्रार्थस्य कर्त्तव्यम् । मूत्राय यवागूः सम्पद्यते इत्यर्थे चतुर्थी अत्रास्ति, न तु तदर्थे; इति हेतोर्मूत्राय सम्पद्यते यवागूः इत्यादिषु प्रत्ययो न सञ्जातः । [7]सक्तूनां धाना इत्यादिषु तादर्थ्ये सत्यपि सम्बन्धमात्रविवक्षायां षष्ठी भवति, यथा– गुरोरिदं गुर्वर्थमिति । भवति च सतोऽपि अविवक्षा, यथा–नुदरा कन्या, तथाऽत्रापि ॥४४॥

## चर्मण्यञ् ॥७।१।४५॥

म० वृ०–तस्मै इति चतुर्थ्यन्तात्परिणामिनि तदर्थे चर्मणि वाच्ये–'ऽञ्' स्यात् । [1]वार्ध्रं चर्म, [2]वारत्रं चर्म । [3]सनङ्गव्यं चर्म, 'उवर्णयुगादेर्यः' (७।१।३० । इति) य एव स्यात् ॥४५॥

अव०–[1]वर्ध्राय [2]वरत्राय इदम् । [3]सनङ्गुश्चर्मविकारः ॥४५॥

## [1]ऋषभोपानहाञ्ञ्यः ॥७।१।४६॥

म० वृ०–[2]आभ्यां परिणामिनि तदर्थे 'ञ्यः' स्यात् । ऋषभाय अयमार्षभ्यो वत्सः, औपानह्यं काष्ठं चर्म वा ॥४६॥

अव०–ऋषभश्च उपानच्च=ऋषभोपानहम्, 'चवर्गदषहः समाहारे' (७।३।९८) इत्यनेन अत्समासान्तः, तस्मात् ऋषभोपानहात् । [2]चतुर्थ्यन्ताभ्याम् । औपानह्यं चर्म, अत्र चर्मण्यपि परिणामिनि वाच्ये परत्वात् अयमेव='ऋषभोपानहा०' इत्यनेन ञ्य एव भवति, न तु 'चर्मण्यञ्' (७।१।४५) ॥४६॥

## छदिर्बलेरेयण् ॥७।१।४७॥

म० वृ०–छदिस्–बलिभ्याम् [चतुर्थ्यन्ताभ्याम्] परिणामिनि तदर्थे 'एयण्' स्यात् । छदिषे इमानि=छादिषेयाणि तृणानि, बलये इमे=बालेयास्तण्डुलाः ॥४७॥

प्रब०–चमर्ण्यपि वाक्ये परत्वादयमेव एयण् भवति, न तु 'चर्मण्यव्' ( ७।१।४५ ); छादिषेयं चर्म ।।४७।।

## परिखाऽस्य स्यात् ।।७।१।४८।।

म० वृ०—परिखाशब्दान्निर्देशादेव प्रथमान्तादस्येति षष्ठ्यर्थे 'एयण्' स्यात् ; या परिखा सा चेत् स्यादिति योग्यतया सम्भाव्यते । परिखा आसामिष्टकानां स्यादिति पारिखेय्य इष्टकाः । स्यादिति किम् ? परिखा इष्टकानाम् । परिणामिनीत्येव– परिखाऽस्य नगरस्य स्यात् ।। ४८ ।।

---

प्रब०–'स्यात्' इत्यत्र 'सम्भावनेऽलमर्थे तदर्थानुक्तौ' (५।४।२२) इत्यनेन सम्भावनेऽर्थे सप्तमी । तथाहि इष्टकानां बहुत्वेन सम्भाव्यते एतत् परिखा आसामिष्टकानां स्यात् । वक्ष्यमाणेन 'तद्' (७।१।५०) इति सूत्रेण यथाधिकृतस्य प्रत्ययस्य विधास्यमानत्वात् इह'परिखाऽस्य०' इति सूत्रे उत्तरत्र 'अत्र च' इति सूत्रेऽपि एयणेव प्रत्ययोऽनुवर्त्तते, पृथग्योगद्वयकरणात् , अन्यथा वक्ष्यमाणेन 'तद्' (७।१।५०) इति सूत्रेण यथाधिकृतप्रत्ययस्य सिद्धत्वात् इदं 'परिखा०' ['अत्र च'] इति सूत्रद्वयमपि व्यर्थं स्यात् ।।४८।।

## अत्र च ।।७।१।४९।।

म० वृ०–परिखाशब्दादत्रेति सप्तम्यर्थे 'एयण्' स्यात् , सा चेत् परिखा स्यादिति सम्भाव्यते । परिखा अस्यां स्यात् पारिखेयी भूमिः । चकार उत्तरसूत्रेऽस्य स्यादिति परिणामिनि अत्र स्यादिति च उभयस्याप्यनुवृत्त्यर्थः ।।४९।।

---

प्रब०–'अत्र च' (७।१।४९) इति पृथग्योगकरणं परिणामिनीत्यस्य इह असम्बन्धार्थम् ।।४९।।

## तद् ।।७।१।५०।।

म० वृ०–तदिति प्रथमान्तादस्येति षष्ठ्यर्थे परिणामिनि अत्रेति सप्तम्यर्थे च 'यथाधिकृतं प्रत्ययः स्यात् ,यत्प्रथमान्तं तच्चेत् स्यादिति सम्भाव्यते । प्राकार आसामिष्टकानां स्यात्=प्राकारीया इष्टकाः, [प्रासादोऽस्य दारुणः स्यात्=] प्रासादीयं दारु, प्रासादोऽस्मिन् देशे स्यात्=प्रासादीयो देशः, प्रासादीया भूमिः । एवं परशुरस्याऽयसः स्यात्= पारशव्यमयः । ईयस्य पूर्णोऽवधिः ।।५०।।

## तस्यार्हे क्रियायां वत् ।।७।१।५१।।

म० वृ०–तस्येति षष्ठ्यन्तादर्हेऽर्थे 'वत्' स्यात् , यदर्हं तच्चेत् क्रिया भवति । राज्ञोऽर्हं=राजवद् वृत्तमस्य राज्ञः, राजत्वस्य युक्तमस्य राज्ञो वृत्तमित्यर्थः, [साधोरर्हम्=] साधुवत् , [कुलीनस्यार्हम्=] कुलीनवत् . "स शिरांसि द्विषामाजौ चिच्छेद कृतहस्तवत्" । कृतहस्तस्य शिक्षितास्त्रस्यार्हम् ] । क्रियायामिति किम् ? शतस्यार्हो मैत्रः, राज्ञोऽर्हो मणिः ।

## स्यादेरिवे ।।७।१।५२।।

म० वृ०–स्याद्यन्तादिवार्थे 'वत्' स्यात् ; इवशब्दः सादृश्यं द्योतयति, तच्चेत्सादृश्यं क्रियायां क्रियाविषयं भवति । [ अश्व इव= ] अश्ववद्धावति चैत्रः, [देवमिव=] देववत्पश्यन्ति मुनिम्[१] । स्यादेरिति किम् ? [२]गच्छच्छाल इव, [३]अधीयानो नृत्यतीव । [४]क्रियायामित्येव– गौरिव गवयः, मैत्र इव गोमान् , हस्तीव स्थूलः[५] । चैत्रवद्गोमानिति अत्र तुल्यायामस्तौ भवतौ च क्रियायामध्याह्रियमाणायां प्रत्ययो भविष्यति ।।५२।।

---

प्रब०– [१]देववत्पश्यन्ति मुनिम् इत्यस्याग्रे साधुवत् साधुवदाचरितं मैत्रेण, ब्राह्मणायेव ब्राह्मणवद्दत्तं क्षत्रियाय, पर्वतादिव पर्वतवदवरोहति आसनात् इति पञ्चम्यन्तविभक्तिं यावत् उपमानोपमेयसादृश्यार्थे 'स्यादेरिवे' इत्यनेन वत् क्रियते । षष्ठीसप्तम्यर्थे उत्तरसूत्रद्वयेन वत् भवतीत्यर्थः । [२]मन्दत्वादभिमतदेशस्याऽप्राप्तेः इत्यर्थः । [३]अधीयानो नृत्यतीव, अस्यायं भावः– अङ्गविकारप्रायत्वात् , अङ्गविकारैः प्रायः (=अङ्गविकारप्रायः), तस्य भावः (अङ्गविकार)प्रायत्वम् , तस्मात् । [४]क्रियाविषयसादृश्ये । [५]एषु द्रव्यगुणविषये सादृश्ये वत् प्रत्ययो न भवति ।।५२।।

## तत्र ।।७।१।५३।।

म० वृ०–तत्रेति सप्तम्यन्तादिवार्थे 'वत्' स्यात् मथुरायामिव=मथुरावत् पाटलिपुत्रे प्रासादाः । गुरुवद् गुरुपुत्रे वर्त्तितव्यमित्यादिषु क्रियासादृश्ये पूर्वेणैव सिद्धम् । अक्रियार्थस्त्वारम्भोऽयम् ।।५३।।

अव०–तत्र,पञ्चमीङसिः सूत्रत्वात् (लोपः)। एवं तस्य 卐इत्यत्रापि पञ्चमीङसिः. सूत्रत्वात् लोपः ।।५३।।

## तस्य ।।७।१।५४।।

म० वृ०–तस्येति षष्ठ्यन्तादिवार्थे 'वत्'स्यात् । चैत्रस्येव मैत्रस्य गावः चैत्रवत्, विप्रस्येव क्षत्रियस्य दन्ता विप्रवत् । अक्रियाविषयसादृश्यार्थं आरम्भः । योगविभाग उत्तरार्थः ।।५४।।

## भावे त्व-तल् ।।७।१।५५।।

म० वृ०–तस्येति षष्ठ्यन्ताद् भावेऽर्थे 'त्वतलौ' भवतः । [1]भवतोऽस्मादभिधान-[2]प्रत्ययाविति भावः शब्दस्य प्रवृत्तिनिमित्तं द्रव्यसंसर्गी भेदको गुणः । यदाहुः,–"यस्य गुणस्य हि भावाद् [3]द्रव्ये शब्दनि-[4]वेशस्तदभिधाने[5]त्वतलौ" । तत्र–
[6]"जातिगुणाऽजातिगुणे,समासकृत्तद्धितात्तु सम्बन्धे; डित्थादेः स्वे रूपे, त्वतलादीनां विधिर्भवति" । तत्र जातिवचनेभ्यो जातौ वाच्ये(?वाच्यायां)- गोशब्दस्य भावो=गोत्वम् , गोता ; अत्र गोशब्दजातिर्भावः । गोरर्थस्य भावो=गोत्वम् , गोता ; अत्र गवार्थजातिर्भावः । [शुक्लस्य गुणस्य भावः] शुक्लत्वम् , शुक्लताः (अत्र) शुक्लगुणजातिः । एवं रूपत्वम् , रसत्वम् ; अत्र रूपादिगुणजातिः[7]। [8]कत्वम् ।[9]कवर्गत्वम् । गुणशब्देभ्यो गुणे [ त्वतलौ भवतः ]– [10]शुक्लस्य पटस्य भावः शुक्लत्वम् ,[11]शुक्लतरत्वम् ,अणुत्वम्,[12]महत्त्वम् , [13]एकत्वम् ,द्वित्वम् ,पृथक्त्वम् ,[14]नानात्वम् ,उच्चैस्त्वम् [15] । पट्वादयोऽपि गुणा[16] एव,–पटुत्वम् , मृदुत्वम् । समासात्सम्बन्धे–राजपुरुषत्वम् , [17]अत्र स्वस्वामिसम्बन्धः । कृतः सम्बन्धे– [18]पाचकत्वम् , कार्यत्वम् , साधनत्वम् ।[19]तद्धितात् सम्बन्धे– औपगवत्वम् , दण्डित्वम् ।[20]डित्थादेः स्वरूपे– डित्थस्य भावः स्वरूपत्वम्=(डित्थत्वम् ,)डवित्थत्वम ।[21]एवं गोजातेर्भावो गोत्वम् , [22]शुक्लत्वम् , [23]देवदत्तत्वम् , [24]चन्द्रत्वम , [25]दिक्त्वम् [26]आकाशत्वम् , [27]अभावत्वम् । तथा सतो भावः सत्त्वम्, सत्ता, विद्यमानत्वम्; [28]अत्र हि जातावेव भावप्रत्ययः । [29]'त्वे वा' (६।१।८६) इति वचनात् स्त्रीपुंसाभ्यां पक्षे नञस्नञावपि भवतः, स्त्रीत्वम् , स्त्रीता, स्त्रैणम् ; पुंस्त्वम् , पुंस्ता, पौंस्नम । लकारः स्त्र्यर्थः । 'त्वान्तं च ॐआत्वाच्त्वादि'-रिति नपुंसकम् ।।५४।।

अव०–[1]यत् भवतोऽस्मादित्याद्यक्षरैर्भावस्वरूपं दर्शितम् ,तदेव सुव्यक्तं दर्शयति–शब्दस्य प्रवृत्तीत्यादि, देशकालस्वभावभिन्नेषु नानाविधगवादिपिण्डेषु इयं गौः इयं गौः (इति) या एका शब्दस्य प्रवृत्तिर्लोके भवति तत्र शब्दप्रवृत्तौ निमित्तं कारणम् , तथा द्रव्यसंसर्गी , कोऽर्थः ? द्रव्ये गोव्यक्तौ दलयादिगोपिण्डादौ विशेष्यरूप संसर्गी समवेतः सम्बद्धः, तथा भेदकोऽन्येभ्योऽश्वादिविजातीयेभ्यो भेदको=व्यवच्छेदकः, यतो विशेषणं व्यवच्छेदकं भवति, यतोऽश्वादिभ्यो गोत्वविशेषणैव गौर्व्यावर्त्यते, तथा गुण इति द्रव्यादिवशतयाऽमुख्यः, एवंविधो यो गुणः विशेषणं शब्दप्रवृत्तिनिमित्तं द्रव्यसंसर्गी भेदकः स एव भाव उच्यते इति परमार्थः । [2]यद्यपि पूर्वं ज्ञानं भवति पश्चात् शब्दः प्रवर्त्तते इति प्रक्रमः, यतोऽभिधानं कोऽर्थः ? शब्दः, प्रत्ययः कोऽर्थः ?गवानुकारानुगतं ज्ञानमुत्पद्यते, तथापि स्वराद्यन्तत्वादभिधानशब्दस्य 'लघ्वक्षरासखीदुत्०' (३।१।१६०) इत्यादिसूत्रेण प्रत्ययशब्दात् पूर्वं निपातः ।[3]द्रव्ये कोऽर्थः ? गवादौ विशेष्यरूपे । [4]स भाव उच्यते इति सम्बन्धः । [5]तदभिधाने=तस्य गुणस्याभिधाने, तस्मिन् गुणे वाच्ये । [6]'जातिगुणाद्' इति, यथासंख्यं जातिनिमित्तात् शब्दात् जातौ वाच्यायां गुणनिमित्तात् शब्दात् गुणे वाच्ये त्वतलौ भवत इति वाक्यसम्बन्धः । [7]रूपादिगुणजातिर्भावोऽस्ति इति योगः । [8]कत्वम् , खत्वम् , गत्वम् ;

卐'तस्य' (७।१।५४) इत्युत्तरसूत्रे । ॐ श्रीहैमलिङ्गानुशासने क्लीबलिङ्गप्रकरणे नवमे श्लोके ।

अत्र भिन्नवर्णव्यक्तिसमवेता जातिर्भावोऽस्तीति योज्यम् ।[९]कवर्गत्वम् ,चवर्गत्वम् : अत्र हि ककारचकारादिवर्णव्यक्तिसमवेता कत्वखत्वादिजातिसंहतिर्भावोऽस्ति । [१०]शुक्लस्य पटस्य भावः=शुक्लत्वम् , अत्र शुक्लो गुणो भावो ज्ञेयः ।[११]शुक्लतरत्वम् शुक्लतमत्वम् ; अत्र तु स एव गुणः प्रकृष्टो भावः । [१२]अणुत्वम् , महत्त्वम् ; अत्र परिमाणलक्षणो भावो मन्तव्यः । [१३]एकत्वम् , अत्र तु संख्यालक्षणो भावः । [१४]पृथक्त्वम् , नानात्वम् ; अत्र भेदलक्षणो भावः । [१५]उच्चैस्त्वम् , नीचैस्त्वम्; अत्रोन्नतादिलक्षणो भावो विचार्यः । ननु पृथगादिशब्दानामव्ययानामसत्त्ववाचित्वात्कथं पृथक्त्वम् , नानात्वम् , उच्चैस्त्वमित्यादिषु भावप्रत्ययः ? नहि असत्त्वादसत्त्वे प्रत्ययः, भावो ह्यसत्त्वरूपः, सत्यम् , पृथक्त्वमस्य इति वृत्तौ पृथगादिशब्दाः पृथग्भूतानर्थे सत्त्वे वर्त्तन्ते इति त्वतलौ प्रत्ययौ जातौ । समासः(?विग्रहः) इत्थं-पृथग्भूतस्य भावः=पृथक्त्वमित्यादि ।[१६]इति पटुत्वमित्यादिषु च गुणो भावः । त्वतलमिति योगः(?)। [१७]राज्ञः पुरुष इति वाक्ये षष्ठीविभक्त्या पुरुषो धर्म्मी अभिधीयते, त्वप्रत्ययेन तु तयो राजपुरुषयोः पृथग्भूतः सम्बन्धः । [१८]पाचकत्वमित्यादिषु पचनक्रियातत्कर्त्रोः समवायः सम्बन्धोऽभिधीयते इत्यर्थः । [१९]तद्धितवृत्तावपि औपगवत्वमित्यादौ उपगुतदपत्ययोः दण्डपुरुषयोः पृथग्भूतः सम्बन्धः ।[२०]'डित्थादेः स्वे रूपे'इत्यादि, डित्थादेस्तु यदृच्छाशब्दादन्यस्य प्रवृत्तिनिमित्तस्याऽसम्भवात्तस्मिन्नेवासाधारणे स्वरूपे वाच्ये डित्थशब्दवाच्यतयाऽध्यवसितभेदेऽव्यतिरिक्तेऽभिन्नेऽपि व्यतिरिक्ते इव अस्य डित्थ इति नाम इति कल्पिते इव, शब्दप्रत्ययबलात् बुद्ध्यावगृहीते धर्मे त्वतल्प्रत्ययो भवतीत्यर्थः ।[२१]एवं गोजातेर्भावो गोत्वम् ,अत्र गोशब्दस्य कोऽर्थः ? गोजातेः स्वरूपम् ।तथा गोशब्देन कथं गोजातिरुच्यते ? सत्यम् ,उपचारात् ,यो गोजातिः स एव गोशब्द इति । [२२]शुक्लस्य जातेः भावः शुक्लत्वम् ,अत्र शुक्लशब्दस्य स्वरूपं भावो ज्ञेयः । [२३]देवदत्तत्वम् , अत्र वयोऽवस्थादिभेदभिन्नव्यक्तिस्वरूपम् (भावः)। [२४]चन्द्रत्वम् ,सूर्यत्वम् ;अत्र एककलादिषोडशान्तकलाविशेषप्रकाशनस्वरूपम् ,अभ्रच्छन्नादिविशेषस्वरूपम् (भावः)। [२५]आकाशदिशोर्नित्यव्यापकस्वरूपं भावः। [२६]अभावत्वम् ,अत्र निषेधात्मकं भावस्वरूपं भावो ज्ञेयः । [२७]अत्र हि जातावेव भावप्रत्यय इत्यस्याग्रे नहि सद्वस्तु सत्तासम्बन्धं व्यभिचरति इति सत्तासम्बन्धानपेक्षणात् जातावेव त्वतल्प्रत्ययो भवति, न सम्बन्धे, सत्सु विद्यमानेषु च पदार्थेषु नित्यसमवायिनी ........................ (शब्दप्रवृत्तिहेतुः सत्तैव भावप्रत्ययवाच्या, न तु ) सत्सत्त्वयोः सम्बन्धः कोऽप्यस्ति इति भावः। [२८]'त्वे वा' ( ६।१।२६ ) इति सूत्रं प्रथमपादेऽस्ति, तत्र भावेऽर्थे त्वप्रत्ययविषये नञ्स्नञौ भवतः, वावचनात् त्वतलावपि भवत इति सूत्रार्थः ॥५५॥

## प्राक् त्वादगडुलादेः ॥७।१।५६॥

म० वृ०—त्वतलित्यनुवर्त्तते । वक्ष्यमाणं 'ब्रह्मणस्त्वः' (७।१।७७) इति सूत्रं यावत् त्वतलावधिकृतौ ज्ञातव्यौ, गडुलादीन् वर्जयित्वा । अपवादसूत्रैः सह समावेशार्थः कर्मण्यर्थेऽपि विधानार्थश्च त्वतलोरधिकार आरभ्यते । अगडुलादेरिति किम् ? [१]गाडुल्यम् । गडुलादेरपि केचित्त्वतलाविच्छन्ति,-गडुलत्वम् , गडुलता ॥५६॥

---

प्रव०–गडुल, विशस्त, दायाद, वालिश, संवादिन् , बहुभाषिन् , शीर्पघातिन् , शीर्षघातिन् , कमण्डलु इति गडुलादिगणः । गडुलादिभ्यो राजादित्वात् ट्यण् भवति । कमण्डलुपरात् 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) इत्यण् । अत्र भावाधिकारे अग्रे 'ब्रह्मणस्त्वः' (७।१।७७) इति सूत्रं वक्ष्यते, तत्र सूत्रे त्वप्रत्यय , तस्मात् त्वप्रत्ययात् प्राक् अर्वाक् प्रोक्तम् । प्राक्त्वशब्दस्यार्थो वृत्तिमध्ये वक्ष्यमाणं 'ब्रह्मणस्त्वः' (७।१।७७) इत्यक्षररचनया प्रकटो लिखितोऽस्ति । अपवादसूत्रेषु प्रवर्तमानेषु इदमपि 'भावे त्वतल्' सूत्रमुत्सर्गसूत्रं प्रवर्तते इत्यर्थः । [१]गडुलस्य भावः । [२]एवं कामण्डलवम् ॥५६॥

## [१]नञ्तत्पुरुषादबुधादेः ॥७।१।५७॥

म०वृ०–[२]'ब्रह्मणस्त्वः' (७।१।७७) इत्यतोऽर्वाग् नञ्पूर्वात्तत्पुरुषात् [३]बुधाद्यन्तवर्जितात्त्वतलौ स्याता-मित्यधिकारो वेदितव्यः । ट्यणादिबाधनार्थम् । न शुक्लोऽशुक्लस्तस्य भावः अशुक्लत्वम्, अशुक्लता; अत्र ट्यण्बाधया त्वतलावेव [ट्यण्प्रत्ययं बाधित्वा त्वतलौ प्रवृत्तावित्यर्थः] । [४]अशौक्ल्यम्, अत्र ट्यणन्तेन सह समासः । एवमपतेर्भावः कर्म वा अपतित्वम्, अपतिता। अनाधिपत्यम्, अगाणपत्यम्; अत्रापि ट्यण न्तेन समासः । इत्यादिप्रयोगाः । नञिति किम्? प्राजापत्यम् । तत्पुरुषादितिकिम्? आपत्यम्, आरा-ज्यम् । अबुधादेरिति किम्? [न बुधः=अबुधस्तस्य भावः कर्म वा] आबुध्यम् ॥५७॥

अव०–[१]नञ्पूर्वस्तत्पुरुषः=नञ्तत्पुरुषः, तस्मात् । [२]प्राक् त्वात् इत्यस्यार्थोऽयम् । [३]बुध, चतुर, सङ्गत, लवण, वड, कत, रस, लस, यथा, तथा, यथातथ, यथापुर, ईश्वर, क्षेत्रज्ञ, संवादिन्, संवेशिन्, सम्भाषिन्, बहुभाषिन्, शीर्षघातिन्, समस्थ, विषमस्थ, पुरस्थ, परस्थ, मध्यमस्थ, मध्यस्थ, दुष्पुरुष, कापुरुष, विशाल इति बुधादिगणः । एभ्यो राजादित्वान् ट्यण् । [४]शुक्लस्य भावः कर्म वा=शौक्ल्यम्, 'वर्णदृढा०' (७।१।५९) इति ट्यण्, पश्चात् ट्यणन्तशौक्ल्यशब्देन सह नञ्समासः,–न शौक्ल्यमशौक्ल्यमिति युक्त्या त्वतलौ न प्राप्तौ, समासात्पुनर्यदि ट्यण् स्यात् तदा नञोऽकारस्य वृद्धिः प्रसज्येत । अराजता, अमूर्खता, अमूर्खत्वम्; एषु 'पतिराजान्त०'(७।१।६०) इति ट्यणं बाधित्वा त्वतलौ जातौ । अस्थविरत्वम्, अत्र 'युवादेरण्' (७।१।६७) इत्यणो बाधया त्वतलौ । अकिशोरत्वम्, अत्र'प्राणिजातिवयोऽर्थादञ्' (७।१।६६) इत्यञं बाधित्वा त्वतलौ । अहायनत्वम्, अत्र 'हायनान्तात्' (७।१।६८) इत्यणं बाधित्वा त्वतलौ । अपटुत्वम्, अत्र 'य्वृवर्णा०' (७।१।६९) इत्यणं बाधित्वा, अरमणीयकत्वम्,(अत्र) 'योपान्त्याद्०' (७।१।७२ इति ) अकञं बाधित्वा त्वतलौ प्रवृत्तौ ॥५७॥

## पृथ्वादेरिमन् वा ॥७।१।५८॥

म०वृ०–पृथु इत्यादिभ्यो भावेऽर्थे इमन् वा स्यात् । अधिकारवशात् त्वतलौ च । यश्चाणादिः प्राप्नोति [य्वृवर्णाद्(७।२।६९) इत्यादिविहितः] सोऽपि(वा-)वचनाद् भवति । [१]प्रथिमा,पृथुत्वम्,पृथुता,पार्थवम्; एवं [२]म्रदिमा, मृदुत्वम्, मृदुता, मार्दवम् ['य्वृवर्णा०' (७।१।६९) इत्यण्]; [३]बंहिमा, बहुलत्वम्, बहुलता, बाहुल्यम् [ 'वर्णा०' ( ७।१।५९)ट्यण् ] ॥ ५८ ॥

अव०–पृथु, मृदु, पटु, महि, तनु, लघु, बहु, साधु आशु, उरु, गुरु, खण्डु, पाण्डु, बहुल, चण्ड, खण्ड, अकिञ्चन, बाल, होड, पाक, वत्स, मन्द, स्वादु, ऋजु, वृष, कटु, ह्रस्व, दीर्घ, क्षिप्र, क्षुद्र, प्रिय, महत्, अणु, चारु, वक्र, वृद्ध, काल, तृप्र इति पृथ्वादिगणः । [१]पृथोर्भावः=प्रथिमा, मृदोर्भावो=म्रदिमा, 'पृथ्वादेरिमन्वा'(७।२।५८), पश्चात् 'पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः' (७।४।३९) इति सूत्रेण ऋकारस्य र आदेशः । [३]'बंहिमा', अत्र बहुलशब्दः, बहुलस्य भावो बंहिमा, 'पृथ्वादेरिमन्वा', ततः 'प्रियस्थिरस्फिरोरु०' (७।४।३८) इत्यादिना बहुलस्य बंह् आदेशः ॥५८॥

## वर्णदृढादिभ्यष्ट्यण् च वा ॥७।१।५९॥

म० वृ०–वर्णविशेषवाचिभ्यः [१]दृढादिभ्यश्च भावे ट्यणिमनौ वा स्याताम्, त्वतलौ च । अणादिप्रत्ययोऽपि वावचनाद् भवति । शौक्ल्यम्, शुक्लिमा, शुक्लत्वम्, शुक्लता[२] । [३]शैत्यम्, शितिमा, शितित्वम्, शितिता, [४]शैतम् ['य्वृवर्णा०' (७।१।६९) इत्यण्] । दृढादि,–दार्ढ्यम्, द्रढिमा, दृढत्वम्, दृढता[५] । बहुवचनादाकृतिगणोऽयम् । तेन स्थैर्यं स्थेमेत्याद्यपि सिद्धम् ॥५९॥

अव०–[१]दृढ, वृढ, परिवृढ, कृश, भृश, चुक्र, शुक्र, आम्र ताम्र, अम्ल, लवण, शीत, उष्ण, तृष्णा, जड, बधिर, मूक, मूर्ख, पण्डित, मधुर, वियात, विलात, विमनस्, विशारद, विमति, सम्मति, संमनस् इति दृढादिगणः । बहुवचनमाकृतिगणा-

र्थम्। तेन स्थैर्यम्, स्थिरता, स्थेमा इत्याद्यपि सिद्धम्। [२](एवं) कार्ष्ण्यम्, कृष्णत्वम्, कृष्णिमा। [३]शितेर्भावः। [४]कथं पाञ्चरूप्यम्? पञ्चरूपाण्येव पाञ्चरूप्यम्, 'भेषजादिभ्यष्ट्यण्' (७।२।१६४)। शैतमित्यस्याग्रे पाञ्चरूप्यम् ज्ञेयम्। [५]एवं वार्ढ्यम्, व्रढिमा, वृढत्वम्, पारिवृढ्यम्, वैमत्यम्, विमतिता, विमतित्वम्, वैमतम्, सांमत्यम्, संमतिमा, सांमतम्। टकारो ङ्यर्थः– अर्हतो भावः कर्म वा=आर्हन्त्यम्, स्त्री चेत् आर्हन्ती, अत्र ङी। तथा औचिती, यथाकामी, सामग्री, शैली, पारिख्याती, आनुपूर्वी; एते षड्प्रयोगा राजादि (गणे) द्रष्टव्याः ॥ ५९ ॥

## [१]पतिराजान्त-[२]गुणाङ्ग-राजादिभ्यः कर्मणि च ॥७।१।६०॥

म० वृ०–पत्यन्तेभ्यः, राजान्तेभ्यः, गुणाङ्गेभ्यो राजादिभ्यश्च षष्ठ्यन्तेभ्यो भावे कर्मणि च क्रियायां 'ट्यण्' स्यात्, त्वतलौ च। पत्यन्त,– अधिपतेर्भावः कर्म वा=आधिपत्यम्, अधिपतित्वम्, अधिपतिता; नारपत्यम्, बार्हस्पत्यम्, प्राजापत्यम्, सैनापत्यम्। राजान्त,– आधिराज्यम्, सौराज्यम्, यौवराज्यम्। गुणाङ्ग,– मौढ्यम्, मूढता, मूढत्वम्, मौर्ख्यम्; वैदुष्यम्। राजादि,– राज्यम्, राजत्वम्, राजता; काव्यम्, कवित्वम्, कविता ॥६०॥

---

अव०–राजन्, कवि, ब्राह्मणदण्ड, माणव, दण्डमाणव, वाडव, चोर, धूर्त्त, आराधय, विराधय, उपराधय, अपिराधय, अनृशंस, कुशल, चपल, निपुण, पिशुन, चौक्ष, स्वस्थ, विश्वस्त, विफल, विशस्य, पुरोहित, ग्रामिक, खण्डिक, दण्डिक, कर्मिक, चर्मिक, वर्मिक, शिलिक, सुतक, अञ्जनिक, अञ्जनिक, अञ्जलिक, छत्रिक, सुचक, सुहित, बाल, मन्द, होड इति राजादिराकृतिगणः। बहुवचनमाकृतिगणार्थम्। तेन औचिती, यथाकामी, सामग्री, शैली, पारिख्याती, आनुपूर्वी इत्यपि राजादिगणे द्रष्टव्याः। [१]पतिश्च राजा च=पतिराजानौ, पतिराजानावन्ते यस्य शब्दस्य स पतिराजान्तः, पतिराजान्ताश्च गुणाङ्गाश्च राजादयश्च, तेभ्यः। [२]गुणाङ्ग इति किमुच्यते? अत्राह– द्रव्याश्रयी गुणः, एवंविधो गुणोऽङ्गो निमित्तं येषां प्रवृत्तौ ते गुणाङ्गाः, गुणद्वारेण ये गुणिनि वर्त्तन्ते न तु गुणवचना एव (ते गुणाङ्गा उच्यन्ते) ॥६०॥

## अर्हतस्तोऽन्त् च ॥७।१।६१॥

म० वृ०–अर्हत्शब्दाद्भावे कर्मणि चार्थे 'ट्यण्' स्यात्, तत्संनियोगे च तकारस्य 'न्त्' इत्यादेशः स्यात्। [१]आर्हन्त्यम्, आर्हन्ती। त्वतलौ– अर्हत्त्वम्, अर्हत्ता ॥६१॥

---

अव०–[१]अरिहननात् अर्हन्, अथवा रजोहननात् अर्हन्, यदि वा रहस्याभावात् अर्हन्, सर्वत्र पृषोदरादित्वात् साध्यसिद्धिः, अथवा चतुस्त्रिंशदतिशयान् सुरेन्द्रादिकृतां पूजां वा अर्हति इति अर्हन्, अर्हतो भावः कर्म वा आर्हन्त्यम्, स्त्री चेत् आर्हन्ती। अर्हत इदमार्हतं शासनम्, अर्हत इयं आर्हती मूर्त्तिः दीक्षा पूजा वा, अत्र तु 'तस्येदम्' (६।३।१६०) अनेन अण् प्रत्यय एव, न तु ट्यण् ॥६१॥

## सहायाद्वा ॥७।१।६२॥

म० वृ०–सहायाद्भावे कर्मणि च 'ट्यण् वा' स्यात्। वावचनात् पक्षेऽकञ् त्वतलौ च। साहाय्यम्, [१]साहायकम्, सहायत्वम् ॥६२॥

---

अव०–[१]सहायस्य भावः कर्म वा– 'योपान्त्याद् गुरूपोत्तमा०' (७।१।७२) इति वक्ष्यमाणसूत्रेण अकञ् ॥६२॥

## सखि-वणिग्-दूताद्यः ॥७।१।६३॥

म० वृ०–एभ्यो भावे कर्मणि च 'यः स्यात्त्वतलौ च'। [सख्युर्भावः कर्म वा] सख्यम्, सखित्वम्, [१]वणिज्या, वणिज्यम्, वणिक्त्वम्, वणिक्ता, दूत्यम्, दूतत्वम्[२]। राजादेराकृतिगणत्वात् ट्यणपि– वाणिज्यम्, दौत्यम् ॥६३॥

---

अव०–[१]वणिजो भावः कर्म वा=वणिज्या,

वणिज्यम्, ॐ "मृगव्यचव्ये च वणिज्यवीर्येनासी रगोत्रे"-ति पाठात् क्लीनपुंसकत्वम् । [2] (एवम्) दूतता । [3] पतिराजान्तगुणाङ्गराजादिभ्य०' (७।१।६०) इति टयण् ॥६३॥

## स्तेनान्नलुक् च ॥७।१।६४॥

म० वृ०–स्तेनाद्भावे कर्मणि च 'यः' स्यात्, तद्योगे नकारस्य लुक् स्यात् । त्वतलौ च । [1] स्तेयम्, स्तेनत्वम्, स्तेनता । राजादि(गणे)दर्शनात् स्तैन्यमित्यपि ॥६४॥

अव०–[1] स्तेनस्य भावः कर्म वा ॥६४॥

## कपि-ज्ञातेरेयण् ॥७।१।६५॥

म० वृ०–कपिज्ञातिभ्यां भावे कर्मणि 'एयण् त्वतल् च' स्यात् । [कपेर्भावः कर्म वा=] कापेयम्, कपित्वम्; ज्ञातेयम्, ज्ञातित्वम्, ज्ञातिता ॥६५॥

अव०–कपेरिकारान्तत्वात् 'प्राणिजातिवयो०' (७।१।६६) इत्यञं बाधित्वा परत्वात् 'ऋवर्णा०' (७।१।६९) इति वक्ष्यमाणे अणि प्राप्ते (तथा ज्ञातेः प्राणिजातित्वात् 'प्राणिजातिवयो०' (७।१।६६) इति अञि प्राप्ते) 'कपिज्ञाते०' (७।१।६५) इदं सूत्रं कृतम् । अण् अञ् (इति) द्वयमपि बाधित्वा एयणेव प्रवर्त्तते इत्यर्थः ॥६५॥

## [1] प्राणिजातिवयोऽर्थादञ् ॥७।१।६६॥

म० वृ०–प्राणिजातिवाचिनो वयोवचनाच्च भावे कर्मणि 'अञ् त्व-तल्' स्यात् । [अश्वस्य भावः कर्म वा=] आश्वम्, माहिषम्, [2] द्वैपम्, [3] हास्तम् । वयोऽर्थ,– कौमारम्, कुमारत्वम्; कैशोरम्, शावम्, कालभम् । प्राणिग्रहणं किम् ? तृणत्वम् । जातिग्रहणं किम् ? देवदत्तता ॥६६॥

अव०–[1] प्राणी चासौ जातिश्च=प्राणिजातिः, प्राणिजातिश्च वयश्च=प्राणिजातिवयसी, प्राणिजातिवयसी अर्थो यस्य शब्दस्य सः, तस्मात् । [2] द्वीपिनो भावः कर्म वा, [3] हस्तिनो भावः, 'नोऽपदस्य तद्धिते' (७।४।६१) इत्यन्त्यस्वरादिलोपः ॥६६॥

## युवादेरण् ॥७।१।६७॥

म० वृ०–युवादिभ्यो भावे कर्मणि 'अण्' स्यात्त्वतलौ च । [1] यौवनम्, युवत्वम्, चौरादिपाठाद् [2] यौवनिका इत्यपि; [3] स्थाविरम्, स्थविरत्वम् । स्थविर, श्रमण, पिशुन, निपुण, कुशल, चपल, अनृशंस एभ्यो राजादिदर्शनात् टयणपि- स्थाविर्यम्, श्रामण्यम् इत्यादि ॥६७॥

अव०–[1] युवन्, युनो भावः कर्म वा यौवनम्, अथवा "लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" मिति न्यायात् युवतेर्भावः कर्म वा यौवनम्, अत्र 'जातिश्च णितद्धित०' (३।२।५१) इत्यनेन पुंवद्भावः, पुनः युवन् शब्दः, 'अणि' (७।४।५२) इति सूत्रेण अन्त्यस्वरादिलोपप्रतिषेधः । युवन्, स्थविर, यजमान, कुतुक, श्रमण, श्रमणक, श्रवण, कमण्डलुक, कुस्त्री, दुस्त्री, सुस्त्री, सुहृदय, दुर्हृदय, सुहृद्, दुर्हृद्, सुभ्रातृ, दुर्भ्रातृ, वृषल, परिव्राजक, सब्रह्मचारिन्, अनृशंस, चपल, कुशल, निपुण, पिशुन, कुतुहल, क्षेत्रज्ञ, उद्गातृ, उन्नेतृ, प्रशास्तृ, प्रतिहर्तृ, होतृ, पोतृ, भ्रातृ, भर्तृ, रथगणक, पत्तिगणक, सुष्ठु, दुष्ठु, अध्वर्यु, कर्तृ, मिथुन, कुलीन, सहस्, कण्डुक, कितव इति युवादिगणः । [2] 'यूनोऽके' (७।४।५०) इति सूत्रेण अन्त्यस्वरादिलोपाभावः । [3] राजादिटयणा 'वयोऽर्थादञ्' इत्यस्य बाधनादत्र युवादिगणे स्थविरशब्दस्य पाठः कृतः ॥६७॥

## हायनान्तात् ॥७।१।६८॥

म० वृ०–हायनान्तशब्देभ्यो भावे कर्मणि वा 'अण्' स्यात् । त्वतलौ च । [1] द्वैहायनम्, द्विहायनत्वम्; [2] त्रैहायनम्, त्रिहायनता, चातुर्हायनम् । वयसि तु वाक्ये [3] पूर्वेणाञ्–[4] त्रैहायणम्, चातुर्हायणम् ॥६८॥

अव०–[1] द्वे हायने यस्य असौ द्विहायनः, द्विहा-

ॐ श्रीहैमलिङ्गानुशासने स्त्रीनपुंसकलिङ्गप्रकरणे पञ्चमे श्लोके ।

यनस्य भावः कर्म्म वा द्वैहायनम् । [2]एवं त्रैहायनम्, अत्र हायनस्य अवयोवचनत्वात् 'चतुस्त्रेर्हायनस्य वयसि' (२।३।७४) इत्यनेन णत्वं न भवति । [3]'प्राणिजाति०' ( ७।१।६६ ) इत्यनेन अञ् । [4]''चतुस्त्रे-र्हायन० (२।३।७४)' इति णत्वम् ॥६८॥

## ऋवर्णोलघ्वादेः ॥७।१।६९॥

म० वृ०—लघुरादिः समीपे यस्य इवर्णस्य उवर्णस्य ऋवर्णस्य च तदन्तात्राम्नो भावे कर्मण्यण् त्वतलौ च । [1]शौचम्, शुचित्वम्, शुचिता, [2]शाकुनम्, [3]मौनम्, [4]साम्मतम् । [कवेर्भावः कर्म वा=] काव्यमिति तु राजादित्वात । [5]नाखरजनम्, [6]हारीतकम्, [7]पार्थवम्, [8]पाटवम्, [9]लाघवम्, [10]बाधवम्, [11]पैत्रम् । ऋवर्णादेरिति किम् ? घटत्वम् । लघ्वादेरिति किम् ? पाण्डुत्वम [एवं कण्डुत्वम्] ॥६९॥

---

अव०—लघ्वादेरित्यत्र आदिग्रहणं समीपमात्रार्थम्, तेन तितउनो भावः कर्म वा तैतवम्, अत्र अव्यवहिते अकारे लघौ शुच्यादौ च एकवर्णव्यवहिते लघुनि अणप्रत्ययो भवति । तथा केचित्तु कृशानोर्भावः कर्म वा=कार्शानवम्, अरत्नेर्भावः कर्म वा आरत्नम्, अरातेर्भावः कर्म वा=आरातम् इत्यादिष्वपि अणप्रत्ययमिच्छन्ति, तन्मतसङ्ग्रहार्थं लघ्वादेरिति प्रकृतेर्विशेषणं कर्त्तव्यम्, न ऋवर्णस्य । तन्मते साम्मतमिति न सिध्यति इति भावः । इवर्णान्तोवर्णान्तर्वर्णान्तशब्देभ्यः कीदृशेभ्यः ? आदिलघ्वक्षरेभ्य इत्यर्थः । [1]शुचेर्भावः कर्म वा=शौचम् । [2]शकुनेर्भावः कर्म वा=शाकुनम् । [3]मुनेर्भावः कर्म वा=मौनम् । [4]सती मतिर्यस्य (?) सम्मतेर्भावः कर्म वा=साम्मतम् । [5]नखरजनी मींती, ॐ नखरजन्या भावः कर्म वा=नाखरजनम् । [6]हरीतक्या भावः कर्म वा=हारीतकम् । [7]पृथोर्भावः कर्म वा=पार्थवम् । [8]पटोर्भावः कर्म वा=पाटवम् । [9]एवं लघोर्भावः कर्म वा=लाघवम् । [10] बध्वा भावः कर्म वा=बाधवम् । [11]पितुर्भावः कर्म वा=पैत्र्यम् ॥६९॥

## पुरुष-हृदयादसमासे ॥७।१।७०॥

म० वृ०—पुरुषहृदयाभ्यां भावे कर्मणि 'अण्' स्यात्, त्वतलौ च, [1]असमासे । [2]पौरुषम्, पुरुषत्वम्; [3]हार्दम्, हृदयत्वम् । असमास इति किम् ? [4]परमपुरुषत्वम्, [5]परमहृदयत्वम्, [6]सत्पुरुषत्वम्, [7]सौहृदय्यम् । परमपौरुषम्, परमहार्दमित्यादि मा भूत् ॥७०॥

---

अव०—[1]यदि पुरुषहृदयशब्दौ समासविषयौ न भवतः । [2]पुरुषस्य भावः कर्म वा=पौरुषमिति 'प्राणिजाति०'(७।१।६६) अञोऽपि सिध्यति, समासविषये प्रतिषेधार्थं पुरुषोपादानं कृतमिति भावः । [3]हृदयस्य भावः कर्म वा=हार्दमित्यत्र अणि कृते सति 'हृदयस्य हृल्लासलेखाण्ये' (३।२।९४) इत्यनेन हृदयस्य हृद् आदेशः । [4]परमपुरुषस्य भावः कर्म वा । [5]परमहृदयस्य भावः । [6]सतः पुरुषस्य भावः ..................[ कर्म वा=सत्पुरुषत्वम् ] [7]शोभनस्य हृदयस्य भावः=सौहृदयम् ॥७०॥

## श्रोत्रियाद् यलुक् च ॥७।१।७१॥

म० वृ०—श्रोत्रियाद्भावे कर्मणि चाण् स्यात्, तद्योगे च यकारस्य लोपः, त्वतलौ च । श्रौत्रम्, श्रोत्रियत्वम् । चौरादिपाठादकञि– श्रौत्रियकम् ।७१।

## योपान्त्याद् [1]गुरूपोत्तमादसुप्रख्यादकञ् ॥ ७।१।७२ ॥

म० वृ०—त्र्यादीनामन्त्यमुत्तमम्, तत्समीपमुपोत्तमम् गुरुर्यस्य, तस्माद् यकारोपान्त्यात् सुप्रख्यवर्जिताद्भावे कर्मणि वा–'ऽकञ्'स्यात्त्वतलौ च । रामणीयकम्, रमणीयत्वम्, कामनीयकम्, औपाध्यायकम्, पानीयकम् । गुरुग्रहणादनेकव्यञ्जनव्यवधानेऽपि [अकञ् भवति]– आचार्यकम् । योपान्त्यादिति किम् ? विमानत्वम् । गुरूपोत्तमादिति किम् ? [2]क्षत्रियत्वम्, [3]कायत्वम् । असुप्रख्यादिति किम् ? [4]सुप्रख्यत्वम् ॥७२॥

---

ॐ अत्र नखरजनीशब्दस्य प्राचीनलौकिकभाषायां 'मींती' इत्यर्थ इति प्रतिभाति ।

अव० 'उत्तमस्य समीपे उपोत्तमम्, उपोत्तमं गुरुर्यस्य स गुरूपोत्तमः, 'विशेषणसर्वादिसंख्यं बहुव्रीहौ' (३।१।१५०) इत्यनेन गुरुशब्दस्य पूर्वनिपातः। अक्षराणां पङ्क्तौ तृतीयमक्षरमारभ्य उत्तम इति संज्ञा। शब्दात् परतोऽकञ् स्यात्, कीदृशात् शब्दात्? योपान्त्यात् प्रान्तयकारात् (?), पुनः कीदृशात्? गुरूपोत्तमात्, कोऽर्थः? यकारात् पूर्वं गुर्वक्षरात्, एवंविधात् शब्दात् अग्रेऽकञ् भवतीत्यर्थः। गुरुग्रहणं हि दीर्घपरिग्रहार्थं संयोगपरपरिग्रहार्थं च। तेन आचार्यकमित्याद्यनेकव्यञ्जनव्यवधानेऽपि सिद्धम्।[२] प्रथमे क्षत्रियत्वमित्युदाहरणे गुरुर्नास्ति। [३]द्वितीये कायत्वमित्युदाहरणे तु उपोत्तमत्वं नास्ति।[४]गुणाङ्गत्वात् ट्यणपि, सौप्रख्यम्। सुप्रचष्टे इति सुप्रख्यः, 'उपसर्गादातो डोऽश्यः' (५।१।५६) इति डः ॥७२॥

## चौरादेः ॥७।१।७३॥

म० वृ०–चौरादिभ्यो भावकर्मण्यकञ् त्वतलौ (च) भवन्ति [ चौरस्य भावः कर्म वा= ] चौरिका, चौरकम्, मनोज्ञकम् ॥७३॥

---

अव०–चौर, धूर्त्त, युवन्, ग्रामपुत्र, ग्रामषण्ड, ग्रामषाण्ड, ग्रामकुमार, ग्रामकुल, ग्रामकुलाल, अमुष्यपुत्र, अमुष्यकुल, शरपत्र, मनोज्ञ, प्रियरूप, अदोरूप, अभिरूप, बहुल, मेधाविन्, कल्याण, आढ्य, सुकुमार, छन्दस, छात्र, श्रोत्रिय, विश्वदेव, ग्रामिक, कुलपुत्र, सत्पुत्र, वृद्ध, अवश्यम् इति चौरादिगणः। मनोज्ञादिशब्दानामकञन्तानां卐 'आत्वात्त्वादिः' इति लिङ्गपाठान्नपुंसकत्वमेव। पूर्वेषां तु चौरादिशब्दानां "चौराद्यमनोज्ञाद्यकञ्" इति लिङ्गपाठात् ❀ स्त्रीनपुंसकता। अत एव वृत्तौ 'चौरिका चौरकम्' इति प्रयोगद्वयं दर्शितम्। एवं धौर्त्तिका धौर्त्तकम् इत्यपि। तथा चौर्यम् धौर्त्यम् ग्रामिक्यमित्यत्र राजादित्वात् ट्यणपि ॥७३॥

## द्वन्द्वाल्लित् ॥७।१।७४॥

म०वृ०– द्वन्द्वसमासाद् भावे कर्मणि 'अकञ्' स्यात्, स च लित्, [ लित्करणं स्त्रीत्वार्थम् ] त्वतलौ च। [१]गोपालपशुपालिका, [२]शैष्योपाध्यायिका, [३]भारतबाहुबलिका ॥७४॥

---

अव०–[१]गोपालाश्च पशुपालाश्च=गोपालपशुपालाः, गोपालपशुपालानां भावः=गोपालपशुपालिका, 'अस्यायत्तत्'० (२।४।१११) इत्यनेन इकारः। एवं [२]शैष्योपाध्यायिका। [३]भरतश्च बाहुबलिश्च, (बाहुबलिः) इकारान्तो ग्राह्यः, भरतबाहुबल्योर्भावः ॥ ७४ ॥

## गोत्र-[१]चरणाच्छ्लाघा-[२]ऽत्याकार[३]-प्राप्त्यवगमे[४] ॥७।१।७५॥

म०वृ०–गोत्रवाचिनः चरणवाचिनश्च शब्दाद् भावे कर्मणि श्लाघादौ विषयभूते–'ऽकञ्' स्यात्, स च लित्, त्वतलौ च। [७]गार्गिका, [८]काठिका; ताभ्यां श्लाघते=विकत्थते अत्याकुरुते=पराभवति वा, [६]गार्गिकां काठिकां प्राप्तवान् [=अधिगतवान्] अवगतवान् वा इत्यर्थः। गार्ग्यत्वेन कठतया वा श्लाघते। श्लाघादीति किम्? गार्गम्, काठम् [प्राणिजातिवयोऽर्था० (७।१।६६) इत्यञ्] ॥७५॥

---

अव०–[१]गोत्रमपत्यं प्रवराध्यायपठितं च। प्रवरा गोत्रादिषु भवाः, तत्र पठितमपि गोत्रमभिधीयते। प्रवराध्यायो गोत्रप्रतिपादकं शास्त्रम्। इदं चानपत्यप्रत्ययान्तमपि प्रत्ययं प्रयोजयति, यथा मित्रयोर्भावः मैत्रेयिकया श्लाघते इति। [२]चरणं शाखानिमित्तं कठादि। [३]श्लाघा प्रशंसा। [४]अत्याकारः परपराभवः। [५]प्राप्तिर्लाभः। [६]अवगमो ज्ञानम्। [७]गार्गिकया श्लाघते, [८]काठिकया श्लाघते इत्यर्थः। गार्ग्य इति शब्दः, गार्ग्यस्य भावः कर्म वा गार्गिका, गोत्रद्वारेण 'गोत्रचरणा'०(७।१।७५) इत्यनेनाकञ्, 'तद्धितयस्वर'०(२।४।९२) इत्यनेन यकारलोपः, 'अस्यायत्तत्'० (२।४।१११) इति इः। कठस्य भावः कर्म वा काठिका। गार्गिकया श्लाघते, काठिकया श्लाघते, गार्गिकया अत्याकुरुते, काठिकया अत्या-

---

卐श्रीहैमलिङ्गा० नपुंसकलिङ्गप्रकरणे नवमश्लोके। ❀ श्रीहैमलिङ्गा० स्त्रीनपुंसकलिङ्गप्रकरणे तृतीयश्लोके।

कुरुते, अधिक्षिपति, पराभवति। [९]तथा गार्गिकां काठिकां प्राप्तवान्, गार्गिकां काठिकामवगतवान्= विज्ञातवान्। [१०]एवं गार्ग्यत्वेन कठत्वेन श्लाघते अत्याकुरुते। एवमुदाहरणार्थो ज्ञातव्यः ॥७५॥

होत्राभ्य ईयः ॥७।१।७६॥

म० वृ०—होत्राशब्द ऋत्विग्विशेषवचनः। ऋत्विग्विशेषवाचिभ्यो भावे कर्मणि 'ईयः' स्यात्। त्वतलौ च। [१]मैत्रावरुणीयम्, मैत्रावरुणत्वम्, पोत्रीयम् ॥७६॥

---

अव०—[१]मित्रश्च वरुणश्च,'वेदसहश्रुत'०(३।२।४१) इत्यनेन आत्वम्, मित्रावरुणे देवते अस्य, 'देवता' (६।२।१०१) इत्यण्, मैत्रावरुणस्य भावः कर्म वा मैत्रावरुणीयम् ॥७६॥

ब्रह्मणस्त्वः ॥७।१।७७॥

म० वृ०—होत्राभ्य इति वर्त्तते। ब्रह्मन् इति शब्दात् ऋत्विग्विशेषवाचिनः षष्ठ्यन्ताद् भावे कर्मणि च 'त्वः प्रत्ययः' स्यात्। [१]ईयापवादः। ब्रह्मत्वम्। होत्राधिकाराद् ब्रह्मणपर्यायाज्जातिवाचिनो ब्रह्मन्-शब्दात्तलपि स्यात्—[१]ब्रह्मत्वम्, ब्रह्मता। त्वतलोऽधिकारः सम्पूर्णः ॥७७॥

---

अव०—[१]'ईयापवादः', ईय इत्युपलक्षणम्, तल्प्रत्ययस्याप्ययमपवादः ॥७७॥

शाकट-शाकिनौ क्षेत्रे ॥७।१।७८॥

म० वृ०—तस्येति वर्त्तते। तस्येति षष्ठ्यन्तात् क्षेत्रार्थे शाकटशाकिनौ भवतः। [२]इक्षुशाकटम्, इक्षुशाकिनम्; [३]शाकशाकटम्, शाकशाकिनम् ॥७८॥

---

अव०—[१]क्षेत्रं धान्यादीनामुत्पत्त्याधारभूमिः, न शरीरादिः, अनिष्टत्वात्। [२]इक्षूणां क्षेत्रं इक्षुशाकटम्। [३]एवं शाकशाकटम् ॥७८॥

धान्येभ्य ईनञ् ॥७।१।७९॥

म० वृ०—[तस्येति षष्ठ्यन्तेभ्यः]धान्यवाचिभ्यः क्षेत्रेऽर्थे 'ईनञ्' स्यात् [कुलत्थानां क्षेत्रम्= ] कौलत्थीनम्, मौद्गीनम्, नैवारीणम् [निवारा वनव्रीहयः] ॥७९॥

व्रीहि-शालेरेयञ् ॥७।१।८०॥

म० वृ०—व्रीहिशालिभ्यां क्षेत्रे 'एयञ्' स्यात्। [व्रीहेः क्षेत्रम्=] व्रैहेयम्, शालेयम् ॥८०॥

यव-यवक-षष्टिकाद् यः ॥७।१।८१॥

म० वृ०—[षष्ठ्यन्तेभ्यः] यवयवकषष्टिकेभ्यः क्षेत्रे 'यः' स्यात्। ईनञोऽपवादः। [१]यव्यम्, [२]यवक्यम्, [३]षष्टिक्यम् ॥८१॥

---

अव०—[१]यवानां क्षेत्रं=यव्यम्। [२]यवानां तुल्याः= यवकाः, 'तस्य तुल्ये कः संज्ञाप्रतिकृत्योः' (७।१।१०८) इत्यनेन कः प्रत्ययः, यवकानां क्षेत्रं यवक्यम्। [३]षष्टिरात्रिशब्दः, षष्टिरात्रेण पच्यमाना व्रीहयः षष्टिकाः, 'यवयवकषष्टिकाद् यः' इति सूत्रपाठबलात् कप्रत्ययः, रात्रिशब्दलोपश्च, षष्टिकानां क्षेत्रं=षष्टिक्यम्, 'यवयवकषष्टिकाद् यः'इत्यनेन यः प्रत्ययः ॥८१॥

वाऽणु-माषात् ॥७।१।८२॥

म० वृ०—अणुमाषाभ्यां क्षेत्रे 'यो वा' स्यात्। [१]अणव्यम्, आणवीनम्; माष्यम्, माषीणम् ॥८२॥

---

अव०—[१]रालकादिधान्यभेदा अणवः, अणूनां क्षेत्रम् ॥८२॥

वोमा-भङ्गा-तिलात् ॥७।१।८३॥

म० वृ०—[षष्ठ्यन्तेभ्यः] [१]उमा-भङ्गा-तिलेभ्यः क्षेत्रे 'यो वा' स्यात्। उम्यम्, औमीनम्; [२]भङ्ग्यम्, भाङ्गीनम्; तिल्यम्, तैलीनम्। योगविभाग उत्तरार्थः ॥८३॥

---

अव०—[१]उत्पूर्वमाधातुः, उन्मीयते इति उमा अतसी, 'उपसर्गादातः' (५।३।११०), पृषोदरादित्वात् द् लुप्यते। [२]भञ्जनं=भङ्गः, सोऽस्य अस्ति,

'अश्वादिभ्यः' ( ७।२।४६ ) इति अः, भङ्गा शणधान्यम्, 'वोमाभङ्गा०' ( ७।१।८३ ) इति यः, पक्षे 'धान्येभ्य ईनञ्' (७।१।७९) भवति ॥८३॥

## अलाब्वाश्च कटो रजसि ॥७।१।८४॥

म० वृ०–अलाबूशब्दाच्चकारादुमाभङ्गातिलेभ्यश्च रजस्यर्थे 'कटः' स्यात्। अलाबूनां रजः=अलाबूकटम्, उमाकटम्, भङ्गाकटम्, तिलकटम् ।८४।

## अह्ना गम्येऽश्वादीनञ् ॥७।१।८५

म० वृ०–[षष्ठ्यन्तात्] अश्वादेकेनाह्ना गम्येऽर्थे 'ईनञ्' स्यात्। अश्वस्यैकेनाह्ना गम्यः आश्वीनोऽध्वा। अह्नेति किम्? अश्वस्य मासेन गम्यः ॥८५॥

## कुलाज्जल्पे ॥७।१।८६॥

म० वृ०–[षष्ठ्यन्तात्] कुलाज्जल्पेऽर्थे 'ईनञ्' स्यात्। [कुलस्य जल्पः=] कौलीनम् ॥८६॥

## पील्वादेः कुणः पाके ॥७।१।८७॥

म० वृ०–[षष्ठ्यन्तेभ्यः] पीलु इत्यादिभ्यः पाकेऽर्थे 'कुणः' स्यात्। पीलूनां पाकः=पीलुकुणः, एवं कर्कन्धूनां पाकः=कर्कन्धुकुणः ॥८७॥

अव०–पीलु, कर्कन्धु, शमी, (करीर) बदर, कुवल, अश्वत्थ, खदिर, इति पील्वादिगणः ॥८७॥

## कर्णादेर्मूले जाहः ॥७।१।८८॥

म० वृ०–कर्णादिभ्यो मूलेऽर्थे 'जाहः' स्यात्। [1]कर्णजाहम् ॥८८॥

अव०–[1]कर्णस्य मूलं=कर्णजाहम्। [2]एवमक्ष्णो मूलम्=अक्षिजाहम्। कर्ण, अक्षि, आस्य, वक्त्र, नख, मुख, केश, दन्त, ओष्ठ, भ्रू, शृङ्ग, पाद, गुल्फ, पुष्प, फल इति कर्णादिगणः ॥८८॥

## पक्षात्तिः ॥७।१।८९॥

म० वृ०–[षष्ठ्यन्तात्] पक्षान्मूलेऽर्थे 'तिः' स्यात् [पक्षमूलम्=] पक्षतिः ॥८९॥

## हिमादेलुः सहे ॥७।१।९०॥

म० वृ०–हिमात्सहे=सहमानेऽर्थे 'एलुः' स्यात्। [1]हिमेलुः ॥९०॥

अव०–[1]हिमस्य सहः–हिमं सहमानो=हिमेलुः ॥९०

## बल-वातादूलः ॥७।२।९१॥

म० वृ०–[षष्ठ्यन्ताभ्यां] बलवाताभ्यां सहेऽर्थे 'ऊलः' स्यात्। [1]बलूलः [2]वातूलः ॥९१॥

अव०–[1]बलस्य सहः–बलं सहमानो=बलूलः। [2]एवं वातस्य सहः–वातं सहमानो=वातूलः ॥९१॥

## शीतोष्णतृप्रादालुरसहे ॥७।१।९२॥

म० वृ०–[षष्ठ्यन्तेभ्यः] शीतोष्ण-तृप्रेभ्योऽसहे=असहमानेऽर्थे 'आलुः' स्यात्। [1]शीतालुः, [2]उष्णालुः, [3]तृप्रालुः ॥९२॥

अव०–[1]शीतस्यासहः–शीतमसहमानः=शीतालुः। [2]एवमुष्णस्यासहः–उष्णमसहमानः= उष्णालुः [3]तृप्रं दुःखम्, तृप्रस्यासहः–तृप्रमसहमानः ॥९२॥

## यथामुख-संमुखादीनस्तद् दृश्यतेऽस्मिन् ॥७।१।९३॥

म० वृ०–यथामुखसंमुखाभ्यां तदिति प्रथमान्ताभ्यामस्मिन्निति सप्तम्यर्थे 'ईनः' स्यात्, यत्प्रथमान्तं तच्चेत् दृश्यते इति भवति। यथामुखं दृश्यतेऽस्मिन्=यथामुखीन[1] आदर्शादिः। एवं संमुखीनः[2]।

अव०–[1]मुखस्य सदृशोऽर्थो यथामुखं प्रतिबिम्ब उच्यते, अत एव निपातनात् 'यथाऽथा' (३।१।४१) इति प्रतिषेधेऽप्यत्राव्ययीभावसमासः, पश्चात् यथामुखं दृश्यतेऽस्मिन् इति यथामुखीनः इति वाक्ये 'यथामुखसंमुखा०' इत्यनेन ईनः प्रत्ययः कार्यः। अथ यथामुखीन इत्युदाहरणभावार्थः एवम्, तथाहि– आदर्शो हि अभि.................... तया यथामुखीनो भवति, (?) एवमन्योऽपि यः कश्चित् यस्याऽभिमुखो भवति स तं प्रति यथामुखीन इत्युच्यते। एवं संमुखीन इत्यपि इति तात्पर्यम्। [2]समं

मुखं=संमुखम्, समं मुखमस्य अथवा समं मुखमनेन=संमुखम्, अत्र तुल्यार्थे तृतीया। संमुख इति बिम्बमेव उच्यते, अत एव निपातनात् समशब्दस्य अन्तलोपः, सम् इति शब्दो जातः, संमुखं दृश्यतेऽस्मिन् इति संमुखीन इति वाक्ये 'यथामुख०' इत्यनेन ईनः कार्यः। अथ संमुखीनः इत्युदाहरणस्य भावार्थः शास्त्रान्तरदृष्टान्तेन दर्श्यते, तथाहि– यथामुखीन सीतायाः, अत्र हि अग्रे भवनमात्रमेव सादृश्यम्, आदर्शो ह्यग्रे भवत्येवं हनूमानपि सीताया अग्रे भवति, सीताग्रे तिष्ठति इत्यर्थः।

'अपशूलं तमसाद्य, लवणं लक्ष्मणानुजः;
रुरोध संमुखीनो हि, जयो रन्ध्रप्रहारिणाम्'।

इति रघौ। अ···न सिद्धिः संमुखतयोपमानात् ॥९३॥

## सर्वादेः पथ्यङ्ग-कर्म-पत्र-पात्र-शरावं व्याप्नोति ॥७।१।९४॥

म० वृ०–सर्वशब्दपूर्वेभ्यः पथिन्, अङ्ग, कर्म्मन्, पत्र, पात्र, शराव इत्यन्तेभ्यो [१]निर्देशादेव द्वितीयान्तेभ्यो व्याप्नोतीत्यर्थे'ईनः'स्यात्। [१]सर्वपथीनो रथः, [२]सर्वपथीनमुदकम्, [३]सर्वाङ्गीणस्तापः, सर्वकर्म्मीणः पुरुषः, सर्वपत्रीणः सारथिः, सर्वपात्रीण ओदनः, सर्वशरावीण ओदनः ॥९४॥

---

प्रब०–[१]सूत्रे द्वितीयान्तपदपाठात्। सर्वश्चासौ पन्थानश्च=सर्वपथः, 'ऋक्पूःपथ्यपोऽत्' (७।३।७६) इत्यनेन अत समासान्तः, सर्वपथ इति शब्दः, सर्वपथं व्याप्नोति=सर्वपथीनो रथः। [२]सर्वपथान् व्याप्नोति=सर्वपथमुदकम्। [३]एवं सर्वाङ्गं व्याप्नोति सर्वाङ्गीणः इत्यादि। सर्वाणि च तानि अङ्गानि च ॥९४॥

## [१]आप्रपदम् ॥७।१।९५॥

म० वृ०–आप्रपदाद् [निर्देशादेव] द्वितीयान्ताद् व्याप्नोत्यर्थे 'ईनः' स्यात्। [२]आप्रपदीनः पटः, अनेन पटस्य प्रमाणमाख्यायते ॥९५॥

---

प्रब०–[१]प्रगतं पदं=प्रपदम्, पदाग्रमित्यर्थः, अथवा प्रवृद्धं पदं=प्रपदम्, पदस्योपरिष्टात् इत्यर्थः। संस्था खुलुको गुल्फ इति पर्यायाः प्रपदस्य। संखोडउ इति लोकरूढिर्गुल्फस्य। आङ्शब्दो मर्यादायामभिविधौ वा, प्रपदात् आ=आप्रपदम्, 'पर्यपाङ्०' (३।१।३२) इत्यव्ययीभावः, तत आप्रपद द्वितीयान्तं पदमिदम्। [२]यः पटः आप्रपदं व्याप्नोति ततः आप्रपदं नातिवर्त्तते=नातिक्रामति स एव आप्रपदीन उच्यते ॥९५॥

## [१]अनुपदं बद्धा ॥७।१।९६॥

म० वृ०–[निर्देशादेव द्वितीयान्तात्] अनुपदशब्दाद् बद्धा (इति) अर्थे 'ईनः' स्यात्। अनुपदं बद्धा=[१]अनुपदीना उपानत् ॥९६॥

---

प्रब०–[१]'अनुपदीना उपानत्' इत्युदाहरणस्यायमर्थः– पदप्रमाणा उपानत् इत्यर्थः। [२]'अनुपदम्', अत्र 'दैर्घ्येऽनुः' (३।१।३४) – इत्यव्ययीभावः, पदमन्वायतमनुपदमिति सूत्रस्य वाक्यम्, अनुपदं बद्धा इति वाक्यमध्ये पदमनु लक्ष्यीकृत्यायतं बन्धनमिति क्रियाविशेषणत्वात् द्वितीयाऽभेदोपचारात् बद्धा इत्युच्यते ॥९६॥

## अयानयं नेयः ॥७।१।९७॥

म० वृ०–[निर्देशादेव द्वितीयान्तात्] अयानयशब्दान्नेय इत्यर्थे 'ईनः' स्यात्। अयानयीनः शारः फलकशिरसि स्थित उच्यते। अथवा अयः शुभं दैवम, अनयोऽशुभम्, शुभाद् दैवादपवर्त्तते [निवर्त्तते] अशुभं दैवं यस्मिन् कर्मणि तदयानयं शान्तिकर्म चतुःशरणप्रतिपत्तिरनायातघोषणं देवगुरुपूजा तपो दानं ब्रह्मचर्यादिनियमः, तद् यो नेयः=कारयितव्यः सोऽयानयीन ईश्वर इति ॥९७॥

---

प्रब०–अयानयीन शार इत्युदाहरणस्य भावार्थोऽयम्, तथाहि– अयः प्रदक्षिणं गमनम, अनयः प्रसव्यं वामं गमनम्, शारिद्यूते हि केऽपि शाराः प्रदक्षिणं यान्ति, केचित् वामम्। तेषां शाराणां गतिरयसहितोऽनयो भवति इति अयानय इत्युच्यते। यस्मिन् दक्षिणगमने वामगमने वा परशाराः

स्त्रशारैः बाधिता भवन्ति, बाधिताः सन्तः पदानां कोऽर्थः ? गृहकाणां कर्मभूतानां स्त्रशारैः परशाराणां बहुत्वात् स्वगृहे अप्रवेशो भवति, तदुभयं दक्षिणं वामगमनं च नेयः इति अयानयीन लोके प्रसिद्धिः. प्रदक्षिण(गामी) वामगामी च शारो नीयमान एव अयानयीन इति लोके प्रसिद्धिरिति परमार्थः, न सर्वो लोकव्यवहारोऽयानयीन उच्यते । अथवा अयानयीनप्रयोगस्य विशेषमर्थान्तरं दर्शयते,– अयः शुभं दैवम्, अनयोऽशुभं दैवम्, यस्मिन् कर्मणि क्रियमाणे सति अयात् शुभदैवबलात् अनयोऽशुभं दैवं निवर्त्तते=उपशाम्यति तत् अयानयं शान्तिकर्म उच्यते, शान्तिकर्म किंरूपम् ? चतुःशरणम्=अर्हत्सिद्धसाधुधर्माङ्गीकरणम्, अनाघातघोषणम्=अमारिप्रवर्तनम् देवगुरुपूजा=अष्टाह्निकासङ्घपूजादिकम्, तपो ह्याचाम्लादि, दानम्=अन्नधनादीनां परं प्रतिकल्पनम्, ब्रह्मचर्यं भूमिशयनमित्याद्युत्तमधर्मव्यापारः शान्तिकर्म सूरिभिः' प्रोच्यते, तदेवंविधं शान्तिकर्म यो धनवान् श्रीमान् पुरुषो नेयः=तदेवंविधं शान्तिकर्म यस्य श्रीमतः पुरुषस्य पार्श्वात् कार्यते स अयानयीन ईश्वर इत्यर्थः ॥ ९७ ॥

## सर्वान्नमत्ति ॥ ७।१।९८ ॥

म० वृ०–सर्वान्नशब्दादत्ति इत्यर्थे 'ईनः' स्यात् । [1]सर्वान्नीनो भिक्षुः नियमरहितः ॥९८॥

---

अव०–[1]सर्वशब्दः प्रकारे कार्त्स्न्ये चार्थे वर्त्तते, सर्वप्रकारमन्नं=सर्वान्नम्, सर्वान्नमत्ति इति वाक्यम् ।९८।

## परोवरीण-परम्परीण-पुत्रपौत्रीणम् ॥७।१।९९॥

म० वृ०–एते शब्दा अनुभवत्यर्थे 'ईनन्ता' निपात्यन्ते। [1]परोवरीणः, [2]परम्परीणः, [3]पुत्रपौत्रीणः ॥९९॥

---

अव०–[1]पर–अवरशब्दः, परांश्च अवरांश्चानुभवतीति वाक्ये ईनः, निपातनादवरशब्दाकारस्य उत्वम्, परोवरीण इति सिद्धम् । यत्र च परोवरमिति शब्दान्तरमतीतक्रमवाचि तत्र परोवरस्य भावः– त्यण्, परोवर्यमिति सिध्यति । [2]पर–परतरशब्दः, परान् परतरांश्चानुभवति इति वाक्ये ईनः, निपातनात् परम्पर आदेशश्च, परम्परीण इति सिद्धम् । मन्त्रिपरम्परा मन्त्रं भिनत्ति इति वाक्यम्, तत्र परम्पराशब्द आवन्तो बाहुल्यार्थः प्रकृत्यन्तरम् । [3]पुत्रांश्च पौत्रांश्चानुभवति=पुत्रपौत्रीणः ॥९९॥

## यथाकामा–ऽनुकामा–ऽत्यन्तं गामिनि ॥७।१।१००॥

म० वृ०–यथाकामानुकामात्यन्तेभ्यो गामिन्यर्थे 'ईनः' स्यात् । [1]यथाकामीनः, [2]अनुकामीनः, यथेच्छंगामीत्यर्थः, [3]अत्यन्तीनः, भृशंगामीत्यर्थः ॥१००॥

---

अव०–[1]यो यः कामो यथाकामः (? यथाकामम्), यथाकामं गामी=यथाकामीनः । [2]कामस्यानुरूपम्=अनुकामम्, अनुकामं गामी=अनुकामीनः । [3]अत्यन्तं गामी=अत्यन्तीनः ॥ १०० ॥

## पारावारं व्यस्त-व्यत्यस्तं च ॥७।१।१०१॥

म०वृ०–[1]पारावारशब्दात्समस्तात् व्यस्ताद् व्यत्यस्ताच्च गामिन्यर्थे 'ईनः' स्यात् । [2]पारावारीणः, [2]पारीणः, [3]अवारीणः, [4]अवारपारीणः ॥१०१॥

---

अव०–[2–3]व्यस्तस्योदाहरणद्वयम् । [4]व्यत्यस्त उदाहरणमिदम् । [1]अवारः समुद्रः, अवारस्य पारं=परावारः, राजदन्तादित्वात् पूर्वनिपातः, पारावारं गामी=पारावारीणः । [2]एवं पारं गामी=पारीणः । [3]अवारं गामी=अवारीणः । [4]अवारपारं गामी=अवारपारीणः ॥१०१॥

## अनुग्वलम्[1] ॥७।१।१०२॥

म० वृ०–अनुगुशब्दादलंगामिन्यर्थे 'ईनः' स्यात् । [2]अनुगवीनो गोपालकः ॥१०२॥

---

अव०–[1]अलम् शब्दः पर्याप्ते भृशेऽर्थे वर्त्तते । [2]गो–अनुशब्दः, गवामनु–पश्चात्=अनुगु, 'विभक्तिसमीप'० (३।१।३९) इत्यव्ययीभावः, 'क्लीबे' (२।४।९७) ह्रस्वः, ततः अनुगु अलंगामी=अनुगवीनः ॥

## अध्वानं येनौ ॥७।१।१०३॥

म० वृ०–अध्वनशब्दादलंगामिन्यर्थे 'य-ईनौ' भवतः । [1]अध्वन्यः, अध्वनीनः [2]॥१०३॥

---

प्रव०–अध्वानमलंगामी=अध्वन्यः,अध्वनीनः। [1]'अध्वन्य' इत्यत्र 'अनोऽट्ये ये' (७।४।५१) इति सूत्रेण [2]'अध्वनीन' इत्यत्र 'ईनेऽध्वात्मनोः' (७।४।४८) इति सूत्रेणान्त्यस्वरादिलोपाभावः ॥१०३ ॥

## अभ्यमित्रमीयश्च ॥७।१।१०४॥

म० वृ०–अभ्यमित्रादलंगामिन्यर्थे 'ईयः'चकाराद्'य-ईनौ' च। [1]अभ्यमित्रीयः,अभ्यमित्र्य ,अभ्यमित्रीणः, अमित्राभिमुखं भृशं गन्तेत्यर्थः ॥१०४॥

---

प्रव०–[1]अमित्रः शत्रुः , अमित्र–अभिशब्द , अमित्रस्य अभि संमुखम्=अभ्यमित्रः (अभ्यमित्रम् ?), अभ्यमित्रमलंगामी इति वाक्ये अभ्यमित्रीयः , अभ्यमित्र्यः, अभ्यमित्रीणः ॥ १०४ ॥

## समांसमीनाद्यश्वीनाद्यप्रातीनागवीनसाप्तपदीनम् ॥७।१।१०५॥

म० वृ०–एते शब्दा ईनन्ता निपात्यन्ते, साप्तपदीनस्तु ईनञन्तः [निपात्यते]। [1]समांसमीना गौः, [2]अद्यश्वीना गौः, एवं नाम प्रत्यासन्नप्रसवेत्यर्थः । [3]अद्यप्रातीना गौः , लाभो वा । [4]आगवीनः कर्मकरः। [5]साप्तपदीनं सख्यम् ,साप्तपदीनः सखा ।१०५

---

प्रव०–[1]समां समामिति वीप्साद्वितयान्तात्समुदायाद्गर्भं धारयतीत्यर्थे ईनो भवति, पूर्वपदविभक्तेश्च न लोप, समां समां गर्भं धारयतीति वाक्ये ईनः , समामित्यत्र 'कालाध्वनोर्व्याप्तौ' (२।२।४२) इति द्वितीया। ननु समायाः कथं व्यातिरेक देशे एव गर्भग्रहणात् ? सत्यम् , अवयवे समुदायोपचारात् । समां समां कोऽर्थः ? वर्षं प्रति । [2]अद्य–श्वःशब्दयोर्वाऽर्थे 'नाम नाम्ना०' (३।१।१८) इति समासः, तदनन्तरं विजनिष्यमाणेऽर्थे=विजनस्य कोऽर्थः ? प्रसवस्य प्रत्यासत्तौ गम्यमानायामीनः. अद्य श्वो वा विजनिष्यमाणा इति वाक्यम् , अद्यश्वीना गौः, एवं नाम प्रत्यासन्नप्रसवेत्यर्थः । अन्ये तु प्रत्यासत्तौ गम्यमानायां भविष्यत्यर्थे ईनमाहुः– अद्य श्वो वा भविष्यति इति वाक्यम् ,अद्यश्वीनो लाभः, अद्यश्वीनं मरणम् । [3]अद्यप्रातीना गौः, अद्यप्रातःशब्दाद् ईनः, वाक्यानि पूर्ववत् , एवमद्यप्रातीनो लाभः, अद्यप्रातीनं कार्यम् , अद्य प्रातर्वा भविष्यतीति वाक्यम् । [4]आगोप्रतिदानशब्दात् कारिण्यर्थे ईनः स्यात् , प्रतिदानशब्दस्य लुक् च । गोः प्रतिदानात् आ=आगोप्रतिदानम् , 'पर्यपाङ्०' (३।१।३२) इति समासः, ततः आगोप्रतिदानं कारी इति वाक्ये आगवीनः कर्मकर इत्युदाहरणम् , ईनः, प्रतिदानशब्दस्य लोपः । आ गोप्राप्तेः कर्मकारी आगवीन उच्यते (इत्येके) । [5]सप्तभिः पदैरवाप्यं साप्तपदीनं सख्यम् , साप्तपदीनः सखा, साप्तपदीनं मित्रम , निपातनात् ईनञ् ॥१०५॥

## अषडक्षाशितंग्वलंकर्मालंपुरुषादीनः ॥७।१।१०६॥

म० वृ०–अषडक्ष, आशितङ्गु, अलङ्कर्मन , अलंपुरुष इति शब्देभ्यः स्वार्थे 'ईनः' स्यात् । [1]अषडक्षीणो मन्त्रः, अषडक्षीणा क्रीडा,या द्वाभ्यां साध्यते इत्यर्थः, [2]आशितङ्गवीनमरण्यम् , [3]अलङ्कर्मीणः, [4]अलंपुरुषीणः ।[5]राजाधीनमिति त्वधीनशब्देन।१०६।

---

प्रव०–[1]अविद्यमानानि षडक्षीणि अस्मिन् इति अषडक्षीणः इति बहुव्रीहौ पूर्वं 'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) इत्यनेन टसमासान्तः, पश्चात् ईनः, अथवा इन्द्रियपर्यायोऽक्षशब्दोऽकारान्तः, अविद्यमानानि षडक्षाणि- पञ्च इन्द्रियाणि षष्ठं मनोऽस्य सोऽषडक्षीणोऽमनस्कः, यो विचारेण विना प्रवर्त्तते इत्यर्थः। [2]आशिता गावोऽस्मिन्निति आशितङ्गु,अस्मादेव निपातात् पाठबलात् पूर्वपदस्य मोऽन्तः, तत ईनः । [3]अलङ्कर्मणे इति वाक्यम , अलङ्कर्मीणः । [4]अलं पुरुषाय=अलंपुरुषीणः,'प्रात्यवपरिनिरादयः०' (३।१।४७) इत्यनेनात्र समासः । [5]तथा अधीनशब्दः, राज्ञि अधीनं=राजाधीनम् , 'सप्तमी शौण्डाद्यैः' (३।

. १।८८) इति समासः । "अस्मास्वधीनं किमु नःप्रहाणाम्" । तथा वाक्यं हि वक्त्रधीनं भवति इति प्रयोगौ प्राक्तनौ ॥१०६॥

## अदिक्स्त्रियां वाञ्चः ॥७।१।१०७॥

म० वृ०–अञ्चत्यन्तान्नाम्नः स्वार्थे 'ईनः' स्यात् वा, यदि सोऽञ्च् दिशि स्त्रियां न वर्त्तते । प्राक्, [1]प्राचीनम्; प्रत्यक्, प्रतीचीनम्; उदक्, उदीचीनम्; अवाक्, अवाचीनम्: [3]सम्यङ्, समीचीनम् । अदिक्स्त्रियामिति किम् ? प्राची, उदीची दिक् [अञ्चः (२।४।३) ङी]। दिग्ग्रहणं किम् ? [4]प्राचीना शाखा । स्त्रीग्रहणं किम् ? प्राक् [5]प्राचीनं रमणीयम् ॥१०७॥

अव०–[1]दिक् चासौ स्त्री च=दिक्स्त्री न दिक् स्त्री=अदिक्स्त्री, तस्याम् । [2]नपुंसके प्राच्शब्दः, प्रागेव इति वाक्यम्, प्राचीनम् उदाहरणम् । एवं सर्वत्र । प्राक् प्रत्यक् उदक् इति शब्दत्रयं नपुंसके भवति । [3]सम्यङ् इति पुंलिङ्गे । 'सहसमः सध्रिसमि' (३।२।१२३) इत्यनेन सम्यङ् इति साध्यते– समञ्चतीति सम्यङ् । प्राग् एव इत्यादिवाक्यानि । सम्यङेव समीचीनम् (?समीचीनः)। पुंलिङ्गे प्राङ् प्रत्यङ् उदङ् अवाङ् भवन्ति । [4]प्राच्येव प्राचीना, 'अदिक्स्त्रियाम्०' (७।१।१०७) इत्यनेनैवात्र ईनः,'जातिश्च०' (३।२।५१) इति पुंवद्भावः । [5]प्राची दिग् रमणीया अथवा प्राग्देशो रमणीयः प्राक्कालो रमणीय इत्यर्थत्रयम् । दिग्शब्दाद् दिग्देशकाल०'(७।२।११३) इत्यादिना सूत्रेण धा,'लुबञ्चः' (७।२।१२३) इत्यनेन धा प्रत्ययो लुप्यते, लुपि सत्यां 'ङ्यादे'० (२।४।९५) इत्यनेन ङीलुक् । दिश्यपि वाच्यायां लुबन्तः शब्दः स्वभावान्नपुंसक एव । अथ प्राच्येव इति वाक्ये प्राचीनं रमणीयमिति प्रयोगः । 'अदिक्स्त्रियां'० (७।१।१०७) इत्यनेन ईनः ॥१०७॥

## तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः ॥७।१।१०८॥

म० वृ०–तस्येति षष्ठ्यन्तात्तुल्ये सदृशेऽर्थे 'कः' स्यात्, संज्ञायां [1]प्रतिकृतौ च विषये । अश्वस्य तुल्योऽश्वकः, उष्ट्रकः, अश्वादिसदृशस्य [प्राणिविशेषस्य] संज्ञा एताः । प्रतिकृतौ,–अश्वकं रूपम्, अश्वका प्रतिमा । तुल्य इति किम् ? [2]इन्द्रदेवः । संज्ञाप्रतिकृत्योरिति किम् ? गोस्तुल्यो गवयः ।१०८।

अव०–[1]प्रतिकृतिः काष्ठादिमयं प्रतिच्छन्दकम् । [2]इन्द्रदेवस्य सम्बन्धी उपचारात् इन्द्रदेवः, एवं नामा कश्चित्पुरुषः, नात्र सादृश्यम् ॥१०८॥

## न नृ-पूजार्थ-ध्वज-चित्रे ॥७।१।१०९॥

म० वृ०–नरि=मनुष्ये, पूजार्थे, ध्वजे, चित्रे चित्रकर्मणि वाच्ये 'को न' स्यात् । [1]तत्र सोऽयमित्येवाभिसम्बन्धः । नृ,– [3]चञ्चा तृणमयः पुरुषः, [2]वर्ध्रिका,खरकुटी । पूजार्थ,– [4]अर्हन्, शिवः; पूजनार्थाः प्रतिकृतयः उच्यन्ते । ध्वज,– [5]गरुडः, [6]सिंहः, ध्वजः । चित्रो भीमः रावणः ॥१०९॥

अव०–[1]कप्रत्यये प्रतिषेधे सति तत्र सोऽयमित्यक्षरार्था ज्ञातव्याः । संज्ञाप्रतिकृत्यर्थयोरपि 'न नृपूजार्थे०' सूत्रे गम्यमानयोर्यथासम्भवं कप्रत्यये प्राप्तेऽपि प्रतिषेधोऽयं 'न नृपूजार्थ०' इति योगः इत्यर्थः । [2]वर्ध्रिकावद् जुगुप्स्यः पुरुषोऽपि वर्ध्रिका । [3]यः क्षेत्ररक्षणाय क्रियते,चञ्चातुल्यः पुरुष इति वाक्यम्, चञ्चा इत्युदाहरणम् । [4]पूजनार्थाः पूजनयोग्या अपि प्रतिकृतयः प्रतिमा अर्हन् इति अयं शिव इत्यभिधीयन्ते । [5]गरुडस्य प्रतिकृतिर्गरुडः । [6]एवं सिंहादीनामपि (वाक्यं विधेयम्) ॥१०९॥

## अपण्ये जीवने ॥७।१।११०॥

म० वृ०–[1]पण्यवर्जितं यज्जीवनं [2]तस्मिन् 'को न' स्यात् । वासुदेवसदृशः वासुदेवः, शिवस्य सदृशः शिवः [विष्णु]; [3]देवलकानां जीविकार्थाः प्रतिकृतय उच्यन्ते । अपण्य इति किम् ? [4]हस्तिकान् विक्रीणीते ॥११०॥

अव०–[1]पण्यं विक्रेतव्यं वस्तु । [2]जीवन्त्यनेनेति जीवनम् । [3]देवान् (लक्षणया तत्स्वं) लान्ति– 'आतो

डो०' (५।१।७६) इति देवलाः, (देवला एव देवलकाः)। [४]हस्तिनः प्रतिकृतयो=हस्तिकाः,रामेकडा इति लोकरूढिः, 'तस्य तुल्ये०' (७।१।१०८) इत्यनेन कः, तान्। जीवने इति किम्? क्रीडने निषेधो मा भूत्,– हस्तिनः तुल्यो=हस्तिकः ॥११०॥

## देवपथादिभ्यः ॥७।१।१११॥

म० वृ०–देवपथादिभ्यस्तुल्ये संज्ञाप्रतिकृत्योः 'को न' स्यात्। देवपथतुल्यो=देवपथः[१] ।१११।

---

प्रव०–[१]देवानां पन्थाः=देवपथः, 'ऋक्पूःपथ्यपोऽत्' (७।३।७६) इत्यत्समासान्तः, देवपथतुल्यो=देवपथः। देवपथ, हंसपथ, अजपथ,राजपथ, शतपथ, शङ्कुपथ, स्थलपथ, सिन्धुपथ, उष्ट्रग्रीवा, वामरज्जु, हस्त, इन्द्र, दण्ड, पुष्प, मत्स्य इति देवपथादिगणः। बहुवचनमाकृतिगणार्थम्। पूर्वयोगावस्यैव प्रपञ्चः ॥१११॥

## वस्तेरेयञ् ॥७।१।११२॥

म० वृ०–तस्य तुल्ये इति वर्त्तते, न संज्ञाप्रतिकृत्योः। वस्तेः षष्ठ्यन्तात्तुल्ये 'एयञ् स्यात्। वस्तेस्तुल्यं=वास्तेयम्[१] ॥११२॥

---

प्रव०–[१]एवं वास्तेयी प्रणालिका ॥११२॥

## शिलाया एयच्च[१] ॥७।१।११३॥

म० वृ०–शिलाशब्दात् षष्ठ्यन्तात्तुल्ये 'एयच् चकारादेयञ् च' स्यात्। शिलायास्तुल्यं=शिलेयं दधि, शिलेयी इष्टकाः [एयच्]। शैलेयं दधि, शैलेयी इष्टका [एयञ्] ॥११३॥

---

प्रव०–[१]'शिलाया एयच्च' इत्यत्र चकारः'अणञेयेकण्नञ्स्नञ्टिताम्' (२।४।२०) इति सूत्रे एयस्य सामान्यग्रहणाविघातार्थः, एय इत्युक्ते एयण्, एयञ्, एयच् इति त्रयोऽपि प्रत्यया ग्राह्या इति ङीसिद्धिः ॥११३॥

## शाखादेर्यः ॥७।१।११४॥

म० वृ०–शाखादिभ्यस्तुल्ये 'यः' स्यात्। [शाखायास्तुल्यः=] [१]शाख्यः, मुख्यः ॥११४॥

---

प्रव०–[१]पुरुषस्कन्धस्य वृक्षस्कन्धस्य वा तिर्यक् प्रसृतमङ्गं शाखा इत्युच्यते, तद्यथा शाखा पार्श्वायता तथा कुलस्य यः पार्श्वायतोऽङ्गभूतः स शाखायास्तुल्यः। शाखा, मुख, जघन, स्कन्ध, स्कन्द, मेघ, शृङ्ग, चरण, शरण, उरस्, शिरस्, अग्र इति शाखादिगणः ॥११४॥

## द्रोर्भव्ये ॥७।१।११५॥

म० वृ०–द्रुशब्दात् षष्ठ्यन्तात्तुल्ये [१]भव्ये वाच्ये 'यः' स्यात्। द्रुतुल्यो [२]द्रव्यं माणवकोऽयम्, द्रव्यं स्वर्णादिकार्षापणं[३] वा। भव्य इति किम्? द्रुतुल्योऽयं न चेतयते ॥११५॥

---

प्रव०–[१]विशिष्टेष्टपरिणामेन भवतीति भव्यम्,कोऽर्थः? अभिप्रेतानामर्थानां पात्रम्। [२]द्रु=दारु, तत्तुल्यो द्रव्यमिति विस्तरवाक्यम्, यथा द्रु अग्रन्थि अजिह्ममवक्रं दारु संस्क्रियमाणं विशिष्टेष्टरूपं भवति तथा माणवकः शिष्यः पुत्रो विनीयमानः=साधु शिक्षमाणो विद्यालक्ष्मीकीर्त्तिमहिमादिभाजनं भवतीति द्रव्यं माणवकोऽयमित्युच्यते। [३]तथा कार्षापणमपि व्यापार्यमाणं विशिष्टेष्टमाल्याद्युपभोगफलं भवति इति तदपि द्रव्यमुच्यते। राजपुत्रोऽपि द्रव्यं द्रुरिव, यथा द्रुमः पुष्पफलादिभिरर्थिनः कृतार्थयति एवं राजपुत्रादिकोऽन्योऽपि यः कश्चिदुपकारी स द्रव्यमुच्यते ॥११५॥

## कुशाग्रादीयः ॥७।१।११६॥

म० वृ०–कुशाग्रात्तुल्येऽर्थे 'ईयः' स्यात्। कुशाग्रस्य तुल्यं=कुशाग्रीयं शस्त्रम्, तदाकारत्वात्। कुशाग्रीया बुद्धिस्तीक्ष्णत्वात् ॥११६॥

## काकतालीयादयः ॥७।१।११७॥

म० वृ०—काकतालीयादिशब्दा 'ईयन्ताः साधवो' भवन्ति । तुल्यार्थे,— काकश्च तालश्च=काकतालम्, काकतालस्य तुल्यं=[1]काकतालीयम्, [2]एवमन्धकवर्त्तिकीयम्, [3]अजाकृपाणीयम्, [4]अर्द्धजरतीयम्, [5]घुणाक्षरीयमित्यादय आश्चर्यविषयाः काकतालीयादयः प्रयोगा लोकरूढ्या गम्याः ॥११७॥

अव०—[1]काकश्च तालश्च काकतालम्, कोऽभिप्रायः कस्मिन्नपकालक… तदर्थी व्रजत……… तता ……अनकेवापन…त्रीयमाणः संयोगो लक्षणया उच्यते……कतालतु…त् काकतालीय निगद्यते ❀। एवं खलतिबिल्वीयम् इत्यपि उदाहरणम्, खल्वाटस्य टाटरि (?) उपरि बिल्वफलनिपातः इत्यर्थः। [2]तथा अन्धकवर्त्तिकीयम्, अन्धजनस्य वर्त्तिकाया उपरि अकस्मात् पादन्यासः, अथवा अन्धजनहस्ते बाहूत्क्षेपे सति वर्त्तिका तिष्ठति, तत्तुल्यमन्यदपि अचिन्तितं कर्म अन्धकवर्त्तिकीयमुच्यते । [3]अजा च कृपाणं च, कृपाणमुपलक्षणम्, छुरिकादिकम् (अपि) ज्ञेयम्, अजया पादेनात्रकिरत्या=भूमिं खनन्त्याऽकस्मात् अधः छुरिकया स्वपादविदारणं क्रियते । [4]अर्द्धो जरत्याः, यथा जरती वृद्धाऽर्द्धं कार्यं करोति अर्द्धं न करोति तत्तुल्यमर्द्धजरतीयम् । [5]तथा घुणस्याक्षराणि घुणाक्षराणि, यथा घुणो जीवविशेषः काष्ठमुत्किरन् कदाचित्कालपर्यायवशादक्षरलिप्याकारं करोति, एवं कोऽपि मूर्खोऽपि सन् किमपि तत्त्वं वेत्ति, विद्वज्जनोचितं स्वभावं कदाचित् प्रथयति, तेन घुणाक्षरीयमुच्यते ॥११७॥

## शर्करादेरण् ॥७।१।११८॥

म० वृ०—शर्करादिभ्यः षष्ठ्यन्तेभ्यस्तुल्ये 'अण्' स्यात् । शर्करायास्तुल्यं=शार्करं दधि मधुरत्वात् । शार्करी मृत्तिका कठिनत्वात् ॥११८॥

अव०—शर्करा, कपालिका, कम्बाष्ठिका, गोपुच्छ, गोलोमन्, पुण्डरीक, शत्रपत्र, नराची, नकुल, सिकता, कपाटिका इति शर्करादिगणः ॥११८॥

## अः सपत्न्याः ॥७।१।११९॥

म० वृ०—सपत्नीशब्दात् षष्ठ्यन्तात्तुल्ये 'अः' स्यात् । सपत्न्यास्तुल्यः=सपत्नः ॥११९॥

## एकशालाया इकः ॥७।१।१२०॥

म०वृ०—एकशालाशब्दात् षष्ठ्यन्तात्तुल्ये 'इकः' स्यात् । [एकशालायास्तुल्यम्=] एकशालिकम् ॥१२०

## गोण्यादेश्चेकण् ॥७।१।१२१॥

म० वृ०—गोण्यादिभ्यश्चकारादेकशालाशब्दात्तस्य तुल्ये 'इकण्' स्यात् । [1]गौणिकम्, ऐकशालिकम् ॥ १२१ ॥

अव०—गोणी, अङ्गुली, भरुजा, वभ्रु, बभ्रु, वल्गु, मण्डर, मण्डल, शष्कुलि, हरि, मण्डु, कपि, भर, खल, उदश्वित्, तरस्, कुलिश, मुनि, रुरु इति गोण्यादिगणः । [1]गोण, 'भाजगोण'० (२।४।३०) इति ङी, गोण्यास्तुल्यं=गौणिकम् । [2]एवमङ्गुलेरङ्गुल्या वा तुल्यम्=आङ्गुलिकम् ॥१२१॥

## कर्क-लोहिताट्टीकण् च ॥७।१।१२२॥

म० वृ०—कर्कलोहिताभ्यां षष्ठ्यन्ताभ्यां तुल्ये [1]'टीकण्' स्यात्, 'चकारादिकण्' च । शुक्लोऽश्वः कर्कः, तस्य तुल्यः=कार्कीकः, कार्किकः; [2]लौहितीकः, लौहितिकः; कार्कीकी ॥१२२॥

अव०—[1]टीकण् (इत्यत्र) टकारो ङ्यर्थः, तत्र कार्कीकी । [2]यः स्फटिकादिः अलोहितवर्णोऽपि उपाश्रयवशात् लोहित इवात्रभासते स स्फटिकादिः लौहितिकः, लौहितीकः इत्युच्यते ॥१२२॥

## वेर्विस्तृते शाल-शङ्कटौ ॥७।१।१२३॥

❀ अत्र बृहद्वृत्तिपाठ एवम्— काकश्च तालश्च=काकतालम्, यथाकथंचिद् व्रजतः काकस्य निपतता तालेनातर्कितोपनतश्चित्रीयमाणः संयोगो लक्षणयोच्यते, तत्तुल्यं काकतालीयम् ।

म० वृ०—विशब्दाद्विस्तृतेऽर्थे 'शालशङ्कटौ' भवतः। विशालः, विशङ्कटः; विस्तृत इत्यर्थः ।१२३।

अव०—[1]'विस्तृते', अत्र स्तृं ग्ट्, क्तः। 'वेर्वि-स्तृत'० इति सूत्रे विशेषोऽयम्,—विनानानाशब्दौ अव्ययौ पृथग्भावे वर्तेते...........................(तेन विनञ्भ्यां नानाञौ प्रत्ययौ न वक्तव्यौ) ।।१२३।।

## कटः ।।७।१।१२४।।

म० वृ०—वेः परः 'कटः' स्याद्विस्तृतेऽर्थे। विकटः ।।

## सम्प्रोन्नेः सङ्कीर्णप्रकाशाधिकसमीपे ।७।१।१२५।

म० वृ०—सम्, प्र, उद्, नि इत्येतेभ्यो यथासंख्यं सङ्कीर्णादिष्वर्थेषु 'कटः' स्यात्। [1]सङ्कटः, [2]प्रकटः, [3]उत्कटः, [4]निकटः ।।१२५।।

अव०—[1]सम्परात् सङ्कीर्णेऽर्थे कटः। [2]प्रशब्दात् प्रकाशेऽर्थे। [3]उत्परादधिके कटः। [4]निशब्दात्समीपे ।।

## अवात्कुटारश्चावनते ।।७।१।१२६।।

म० वृ०—अवादवनतेऽर्थे'कुटारः'चकारात्'कटश्च' स्यात्। अवकुटारः,अवकटः [अवनत इत्यर्थः] ।।१२६

## नासानति-तद्वतोष्टीट-नाट-भ्रटम् ।।७।१।१२७।।

म० वृ०—अवान्नासानतौ तद्वति च वाच्ये 'टिट-नाट-भ्रटा' भवन्ति । नासानतौ [नासाया नमनमित्यर्थे]— अवटीटम्, अवनाटम्, अवभ्रटम्। [1]तद्वति, नासा, पुरुषः, अपकृष्टो दाऽर्थः, तत्र— [2]अवटीटा, अवनाटा, अवभ्रटा नासिका; अवनाटः, अवभ्रटः पुरुषः। अवटीटम्,अवनाटम्, अवभ्रटं ब्रह्मदेयम् [ब्रह्मभ्यो देयम्]। अपकृष्टमपि हि वस्तु दृष्ट्वा लोको नासिकां नामयति ।।१२७।।

अव०—[1]सा नासानतिर्विद्यते यस्मिन् पुरुषे स तद्वान् नासानतिमान् पुरुषः, तस्मिन् अभिधेये। [2]नासापि नतिमत्त्वात् तद्वती कथ्यते, ततो नासा-नतिमती इति वाक्यम्, नासिका नतिमती (इति) वाक्येऽवटीटा इत्यादिप्रयोगाः ।।१२७।।

## नेरिनपिटकाश्चिक्चिचिकश्चाऽस्य ।।७।१।१२८।।

म० वृ०—निशब्दान्नासानतौ तद्वति चार्थे 'इन, पिट, क' इति प्रत्ययाः स्युः तद्योगे चास्य निशब्दस्य यथासंख्यं 'चिक्, चि, चिक्' इत्यादेशाः। [1]चिकिनम्, चिपिटम्, चिक्कम् नासिकानमनम्। [2]चिकिना, चिपिटा, चिक्का नासिका। चिकिनः पुरुषः[3] ।।१२८।।

अव०—[1]नासिकाया नमनमिति वाक्यम्, चिकिनमित्यादिप्रयोगाः, शब्दान्तरेण निशब्दस्यार्थकथनमत्रास्ति। [2]नासिका नतिमती इति वाक्यम्। [3][एवम्] चिपिटः, चिक्कः पुरुषः। सूत्रे बहुवचनं रूढ्यर्थम् ।।१२८।।

## बिड-बिरीसौ नीरन्ध्रे च ।।७।१।१२९।।

म० वृ०—निशब्दान्नीरन्ध्रेऽर्थे नासानतितद्वतोश्च 'बिडबिरीसौ' भवतः। निबिडाः,निबिरीसाः केशाः; निबिडम्, निबिरीसं वस्त्रम्; नासिकानमनं निबिडम्, निबिरीसम्; निबिडा, निबिरीसा नासिका; [1]निबिडो मैत्रः। *विधानसामर्थ्यान्न पत्वम्[2]।।१२९

अव०—[1]नासानतिमान् निबिड इति वाक्यं कार्यम्, निबिडः, निबिरीसो मैत्रः। [2] 'नाम्यन्तस्था'० (२।३।१५) इत्यनेन [प्राप्तम्] ।।१२९।।

## क्लिन्नाल्लश्चक्षुषि चिल्-पिल्-चुल् चास्य ।७।१।१३०।

म० वृ०—[1]क्लिन्नाच्चक्षुषि वाच्ये 'लः' स्यात्, तद्योगे चास्य क्लिन्नस्य 'चिल्-पिल्-चुल्' आदेशाः। चिल्लम्, पिल्लम्, चुल्लं चक्षुः। तद्योगात्पुरुषोऽपि चिल्लः, पिल्लः, चुल्लः ।।१३०।।

अव०—[1]क्लिद्यति स्म, गत्यर्थेति कः (क्तः) ।।१३०

* 'निबिरीसम्' इत्यादिषु।

## उपत्यका-ऽधित्यके ॥७।१।१३१॥

म० वृ०–'उपत्यका अधित्यका' इति निपात्येते । [1]उपत्यका पर्वतस्य तलहट्टिका भूः । [2]अधित्यका पर्वतोपरि भूमिः ॥१३१॥

अव०–[1]उपशब्दात् , [2]अधिशब्दात् यथासंख्यं पर्वतस्याध आसन्नायाम्, पर्वतस्योपरितनायां भुवि वाच्यायां त्यकः प्रत्ययो निपात्यते, यतो निपातनं रूढ्यर्थम् । स्वभावतः स्त्रीलिङ्गावेतौ शब्दौ इति 'अजादेः' (२।४।१६) इत्यनेन आप् । 'अस्यायत्तत्क्षिपकादीनाम्' (२।४।१११) इति सूत्रे क्षिपकादिगणपाठादत्र इत्वाभावः ॥१३१॥

## अवेः सङ्घात-विस्तारे कट-पटम् ॥७।१।१३२॥

म० वृ०–अविशब्दात्सामर्थ्यात्षष्ठ्यन्तात् सङ्घाते विस्तारे चार्थे यथासंख्यं 'कटपटौ' भवतः [1]अविकटः, अविपटः[2] ॥१३२॥

अव०–सङ्घातेऽर्थे 'षष्ठ्याः समूहे' (६।२।९) इत्यादिसूत्राणां प्राप्तौ सत्यां विस्तारे चार्थे 'तस्येदम्' (६।३।१६०) 'दोरीयः' (६।३।३२) इत्यादिसूत्राणां संज्ञाविवक्षायां प्राप्तौ सत्याम् 'अवेः सङ्घात०'इति सूत्रमपवादं कृतमित्यर्थः । [1]अवीनामजानां सङ्घातोऽविकटः । [2]अविपट इत्युदाहरणाग्रे बृहद्वृत्तौ "सङ्घाते सामूहिकानां विस्तारे ऐदमर्थिकाणां चापवादो योगः" इत्यक्षराणि सन्ति । सामूहिकानां कोऽर्थः ? 'षष्ठ्याः समूहे (६।२।९)'इत्यादीनां सूत्राणाम् । ऐदमर्थिकानां कोऽर्थः ? 'तस्येदम् '(६।३।१६०) इत्यादीनाम् , 'दोरीयः' (६।३।३२) इति (अस्य च)संज्ञाविवक्षायाम् ॥१३२॥

## पशुभ्यः स्थाने गोष्ठः ॥७।१।१३३॥

म० वृ०–[षष्ठ्यन्तेभ्यः] पशुनामभ्यः स्थानेऽर्थे 'गोष्ठः' स्यात् । गवां स्थानं=गोगोष्ठम् , अश्वगोष्ठम् , महिषीगोष्ठम् ॥१३३॥

अव०–'तस्येदम्' (६।३।१६०) इत्यादीनामयमपि 'पशुभ्यः स्थाने०' इति योगोऽपवादः ।१३३।

## द्वित्वे गोयुगः ॥७।१।१३४॥

म० वृ०–पशुनामभ्यो द्वित्वेऽर्थे 'गोयुगः'स्यात्[1] । गवोर्द्वित्वं=गोगोयुगम् ,[2]अश्वगोयुगम् ॥१३४॥

अव०–[1]इदमर्थानामपवादोऽयमपि । [2]अश्वयोर्द्वित्वम् ॥१३४॥

## षट्त्वे षड्गवः ॥७।१।१३५॥

म० वृ०–पशुनामभ्यः षट्त्वे वाच्ये 'षड्गवः प्रत्ययः' स्यात् । [इदमर्थानामपवादोऽयम् ] अश्वानां षट्त्वम्=अश्वषड्गवम् ॥१३५॥

## तिलादिभ्यः स्नेहे तैलः ॥७।१।१३६॥

म० वृ०–तिलादिभ्यः स्नेहेऽर्थे 'तैलः' प्रत्ययः स्यात् [विकारप्रत्ययापवादोऽयम् ] तिलानां स्नेहो विकारस्तिलतैलम् ,सर्षपतैलम् ,एरण्डतैलम् ॥१३६

## तत्र घटते कर्मणष्ठः ॥७।१।१३७॥

म० वृ०–कर्मन्शब्दात् तत्रेति सप्तम्यन्तात् घटतेऽर्थे 'ठः' स्यात् । कर्मणि घटते=कर्मठः॥

अव०–कर्मणि कार्ये ऽतिदक्षः कर्मठः कर्मशूरः ॥१३७

## तदस्य सञ्जातं [1]तारकादिभ्य इतः॥७।१।१३८॥

म० वृ०–तदिति प्रथमान्तेभ्यस्तारका इत्यादिभ्योऽस्येति षष्ठ्यर्थे 'इतः' [इतः प्रत्ययः] स्यात् , यत्प्रथमान्तं तत् सञ्जातं चेत् स्यात् । [2]तारकितं नभः ,[3]पुष्पितस्तरुः ॥१३८॥

अव०–[1]तारका इति शब्द आदिर्येषाम् ( ते तारकादयः, तेभ्यः) । तारका, पुष्प, कर्णक, ऋजीष, मूत्र, पुरीष, निष्क्रमण, उच्चार, विचार, प्रचार, आराल, कुड्मल, कुसुम, मुकुल, बकुल, स्तबक, पिल्लव, किशलय, वेश, वेग, निद्रा, तन्द्रा, श्रद्धा, बुभुक्षा, पिपासा, अभ्र, श्वभ्र, रोग, अङ्गारक, अङ्गार,पर्णक, द्रोह, सुख, दुःख, उत्कण्ठा, भर, तरङ्ग, व्याधि, व्रण, कण्डूक, कण्टक, मञ्जरी, कोरक, अङ्कुर, हस्तक, पुलक, रोमाञ्च, हर्ष, उत्कर्ष, गर्व, कल्लोल, शृङ्गार, अन्धकार, कन्दल,

शैवल, कुतूहल, कुवलय, कलङ्क, कज्जल, कर्दम, सीमन्त, राग, क्षुध्, तृष्, ज्वर, गर, द्रोह, शास्त्र, पण्डा, मुकुर, मुद्रा, गर्द्ध, फल, तिलक, चन्द्रक इति तारकादिगणः। बहुवचनमाकृतिगणार्थम्। आचार्यस्येयं शैली– यत्र गणशब्दानां नैयत्यं नास्ति, लोकेऽन्येऽपि ये केचित् शब्दाः सन्ति,तत्र सूत्रे बहुवचनमाचार्यो निर्दिशति, अत एव बहुवचनमाकृतिगणार्थमित्यक्षराणि। यत्र शब्दनैयत्यमेव तत्रैकवचनमेव सूरिः पठति। ²तारका सञ्जाता अस्य नभसः तत् तारकितम्। ³पुष्पाणि सञ्जातान्यस्य तरोः स पुष्पितस्तरुः ॥१३८॥

## गर्भादप्राणिनि ॥७।१।१३९॥

म० वृ०–गर्भात्तदस्य सञ्जातमित्यर्थे 'इत' स्यात्, अप्राणिनि=षष्ठ्यर्थश्चेन्न प्राणी। [गर्भः सञ्जातोऽस्य=] गर्भितो व्रीहिः [व्रीहिवनम्], गर्भिताः शालयः। अप्राणिनीति किम्? गर्भः सञ्जातोऽस्या दास्या इति वाक्यमेव ॥१३९॥

## प्रमाणान्मात्रट् ॥७।१।१४०॥

म० वृ०–तदस्येति वर्तते। तदिति प्रथमान्तात् प्रमाणवाचिनो नाम्नोऽस्येति षष्ठ्यर्थे'मात्रट्' स्यात्। ¹ आयाममानं प्रमाणम्, तद् द्विधा–, ऊर्ध्वमानं तिर्यग्मानं च, तत्रोर्ध्वमानात् ²जानुमात्रं जलम्, तिर्यग्मानात् ³रज्जुमात्री, तन्मात्री भूः⁴ ॥

---

अव०–टकारो ङ्यर्थः। ¹आयाममानमित्यत्र, ❀ "दनदिनशतमाना हायनस्थानमानाः" इति पुन्नपुंसकलिङ्गपाठात् पुन्नपुंसकत्वम्। ²जानुप्रमाणमस्य जलस्य। ³रज्जुप्रमाणमस्या भुवः। एवं ⁴तावन्मात्री भूमिः ॥१४०॥

## हस्ति-पुरुषाद्वाऽण् ॥७।१।१४१।

म० वृ०–तदिति प्रथमान्ताभ्यां प्रमाणार्थाभ्यां हस्तिपुरुषाभ्यां षष्ठ्यर्थेऽ'ण् वा' स्यात्। हस्ती प्रमाणमस्य=हास्तिनम्,पक्षे ¹हस्तिमात्रम्, ²हस्तिदघ्नम्, ²हस्तिद्वयसम् जलम्; ³हास्तिनी, हस्तिमात्री; पौरुषम्,पुरुषमात्रमित्यादि ⁴; ³पौरुषी, पुरुषमात्री छाया ॥१४१॥

---

अव०–¹पूर्वेण मात्रट्। ²उत्तरेण दघ्नट् द्वयसट्। ³'अणञेये'० (२।४।२०) इति ङी। ⁴पुरुषदघ्नम्, पुरुषद्वयसम् जलमित्यर्थः ॥१४१॥

## वोर्ध्वं दघ्नट्-द्वयसट् ॥७।१।१४२॥

म० वृ०–[ऊर्ध्वमिति क्रियाविशेषणम्, ततोऽम्] ऊर्ध्वं यत्प्रमाणं तद्वाचिनाम्नः प्रथमान्तात् षष्ठ्यर्थे 'दघ्नट्–द्वयसट्' भवतः वा। पक्षे मात्रट्। ¹ऊरुदघ्नम्, ऊरुद्वयसम्, ऊरुमात्रम् जलम्, ऊरुदघ्नी खाता, तद्दघ्नी, तावद्दघ्नी, तावन्मात्री (खाता)। वाग्रहणमण्मात्रटोर्बाधनार्थम्। तेन पुरुषदघ्नं पुरुषद्वयसं पुरुषमात्रं पौरुषं जलम्। एवं हस्तिप्रयोगाः। एवं चातूरूप्यम [पुरुषशब्दस्य हस्तिशब्दस्य च]। ऊर्ध्वमिति किम्? रज्जुमात्री भूमिः ॥ १४२ ॥

---

अव०–'तदस्य सञ्जातम्'० (७।१।१३८) इति सूत्रादारभ्य 'अधिकं तत्संख्यमस्मिन् शतसहस्रे'० (७।१।१५४) इति सूत्रं यावत् सर्वसूत्रार्थेषु "तदिति प्रथमान्तात् अस्येति षष्ठ्यर्थे" इत्यधिकारः सूत्रेषु १६मध्ये उक्तोऽनुक्तोऽपि ज्ञातव्यः। ¹ऊरुः प्रमाणमस्य=ऊरुदघ्नं जलम्। एवं सर्वत्र वाक्यम् ॥१४२

## मानादसंशये लुप् ॥७।१।१४३॥

म० वृ०–प्रमाणादिति वर्त्तते। मानवाच्येत्र साक्षाद् यः प्रमाणशब्दो हस्तवितस्त्यादिः प्रसिद्धो न तु रज्ज्वादिः ¹तस्मात्प्रस्तुतस्य 'मात्रडादेर्लुप्' स्यादसंशये गम्यमाने। ²हस्तः, वितस्तिः, ³दिष्टिः, शमश्चतुर्विंशतिरङ्गुलानि। मानादिति किम्? ऊरुमात्रं जलम् [रज्जुमात्री भूमिः] ॥१४३॥

---

❀ श्रीहैमलिङ्गानुशासने पुन्नपुंसकलिङ्गप्रकरणे विंशतितमे श्लोके।

अव०–[१]कोऽर्थः ? यो लक्षणया प्रमाणे वर्त्तते, तस्मादेवंविधात् प्रमाणवाचिनो नाम्नः परस्य कृतस्य मात्रडादेरित्यर्थः । [२]हस्तः प्रमाणमस्य=हस्तः । [३]हस्तविशेषो दिष्टिः, मुण्डहथु इति लोके प्रसिद्धिः, दिष्टिः प्रमाणमस्य दिष्टिः । संशय इति किम् ? शमः प्रमाणमस्य स्यात्=शममात्रम् । केचिन्मानमात्रान्मात्रट्, तस्यासंशये वा लुपं कुर्वन्ति । यथा प्रस्थं प्रस्थमात्रो वा व्रीहिः, हस्तः हस्तमात्रं वा काष्ठम्, शतं शतमात्रा वा गावः । शतं मानमेषां गवाम् । गोशब्दोऽत्र पुंलिङ्गः । 'मानादसंशये' (७।१।१४३) इति सूत्रप्रान्ते विशेषोऽयम् ।।१४३।।

## द्विगोः संशये च ।।७।१।१४४।।

म० वृ०–मानादिति वर्त्तते । [१]प्रमाणादिति निवृत्तम् । मानान्तात् द्विगोः संशये प्रस्तुतस्य मात्रडादेर्लुप् स्यात् । [२]द्विशमः, द्विदिष्टिः, द्विवितस्तिः, द्विकाण्डा क्षेत्रभक्तिः, [३]द्विकाण्डी रज्जुः, [४]द्विपुरुषी द्विपुरुषा खाता, [५] [६]द्विप्रस्थः, द्विपलम्, द्विशतः ।।१४४।।

---

अव०–[१]चतुष्के 'पुरुषाद्वा' (२।४।२५) इति ङी प्रत्ययाधिका..........पुरुषशब्दस्य प्रमाणत्वमु ....चरित..........लकाक्षात्प्रमाणत्वम् इति हेतोः । प्रमाणानुवृत्तौ सत्यां हि 'पुरुषाद्वा' इत्यनेन तद्धितलुपि सत्यां ङी स्यात् इति प्रमाणादिति निवृत्तम् * । [२]द्वौ शमौ प्रमाणमस्य इति असंशयवाक्यम्, द्वौ शमौ प्रमाणमस्य स्याद्वा इति संशयवाक्यम् । एवं द्विदिष्टिः द्विवितस्तिः इत्यादिषु संशयेऽसंशये वाक्यम् । सर्वत्र 'प्रमाणान्मात्रट्' (७।१।१४०) इति मात्रट्, तस्य 'द्विगोः संशये च' इत्यनेन लोपः । [३]द्विकाण्डी रज्जुरत्र 'काण्डात् प्रमाणादक्षेत्रे' (२।४।२४) इत्यनेन ङी । [४]द्वौ पुरुषौ प्रमाणमस्याः=द्विपुरुषी, 'प्रमाणान्मात्रट्' इति मात्रट्, 'द्विगोः संशये च' इति मात्रट् लुप्यते, 'पुरुषाद्वा' (२।४।२५) इत्यनेन विकल्पेन ङी । [५]एवं द्विहस्तिनौ, अत्र 'स्त्रियां नृतो'० (२।४।१) ङी । [६]द्वौ प्रस्थौ मानमस्य स्यादित्यादियुक्त्या वाक्यानि ।।१४४।।

## मात्रट् ।।७।१।१४५।।

म० वृ०–मानात्संशये इति वर्त्तते । तदिति प्रथमान्तान्मानवाचिनो नाम्नः षष्ठ्यर्थे संशये 'मात्रट्' स्यात् । [१]प्रस्थमात्रं धान्यम्, [२]पलमात्रम्, [३]पञ्चमात्राः, [४]शतमात्राः ।।१४५।।

---

अव०–[१]प्रस्थो मानमस्य स्यात्=प्रस्थमात्रम् । [२]पलो मानमस्य स्यात् । [३]पञ्च मानमेषां स्यात् । पञ्चमात्राः । [४]शतं मानमेषां स्यात्=शतमात्राः ।।१४५।।

## शन्-शद्-विंशतेः ।।७।१।१४६।।

म० वृ०–शन्नन्तात् शदन्ताच्च संख्याशब्दात् विंशतिशब्दान्मानवृत्तेः प्रथमान्तात् षष्ठ्यर्थे संशये गम्यमाने 'मात्रट्' स्यात् । डिनोऽपवादः । दश मानमेषां स्यात्=दशमात्राः, त्रिंशन्मात्राः, विंशतिमात्राः ।। १४६ ।।

## डिन् ।।७।१।१४७।।

म० वृ०–संशये इति निवृत्तम्[१] । शन्नन्तात् शदन्ताच्च संख्याशब्दात् विंशतिशब्दाच्च मानवृत्तेः 'डिन्' स्यात् । [२]पञ्चदशी अर्द्धमासः, [३]पञ्चदशिनौ, [४]पञ्चदशिनः । [५]त्रिंशी, [६]त्रिंशिनौ, [७]त्रिंशिनो मासाः । [८]त्रयस्त्रिंशिनो देवविशेषाः । [९]विंशिनो भवनेन्द्राः १४७

---

अव०–[१]योगविभागात् । [२]पञ्चदश अहोरात्राः परिमाणमस्य, एवम् [३]अनयोः [४]एषाम् । पञ्चदशी अर्द्धमासः, एवं द्वित्वबहुत्वयोरपि । [५]त्रिंशतोऽहोरात्राः परिमाणमस्य [६]अनयोः [७]एषां वा । [८]त्रि, त्रिंशत्शब्दः, त्रयश्च त्रिंशच्च, त्रयस्त्रिंशन्मानमेषां देवानां

---

* अत्र पाठश्च्युतकियदंशोऽशुद्धश्च । अत्रायं भावः—'पुरुषाद्वा' (२।४।२५) इत्यत्रोपचरितप्रमाणात्पुरुषाल्लुपि ङीविधानात् प्रमाणादिति निवृत्तम् । अस्मिन् सूत्रे प्रमाणानुवृत्तौ सत्यां तु प्रमाणस्य मानेन विशेषणाद् प्रसिद्धादेव हस्तादितो लुब् स्यात्; नोपचरितात् पुरुषादेः, तदभावे च'पुरुषाद्वा'इत्यनेन ङीर्न स्यादित्यत्र प्रमाणादिति निवृत्तम् ।

त्रयस्त्रिंशिनः, 'द्वित्र्यष्टानां द्वात्रयोऽष्टाः प्राक्शतादनशीतिबहुव्रीहौ' ( ३।२।९२ ) इति सूत्रेण त्रिस्थाने त्रयस् इत्यादेशः, ततो डिन्, त्रयस्त्रिंशीन् इति सिद्धम्। [१]विंशतिशब्दस्य 'विंशतेस्ते'० (७।४।६७) इत्यनेन तिकारस्य लोपः ॥१४७॥

## इदं-किमोऽतुरिय्-किय् चास्य ॥७।१।१४८॥

म० वृ०—तदस्य मानादिति वर्त्तते। तदिति प्रथमान्तादिदम्शब्दात् किम्शब्दाच्च मानवृत्तेरस्येति षष्ठ्यर्थे मेये 'अतुः' स्यात्, तद्योगे च इदंकिमोः [ यथासंख्यम् ] 'इय् किय्' इत्यादेशौ च। चतुर्धा[१] मानम्, तत्र प्रमाणात्,- इदं मानमस्य= इयान्, एवं [ किं मानमस्य= ] कियान् पटः; परिमाणात्,- इयद्धान्यम्, कियद्धान्यम्, उन्मानात्,- इयद्धेम, कियद्धेम; सङ्ख्यायाः,- इयन्तः, कियन्तः, सन्तः, इयती, कियती। [२]उदित्करणं दीर्घत्वाद्यर्थम् ['अभ्वादे०'(१।४।९०) इत्यत्र दीर्घविधये] ॥१४८॥

---

अव०—[१]'ऊर्ध्वं मानं किलोन्मानं, परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः' ।१। इति चतुर्विधं मानम्। [२]'इदं किमोऽतुरिय्किय् चास्य' इति सूत्रे अतुप्रत्यये यत् उदित्करणं तद्दीर्घत्वाद्यर्थम्। 'अभ्वादेरत्वसः सौ' ( १।४।९० ) इत्यनेन अत्वन्तशब्दस्य दीर्घविधानमेकफलम्। आदिशब्दात् 'ऋदुदितः' ( १।४।७० ) इति सूत्रे उदित्प्रत्ययान्तस्य नोऽन्तो भवतीति द्वितीयफलम्। यथा- इयान्, इयन्तौ, इयन्तः ।१४८।

## यत्तदेतदो डावादिः ॥७।१।१४९॥

म० वृ०—यद्-तद्-एतद्भ्यः प्रथमान्तेभ्यो मानवृत्तिभ्यः षष्ठ्यर्थे मेये-'ऽतुः' स्यात्, स च डावादिः। [१]यावान्, [२]तावान्, [३]एतावान् पटः। यावत्, तावत्, एतावद्धान्यम्। यावत्, तावत्, एतावत् हेम। यावन्तीत्यादयोऽध्ययनानि (?)। यावती तावती, एतावती ॥१४९॥

---

अव०—[१]यत्प्रमाणमस्य। [२]तत्प्रमाणमस्य। [३]एतत्प्रमाणमस्य। ननु इदम्किम्यत्तदेतद्भ्यः परतो मात्रडादयोऽपि प्रत्ययाः पुराणप्रयोगेषु दृश्यन्ते, यथा इदं प्रमाणमस्य=इदंमात्रम्, एवं किंमात्रम्, यन्मात्रम्, तन्मात्रम्, एतन्मात्रम्; यत् उर्ध्वं मानमस्य=यद्दघ्नम्, यद्द्वयसम् इत्यादि। सत्यम्, स्वविषये मानविशेषे प्रमाणवाच्ये सति मात्रडादयोऽपि भवन्त्येव, को दोषः? परं मानसामान्ये तु वाच्ये अतुरेव भवति, न मात्रडादयः इति विभागः। इयं विशेषाऽवचूरिः 'यत्तदेतदो०' इति सूत्रप्रान्ते ज्ञेया ॥१४९॥

## यत्तत्किमः सङ्ख्याया डतिर्वा ॥७।१।१५०॥

म० वृ०—संख्यारूपं यन्मानं तद्वृत्तिभ्यो यद्-तद्-किम्भ्यः प्रथमान्तेभ्यः षष्ठ्यर्थे संख्येये मेये 'डतिर्वा'[२]स्यात्। या संख्या मानमेषां=यति [३][डति], यावन्तः [अतुः]; एवं तति तावन्तः; कति कियन्तः। [४]एतौ च अतुडती स्वभावाद् बहुवचनविषयावेव भवतः ॥१५०॥

---

अव०—[१]'यत्तत्किमः सङ्ख्याया डतिर्वा' इति सूत्रादारभ्य सङ्ख्यायाः कोऽर्थः सङ्ख्याशब्दात् इत्यधिकारः 'अतोरिथट्' (७।१।१६१) इति सूत्रं यावत् अन्तरालसूत्रेषु सूत्रवृत्तौ ज्ञातव्यः उक्तोऽनुक्तोऽपि। [२]पक्षे यथाविहितोऽतुप्रत्ययोऽपि भवतीत्यर्थः। [३]डतिप्रत्ययान्तः अतुप्रत्ययान्तश्च शब्दो 'डत्यतु सङ्ख्यावत्' ( १।१।३९ ) इति सूत्रेण सङ्ख्यासंज्ञ भवति। सङ्ख्यासंज्ञत्वात् कति-यति-ततिशब्देभ्यो जस् एव भवति। तस्य जसो 'डतिष्णः सङ्ख्याया लुप्' (१।४।५४) इति यति तति कति इति सिद्धम्। सा सङ्ख्या मानमेषां तति। का सङ्ख्या मानमेषां कति। [४]सङ्ख्यावाचिशब्देभ्यो विहितौ। सङ्ख्याया इति किम्? किं मानमस्य=कियान्, यावान् पटः ॥१५०॥

## अवयवात्तयट् ॥७।१।१५१॥

म० वृ०—[तस्येति संख्याया इति च वर्त्तते] मानादिति निवृत्तम्, अवयवादिति विशेषणान्तरो-

पादानात् । अवयवे वर्त्तमानात्सङ्ख्यावाचिनो नाम्नः प्रथमान्तात् षष्ठ्यर्थेऽवयविनि 'तयट्' स्यात्। चत्वारोऽवयवा अस्याः=[1]चतुष्टयी शब्दानां प्रवृत्तिः। सप्ततयी नयवृत्तिः। दशतयो धर्मः ॥१५१॥

अव०-[1]जातिगुणक्रियायदृच्छाशब्दलक्षणा। एवं पञ्चतयो यमः, यमो नियमः अहिंसादिमयः, द्वादशतयः सिद्धान्तः ॥१५१॥

## द्वि-त्रिभ्यामयड् वा ॥७।१।१५२॥

म० वृ०-द्वित्रिशब्दाभ्यामवयवार्थाभ्यां प्रथमान्ताभ्याम्[1]'अयट्' वा स्यात्। द्वाववयवावस्य=द्वयम्, द्वितयं तपः; त्रयं जगत्, [2]त्रितयो मोक्षमार्गः, द्वयी, त्रयी। [टकारो ङ्यर्थः] ॥१५२॥

अव०-[1]षष्ठ्यर्थे अवयविनि वाच्ये। [2]सम्यग्ज्ञानदर्शनचारित्ररूपः। "रोदोऽर्चिषी दाम गुणे त्वयट् तयट्" इति स्त्रीक्लीबलिङ्गपाठात् तयटयट्प्रत्ययान्तः स्त्रीक्लीबलिङ्गः। अवयवास्तावदवयविनि सम्बद्धा भवन्ति इति सामर्थ्यादवयवी प्रत्ययार्थ एकत्वविषय इति विज्ञायते, (अतः) त्रयोऽवयवा अस्येति विग्रहे एकत्वमेव प्राप्नोति इति पराशयः, तत्कथं

"पयश्च दिव्यं शुचि मेघसंभवम्,
　　स्वतिप्रसन्नां परमां च वारुणीम्;
ममातुलं वारि च वक्त्रसम्भवम्,
　　त्रयाणि पानानि यथातथा पिबेत्" ।१।

(इति) त्रयाणि (इति) अत्र बहुवचनम् ? सत्यम्, अत्र तु देशकालादिभेदेन समुदायोऽभिधानात् बहुवचनं भवति (१)। तथा द्वये पदार्थाः जीवा अजीवाश्च। पदार्थानां बहुत्वात् द्वाववयवावस्येति न प्राप्नोति इत्याशङ्क्याह,- द्वये पदार्थाः जीवा अजीवाश्चेत्यत्र तु जीवाजीवतया द्वैराश्योपादानात् बहूनामपि पदार्थानां द्वाववयवौ भवतः। द्वाववयवौ इति कल्पनीयौ (२) तथा द्वित्रिभ्यामेव अयट् उक्तः तत्कथमुभयो मणिः, उभये देवमनुष्याः, उभयी दृष्टिः; ? सत्यम्, उभयशब्दः सर्वादिगणे उभयट् इति युक्त्या पठ्यमानः शब्दान्तरमेव विज्ञेयम्, न अयट्प्रत्ययान्तम्। अत एव 'नेमार्धप्रथमचरमतयायाल्प०' (१।४।१०) इति सूत्रेण उभयट् शब्दात्परतो जसः स्थाने विकल्पेन इकारो न भवति, 'जस इः' (१।४।९) इत्यनेन उभये इत्येकमेव रूपं भवति, न तु उभया इति (३)। 'द्वित्रिभ्यामयड् वा' (७।१।१५२) इति सूत्रे इदं विशेषत्रयं ज्ञातव्यम् ॥१५२॥

## द्व्यादेर्गुणान्मूल्य-क्रेये मयट् ॥७।१।१५३॥

म० वृ०-सङ्ख्याया इति वर्त्तते। द्व्यादेः संख्याशब्दाद् गुणवृत्तेः प्रथमान्तात्षष्ठ्यर्थे 'मयट्' स्यात्, चेत्सङ्ख्याशब्दो मूल्ये क्रेये वा वर्त्तते। यवानां द्वौ गुणौ मूल्यमस्योदश्वितः क्रेयस्य=द्विमयमुदश्विद् यवानाम्[1], एवं त्रिमयम्, चतुर्मयम्। उदश्वितो द्वौ गुणौ क्रेयावेषां यवानां[2]=द्विमयाः [3]यवा उदश्वितः,[4] एवं त्रिमयाः। द्व्यादेरिति किम्? यवानामेको गुणो मूल्यमस्योदश्वितः, उदश्वित एको गुणः क्रेय एषां यवानाम्। गुणादिति किम्? द्वौ व्रीहियवौ मूल्यमस्योदश्वितः ॥१५३॥

अव०-[1]एको भाग उदश्वितः, द्विगुणा यवा इत्यर्थः। [2]वाक्यमिदम्। [3]उदाहरणमिदम्। [4]इहोदाहरणे तु द्विगुणत्वमुदश्वितः, एको भागो यवानामित्यर्थः ॥१५३॥

## अधिकं तत्सङ्ख्यमस्मिन् शतसहस्रे शतिशद्दशान्तायाः डः ॥७।१।१५४॥

म० वृ०-[1]प्रथमान्तात् शति शत् दशन् इत्येवमन्तात् सङ्ख्याशब्दादस्मिन् सप्तम्यर्थे शते सहस्रे च 'डः' स्यात्, [2]यत्प्रथमान्तं तच्चेदधिकं [3]तत्सङ्ख्यं च [4]भवति। विंशं योजनशतम्, [5]विंशं शतं योजनानि। एवं विंशं योजनसहस्रम्, विंशं सहस्रं योजनानि। विंशं कार्षापणशतम्, त्रिंशं शतं कार्षापणानि। सङ्ख्यासमुदायोऽपि सङ्ख्यैव, सङ्ख्यायतेऽनयेति कृत्वेत्यत्रापि डः,- एकविंशं द्वाविंशं

शतम् । शत् ,–त्रिंशं शतं सहस्रं च, [६]एकत्रिंशम् । दशन् ,– एकादशं शतं सहस्रं वा, एवं द्वादशं त्रयोदशं शतम् । योजनादीनामिव शतानामपि सहस्रे भवति,– [७]विंशतिः शतान्यधिकान्यस्मिन् शतानां सहस्रे विंशं शतसहस्रम् , एवं त्रिंशं शतसहस्रम् । एवं सहस्राणामपि शते भवति, तथाहि– विंशतिः सहस्राण्यधिकान्यस्मिन् सहस्राणां शते विंशं शतसहस्रम् , एकादशं शतसहस्रम् । [८]राजदन्तादिषु पाठात् शतशब्दस्य पूर्वनिपातः । अधिकमिति किम् ? विंशतिः त्रिंशत् एकादश वा ऊना अस्मिन् शते । तत्सङ्ख्यमिति किम् ? विंशतिर्दण्डा अधिका अस्मिन् योजनशते । अस्मिन्निति किम् ? विंशतिरधिकाऽस्माच्छतात् । शतसहस्र इति किम् ? एकादशाधिका अस्यां त्रिंशति ॥१५४॥

---

प्रव०–[१]संख्याया इत्यनुवर्त्तते, तदिति च । ततः सूत्रार्थ इत्येवम् ,–तदिति प्रथमान्तादित्यादिर्ज्ञेयः । [२]यत्प्रथमान्तमित्याद्यक्षराणां भावार्थोऽयं लिख्यते,–सा शतसहस्रलक्षणा संख्या यस्य योजनादेः तत् तत्संख्यं शतं सहस्रमिति च यत् संख्यायते=परिगण्यते तदेव यद्यधिकमपि भवतीत्यर्थः । [३]शतादिसंख्यमेव । [४]चकार एवकारार्थे । [५]योजनानां विंशतिः (अधिकाऽस्मिन् योजनशते शते वा योजनेषु) इति संख्याने व्युत्पत्तिवाक्यम् , अथवा योजनानि विंशतिरधिकान्यस्मिन् योजनशते शते वा योजनेषु इति संख्येये व्युत्पत्तिवाक्यम् ;विंशं योजनशतमिति सूत्रोदाहरणम् , अथवा विंशं शतं योजनानि इत्युदाहरणम् । (त्रिंशमित्यत्र) 'त्रिंशतेस्तेर्डिति' (७।४।६७) इति तिकारस्य लोपः । [६] एकत्रिंशम् ',एवं चत्वारिंशम् , पञ्चाशम् ,अधिका भवतीति शेषः । [७]वाक्यमिदम् । [८]सहस्राणां शतमिति कृते 'षष्ठ्ययत्नाच्छेषे' (३।१।७६) इति समासे प्रथमोक्तत्वात् सहस्रस्य पूर्वनिपाते प्राप्ते राजदन्तादिषु इत्याद्युक्तम् ॥ १५४ ॥

## संख्यापूरणे डट् ॥७।१।१५५॥

म० वृ०–[१]संख्यापूरणे 'डट्' स्यात् । [२]एकादशानां पूरणः=एकादशः, एकादशसंख्यापूरण इत्यर्थः, एवं द्वादशः ; त्रयोदशः, [एकादशानां पूरणी=] एकादशी स्त्री । संख्याग्रहणं किम् ? एकादशानामुष्ट्रिकाणां पूरणो घटः ॥१५५॥

---

प्रव०–[१]संख्या पूर्यते येन तत् संख्यापूरणम् , तस्मिन् । 'संख्यापूरणे' इति सूत्रसामर्थ्यात् संख्याशब्दात् षष्ठ्यन्तादेव डट् प्रत्ययो विज्ञायते । अत एव तदिति प्रथमान्तादिति निवृत्तम् । [२]एकोत्तरा दश अथवा एकं च दश च एकादश, 'एकादशषोडशषोडत्षोढाषड्ढा' (३।२।१११) अनेन एकादशनिपातः ॥१५५॥

## विंशत्यादेर्वा तमट् ॥७।१।१५६॥

म० वृ०–विंशत्यादिसंख्यायाः संख्यापूरणे वा 'तमट्' स्यात् । विंशतेः पूरणो=विंशतितमः, विंशः, [१]विंशतितमी, विंशी स्त्री, एकविंशतितमः, एकविंशः ॥

---

प्रव०–[१]पक्षे डट् भवति । [२]टकारो ङ्यर्थः ।१५६।

## शतादि-मासा-ऽर्धमास-संवत्सरात् ॥७।१।१५७॥

म० वृ०–शतादिसंख्याशब्देभ्यः, मास, अर्द्धमास, संवत्सर इति शब्देभ्यश्च संख्यापूरणे 'तमट्' स्यात् । [शतस्य पूरणः] शततमः, शततमी, सहस्रतमः, लक्षतमः, संवत्सरतमः ॥१५७॥

## षष्ठ्यादेरसङ्ख्यादेः ॥७।१।१५८॥

म० वृ०–[१]संख्या आदिरवयवो यस्य [स संख्यादिः], तद्वर्जितात् षष्ठ्यादेः संख्याशब्देभ्यः संख्यापूरणे 'तमट्' स्यात् । विकल्पापवादः । षष्टितमः, सप्ततितमः । असंख्यादेरिति किम् ? [२]एकषष्टितमः, एकषष्टः; एकसप्ततितमः, एकसप्ततः ; विंशत्यादेरिति विकल्प एव ॥१५८॥

---

प्रव०–[१]एक द्वि त्रि इत्यादयः संख्याशब्दाः, एवं त्रिचैकादिसंख्यापरतो यः षष्टिसप्तत्यादिसंख्याशब्दाः तत्र तमट् न भवति,किन्तु केवलषष्टिसप्तत्य–

शीतीत्यादिसंख्यापरत एव तमट् इति सूत्रभावार्थः । [२] 'विंशत्यादेर्वा तमट्' (७।१।१५६)। [३]'संख्यापूरणे डट्' (७।१।१५५) ॥१५८॥

## नो मट् ॥७।१।१५९॥

म० वृ०—असंख्यादेः संख्याशब्दान्नकारान्तात् संख्यापूरणे 'मट्' स्यात् । डटोऽपवादः । [पञ्चानां पूरणः] पञ्चमः, पञ्चमी, अष्टमः, नवमः, नवमी । न इति किम् ? त्रिंशः । असंख्यादेरित्येव— द्वादशः, एकादशः ॥१५९॥

## पित्तिथट् बहु-गण-पूग-सङ्घात् ॥७।१।१६०॥

म० वृ०—बहु गण-पूग-सङ्घशब्देभ्यः संख्यापूरणे 'तिथट्' स्यात्, स च पित् [ पुंवद्भावः फलम् ] । बहूनां पूरणो=बहुतिथः, [१]बह्वीनां पूरणी=बहुतिथी, [२]गणतिथः, पूगतिथः, सङ्घतिथः, सङ्घतिथी ॥१६०॥

---

अव०—[१]बह्वीनां पूरणी=बहुतिथी, अत्र तिथट् प्रत्ययः स च पित्, पित्तिथट इदं फलम्— पिति तद्धितप्रत्यये परे 'क्यङ्मानिपित्तद्धिते' (३।२।५०) इति सूत्रेण पुंवद्भावः सिद्धः । एवं गणतिथी, पूगतिथी, सङ्घतिथी अत्रापि'क्यङ्मानि०'(३।२।५०) इति पुंवत् । टो ङ्यर्थः, ततो ङी । 'स्वरादुतो गुणादखरोः' (२।४।३५) इति ङी भवति । [२]गणानां पूरणः, 'बहुगणं भेदे' (१।१।४० इति) संख्यावत्त्वम् ॥१६०॥

## अतोरिथट् ॥७।१।१६१॥

म० वृ०—अत्वन्तात्संख्याशब्दात्संख्यापूरणे 'इथट्' स्यात्, स च पित् । डटोऽपवादः । [१]इयतां पूरणः=इयतिथः,इयतीनां, पूरणी=इयतिथी ; [क्यङ्मानि'० (३।२।५०) इति पुंवत् ] एवं [२]कियतिथः, [३]यावतिथः, एतावतिथः, एतावतिथी[४]॥१६१॥

---

अव०—[१]इदम् शब्दः, इदं मानमस्येति वाक्ये 'इदंकिमोऽतुरिय०'(७।१।१४८) इत्यनेन अतुप्रत्ययः, इदमः स्थाने इय्, इयत्शब्दोऽत्वन्तः । [२]'इदंकिमोऽतु'० (इति) कियत् । [३]'यत्तदेतदो०'(७।१।१४९) इत्यनेन यावत् तावत् । एते सर्वेऽपि अत्वन्ताः । [४](एवम्) कियतिथी, यावतिथी इत्यादि ॥१६१॥

## षट्-कति-कतिपयात् थट् ॥७।१।१६२॥

म० वृ०—षष्-कति-कतिपयशब्देभ्यः संख्यापूरणे 'थट्' स च पित् स्यात् । [१]षष्ठः, षष्ठी, कतिथः, [२]कतिपयथः, कतिपयथी ॥१६२॥

---

अव०—[१]'तवर्गस्य श्रवर्ग'० (१।३।६०) इति थस्य ठकारः । [२](एवम्) कतिथी । कतीनां पूरणः=कतिथः । कतीनां पूरणी=कतिथी ॥१६२॥

## चतुरः ॥७।१।१६३॥

म० वृ०—चतुर्शब्दात् 'थट्' स्यात् । [१]चतुर्थः, [२]चतुर्थी । योगविभाग उत्तरार्थः ॥१६३॥

---

अव०—[१]चतुर्णां पूरणः=चतुर्थः । [२]चतसृणां पूरणी=चतुर्थी ॥१६३॥

## येयौ चलुक् च ॥७।१।१६४॥

म० वृ०—चतुर्शब्दात् 'य-ईयौ' भवतः, च इत्यस्य लुक् च । [१]तुर्यः, तुरीयः, तुर्या,तुरीया ।१६४।

---

अव०—[१]चतुर्णां पूरणः=तुर्यः, तुरीयः । एवं चतुर्थः, तुर्यः, तुरीयः इति त्रैरूप्यम् ॥१६४॥

## द्वेस्तीयः ॥७।१।१६५॥

म० वृ०—द्विशब्दात्तीयः स्यात् । द्वितीयः, द्वितीया ॥१६५॥

## त्रेस्तृ च ॥७।१।१६६॥

म० वृ०—त्रिशब्दात्तीयः तद्योगे च त्रेः 'तृ' इत्यादेशः स्यात् । तृतीयः, [तिसृणां पूरणी=] तृतीया ॥१६६॥

## पूर्वमनेन[४] सादेश्चेन् ॥७।१।१६७॥

म० वृ०–पूर्वमिति क्रियाविशेषणान्निर्देशादेव द्वितीयान्तात् केवलात् सादेः=सपूर्वाचानेनेति तृतीयार्थे कर्त्तरि 'इन्' स्यात्। केवलात्,–पूर्वमनेन [1]पूर्वी, [2]पूर्विणौ, [3]पूर्विणः; पूर्वी कटम्, पूर्वी ओदनम्, पूर्वी पयः। सादेः,–कृतं पूर्वमनेन=कृतपूर्वी कटम्, भुक्तं पूर्वमनेन=भुक्तपूर्वी ओदनम्, एवं [पीतं पूर्वमनेन] पीतपूर्वीपयः। कृतपूर्वादिसमासात्प्रत्ययः [नाम नाम्ना'० (३।१।१८) इति समासः, तत इन् प्रत्ययो भवतीति] ।।१६७।।

अव०–[1]पूर्वमनेन कृतं=पूर्वी [2]पूर्वमाभ्यां कृतं=पूर्विणौ, [3]पूर्वमेभिः कृतं=पूर्विणः इति युक्त्या उदाहरणवाक्यानि कर्त्तव्यानि। [4]अनेनेति सूत्रे कर्तृपदं ज्ञेयम्, कर्त्ता च क्रियां विना न भवति इति कृतं भुक्तं वा पितं वा इति काञ्चित् क्रियामपेक्षते। पूर्वमनेन भुक्तं वा पितं वा इति परिणा क्रियासापेक्षत्वम्। विशेषपरिज्ञानं तु अर्थात्, कोऽर्थः? सामर्थ्यात्, प्रकरणात्, कोऽर्थः? प्रस्तावात्, शब्दान्तरसंनिधेर्वा, कोऽर्थः? कट ओदनं पयः इति शब्दसामीप्यात् भवति, यथा–पूर्वी कटम्, पूर्वी ओदनम्; पूर्वी पयः इति। तथा सादेः "कृतपूर्वमनेन" इति सामान्येन वाक्यमिदं कृत्वा पश्चात् कटेन ओदनेन पयसा सह सम्बन्धः कार्यः। देवदत्तः कृतपूर्वी, कम्? कर्मतापन्नं कटम्; मैत्रो भुक्तपूर्वी, किम्? ओदनम्; चैत्रः पीतपूर्वी, किम्? पयः। इत्थं कटादिना सह योगः। क्तान्तं येनैव सह समानाधिकरणं तस्यैव कर्मतां वदति वृत्तौ। समासे तु क्तान्तं कटादिना सह न समानाधिकरणमिति कटौदनपयःसम्बन्धिकर्म अनुक्तमिति कट ओदन पय इत्यग्रे द्वितीया विभक्तिर्भवतीत्यर्थः ।।१६७।।

## इष्टादेः ।।७।१।१६८।।

म० वृ०–[1]इष्टादिभ्यः सामर्थ्यात् प्रथमान्तेभ्योऽनेनेति तृतीयार्थे कर्त्तरि 'इन्' स्यात्। इष्टमनेन=इष्टी [2]यज्ञे, श्राद्धे ।।१६८।।

अव०–[1]इष्ट, पूर्त, उपपादित, उपसादित, उपासित, निगदित, परिगदित, निकटित, संकलित, परिकलित, संरक्षित, परिरक्षित, अर्चित, अगणित, (अवगणित), अवकीर्ण, अवमुक्त, आयुक्त, गृहीत, अधीत, आम्नात, श्रुत, आसेवित, अवधारित, अवकल्पित, कृत, निराकृत, उपकृत, (उपाकृत,) अनुयुक्त, (अनुगुणित,) अनुगणित, गणित, परिगणित, अनुपठित, निपठित, पठित, व्याकुलित, उद्गृहीत, कथित, निकथित, निषादित, इति इष्टादिगणः। [2]"यज्ञे श्राद्धे' इत्यत्र 'व्याप्ये क्तेन' (२।२।९९) इत्यनेन कर्मणि सप्तमी भवति ।।१६८।।

## श्राद्धमद्य भुक्तमिकेनौ ।।७।१।१६९।।

म० वृ०–श्राद्धात्प्रथमान्तादद्यभुक्तमित्येवमुपाधिकादनेनेति तृतीयार्थे [कर्त्तरि] 'इकेनौ' भवतः। श्राद्धमनेनाद्य भुक्तं=श्राद्धिकः, श्राद्धी ।।१६९।।

## अनुपद्यन्वेष्टा ।।७।१।१७०।।

म० वृ०–अनुपदी इन्नन्तं निपात्यते, [1]अन्वेष्टा चेद्भवति। [2]अनुपदमन्वेष्टा=अनुपदी गवाम् ।।१७०

अव०–[1]अन्विच्छति=गवेषयति (इति) तृच्। [2]पदानां समीपम् ।।१७०।।

## दाण्डाजिनिकायःशूलिकपार्श्वकम् ।।७।१।१७१।।

म० वृ०– दाण्डाजिनिकायःशूलिकाविकणन्तौ पार्श्वक इति कप्रत्ययान्तश्च निपात्यन्ते, अन्वेष्टर्थे। [1]दाण्डाजिनिको दाम्भिकः, [2]आयःशूलिकः, [3]पार्श्वकः ।।१७१।।

अव०–[1]दण्डाजिनं दम्भ उच्यते, दण्डाजिनेनान्वेष्टा वाञ्छकः=दाण्डाजिनिकः, यो मिथ्याव्रती परप्रसादार्थं दण्डाजिनमुपादाय अर्थान् अन्विच्छति वाञ्छति स दाम्भिको दाण्डाजिन इत्युच्यते। निपातनं हि रूढ्यर्थम्, तेन भगवान् विष्णुर्देवता येषां ते भागवताः, भागवतशैवादौ न भवति। [2]तथा आयःशूलिकः, तीक्ष्ण उपायः अयःशूलसाम्यात् अयःशूलमुच्यते, अयःशूलेन अन्वेष्टा वाञ्-

छकः=आयःशूलिकः, यो मृदुना उपायेनान्वेष्टव्यानर्थान् तीक्ष्णोपायेनान्विच्छति राभसिकः स आयःशूलिक उच्यते तथा[3] पार्श्वमनृजुरुपायः लञ्चादिः, तेन पार्श्वेनान्वेष्टा वाञ्छकः=पार्श्वकः, ऋजुनोपायेनान्वेष्ट.............(व्यानर्थाननृजुनोपायेन योऽ-) न्विच्छति......(स पार्श्वक उच्यते)। यस्तु राज्ञः पार्श्वेन समीपेन अर्थान् अन्विच्छति स राजपुरुषः, तत्र प्रत्ययो न भवतीत्यर्थः ॥१७०॥

## क्षेत्रेऽन्यस्मिन्नाश्य इयः ॥७।१।१७२॥

म० वृ०–क्षेत्रशब्दान्निर्देशादेव सप्तम्यन्तादन्योपाधिकान्नाश्येऽर्थे 'इयः' स्यात् । [1]क्षेत्रियो व्याधिः, [2]क्षेत्रियं विषम्, [3]क्षेत्रियाणि तृणानि, [4]क्षेत्रियः पारदारिकः ॥१७१॥

---

अव०–[1]अन्यस्मिन् क्षेत्रे नाश्य इति वाक्यम्, क्षेत्रियो व्याधिः इत्युदाहरणम्, क्षेत्रं शरीरमुच्यते, अन्यस्मिन्, कोऽर्थः ? जन्मान्तरशरीरे, तत्र जन्मान्तरशरीरेऽयं व्याधिर्यदि साध्यो भवति तदा (इयः) भवति, इह जन्मनि अस्मिन् क्षेत्रे शरीरे न साध्यः, असाध्यो व्याधिरयमित्यर्थः । १ । [2]तथा क्षेत्रियं विषम् इत्यस्यायमर्थः,– स्वशरीरात् अन्यस्मिन् परकीयशरीरे मन्त्रादिबलेन तद्विषं सङ्क्रमय्य किञ्चिन्नाश्यम् , कोऽर्थः ? चिकित्स्यं भवति ।२। [3]तथा क्षेत्रियाणि तृणानि, तानि हि तृणानि सस्यक्षेत्रे अन्यस्मिन् अन्यप्रदेशापेक्षयान्यत्र स्थाने उत्पन्नानि नाश्यानि, कोऽर्थः ? उत्पाटनीयानि भवन्तीत्यर्थः ।३। [4]तथा क्षेत्रियः पारदारिकः, 'दाराः' क्षेत्रं इति नाममालापाठात् 卐 दारा भार्या,स हि कामी पारदारिकः स्वक्षेत्रात् स्वकलत्रादन्यस्मिन् क्षेत्रे परदाररूपे प्रवर्त्तमानस्तत्र नाश्यो=राजादीनां निग्राह्यो भवतीत्यर्थः ॥१७२॥

## छन्दोऽधीते श्रोत्रश्च वा ॥७।१।१७३॥

म० वृ०–छन्दस्शब्दान्निर्देशादेव द्वितीयान्तादधीतेऽर्थे 'वा इयः' स्यात्, तद्योगे च छन्दस्शब्दस्य श्रोत्र इत्यादेशः । [1]श्रोत्रियः, [2]छान्दसः ॥

---

अव०–[1]छन्दोऽधीते इति वाक्यम्, श्रोत्रियः इत्यत्र इयः । [2]छान्दस इत्यत्र 'तद्वेत्त्यधीते' (६।२।११७) अण् ॥१७३॥

## इन्द्रियम् ॥७।१।१७४॥

म० वृ०–इन्द्रशब्दादियो निपात्यते । निपातनं हि रूढ्यर्थम्, तेन यथायोगमर्थकल्पना । इद्रियम् ॥१७४॥

---

अव०–इन्द्र आत्मा उच्यते, इन्द्रस्य आत्मनो लिङ्गं लक्षणमिन्द्रियं चक्षुरादि उच्यते, तेन हि इन्द्रियकरणेन आत्मा निश्चीयते– अनुमीयते "नाकर्तृकं करण"मिति पाठात् इत्येकोऽर्थः ॥१॥ तथा इन्द्रेण आत्मना दृष्टमितीन्द्रियम्, आत्मा हि चक्षुरादीनि दृष्ट्वा विचिन्त्य (?) स्वविषये व्यापारयतीति द्वितीयोऽर्थः । २ । इन्द्रेण आत्मना सृष्टमिन्द्रियम्, आत्मकृतेन हि शुभाशुभकर्मणा तथाविधविषयोपभोगाय अस्य आत्मनश्चक्षुरादीनि भवन्तीति तृतीयोऽर्थः । ३ । इन्द्रेण जुष्टं धीति (?) सेवितमितीन्द्रियम्,तद्द्वारेणास्यात्मनो विज्ञानोत्पादात् इति चतुर्थोऽयम् (अर्थः) ।४। इन्द्रेण दत्तमिन्द्रियम्,विषयग्रहणाय विषयेभ्यः समर्पणात् न्यासात् इति पञ्चमोऽर्थः ।५। इन्द्रस्य आत्मनः आवरणक्षयोपशमसाधनं कारणमिन्द्रियम्, एवं षष्ठोऽर्थः ।६। एवं सति सम्भवेऽन्यापि व्युत्पत्तिरिन्द्रियशब्दस्य कर्त्तव्या ॥१७४॥

## तेन वित्ते चञ्चु-चणौ ॥७।१।१७५॥

म० वृ०–तेनेति तृतीयान्तशब्दाद्वित्तेऽर्थे 'चञ्चु-चणौ' भवतः । [वित्तः, ज्ञातः, विदितः, विख्यातः, प्रसिद्धः] विद्यया वित्तो विद्याचञ्चुः, विद्याचणः ॥

## पूरणाद् ग्रन्थस्य ग्राहके को लुक् चास्य ॥७।१।१७६

म० वृ०–तेनेति तृतीयान्तात् पूरणप्रत्यया-

---

卐 अभिधानचिन्तामणिपाठात् ।

न्ताच्छब्दात् ग्रन्थस्य ग्राहकेऽर्थे 'कः' [कप्रत्ययः] स्यात्, तद्योगे च पूरणप्रत्ययस्य लुक्। द्वितीयेन [1]रूपेण ग्रन्थस्य ग्राहकः[2] द्विकः,[3] एवं त्रिकः,[4] षट्कः शिष्यः। ग्रन्थस्येति किम् ? द्वितीयेन दिनेन शत्रूणां ग्राहकः ॥१७६॥

अव०-[1]रूपेण कोऽर्थः ? वारेण, द्वितीयेन वारेण। [2]इति वाक्यम्। [3]उदाहरणम्। [4](एवम्) चतुष्कः, पञ्चकः ॥१७६॥

## ग्रहणाद्वा ॥७।१।१७७॥

म० वृ०-गृह्यतेऽनेनेति ग्रहणं रूपादि, ग्रन्थस्य ग्रहणाद् ग्रहणे वर्त्तमानात्पूरणप्रत्ययान्तात् 'कः' स्यात्, [1]स्वार्थे एव, [2]तद्योगे च पूरणस्य 'लुग्वा' स्यात्। वेति लुका एव सह सम्बन्धः, न प्रत्ययेन। द्वितीयमेव द्विकं ग्रन्थग्रहणमस्य [मैत्रस्य], पक्षे द्वितीयकम्[3] ॥१७७॥

अव०-[1]स्वार्थे एव=प्रकृत्यर्थे एव, अर्थान्तरस्यानिर्देशात्। [2]सूत्रे यो वा शब्दः स एवं ज्ञापयति पूरणप्रत्यय एव वा विकल्पेन लुप्यते न कप्रत्यय इत्यक्षराणामयं भावार्थः। [3]द्वितीयकमित्यस्याग्रे एवं त्रिकम्, चतुष्कम्, पञ्चकम् ॥१७७॥

## सस्याद् गुणात्परिजाते ॥७।१।१७८॥

म० वृ०-सस्यशब्दाद् गुणवाचिनस्तृतीयान्तात् परिजातेऽर्थे 'कः' स्यात्। [1]सस्येन परिजातः=सस्यकः शालिः, [2]एवं सस्यको देशः, [3]वत्सो वा, [4]मणिर्वा, [5]खङ्गो वा; सस्यकं सीधु। गुणादिति किम् ? धान्यवचनान्मा भूत्-सस्येन परिजातं क्षेत्रम् ॥१७८॥

अव०-[1]'सस्येन परिजातः' इत्यादि, परिशब्दः सर्वतो भावे वर्त्तते, जनिधातुः सम्पत्त्यर्थे वर्त्तते, सस्यशब्दो धान्यवत् गुणेऽपि वर्तते, ततः सस्येन-गुणसमूहेन परिजातः-सम्पन्नः=सस्यकः शालिः, यः सर्वतो गुणैः सम्पन्नः अथवा यस्य किञ्चिदपि वैगुण्यं नास्ति स सस्यको शालिरुच्यते। [2]एवं 'सस्यको देशः', यो हि ऋद्धिसौष्ठव्यादिगुणैः सर्वतः सम्पन्नः यत्र च रोगशोकभयादिवैगुण्यं किमपि न न विद्यते स सस्यको देश उच्यते। [3]एवं वत्सभावना कार्या, सस्यको वत्सः। [4]तथा रूढिशब्दश्चायं मणिविषये, अस्य मणेर्यथोक्ता गुणा भवन्तु मा (वा) भूवन्नित्यर्थः (? तथापि) समुदायप्रसिद्धया मणिविशेषस्य संज्ञा इति हेतोः सस्यको मणिः इतिप्रयोगः। [5]'सस्यकः खङ्गः', यो हि सर्वतः सारलोहेन निर्वृत्तो=निष्पन्नः स सस्यकः खङ्ग उच्यते ॥ १७८ ॥

## धन-हिरण्ये कामे ॥७।१।१७९॥

म० वृ०-धनहिरण्याभ्यां निर्देशात्सप्तम्यन्ताभ्यां कामेऽभिलाषेऽर्थे 'कः' स्यात्। धने कामो=धनकः, हिरण्ये कामो=हिरण्यकः मैत्रस्य ॥१७९॥

## स्वाङ्गेषु सक्ते ॥७।१।१८०॥

म० वृ०-स्वाङ्गवाचिनामभ्यः [निर्देशादेव] सप्तम्यन्तेभ्यः सक्ते=तत्परेऽर्थे 'कः' स्यात्। केशेषु सक्तः=केशकः, दन्तकः, नखकः। केशादिरचनायां प्रसक्त उच्यते। बहुवचनात्स्वाङ्गसमुदायादपि कः- दन्तौष्ठकः ॥१८०॥

## उदरे त्विकणाद्यूने ॥७।१।१८१॥

म० वृ०-उदरात् [निर्देशादेव] सप्तम्यन्तात् सक्ते आद्यूनेऽर्थे 'इकण्' स्यात्[1]। उदरे सक्तः=[2]औदरिकः, उदरे सक्ता=औदरिकी ॥१८१॥

अव०-[1]सक्तेऽर्थे इकण् स्यात्, यदि सक्त आद्यूनो भवति इति सूत्रार्थो विज्ञेयः। [2] औदरिकः आद्यूनः, अविजिगीषुरित्यर्थः, यो बुभुक्षयाऽत्यन्तं पीड्यते स औदरिकः। आद्यून इति किम् ? उदरे सक्तः=उदरकः, 'स्वाङ्गेषु सक्ते' (७।१।१८०) इत्यनेन कप्रत्ययः, उदरकोऽन्यः इत्युदाहरणम्। 'उदरे त्विक०' (इति) अत्र तुशब्दः [पूर्वयोगशेषतामस्य कथयति] पूर्वयोगस्यैवायमवयवः, न पृथग् योगः,

व्यावृत्तौ पूर्वेण कः इति पूर्वयोगशेषतामस्य सूत्रस्य तु शब्दः कथयति, तेन कप्रत्ययाधिकारो न बाध्यते, उत्तरयोगेषु कप्रत्यय एवाधिकृतः प्रवर्त्तते ॥१८१॥

## अंशं हारिणि ॥७।१।१८२॥

म० वृ०–अंशान्निर्देशाद् [1]द्वितीयान्तात् हारिण्यर्थे 'कः' स्यात् । अंशं [1]हारी=अंशको दायादः ।१८२

अव०–[1]अवश्यमंशं हरिष्यति इति हारी. 'णिन् चावश्यकाधमर्ण्ये' (५।४।३६) इति णिन् ॥१८२॥

## तन्त्रादचिरोद्धृते ॥७।१।१८३॥

म० वृ०–तन्त्रान्निर्देशादेव पञ्चम्यन्तादचिरोद्धृतेऽचिरादुत्तीर्णेऽर्थे 'कः' स्यात् । [1]तन्त्रकः पटः, प्रत्यग्रः [नवीनः] इत्यर्थः ॥१८३॥

अव०–[1]तन्त्रात् पटवानोपकरणादचिरादुत्तीर्ण इति वाक्यम् , तन्त्रकः पट इत्युदाहरणम् । ॐतन्त्रं सिद्धान्ते राष्ट्रे स्वराष्ट्रचिन्तायां च । परच्छन्द पथा···· अ····दैकुटं वकृत्ये तन्तुवाने परिच्छदे ।१।

"श्रुतिशाखान्तरे शास्त्रे, करणे द्वयर्थसाधके ; इति कर्त्तव्यता तन्त्वोः,तन्त्री स्याद्वल्लकी गुण" ॥२॥ इत्यनेकार्थनाममालायाम् । इति तन्त्रशब्दश्चतुर्दशार्थे वर्त्तते ॥१८३॥

## ब्राह्मणान्नाम्नि ॥७।१।१८४॥

म० वृ०–ब्राह्मणात् [निर्देशादेव] पञ्चम्यतादचिरोद्धृतेऽर्थे नाम्नि संज्ञायां 'कः'स्यात् । ब्राह्मणको [1] नामदेशः ॥१८४॥

अव०–[1]सदाचारब्राह्मणेभ्यस्तदानीमेवोद्धृत्य पृथक् कृतः स ब्राह्मणको नाम देश उच्यते । यत्र ब्राह्मणकनामदेशे ब्राह्मणा आचारक्रियात्राह्याः शस्त्रजीविनः काण्डस्पृष्टा नाम च सन्ति । आयुधजीवी ब्राह्मण एव ब्राह्मणक इत्यन्ये आहुः ॥१८४॥

## उष्णात् ॥७।१।१८५॥

म० वृ०–उष्णात् [निर्देशादेव] पञ्चम्यन्तादचिरोद्धृते 'कः'स्यात् नाम्नि । [1]उष्णिका यवागूः[2]॥१८५।

अव०–[1] नेरचिरोद्धृ इति वाक्यम् । [2]अथवा अल्पान्ना पेया, विलेपिका इति यावत् । उष्णकुण्डान्निःसृता नदी उष्णिका इति केचिदाहुः ॥१८५॥

## [1]शीताच्च कारिणि[2]॥७।१।१८६॥

म० वृ०–शीतादुष्णाच्च [सामर्थ्यात् ] द्वितीयान्तात् कारिण्यर्थे 'कः' स्यान्नाम्नि[3] । [4]शीतं मन्दं [क्रियाविशेषणं] करोति=शीतकोऽलसः । उष्णं क्षिप्रं [4]करोति=उष्णको दक्षः ॥१८६॥

अव०–[1]'शीताच्च कारिणि' इति सूत्रे शीतोष्णशब्दौ मान्द्यशीघ्रवचनौ गृह्येते,न स्पर्शवचनौ । [2]अवश्यं करोति इति कारी, अत्रापि 'णिन् चावश्यक'० (५।४।३६) इति णिन् । [3]नाम्नीत्यधिकारानुवृत्तेः । [4]वाक्यमध्ये शीतं मन्दमुष्णं क्षिप्रमित्यत्र क्रियाविशेषणत्वात् द्वितीया ॥१८६॥

## अधेरारूढे ॥७।१।१८७॥

म० वृ०–अधिशब्दात् रूढेऽर्थे वर्त्तमानात् स्वार्थे 'कः' स्यात् । अध्यारूढोऽधिको द्रोणः खार्याः खार्या [1](वा), [2]अधिका खारी द्रोणेन ॥१८७॥

ॐ अत्र 'तन्त्रं सिद्धान्ते' इत्यादिना श्लोकद्विकेन तन्त्रशब्दस्य चतुर्दशार्थाः प्रतिपादिताः । परमत्र प्रथमश्लोके पाठोऽशुद्धश्च्युतकियदंशश्च विद्यते । श्रीहैमलिङ्गानुशासनविवरणे तन्त्रशब्दस्यानेकार्थप्रतिपादकं सपादश्लोकद्विकमेवम्–

"तन्त्रं कुटुम्बकृत्ये स्यात् , करणे च परिच्छदे । शास्त्रे प्रधाने सिद्धान्ते, तन्तुवाने गदोत्तमे" ॥१॥

"तथा द्विसाधकोपाये, श्रुतिशाखान्तरेऽपि च । इति कर्तव्यतायां च, तन्त्रीवीणागुणे तनोः" ॥ २ ॥

"सिरायाममृतायां च" ।

अव०–आरूढशब्दः कर्त्तरि कर्मणि च क्तप्रत्यये सिद्धः । [1]तत्र यदा कर्त्तरि तदा अधिको द्रोणः खार्याः अधिको द्रोणः खार्यामिति प्रयोगद्वयं भवति । अत्र 'अधिकेन भूयसस्ते' (२।२।१११) इत्यनेन पञ्चमीसप्तम्यौ भवतः । 'अधिकेन'० (२।२।१११) इति सूत्रेऽधिकार्थः सुव्यक्तं प्रकटितोऽस्ति । [2]यदा तु आरूढः इति कर्मणि क्तः तदा अधिका खारी द्रोणेन इत्येव भवति । उदाहरणत्रयस्याप्यर्थः 'अधिकेन भूयस'० (२।२।१११) इत्यत्र प्रकटं विवृतोऽस्ति ।।१८७।।

## अनोः कमितरि ।।७।१।१८८।।

म० वृ०–अनुशब्दात् 'कः' स्यात् समुदायेन यदि कमिता [कामुकः कामी] गम्यते । अनुकामयते=अनुकः ।।१८८।।

## अभेरीश्च वा ।।७।१।१८९।।

म० वृ०–अभिशब्दात् 'कः' स्यात् ,ईकारश्चास्य [अभिशब्दस्य] वा स्यात् , कमितरि वाच्ये । अभिकामयते=अभिकः,अभीकः [कामुकः कामी] । १८९

## सोऽस्य मुख्यः ।।७।१।१९०।।

म० वृ०–स इति प्रथमान्तादस्येति षष्ठ्यर्थे 'कः' स्यात् , चेत्प्रथमान्तं मुख्यः=प्रधानं भवति । देवदत्तो मुख्योऽस्य= देवदत्तकः सङ्घः, [देवदत्तो मुख्यो वर्त्तते सङ्घस्य] एवं जिनदत्तकः, [देवदत्तो मुख्यो एषां जनानां] देवदत्तकाः, जिनदत्तकाः । मुख्य इति किम् ? चैत्रः शत्रुरेषाम् ।।१९०।।

## शृङ्खलकः करभे ।।७।१।१९१।।

म० वृ०–शृङ्खलक इति 'कान्तो' निपात्यते, करभे=उष्ट्रशिशौ वाच्ये । शृङ्खलं [1]बन्धनमस्य=[2]शृङ्खलकः करभ उच्यते ।।१९१।।

अव०–[1]करभाणां काष्ठमयं पादबन्धनं शृङ्खलमुच्यते । [2]अयःशब्दश्चायम् (अतः) शृङ्खलं बन्धनं भवतु, मा भून् वा, तथापि शृङ्खलं बन्धनमस्य शृङ्खलकः करभः इति वाक्ये कप्रत्ययो भवति ।।१९१

## [1]उदुत्सोरुन्मनसि ।।७।१।१९२।।

म० वृ०–उद्-उत्सुभ्यां [ अस्येति षष्ठ्यर्थे ] उन्मनस्यर्थे 'कः'स्यात् । [2]उत्कः, [3]उत्सुकः ; उन्मना इत्यर्थः ।।१९२।।

अव०–[1]उच्च उत्सुश्च, तस्मात् । [2]उद्गतं मनोऽस्य=उत्कः । [3]उत्सुगतं मनोऽस्य=उत्सुकः ।।१९२।।

## काल-हेतु-फलाद्रोगे ।।७।१।१९३।।

म० वृ०–[1]स इति वर्त्तते । [ प्रथमान्तेभ्यः ] कालविशेषवाचिभ्यः हेतुवाचिभ्यः फलवाचिभ्यश्च रोगे वाच्ये [अस्येति षष्ठ्यर्थे] 'कः' स्यात् । [2]द्वितीयकः, [3]तृतीयको ज्वरः, [4]सततको ज्वरः । हेतुवाचि,– [विषस्य पुष्पं] विषपुष्पं हेतुः कारणमस्य [रोगस्य] विषपुष्पकः,[5]पर्वतको रोगः । फल,– [6]शीतकः, उष्णको[7]ज्वरः ।।१९३।।

अव०–[1]अत एव कारणात् कालहेतुफलात् इति पञ्चम्यन्तनिर्देशात् पञ्चम्यन्तेभ्य इति न व्याख्येयम् , स इति प्रथमान्तेभ्य इति व्याख्येयम् । [2]द्वितीयो दिवसोऽस्य ज्वरादिरोगस्य प्रकटीभावस्य इति वाक्यम् , द्वितीयकः । [3]एवं तृतीयो दिवसोऽस्य ज्वरादिरोगस्याविर्भावाय=तृतीयकः, तादर्थ्ये चतुर्थीयम् । [4]एवं सततो निरन्तरः कालोऽस्य ज्वरस्य=सततको ज्वरः । [5]पर्वतो हेतुः कारणमस्य रोगस्य । [6]शीतं फलं कार्यमस्य ज्वरस्य=शीतकः शीतज्वरः । [7]उष्णको दाहज्वरः ।।१९३।।

## प्रायोऽन्नमस्मिन्नाम्नि ।।७।१।१९४।।

म० वृ०–स इति प्रथमान्तादस्मिन्निति सप्तम्यर्थे नाम्नि संज्ञायां 'कः' स्यात् , यत्प्रथमान्तं तच्चेत् अन्नं प्रायः[1] प्रायेण भवति । गुडापूपिका[2] पौर्णमासी, तिलापूपिका ।।१९४।।

अव०–[1]प्रायस् इति सकारान्तोऽव्ययम् , प्रायेण इति तृतीयान्तो वाऽस्ति, अथवा प्रायशब्दोऽनव्ययमन्नसमानाधिकरणे नियतलिङ्गसङ्ख्यः,

कोऽर्थः ? पुंलिङ्ग एकवचनान्तोऽप्यस्ति । प्रायोऽकृत्स्नबहुत्वम् , अकृत्स्नस्य सतो बहुत्वमित्यर्थः । [२]ततः गुडाश्च अपूपाश्च=गुडापूपाः प्रायः प्रायेण वा अन्नमस्यां पूर्णिमायां सा गुडापूपिका । नाम्नीति किम् ? अपूपाः प्रायः प्रायेण वा अन्नमवन्तिषु इति व्यावृत्तिः प्रान्ते ज्ञेया ॥१९४॥

## कुल्मासादण् ॥७।१।१९५॥

म० वृ०—कुल्मासात् प्रायोऽन्नमस्मिन्नित्यर्थे-'अण्' स्यात् , नाम्नि । [१]कौल्मासी पौर्णमासी ॥१९५॥

अव०—[१]कुल्माष इति मुर्द्धन्योऽप्यस्ति,(अतः) कुल्माष कुल्मास इति शब्दद्वयम् । कुल्माषाः कुल्मासाः (वा) प्रायेण प्रायो वाऽन्नमस्यां पौर्णमास्यां सा (कौल्माषी) कौल्मासी (वा) पौर्णमासी ॥१९५॥

## वटकादिन् ॥७।१।१९६॥

म० वृ०—वटकात्प्रायोऽन्नमस्मिन्नित्यर्थे 'इन्' स्यात् , नाम्नि । वटकिनी[१] ॥१९६॥

अव०—[१]वटकानि प्रायेण प्रायो वा अन्नमस्यां पौर्णमास्यां सा वटकिनी पौर्णमासी ॥१९६॥

## साक्षाद् द्रष्टा ॥७।१।१९७॥

म० वृ०—साक्षाच्छब्दात् द्रष्टा इत्यर्थे 'इन्' स्यात् । साक्षात् द्रष्टा=साक्षी,[१] [साक्षिणौ] साक्षिणः ॥१९७॥ ग्रन्थाग्र-३२८

अव०—[१]'प्रायोऽव्ययस्य' (७।४।६५) इत्यन्त्यस्वरादिलोपः ॥१९७॥ अत्र सूत्रे अवचूरिश्लोक-५४६, अक्षर—२६॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने सप्तमाध्यायस्य प्रथमः पादः समाप्तः ॥



॥ अर्हम् ॥

# ॥ सप्तमोऽध्यायः ॥

## [ प्रथमः पादः ]

★

### तदस्यास्त्यस्मिन्निति मतुः ॥७।२।१॥

म० वृ०–तदिति प्रथमान्तात् अस्येति षष्ठ्यर्थे अस्मिन्निति सप्तम्यर्थे च 'मतुः' स्यात् , प्रथमान्तं चेदस्तीति भवति [प्रथमान्तशब्दस्य अस्तिना सह सामानाधिकरण्यं भवतीत्यर्थः] । गावोऽस्य सन्ति=गोमान् , वृक्षा अस्मिन् सन्ति=वृक्षवान् पर्वतः, [1]अस्तिमान् , [2]स्वस्तिमान् , अत्रास्तिस्वस्ती अव्ययौ [यथाक्रमं] धनारोग्यवचनौ [[3]अस्तीति च सामान्याभिधायि,विशेषास्तेश्च सामान्यास्तिना सामानाधिकरण्यमुपपद्यत एव । ] तथा अस्तीति वर्त्तमानकालोपादानाद् वर्त्तमानसत्तायां मतुप्रत्ययो भवति, न भूतभविष्यत्सत्तायाम् ,–गावोऽस्यासन् , गावोऽस्य भवितार इति वाक्यमेव । [सूत्रे] इति शब्दो विवक्षार्थः । तेन—

"भूमनिन्दाप्रशंसासु, नित्ययोगेऽतिशायने ;
संसर्गेऽस्तिविवक्षायां,प्रायो मत्वादयो मताः"॥१॥

भूम्नि,–गोमान् । निन्दायाम् ,–[4]शङ्खोदकी,[5]ककुदावर्त्ती । प्रशंसायाम ,– रूपवती,शीलवती कन्या । नित्ययोगे,–क्षीरिणो वृक्षाः, कण्टकिनः । अतिशायने,–उदरिणी कन्या, बलवान् मल्लः । संसर्गे,–दण्डी । [6]प्रायिकमेतद् भूमादिदर्शनम , सत्तामात्रे प्रायः प्रत्ययः सर्वत्र दृश्यते, यथा–व्याघ्रवान गिरिः, "स्पर्शरसगन्धवर्णवन्तः卐 पुद्गलाः" [परमाणवः],रूपरसगन्धस्पर्शवती पृथ्वी, रूपरसस्पर्शवत्य आपः, रूपस्पर्शवत् तेजः, स्पर्शवान् वायुः ॥१॥

---

प्रब०–[1]अस्ति, कोऽर्थः ? धनमस्यास्ति इति वाक्यम् अस्तिमान् उदाहरणम् । [2]एवं स्वस्ति आरोग्यमस्यास्ति=स्वस्तिमान् । [3]ननु अस्तिशब्दो यदि धनवाची तदा अस्तिमान् इति युक्तं सिद्ध्यति, यदा च अस्तिशब्दो विद्यमानार्थवाची तदा कथमस्तिमानिति प्रयोगः द्वयोरेकार्थत्वात् ? इत्याह–अस्तीति च सामान्याभिधायि, विशेषास्तिपदस्य च सामान्यास्तिना सह सामानाधिकरण्यमुपपद्यत एव, कोऽभिप्रायः ? अस्तीति क्रियापदं सामान्याभिधायि, सामान्येन अस्तिमात्राभिधानात् , प्रकृतिभूतस्य तु अव्ययस्य विशेषाभिधायित्वम , विद्यमानरूपविशेषस्याभिधानात् । [4]शं सुखं खादतीत्येवंशीलः शङ्खादकः,'निन्दहिंस०'(५।२।६४) इति णकः, शङ्खादक आवर्त्तविशेषोऽस्यास्ति, 'प्राणिस्थादस्वाङ्गाद् द्वन्द्वरुग्निन्द्यात्' (७।२।६०) इति वक्ष्यमाणसूत्रेण इन् । [5]एवं ककुदावर्त्ती। [6]अस्तिविवक्षायामित्यस्यार्थोऽयम् ★ । 'तदस्य०'इति सूत्रे विशेषा लिख्यन्ते,-मत्वर्थीयप्रत्ययः सरूपः=सदृशो न भवति, तथाहि– गाव एषां सन्तीति गोमन्तः, गोमन्तोऽत्र सन्तीति वाक्ये पुनर्मतुर्न भवति । दण्ड एषामस्तीति दण्डिकाः, दण्डिका अत्र सन्ति इति वाक्ये 'अतोऽनेकस्वरात्' (७.२.६) इत्यनेन पुनर्न इकः । विरूपस्तु असदृशो मत्वर्थीयप्रत्ययो भवत्येव,–दण्डिमतीशाला हस्तिमती उपत्यका । विरूप्येऽपि असदृशो मत्वर्थीयः समानायां वृत्तौ न भवति, यथा दण्डमेषामस्तीति दण्डिकाः, दण्डिनः ;'अतोऽनेक'० (७।२।६) इति इकेनौ, दण्डिका दण्डिनोऽस्य सन्ति इति उभयत्रापि वाक्ये षष्ठ्याः सद्भावात् समाना वृत्तिरेवं भवति, समानायां वृत्तौ पुनरत्र

---

卐 तत्त्वार्थाधिगमसूत्रे पञ्चमाध्याये त्रयोविंशतितमं सूत्रम् ।

★ 'भूमनिन्दाप्रशंसासु'० इति श्लोकस्थस्य 'अस्तिविवक्षायाम्' इत्यस्यार्थः 'प्रायिकमेतद् भूमादिदर्शनम्' इत्यादिना दर्शयतीति भावः ।

वाक्ये इन्मतू न भवतः । इतिशब्दविवक्षार्थ-करणबलादसंज्ञाभूतान् कर्मधारयात् न मत्वर्थीयः, यथा वीराश्च ते पुरुषाश्चेति कर्म्मधारयः वीराःपुरुषा अस्मिन् ग्रामे सन्ति, अत्र बहुव्रीहिरेव, न मतुः, परं 'शेषाद्वा' (७।३।१७५) इति सूत्रेण कच् भवति, ततो वीरपुरुषको ग्राम इति प्रयोगः । संज्ञायास्तु कर्म्मधारयान्मत्वर्थीयो भवत्येव,-गौरश्चासौ खर-श्चेति कर्म्मधारये गौरखरोऽत्र वनेऽस्ति=गौरखर-वद् वनम् , कृष्णसर्पवान् वाल्मीकः, लोहितशालि-मान् ग्रामः । कथमेकगविका सर्वधनी इति ? 'एकादेः कर्मधारयात्' (७।२।५७) 'सर्वादेरिन्' (७।२।५०) इति वक्ष्यमाणसूत्रसामर्थ्यादिमौ प्रयोगौ भविष्यतः । तथा तत्रैवैतयोः सिद्धिरस्ति । गुणे कोऽर्थः ?गुणेगुणिनि च ये गुणशब्दा वर्त्तन्ते तेभ्यो मत्वर्थीयो न भवति, शुक्लो वर्णोऽस्यास्ति इति तिक्तो रसोऽस्यास्ति इति,प्रत्ययमन्तरेणापि एषां शुक्लादीनां तदभिधाने=गुण्यादीनां (? गुणिनां) भाषणे साम-र्थ्यात् । ये तु गुणमात्रे एव वर्त्तन्ते तेभ्यो मत्वर्थीयो भवत्येव,-यथा रूपवान् , रसवान् , शौक्ल्यवान् , कार्ष्ण्यवान् इति । एते विशेषाः सूत्रान्ते ज्ञेयाः ॥१॥

## [१]आ यात् ॥७।२।२॥

म० वृ०-'गुणादिभ्यो यः' (७।२।५३) 'रूपा-त्प्रशस्ताहतात्' (७।२।५४) इति आ एतस्माद् प्रत्य-याद् याः प्रकृतयो निर्देक्ष्यन्ते [भणिष्यन्ते] ताभ्यो मतुः [२]स्यात् , तदस्यास्ति तदस्मिन्नस्तीति विषये । कुमारीमान् , व्रीहिमान् , दण्डवान् , अशीर्षवान् , वातवान् , चूडावान् , गोमान् , गुणवान् । अपवाद-सूत्रैर्बाधा मा भूदिति वचनम् । तेन [३]यथाभिधान-मुत्तरत्र [कुत्रापि कुत्रापि] मतुरपि भवति ॥२॥

---

अव०-[१]'आयात्' इति सूत्रे आङ्शब्दोऽभि-विधौ अर्थे वर्त्तते, इति सूत्रं यावत् इत्यर्थः । [२]'ना-वादेरिकः' ( ७।२।३ ) इत्यादिषु सूत्रेषु प्रवर्त्तमानेषु तत्र मतुः प्रत्ययोऽपि भवतीत्यर्थः । 'नावादेरिकः' (७।२।३) इति इकः,कुमारिकः, अत्र मतुरपि- कुमा-रीमान् । एवं सर्वोदाहरणेषु । 'व्रीह्यादिभ्यः०' (७। २।५ ) इत्यादिसूत्रेषु प्रवर्त्तमानेषु मतुरपि एषु भवति । व्रीहिमानित्यत्र 'व्रीह्यादिभ्य०' ( ७।२।५ ) इति विषये, दण्डवान् 'अतोऽनेक०' (७।२।६) इति, वातवान् 'बलवात०' ( ७।२।१९। इति, चूडा-वान् 'प्राण्य०' ( ७।२।२० ) इति, गोमान् 'गोः' (७। २।५० ) इति, सिध्मवान् 'सिध्मादिक्षुद्रजन्तु०' (७। २।२१) इति,गुणवान् 'गुणादिभ्यो यः' (७।२।५३)। [३]यथाभिधानमिति कोऽर्थः ? वक्ष्यमाणैः 'काला-जटा०' ( ७।२।२३ ) इत्यादिसूत्रैः क्षेपेऽर्थविशेषे लेलादिप्रत्यया उक्ताः सन्ति ते च प्रत्यया ( ? स च) मतुप्रत्ययेन न गम्यन्ते (? गम्यते) इति तद-र्थप्रतिपादनाय, कोऽर्थः ? क्षेपार्थप्रकटनाय 'काला-जटा०' इत्यादिसूत्रोक्त एव तत्र प्रत्ययो भवति, न तु मतुः इत्यभिप्रायः ॥२॥

## नावादेरिकः ॥७।२।३॥

म० वृ०-नौ इत्यादिभ्यो मत्वर्थे 'इकः' स्या-न्मतुश्च । नौरस्यास्मिन्वाऽस्तीति नाविकः, नौमान् , कुमारिकः, कुमारीमान् ॥३॥

## शिखादिभ्य इन् ॥७।२।४॥

म० वृ०-शिखा इत्यादिभ्यो मत्वर्थे 'इन् मतुश्च' स्यात् । शिखी, शिखावान् ; माली, मालावान् ॥४॥

---

अव०-शिखा, माला, शाला, मेखला, शाखा, वीणा, संज्ञा, वडवा, अष्टका,बलाका,पताका, कर्मन् , चर्मन् , वर्मन् , बल, उत्साह, उद्वास, उभ्दास, उल, मुल, मूल, आयाम, व्यायाम, प्रयाम, आरोह, अवरोह, परिणाह, शृङ्ग, वृन्द, गदा, निचुल, मुकुल, कूल, फल, अल, मान, मनीषा, व्रत, धन्वन् , चूडा, केका, दंष्ट्रा, सूना, घृणा, करुणा, जरा, आयास, स्तबक,उपयाम,उद्यम इति शिखादिराकृतिगणः॥४॥

## व्रीह्यादिभ्यस्तौ ॥७।२।५॥

म० वृ०-[व्रीह्यादयः प्रयोगगम्याः] व्रीह्या-दिभ्यो मत्वर्थे 'तौ इकेनौ' भवतः 'मतुश्च' ।

[व्रीहयोऽस्यास्मिन् वा सन्ति=] व्रीहिकः, व्रीही, व्रीहिमान् । मायिकः, मायी, मायावान् । मायावीति विन् ॥ ५ ॥

## अतोऽनेकस्वरात् ॥७।२।६॥

म० वृ०–अतोऽकारान्तादनेकस्वरान्मत्वर्थे इकेन्–मतवो भवन्ति । दण्डिकः, दण्डी, दण्डवान् । अत इति किम् ? मालावान् । अनेकस्वरादिति किम् ? खवान्, एवं स्ववान् । अभिधानार्थस्येति करणस्यानुवृत्तेः कृदन्तान्नेकेनौ,–[1]राप्यवान्, [2]कृत्यवान्, कारकवान्, [3]कुम्भकारवान्, ईश्वरवान्[4] । क्वचिद् भवतः,–कार्यिकः, [5]कार्यी, गृहिकः,[6] गृही, [7]पौत्रिकः, पौत्री, भोगिकः, [8]भोगी, विजयिकः, विजयी, [9]संयमिकः, संयमी, स्थानिकः, स्थानी । जातिशब्देभ्यो नेकेनौ,–व्याघ्रवान्, [सिंहवान्,] वृक्षवान्, [10]तथा द्रव्यवान्, सस्यवान्, धान्यवान्, [माल्यवान्] पुण्यवान्, सत्यवान्, अपत्यवान्, धनवान् । [11]क्वचिद् भवतः-तण्डुलिकः, तण्डुली; कर्पटिकः, कर्पटी । धनादुत्तमर्णे इकेनौ,-धनिकः, धनी[12] ॥६॥

---

प्रव०–[1]'राप्यवान्' इत्यत्र 'आसुयुवपिरपिलपि'० (५।१।२०) इत्यनेन घ्यण् कृत्प्रत्ययः । एवं लभ्यवान्, अत्र 'य एचातः' (५।१।२८) । [2]'कृत्यवान्' इत्यत्र 'कृवृषिमृजिशंसिगुहिदुहिजपो वा' (५।१।४२) इत्यनेन क्यप् । एवं भृत्यवान्, भ्रियते=पुष्यते इति भृत्यः, 'भृगोऽसंज्ञायाम्' (५।१।४५) क्यप् । तथा हिंस्रवान्, हिनस्तीत्येवं शीलः–'स्म्यजसहिंसदीपकम्पकमनमो रः' (५।२।७३) इति रः । [3]'कुम्भकारवान्' इत्यस्याग्रे धान्यमायवान् इत्यपि प्रयोगो मन्तव्यः, धान्यं माति मिमीते वा मयते वा,–'कर्मणोऽण्' (५।१।७२) धान्यमाय इति शब्दः, धान्यमायोऽस्यास्मिन्वास्ति=धान्यमायवान् । [4]'ईश्वर' इत्यत्र 'स्थेशभासपिसकसो वरः' (५।२।८१) । एवं स्नेहवान् । अत्र सर्वत्र औत्सर्गिकमतुः, 'मावर्णान्तोपान्त्यापञ्चम'० (२।१।९४) इत्यनेन मतोर्मस्य वकारः । [5]'ऋवर्णव्यञ्जनाद् घ्यण्' (५।१।१७), तत इक इनश्च । [6]'गेहे ग्रहः' (५।१।५५) कः । [7]'पूङ् पवने अथवा पूग्श् पवने, पूयतेऽनेनेति पात्रम्, 'हलक्रोडास्ये पुवः' (५।२।८९) इत्यनेन त्रट्, पौत्रं हलसूकरयोर्मुखमुच्यते । [8]'भोगी', इत्यस्याग्रे तरिकः, तरी, तत्र तरणं तरः, 'युवर्णवृद्'० (५।३।२८) इत्यनेनाल्, तरोऽस्यास्ति । [9]'संयमिक' इत्यत्र 'संनिव्युपाद् यमः' (५।३।२५) इत्यनेनाल्, तत इकेनौ । [10]तथा, कोऽर्थः ? व्याघ्रादयो लोके प्रसिद्धा जातिशब्दाः द्रव्यादयस्तु शास्त्रप्रसिद्धा जातिशब्दा इति दर्शयितुं तथेत्युक्तम्– तथा द्रव्यवान् । [11]क्वचित् जातिशब्देभ्योऽपि अभिधानात् इकेनौ भवत इत्यर्थः । [12]'धनिकः धनी' इत्यस्याग्रे एते विशेषा ज्ञातव्याः, तथाहि– सप्तम्यर्थे क्वचिन्न इकेनौ,–दण्डोऽस्मिन्नस्ति दण्डवत् गृहम्, वीरवान् ग्रामोऽयम् । क्वचित् सप्तम्यर्थेऽपि इन् भवति,–खलान्यस्यां सन्ति=खलिनी भूमिः, शाद्वलमत्रास्ति=शाद्वलिनी भूमिः । रसरूपवर्णगन्धस्पर्शशब्दस्नेहेभ्यो गुणवाचिभ्यो न इकेनौ । यदा तु कस्यचिद्रूपं रस इत्यादि नाम भवति तदा इकेनौ भवत्येव । क्वचिच्च भवतः–रसिको नटः, रसी इक्षुः, रूपिको दारकः, रूपिणी कन्या, रूपिष्ववधिः, अस्यार्थोऽयम्,–रूपिषु द्रव्येषु अवधिज्ञानस्य प्रवृत्तिः, रूपिद्रव्यविषये एवावधिज्ञानं प्रवर्त्तते, न अरूपिषु; रूपिसमवायाच्चाक्षुषाणि, अस्यार्थः,–सङ्ख्या, परिमाणानि, पृथक्त्वम्, संयोगविभागौ कर्म च एते भावा रूपिसमवाया इति हेतोः चाक्षुषाणि=चक्षुषा ग्राह्या भवन्तीत्यर्थः ; स्पर्शिको वायुः, गन्धिकः, गन्धी; तदेवं प्रवृत्तौ निवृत्तौ वा (? च) सूत्रकरणादभिधानमेव श्रेयः ॥ ६ ॥

## अशिरसोऽशीर्षश्च ॥७।२।७॥

म० वृ०–अशिरस्शब्दा- दिकेन् मतवो भवन्ति, तद्योगेऽशिरसो–'ऽशीर्ष' इत्यादेशश्च । [1]अशीर्षिकः, अशीर्षी, अशीर्षवान् ॥७॥

---

प्रव०–[1]न विद्यते शिरोऽस्य=अशीर्षिकः । इके-

नप्रत्यये परे 'शीर्षः स्वरे तद्धिते' (३।२।१०३) इत्यनेनापि शीर्षादेशोऽस्त्येव, यथा–हस्तिशिरसोऽपत्यं हास्तिशीर्षः, बाह्वादित्वात् इञ्, 'शीर्षः स्वरे०' (३।२।१०३) इत्यनेन शिरसस्थाने शीर्षादेशः, शीर्षादेशश्च तदन्तस्यापि भवति, तथात्रापि 'शीर्षः स्वरे०' (३।२।१०३) इत्यनेनापि शीर्षादेशो भविष्यति, किमनेन ? सत्यम्, मतुप्रत्ययेऽपि परे अशिरसो शीर्षादेशो यथा स्यात् इत्येवमर्थम् ॥७॥

## अर्था-ऽर्थान्तादू भावात् ॥७।२।८॥

म० वृ०–अर्थशब्दात् अर्थान्तशब्दाच्च भाववाचिनो मत्वर्थे 'इकेनौ' भवतः । नियमार्थमिदम् । उभयथा चायं नियमो वाक्यभेदेन क्रियते,– भाववाचिन एवैताविकेनौ भवतः, भाववाचिनश्च एतावेवेकेनौ;[1] न मतुः । [2]अर्थिकः, अर्थी; [3]प्रत्यर्थिकः, प्रत्यर्थी । भावादेवेति नियमादतो द्रव्यवाचिन इकेनौ न भवतः–[4]अर्थवान् ॥८॥

अव०–[1]इकेनावेव भवत इति नियमादेषु प्रयोगेषु मतुर्न भवतीत्यर्थः । [2]'अर्थणि उपयाचने', अर्थनमर्थः, अर्थोऽस्यास्तीति अर्थिकः, अर्थी । [3]प्रतीपमर्थनं=प्रत्यर्थः,प्रत्यर्थोऽस्यास्तीति प्रत्यर्थिकः,प्रत्यर्थी । [4]तथा 'अर्थवान्' इत्यत्र अर्थ्यतेऽसौ जनैरित्यर्थः, 'युवर्ण०' इति अल् [? 'भावाकर्त्रोः' (५।३।१८) इति घञ् ], अथवा अर्त्तिधातुः, अर्त्यते इत्यर्थः, 'कमिप्रुगार्त्तिभ्यस्थः' (उ० २२५) इत्युणादिसूत्रेण थप्रत्ययः, अर्थो हिरण्यादिरस्यास्तीति अर्थवान् इति धनार्थादर्थशब्दात् मतुरेव ॥८॥

## व्रीह्यर्थतुन्दादेरिलश्च[1] ॥७।२।९॥

म० वृ०–व्रीहिवाचिभ्यः तुन्दादिभ्यश्च मत्वर्थे 'इलः चकारात्तौ चेकेनौ मतुश्च' । व्रीह्यर्थ, –[2]कलमिलः, कलमिकः, कलमी, कलमवान् । [ शालिलः] शालिकः,शाली,शालिमान्। [3]तुन्दिलः, तुन्दिकः, तुन्दी, तुन्दवान्; उदरिलः, उदरिकः, उदरी,उदरवान् ।९।

अव०–[1]'इलश्च' इत्यत्र चशब्दोऽप्यर्थे ज्ञातव्यः, ततः तावपि इकेनौ भवत इति सूत्रार्थो व्याख्येयः । [2]कलमा व्रीहिविशेषो अस्यास्मिन्वा सन्ति=कलमिलः, कलमी, कलमवान् । एवं शालिल इत्याद्या अपि ।'व्रीह्यर्थतुन्दादे०'इति सूत्रे विशेषोऽयं लिख्यते,–व्रीहिशब्दोऽपि व्रीह्यर्थो भवति, किन्तु पूर्वसूत्रे 'व्रीह्यादिभ्यस्तौ' (७।२।५) इत्यत्र व्रीहिशब्दोपादानात् व्रीहिशब्दादनेन इलो न भवति । इलस्य भावे हि=इलोत्पत्तौ हि सत्यां 'व्रीह्यादिभ्यस्तौ' (७।२।५) इत्यनर्थकं स्यात् । भवतीत्येके,–व्रीहिलः । [3]तुन्दमस्यास्ति । तुन्द, उदर, पिचण्ड, यव, व्रीह, पङ्क, गुहा, कला, काक इति तुन्दादिगणः ॥ ९ ॥

## स्वाङ्गाद्विवृद्धात्ते ॥७।२।१०॥

म० वृ०–स्वाङ्गाद् विवृद्धोपाधिकान्मत्वर्थे 'ते इलेकेनो' भवन्ति, 'मतुश्च' । [1]कर्णिकः, कर्णी, कर्णवान्; [2]ओष्ठिलः,ओष्ठिकः, ओष्ठी,ओष्ठवान् ॥ १० ॥

अव०–[1]विवृद्धौ महान्तौ कर्णावस्य स्तः इति कर्णिलः, कर्णिकः । विशेषेण वृद्धौ वर्द्धितौ, कोऽर्थः महान्तौ इति पर्यायान्तरेणार्थप्रकटनम् । [2]विवृद्धौ महान्तौ ओष्ठावस्य स्तः=ओष्ठिलः, विशेषेण वर्द्धितौ इत्यर्थः । विवृद्धादिति किम् ? अन्यत्र =विवृद्धादन्यत्र इलो न भवति, 'अतोऽनेकस्वरा०' (७।२।६) इत्यनेन इकेन्मतव एव भवन्ति ॥१०॥

## वृन्दादारकः ॥७।२।११॥

म० वृ०–वृन्दान्मत्वर्थे 'आरकः' स्यान्मतुश्च । [1]वृन्दारकः, वृन्दवान् ॥११॥

अव०–[1]वृन्दमस्यास्ति । शिखादित्वात् वृन्दी ॥११॥

## शृङ्गात् ॥७।२।१२॥

म० वृ०–शृङ्गान्मत्वर्थे 'आरको मतुश्च' स्यात् । शृङ्गारकः,शृङ्गवान् [शिखादित्वात् शृङ्गी इत्यपि]॥१२

## फल-बर्हाच्चेनः ॥७।२।१३॥

म० वृ०-फलबर्हाभ्यां शृङ्गाच्च मत्वर्थे 'इनो मतुश्च' स्यात् [फलमस्यास्ति=] फलिनः, फलवान् [शिखादित्वात् फली ; [1]बर्हिणः,बर्हवान् ;शृङ्गिणः, शृङ्गवान् ॥ १३ ॥

अव०-[1]बर्हशब्दः पुंनपुंसकः। बर्हो बर्हमस्यास्ति। शिखादित्वात् बर्ही इत्यपि ॥१३॥

मलादीमसश्च ॥७।२।१४॥

म० वृ०-मलान्मत्वर्थे 'ईमसेन-मतवो' भवन्ति। [मलशब्दः पुंनपुंसकः] मलीमसः, मलिनः, मलवान् ॥ १४ ॥

मरुत्पर्वणस्तः ॥७।२।१५॥

म० वृ०-मरुत्पर्वन्शब्दाभ्यां 'तः' स्यात्, 'मतुश्च'। मरुत्तः, मरुत्वान् ; पर्वतः,पर्ववान् ॥१५॥

बलि-[1]वटि-[2]तुण्डेर्भः ॥७।२।१६॥

म० वृ०-बलि-वटि-तुण्डिभ्यो मत्वर्थे 'भः' स्यात्। बलिभः, बलिनः ; ['नोऽङ्गादेः' इत्यनेन नः,] वटिभः, तुण्डिभः, [3]तुण्डिलः, मतुश्च,-बलिमान् ॥१६॥

अव०-[1]उन्नता नाभिर्वटिः। [2]प्रवृद्धा नाभिः तुण्डिः। [3]'तुण्डिलः', 'सिध्मादिक्षुद्रजन्तुरुग्भ्यः' (७।२।२१) इत्यनेन लः ॥१६॥

ऊर्णा-ऽहं-शुभमो युस् ॥७।२।१७॥

म० वृ०-ऊर्णा-हं शुभम्शब्देभ्यो मत्वर्थे 'युस्' स्यात। ऊर्णायुः, अहंयुः, शुभंयुः ॥१७॥

अव०-ऊर्णायुः मेष उरभ्रः। अहंयुः अहङ्कारी। शुभं भद्रेऽर्थे, परं शुभंशब्दोऽव्ययः, शुभंयुः कल्याणबुद्धिः कल्याणवान् ॥१७॥

कंशंभ्यां युस्तियस्तुतवभम् ॥७।२।१८॥

म० वृ०-कम्-शम्भ्यां मत्वर्थे 'युस्-ति-यस्-तु-त-व-भा' [प्रत्ययाः] भवन्ति। कंयुः,शंयुः; कन्तिः, शन्तिः; कंयः, शंयः ; कन्तुः, शन्तुः; कन्तः, शन्तः; कंवः, शंवः ; कम्भः, शम्भः ॥१८॥

अव०-युस्यस्प्रत्यये सकारो 'नामसिदय्व्यञ्जने' (१।१।२१) इति पदत्वार्थः कृतः, तेन ऊर्णायुः इत्यत्र 'अवर्णेवर्णस्य' (७।४।६८) इत्यनेन अकारलोपो न सञ्जात इति पदसंज्ञाफलम्। अहंयुः शुभंयुः,कंयुः,शंयुः ;कंयः,शंयः, कंवः,शंवः, एषु 'तौमुमौ व्यञ्जने०' (१।३।१४) इत्यनेन पदान्तेऽनुस्वारानुनासिकौ सिद्धौ,-अहंयुः, अहँयुः शुभंयुः, शुभँयुः कंयुः, कँयुः शंयुः, शँयुः, कंयः, कँयः, कंवः कँवः; शंवः,शँवः इति अनुस्वारानुनासिकौ, लिपिरचना एवं भवति ॥१८॥

बल-वात-दन्त-ललाटादूलः ॥७।२।१९॥

म० वृ०-एभ्यो मत्वर्थे 'ऊलः स्यात्, मतुश्च'। बलूलः, वातूलः, दन्तूलः, ललाटूलः ; बलवान्, वातवान्, दन्तवान्, ललाटवान् ॥१९॥

प्राण्यङ्गादातो लः ॥७।२।२०॥

म० वृ०-प्राण्यङ्गवाचिन आकारान्तान्मत्वर्थे 'लः' स्यान्मतुश्च। चूडालः, जङ्घालः, शिखालः ; चूडावान् [जङ्घावान्, शिखावान्]। प्राण्यङ्गादिति किम् ? शिखावान् प्रदीपः [जङ्घावान् प्रासादः]। अङ्गग्रहणं किम् ? इच्छावान्, भावनावान्[1] [वासनावान्] ॥२०॥

अव०-[1]'प्राण्यङ्गा'० इति सूत्रे भावनावान् इत्यस्याग्रे कर्णिकालः इत्यपि प्रयोगः साध्यः, तथाहि कर्णसमीपोऽपि देशः कर्णिका उच्यते इति कर्णिकाशब्दः प्राण्यङ्गस्यैव वाचकः, न तु कर्णाभरणस्य, इति वृद्धा आहुः, ततो लः प्रत्ययः सिद्धः ॥२०॥

सिध्मादि-क्षुद्रजन्तु-रुग्भ्यः ॥७।२।२१॥

म० वृ०-सिध्मादिगणात्, क्षुद्रजन्तुवाचिभ्यः, रुग्वाचिभ्यश्च 'लः' स्यान्मतुश्च। [1]सिध्मलः, सिध्मवान्। क्षुद्रजन्तु,-यूकालः,यूकावान्[2]। आनकुलात् क्षुद्रजन्तव उच्यन्ते। रुक्,-मूर्च्छावान्।

कथं वत्सलः स्नेहवान्, अंसलो बलवान्; ? [3]पेशलकुशलादिवदेतौ यथाकथंचित् व्युत्पादनीयौ, सिध्मादिषु वा पठनीयौ॥२१॥

अव०–[1]सिध्म दुर्भूतकोढादिरोगः, सिध्मान्यस्य सन्ति। [2]एवं मक्षिकालः, मक्षिकावान्। सिध्म, वर्धन, गडु, तुण्डि, मणि, नाभि, बीज, निष्पाद्, निष्पद्, निष्प, पांशु, हनु, पर्शु, पार्ष्णी, धमनी, सक्तु, मांस, पत्र, वात, पित्त, श्लेष्मन्, पार्श्व, कर्ण, सक्थि, स्नेह, शीत, कृष्ण, श्याम, पिङ्ग, पक्ष्मन्, पृथु, मृदु, मञ्जु, वटु, कण्डू, इति सिध्मादिगणः। अत्र सिध्मादिगणे गडुशब्दो गडुलत्वे वर्त्तते, न गडुरोगः। पार्ष्णीधमनीशब्दौ दीर्घान्तावेव गणे पठ्येते, न ह्रस्वान्तौ-पार्ष्णि धमनि' इति, ततो दीर्घान्ताभ्यामेव लः,–पार्ष्णीलः, धमनीलः; ह्रस्वान्ताभ्यां मतुरेव पार्ष्णिमान्, धमनिमान्। [3]यथा पेशं लाति=पेशलः, कुशं लाति=कुशलः इत्येवं व्युत्पत्तिः, तथा वत्सलांसलयोरपि। पेशलकुशलशब्दौ रूढिशब्दौ (अनुक्रमेण) मनोहरविद्वद्वाचिनौ औणादिकौ वा।२१।

## प्रज्ञा-पर्णोदक-फेनाल्लेलौ ॥७।२।२२॥

म० वृ०–एभ्यो मत्वर्थे लेलौ भवतः मतुश्च। प्रज्ञालः, प्रज्ञिलः, प्रज्ञावान्; पर्णलः, पर्णिलः, पर्णवान्; उदकलः, उदकिलः, [उदकवान्]; फेनलः, फेनिलः, [फेनवान्]॥२२॥

## [2]काला-जटा-[1]घाटात्क्षेपे॥७।२।२३॥

म० वृ०–कालाजटाघाटाशब्देभ्यो मत्वर्थे 'लेलौ' भवतः क्षेपे=निन्दायां गम्यमानायाम्। कालालः, कालिलः; [3]जटालः, जटिलः; घाटालः, घाटिलः [कृकाटिका]। मतुना क्षेपो न गम्यते इति क्षेपे न मतुः। क्षेपे इति किम्? कालावान्, जटावान्, घाटावान्॥२३॥

अव०–[1]'घाटात्' इत्यत्र 'क्लीबे' (२।४।९७) इति ह्रस्वः। [2]कालाशब्दः पादस्नसाविशेषे वर्त्तते। [3]लोकवञ्चनाय जटा अस्य सन्ति=जटालः॥२३॥

## वाच आलाटौ॥७।२।२४॥

म० वृ०–वाक्शब्दात् क्षेपे 'आला-ऽऽटौ' भवतः। वक्ष्यमाणग्मिनोऽपवादः। वाचालः, वाचाटः। यो बहु निःसारं भाषते स एवं क्षिप्यते। क्षेपो मतुना न गम्यते इति न मतुः। क्षेपे इत्येव-वाग्मी,[1] वाग्वान्॥२४॥

अव०–[1]प्रशस्ता वागऽस्यास्तीति वाग्मी, वाग्वान्।

## ग्मिन्॥७।२।२५॥

म० वृ०–वाचो मत्वर्थे 'ग्मिन् मतुश्च' स्यात्। वाग्मी, वाग्वान्॥२५॥

अव०–'ग्मिन्' इति पृथग्योगविधानादेव क्षेपे इति निवृत्तम् इति करणानुवृत्तेश्च। प्रशंसायां गम्यमानायां 'ग्मिन्' इति सूत्रं प्रवर्त्तते न स्वरूपमात्रे॥२५॥

## मध्वादिभ्यो रः॥७।२।२६॥

म० वृ०–मध्वादिभ्यो मत्वर्थे 'रः' स्यात्। [1]मधुरो रसः, [2]मधुरं मधु, [3]मधुरं क्षीरम्, एवं [4]खरो गर्दभः, खवानन्यः; [5]मुखरो वाचालः, मुखवानन्यः; [6]कुञ्जरो हस्ती, नगरं पुरम्, नगवदन्यत्; [7]कण्डुरः, कण्डूमान्; [8]पाण्डुरः, पाण्डुमान्, पांसुरः, पांसुमान्। मध्वादयः प्रयोगगम्याः॥२६॥

अव०–[1]मधु स्वादुस्वरूपं गुणत्वमस्यास्तीति मधुरो रसः, अत्र मधुशब्दः स्वादुत्वे, कोऽर्थः ? पर्यायद्वये गुणत्वे गुणसामान्ये चार्थे वर्त्तते। [2]मधुरं मधु इत्यत्र मधुशब्दो माधुर्येऽर्थे, गुणे च पुंल्लिङ्गः, क्षौद्राद्यर्थेषु वर्त्तमानो मधुशब्दो नपुंसकः, ततो मधुः माधुर्यमत्रास्तीति पुंल्लिङ्गे एव वाक्यं कार्यम्। [3]'मधुरं क्षीरम्', अत्र गुणे। क्षौद्रादिद्रव्ये वर्त्तमानात् मधुशब्दात् मतुरेव भवति, अभिधानार्थविवक्षार्थविषयस्य इतिकरणस्यानुवृत्तेः, मधुमान् घटः। [4]खं महत् कण्ठविवरमस्यास्ति=खरो गर्दभः। [5]सर्वस्मिन् वक्तव्ये मुखमस्यास्तीति

मुखरः । ¹कुञ्जशब्दो हनुपर्यायः, कुञ्जावस्य स्तः =कुञ्जरः, कुञ्जवानन्यः । ³एवम् ऊषः क्षारोऽत्रास्तीति ऊषरं क्षेत्रम्, ऊषवदन्यः; मुष्करः पशुः, मुष्कवानन्यः । शुषिरं शुषिमत्काष्ठम् । शुषिः छिद्रम् । ⁵पाण्डुशब्दः पाण्डुत्वरूपे गुणे वर्त्तते ॥२६॥

## कृष्यादिभ्यो वलच् ॥७।२।२७॥

म० वृ०—कृष्यादिभ्यो मत्वर्थे 'वलच् मतुश्च' स्यात् । ¹कृषीवलः कुटुम्बी, कृषिमत् क्षेत्रम् इत्यादि² । कृष्यादयः प्रयोगगम्याः ॥२७॥

---

अव०—¹कृषिरस्यास्तीति कृषीवलः, 'वलच्यपित्रादेः' (३।२।८२) इत्यनेन कृषी दीर्घः । ²एवमासुतिर्मद्यमस्य(अस्ति) आसुतीवलः कल्यपालः,आसुतिमान् । परिषद्यते प्राप्यते न्यायार्थिभिः=परिषत्, 'क्रुत्सम्पदा०' (५।३।११४), 'सदोऽप्रतेः परोक्षायां त्वादेः' (२।३।४४) इति षत्वम्, परिषदस्यास्ति परिषद्वलः, परिषद्वान्; पर्षद्वलः,पर्षद्वान् । परिषद्यते प्राप्नोति सूकरादिकं परिषत्, परिषद्वलं तीर्थम्, पङ्किलमित्यर्थः, परिषद्वत् । रजस्वला स्त्री, रजस्वान् ग्रामः । केचित्तु रजस्वलो देशः, रजस्वला भूमिः, रजस्वान्, रजस्वतीत्याहुः । दन्तावलो नाम राजा हस्ती च । शिखाशब्दः शाखार्थः प्राणिजातिवाचकः, यथा कस्यां शाखायामुत्पन्नस्त्वमिति, शिखावलं नगरम्, शिखावलो मयूरः, अत्र तु इतिकरणात् प्राण्यङ्गार्थादपि शिखाशब्दात् वलच्, न तु 'प्राण्यङ्गादातो लः' (७।२।२०) । दन्तवान् शिखावानन्यः । मातृवलः, मातृमान्; एवं पितृवलः, पुत्रवलः, उत्साहवलः, उत्सङ्गवलः । एषु सर्वत्र इतिकरणात् विशेषः सिद्धः ॥२७॥

## लोमपिच्छादेः शेलम् ॥७।२।२८॥

म० वृ०—लोमादिभ्यः पिच्छादिभ्यश्च यथासंख्यं 'शेलौ' भवतः, मतुश्च । लोमशः, रोमशः, लोमवान्; पिच्छिलः, पिच्छवान्; उरसिलः, उरस्वान् ॥२८॥

अव०—लोमन्, रोमन्, बभ्रु, वल्गु, हरि, कपि, मुनि, गिरि, गुरु, कर्क इति लोमादिगणः । पिच्छ, उरस्, ध्रुवका, भ्रुवका, पक्ष, चूर्ण इति पिच्छादिगणः । पिच्छं चिक्कणत्वमस्यास्तीति पिच्छिलः, अथवा उपमानत्वेन पिच्छं मयूरादिसत्कमस्यास्ति—पिच्छिलः ॥२८॥

## नोऽङ्गादेः ॥७।२।२९॥

म० वृ०—अङ्गादिभ्यो मत्वर्थे 'नः' प्रत्ययो मतुश्च स्यात् । अङ्गान्यस्याः सन्तीति अङ्गना, रूढिशब्दोऽयम्, कल्याणाङ्गी ¹स्त्री उच्यते, अन्यत्राङ्गवती । पामनः,पामवान्; ²वामनः,वामवान् ।२९।

---

अव०—अङ्ग, पामन्, वामन्, हेमन्, श्लेष्मन्, सामन्, वर्ष्मन्, (वध्मन्), शाकिन्, पलालिन्, पलाशिन्, ऊष्मन्, कद्रू, वलि इत्यङ्गादिगणः । ¹'कल्याणाङ्गी स्त्री उच्यते इत्यस्यामे इतिकरणात् (इति), अयं हेतुः । ²वामानि नीचानि अर्थादङ्गानि अस्य सन्ति ॥२९॥

## ¹शाकी-²पलाली-³दद्र्वा ह्रस्वश्च ॥७।२।३०॥

म० वृ०—शाकी-पलाली-दद्रूभ्यो मत्वर्थे 'नः' स्यान्मतुश्च, नप्रत्यययोगे एषां ह्रस्वोऽन्तादेशश्च । ⁴शाकिनः, शाकीमान्; पलालिनः, पलालीमान्, दद्रूणः दद्रूमान ॥३०॥

---

अव०—¹शाकशब्दः, महत् कूष्माण्डादिशाकं शाकी उच्यते, अथवा शाकसमूहो वा शाकी, महत्त्वे समूहेऽपि वाच्ये शाकस्य"तद् बहुल"मिति (हैमलिङ्गा०) लिङ्गपाठात् स्त्रीत्वम्, ततो 'गौरादिभ्यो०' (२।४।१९) इत्यनेन ङी, शाकी इति सिद्धम् । ²एवं महत्पलालं पलालक्षोदो वा पलाली,"तद् बहुल"मिति (हैमलिङ्गा०) पाठात् स्त्रीत्वम्,'गौरा०' (२।४।१९) ङी । ³दद्रूर्नाम व्याधिः । ⁴शाकी अस्यास्ति=शाकिनः एवं सर्वत्र ॥३०॥

## विष्वचो विषुश्च ॥७।२।३१॥

म० वृ०—विष्वच् इति शब्दान्नः [ मत्वर्थे ]

स्यात्तद्योगे च विष्वचो 'विषु' इत्यादेशः, मतुश्च । विषुणः सूर्यः वायुर्वा । विषुशब्दो निपातो नानात्वे वर्त्तते । विष्वच् इत्यखण्डमव्ययं वा । कथं विषुमान् अहोरात्रप्रतिभागः ? विषुर्नाम मुहूर्त्तस्तस्माद् भविष्यति ॥३१॥

अव०-[1]विषु, अञ्च् ,विषु अञ्चतीति विष्वक् , अत्र शब्दरूपमित्याध्याहारात् क्लीबत्वे सेर्लुपि नागमाभावः । विष्वञ्चो रश्मयः (अस्य सन्ति), अथवा विष्वग् गतानि कोऽर्थः तिर्यग्गमनानि भ्रमणाय अस्य वायाः (? वायोः) सन्ति इति विषुणः । नप्रत्यययोगे एव 'विषु' आदेशविधानात् मतौ सति विष्वग्वान् इत्येव ॥३१॥

## लक्ष्म्या अनः ॥७।२।३२॥

म० वृ०-लक्ष्मीशब्दान्मत्वर्थे 'अनो मतुश्च' स्यात् । [लक्ष्मीरस्यास्ति=] लक्ष्मणः, लक्ष्मीवान् ॥३२॥

## प्रज्ञा-श्रद्धा-ऽर्चा-वृत्तेर्णः ॥७।२।३३॥

म० वृ०-प्रज्ञा-श्रद्धा-ऽर्चा-वृत्तिशब्देभ्यो 'णो मतुश्च' स्यात् । [प्रज्ञाऽस्यास्ति=] प्राज्ञः, प्रज्ञावान् , [श्रद्धाऽस्यास्ति=] श्राद्धः, श्रद्धावान्; [अर्चाऽस्यास्ति=] आर्चः, अर्चावान् , [वृत्तिरस्यास्ति=] वार्त्तः, वृत्तिमान् । स्त्री तु प्राज्ञा, श्राद्धा, आर्चा, वार्त्ता । [1]प्राज्ञी इति स्वार्थिकाणन्तात् ॥३३॥

अव०-[1]'प्राज्ञी' इति, प्रजानातीति प्रज्ञः,'उपसर्गादातो डोऽश्यः' (५।१।५६), प्रज्ञ एव प्राज्ञ इति स्वार्थे 'प्रज्ञादिभ्योऽण्' (७।२।१६५) इति अण् , स्त्री चेत् प्राज्ञी कन्या, 'अणञेये०' ( २।४।२० ) इति ङी ॥ ३३ ॥

## ज्योत्स्नादिभ्योऽण् ॥७।२।३४॥

म० वृ०-ज्योत्स्ना इत्यादिभ्यो-'ऽण्' स्यात् । [1]ज्यौत्स्नः पक्षः, ज्यौत्स्नी रात्रिरित्यादि[2] ॥३४॥

अव०-[1]ज्योत्स्ना अस्मिन्नस्ति=ज्यौत्स्नः । [2]आदिशब्दात् तामिस्रः पक्षः,तामिस्री रात्रिः; तमोऽत्रास्ति=तमिस्रा ,तमिस्रात्रास्ति=तामिस्रः , तामिस्राणि गुहामुखानि । वैसर्पो व्याधिः, विविधं सर्पणं प्रसरणं=विसर्पः,=विसर्पोऽत्रास्ति वैसर्पो व्याधिः । कौतुपं गृहम् , कुतुपा भागिनेयाः । कौण्डलो युवा । तापसः पाखण्डी । साहस्रो देवदत्तः । मतौ तु ज्योत्स्नावान् , तमिस्रावान् इत्यादि । तथा तापस इति रूढिशब्दः, रूढिविषये च मतुर्न भवति । कुण्डली सहस्री चेति शिखादित्वात् । ज्योत्स्नादयः प्रयोगगम्याः ॥ ३४ ॥

## सिकता-शर्करात् ॥७।२।३५॥

म० वृ०-सिकता शर्करा इति शब्दाभ्यां [मत्वर्थे] 'अण् मतुश्च' स्यात् । सैकतः, सिकतावान् [शर्कराऽत्रास्ति=] शार्करः, शर्करावानोदनः ॥३५॥

## इलश्च देशे ॥७।२।३६॥

म० वृ०-सिकताशर्कराभ्यां देशे मत्वर्थे 'इलः' चकारादण् स्यान्मतुश्च [सिकतात्रास्ति=] [1]सिकतिलः, सैकतः, सिकतावान् देशः । [2]शर्करिलः, शार्करः, शर्करावान् देशः ॥३६॥

अव०-[1]सिकता देशः [2]शर्करा देशः इत्यभेदोपचारात् ॥ ३६ ॥

## द्युद्रोर्मः ॥७।२।३७॥

म० वृ०-द्यु द्रु इति शब्दाभ्यां मत्वर्थे 'मः' स्यात् । [1]द्युमः, द्रुमः[2] । रूढिशब्दाविमौ । रूढिविषये च न मतुः । अन्यत्र तु मतुरेव-द्युमान् ,द्रुमान् ।३७।

अव०-[1]द्यु इति दिव्शब्दस्य 'उः पदान्तेऽनूत्' (२।१।११८) इत्यनेन कृतोकारस्य निर्देशः, अथवा द्युशब्द उकारान्तो दिवसपर्यायः प्रकृत्यन्तरमस्ति, द्यौः द्युर्वा अस्यास्मिन्वास्तीति द्युमः । [2]द्रूणि दारूणि अस्यास्मिन्वा सन्तीति द्रुमो वृक्षः ॥३७॥

## काण्डा-ऽऽण्ड-भाण्डादीरः॥७।२।३८॥

म० वृ०-काण्डा-[1]ऽऽण्ड-भाण्डेभ्यो मत्वर्थे 'ईरो मतुश्च' स्यात् [काण्डानि अत्र सन्ति=]

काण्डीरः, काण्डवान्; आण्डीरः, आण्डवान्; भाण्डीरः, भाण्डवान् ॥३८॥

प्रव०–[१]आण्डौ मुष्कौ वृषणावित्यर्थः ॥३८॥

## कच्छ्वा डुरः ॥७।२।३९॥

म० वृ०–कच्छूशब्दात् 'डुरमतू' भवतः। कच्छुरः, कच्छूमान् [कच्छू पामा] ॥३९॥

## दन्तादुन्नतात् ॥७।२।४०॥

म० वृ०–उन्नतत्वोपाधिकाद् [विशेषणात्] दन्तशब्दात् 'डुरः' स्यात्। दन्तुरः[१]। उन्नतादिति किम्? दन्तवान् ॥४०॥

प्रव०–[१]उन्नता दन्ता अस्य सन्तीति दन्तुरः। दन्तुर इति प्रयोगोपरि इमे विशेषा ज्ञातव्या भवन्ति,- निर्गतत्वमुन्नतत्वम्, प्रमाणातिरेकः प्रमाणाधिक्यं विवृद्धत्वम् इति (उन्नतत्वविवृद्धत्वयोः) भिन्नत्वम्। तत्रोन्नतार्थे दन्तुर इति भवति। विवृद्धार्थविवक्षायां तु 'स्वाङ्गाद्विवृद्धात्ते'(७।२।१०) इति सूत्रेण 'आयात्, (७।२।२) इति सूत्रेण च इलेकेनप्रत्ययाः मतुश्च भवन्ति। दन्तिलः, दन्तिकः, दन्ती, दन्तवान् इति प्रयोगाः। दन्तशब्दस्य मत्वर्थे प्रयोगपञ्चकं भवति। उन्नतार्थो हि मतुना न गम्यते इति मतुर्न भवति इति भावः ॥४०॥

## मेधा-रथान्नवेरः ॥७।२।४१॥

म० वृ०–मेधारथशब्दाभ्यां मत्वर्थे 'इरः' स्यात् नवा। विकल्पवशाद्यथाप्राप्तमिकेनौ मतुश्च। मेधिरः, मेधावान्; उत्तरसूत्रेण ['अस्तपो'०(७।२।४७) इत्यनेन] विन्नपि,–मेधावी। रथिरः, रथिकः, रथी, रथवान् ॥४१॥

## कृपा-हृदयादालुः ॥७।२।४२॥

म० वृ०–कृपाहृदयाभ्यां मत्वर्थे 'आलुर्नवा मतुश्च' स्यात्। कृपालुः, कृपावान्; हृदयालुः, हृदयिकः, हृदयी, हृदयवान् ॥४२॥

## केशाद्वः ॥७।२।४३॥

म० वृ०–केशान्मत्वर्थे 'वः' स्याद्वा 'मतुश्च'। केशवः, केशिकः, केशी, केशवान्। [१]केशव इति रूढिशब्दोऽपि विष्णुवाची ॥४३॥

प्रव०–[१]न केवलं यस्य केशा सन्ति स केशव उच्यते, किन्तु विष्णुवाची केशवशब्दो रूढिशब्दोऽप्यस्तीत्यर्थः ॥४३॥

## मण्यादिभ्यः ॥७।२।४४॥

म० वृ०–मण्यादिभ्यो मत्वर्थे 'वः स्यान्मतुश्च'। योगविभागाद्वेति निवृत्तम्। मणिवः, [१]मणिलः; [२]बिम्बावम्, [३]कुररावम्, [४]कुरवावम्, [५]राजीवम् ॥४४॥

प्रव०–[१]सिध्मादिगणपाठात् 'सिध्मादिक्षुद्रजन्तुरुग्भ्यः'(७।२।२१) इत्यनेन लः। [२]बिम्बावमित्यादयस्त्रयोऽपि शब्दाः सरोवाचकाः। बिम्बानि अत्र सन्ति। [३]कुरराः पक्षिविशेषाः अत्र सन्ति। [४]कुत्सितो रवः शब्दो येषाम् (ते कुरवाः), कुरवा अत्र सन्ति। यथाक्रमं प्रयोगाः। 'मण्यादिभ्यः' इति वः। ( कुरवावम् इत्यत्र ) 'घञ्युपसर्गस्य बहुलम्' ( ३।२।८६) इति बाहुलकाद्दीर्घः। [५]राजीवमिति प्रयोगः, राजिशब्दः, 'इतोऽक्त्यर्थात्' (२।४।३२) ङी, राजी अत्रास्ति, वः प्रत्ययः। एवमिष्टकावम्, गाण्डिवम्, गाण्डीवम्, अर्जुनधनुर्नाम, गाण्डिर्गाण्डी अत्रास्ति, वप्रत्ययः। तथा अजकावम्, माहेश्वरधनुः पिनाकनाम, तत्पर्यायोऽजकावम्, अजका अस्थिविकारोऽत्रास्ति अजकावम्। बिम्बावमित्यादयो रूढिशब्दाः। रूढिविषये च मतुर्न भवति। विषयान्तरे तु मतुर्भवत्येव,–बिम्बवानित्यादि। मणि, हिरण्य, बिम्ब, कुरर, कुरव, राजी, इष्टका, गाण्डि, गाण्डी, अजका इति मण्यादयः प्रयोगगम्याः ॥४४॥

## हीनात्स्वाङ्गादः ॥७।२।४५॥

म० वृ०–हीनोपाधिकात् स्वाङ्गान्मत्वर्थे 'अः'

★"मुष्के स्यादाण्डः पेलकोऽपि च" इति हैमनाममालाशिलोञ्छे।

प्रत्ययः स्यात् । खण्डः कर्णोऽस्यास्ति कर्णः, नासिकः[१] । हीनादिति किम् ? कर्णवान् ॥४५॥

अव०–[१]छिन्ना नासिका अस्यास्ति नासिकः ॥४५॥

## अभ्रादिभ्यः ॥७।२।४६॥

म० वृ०–अभ्र इत्यादिभ्यो मत्वर्थे 'अः' स्यान्मतुश्च[१] । अभ्राण्यस्मिन् सन्ति=अभ्रं नभः, उरसः, उरस्वान्[२] ॥४६॥

अव०–[१]यथादर्शनं मतुश्च । अभ्र, अर्शस्, उरस्, तुन्द, चतुर, पलित, जटा, घाटा, कर्दम, काम, बल, घटा, अम्ल, लवण इति अभ्रादिराकृतिगणः। [२](एवम्) अर्शांस्यस्य सन्ति=अर्शसो देवदत्तः ॥४६।

## अस्-तपो-माया-मेधा-स्रजो विन् ॥७।२।४७॥

म० वृ०–असन्तेभ्यः, तपस्, माया, मेधा, स्रज् इति शब्देभ्यो मत्वर्थे 'विन् मतुश्च' स्यात्, असन्त,–यशस्वी, यशस्वान्; सरस्वी, सरस्वान्, [१]सरस्वती; तेजस्वी, [२]तपस्वी, [तपस्वान्;] मायावी, [मायावान्,] मायी, [३]मायिकः; मेधावी, [मेधावान्,] स्रग्वी, स्रग्वान् ॥४७॥

अव०–[१]'सरस्वती' इत्यत्र यदा नदीपर्यायः सरस्वतीशब्दः तदा सरः सरणं गमनमस्या अस्तीति सरस्वतीति वाक्ये मतु, 'मावर्णान्तोपान्त्य०' (२।१।९४) इति मस्य वः, ततो ङी, यदा तु भारतीवाचकः सरस्वतीशब्दः तदा सरो मानसाख्यादि अस्या अस्ति इति वाक्ये मतुः । [२]तपसोऽसन्तत्वेन सिद्धेऽपि यदत्र पृथग् तपःशब्दग्रहणं तत् ज्योत्स्नाद्यणा बाधो मा भूदित्येवमर्थम् । [३]'मायिकः', अत्र व्रीह्यादिपाठात् इकप्रत्ययः ॥४७॥

## आमयाद्दीर्घश्च ॥७।२।४८॥

म० वृ०–आमयात् 'विन् मतुश्च' स्यादामयस्य [विन्संयोगे] दीर्घश्च । आमयावी, आमयवान् ॥४८॥

## स्वान्मिन्नीशे ॥७।२।४९॥

म० वृ०–स्वशब्दान्मत्वर्थे ईशे वाच्ये 'मिन्' स्यात्, दीर्घश्चास्य [शब्दस्य] । स्वमस्यास्ति=स्वामी । ईशे इति किम् ? [१]स्ववान् ॥४९॥

अव०–[१]……………………न तु भोग्यतया इति मिन् न भवति, मतुः औत्सर्गिकः सिद्धः ॥४९॥

## गोः ॥७।२।५०॥

म० वृ०–गोशब्दात् 'मिन् मतुश्च' स्यात् । गोमी, गोमान् ॥५०॥

## ऊर्जो विन्वलावस् चान्तः ॥७।२।५१॥

म० वृ०–ऊर्क् शब्दात् विन्वलप्रत्ययौ, [१]तद्योगेऽस्य अस् इत्यन्तादेशश्च स्यात् । [२]ऊर्जस्वी, ऊर्जस्वलः । मतुश्च– ऊर्ग्वान् । कथमूर्जस्वान् ? ऊर्जयतेरस्प्रत्ययः मतुश्च ॥५१॥

अव०–[१]विन्वलयोगे ऊर्ज् शब्दस्य । [२]ऊर्जनमूर्क्, 'क्रुत्सम्पदादिभ्यः क्विप्' (५।३।११४), ऊर्गस्यास्ति=ऊर्जस्वी ॥५१॥

## तमिस्रा-ऽऽर्णव-ज्योत्स्ना ॥७।२।५२॥

म० वृ०–तमिस्र अर्णव ज्योत्स्ना इति शब्दा निपात्यन्ते । [१]तमिस्रा रात्रिः, तमिस्रं तमःसमूहः, तमिस्राणि गुहामुखानि, तमस्वान् [अत्र मतुश्च]। [२]अर्णवः समुद्रः । [३]ज्योत्स्ना चन्द्रप्रभा, अन्यत्र [४]ज्योतिष्मती रात्रिः; निपातनस्येष्टविषयत्वात् ।५२।

अव०–[१]तमस्शब्दः, तमोऽत्रास्तीति तमिस्रा, निपातनात् रः प्रत्ययः उपान्त्यस्य च इत्वम्, तमिस्रः, आप्, तमिस्रा रात्रिः, एवं तमिस्रम् । [२]अर्णस्शब्दो जलवाची, अर्णो जलमत्रास्ति=अर्णवः, निपातनात् वः प्रत्ययः अन्त्यस्य च लोपः– अर्णवः । [३]ज्योतिस्शब्दो दीप्तिवाचकः, ज्योतिर्दीप्तिरत्रास्ति, निपातनात् ज्योतिस्परतो नः प्रत्ययः, उपान्त्य'इ'इति लुप्यते, त् तिष्ठति– ज्योत्स्ना। 'तमिस्रार्णवज्योत्स्ना' इति सूत्रे तमिस्र इति अकारान्त एव निपातः । [४]'ज्योतिष्मती' इत्यत्र ज्योतिस्शब्दो नक्षत्रवाचकः । ॥५२॥

## गुणादिभ्यो यः ॥७।२।५३॥

म० वृ०–गुणादिभ्यो मत्वर्थे 'य:'स्यान्मतुश्च। गुण्य: पुरुष:, हिम्य: पर्वत:; गुणवान्, हिमवान्। गुणादय: प्रयोगगम्या: ॥५३॥

अव०–कथं को नाम गुणिनो नार्चयेत्? शिखादिगणपाठात् इन् भविष्यति ॥५३॥

## रूपात्प्रशस्ताहतात् ॥७।२।५४॥

म० वृ०–प्रशस्तोपाधिकात् [विशेषणात्] आहतोपाधिकाच्च रूपान्मत्वर्थे 'य:' स्यात्। प्रशस्तं रूपमस्यास्ति रूप्यो गौ:, रूप्य: पुरुष:। [1]आहतं रूपमस्यास्ति=रूप्य: कार्षापण:। प्रशंसायां मतुरपि भवति,–रूपवती कन्या। आहते मतुर्न भवति, इतिकरणबलात्। प्रशस्ताहतादिति किम्? रूपवान्। कथं रूपिणी कन्या, रूपिको दारक:; ? व्रीह्यादित्वाद्भविष्यति। 'आयात्' (७।२।२) इति पूर्णोऽवधि:। अत परं मतुर्नास्ति ॥५४॥

अव०–[1]निघातिकाताडनात् कोऽर्थ:? हस्तिपुटिकाताडनात् दीनारादिषु यद् रूपमुत्पद्यते तत् आहतं रूपमुच्यते ॥५४॥

## पूर्णमासोऽण् ॥७।२।५५॥

म० वृ०–पूर्णमास् इति शब्दान्मत्वर्थे–'ऽण्' स्यात्। [2]पौर्णमासी ॥५५॥

अव०–माति मिमीते वा इति मास्, 'अस्' (उ० ९५२) इत्युणादिसूत्रेण अस्, मास् इति शब्द:, पूर्णश्चासौ माश्च=पूर्णमा:, तत: पूर्णो माश्चन्द्रोऽस्यामस्ति इति मत्वर्थीये वाक्ये 'पूर्णमासोऽण्', ततो ङी ॥ ५५ ॥

## गोपूर्वादत[1]इकण् ॥७।२।५६॥

म० वृ०–गोशब्दपूर्वादकारान्ताच्छब्दान्मत्वर्थे इकण् स्याद्। मत्वादीनामपवाद:[2]। [3]गौशतिक:। अत इति किम्? गोविंशतिमान्। कथं गौशकटिक:? शकटीशब्देन समानार्थ: शकटशब्दोऽस्ति। शकटीशब्दात्तु न मतुरनभिधानात् ॥५६॥

अव०–[1]'अत:' कोऽर्थ:? अकारान्तादिति सर्वसूत्रे ज्ञेयम्। [2]आदिशब्दादिकेनो:। [3]गोशतमस्यास्तीति गौशतिक:। एवं गौसहस्रिक:। केचित्तु गवादेरनकारान्तादपि इकणमिच्छन्ति,– गवां समूहो गोत्रा, 'गोरथवाता'० (६।२।२४) इति त्रल्, आप्, सा गोत्रा विद्यते यस्य स गौत्रिक:, 'गोपूर्वादत इकण्' इत्यनेन आकारान्तादपि मतान्तरे इकण् भवति ।५६।

## [1]निष्कादे: शतसहस्रात् ॥७।२।५७॥

म० वृ०–निष्को य आदिस्तत: परं यच्छतं सहस्रं च तदन्तान्मत्वर्थे 'इकण्' स्यात्। [2]नैष्कशतिक:, नैष्कसहस्रिक:। निष्कादेरिति किम्? शती, [3]सहस्री ॥५७॥

अव०–[1]निष्कश्चासावादिश्च=निष्कादि:, तस्मान्निष्कादे:। [2]निष्कं स्वर्णम्, निष्कानां शतं निष्कशतमस्य अस्ति। [3]'शिखादिभ्य इन्' (७।२।४) इति इन् ॥५७॥

## [1]एकादे: कर्मधारयात् ॥७।२।५८॥

म० वृ०–एकादे: कर्मधारयादकारान्तान्मत्वर्थे 'इकण्' स्यात्। [2]ऐकगविक:, ऐकशतिक:। कर्मधारयादिति किम्? एकस्य गौरेकगव:,[3] सोऽस्यास्तीति न भवति। [4]कथमेकद्रव्यवत्त्वादिति? एकेन द्रव्यवत्त्वमिति [5]समासे भविष्यति ॥५८॥

अव०–[1]एकश्चासावादिश्च (=एकादि:, तस्मात्) एकादे:। [2]एका गौरेकगव:, 'गोस्तत्पुरुषात्' (७।३।१०५) इत्यनेन अट् समासान्त:, एकगवोऽस्यास्ति=ऐकगविक:। [3]'गोस्तत्पुरुषात्' अट्। [4]द्रव्यमस्यास्ति, मतु:, द्रव्यवतो भावो द्रव्यवत्त्वम्, एकेन द्रव्यवत्त्वम्=एकद्रव्यवत्त्वम्, तस्मात्। [5]'ऊनार्थपूरणाद्यै:' (३।१।६७) इति समास: ॥५८॥

## [1]सर्वादेरिन् ॥७।२।५९॥

म० वृ०–सर्वादेरकारान्तात् कर्मधारयान्मत्वर्थे 'इन्' स्यात्। [2]सर्वधनी, सर्वबीजी, सर्वकेशी नट: ॥५९॥

अव०–[1]सर्वश्चासावादिश्च=सर्वादिः,न तु सर्वादिगणः। [2]सर्वं धनं=सर्वधनम्, सर्वधनमस्यास्ति ॥५९॥

## प्राणिस्थादस्वाङ्गाद् द्वन्द्वरुग्निन्द्यात् ॥७।२।६०॥

म० वृ०–प्राणिस्थोऽस्वाङ्गवाची अकारान्तो यो द्वन्द्वः यश्च रुग्वाची [रोगवाचकः] यश्च निन्द्यवाची तेभ्यो मत्वर्थे 'इन्' स्यात्। द्वन्द्व,–[1]कटकवलयिनी। रुक्,–कुष्ठी । निन्द्य,–[2]काकतालुकी। प्राणिस्थादिति किम् ? [3]पुष्पफलवान् वृक्षः। अस्वाङ्गादिति किम्? स्तनकेशवती। अत इत्येव–त्रिपादिकावती, [4]काकतालुमती। 'अतोऽनेक०' (७।२।६) इति सिद्धे इकादिबाधनार्थं वचनम् ॥६०॥

अव०–[1]कटकानि (च) वलयानि च,'अप्राणिपश्वादेः'(३।१।१३६) इत्यनेन एकत्वम्,कटकवलयमस्या अस्ति। [2]काकस्य तालुनस्तुल्यं=काकतालुकम्, 'तस्य तुल्ये कः'० (७।१।१०८) इति कः, काकतालुकं लाञ्छनविशेषोऽस्या अस्ति=काकतालुकी। [3]पुष्पाणि च फलानि च पुष्पफलान्यस्य सन्ति। [4]काकतालिवच अशुभं लाञ्छनम्,तदस्या अस्तीति काकतालुमती।६०।

## वाता-ऽतीसार-पिशाचात् कश्चान्तः ॥७।२।६१॥

म० वृ०–एभ्यो मत्वर्थे 'इन् कश्चान्तः' स्यात् । वातकी, [1]अतीसारकी, अतिसारकीत्यपि, पिशाचकी धनदः ॥६१॥

अव०–[1]अतीसारकी, अतिसारकी; अत्र 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) इति विकल्पेन दीर्घः, अथ "एकदेशविकृतमनन्यवद्" इति न्यायात् अतिसारकीत्यपि, अत्रापीन् ॥६१॥

## पूरणाद्वयसि ॥७।२।६२॥

म० वृ०–पूरणप्रत्ययान्ताद्वयसि गम्यमाने मत्वर्थे'इन्नेव'स्यात्,न तु कः। [1]पञ्चमी बालकः॥६२॥

अव०–[1]पञ्चमो मासः संवत्सरो वाऽस्यास्ति इति पञ्चमी ॥६२॥

## सुखादेः ॥७।२।६३॥

म० वृ०–सुखादिभ्यो मत्वर्थे 'इन्नेव' स्यात्। सुखी, दुःखी ॥६३॥

अव०–सुख, दुःख, तृप्र, कृच्छ्र, अस्र, अलीक, कृपण, सोढ, प्रतीप, प्रणय, हल, आस्र, कक्ष, शील इति सुखादिगणः ॥६३॥

## [1]मालायाः क्षेपे ॥७।२।६४॥

म० वृ०–मालाशब्दात्क्षेपे वाच्ये 'इन्नेव' स्यात्। माली। क्षेप इति किम्? मालावान् ॥६४॥

अव०–[1]मालाशब्दः शिखादिगणे, ततः क्षेपे गम्यमाने मतुनिवृत्त्यर्थं वचनम्'=मालायाः क्षेपे' इति सूत्रं कृतम् ॥६४॥

## धर्म-शील-वर्णान्तात् ॥७।२।६५॥

म० वृ०–धर्म शील वर्ण इत्यन्तान्मत्वर्थे 'इन्नेव' स्यात्। मुनिधर्मी, यतिशीली, [1]ब्राह्मणवर्णी ॥६५॥

अव०–[1]ब्राह्मणस्य वर्णो जातिरस्यास्ति=ब्राह्मणवर्णी ॥ ६५ ॥

## बाहूर्वादेर्बलात् ॥७।२।६६॥

म० वृ०–बाहूरुपूर्वाद् बलान्तान्नाम्नो मत्वर्थे 'इन्नेव' स्यात्। बाहुबली, ऊरुबली ॥६६॥

## मन्माब्जादेर्नाम्नि ॥७।२।६७॥

म० वृ०–मन्नन्तेभ्यो मान्तेभ्योऽब्जादिभ्यश्च मत्वर्थे 'इन्नेव' स्यात्, नाम्नि[1]। मन्नन्त,–[2]दामिनी, सामिनी,[3] प्रथिमिनी,[4]महिमिनी। मान्त,–कर्मिणी [5]प्रथमिनी, [6]कामिनी, [7]भामिनी, सोमिनी[8]। अब्जादि,–अब्जिनी,[9] कमलिनी,[10] सरोजिनी, अम्भोजिनी, [11]राजीविनी, अरविन्दिनी, पङ्कजिनी, पुटकिनी, [12]मृणालिनी, बिसिनी, यवासिनी। नाम्नीति किम्? सोमवान्, सामवान्, अब्जवान् ॥ ६७ ॥

प्रव०-[1]समुदायश्चेत्कश्चिद् (? कस्यचिद्) नाम भवति इत्यर्थः। [2]दामास्यास्तीति दामिनी। [3]पृथोर्भावः=प्रथिमा, 'पृथ्वादेरिमन्वा' (७।१।५८) इमन्, 'पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः' (७।४।३९)। [4]महतो भावो महिमिनी (? महिमन्), पृथ्वादिभ्य इमन्, महिमास्यास्तीति महिमिनी, इन्। [5]प्रथमं वयोऽस्या अस्ति=प्रथमिनी। [6]कामोऽस्या अस्तीति कामिनी। [7]भामः क्रोधोऽस्या अस्ति भामिनी। [8]यामोऽस्यामस्तीति यामिनीत्यपि। [9]अब्जिनी इत्यादयः शब्दाः सर्वेऽपि कमलिनीवाचकाः, यवासिनीशब्दस्तु औषधिविशेषे वर्त्तते। [10]सरोरुहिणीत्यपि। [11]राजोऽस्यास्तीति राजीवम्, 'मण्यादिभ्यः' (७।२।४४) इति सूत्रेण वप्रत्ययः, राजीवमस्या अस्ति=राजीविनी। [12]नालीकिनी, तामरसिनीत्यपि। यवासशब्दोऽब्जादौ पुष्करादौ चाधीतस्तत्र देशे वाच्ये 'पुष्करादेः'० (७।२।७०) इति सूत्रं प्रवर्त्तते, औषधत्वे तु 'मन्माब्जादे'० (७।२।६७) इदं प्रवर्त्तते ॥६७॥

## हस्त-दन्त-कराज्जातौ ॥७।२।६८॥

म० वृ०-एभ्य 'इन्नेव' स्यात्, [1]जातावर्थे। [2]हस्ती, [3]दन्ती, करी[4]। जाताविति किम्? हस्तवान्, दन्तवान् करवान्नरः ॥६८॥

प्रव०-[1]समुदायेन चेज्जातिरभिधीयते। [2]हस्तोऽस्यास्ति=हस्ती। [3]दन्तावस्य स्तः=दन्ती। [4]करोऽस्यास्ति=करी ॥६८॥

## वर्णाद् ब्रह्मचारिणि ॥७।२।६९॥

म० वृ०-वर्णशब्दान्मत्वर्थे 'इन्' स्यात्, ब्रह्मचारी चेदभिधेयो भवति। वर्णशब्दो ब्रह्मचर्यपर्यायः। वर्णो ब्रह्मचर्यमस्यास्तीति वर्णी, ब्रह्मचारीत्यर्थः। ब्रह्मचारिणीति किम्? वर्णवान् ॥६९॥

प्रव०-अन्ये तु वदन्ति वर्णशब्दो ब्राह्मणादिवर्णवचनः, तत्र ब्रह्मचारीत्यनेन शूद्रव्यवच्छेदः क्रियते इति मन्यन्ते, तेन त्रैवर्णिको वर्णीत्युच्यते। स हि वर्णी विद्याग्रहणार्थमुपनीतो ब्रह्म आचरति, न शूद्रो ब्रह्म चरति इति अभिप्रायः। त्रिषु वर्णेषु भवः=त्रैवर्णिकः,'अध्यात्मादिभ्य इकण्'(६।३।७८), विधानसामर्थ्यात् ['द्विगोरनपत्ये'० (६।१।२४) इत्यनेनेकणो] न लुप्, 'प्रयोजनम्' (६।४।११७) इति वा इकण्, अस्य च प्राग्जितीयत्वाभावात् न 'द्विगोरनपत्ये'० (६।१।२४) इति लुप् ॥६९॥

## [1]पुष्करादेर्देशे ॥७।२।७०॥

म०वृ०-पुष्करादिभ्य'इन्'स्यात् देशेऽभिधेये। पुष्करिणी,[2]पद्मिनी। देश इति किम्? [3]पुष्करवान् हस्ती। [4]कथं कुमुद्वती सरसी, कुमुद्वान् ह्रदः; नड्वान्, [5]नड्वलमिति?'नडकुमुद'० (६।२।७४) इत्यादिना चातुरर्थिकेन मतुना भविष्यति ॥७०॥

प्रव०-[1]पुष्कर आदिर्यस्य। पुष्कर, पद्म, उत्पल, तमाल, कुमुद, कैरव, नड, नल, कपित्थ, बिस, मृणाल, कर्दम, शालूक, विवर्ह, करीष, शिरीष, यवास, यवाष, यव, मास, हिरण्य, तट, तरङ्ग, कल्लोल इति पुष्करादिगणः। [2]पुष्करपद्मौ देशविशेषौ। [3]करिकराग्रं पुष्करः। [4]कुमुद नड इति देशौ, अत्रापि इन् प्राप्नोति इति पराशयः। 'नडकुमुद'० (६।२।७४) इत्यनेन मतुः। [5]नड्वलमित्यत्र 'नडशादाड्वलः' (६।२।७५) ॥७०॥

## सूक्त-साम्नोरीयः ॥७।२।७१॥

म० वृ०-सूक्ते साम्नि चाभिधेये मत्वर्थे 'ईयः' स्यात्। मत्वादीनामपवादः। सूक्तसाम्नी ग्रन्थविशेषौ। सूक्ते,-[1]मैत्रावरुणीयम्। साम्नि,-वारतन्तवीयम् ॥७१॥

प्रव०-[1]मैत्रावरुणशब्दोऽत्र सूक्तेऽस्ति इति मैत्रावरुणीयम् ॥७१॥

## लुब्वा-ऽध्याया-ऽनुवाके ॥७।२।७२॥

म० वृ०-अध्यायानुवाकौ ग्रन्थविशेषौ। अध्यायेऽनुवाके चाभिधेये मत्वर्थे य ईयस्तस्य 'वा लुप्' स्यात्। [1]अत एव लुब्वचनादध्यायानुवाकयोरीयोऽनुमीयते। [2]द्रुमपुष्पः,[3]द्रुमपुष्पीयः, स्तम्भः, स्तम्भीयः; पलितः, पलितीयः; पलितस्तम्भः,पलितस्तम्भीयः; दीर्घजीवितः, दीर्घजीवितीयः ॥७२॥

अव०—[१]अध्यायानुवाकयोरर्थान्तरत्वात् पूर्वेण ईयो न प्राप्नोतीत्याह– अत एव लुब्वचनादिति। [२]द्रुमपुष्पशब्दोऽस्मिन्नध्यायेऽनुवाके वा शास्त्रेऽस्यास्तीति द्रुमपुष्पीयः। [३]यत्र ईयलोपस्तत्र द्रुमपुष्पः इति प्रयोगः। एवं स्तम्भः, स्तम्भीयः; पलितः, पलितीयः; दीर्घजीवितः,दीर्घजीवितीयः इति सर्वत्र वाक्यरचना कर्त्तव्या। [४]तथा अनुवाक इत्यत्र अनुब्रवीतीति अनुवाकः, अच्, 'न्यङ्क्वुद्गमेघादयः' (४।१।११७)इति निपातः,अनुवाक इति सिद्धिः ।७२।

## विमुक्तादेरण् ॥७।२।७३॥

म० वृ०–विमुक्तादिभ्यो मत्वर्थेऽध्यायानुवाकार्थे 'ऽण्' स्यात्। [१]वैमुक्तः [२]दैवासुरः, ॥७३॥

अव०—[१]विमुक्तः शब्दोऽस्मिन्नध्यायेऽनुवाकेऽस्ति इति वैमुक्तः। [२]देवासुरः शब्दोऽस्मिन्नध्याये अनुवाके वास्तीति दैवासुरः।विमुक्त,देवासुर, रक्षोसुर, उपसद, परिसारक, वसु, मरुत्, सत्वत्; सत्वन्तु, दशार्ह (? दशार्ह),वयस्,हविर्धान,महित्री, सोमापूषन्, इडा, इला, अग्नाविष्णु, उर्वशी, दशार्ण, वसुमन्तु, पत्नीवन्तु, वर्हवन्तु, वृत्रहन्, पतत्रिन्, सुपर्ण इति विमुक्तादिगणः ॥७३॥

## घोषदादेरकः ॥७।२।७४॥

म० वृ०–घोषत् इत्यादिभ्यो मत्वर्थेऽध्यायानुवाकार्थे 'ऽकः' स्यात्। घोषदकः। इति मत्वर्थे मत्वादयः प्रत्ययाः सम्पूर्णाः ॥७४॥

अव०—घोषद्, गोषद्, इत्वेषा, इषेत्वा, मातरिश्वन्, देवस्यत्वा, पत्वा, देवीराप, कृष्णोस्य, स्वरेष्ठा, देविधीया, रक्षोहण, अञ्जन, प्रतूर्त्त, उशान, कृशानु, सहस्रशीर्षन्, वाचस्पति, स्वाहा, प्राण इति घोषदादिगणः। [१]घोषत् इति शब्दोऽत्राध्यायानुवाके इति घोषदकः ॥७४॥

## प्रकारे जातीयर् ॥७।२।७५॥

म० वृ०–[१]तदस्येति वर्त्तते, तदिति प्रथमान्तादस्येति षष्ठ्यर्थे 'जातीयर्' स्यात्, यत्प्रथमान्तं स चेत् प्रकारो भवति। सामान्यस्य [पुरुषरूपस्य] भिद्यमानस्य [पटुजडादिभेदेन विशिष्यमाणस्य] यो विशेषो[२] विशेषान्तरानुप्रवृत्तः स प्रकार उच्यते। पटुः प्रकारोऽस्य=पटुजातीयः, [३]मृदुजातीयः। [४]यज्जातीयः, [५]नानाजातीयः, [६]एवंजातीयः। अस्येति षष्ठ्यर्थे विधानात् प्रकारवति शब्देऽपि जातीयर् विज्ञायते। ततः प्रकारमात्रभाविथाथमन्तशब्दादपि जातीयर् भवति,–[७]यथाजातीयः, [८]कथंजातीयः, [९]इत्थंजातीयः। रिनुकरणं 'रिति' (३।२।५८) इत्यत्र विशेषणार्थम् ॥७५॥

अव०—[१]'तदस्य'० (७।२।१) इति सूत्रात्तदस्य इत्येवानुवर्त्तते, नास्मिन्नस्तीति। [२]सोऽपि विशेषान्तरानुप्रवृत्तः=पटुतरादिविशेषानुयायी इत्यनेन पृथ्व्यादेः प्रकारत्वनिषेधः। तत्र हि विशेषान्तरानुप्रवृत्तत्वं नास्ति। तथाहि सामान्यस्य द्रव्यस्य पृथ्व्यादिभिर्नवभिर्भेदैर्भिद्यमानस्य यो विशेषः पृथ्व्यादिः स विशेषान्तरानुप्रवृत्तो नास्तीति। [३]मृदुः प्रकारोऽस्य=मृदुजातीयः। [४]यत्प्रकारोऽस्य=यज्जातीयः नानाभूतः[५] प्रकारोऽस्य=नानाजातीयः[६]एवं प्रकारोऽस्य=एवंजातीयः। [७]यथाभूतः प्रकारोऽस्य=यथाजातीयः।(एवम्) तथाभूतः प्रकारोऽस्य=तथाजातीयः। [८]कथंभूतः प्रकारोऽस्य=कथंजातीयः। [९]इत्थंभूतः प्रकारोऽस्य= इत्थंजातीयः ॥७५॥

## कोऽण्वादेः ॥७।२।७६॥

म० वृ०–अणु इत्यादिभ्यस्तदस्य प्रकारेऽर्थे 'कः' स्यात्। जातीयरोऽपवादः। [१]अणुकः पटः, [२]स्थूलकः पटः ॥७६॥

अव०—[१]अणुः प्रकारोऽस्य पटस्य=अणुकः। [२]स्थूलः प्रकारोऽस्य=स्थूलकः। एवमणुका माषाः, अणुः प्रकार एषां माषाणामिति वाक्यम्। माषकं हिरण्यम्, पञ्चगुञ्जा माष इत्युच्यते, माषः प्रकारोऽस्य=माषकं हिरण्यम्। इषुः प्रकारो यस्याः सा इषुका गोलिका,इषुवत्=शरवत् धनुषा या क्षिप्यते।

अणु, स्थूल, माष, इषु, इक्षु, वाद्य, तिल, काल, तिलकाल, पत्र, मूल, कुमारीपुत्र, कुमारी, श्वशुर, मणि, बृहत्, चक्षत्, चन्द्र, परण्ड, पुण्ड्र इति अण्वादिगणः ॥ ७६ ॥

## जीर्ण-गोमुत्रा-ऽवदात-सुरायव-कृष्णाच्छाल्याच्छादन-सुरा-ऽहि-व्रीहि-तिले ॥७।२।७७॥

म० वृ०–जीर्णादिभ्यो यथासंख्यं शाल्यादिषु वाच्येषु तदस्य प्रकारविषये 'कः' स्यात्। जीर्णाच्छालिषु,–जीर्णः प्रकार एषां=जीर्णकाः शालयः। गोमुत्रादाच्छादने,–[1]गोमुत्रकम्, गोमुत्रवर्णमाच्छादनमित्यर्थः। अवदातात्सुरायाम्,–[2]अवदातिका सुरा। सुराया अहौ,– [सुरा प्रकारोऽस्य=] सुरकोऽहिः, सुरावर्णः इत्यर्थः। यवात् व्रीहिषु,–[यवाः प्रकारा येषां=] यवका व्रीहयः। कृष्णात्तिलेषु,–[कृष्णाः प्रकारा एषाम्=] कृष्णकास्तिलाः ॥७७॥

---

अव०–[1]गोमुत्रं प्रकारोऽस्य। [2]अवदातः प्रकारोऽस्य ॥७७॥

## भूतपूर्वे प्चरट् ॥७।२।७८॥

म० वृ०–अतः परं प्रायः स्वार्थिकाः प्रत्ययाः। तत्र [स्वार्थिकेषु प्रत्ययेषु] [1]उपाधिः प्रकृतेर्विज्ञायते, स (उपाधिः) प्रत्ययस्य द्योत्यो भवति। भूतपूर्वेऽर्थे वर्त्तमानान्नाम्नः स्वार्थे 'प्चरट्' स्यात्। [2]भूतपूर्व आढ्यः=आढ्यचरः[3]। टकारो ङ्यर्थः। [4]पकारः पुंवद्भावार्थः। भूतपूर्वा आढ्या=आढ्य[5]चरी, दर्शनीयचरी[6] ॥७८॥

---

अव०–[1]उपाधिर्विशेषणं भूतपूर्वादि प्रकृतेरेव सकाशादवसीयते, केवलं स उपाधिः प्रत्ययेन द्योत्यते, न तु उच्यते। [2]पूर्वं भूतो=भूतपूर्वः, ततो भूतपूर्व आढ्य इति वाक्यम्। [3]एवं दर्शनीयचरः, भूतपूर्वो दर्शनीयो=दर्शनीयचरः। [4]प्चरट् इत्यत्र पकारः क्यङ्मानिपित्तद्धिते' (३।२।५०) इत्यत्र विशेषणार्थः पुंवद्भावे कर्त्तव्ये। [5]आढ्यचरी दर्शनीयचरी, इत्यत्र 'क्यङ्मानिपित्तद्धिते' इत्यनेन पुंवद्भावः। [6]भूतपूर्वा दर्शनीया। 'भूतपूर्वे प्चरट्' इति सूत्रेऽयं विशेषो लिख्यते,–भूतशब्दो न केवलमतीते, वर्त्तमानेऽप्यस्ति; पूर्वशब्दो दिगादावपि वर्त्तते इति अतिक्रान्तकालप्रतिपत्त्यर्थमुभयोर्भूतशब्दपूर्वशब्दयोरुपादानं कृतम्। प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तस्य भूतपूर्वत्वेऽयं प्रत्ययो भवति इति इह न प्चरट्,–अर्जुनो महिष्मत्यां भूतपूर्व इति। अत्र हि अर्जुनत्वस्याऽर्जुनशब्दाभिधेयस्य न भूतपूर्वत्वम्, नहि अर्जुनो माहिष्मत्यामर्जुनत्वेन भूतपूर्वः, किन्तु राजत्वेन इत्यर्थः ॥७८॥

## गोष्ठादीनञ् ॥७।२।७९॥

म० वृ०–गोष्ठाद् भूतपूर्वत्वे 'ईनञ्' स्यात्। गोष्ठो भूतपूर्वो=गोष्ठीनो देशः ॥७९॥

## षष्ठ्या रूप्य-प्चरट् ॥७।२।८०॥

म० ०–षष्ठ्यन्तान्नाम्नो भूतपूर्वे 'रूप्यप्चरटौ' भवतः। मैत्रस्य भूतपूर्वो=मैत्ररूप्यः,[देवदत्तरूप्यः] मैत्रचरो गौः, मैत्रचरी [देवदत्तचरी] ॥८०॥

## [1]व्याश्रये तसुः ॥७।२।८१॥

म० वृ०–नानापक्षाश्रयो व्याश्रयः। [नाम्नः] षष्ठ्यन्तात् व्याश्रये गम्यमाने '[2]तसुः' स्यात्। [3]देवा अर्जुनतोऽभवन्, [4]आदित्यः कर्णतोऽभवन्, [5]यत्तोऽभवत् [यस्य पक्षे इत्यर्थः], [6]तत्तोऽभवन् [तस्य पक्षे इत्यर्थः], त्वत्तः [तव पक्षे], मत्तोऽभवत् [मम पक्षे] ॥ ८१ ॥

---

अव०–[1]व्याश्रयणं व्याश्रयः, 'युवर्ण०' (५।३।२८) इत्यल्। [2]तसु इत्यत्र उकारः 'अघण्तस्वाद्याशसः' (१।१।३२) इत्यत्र विशेषणार्थः। [3]अर्जुनकर्णयोर्विवदमानयोः कोऽर्थः? युध्यमानयोः देवा अर्जुनतोऽभवन् कोऽर्थः? देवा अर्जुनस्य पक्षे बभूवुः। [4]आदित्यः कर्णतः, कोऽर्थः? कर्णस्य पक्षे सूर्योऽभवत् इति व्याश्रयत्वं भावनीयम्। [5]यत्तः, [6]तत्तः; अत्र तसुप्रत्ययस्य उकारानुबन्धत्वात् 'आद्वेरः' (२।१।४१) इत्यनेन अकारो न प्राप्नोति, 'आद्वेरः'

इति सूत्रस्य) वृत्तौ हि तसादौ प्रत्यये इत्युक्तम्, न तस्वादौ । चतुष्क(वृत्ति)सूत्रेषु आद्ये पादे 'अधण् तस्वाद्या शसः' (१।१।३२) इति सूत्रमस्ति, तत्रायमर्थः– तस्वाद्याः शस्पर्यन्ताः धण्वर्जिताः ये तद्धितप्रत्ययाः तेऽव्ययसंज्ञा भवन्ति, इति 'व्याश्रये तसुः' (७।२।८१) इति सूत्रात् तस्वाद्याः प्रत्यया दृश्यन्ते। 'व्याश्रये तसुः' इति सूत्रादारभ्य ये तस्वादयः प्रत्ययाः शस्पर्यन्ता विधास्यन्ते तेषु प्रत्ययेषु विहितेषु सर्वत्र स्यादयो विभक्तयोऽग्रे दीयन्ते, 'अव्ययस्य' (३।२।७) इत्यनेन स्यादिविभक्तेर्लोपः कार्यः इति ज्ञातव्यम् ॥८१॥

## रोगात्प्रतीकारे ॥७।२।८२॥

म० वृ०–रोगवाचिनः षष्ठ्यन्तात्प्रतीकारे गम्यमाने 'तसुः' स्यात् । [1]प्रवाहिकातः कुरु, अस्य रोगस्य चिकित्सां कुर्वित्यर्थः ॥८२॥

---

अव०–[1]प्रवहणं प्रवाहिका, अथवा प्रोह्यतेऽनया इति प्रवाहिका, 'नाम्नि पुंसि च' (५।३।१२१) णकः ॥ ८२ ॥

## पर्यभेः सर्वोभये ॥७।२।८३॥

म० वृ०–पर्यभिभ्यां यथाक्रमं सर्वोभयार्थे वर्त्तमानाभ्यां 'तसुः' स्यात् । परितः, सर्वत इत्यर्थः । अभितः, उभयत इत्यर्थः [परित इत्यत्र सर्वस्मात् परित इति वाक्यम्, अभित इत्यत्र उभयस्मात् अभित इति वाक्यं कर्तव्यम् ] सर्वोभय इति किम् ? वृक्षं परि, वृक्षमभि ॥८३॥

## आद्यादिभ्यः ॥७।२।८४॥

म० वृ०–आद्यादिभ्यः सम्भवद्विभक्त्यन्तेभ्यः 'तसुः' स्यात् । आदौ [1]आदेर्वा आदितः, एवं [मध्ये मध्याद्वा] मध्यतः, अन्ततः, अग्रतः पार्श्वतः, पृष्ठतः, मुखतः, सर्वतः, उभयतः, अन्यतः, एकतः, प्रमाणतः[2] । आद्यादयः प्रयोगगम्याः ॥८४॥

---

अव०–[1]आदेर्वा आदितः इति वाक्येऽपादानादयं पञ्चम्यर्थोऽन्य एव मन्तव्यः, अपादाने वाक्ये हि 'अहीयरुहो'० (७।२।८८) इत्यनेन सिध्यति प्रत्ययः । [2]प्रमाणेन प्रमाणाद्वा=प्रमाणतः । एवं पूर्वतः, इतः, अस्मात् अस्मिन् वा=इतः ; पृष्ठेन पृष्ठतोऽर्कं सेवेत । एवं पार्श्वतः, अनेन इतः, दुष्टः शब्दः स्वरतो वर्णतो वा, स्वरेण स्वरतः, वर्णेन वर्णतः, तथा शब्दतः, अर्थतः, अभिधानतः, येन यस्मिन् वा यतः, तेन तस्मिन् वा ततः, पृषोदरादित्वात् दकारलोपः । इति आद्यादिगणे इमे विशेषप्रयोगा ज्ञेयाः ॥८४॥

## क्षेपातिग्रहाव्यथेष्वकर्तुस्तृतीयायाः ॥७।२।८५॥

म० वृ०–तृतीयान्तादकर्तृवाचिनः क्षेपातिग्रहाव्यथाविषये 'तसुः' स्यात् । [1]वृत्ततः क्षिप्तः । [2]वृत्ततोऽतिगृह्यते । [3]वृत्ततो न व्यथते । अकर्तुरिति किम् ? चैत्रेण क्षिप्तः । तृतीयाया इति किम् ? चैत्रं क्षिपति ॥८५॥

---

अव०–[1]क्षेपो निन्दा, क्षेपेऽर्थे तसुर्भवति, यथा वृत्तेन क्षिप्तः इति वाक्यं (? वाक्ये) वृत्ततः क्षिप्तः, वृत्तेन आचारेण निन्दित इत्यर्थः १ । [2]अतिक्रम्य ग्रहणमतिग्रहः, वृत्तेनातिगृह्यते=वृत्ततः गृह्यते, साधुवृत्तोऽन्यानतिक्रम्य वृत्तेन गृह्यते, साध्वाचार इति सम्भाव्यते इत्यर्थः ; अथवा अतिशयेन ग्रहणमतिग्रह उच्यते, वृत्ततोऽतिगृह्यते, अतिशयेन गृह्यते इत्यर्थः २ । [3]अचलनमक्षोभणं वा अभीतिर्वा अव्यथा उच्यते, वृत्तेन न व्यथते=वृत्ततो न व्यथते, कोऽर्थः ? वृत्तेन न चलति न क्षोभते न बिभेतीत्यर्थः ३ ॥८५॥

## पाप-हीयमानेन ॥७।२।८६॥

म० वृ०–अकर्तृवाचिनस्तृतीयान्तात् पापहीयमानाभ्यां योगे 'तसुः' स्यात् । वृत्तेन पापः= वृत्ततः पापः । वृत्तेन हीयते=वृत्ततो हीयते, एवं [स्वरेण=] स्वरतो [1]वर्णतः [2]शब्दतो वा हीनः । पापहीयमानेनेति किम् ? चारित्रेण शुद्धः । अकर्तुरित्येव– चैत्रेण हीयते ॥८६॥

अव०–¹'वर्णेन=जात्या । ²शब्देन । ✽ क्षेपार्थस्याविवक्षायां तत्त्वाख्याने, कोऽर्थः ? स्वरूपमात्रकथने यथास्यात्तसुरिति 'पापहीयमानेन' इति वचनं कृतम् ॥८६॥

## प्रतिना पञ्चम्याः ॥७।२।८७॥

म० वृ०–प्रतिना योगे या पञ्चमी¹ विहिता तदन्तात् 'तसुर्वा' ²स्यात् । अभिमन्युरर्जुनात्प्रति= अभिरर्जुनतः प्रति, अर्जुनस्य प्रतिनिधिरित्यर्थः³ [सदृश इत्यर्थः] । पञ्चम्या इति किम् ? वृक्षं प्रति विद्योतते ॥८७॥

---

अव०–¹'यतः प्रतिनिधि प्रतिदाने प्रतिना' (२।२।७२) इति सूत्रेण प्रतिना योगे पञ्चमी भवति । ²तद्धितप्रथमपादे 'वाद्यात्' (६।१।११) इति सूत्रमुक्तम्, तस्मादधिकारवशात् 'प्रतिना पञ्चम्या' अत्र सूत्रे वा इत्युक्तं सूत्रार्थे । ³एवं माषानस्मै तिलेभ्यः प्रतियच्छति=तिलतः प्रतियच्छति, तिलान् गृहीत्वा माषान् ददातीत्यर्थः । अत्रापि 'यतः प्रतिनिधि०' (२।२।७२) इत्यनेन पञ्चमी ॥८७॥

## अहीयरुहोऽपादाने ॥७।२।८८॥

म० वृ०–['पञ्चम्यपादाने' (२।२।६९) इति सूत्रेण] अपादाने या पञ्चमी तदन्तात् 'तसुर्वा'¹ स्यात्, तच्चेदपादानं²हीयरुहोः सम्बन्धि न भवति। ग्रामादायाति=ग्रामतः आयाति, चौरात्=चौरतो बिभेति । अहीयरुह इति किम् ? ³सार्थाद्धीयते, सार्थाद्धीनः, गिरेरवरोहति । अपादान इति किम् ? ⁴ऋते धर्मात् कुतः सुखम्, आ पाटलिपुत्रात् वृष्टो देवः ॥ ८८ ॥

---

अव०–¹'वाऽऽद्यात्' (६।१।११) इतोऽयं वा इत्यधिकारः । तथा ²'हीय' इति क्यान्तस्य जहातेः 'ओहांक् त्यागे' इत्यस्य निर्देशो जिहीतेः 'ओहांङ् गतौ' इत्यस्य व्युदासार्थः=निराकरणार्थः कृतः । तेन तत्र ओहांङ्क् इति धातुप्रयोगे निषेधो न भवति, भूमित उज्जिहीते, उत्तिष्ठतीत्यर्थः । हाक् इति निर्देशेनैव हाङो निवृत्तिसिद्धौ हीयतेर्निर्देशो यत्रैव भावे वा कर्मणि वा कर्मकर्त्तरि च जहातेः प्रयोगः तत्रैवाऽपायविवक्षा, तत्रैव तसुर्भवति, नान्यत्रेत्येवमर्थम् । तेन सार्थो जहाति इति वक्तव्ये सार्थाज्जहातीति प्रयोगो न भवतीत्यर्थः । ³'सार्थाद्धीयते' इत्यादि, सार्थादिति कर्त्तुरपाये सति, ★अपाये कोऽर्थः ? य एव कर्त्ता स एवापायविषयः, तस्मिन्नपाये सति अवधिविवक्षा भवति, सार्थेन हीयते देवदत्त इत्यर्थः । हीयते इति कर्मकर्त्तरीत्यन्ये । सार्थात् स्वयमेव हीयते देवदत्तः । जहाति सार्थो देवदत्तम्, स एवं विवक्षति नाहं जहामि किन्तु सार्थात् स्वयमेव देवदत्तो हीयते इत्यर्थः । ⁴ऋते धर्मादित्यत्र 'ऋते द्वितीया च' (२।२।११४) इति पञ्चमी ॥८८॥

## किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित्तस् ॥७।२।८९॥

म०वृ०–पञ्चम्या इति वर्त्तते । किम्शब्दात् द्व्यादिवर्जितेभ्यः सर्वादिभ्यश्च अवैपुल्यवाचिनो ¹बहुशब्दाच्च पञ्चम्यन्तात् 'तस्' स्यात्, स च पित् । किम्,–कस्मात्=कुतः ['इतोऽतः कुतः' (७।२।९०) इति कुतः] । सर्वादि,–सर्वतः, विश्वतः, यतः, ततः ['आद्वेरः' (२।१।४१) इति अकारः] । बहु,–बहुभ्यो=बहुतः । किमः सर्वादित्वेऽपि द्व्यादिवर्जनान्न [तस्] प्राप्नुयादिति पृथगुपादानम् । द्व्यादिवर्जनं किम् ? द्वाभ्याम्, त्वत्, मत्, युष्मत्, अस्मत्, भवत् । कथं द्वितः, त्वत्तः, मत्तः, युष्मत्तः, अस्मत्तः ? 'अहीयरुहोऽपादाने' (७।२।८८) इति [तस् भविष्यति] । बहोर्वैपुल्यप्रतिषेधः किम् ? बहोः सूपात् । किम्सर्वादिबहोश्च तसुप्रत्ययविषयेऽपि परत्वादयमेव तस् भवति,²–यतः ³प्रति, यत⁴ आयाति । निरनुबन्धप्रत्ययान्तरकरणमत्वार्थम् ⁵ ।

---

✽ पापहीयमानाभ्यां क्षेपस्य प्रतीयमानत्वात् पूर्वेणैव सिद्धयतीत्याह–क्षेपार्थस्याविवक्षयामित्यादि ।

★ 'अपाये' इत्ययं पाठोऽधिकः प्रतिभाति ।

-पित्करणम् पुंवद्भावार्थम्[६] । बह्वीभ्यो=[७]बहुतः । पञ्चम्यन्तमात्राद्वयं [८]विधिः,- [९]सर्वतो हेतोः, [१०]सर्वतः पूर्वम् ॥८९॥

अव०- [१]बहुशब्दो नाममालायां "प्राज्यं प्रभूतं प्रचुरं बहुलं बहु पुष्कलम्" ★ इति बहुलार्थवाची, "पृथूरु पृथुलं व्यूढं विकटं विपुलं बृहत् । स्फारं वरिष्ठं विस्तीर्णं, तत बहु महद् गुरु 卐॥१॥ इति विपुलार्थवाची । अनेकार्थे तु बहु'भूयसि त्र्यादिकासु च सङ्ख्यासु' इति । 'किमद्व्यादि०'(७।२।८९) इति सूत्रे बहुलार्थवाची त्र्यादिसङ्ख्यावाची च बहुर्ज्ञातव्यः, ततस्तस्, विपुलार्थवाची बहुर्वर्ज्यते इति भावः । [२]न पूर्वोक्ततसुः । [३]'प्रतिना पञ्चम्याः'(७।२। ८७) इति तसोः प्राप्तिः । [४]अपादानपञ्चमी, अत्र 'किमद्व्यादि'०इति सूत्रं प्रवर्त्तते इत्यर्थः, 'अहीयरुहोऽपादने' (७।२।८८) इति तसोः प्राप्तिः । [५]प्राक्तनस्तसुः उकारानुबन्धः सानुबन्धोऽस्ति, अस्य पुनस्तस् इति निरनुबन्धस्य प्रत्ययान्तरस्य करणमत्वार्थम् । अस्मिन् तस्प्रत्यये 'आद्वेरः' (२।१।४१) इत्यनेन 'अत्' भवति, न तसुप्रत्यये । तत्र हि 'आद्वेरः' (२।१।४१) इति सूत्रे तसादौ इत्युक्तम् । [६]'क्यङ्मानिपित्तद्धिते' (३।२।५०) इत्यत्र विशेषणार्थः ( ? र्थम् ) । [७]'क्यङ्मानि०'(३।२।५०) इत्यनेन पुंवद्भावः । [८]न तु अपादान एव विहितात् पञ्चम्यन्तात् शब्दात् । [९]'सर्वतो हेतोः'इत्यत्र 'सर्वादेः सर्वाः'(२।२।११९) इति पञ्चमी । [१०]'सर्वतः पूर्वम्', अत्र तु 'प्रभृत्यन्यार्थदिक्शब्दबहिरारादितरैः'(२।२। ७५) इति सूत्रेण पञ्चम्यां सत्यां तस् भवतीत्यर्थः ॥ ८९ ॥

## इतो-ऽतः-कुतः ॥७।२।९०॥

म० वृ०-इतस् अतस् कुतस् एते शब्दा निपात्यन्ते । [१]इतः, [२]अतः, [३]कुतः । लक्षणान्तरेण तसि तसौ वा सिद्धे आदेशमात्रं विधीयते । [४]तेनोत्तरसूत्रेण तसि- [५]इतो भवान्, [६]अतो भवान्, आद्यादितसौ-[७]इत आस्यतामिति भवति ॥९०॥

अव०-[१]इदम्, अस्मात् (=इतः),'किमद्व्यादिना' (७।२।८९)तस्, निपातनात् इदमः स्थाने इस्सर्वादेशः, इमकस्मात् इतः, सर्वं पूर्ववत् । [२]एतद्, एतस्मात् (अतः), अकि तु एतकस्मात् अतः, तस्, निपातनात् एतद्स्थाने अः । [३]किम्, कस्मात्=कुतः, तस्, निपातनात् किमः स्थाने कुः । इह 'पञ्चम्या' इति नानुवर्त्तते । [४]'भवत्वायुष्मत्०' (७।२।९१) इत्यनेनापि तस्प्रत्यये कृते इतः अतः इति प्रयोगा भवन्ति । [५]अयं भवान् इति वाक्यम्, इतो भवान् उदाहरणम् । [६]एष भवान् इति वाक्यम्, अतो भवान् उदाहरणम् । [७] तथा इदम्, अस्मिन्=इतः, 'आद्यादिभ्यः' (७।२।८४) इति तसुप्रत्ययेऽपि कृते इतः इति सिद्धम् ॥ ९० ॥

## भवत्वायुष्मद्दीर्घायुर्देवानांप्रियैकार्थात्[१]॥७।२।९१॥

म० वृ०-भवत्वाद्यैस्तुल्याधिकरणात्[२] किमद्व्यादिसर्वाद्यवैपुल्यबहोः सर्वविभक्त्यन्तात् पित्तस् वा स्यात् । [वाऽऽद्यात्(६।१।११) इत्यतो वाऽनुवृत्तिः] स भवान्, ततो भवान् [अत्र तस्]; तौ भवन्तौ, ततो भवन्तौ ; ते भवन्तः, ततो भवन्तः ; एवं तं भवन्तम्, ततो भवन्तम् ; तेन भवता, ततो भवता[३]; एवमयं भवान्, इतो भवान्; को भवान् कुतो भवान् इत्याद्युदाहार्यम् । स आयुष्मान्, तत आयुष्मान् ; स दीर्घायुः, ततो दीर्घायुः ; स देवानांप्रियः, ततो देवानांप्रियः । भवतु (इति)अत्र उकारः सर्वादिपरिग्रहार्थम् [सर्वादिगणवर्त्ती भवतु इति ग्राह्यः] । तेन[४]मतु-[५]शत्रन्तव्युदासः ॥९१॥

अव०-[१]एकार्थात् इति कोऽर्थः ? तुल्याधिकरणात्,समानाधिकरणात् पर्यायो (?इति यावत्) । [२]भवतु, आयुष्मत्, दीर्घायुस्, देवानांप्रिय इति शब्दैः सह समानाधिकरणात् इत्यर्थः । [३] (एवम्) तस्मै भवते, ततो भवते; तस्मात् भवतः, ततो भवतः ; तस्य भवतः, ततो भवतः इति प्रयोगाः ।

★ अभि० चिन्ता० श्लो० १४२५ । 卐 अभि० चिन्ता० श्लो० १४३० ।

सप्तमीति तामत्र त्रप्करणात् (?) । [४] भं नक्षत्र-मत्रास्ति=भवत् , मतुः, 'मावर्णान्त'० (२।१।९४) इति मस्य वः । [५] भातीति भवत् , शतृः ॥९१॥

## त्रप् च ॥७।२।९२॥

म० वृ०–भवत्वाद्यैरेकार्थेभ्यः किमद्व्यादिभ्यश्च सर्वविभक्त्यन्तेभ्यः 'त्रप्' वा स्यात् । ['वाद्यात्' इत्यतो वा अनुवृत्तिः] स भवान् , तत्र भवान् ; तौ भवन्तौ, तत्र भवन्तौ; ते भवन्तः, तत्र भवन्तः इत्यादि[१] । एवं स आयुष्मान् , तत्रायुष्मान् इत्याद्यपि । योगविभागश्चकारेण पुनस्तस्विधानार्थम् । तेन सप्तम्यन्तादपि तस् भवति,–ततो भवति, तत्र भवति। अन्यथा हि तत ★इति सप्तम्यन्तात् 'सप्तम्याः' (७।२।९४) इत्यनेन परत्वात् त्रवेव स्यात् [२] । रूढिशब्दाश्चैते ततोभवदादयः शब्दाः पूजावचनाः कथञ्चिद् व्युत्पाद्यन्ते । अत एव पुनस्त्यदादिरनुप्रयुज्यते । [ तथाहि–] स तत्रभवान् , तं तत्रभवन्तम् ॥९२॥

---

अव०–[१]आदिशब्दात् तं भवन्तम् , तत्र भवन्तम्; तेन भवता, तत्र भवता; तस्मै भवते, तत्र भवते; तस्माद् भवतः, तत्र भवतः; (तस्य भवतः,) तत्र भवतः ;तस्मिन् भवति, तत्र भवति ;स दीर्घायुः, तत्र दीर्घायुः ; स देवानांप्रियः, तत्र देवानांप्रियः । [२]न तस् । ततः सप्तम्यर्थे तत इति न सिध्येत ॥९२॥

## क-कुत्रा-ऽत्रेह ॥७।२।९३॥

म० वृ०–एते 'त्रबन्ता' निपात्यन्ते । [१]क,[२]कुत्र, अत्र, [३]इह । तथा क भवान् , कुत्र भवान् , अत्र भवान् , इह भवान् , कायुष्मानित्याद्यपि ॥९३॥

---

अव०–[१]किम् , कस्मिन्=क, 'सप्तम्याः' (७।२।९४) इति त्रप् , निपातनात् किमस्थाने क, त्रप्स्थाने अकारः, 'क' इति सिद्धम् । [२]किम् , कस्मिन्=कुत्र, 'सप्तम्याः' (७।२।९४) त्रप् , निपातनात् एतदोऽकारः, अत्र इति सिद्धम् । [३]इदम् , अस्मिन्=इह, त्रप् , निपातनात् इदमः इकारः, त्रपः स्थाने हः, तथा इदमकस्मिनिह । एषु 'सप्तम्याः' (७।२।९४) त्रप् । त्रप्मात्रे चैते क कु इत्यादय आदेशा विधीयन्ते । तेन भवदादियोगेऽपि कादय आदेशा भवन्ति, तथाहि–क भवान् , कुत्र भवान् , अत्र भवान् , इह भवान् ; कायुष्मान् , कुत्रायुष्मान् , अत्रायुष्मान् , इहायुष्मान् , क दीर्घायुः, कुत्र दीर्घायुः,अत्र दीर्घायुः, इह दीर्घायुः । एषु 'त्रप् च' (७।२।९२) इति सूत्रेण सर्वविभक्तिद्वारकेणापि त्रपा योगे काद्यादेशाः सिद्धाः ॥९३॥

## सप्तम्याः ॥७।२।९४॥

म० वृ०–सप्तम्यन्तात् किमद्व्यादिभ्यः 'त्रप्' स्यात् । [पकारः पुंवद्भावार्थः] [कस्मिन्=] कुत्र, ['ककुत्रात्रेह' (७।२।९३) इति कुः] सर्वत्र, तत्र, बहुत्र, बह्वीषु=बहुत्र ['क्यङ्मानि'० (३।२।५०) इति पुंवत् ] ॥ ९४ ॥

## किंयत्तत्सर्वैकान्यात्काले दा ॥७।२।९५॥

म० वृ०–किम्-यद्-तद्-सर्वैकान्येभ्यः सप्तम्यन्तेभ्यः काले वाच्ये 'दा' स्यात् । कस्मिन्काले=कदा, [ यस्मिन्काले= ] यदा, तदा, [सर्वस्मिन् काले=] सर्वदा, [१]एकदा, [२]अन्यदा । काल इति किम् ? क देशे ॥९५॥

---

अव०–[१]एकस्मिन् काले। [२]अन्यस्मिन् काले ॥९५॥

## सदा-ऽधुनेदानीं-तदानीमेतर्हि ॥७।२।९६॥

म० वृ०–सदाद्याः शब्दाः काले निपात्यन्ते । [१]सदा, [२]अधुना, [३]इदानीम् , [४]तदानीम् , [५]एतर्हि ॥९६॥

---

अव०–[१]सर्व, सर्वस्मिन् काले=सदा, निपातनात् दाप्रत्ययः, सर्वस्थाने स इत्यादेशश्च, सर्वदा इत्यपि, पूर्वेण दा । [२]इदम् , अस्मिन् काले=अधुना, निपातनात् धुनाप्रत्ययः, इदमोऽकारादेशः अधुना । ([३]इदम् , अस्मिन् काले=इदानीम् , निपातनात्

---

★'इति 'सप्तम्यन्तात्' इत्यनेन 'ततः' इत्यस्यैवार्थः प्रदर्शितः ।

दानीम्प्रत्ययः, इदम इकारादेशश्च ) [४]तद्, तस्मिन् काले=तदानीम्, निपातनात् दानीम्प्रत्ययः । [५]इदम्, अस्मिन् काले=एतर्हि, निपातनात् र्हिप्रत्ययः, इदम एतादेशश्च, एतर्हि सिद्धम ॥९६॥

## सद्यो-ऽद्य-परेद्यव्यह्नि ॥७।२।९७॥

म० वृ०–सद्य इत्याद्या 'अह्नि काले निपात्यन्ते'। [१]सद्यः, [२]अद्य, [३]परेद्यवि ॥९७॥

---

अव०–[१]समान, समानेऽह्नि (=सद्यः), निपातनाद् द्यस्प्रत्ययः, समानस्य सभावः । [२]इदम्, अस्मिन्नहनि=अद्य, निपातनाद् द्यप्रत्ययः, इदमः स्थाने अकारः । [३]पर, परस्मिन्नहनि=परेद्यवि, निपातनाद् एद्यविप्रत्ययः । सद्य इति केचित् कालमात्रे निपातयन्ति ॥९७॥

## पूर्वा-ऽपरा-ऽधरोत्तरा-ऽन्या-ऽन्यतरेतरादेद्युस् ॥७।२।९८॥

म० वृ०–एभ्यः सप्तम्यन्तेभ्योऽह्नि कालार्थे 'एद्युस्' स्यात्। [ पूर्वाद्याः शब्दाः सर्वनामगणे ] पूर्वस्मिन्नहनि=पूर्वेद्युः, अपरेद्युः, अधरेद्युः, उत्तरेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युः ॥९८॥

## उभयाद् द्युश्च ॥७।२।९९॥

म० वृ०–उभयादह्नि काले 'द्युस् चकारादेद्युस्' स्यात्। उभयस्मिन्नहनि=उभयद्युः, उभयेद्युः ॥९९॥

## ऐषमः-परुत्-परारि वर्षे ॥७।२।१००॥

म० वृ०–एते वर्षे संवत्सरे काले निपात्यन्ते। [१]ऐषमः, [२]परुत्, [३]परारि ॥१००॥

---

अव०–[१]इदम्, अस्मिन् संवत्सरे=ऐषमः, इमकस्मिन् संवत्सरे=ऐषमः,निपातनात् समसिण्, इदमश्च इकारादेशः, ततो वृद्धिः, सस्य षत्वम्, ऐषमः । [२]पूर्वः परो वा शब्दः, पूर्वस्मिन् परस्मिन् (वा)संवत्सरे=परुत्,निपातनात् उत्प्रत्ययः, पूर्वस्य पर इत्यादेशः, परुत् । [३]पूर्वतर अथवा परतर, पूर्वतरे परतरे वा संवत्सरे=परारि, निपातनात् आरिप्रत्ययः, पूर्वस्य ( ? पूर्वतरस्य परतरस्य वा ) परादेशः ॥१००॥

## अनद्यतने र्हि ॥७।२।१०१॥

म० वृ०–अनद्यतने काले यथासम्भवं किमद्व्यादिसर्वाद्यवैपुल्यबहोः 'र्हिप्रत्ययः' स्यात्। कस्मिन्ननद्यतने काले=कर्हि, यर्हि, तर्हि, अन्यर्हि, [१]एतर्हि, [२]बहुर्हि। अनद्यतने इति किम्? यस्मिन् काले =यदा। अनद्यतनेऽपि काले कालमात्रविवक्षायां [३]दादिः प्रत्ययो भवति,–कदा, यदा। सप्तम्यर्थमात्रविवक्षायां त्रबपि-[४]अमुत्र काले ॥१०१॥

---

अव०–[१]एतस्मिन् काले एतर्हि। एतदः साको नेष्यते। ['सदाऽधुनेदानी०' (७।२।९६) इति] पूर्वसूत्रे एतर्हि इति प्रयोगः स सामान्यकाले इदम्शब्देन साध्यते। अमुष्मिन् काले अमुर्हि। [२]बहु काले बहुर्हि। [३]दा, आदिशब्दात् तदानीम्, तदा, अन्यदा। [४]'अमुत्र काले' इत्यत्र पूर्वममुत्र इति पदं निष्पाद्य पश्चात् काले इति पदेन सह सम्बन्धः कर्त्तव्यः ॥१०१॥

## [१]प्रकारे था ॥७।२।१०२॥

म० वृ०–सप्तम्या इति निवृत्तम्। यथासम्भवं विभक्तिः। प्रकारेऽर्थे वर्त्तमानात् किमद्व्यादिसर्वाद्यवैपुल्यबहोः 'था' स्यात्। सर्वेण प्रकारेण=सर्वथा। येन प्रकारेण=यथा, तथा, उभयथा, अन्यथा, [इतरथा,] अपरथा। बहोस्तु परत्वाद् धा भवति ।१०२

---

अव०–[१]सामान्यस्य भिद्यमानस्य भेदान्तरानुप्रवृत्तो भेदः प्रकार उच्यते ॥१०२॥

## कथमित्थम् ॥७।२।१०३॥

म० वृ०–'कथम् इत्थम्' इति प्रकारे निपात्येते। [१]कथम्, [२]इत्थम् ॥१०३॥

---

अव०–[१]किमः "प्रकारे था"(७।२।१०२) इति थाप्रत्ययप्राप्तिः,·········(थाप्रत्ययस्यापवादोऽयं थम्

प्रत्ययः,) केन प्रकारेण..........[कथम्,"किमः कस् तसादौ च" (२।१।४० ) इति] किमः क आदेशः । [२]इदम्, एतद् वा, अनेन प्रकारेण, एतेन प्रकारेण वा इत्थम्, थम्, इत् आदेशः, इत्थम् ॥१०३॥

## सङ्ख्याया धा ॥७।२।१०४॥

म० वृ०-सङ्ख्यावाचिनो नाम्नः प्रकारेऽर्थे 'धा' स्यात्। एकेन प्रकारेण=एकधा, [ द्वाभ्यां प्रकाराभ्यां=] [१]द्विधा, त्रिधा, चतुर्धा, शतधा, [बहुभिः प्रकारैः=] बहुधा, [२]गणधा, [३]कतिधा, [४]तावद्धा ॥१०४॥

---

अव०-[१]'सङ्ख्याया धा' (७।२।१०४) इति सूत्रे द्विधा इत्यत्र 'आद्वेरः' (२।१।४१ ) इत्यनेन अकारो न भवति, अप्राप्तेः, यतः 'किमः कस्तसादौ च' ( २।१।४० ) इति सूत्रे आदिशब्दो व्यवस्थावाची, व्यवस्था चेयं- तसादयः थमन्ता एव ग्राह्याः, 'किमद्व्यादि०'(७।२।८९ इत्यतः) आरभ्य 'कथमित्थम्' ( ७।२।१०३ ) इति पर्यन्तास्तसादयः, धाप्रत्ययश्चायं थमः परतः इति'आद्वेरः' (२।१।४१ इत्यनेन ) अत्वं न प्राप्नोति, तसाद्यभावात् । [२]'गणधा', 'बहुगणं भेदे' (१।१।४०) इत्यनेन सङ्ख्यासंज्ञा । [३]'कतिधा [४]'तावद्धा'; अत्र तु 'डत्यतु सङ्ख्यावत्' (१।१।३९ इति संख्यासंज्ञा) ॥१०४॥

## विचाले च ॥७।२।१०५॥

म० वृ०-द्रव्यस्य पूर्वसङ्ख्यायाः प्रच्युतिः सङ्ख्यान्तरापत्तिः एकस्यानेकीभावः 'अनेकस्य चैकीभावो विचालः[२] । तस्मिन् विचाले गम्यमाने नाम्नो 'धा' वा स्यात्। एको राशि द्वौ क्रियते= द्विधा क्रियते, [३]त्रिधा क्रियते; एवमेको राशिर्द्वौ भवति द्विधा. त्रिधा भवति; एकं राशिं द्वौ करोति द्विधा [४]करोति। एवमनेकः एकः क्रियते=एकधा क्रियते इत्यादि[५]। एवं बहुधा, गणधा [ कतिधा तावद्धा]। चकार उत्तरत्र [ अग्रेतनसूत्रेषु ] प्रकारे[६] विचाले चेत्युभयोः समुच्चयार्थः ॥१०५॥

अव०-'अनेकस्य चैकीभावः'इत्यस्यायं भावार्थः-एक शब्देन च स्तोकत्वं लक्ष्यते, तेन तु एकीभाव इत्यर्थः। [२]विचलनं विचालः। [३]एको राशिस्त्रयः क्रियते। [४]( एवम् ) एकं राशिं त्रीन् करोति=त्रिधा करोति।

'यदि मे यतमानाय, वचनं न करिष्यसि ।
उन्मत्त शतधा मूर्द्धा तवैषोऽद्य फलिष्यति' ॥१॥

इत्यपि उदाहरणं ज्ञेयम्, उदाहरणं तु शतधा इति, शतेन भागैः क्रियते शतधा इति वाक्यम् । इयमवचूरिर्द्विधा करोतीति अस्याग्रे । [५]आदिशब्दात् अनेक एको भवति=एकधा भवति, अनेकमेकं करोति=एकधा करोति, एवं पञ्च राशयस्त्रयः द्वौ एको वा क्रियते=त्रिधा द्विधा एकधा वा क्रियते। एवं त्रिधा, द्विधा,एकधा भवति; त्रिधा, द्विधा, एकधा वा करोतीति प्रयोगा ज्ञेयाः। [६]प्रकारोऽवस्थितस्य धर्मिणो भवति, विचाले तु अवस्थित एव धर्मी पृथक् क्रियते इत्यर्थः ॥१०५॥

## वैकाद् ध्यमञ् ॥७।२।१०६॥

म० वृ०-एकशब्दात्सङ्ख्यावाचिनः प्रकारे विचाले च गम्यमाने 'ध्यमञ् वा' स्यात्। एकेन प्रकारेण=ऐकध्यम्, एकधा भुङ्क्ते। अनेकमेकं करोति=ऐकध्यम्,एकधा करोति [ 'विचाले च' (७।२।१०५) इति धा] वाग्रहणं धाऽर्थम् ॥१०६॥

## द्वित्रेर्धमञेधा वा ॥७।२।१०७॥

म० वृ०-द्वित्रिभ्यां प्रकारेऽर्थे विचाले च गम्ये 'धमञ् एधा' भवतो वा। द्वैधम्, त्रैधम्; द्वेधा, त्रेधा भुङ्क्ते। वावचनाद् ['सङ्ख्याया धा' ७।२।१०४] द्विधा, त्रिधा। एकं राशिं द्वौ त्रीन् वा करोति द्वैधम्, त्रैधम्; द्वेधा, त्रेधा; द्विधा, त्रिधा ॥१०७॥

## [१]तद्वति धण् ॥७।२।१०८॥

म० वृ०-द्वित्रिभ्यां तद्वति [कोऽर्थः?] प्रकारवति विचालवति चार्थे [अभिधेये] 'धण्' स्यात्। द्वौ प्रकारौ विभागौ वा एषां द्वैधानि, [२]त्रैधानि; [३]राजद्वैधानि, [४]राजत्रैधानि, द्वैधीभावः[५] ॥१०८॥

अव०-[1]तौ प्रकारविचालौ विद्येतेऽस्य, मतुः, तस्मिन् । 'अधणतस्वाद्या शसः' (१।१।३२) इत्यत्र धण्वर्जिताः तस्वाद्याः शसन्ता इति यदुक्तम् तत्र विषये इदं सूत्रम्, अयं स धण् प्रत्ययः इति भावः। [2]त्रयः प्रकारा विभागा वा एषां त्रैधानि । [3]'राजद्वैधानि,' कोऽर्थः ? राज्ञा करणभूतेन द्वैधानीति । [4]एवं राजत्रैधानि, राज्ञा करणभूतेन त्रैधानि । [5]अद्वैधानां द्वैधानां भवनम्,'भावाकर्त्रोः' (५।३।१८), 'कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्त्वे च्विः' (७।२।१२६) इति च्विः । एवं त्रैधीभावः, अत्रैधानां त्रैधानां भवनम्, घञ्, ततो विचाले च्विः ॥१०८॥

## [1]वारे कृत्वस् ॥७।२।१०९॥

म० वृ०-सङ्ख्याया इति वर्त्तते । वारे वर्त्तमानात्सङ्ख्याशब्दात् तद्वति=वारवति धात्वर्थे क्रियायामर्थे 'कृत्वस्' स्यात् । पञ्च वारा अस्य=पञ्चकृत्वो[2] भुङ्क्ते, [शतं वारा अस्य=], शतकृत्वः [अधीते इत्यर्थः], बहुकृत्वः[3] । तद्वतीत्येव- भोजनस्य पञ्च वाराः[4] ॥१०९॥

---

अव०-[1]वारो भोजनादिधात्वर्थस्य अयौगपद्येन भिन्नकालतया प्रवृत्तिः अथवा तस्य धात्वर्थस्य क्रियाभ्यावर्त्तिः (? वृत्तेः) समयः कालस्तत्कालो वार उच्यते, तस्मिन्नीदृशे वारे । [2]भुज्यर्थो वारवान् इति भुज्यर्थस्येदं विशेषणम्, पञ्चकृत्व इत्यादिकं क्रियाविशेषणमिदमित्यभिप्रायः । [3]एवं गणकृत्वः, कतिकृत्वः, तावत्कृत्वः इत्यपि । [4]'पञ्चवारा' इत्यत्र वाराणां प्राधान्यम्, भोजनस्य तु सम्बन्धमात्रम् ॥ १०९ ॥

## द्वि-त्रि-चतुरः सुच् ॥७।२।११०॥

म० वृ०-द्वित्रिचतुर्भ्यो वारे वर्त्तमानेभ्यस्तद्वति 'सुच्' स्यात् । कृत्वसोऽपवादः । द्वौ वारावस्य =द्विर्भुङ्क्ते,त्रिर्भुङ्क्ते चतुर्भुङ्क्ते । इह तु[5] द्विस्तावान् प्रासादः, द्विदेशेति गम्यमानेऽपि वारे सुच् भवति ॥११०॥

अव०-[5]"इह तु द्विस्तावान् प्रासादः" इत्यत्र प्रयोगे द्वौ वारावस्य प्रासादभवनस्य द्विः इति वाक्यम्, इह भवनक्रिया गम्यमानाऽस्ति, द्विस्तावान् भवति इति भवत्यर्थो गम्यते,क इति तद्गतो वारोऽपि गम्यमानः । उदाहरणार्थोऽयम्- यावान् एकः प्रासादः तावाद(? न)न्यो द्विगुणो भवतीत्यर्थः ॥

## एकात्सकृच्चास्य ॥७।२।१११॥

म० वृ०-एकशब्दाद्वारेऽर्थे तद्वत्यभिधेये 'सुच्' एकस्य 'सकृत्' इत्यादेशश्च स्यात् । एकवारं भुङ्क्ते =सकृत् भुङ्क्ते[1] ॥१११॥

---

अव०-[1]'सकृत् भुङ्क्ते' इत्यत्र यदा एकशब्दस्य सुच्प्रत्यये परे सकृत् आदेशः, प्रथमासिः, 'अव्ययस्य' (३।२।७) इति सिलोपः कृतः, तदा 'पदस्य' (२।१।८९) इति सूत्रेण संयोगान्तलोपः इति सुच् लुप्यते,सकृद् भुङ्क्ते इति सिद्धम् । एको वारो यथा भवत्येवं 'भुङ्क्ते इति क्रियाविशेषण ज्ञेयम् । एवं सर्वत्र क्रियाविशेषणम् ॥१११॥

## बहोर्धाऽऽसन्ने ॥७।२।११२॥

म० वृ-बहुशब्दात्सङ्ख्यावाचिन आसन्ने अविदूरे वारे क्रियाप्रवृत्तौ 'धा' स्यात् । बहव आसन्ना वारा अस्य=बहुधा भुङ्क्ते । आसन्ने इति किम् ? [1]बहुकृत्वो मासस्य भुङ्क्ते[1]॥११२॥

---

अव०-'बहोर्धासन्ने' इति सूत्रे विशेषोऽयम्,- आसन्नवारेऽपि वारमात्रे द्योत्ये कृत्वस् प्रत्ययो भवत्येव, यथा- बहुकृत्वोऽह्नो भुङ्क्ते । आसन्नता तु प्रकरणादिना गम्यते । तथा गणधा भुङ्क्ते, कतिधा भुङ्क्ते, तावद्धा भुङ्क्ते, अत्रापि केचिदाचार्या धाप्रत्ययमिच्छन्ति । [1]"बहुकृत्वो मासस्य भुङ्क्ते" इत्यत्र 'नवा सुजर्थैः काले' (२।२।९६) इत्यनेन विकल्पेन सप्तमी विहिताऽस्ति इति मासे, मासस्य; पक्षे षष्ठी अपि भवति शेषेऽर्थे ॥११२॥

## [1]दिक्शब्दाद्दिग्-देश-कालेषु प्रथमा-पञ्चमी-सप्तम्याः ॥७।२।११३॥

म० वृ०–★ [दिक्शब्दाद्दिशि प्रसिद्धाच्छब्दाद् दिशि देशे काले च वर्त्तमानात् प्रथमापञ्चमीसप्तम्यन्तात् स्वार्थेधाप्रत्ययो भवति । [2]प्राची दिग् रमणीया=] प्राग् रमणीयम्, प्राग् देशो रम्यः=प्राग् रम्यम्, प्राङ् कालो रम्यः=प्राग् रम्यम्[2]। [पञ्चम्याः उदाहरणम्] प्राच्या दिशः आगतः=प्रागागतः, प्राचो देशादागतः=प्रागागतः, प्राचः कालादागतः= प्रागागतः, एवं प्राग् वसति[3]। दिक्शब्दादिति किम्? ऐन्द्री दिक्। दिग्देशकालेष्विति बहुवचनं प्रथमादिभिः सह यथासङ्ख्यनिवृत्त्यर्थम् ॥११३॥

अव०–[1]दिशि प्रसिद्धः शब्दः (दिक्शब्दः), तस्मात्। [2]प्राची दिग् रमणीया,प्राग् देशो रमणीयः, प्राङ् कालो रमणीय इति वाक्यत्रयेऽपि प्राग् रमणीयमित्येव उदाहरणत्रयं भवति, प्राग् रम्यं वा। एषु सर्वत्र धाप्रत्ययः, पश्चात् तस्य धाप्रत्ययस्य 'लुबञ्चेः' (७।२।१२३) इति सूत्रेण लोपः, ततः प्राची दिग् रमणीया=प्राग् रमणीयम्, अत्र 'ङ्यादेर्गौणस्याक्विप'० (२।४।९५) इत्यनेन ङीप्रत्ययस्य लुक् कार्यो, प्राग् इति सिद्धम्। एवं पञ्चमीसप्तम्योर्वाक्ये कृते। दिगुदाहरणेऽपि 'लुबञ्चेः' धालोपः, ङ्यादेर्गौणस्य'० इति ङीलोपः। धालोपस्तु सर्वत्र कार्यः। [3]प्राच्यां दिशि वसति, प्राचि देशे वसति, प्राचि काले वसति इति वाक्यानि, प्राग्वसति इति सर्वत्रोदाहरणं ज्ञेयम् ॥११३॥

## ऊर्ध्वाद् रि-रिष्टातावुपश्चास्य ॥७।२।११४॥

म० वृ०–ऊर्ध्वशब्दाद्दिग्देशकालेषु वर्त्तमानात् प्रथमापञ्चमीसप्तम्यन्तात् 'रि-रिष्टात्प्रत्ययौ' धापवादौ भवतः, ऊर्ध्वस्य उप इत्यादेशश्च। ऊर्ध्वा दिग् देशः कालो वा रम्यः=उपरि रम्यम्, उपरिष्टादागतः; उपरि वसति, उपरिष्टाद्वसति ॥११४॥

## पूर्वा-ऽवरा-ऽधरेभ्योऽसस्तातौ पुरवधश्चैषाम् ॥७।२।११५॥

म० वृ०–पूर्वा-ऽवरा ऽधरेभ्यः प्रत्येकं दिग्देशकालवृत्तिभ्यः प्रथमापञ्चमीसप्तम्यन्तेभ्यो'ऽस्, अस्तात्' स्याताम्, पूर्वा-वरा-धरशब्दानां यथासंख्यं पुर् अव् अध् इत्यादेशाश्च। [1]पुरो रम्यम, पुरस्ताद्रम्यम्; पुर आगतः, पुरस्तादागतः; पुरो वसति, पुरस्ताद्वसति[2]। एवमवः अवस्ताद्रम्यम्, अवः अवस्तादागतः, अवः अवस्ताद्वसति[3]। अधः अधस्तात् रम्यम्, आगतो वा वसति (वा) ॥११५॥

अव०–[1]पूर्वा दिग् रमणीया, पूर्वो देशो रम्यः, पूर्वः कालो रम्यः इति वाक्यत्रयेऽपि पुरो रम्यम्, पुरस्ताद्रम्यम्। [2]एवं पूर्वस्यां दिशि वसति इत्यादिवाक्यानि। [3]एवमवरा दिग् रम्या, अवरात् अवरस्माद्वा आगतः, अवरायां अवरस्यां (वा) दिशि वसति इति वाक्यानि ॥११५॥

## परा-ऽवरात्स्तात् ॥७।२।११६॥

म० वृ०–परा-ऽवराभ्यां दिग्देशकालवृत्तिभ्यां प्रथमापञ्चमीसप्तम्यन्ताभ्यां स्वार्थे 'स्तात्' स्यात्। [1]परस्ताद्रम्यम्, आगतो वा वसति वा। [2]अवरस्ताद्रम्यम्, आगतो वसति वा ॥११६॥

अव०–[1]परा दिग् रमणीया, 'सर्वादयोऽस्यादौ' (३।२।६१) इत्यनेन पुंवद्भावः। [2]एवमवरस्तात् (इति)अत्रापि ॥११६॥

## दक्षिणोत्तराच्चातस् ॥७।२।११७॥

म० वृ०–दक्षिण उत्तर इति शब्दाभ्यां चकारात् परावराभ्यां दिग्देशकालवृत्तिभ्यां प्रथमाद्यन्ताभ्यां स्वार्थे 'अतस्' स्यात्। [1]दक्षिणशब्दः काले न सम्भवतीति दिग्देशवृत्तिर्दक्षिणो ग्राह्यः। दक्षिणतो रम्यमागतो वसति वा। [2]उत्तरतो रम्यम् [उत्तरतः] आगतो [उत्तरतः] वसति वा। एवं परतो रम्यमागतो वसति। [3]अकारस्तसतसोर्भेदार्थः, तेन अतस्परतः 'क्वेहामात्र०' (६।३।१६) इत्यनेन त्यच् न भवति, परतो भवं=पारतमित्यणेव ॥११७॥

★ [ ] इति चिह्नान्तर्गतः पाठः मूलप्रतौ न विद्यते इति बृहद्वृत्तित उद्धृतः।

अव०–[1]दक्षिणशब्दः कालार्थे न सम्भवत्येव इति 'दक्षिणोत्तराच्चातस्' (७।२।११७) इति सूत्रे अग्रेतनसूत्रेषु वा यो दक्षिणशब्दः तत्र कालमुद्दिश्य वाक्यं न कार्यम्, दिशं देशं वा उद्दिश्य वाक्यं कार्यमित्यर्थः । दक्षिणा दिग् रमणीया=दक्षिणतो रम्यम् . दक्षिणशब्दोऽकारान्तः सर्वनामसंज्ञः, अत्र स दक्षिण इति ग्राह्यः, न दक्षिणा, 'सर्वादयोऽस्यादौ' ( ३।२।६१ ) इत्यनेन पुंवद्भावः । एवं स्त्रीलिङ्गानामुत्तर-परा ऽवरशब्दानामपि 'सर्वादयोऽस्यादौ ( ३।२।६२ )' इत्यनेन पुंवद्भावः । [2]उत्तरा दिग् . उत्तरो देशः, उत्तरः कालो रम्यः । एवं परावरशब्दयोरपि वाक्यानि । पञ्चमीसप्तमीवाक्यानि बुद्ध्या उपयुज्य कार्याणि। अवरशब्दात् 'पूर्वावराधरेभ्यो०' (७।२।११५ ) अस् अस्तात् ; 'परावरात्स्तात्' (७।२।११६) स्तात् .दक्षिणोत्तराच्चातस् (७।२।११७) अतस् ; इति प्रत्ययचतुष्टयं भवति । अवः, अवस्तात्, अवरस्तात् अवरत इति अवरशब्दस्य चातुरूप्यं सिद्धम् । [3]पूर्वोक्तसप्रत्ययात् अस्य अतस्प्रत्ययस्य भेदो विशेषो ज्ञायेत इत्येवमर्थम्, तेन अस्मात् अतस्प्रत्ययात् परतः 'क्वेहामात्रतसस्त्यच्' ( ६।३।१६) इत्यनेन त्यच् न भवति इति विशेषः ॥

## अधरा-ऽपराच्चात् ॥७।२।११८॥

म० वृ०–अधराऽपराभ्यां चकाराद्दक्षिणोत्तराभ्यां च दिगादिवृत्तिभ्यां प्रथमाद्यन्ताभ्यां [प्रथमा-पञ्चमीसप्तम्यन्ताभ्याम् ] 'आत्' स्यात् । [1]अधराद्रम्यम्, आगतो वसति । [2]पश्चाद्रम्यम्,पश्चादागतः, पश्चाद्वसति । [3]दक्षिणपश्चाद्रम्यम्, आगतो वसति । [4]दक्षिणात्,[5]उत्तरात् रम्यमागतो वसति ॥११८॥

---

अव०–[1]अधरा दिग् रम्या,'सर्वादयोऽस्यादौ' (३।२।६१) पुंवद्भावः। एवमधरशब्दस्य अधः,अधस्तात्, अधरात् इति त्रैरूप्यम् । [2]पश्चाद्रम्यं पश्चाद्रमणीयं वा इत्यादीनामित्थं सिद्धिः,–अपरशब्दः, आप्, अपरा इति शब्दः, अपरा दिग् रम्या– पश्चाद्रम्यं पश्चाद्रमणीयम्, अपरो देशः कालो वा रम्यः, 'अधरापराच्चात्' (७।२।११८) इत्यनेन आत् प्रत्ययः, 'पश्चोऽपरस्य दिक्पूर्वस्य चाति' (७ २ १२४) इत्यनेन पश्च इत्यादेशः, अपरशब्दस्य 'अवर्णेवर्णस्य' (७।४।६८) अलोपः, पश्चात् इति सिद्धम् । [3]तथा 'पश्चोऽपरस्य दिक्पूर्वे०' (७।२।१२४) इत्यनेन अपरस्य केवलस्य तदन्तस्यापि पश्चादेशविधानात् अपरशब्दात्तदन्तादपि 'अधरापराच्चात् '(७।२।११८ ) इति सूत्रेण आत्प्रत्ययो भवत्येव, अतो दक्षिणपश्चाद्रम्यमित्यादि उदाहरति वृत्तिकारः, दक्षिणा च सापरा च=दक्षिणापरा, दक्षिणापरा दिग् रम्या= दक्षिणपश्चाद्रम्यम्, एवं दक्षिणापरो देशो रम्यः इत्याद्यपि वाक्यम् । [4]दक्षिणा दिग् रम्या । [5]उत्तरा दिग् रम्या ॥११८॥

## वा दक्षिणात् प्रथमासप्तम्या आः ।७।२।११९।

म० वृ०–दक्षिणात् दिग्देशवृत्तेः प्रथमान्तात् सप्तम्यन्ताच्च 'आः' स्यात् वा । [1]दक्षिणा रम्यं वसति[2]वा । पक्षे अतसातौ,-दक्षिणतो रम्यम्, दक्षिणात् रम्यम्, दक्षिणाद्वसति । पञ्चम्यां सावकाशौ अतसातौ आकारो [आप्रत्ययः] बाधेत इति वाग्रहणम् ॥

---

अव०–[1]'दक्षिणा रम्यम्', दक्षिणा दिग् रम्या इति वाक्ये दक्षिणा रम्यम् । [2]दक्षिणदेशे वसति= दक्षिणा वसति ॥११९॥

## आही दूरे ॥७।२।१२०॥

म० वृ०–[1]दूरे दिशि देशे वा वर्त्तमानात् प्रथमासप्तम्यन्ताद्दक्षिणाद् 'आ आहि'इति [प्रत्ययौ] भवतः । ग्रामाद् दूरे दक्षिणा दिक् देशो वा रम्यम्=ग्रामाद्दक्षिणा रम्यम्, दक्षिणाहि रम्यं वसति वा ॥१२०॥

---

अव०–[1]दिक्शब्दा अवध्यपेक्षाः, तत्रावधेर्दूरे दिशि देशे वा इति सूत्रार्थो ज्ञातव्यः । 'आही दूरे' इति सूत्रे व्यावृत्तिरियम्– दूरे इति किम् ? दक्षिणतः दक्षिणात्, दक्षिणा रमणीयम् ; एषु आहिर्न भवति, पूर्वसूत्रैः अतस्, आत्, आ एते प्रत्यया भवन्ति ॥१२०॥

## वोत्तरात् ॥७।२।१२१॥

म० वृ०-उत्तरात् प्रथमासप्तम्यन्तात् 'आ आहि' वा भवतः। योगविभागाद् दूरे इति नानुवर्त्तते। उत्तरा, उत्तराहि रम्यं वसति वा; पक्षे अतसातौ,-उत्तरतः, उत्तरात् ॥१२१॥

## अदूरे एनः ॥७।२।१२२॥

म० वृ०-[1]वोत्तरादिति नानुवर्त्तते। दिक्शब्दाद्दिग्देशकालवृत्तेः प्रथमासप्तम्यन्तादवधेरदूरे[2] वर्त्तमानादेनः स्यात्। [3]पूर्वेणास्य रम्यं वसति वा, [4]अपरेण, दक्षिणेन, उत्तरेण, अधरेण। अदूर इति किम्? [5]पुरो रम्यं वसति वा। दिग्देशकालमात्रद्योत्ये ये सामान्यप्रत्यया [अस् अस्तात् इत्याद्याः] उक्ताः अदूरेऽपि सामान्यविवक्षायां ते भवन्त्येव, प्रकरणादेश्चादूरता गम्यते [6]इति नार्थो वाग्रहणेन ॥

प्रब०-[1]वोत्तरादिति नानुवर्त्तते, कुतः? द्वितीया षष्ठ्यावेनेनानञ्चेः'(२।२।११७) इत्यत्र अञ्चे र्वर्जनात्। [2]अदूरे=आसन्ने। [3] अस्मात् स्थानकात् ग्रामाद्वा पूर्वा अदूरा दिग् रमणीया इति वाक्यम्, पूर्वेणास्य रम्यम्, (इत्युदाहरणम्)। अस्य इत्यत्र 'द्वितीयाषष्ठ्यावेनेनानञ्चेः'(२।२।११७) इत्यनेन द्वितीयाषष्ठ्यौ- इसमस्य इति प्रयोगद्वयम्। एवमस्मात्पूर्वोऽदूरो देशो वा कालो वा रम्यः=पूर्वेणास्य रम्यम्, अस्मात् पूर्वस्मिन्नदूरे देशे काले वा वसति=पूर्वेणास्य वसति। [4]एवमपरदक्षिणोत्तराधरसम्बन्धीन्यपि वाक्यानि कार्याणि। [5]'पुरो रम्यम्' इत्यत्र पूर्वाशब्दः, पूर्वा दिग् रम्या=पुरो रम्यम्, पूर्वशब्दः, पूर्वो देशः कालो वा रम्यः, पूर्वस्यां दिशि वसति, 'पूर्वावराधरेभ्यो'० (७।२।११५) इत्यनेन अस् प्रत्ययः, पूर्वस्य पुर् आदेशः। [6]इति वाग्रहणेन नार्थः=न किमपि प्रयोजनम्, अतो वाधिकारो निषेधितः ॥१२२॥

## लुबञ्चेः ॥७।२।१२३॥

म० वृ०-अञ्चत्यन्तादिक्शब्दाद्दिग्देशकालेषु वर्त्तमानात् प्रथमापञ्चमीसप्तम्यन्तात् यौ 'धा-एनौ' विहितौ[1]तयो-'र्लुप्' स्यात्। [2]प्राग्रम्यम्, प्रागागतः, प्राग्वसति। प्रत्यक् [=प्रतीची], अवाक् [=दक्षिणा], उदक् [=उत्तरा] ॥१२३॥

प्रब०-[1]'दिक्शब्दाद्दिग्देश'० (७।२।११३) इत्यादिना धा, 'अदूरे एनः' (७।२।१२२) इति एनः, द्वयोरपि लुप्। [2]प्राच्शब्दः, स्त्री चेत् प्राची दिग् अदूरा दूरा वा रमणीया कालो वा रम्यः, 'दिक्शब्दाद्दिग्देशकालेषु प्रथमापञ्चमीसप्तम्याः' (७।२।११३) अनेन धाप्रत्ययो दूरे, अदूरेऽर्थे 'अदूरे एनः' (७।२।१२२) इत्यनेन एनः, द्वयोरपि लुप्, लुपि कृतायां 'ङ्यादेर्गौणस्य'० (२।४।९५) इत्यनेन ङीलोपश्च भवति, प्राक् इति सिद्धम् ॥१२३॥

## पश्चोऽपरस्य दिक्पूर्वस्य चाति ॥७।२।१२४॥

म० वृ०-अपरशब्दस्य केवलस्य दिक्पूर्वपदस्य च आति परे [1]'पश्च' इत्यादेशः [अकारान्तः] स्यात्। [2]पश्चाद्रम्यमागतो वसति वा। दिक्पूर्वात्-,[3]दक्षिणपश्चाद्रम्यमागतो वसति वा, [4] उत्तरपश्चाद्रम्यम् ॥

प्रब०- [1]'पश्च' इति अकारान्त एव आदेशः पश्चार्द्धमित्यादिसिद्धये। [2]अपरा दिक् देशः कालो वा रम्यः=पश्चात् (रम्यम्), एवं पञ्चम्यन्तसप्तम्यन्तवाक्यम्, 'अवरापराच्चात्'(७।२।११८) इत्यनेन आत्प्रत्ययः। [3]दक्षिणा चासावपरा च=दक्षिणापरा, दक्षिणापरा दिग् देशः कालो वा रम्यः। [4]एवमुत्तरा च साऽपरा च=उत्तरापरा दिग्देशः कालो वा (रम्यः) उत्तरपश्चाद्रम्यम् ॥१२४॥

## वोत्तरपदेऽर्द्धे ॥७।२।१२५॥

म० वृ०-अपरस्य केवलस्य दिक्पूर्वपदस्य च अर्द्धशब्दे उत्तरपदे 'पश्च' इत्यादेशो वा स्यात्। [1]पश्चार्द्धम्, अपरार्द्धम्, [2]दक्षिणपश्चार्द्धः, दक्षिणापरार्द्धः, [3]उत्तरपश्चार्द्धः, उत्तरापरार्द्धः ॥१२५॥

प्रब०-[1]अपरमर्द्धमिति वाक्यम्, पश्चार्द्धमुदाहरणम्, पक्षेऽपरार्द्धम्। [2]दक्षिणाऽपरस्या अर्द्धः=दक्षिणपश्चार्द्धः। [3]उत्तरापरस्या अर्द्धः=उत्तरपश्चार्द्धः।

'वोत्तरपदेऽर्धे' इति सूत्रान्ते इयं व्यावृत्तिः,– उत्तरपदे इति किम् ? अपरा अर्द्धे शोभते, असमासोऽयम्, समासे हि पूर्वपदमिदम् (उत्तरपदमिदम्) इति रचना ॥ १२५ ॥

## कृभ्वस्तिभ्यां[1] कर्मकर्तृभ्यां[2] प्रागतत्त्वे च्विः ॥७।२।१२६॥

म० वृ०–[1]द्विवचनं कर्मकर्तृभ्यां सह यथासंख्यार्थम् । [4]करोतिकर्मणः भ्वस्तिकर्तुश्च प्राक् पूर्वमतस्य तत्त्वेऽभूततद्भावे गम्यमाने कृभ्वस्तिभ्यां च योगे 'च्विः' स्यात् । [5]द्रव्यस्य[6]गुण-[7]क्रिया-[8]द्रव्यसम्बन्ध-[9]समूह-विकारयोगे[10]प्रागतत्त्वस्यमुदाहार्यम् । शुक्लीकरोति पटम्, शुक्लीक्रियते पटः, शुक्लीकरणम्, शुक्लीभवति पटः, शुक्लीभवनम्, शुक्लीस्यात् पटः । एवं कारकीकरोति चैत्रम्, कारकीभवति, कारकीस्यात् चैत्रः । दण्डीकरोति चैत्रः, दण्डीभवति, दण्डीस्याच्चैत्रः । सङ्घीकरोति गाः, सङ्घीभवन्ति, सङ्घीस्युर्गावः । घटीकरोति मृदम्, घटीभवति मृत्, घटीस्यान्मृत्[11] । कृभ्वस्तिभ्यामिति किम् ? अशुक्लः शुक्लः सम्पद्यते । प्रागतत्त्वे इति किम् ? शुक्लं करोति, शुक्लो भवति ॥१२६॥

---

अव०–[1]भूश्च अस्तिश्च=भ्वस्ति, कृ च भ्वस्ति च=कृभ्वस्तिनी,ताभ्यां कृभ्वस्तिभ्याम् । [2]तथा तस्य भावस्तत्त्वम्, न सः=असः, प्राग् पूर्वमसः=प्रागसः,'अव्ययं प्रवृद्धादिभिः'(३।१।४८) इति समासः,प्रागतस्य तत्त्वं=प्रागतत्त्वम, कोऽर्थः ?अभूततद्भावः,तस्मिन्। 'कृभ्वस्तिभ्यां प्रागतत्त्वे'इत्यधिकारो 'जातेः सम्पदा च' (७।२।१३१) इति सूत्रं यावत् प्रवर्त्तते । कृभ्वस्तीनां त्रयाणामधिकारो 'देये त्रा च'(७।२।१३३) इति सूत्रं यावत् प्रवृत्तोऽस्ति । कर्मकर्तृभ्यां प्रागतत्त्वे चेति द्वयं 'तत्राधीने' ( ७।२।१३२ ) इति यावत् । [3]अत्र यत् द्विवचनम् तत् कर्मकर्तृभ्यां सह यथासंख्यार्थम्, यथासंख्यं च सूत्रार्थे वृत्तिकार आह– ) करोतिकर्मण इत्यादि । [4]'करोति कर्मण' इत्याद्यक्षराणां भावार्थोऽयम्,– करोतिधातोर्येन कर्मपदं तस्मात् परतः च्विः प्रत्ययो भवतीति वाक्यसम्बन्धः, एवं भ्वस्तिधात्वोर्यत् कर्तृपदं तस्मात् परतः च्विर्भवति इति वाक्यसम्बन्धः कर्त्तव्यः । [5]द्रव्यस्य गुणक्रियेत्यादि यदुक्तं तत्र क्रमेणोदाहरणानि– [6]शुक्लीकरोति पटम्, प्रागऽशुक्लं सन्तं पटं शुक्लीकरोति चैत्रः इत्यर्थः, एवं शुक्लीक्रियते पटः इति उक्तकर्मणि, शुक्लीकरणमिति भावे, शुक्लीभवतीत्यस्यार्थोऽयम्– प्रागऽशुक्लः पटः इदानीं शुक्लीभवतीत्यर्थः, एवं शुक्लीभवनम्, शुक्लीस्यात्पटः, एषु गुणयोजना । [7]कारकीकरोति चैत्रम्, कारकीभवति, अत्र चैत्रस्य करणक्रियाव्यापारः । [8]दण्डीकरोति चैत्रम्, दण्डिन्शब्दः, अदण्डिनं दण्डिनं करोति=दण्डीकरोति, एवं दण्डीभवति, अत्र च्विप्रत्ययः, 'नाम्नो नोऽनह्नः' (२।१।९१) इति नलोपः, 'दीर्घश्च्वियङ्०' (४।३।१०८) इत्यादिना दीर्घः ईः, एषु दण्डलक्षणद्रव्यसंयोगः । एवं राजपुरुषी भवति चैत्रः, अयमपि सम्बन्धोदाहरणम् । [9]सङ्घीकरोति गाः, सङ्घीभवन्ति गावः, अत्र समूहः एकत्रीभावः । [10]घटीकरोति मृदम्, घटीभवति मृद् ; अत्र विकारयोगः । [11]एवं भस्मीकरोति काष्ठम्, भस्मीभवति काष्ठम्, पटीकरोति तन्तून्, पटीभवन्ति तन्तवः । सर्वोदाहरणेषु 'अप्रयोगीत्' (१।१।३७) इति सूत्रेण च्विलोपः । कथं समीपीभवति, दूरीभवति ? अत्रापि उपचारात् तत्स्थे द्रव्ये समीपादीनां कर्तृत्वं भावनीयम् । एषावचूरिः 'कृभ्वस्ति०' इति सूत्रप्रान्ते ज्ञातव्या ॥

## अरुर्मनश्चक्षुश्चेतोरहोरजसां लुक् च्वौ ॥७।२।१२७॥

म० वृ०–अरुस्, मनस्, चक्षुस्, चेतस्, रहस्, रजस् एषामन्तस्य 'लुक्' स्यात् च्वौ परे । [1]अरूकरोति,[2]अरूभवति, अरूस्यात् ; एवं [3]महारूकरोति, भवति, स्यात् ; [4]मनीकरोति, मनीभवति, मनीस्यात् ;[5]उन्मनीकरोति, उन्मनीभवति, स्यात् ;

चक्षूकरोति, भवति, स्यात्; [६]उच्चक्षूकरोति, उच्चक्षूभवति, स्यात्; चेतीकरोति, चेतीभवति, स्यात्; [७]विचेतीकरोति,भवति, स्यात्; रहीकरोति, रहीभवति, स्यात् [८];रजीकरोति,रजीभवति, रजीस्यात्; [९]विरजीकरोति, विरजीभवति, स्यात्। बहुवचनं तदन्तानामपि परिग्रहार्थम्, अन्यथा "ग्रहणवता (नाम्ना) न तदन्तविधिः" इत्युपतिष्ठेत ॥१२७॥

---

अव०–[१]अनरुः अरुः करोति=अरूकरोति। [२]अनरुः अरुर्भवति। [३]महदरुर्यस्य स महारुः, अमहारुषं महारुषं=करोति महारूकरोति। [४]तथा किञ्चिद्धर्मिणमपेक्षते, यथा शुक्लीकरोति पटम्, इति हेतोः अमनस्विनं (मनस्विनं) करोतीति वाक्यं साभिप्रायं कर्त्तव्यम्। [५]उद्गतं मनोऽस्य स उन्मनाः, अनुन्मनसमुन्मनसं करोति=उन्मनीकरोति। उद्गतं चक्षुर्यस्य, अनुच्चक्षुषमुच्चक्षुषं करोति। [७]विगतं विरुद्धं वा चेतोऽस्य विचेता, अविचेतसं विचेतसं करोति= विचेतीकरोति। [८](एवम्) विगतं रहोऽस्य,अविरहसं विरहसं करोति=विरहीकरोति। [९]विगतं रजोऽस्य, अविरजसं विरजसं करोति=विरजीकरोति॥१२७॥

## इसुसोर्बहुलम् ॥७।२।१२८॥

म० वृ०–इस् उस् इत्यन्तस्य बहुलं 'लुक्' स्यात्, च्वौ परे। सर्पीकरोति नवनीतम्, धनूभवति वंशः। [१]न च भवति,– धनुर्भवति। बहुलग्रहणं प्रयोगानुसरणार्थम् ॥१२८॥

---

अव०–[१]बहुलवशात् अन्तस्य लुक् न भवतीत्यर्थः ॥ १२८ ॥

## व्यञ्जनस्यान्त ईः ॥७।२।१२९॥

म० वृ०–व्यञ्जनान्तस्य बहुलम् 'ईकारोऽन्तो' भवति च्वौ। दृषदीभवति शिला [समिधि भवति काष्ठम्]। न च भवति,–दृषद्भवति ॥१२९॥

## व्याप्तौ स्सात् ॥७।२।१३०॥

म० वृ०–कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्त्वे इति वर्त्तते [अग्रे 'अधीने' इत्यभिनवार्थोपादानात्]। एतस्मिन्विषये 'सकारादिः सात्',[व्याप्तौ=] प्रागतत्त्वस्य चेद् व्याप्तिः सर्वात्मना द्रव्येणाभिसम्बन्धो गम्यते। द्विसकारपाठः षत्वनिषेधार्थः[१]। [२]अग्निसात् करोति काष्ठम्, [३]अग्निसाद् भवति, अग्निसात् स्यात्। [४]उदकसात् करोति लवणम्। [५]सत्यामपि वस्तुनि व्याप्तौ प्रागतत्त्वमात्रे च्विर्भवत्येव, नार्थो वावचनेन। अग्नीकरोति, अग्नीभवति, स्यात् काष्ठम्। उदकीकरोति, भवति, स्याद् लवणम्। व्याप्तिस्तु प्रकरणादेर्गम्यते ॥१३०॥

---

अव०–[१]"न स्सः" (२।३।६१) इति सूत्रे षत्वप्रतिषेध उक्तोऽस्ति। [२]सर्वं काष्ठं प्रागनग्निमग्निं करोति अग्निसात्करोति काष्ठं मैत्रः। [३]सर्वं काष्ठं प्रागनग्निरग्निर्भवति अग्निसाद् भवति। [४]सर्वं लवणं प्रागनुदकमुदकं करोति देवदत्तः। [५]व्याप्तौ सत्यां च्विरपि दृश्यते, यथा– अग्नीभवति काष्ठम्, उदकीकरोति, उदकीभवति लवणम् इति सात् वा भवति पक्षे च्वि इत्येवं कथं न व्याख्यानं कृतमिति पराशयः, सूरिराह– अग्नीकरोति काष्ठमित्यादौ काष्ठस्याग्निना सर्वथाऽव्यापनात् एकदेशेनैवाग्निसद्भावः, न सामस्त्येन, इति सम्पूर्णा व्याप्तिरिह नहि. इति वावचनेन 'सात् वा' इत्यनेन किं फलम् ॥१३०॥

## जातेः सम्पदा च ॥७।२।१३१॥

म० वृ०–कृभ्वस्तिभिः सम्पदा च योगे कृग्कर्मणः भ्वस्तिसम्पत्कर्तुश्च प्रागतत्त्वेन जातेः सामान्यस्य व्याप्तौ 'स्सात्' स्यात्। अस्यां सेनायां सर्वं शस्त्रमग्निसात्करोति दैवम्, अग्निसाद् भवति, अग्निसात् स्यात्। अस्यां सेनायां सर्वं शस्त्रमग्निसात् सम्पद्यते। वर्षासु सर्वं लवणमुदकसात् करोति मेघः, उदकसाद् भवति, उदकसात् सम्पद्यते[१]। चकार उत्तरत्रोभयोः [२]समुच्चयार्थः ॥१३१॥

---

अव०– [१]सम्पदा इति कोऽर्थः ? सम्पद्यते इति धातुप्रयोगे कर्तृपदात् स्सात् भवतीत्यर्थः।

[2]'जातेः सम्पदा च' इति सूत्रे सर्वोदाहरणानामग्रे इयमवचूरिः,–यथैव हि एकस्य द्रव्यस्य सर्वावयवाभिसम्बन्धे प्रागतत्तत्त्वेन व्याप्तिर्भवति तथा जातेः सामान्यस्यापि सर्वव्यक्तिसम्बन्धे प्रागतत्तत्त्वे व्याप्तिर्भवति । एवं च सूत्रे व्याप्ताविति सामान्योपादानात् कृभ्वस्तियोगे पूर्वेणैव स्सात् सिद्धः । सम्पद्यते इति प्रयोगार्थं तु 'जातेः सम्पदा च' इति वचनं कृतम् ॥ [3]'उभयोः', कोऽर्थः ? कृभ्वस्तिसम्पद्योः प्रवृत्त्यर्थम् ॥१३१॥

## तत्राधीने ॥७।२।१३२॥

म० वृ०–कृभ्वस्तिभ्यां सम्पदा चेत्यनुवर्त्तते । कर्मकर्तृभ्यां प्रागतत्तत्त्वे इति च निवृत्तम् । तत्रेति सप्तम्यन्तादधीने=आयत्तेऽर्थे कृभ्वस्तिसम्पद्भिर्योगे 'स्सात्' स्यात् । [1]राजसात् करोति, राजसाद्भवति, राजसात् स्यात् । [2]गुरुसात्करोति, गुरुसात्सम्पद्यते ॥१३२॥

---

अव०–[1]राजन्यधीनं राजायत्तं करोति, राजस्वामिकं करोतीत्यर्थः । [2]आचार्यस्वामिकमाचार्यायत्तं करोतीत्यर्थः ॥१३२॥

## देये त्रा च[1] ॥७।२।१३३॥

म० वृ०–तत्रेति सप्तम्यन्ताद् देयोपाधिकेऽधीनेऽर्थे कृभ्वस्तिसम्पद्भिर्योगे 'त्रा' स्यात् ।[2]देवत्रा करोति द्रव्यम्, देवत्रा भवति [ देवेऽधीनं देयं भवति ], देवत्रा स्यात्, देवत्रा सम्पद्यते । गुरुत्रा करोति [3]इत्यादि ॥१३३॥

---

अव०-[1]'देये त्रा च'(७।२।१३३) इत्यत्र चकारो न स्सात्प्रत्ययस्यानुकर्षणार्थः, तस्य स्सात्प्रत्ययस्याधीनतामात्रविवक्षायां पूर्वेणैव सिद्धत्वात्, किन्तु कृभ्वस्तिसम्पद्यते इत्येषामनुकर्षणार्थश्चकारोऽयम् । (अतः) 'देये त्रा च' (७।२।१३३) इति यावत् कृभ्वस्तिसम्पद्यते इत्यधिकारः । तेनोत्तरत्र कृभ्वस्तिसम्पद्यते इति नानुवर्त्तते इति भावः । [2]देवेऽधीनं देवायत्तं देयं दातव्यं द्रव्यं करोति इति वाक्यम्, देवत्रा करोति द्रव्यम् 'इत्युदाहरणम् । देवाय दातव्यमिदमिति बुद्ध्या यत् स्थापितं तदिदानीं देवाय ददातीत्यत्युदाहरणानामर्थः । [3](आदिशब्दात्) गुरुत्रा भवति, गुरुत्रा सम्पद्यते ॥१३३॥

## सप्तमी-द्वितीयाद्देवादिभ्यः ॥७।२।१३४॥

म० वृ०–सप्तम्यन्तेभ्यो द्वितीयान्तेभ्यश्च देवादिभ्यः 'त्रा' स्याद्वा स्वार्थे । देवेषु वसति=देवत्रा वसति, देवेषु भवति=देवत्रा भवति, देवत्रा स्यात् । देवान् करोति=देवत्रा करोति, देवान् गच्छति=देवत्रा गच्छति । एवं मनुष्यत्रा वसति इत्यादि[1] ॥१३४॥

---

अव०–[1]आदिशब्दात् मनुष्यत्रा गच्छति, पुरुषत्रा वसति, पुरुषत्रा गच्छति, पुरत्रा वसति, बहुत्रा वसति, बहुत्रा गच्छति । देवादयः शिष्टप्रयोगगम्याः ॥१३४॥

## तीय-शम्ब-बीजात् कृगा कृषौ डाच् ॥ ७।२।१३५ ॥

म० वृ०–तीयप्रत्ययान्तात् शम्बबीजाभ्यां च करोतिना योगे कृषिविषये 'डाच्'[1] स्यात् । [2]द्वितीयं वारं करोति क्षेत्रम्=द्वितीया करोति क्षेत्रम्, द्वितीयं वारं कृषतीत्यर्थः । [3]तृतीया करोति क्षेत्रम्, [4]शम्बा करोति क्षेत्रम्, अनुलोम कृष्टं [सरलं कृष्टं] पुनस्तिर्यक् कृषतीत्यर्थः । बीजा करोति क्षेत्रम्, उप्ते पश्चाद् बीजैः सह कृषतीत्यर्थः । कृगेति किम् ? द्वितीयं वारं कृषति । कृषाविति किम् ? द्वितीयं पटं करोति ॥१३५॥

---

अव०–[1]चकारो 'डाच्यादौ' (७।२।१४९) इत्यत्र विशेषणार्थः । [2]वाक्यमिदम् । [3]तृतीयं वारं करोति क्षेत्रम्, तृतीयं वारं कृषतीत्यर्थः । [4]शम्बशब्दस्तिर्यक्वाची, शम्बं करोति ॥१३५॥

## सङ्ख्यादेर्गुणात् ॥ ७।२।१३६ ॥

म०वृ०–[सङ्ख्या चासावादिश्च]सङ्ख्याया आद्यवय-

धात् परो यो गुणशब्दस्तदन्तात् कृग्योगे कृषिविषये 'डाच्' स्यात्। द्विगुणा करोति क्षेत्रम् [द्विगुणं कर्षणं करोति क्षेत्रस्य], त्रिगुणा करोति; क्षेत्रस्य द्विगुणं त्रिगुणं विलेखनं करोतीत्यर्थः ॥१३६॥

## समयाद् यापनायाम् ॥७।२।१३७॥

म० वृ०–समयशब्दात् यापनायां कालविलम्बे [कालक्षेपे] गम्यमाने कृगा योगे 'डाच्' स्यात्। [समयं करोति=] समया करोति, अद्य श्वो वा ते पटं दास्यामि इति कालक्षेपं करोतीत्यर्थः। यापनायामिति किम् ? समयं [सङ्केतं] करोति ॥१३७॥

## सपत्र-निष्पत्रादतिव्यथने ॥७।२।१३८॥

म०वृ०–सपत्रनिष्पत्राभ्यां कृगा योगेऽतिव्यथने=अतिपीडने गम्यमाने 'डाच्' स्यात्। [1]सपत्रा करोति मृगम्, शरमस्य मृगस्य शरीरे प्रवेशयतीत्यर्थः। [2]निष्पत्रा करोति, शरमस्य [मृगस्य] अपरपार्श्वेन निष्क्रमयतीत्यर्थः। सपत्रा करोति वृक्षं वायुः, निष्पत्रा करोति वृक्षं वायुः। अत्र पत्रशातनम् [पत्रपातनम्] एवातिव्यथनम्। सपत्रा करोतीत्यपि मङ्गलाभिप्रायेण वृक्षस्य निष्पत्राकरणमेवोच्यते। यथा दीपो नन्दतीति विध्वंसः सूच्यते। अतिव्यथनमिति किम् ? सपत्रं करोति वृक्षं जलसेकः, निष्पत्रं करोति वृक्षतलं भूमिशोधकः ॥१३८॥

---

अव०–[1]पत्रं शरो बाणः, सह*पत्रमनेनेति सपत्रः, सपत्रं करोति इति वाक्यम्, सपत्रा करोति मृगम् (इति) उदाहरणम्। [2]निर्गतं पत्रमस्मात् इति निष्पत्रः, निष्पत्रं करोति=निष्पत्रा करोति ॥१३८॥

## निष्कुलान्निष्कोषणे ॥७।२।१३९॥

म० वृ०–निष्कुलात् कृग्योगे निष्कोषणेऽर्थे 'डाच्' स्यात्। निष्कुला करोति दाडिमम् ॥१३९॥

---

अव०–निष्क्रान्तं कुलमवयवसङ्घातः कोऽर्थः ? दाडिमकुलिकादि अस्मात् फलादिति निष्कुलम्। तथा अन्तरवयवानां बहिर्निष्कासनं निष्कोषणमुच्यते। निष्कुलं करोति=निष्कुला करोति। निष्कोषणे इति किम् ? निष्कुलं करोति शत्रुम् ।१३९।

## प्रिय-सुखादानुकूल्ये ॥७।२।१४०॥

म० वृ०–प्रियसुखाभ्यां कृगा योगे आनुकूल्ये गम्यमाने 'डाच्' स्यात्। प्रिया करोति, सुखा करोति गुरुम्; गुरोरानुकूल्यं करोति, गुरुमाराधयतीत्यर्थः॥

---

अव०–आनुकूल्ये इति किम् ? प्रियं करोति सामवचनम्, सुखं करोति ओषधपानम्। सचेतनस्य धर्म आनुकूल्यम्, अत्राऽचेतनानामियं प्रकृतिः।१४०

## दुःखात् प्रातिकूल्ये ॥७।२।१४१॥

म० वृ०–दुःखात् प्रातिकूल्ये गम्ये कृग्योगे 'डाच्' स्यात्। [1]दुःखा करोति शत्रुम्, शत्रोः प्रतिकूलमाचरतीत्यर्थः। प्रातिकूल्य इति किम् ? दुःखं करोति रोगः ॥ १४१ ॥

## शूलात्पाके ॥७।२।१४२॥

म० वृ०–शूलात्पाके गम्यमाने कृगा योगे 'डाच्' स्यात्। [1]शूला करोति मांसम्, शूले पचतीत्यर्थः। पाक इति किम् ? [2]शूलं करोति कदन्नम् ।१४२।

---

अव०–[1]शूला करोति, अत्र पचत्यर्थो ज्ञातव्यः, धातूनामनेकार्थत्वात्। [2]कुत्सितमन्नं=कदन्नम्, कदन्नं कर्तृपदम्, 'कोः कत्तत्पुरुषे' (३।२।१३०) इति कत्।१४२

## सत्यादशपथे ॥७।२।१४३॥

म० वृ०–सत्यशब्दात् शपथादन्यत्र वर्त्तमानात् कृग्योगे 'डाच्' स्यात्। [1]सत्या करोति वणिग् भाण्डम्। अशपथ इति किम् ? [2]सत्यं करोति ॥ १४३ ॥

---

अव०–[1] कोऽर्थः ? सत्यंकारः कार्षापणादिद्रव्यस्य दानेन मयाऽवश्यमेव इयं वस्तु क्रेतव्यं गृहीतव्यमिति विक्रेतारं प्रत्याययति इत्यर्थः। [2]यदीदमेवं न भवति

---

* अयं विग्रहश्चिन्त्यः। "सह पत्रेण" इति विग्रहेण भाव्यम्।

मे इष्टं मा भूत् अनिष्टं वा भवतु इति शपथयन् (शपथयति?) शपथं वा करोतीत्यर्थः ॥१४३॥

## मद्र-भद्राद्वपने ॥७।२।१४४॥

म० वृ०–मद्रभद्राभ्यां वपने [मुण्डने कर्मणि] गम्यमाने कृग्योगे 'डाच्' स्यात् । [मद्रं वपनं करोति=], मद्रा करोति, [भद्रं वपनं करोति=] भद्रा करोति नापितः, शिशोर्माङ्गल्यं केशच्छेदनं करोतीत्यर्थः [बालकादीनां मङ्गलभूतं मुण्डनं करोतीत्यर्थः] । वपन इति किम् ? मद्रं करोति, भद्रं करोति साधुः । अत्र मद्रभद्रशब्दौ माङ्गल्यवचनौ ॥१४४॥

## [1]अव्यक्तानुकरणादनेकस्वरात् कृभ्वस्तिनानितौ द्विश्च ॥७।२।१४५॥

म० वृ०–अव्यक्तानुकरणादनेकस्वरादनितिपरात् [इतिवर्जितात्] कृ भू अस्ति इति धातुभिर्योगे 'डाच्' स्यात्, [2]द्विश्चास्य प्रकृतिः । पटत् करोति= [3]पटपटा करोति, पटपटा भवति, पटपटा स्यात्[4] ['वीप्सायाम्' (७।४।८०) इत्यनेन द्विर्वचनम्] । अव्यक्तानुकरणादिति किम् ? दृशत्करोति, अत्र व्यक्तवर्णमनुकार्यम् । अनेकस्वरादिति किम् ? खाट् करोति । कृभ्वस्तीति किम् ? पटज्जायते । अनितावित्ति किम् ? पटिति करोति ॥१४५॥

अव०–[1]व्यज्यते स्म=व्यक्तः, न व्यक्तः= अव्यक्तः, यस्मिन् ध्वनौ=शब्देऽकारादयो वर्णविशेषरूपेण नाभिव्यजन्ते=न सम्यग् ज्ञातुं शक्यन्ते सोऽव्यक्तः, तस्य अव्यक्तशब्दस्य अनुकरणमव्यक्तानुकरणम्, तस्मात् । [2]द्विश्चास्येति कोऽर्थः ? अव्यक्तानुकरणशब्दस्य प्रकृतेः पटत् इति शब्दस्य द्विः=द्विर्वचनं भवति, न डाच्सहितस्य प्रकृतेः पटा इति शब्दस्य । [3]'डाच्यादौ' (७।२।१४९) इति सूत्रेण अभ्यासे पूर्वपटत्शब्दस्य त् लुप्यते पटपटा करोति । [4]एवं दमदमा करोति, मसत्,–मसमसा करोति, खरटत्,–खरटखरटा करोति इत्यव्यक्तानुकरणशब्दानामुदाहरणावलीयम् । अव्यक्तवर्णस्यापि कथञ्चित् ध्वनिमात्रे सादृश्यादनुकरणमपि व्यक्तवर्णं भवति इत्यर्थः । अत्र व्यक्तवर्ण........... .......................अवचूरिरियम् (?) तदस्येदमनुकरणमिति न अव्यक्तवर्णस्यानुकरणम् (?) अव्ययत्वादमो लुप् । यदाह भोजः– अनुकरणं क्रियायोगे निपातसंज्ञमिति ॥१४५॥

## इतावतो लुक् ॥७।२।१४६॥

म० वृ०–अव्यक्तानुकरणस्यानेकस्वरस्य योऽत् इत्ययं शब्दस्तस्य इति शब्दे परे 'लुक्' स्यात् । पटत् इति=[1]पटिति, झटत् इति=झटिति । अव्यक्तानुकरणस्येत्येव– जगदिति, शरदिति । इताविति किम् ? पटदत्र । कथं घटदिति गम्भीरमम्बुदैर्नदितम्, चकदिति तडिताऽपि कृतमिति ? दकारान्तावेतौ द्रष्टव्यौ ॥१४६॥

अव०–[1]पटिति इत्यादिषु 'असिद्धं बहिरङ्गमन्तरङ्गे' इति न्यायवशात् लुकि सति टकारस्य तृतीयत्वं डकारो न भवति । एवं घटत् इति= घटिति ॥ १४६ ॥

## न द्वित्वे ॥७।२।१४७॥

म० वृ०–अव्यक्तानुकरणस्यानेकस्वरस्य द्वित्वे द्विर्वचने कृते इतिशब्दे परे 'अत् इत्यस्य लुग् न' स्यात् । [1]पटत्पटदिति, घटत्घटदिति[2] । द्वित्वे इति किम् ? पटिति । कथं चटचटदिति, धगद्धगिति, पटत्पटिति ; ? नात्र द्वित्वम्, अपि तु [चटचटत् इत्येवं] समुदायानुकरणमिति भवति ।१४७।

अव०–[1]'वीप्सायाम्' (७।४।८०) इत्यनेन द्विर्वचनम् । [2](एवम्) झटत्झटदिति ॥१४७॥

## तो वा ॥७।२।१४८॥

म० वृ०–अव्यक्तानुकरणस्यानेकस्वरस्य द्वित्वे सति योऽत् शब्दस्तस्य सम्बन्धिनस्तकारस्य इतौ परे 'लुग् वा' स्यात् । पटत्पटेति, पटत्पटदिति [एवं घटद्घटेति घटद्घटदिति करोति] ॥१४८॥

## डाच्यादौ ॥७।२।१४९॥

म० वृ०–अव्यक्तानुकरणस्यानेकस्वरस्य अत्-शब्दान्तस्य द्वित्वे सति आदौ पूर्वपदे योऽतः [ अत् इत्येवंरूपस्य ] तकारः तस्य [ तकारस्य ] डाचि परे 'लुक्' स्यात् । पटपटा करोति । आदाविति किम् ? पतपता करोति, अत्र डाचि अन्त्यस्वरादिलोपे मूलप्रकृतेस्तकारस्य लुग् न भवति ॥१४९॥

## बह्वल्पार्थात् कारकादिष्टानिष्टे प्शस् ॥७।२।१५०॥

म० वृ०–बह्वर्थात् अल्पार्थाच्च कारकवाचिनो नाम्नः 'प्शस् वा' स्यात्, यथासङ्ख्यमिष्टेऽ[1]निष्टे[2] च विषये । ग्रामे बहवो ददाति=बहुशो ददाति, बहु धनं ददाति=बहुशो धनं ददाति । बहुशो भुक्तमतिथिभिरित्यादि[3] [विवाहे बहुभिर्भुक्तमिति वाक्यम् ], एवं भूरिशः, प्रभूतशः, गणशः । अल्पार्थ,–[कर्तृकारके अल्प आयाति=अल्पश आयाति, [ कर्मणि कारके ] अल्पं धनं दत्ते=अल्पशो दत्ते, श्राद्धे अल्पैर्भुक्तम्=अल्पशो भुक्तमित्यादि[4] अपि; एवं स्तोकशः [कतिपयशः] । कारकादिति किम् ? बहूनां स्वामी । इष्टानिष्ट इति किम् ? बहु दत्ते श्राद्धे, अल्पं दत्ते प्राशित्रादौ । [5]पकारः पित्कार्यार्थः ॥१५०॥

प्रव०–[1]इष्टं प्राशित्रादि, प्रपूर्वः 'अशश् भोजने', प्राश्नातीति प्राशिता, तृच्, प्राशिता प्राप्तोऽस्य प्राशित्रम्, 'ऋत्वादिभ्योऽण्' (६।४।१२५), प्राशित्रं बोटनम्, बालकेन यत् प्रथमं भुज्यते तत् लोकरूढ्या बोटितमन्नं प्राशित्रं बोटनमुच्यते इति इष्टं प्राशित्रादि । [2]अनिष्टं श्राद्धादि । [3]आदिशब्दाच्चतुर्थीविभक्त्यादिवाक्यान्येवं ज्ञातव्यानि– बहुभ्योऽतिथिभ्यो ददाति=बहुशोऽतिथिभ्यो ददाति, बहुभ्यो ग्रामेभ्य आयाति=बहुशो ग्रामेभ्य आयाति, बहुषु ग्रामेषु जनेषु वा वसति=बहुशो ग्रामेषु जनेषु वसतीत्थं षट्कारकविषयता । [4](आदिशब्दात् ) अल्पेभ्यो ददाति=अल्प································( शो ददाति, अल्पेभ्य आगतम्=अल्पश आगतम्, अल्पेषु वसति=अल्पशो वसति) इति प्रयोगाः । बह्वल्पार्थादिति किम् ? गां ददाति । [5]"क्यङ्मानिपित्तद्धिते" ( ३।२।५० ) इत्यादौ ॥१५०॥

## संख्यैकार्थाद्वीप्सायां शस् ॥७।२।१५१॥

म० वृ०–सङ्ख्यावाचिन एकत्वविशिष्टाऽर्थवाचिनश्च कारकार्थान्नाम्नो वीप्सायां द्योत्यायां 'शस्' स्यात् वा[1] । वीप्सायां द्विर्वचनप्राप्तौ तदपवादोऽयं योगः । पक्षे द्वित्वमपि । एकैकं ददाति=एकशो[2] ददाति [ द्वौ द्वौ=द्विशः ] । द्वाभ्यां द्वाभ्यां दीयते=[3]द्विशः,त्रिशः,तावच्छः, कतिशः, गणशः[4] । एकार्थ,- माषं माषं देहि=माषशो देहि, एवं कार्षापणशः, पादशः, पलशः, प्रस्थशः, [5]तिलशः, [6]सङ्घशः, [7]वृन्दशः,[8]पङ्क्तिशः, [9]वनशः प्रविशति, [10]कूपीशः खनति, [11]कुम्भीशः, [12]कलशीशो दत्ते [13]क्रमश इत्यत्र क्रमवतां भेदात् क्रमेण क्रमेणेति वीप्सा भवति, ततः शस् । [14]तानेकैकशः पृच्छेत्, एकैकशोऽपि निघ्नन्ति, एकैकशो दत्ते इति वीप्सायां द्विरुक्तात् पूर्वेणाल्पार्थादिति शस् । [15]वीप्सित-वीप्सायां वाऽनेनैव शस्, एकैकमेकैकमिति पृच्छेदित्यर्थः । कारकादित्येव– द्वयोर्द्वयोः स्वामी [मासस्य मासम्येष्टे] ॥१५१॥

प्रव०–[1]'वाद्यात्' (६।१।११) इत्यतोऽयं वाधिकारः । उत्तरसूत्रेषु स एव वाऽधिकारो ज्ञातव्योऽनुक्तोऽपि । तेन वाधिकारबलात् पक्षे द्विर्वचनादिकमपि भवति इत्यर्थः । वाधिकारबलात् पक्षे द्विर्वचनमपि क्वापि क्वापि भवतीत्यर्थो व्याख्यायते । [2]एकैकं ददाति इति कर्तरि वाक्यम्, एकैकेन दीयते (इति) भावकर्मणि वाक्यम्, उभयत्रापि एकशो ददाति दीयते वा इति प्रयोगः । [3]एवं द्वौ द्वौ दत्तः,द्वाभ्यां द्वाभ्यां दीयते,द्विशः,त्रिश इत्यादयः प्रयोगा ज्ञातव्याः । [4]एतेऽपि प्रयोगाः संख्यावाचिनः । [5]तिलश इत्यादीनां तिले तिले प्रविशति तिलशः, एवं [6]सङ्घे सङ्घे [7]वृन्दे वृन्दे [8]पङ्क्तौ पङ्क्तौ (प्रविशतीत्यादिवाक्यप्रयोगाः ) । [9]वने वने प्रविशति=वनशः प्रविशति । [10]तथा कूपीं कूपीं खनति=कूपीशः (खनति) । [11]कुम्भीं कुम्भीं ददाति=कुम्भीशो

दद्राति । [१२]कलशीं कलशीं ददाति=कलशीशो ददाति । [१३]तथा 'क्रमश' इत्यत्र कथं शस् भवति ? वीप्साया अभावादिति पराशयः । यद्यपि दानादौ अनुज्येष्ठं प्रवर्त्तमाने एक एव क्रमो भवति, तथापि सम्प्रदानभूतानां दानयोग्यानां क्रमवतां भेदात् क्रमोऽप्यनेकरूपो भवति इति वीप्सा भवति । वीप्सायां सत्यां तु शस् प्राप्नोति । [१४]तानेकैकश इत्यादि, तान् पुरुषान् एकैकशः एकमेकं पृच्छेत् इत्यादिप्रयोगेषु वीप्सायामेकस्य द्विर्वचनं भवति, द्विर्वचने कृते पूर्वस्य एकमिति शब्दस्य 'प्लुप् चादावेकस्य स्यादेः' (७।४।८१) इति सूत्रेण द्विर्वचने आदिविभक्त्यम् लुप्यते । [१५]वीप्सितवीप्सायामिति कोऽर्थः ? एक वारमेकमेकं पृच्छेदित्यादिवाक्ये एकैकं निष्पन्नम् ,पुनर्वीप्सार्थे वाक्यम्– एकैकमेकैकमिति पृच्छेत्। यद्येवं वीप्सानन्तरं पुनर्वीप्सार्थे वाक्यं क्रियते तदा 'संख्यैकार्थात्' इत्यनेनैव शस् भवतीत्यर्थः ॥ १५१ ॥

## सङ्ख्यादेः पादादिभ्यो दानदण्डे चाकल् लुक् च ॥७।२।१५२॥

म० वृ०–[१]सङ्ख्यायाः प्रकृत्याद्यवयवात्परे ये पादादयस्तदन्तान्नाम्नो दाने दण्डे चकराद्वीप्साविषये च 'अकल्' [२] स्यात् , तद्योगे च प्रकृतेरन्तस्य लुक् । द्वौ पादौ ददाति=[३]द्विपदिकाम् (ददाति), त्रीन् पादान् ददाति=त्रिपदिकां ददाति । एवं दण्डे,-द्वौ पादौ दण्डितः=द्विपदिकां(दण्डितः), त्रिपदिकां दण्डितः । वीप्सायाम ,– द्वौ द्वौ पादौ भुङ्क्ते=द्विपदिकाम् ( भुङ्क्ते ), त्रिपदिकां भुङ्क्ते । पादादयःप्रयोगतोऽनुसर्त्तव्याः ॥१५२॥

अव०–[१]सङ्ख्या चासावादिश्च । [२]अकल् इत्यत्र लकारः स्त्रीत्वार्थः । [३]द्विपदिकां त्रिपदिकामित्याद्युदाहरणेषु सर्वत्र पादशब्दस्य अन्ताकारलोपे कृते 'यस्वरे पादः पदणिक्य'० (२।१।१०२) इत्यनेन पाद् इति शब्दस्य पद् इत्यादेशः कर्त्तव्यः । द्वे शते व्यवसृजतीति दानेऽर्थे वाक्यम् , द्वे शते दण्डित इति दण्डेऽर्थे, द्वे द्वे शते लभते भुङ्क्ते वा इति वीप्सायाम् , सर्वत्र द्विशतिकां त्रिशतिकां दत्ते दण्डितः भुङ्क्ते इति दाने दण्डे वीप्सार्थे यथासंख्यं प्रयोगाः । एवं द्विमोदकिकाम् , त्रिमोदकिकाम् इति प्रयोगौ ॥१५२॥

## तीयाट्टीकण् , न विद्या चेत् ॥७।२।१५३॥

म० वृ०–तीयान्तात्स्वार्थे [१]'टीकण्' स्यात् वा, तीयान्तश्चेद्विद्याविषयो न भवति । [३]द्वितीयम् =द्वैतीयीकम् , तृतीयम्=तार्त्तीयीकम् । [४]द्वैतीयीकी शाटी । न विद्या चेदिति किम् ? द्वितीया विद्या । [५]मुखतीयः [६]पार्श्वतीयः इति तीयस्यानर्थकत्वान्न टीकण् ॥१५३॥

अव०–[१]न विद्या चेत् इति प्रसज्यनञः प्रकटनार्थमेव एवं निर्देशः कृत इत्यर्थः । [२]टकार स्त्रीत्वार्थः । [३]द्वितीयमिति............................ ( वाक्यम् , द्वैतीयीकमि )त्युदाहरणम् । एवमग्रेऽपि । एवं [४]तार्त्तीयीकी शाटी । [५]मुखे=मुखतः, [६]पार्श्वे=पार्श्वतः ; 'आद्यादिभ्यः' (७।२।८४) इति तस् , मुखतो भवो=मुखतीयः; पार्श्वतो भवः=पार्श्वतीयः; 'गहादिभ्यः' (६।३।६३) इत्यनेन ईयः, 'प्रायोऽव्ययस्य' (७।४।६५) इत्यनेनान्त्यस्वरादिलोपः । अत्र 'तीय' इति रूपं गौणमिति न टीकण् ॥१५३॥

## निष्फले तिलात् पिञ्ज-पेजौ ॥७।२।१५४॥

म० वृ०–तिलात् निष्फले वर्त्तमानात् 'पिञ्ज-पेजौ' भवतः । निष्फलस्तिलः=तिलपिञ्जः, तिलपेजः ॥१५४॥

## प्रायोऽतोर्द्वयसट्-मात्रट् ॥७।२।१५५॥

म० वृ०–अतुप्रत्ययान्तात्स्वार्थे 'द्वयसट्मात्रटौ' भवतः प्रायः । यावदेव=यावद्द्वयसम् , यावन्मात्रम् ; तावदेव=तावद्द्वयसम् , तावन्मात्रम् ; [एतावदेव=] एतावद्द्वयसम् , एतावन्मात्रम् ,कियद्द्वयसम् , कियन्मात्रम् । [प्रायोग्रहणं प्रयोगानुसरणार्थम् ] ॥१५५॥

## वर्णा-ऽव्ययात्स्वरूपे कारः ॥७।२।१५६॥

म० वृ०-वर्णेभ्योऽव्ययेभ्यश्च स्वरूपार्थवृत्तिभ्यः स्वार्थे 'कारः' स्याद्वा । अकारः, ककारः । [ ककारादिष्वकारः उच्चारणार्थः ] अव्यय,-ओंकारः, स्वाहाकारः, हन्तकारः, [१]नमस्कारः, इतिकारः, एवंकारः, हुंकारः, पूत्कारः, [२]सीत्कारः । ननु यथा हुंकृतिः, पूत्कृतिः, सीत्कृतमिति भवन्ति तथा कारशब्देन घञन्तेन समासे ओंकारादयो भविष्यन्ति ? सत्यम्, किन्तु ओंकारमुच्चारयति, हुंकारं करोति इत्यादि न सिध्यति । स्वरूपे इति किम् ? अः विष्णुः, इः कामः, कः ब्रह्मा, खमाकाशम्, ओं ब्रह्म [ज्ञानम्], स्वाहा अग्नये [ स्वधा पितृभ्यः ] इत्यर्थपरतायां न भवति । प्रायोऽनुवृत्तेरन्यत्रापि भवति, मन एव=[३]मनस्कारः, अहमेवाहंकारः ॥१५६॥

अव०-[१]'नमस्कार' इत्यत्र 'भ्रातुष्पुत्रकस्कादयः' (२।३।१४) इत्यनेन रकारस्य सकारः, न तु 'प्रत्यये' ( २।३।६ ) इत्यनेन ; अव्ययत्वान्नमसृशब्दस्य, अनव्ययशब्दस्य हि 'प्रत्यये' ( २।३।६) इति सूत्रेण सः क्रियते । [२]शब्दार्णवे तालव्यः शकारः शीत्कार इति । [३]मनस्शब्दः स्वरादिगणे पाठादव्ययश्चित्ताभोगे वर्त्तते, चित्ताभिप्राय इत्यर्थः, 'भ्रातुष्पुत्रकस्कादयः' ( २।३।१४ ) इत्यनेन रकारस्य सकारः, मनसोऽव्ययत्वेऽप्यर्थस्वरूपत्वात् कारः प्रत्ययो न प्राप्नोति, प्रायोऽनुवर्त्तनबलादत्र कारः सिद्धः ।१५६।

## रादेफः ॥७।२।१५७॥

म० वृ०-रकारात 'एफः' स्यात् वा । रेफः ॥१५७॥

अव०-र एव=रेफः । प्रायोवचनात् र एव= रकार इत्यपि प्रयोगः ॥१५७॥

## नाम-रूप-भागाद्धेयः ॥७।२।१५८॥

म० वृ०-एभ्यः स्वार्थे 'धेयः' स्यात् । नामैव= नामधेयम्, रूपमेव=रूपधेयम्, भाग एव=भागधेयम् ॥१५८॥

## मर्त्तादिभ्यो यः ॥७।२।१५९॥

म० वृ०-मर्त्तादिभ्यः स्वार्थे 'यः' स्यात् । मर्त्त एव= मर्त्त्यः, सूर एव=सूर्यः, भाग एव=भाग्यम्[१] ॥१५९॥

अव०-[१][भाग्यम्] इत्यस्याग्रे क्षेम्यः, [यविष एव] यविष्यः, अपराध्यम्, रुच्यम्, लव्यम । मर्त्तादयः प्रयोगगम्याः ॥१५९॥

## नवादीन-तन-त्नं च नू चास्य ॥७।२।१६०॥

म० वृ०-नवशब्दात्स्वार्थे 'ईन, तन, त्न, चकाराद् यश्च' प्रत्यया भवन्ति वा, तद्योगे नवशब्दस्य नू इत्यादेशश्च । नवमेव=नवीनम्, नूतनम्, नूत्नम्, नव्यम् ॥१६०॥

## प्रात्पुराणे नश्च ॥७।२।१६१॥

म० वृ०-प्रात्पुराणेऽर्थे 'नः' स्यात्, चकारादीन-तन-त्नाश्च । [१]प्रणम्, प्रीणम्, प्रतनम्, प्रत्नम् ॥१६१॥

अव०-[१]प्रगतं कालेन इति वाक्यम ; प्रणम्, प्रीणम्, प्रत्नम्, प्रतनमिति उदाहरणानि । प्रशब्देन पुराणमुच्यते ॥१६१॥

## देवात्तल् ॥७।२।१६२॥

म० वृ०-देवात्स्वार्थे 'तल्' स्यात् वा । देव एव=देवता । [तल् इति लकारः स्त्र्यर्थः] ॥१६२॥

## होत्राया ईयः ॥७।२।१६३॥

म० वृ०-होत्राशब्दादीयः स्यात् [वा] । [ होत्रैव] होत्रीयम् ॥१६३॥

## भेषजादिभ्यष्ट्यण् ॥७।२।१६४॥

म० वृ०-भेषजादिभ्यः स्वार्थे 'ट्यण्' स्यात् वा । भेषजमेव=भैषज्यम्, [१]आनन्त्यम्, [२]ऐतिह्यम्, [३]चातुर्वर्ण्यम्, [४]चातुर्वैद्यम्, त्रैवैद्यम्, त्रैलोक्यम्, [५]षाड्गुण्यम्, [६]शैलीयमाचार्यस्य ॥१६४॥

अव०-[१]अनन्त एव=आनन्त्यम् । [२]इतिह इत्येव=ऐतिह्यम् । इतिह इति निपातसमुदायः उपदेशपारम्पर्ये वर्त्तते । [३]चत्वारः एव वर्णाः=चातुर्वर्ण्यम् । एवं चातुराश्रम्यम् । [४]चत्वारो वेदाः अथवा चतस्रो विद्याः=चातुर्वैद्यम्, एवं त्रैवैद्यम्; उभयत्र

अनुशतिकादित्वादुभयपदवृद्धिः । एकत्वम, ऐकभाव्यम् ,द्वित्वम् ,द्वैभाव्यम् ,त्रित्वम् ,त्रैभाव्यम् ,आन्यभाव्यम् , सार्ववैद्यम्, सार्वलौकम् ; अत्रापि अनुशतिकादित्वादुभयपदवृद्धिर्भवति । [5]षड्गुणा एव षाड्गुण्यम् । [6]शीलमेव शैल्यम् , 'अणञेये०' (२।४।२० ) इति ङी, 'व्यञ्जनात्तद्धितस्य' (२।४।८८) इति यकारो लुप्यते शैली इति सिद्धम् , शैली इयम् । भेषजादयः शिष्टप्रयोगगम्याः । भैषज्यानन्त्यावसथ्यैतिह्यशब्दा यदि स्त्रियां भवन्ति तदा अज्ञादिषु द्रष्टव्याः ॥१६४॥

## प्रज्ञादिभ्योऽण् ॥७।२।१६५॥

म० वृ०–प्रज्ञादिभ्यः स्वार्थे'ऽण्' स्यात् वा । [1]प्राज्ञः, प्राज्ञी ॥ १६५ ॥

---

अव०– प्रज्ञ, वणिज् , उशिज, प्रत्यक्ष, विद्वस् , विदन्त, द्विदत , षोडत् , विद्या, मनस् जुह्वत् , चिकीर्षन् , (चिकीर्षति) चिकीर्षित, वसु, मरुत् , सत्वस् , सत्वन्तु, सर्व, दशार्ह, कुञ्च, वयस् , रक्षस् , असुर, शत्रु, चोर, योध, चक्षुस् , पिशाच, अशनि, कर्षापण, देवता, बन्धु, अनुज्ञा, वर, (अनुषुक् ) चतुष्प्रास्य, रक्षोघ्न, वियात, विकृत, विकृति, व्याकृत, वरिवस्कृत, अग्रायण, अग्रहायण, सन्तपन , मधुप, द्विता , चण्डाल , गायत्री , उष्णिह , अनुष्टुब् , बृहती, पङ्क्ति, त्रिष्टुभ् , जगती इति । प्रज्ञादिराकृतिगणः । तेन आग्नीध्री आग्नीध्रा वा शाला, साधारणी साधारणा वा भूमिरित्यादि सिद्धम् । अग्निमीधे अग्नीध् , क्विप् , आग्नीध इदं गृहमाग्नीध्रम् ,'गृहेऽग्नीधो रण् धश्च' (७।३।१७४) इत्यनेन रण्प्रत्ययः तृतीयबाधनार्थं धादेशः च, (स्त्रीत्वविवक्षायाम् ) 'आत्'(२।४।१८) आप् , आग्नीध्रा एव=आग्नीध्री, 'प्रज्ञादिभ्योऽण्' (७२।१६५) ङी, सहाधारेण वर्त्तते=साधारः, साधारं करोति=साधारयति,'णिज्बहु०' ( ३।४।४२), साधारणः,'नन्द्यादिभ्योऽनः' (५।१।५२) इति अनः, साधारण एव'प्रज्ञादिभ्योऽण्',एवं (स्त्रीत्वविवक्षायाम्) ङी, आप् । [1]प्रजानातीति प्रज्ञः, 'उपसर्गादातो डोऽश्यः' (५।१।५६ ) इति डः, प्रज्ञ एव प्राज्ञः, स्त्री चेत् प्राज्ञी । प्रज्ञाऽस्या अस्तीति प्राज्ञा, 'प्रज्ञाश्रद्धार्चावृत्तेर्णः' (७ २।३३) इत्यनेन णः प्रत्ययः, तत आप् , प्राज्ञा कन्या इत्यपि प्रयोगः । वणिगेव= वाणिजः ॥ १६५ ॥

## श्रोत्रौषधि-कृष्णाच्छरीर-भेषज-मृगे ॥७।२।१६६॥

म० वृ०–श्रोत्रौषधिकृष्णेभ्यो यथासङ्ख्यं शरीरे भेषजे मृगेऽर्थे स्वार्थे–'ऽण्'स्यात् वा । [1]श्रौत्रं शरीरम् , श्रोत्रमन्यत् ; [2]औषधं भेषजम् , ओषधिरन्यत् ; [3]कार्ष्णो मृगः, ॥१६६॥

---

अव०–[1]श्रोत्रशब्दात् शरीरेऽर्थे श्रोत्रमेव श्रौत्रम् । [2]ओषधिशब्दात् भेषजेऽर्थेऽण् , ओषधिरेव औषधम् । [3]कृष्णात् मृगे कृष्ण एव कार्ष्णः मृगः, कालियारहरिण इत्यर्थः, कृष्ण एवान्यः ॥१६६॥

## कर्मणः सन्दिष्टे ॥७।२।१६७॥

म० वृ०–[1]सन्दिष्टेऽर्थे वर्त्तमानात् कर्मन्शब्दात्स्वार्थे–'ऽण्' स्यात् । [2]कार्मणं करोति, सन्दिष्टं कर्म करोतीत्यर्थः। वशीकरणमपि वृद्धपरम्परोपदेशात् क्रियते इति कार्मणमुच्यते । सत्यपि महावाधिकारे विशिष्टोऽर्थः प्रत्ययं विना न प्रतीयते इत्यस्मिन्[3] विषये नित्य एव प्रत्ययः ॥१६७॥

---

अव०–[1]अन्येन केनापि पुरुषेण अन्योऽन्यस्मै यदाह त्वयेदं कर्त्तव्यमिति तत् सन्दिष्टं कर्म उच्यते । [2]कर्मैव इति वाक्यम् , कार्मणमिति प्रयोगः । सन्दिष्ट इति किम् ? कर्म करोति । [3]'अस्मिन्', कोऽर्थः ? 'कर्मणः सन्दिष्टे' इति सूत्रोक्ताण्विषये ॥१६७॥

## वाच इकण् ॥७।२।१६८॥

म० वृ०–सन्दिष्टेऽर्थे [1]वाच्शब्दात् 'इकण्' स्यात् । [2]वागेव=वाचिकम् ,[3] सन्दिष्टं वाचं कथयतीत्यर्थः । अत्रापि पूर्ववन्नित्यो विधिः ॥१६८॥

अव०–[1]अन्येनान्योऽन्यस्मै यां वाचमाह (सा) सन्दिष्टा वाक् । [2]वागेव इति वाक्यम् । [3]वाचिकं कथयति । सन्दिष्टे इति किम् ? चित्रा वाक् चैत्रस्य ॥ १६८ ॥

## विनयादिभ्यः ॥७।२।१६९॥

म० वृ०–विनयादिभ्यः स्वार्थे 'इकण्' वा स्यात् । [1]वैनयिकम्, [2]सामयिकम् ॥१६९॥

---

अव०–[1]विनय एव=वैनयिकम् । [2]समय एव=सामयिकम् । विनय, समय, समाय, कथञ्चित्, अकस्मात्, उपचार, व्यवहार, समाचार, सम्प्रदाय, समुत्कर्ष, सङ्गति, सङ्ग्राम, समूह, विशेष, अव्यय, अत्यय, अनुगादिन् इति विनयादिराकृतिगणः । अवचूरिश्लोक-५०९, अक्षर-१६ अत्र सूत्रे ॥१६९॥

## उपायाद् ह्रस्वश्च ॥७।२।१७०॥

म० वृ०–उपायात् स्वार्थे 'इकण्' वा स्यात् । तद्योगे च ह्रस्वः । उपाय एव=औपयिकम् ॥१७०॥

## मृदस्तिकः ॥७।२।१७१॥

म० वृ०–मृद् इति शब्दात् 'तिको' वा स्यात् । मृदेव=मृत्तिका ॥१७१॥

## सस्नौ प्रशस्ते ॥७।२।१७२॥

म० वृ०–मृदः प्रशस्तेऽर्थे 'सस्नौ' भवतः वा । रूपापवादः ['त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) इति रूपप्रत्ययस्य बाधकोऽयं योगः] । प्रशस्ता मृद्=मृत्सा, मृत्स्ना । केचित्तु रूपमपीच्छन्ति,–प्रशस्ता मृद्=मृद्रूपा ॥१७२॥ ग्रन्थाग्र–३२१॥

॥ इति सप्तमाध्याये द्वितीयः पादः ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने सप्तमाध्यायस्य द्वितीयः पादः समाप्तः ॥



॥ अर्हम् ॥

# ॥ सप्तमोऽध्यायः ॥

## [ तृतीय पादः ]

★

### प्रकृते मयट् ॥७।३।१॥

म० वृ०–[प्राचुर्येण प्राधान्येन वा कृतं=प्रकृतम्, तस्मिन् ] प्रकृतेऽर्थे वर्त्तमानान्नाम्नः स्वार्थे 'मयट्' स्यात्। अन्नं प्रकृतम्=[1]अन्नमयम्, घृतमयम्, दधिमयम्। [ टकारो ङ्यर्थः– यवागूमयी ] [2]अतिवर्त्तन्तेऽपि स्वार्थिकाः प्रकृतिलिङ्गवचनानीति यवागूः प्रकृता=यवागूमयम्। एवमुत्तरत्रापि[3]– अपूपाः प्रकृताः=आपूपिकम्, [ 'कवचिहस्त्यचित्ताच्चेकण्' (६।२।१४) अपूपमयम्[4] ॥१॥

प्रब०–[1]'अन्नमयम्', कोऽर्थः ? अन्नं प्रचुरं प्रधानं वा इत्यर्थः। एवं घृतमयादि। [2]ननु यवाग्वर्थस्य स्त्रीत्वात् स्वार्थिकप्रत्ययस्यापि तत्रैव स्त्रियां वृत्तेः ततो यवागूमयमित्यत्र कथं नपुंसकत्वमित्याशङ्कयाह सूरिः– अतिवर्त्तन्तेऽपि स्वार्थिका इत्यादि, "प्रकृतेर्लिङ्गवचने बाधन्ते स्वार्थिकाः क्वचित्" इति (हैम)लिङ्गानुशासनपाठात्। [3]'तयोः समूह०' (७।३।३ ) इति सूत्रे। [4]'तयोः समूह०'(७।३।३) इत्यत्र चकारान्मयट्। एवं शाष्कुलिकम् ॥१॥

### अस्मिन् ॥७।३।२॥

म० वृ०–प्रकृतेऽर्थे नाम्नोऽस्मिन् सप्तम्यर्थे [वर्त्तमानात् ] 'मयट्' स्यात्। अन्नं प्रकृतमस्मिन्=अन्नमयं भोजनम्। [अपूपः प्रकृतोऽस्मिन् ] अपूपमयं पर्व [एवं वटकमयी यात्रा] ॥२॥

### तयोः समूहवच्च बहुषु ॥७।३।३॥

म० वृ०–तयोः प्रकृतेऽस्मिन्नित्येतयोर्विषययोर्बहुषु वर्त्तमानान्नाम्नः 'समूहवत्' प्रत्ययः स्यात्, चकारान्'मयट्'च। अपूपाः प्रकृताः=आपूपिकम् ['कवचि०' (६।२।१४) इति इकण् ],अपूपमयम्; मौदकिकम्,मोदकमयम्;धैनुकम्, [1]धेनुमयम्; [2]अपूपाः प्रकृताः अस्मिन्=आपूपिकम्,अपूपमयं पर्व;मौदकिकी, मोदकमयी पूजा; गणिकाः प्रकृता अस्यां=[3]गाणिक्या, गणिकामयी यात्रा ॥३॥

प्रब०–[1]धेनवः प्रकृताः=धैनुकम्, धेनुमयम्; 'धेनोरनञः' (६।२।१५) इति इकण्, ऋवर्णो० (७।४।७१ ) इति इकण इलोपः। [2]'अस्मिन्' इत्यर्थे वाक्यम्। [3]'गणिकाया ण्यः' (६।२।१७) इति ण्यः, आप् ॥३॥

### निन्द्ये पाशप् ॥७।३।४॥

म० वृ०–निन्द्येऽर्थे नाम्नः स्वार्थे 'पाशप्' स्यात्। [1]छान्दसपाशः। प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तकुत्सायामयम् [पाशप् ]इष्यते,तेनेह न पाशप्,– वैयाकरणश्चौरः, नह्यत्र चौर्येण वैयाकरणत्वं कुत्स्यते, किं तर्हि ? शीलम्। पकारः पुंवद्भावार्थः ['क्यङ्मानिपित्तद्धिते' ( ३।२।५० ) इत्यनेन पुंवद्भावः],- कुत्सिता कुमारी=कुमारपाशा ॥४॥

प्रब०–[1]छन्दो वेत्त्यधीते वा–'तद्वेत्त्यधीते' (६।२।११७) अण्, निन्द्यश्छान्दसः=छान्दसपाशः। एवं निन्द्यो वैयाकरणो=वैयाकरणपाशः। ननु कुमारपाशा इत्यत्र वयोवचनत्वात् पुनर्ङीः कथं न भवति ? आचार्यः प्राह– कुमार इत्यादयो हि शब्दा वयोवाचकाः, न कुमारपाशादयः। यत्रैव केवलवयोवाचित्वं तत्रैव ङीर्भवति, "गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः" इति न्यायात्। कुमारपाशादयस्तु शब्दा निन्दाविशिष्टवयोवाचकाः इति ङीर्न भवति ॥४॥

## प्रकृष्टे तमप् ॥७।३।५॥

म० वृ०–प्रकृष्टे प्रकर्षेऽर्थे वर्त्तमानान्नाम्नः'तमप्'स्यात् । प्रकर्षोऽतिशयः । स च गुणक्रिययोरेव, न जातिद्रव्ययोः[१] । [२]उत्तरत्र द्वयोः प्रकर्षे तरप्विधानादत्र[३] बहूनां प्रकर्षे [४]तमप्विधिः । सर्वे इमे शुक्लाः, अयमेषां प्रकृष्टः शुक्लः=शुक्लतमः, एवमाढ्यतमः, क्रियाकारकतमः, साधकतमः, प्रकृष्टतमः । [५]जातिद्रव्य–वचनेभ्योऽपि गुणक्रियाप्रकर्षविवक्षायां तमब् भवति,– गौरयं यः सुसन्नह्नः शकटं वहति–गोतमोऽयं यः सुलक्षणः शकटं सीरं [ हलम् ] च वहति, गोतमेयं या समां [६]समां विजायते [ =प्रसौति ] स्त्रीवत्सा[७] च । [८]द्रव्यान्तरसमवायिना च प्रकृष्टेन गुणेन प्रकृष्टे द्रव्ये [९]तद्वतः प्रत्ययो भवति,–अतिशयेन सूक्ष्माणि वस्त्राण्यस्य [ चैत्रस्य ]=सूक्ष्मवस्त्रतमः । प्रकर्षप्रत्ययान्ताच्च प्रकर्षस्यापि प्रकर्षविवक्षायां तमप् भवति, यथा–युधिष्ठिरः श्रेष्ठतमः[१०] [११]कुरूणाम् । ❀ [१२]तरबन्तात्तु तरप् पुनर्न स्यात् , अनभिधानात् । [१३]तथा यथा [१४]पूर्वपदातिशये पूर्वपदाद् बहुव्रीहेरातिशायिकः प्रत्ययो[१५] वा भवति,- सूक्ष्मतमवस्त्रः , सूक्ष्मवस्त्रतमो वा, न तथोत्तरपदातिशये सति बहुव्रीहेः [ प्रत्ययो भवति ]; बह्वाढ्यकतमः इति. किन्तूत्तरपदादेव,– बहव आढ्यतमा यत्र बह्वाढ्यतमकः । प्रकृष्टे इति किम् ? [१६]महत्सर्षपम् , महान् हिमवानिति । पकारः पुंवद्भावार्थः,– शुक्लतमा[१७] शाटी ॥५॥

प्रव०–[१]स्पर्द्धे प्रकर्षः, स द्वित्र्यादिनामेव भवति, जातिश्चैकैव, जात्यन्तरेणापि नासौ प्रकर्षः, नित्यव्यापकत्वाज्जातीनाम् ; नाप्यसौ प्रकर्षो द्रव्याणाम् , नहि सिंहः शौर्यादिविकलेन केवलस्वपिण्डमात्रेण गजैः सह स्पर्द्धते । गुणक्रिययोस्तु प्रकर्षः सम्भवति, द्रव्यरूपस्वाश्रयभेदेन एकैकशोऽप्यनेकविधत्वात् प्रकर्षस्य । '[२]द्वयोर्विभज्ये तरप्' (७।३।६) इति सूत्रे । [३]'प्रकृष्टे तमप्'सूत्रे । [४]'प्रकृष्टे तमप्' इति सूत्रेण तमप् भवतीत्यर्थः । [५]जातिवाचकशब्दात् द्रव्यवाचकशब्दाच्च परतोऽपि गुणक्रियाप्रकर्षस्य विवक्षायां तमप्प्रत्ययो भवति, यथा–गौरयमित्यादि, गौरयं यः सुसन्नह्नः शकटं वहति एतत्प्रयोगापेक्षया ज्ञातव्यम् । गोतमोऽयं यः सुलक्षणः शकटं सीरं च वहति, गोतमेयं या समां समां विजायते इति प्रयोगद्वय एव प्रकर्षार्थप्रतीतिः, ततो गोशब्दात्तमप् । [६]समां समां=वर्षं वर्षम् , अत्र 'कालाध्वभावदेशं०' ( २।२।२३ ) इत्यनेनाधारस्य कर्मत्वे द्वितीयान्तस्य समामित्यस्य वीप्सायां द्वित्वम् । [७]तथा स्त्री वत्सा यस्याः सा स्त्रीवत्सा । सवत्सेत्युक्ते तु सह वत्सेन वत्सया वा वर्त्तते इति संशयः स्यात् , अतः स्त्रीवत्सा इत्युक्तम् । [८]चैत्ररूपद्रव्यापेक्षया वस्त्रादि द्रव्यान्तरम् , तत्समवायिना=तत्संबद्धेन सूक्ष्मेत्यादिना । [९]'तद्वतः', कोऽर्थः ? प्रकृष्टगुणवद्द्रव्यवतश्चैत्रादेः, परमार्थतोऽस्यैव चैत्रादेः प्रकर्षः इत्यर्थः । [१०]सर्वे इमे प्रशस्याः,अयमेषामतिशयेन प्रशस्यः =श्रेष्ठः,'प्रशस्यस्य श्रः'(७।४।३४) इत्यनेन प्रशस्यस्थाने ' श्र ' इति आदेशः , ' गुणाङ्गाद्वेष्ठेयसू'(७।३।९) इति इष्ठप्रत्ययः, ततः परस्तमप् । [११]कुरोरपत्यानि–'दुनादि'० (६।१।११८) इति ञ्यः, 'बहुस्वस्त्रियाम्' (६।१।१२४) ञ्यलोपः । [१२]तरबन्तादिति उपलक्षणम् , तमप्प्रत्ययान्तशब्दादपि ★ पुनस्तमप् न भवतीत्यर्थः । [१३]'तथा', कोऽर्थः ? अनभिधानात् । [१४]भाविसमासापेक्षया सूक्ष्मस्य पूर्वपदत्वम् । [१५]तमादिकः । [१६]'महत्सर्षपम्' अत्रान्यापेक्षया प्रकृष्टत्वं नास्ति, बाहुलकादत्र नपुंसकत्वं भवति । तथा सर्षपापेक्षया हिमवतो महत्त्वात् महत्शब्दात् तरप् प्राप्नोति तर्हि उत्तरसूत्रे तरप्प्राप्तिविषयं वक्तुं युक्तम् ,अग्रेतनसूत्रे एव तरप्विधानात् ;सत्यम् , प्रकर्षप्रस्तावादत्रोक्तमिदमित्यदोषः । यदि बहूनां प्रकर्षे सति तमप् भवति तर्हि ग्रामपुरुषयोर्द्वयोः प्रकर्षे तमप् न प्राप्नोति इत्याह– प्रधानमयं ग्रामः,

❀ 'द्वयोः शुक्लतरयोर्मध्येऽयं प्रकृष्टः शुक्लतरः' इति विग्रहे सति ।

★ 'सर्वे इमे शुतमाः, तेषां मध्येऽयं प्रकृष्टः शुक्लतमः' इति विग्रहे सति ।

प्रधानतमोऽयं ग्रामेः, आढ्यं नगरम्, आढ्यतमोऽयं नगरे इति उदाहरणद्वयम्, सूरिराह उत्तरम्-एकस्मिन्नपि ग्रामे नगरे वा निर्दिष्टे समुदाये तदन्तर्गतावयवान्तरापेक्षया प्रकर्षे तमप् भविष्यति। अयं विशेषः 'प्रकृष्टे तमप्' (७।३।५)' इति सूत्रे ज्ञातव्यः। तथा अहिंसकः श्रेयान्, पापीयान् प्राणिनां हन्ता इत्यत्र श्रेयःपापीयसोर्विषमगुणत्वात् स्पर्द्धाभावे प्रकर्षाभावस्तत् कथं तरबर्थेयस् प्रत्ययः? सत्यम्, नैतयोः परस्परं स्पर्द्धा किं तर्हि? अन्यापेक्षा A स्पर्द्धाऽस्ति। A अन्यमहिंसकान्तरं पुरुषमपेक्षते=अन्यापेक्षा, 'शीलिकामि०' (५।१।७३) इति णः। अयमपि विशेषः। [१७]'क्यङ्मानिपि०' (३।२।५०) इत्यनेन पुंवद्भावः ॥५॥

## द्वयोर्विभज्ये च तरप् ॥७।३।६॥

म० वृ०-द्वयोस्तद्गुणयो[१]-रर्थयोर्मध्ये यः प्रकृष्टस्तस्मिन् प्रकृष्टे विभक्तव्ये च प्रकृष्टेऽर्थे वर्त्तमानान्नाम्नस्तरप्[२] स्यात्। तमोऽपवादः। द्वाविमौ पटू, अयमनयोः प्रकृष्टः पटुः=पटुतरः,[३] गोतरो यः शकटं सीरं [हलं] च वहति, गोतरा या समां समां [ वर्षे वर्षे] विजायते। प्रसौति] स्त्रीवत्सा च। विभज्ये च,-[४]साङ्काश्यकेभ्यः [४]पाटलिपुत्रका [५]आढ्यतराः, [७]अभिरूपतराः, [[८]सुकुमारतराः] । [९]साङ्काश्यकादिषु पाटलिपुत्रकादीनामप्रवेशाद्विभागः [ विभजनं पृथक्करणम्]। [१०]विभज्यस्य च विशेषणमप्याढ्याद्यर्थः [११]प्रकृष्टं विभज्यं भवति (इति) ततः ❀ प्रत्ययः। द्वयोर्विभज्ये चेति किम्? [१२]गवां कृष्णा [गौः] सम्पन्नक्षीरतमा ॥६॥

अव०-[१]स विवक्षितः समानो गुणो ययोः। [२]पकारः पुंवद्भावार्थः,-शुक्लतरा शाटी। [३]द्वयोर्मध्ये गुणोदाहरणम्,-पटुतरः पुमान्, पटुतरा स्त्री, इयं पट्वी इयं पट्वी, इयमनयोः प्रकृष्टा पट्वी=पटुतरा, 'क्यङ्मानिपित्तद्धिते' (३।२।५०) इति पुंवद्भावः। [४]सङ्काशेन निर्वृत्तः=साङ्काश्यः, 'सुपन्थ्यादेर्व्यः' (६।२।८४), साङ्काश्ये भवाः पुरुषाः=साङ्काश्यकाः, 'प्रस्थपुरवहान्त०' (६।३।४३) इति अकञ्। [४]पाटलिः पुत्रो यस्य सः पाटलिपुत्रः, पाटलिपुत्रे भवाः=पाटलिपुत्रकाः, 'रोपान्त्यात्' (६।३।४२) इति अकञ्। [५]द्वये इमे आढ्याः, एभ्यः अधे इमे प्रकृष्टा आढ्यतरा इति वाक्ये आढ्यात् परतो 'द्वयोर्विभज्ये च०' इति तरप्। एवं परिणा [७]अभिरूपतराः [८]सुकुमारतरा अनयोरपि वाक्यानि कार्याणि। साङ्काश्यकेभ्यः पाटलिपुत्रकेभ्यश्च माथुरा आढ्यतराः, अभिरूपतराः, सुकुमारतराः इत्यपि। [९]ननु प्राप्तिपूर्विकाऽप्राप्ति···· विभा )गः, यथा स्थाणुद्वयेनयोः, न चात्र साङ्काश्यकपाटलिपुत्रकाणां कदाचित् प्राप्तिरस्ति इत्याह- साङ्काश्यकादिष्वित्यादि। [१०]ननु इत्थं पुरुषाणामेव विभागे कथं तद्विशेषणस्याढ्यादेर्विभज्यत्वम्? अत्राह- विभज्यस्य चेति। [११]'प्रकृष्टम्' इति, यतः साङ्काश्यकाढ्यत्वात् पाटलिपुत्रकाढ्यत्वमतिशायि वर्त्तते, अतो विशेषणमपि तद्विभज्यं स्यादेव। [१२]'गवां कृष्णे'-त्यादि, अत्र द्वयोः प्रकर्षो नहि, गवां बाहुल्यात्। नापि विभागः, कृष्णगवीनामितरगवीषु अन्तर्भावेनाऽप्रवेशाभावात्, धर्मिणश्च कृष्णायाः गोरविभागेन धर्मस्य क्षीरसम्पन्नत्वस्यापि न विभागः ॥६॥

## क्वचित् ॥७।३।७॥

म० वृ०-क्वचित् [लक्ष्यानुसारेण] स्वार्थेऽपि 'तरप्' स्यात्। प्रकृष्टे सिद्ध एव। [१]अभिन्नमेव अभिन्नतरकम्, उच्चैस्तराम् ॥७॥

अव०-[१]अभिन्नतरमेव (अभिन्नतरकम्), 'यावादिभ्यः कः' (७।३।१५)। एवमुपपन्नतरकम् ॥७॥

## किन्त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याम् ॥७।३।८॥

म० वृ०-किंशब्दात्, त्याद्यन्तात्, एकारान्तात् अव्ययेभ्यश्च परयोस्तमप्तरपोरन्तस्य 'आम्' इत्यादेशः भवति, असत्त्वे=तौ तरप्तमबन्तौ यदि सत्त्वे द्रव्ये इदं तदिति परामर्शयोग्ये प्रकृष्टे न वर्त्तेते। इदमनयोरतिशयेन किं पचति=किंतराम्, इदमेषामतिशयेन किं पचति=किंतमां पचति।

❀ विशेषणादाढ्याद्यर्थात्

त्यादि,–पचतितराम्,[१] पचतितमाम्[२] । [३]अस्मादेव वचनात् त्याद्यन्तादपि द्व्यर्थप्रकर्षे तरप्, बह्वर्थप्रकर्षे तमप् भवति । एकारान्त,–[४]पूर्वाह्णेतराम्, पूर्वाह्णेतमां भुङ्क्ते; प्राह्णेतराम्,प्राह्णेतमाम्; [५]प्रगेतराम्,प्रगेतमाम्;[६]अग्रेतराम्, अग्रेतमाम् ;अव्यय,–[७]नितराम्, [८]सुतराम्, [९]अतितराम्, [१०]अतितमाम्. [११]नतराम्,उच्चैस्तराम् ['कचित्स्वार्थे' (७।३।७) तरप्'],उच्चैस्तमाम् । असत्त्वे इति किम ? किंतरंदारु, उच्चैस्तरः, उच्चैस्तमो वृक्षः; [१२]उत्तरः, [१३]उत्तमः।८।

---

अव०–[१]द्वाविमौ पचतः, अनयोर्मध्येऽयमतिशयेन पचति । [२]सर्वे इमे पचन्ति, एषां मध्येऽयमतिशयेन पचति=पचतितमाम् । [३]नामप्रस्तावात् 'त्यादेश्च प्रशस्ते०' (७।३।१०)इति वचनाच्च नाम्न एव प्राप्नुत इति पराशयः । [४]पूर्वाह्णे, अग्रे सप्तमीङि । [५]प्रगेशब्दा[६]-ऽग्रेशब्दावव्ययौ सप्तम्यन्तौ,अत्र 'कालात्तनतर'० (३।२।२४) इत्यनेन सप्तम्या अलुप् । द्वयोर्मध्ये प्रकृष्टे प्रगे अग्रे वा । एकारग्रहणसामर्थ्यात काले सत्त्वेऽपि आम् भवति, नान्यस्मिन् ,एदन्ताभावात् । अग्रेशब्दोऽपि कालवाची । अथवा विभक्त्यर्थो न द्रव्यम्, तत्प्रकर्षेऽत्र तरप्तमपौ भवतः । सु, कोऽर्थः ? शोभनो हेशब्दो यस्य स सुहेतरः, अत्र एकारान्तत्वे सत्यपि अनभिधानान् आम् न भवति । तथा जयतीति विच् प्रत्ययः, गुणः, जे इति क्रियाशब्दः, अत्र तरप्, अनभिधानादत्रापि क्रियाशब्दे आम् न भवति । एवमन्यत्रापि क्रियाशब्दे प्रायेण । [७]नितराम्, [८]सुतराम्, [९]अतितराम्; एषु 'कचित्स्वार्थे' (७।३।७) तरप् । [१०]बहूनां मध्ये प्रकृष्टमति=अतितमाम् । [११]'नतराम्', अत्र नञः परतः 'कचित्स्वार्थे' (७।३।७) तरप्, तत आम् । [१२]अनयोर्मध्ये [१३]एषां मध्ये वा अयं प्रकृष्ट उत्कृष्ट ऊर्ध्वो वा=उत्तरः, उत्तमः ॥८॥

## [१]गुणाङ्गाद्वेष्ठेयसू ॥७।३।९॥

म० वृ०–गुणप्रवृत्तिहेतोः [शब्दात्] परस्त[२]योस्तमप्तरयोर्विषये यथासङ्ख्यम् 'इष्ठ ईयसु' (इत्येतौ) प्रत्ययौ भवतः । पक्षे यथाप्राप्तं तमप्तरपौ च । तमबर्थे इष्ठो भवति । तरबर्थे ईयसुः । एषां मध्येऽयमतिशयेन पटुः=पटिष्ठः, पटुतमः ; लघिष्ठः, लघुतमः ; [३]गरिष्ठः [गुरुतमः] । अनयोर्मध्येऽयमतिशयेन पटुः=पटीयान्,पटुतरः; गरीयान्, गुरुतरः ; लघीयान्, लघुतरः ; [४]म्रदीयान्, मृदुतरः ; परुद् भवान् पटुरासीत् पटीयानैषमः- पटुतरः । गुणग्रहणं किम् ? गोतरः, गोतमः ; [जातिशब्दः] पाचकतमः, [क्रियाशब्दः] अत्र जातिक्रियाङ्गत्वान्न भवति । अङ्गग्रहणं किम् ? शुक्लतमं रूपम् । अत्र हि गुण एव प्रवृत्तिर्न तदुपसर्जने द्रव्ये[स गुण उपसर्जनं-गौणं यत्र द्रव्ये] इति न भवति । ईयसोरुकारः उदित्कार्यार्थः– पटीयसी[५] ॥९॥

---

अव–[१]गुणोऽङ्गं–प्रवृत्तिनिमित्तं यस्य स गुणाङ्गः, तस्मात् । यः शब्दो गुणमभिधाय द्रव्ये वर्त्तते स गुणाङ्गः । [२]तथा 'अर्थवशात् विभक्तिपरिणामः' इति न्यायात् पूर्वसूत्रे तयोरिति षष्ठ्यन्तमिह सूत्रेषु तयोरिति सप्तम्यन्तं व्याख्येयम्; तयोस्तमप्तरपोः प्राप्तौ सत्यामित्यर्थः । [३]'प्रियस्थिरस्फिरोरु०' (७।४।३८) इत्यादिना गुरुशब्दस्य गर् । एवं मृदु,–म्रदिष्ठः, मृदुतमः । [४]'पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः'(७।४।३९) इति ऋकारस्य रः । [५]'पटीयसी', अत्र उकारस्य उदित्त्वात् 'अधातूदृदितः' (२।४।२) इति ङीः, 'त्रन्त्यस्वरादेः' (७।४।४३) इति उलोपः।९।

## त्यादेश्च प्रशस्ते रूपप् ॥७।३।१०॥

म० वृ०–त्याद्यन्तान्नाम्नश्च प्रशस्तेऽर्थे 'रूपप्' स्यात् । प्रशस्तं पचति = पचतिरूपम्, प्रशस्तं पचतः= पचतोरूपम्, पचन्तिरूपम्; [प्रशस्तः पण्डितः]पण्डितरूपः । 'पः' पुंवद्भावार्थः, शोभनरूपा ॥१०॥

---

अव०–'त्यादेश्च'० इति सूत्रे विशेषोऽयम्–प्रकृतेः प्रवृत्तिनिमित्तस्य वैस्पष्ट्यम्=परिपूर्णता प्रशस्यत्वम् । तेनात्रापि भवति,–वृषलरूपोऽयमपि

★ पलाण्डुना—लसनेन सह सुरां पिबेत् ,दस्युरूपोऽयमपि अक्ष्णोरञ्जनं हरेत् । 'त्यादेश्च०' इत्यत्र सूत्रे पचतिरूपमित्यादिषु त्याद्यन्तानां क्रियाप्रधानत्वात् तस्याश्च क्रियायाः साध्यत्वेन लिङ्गसङ्ख्याभ्यामयोगात् रूपप्प्रत्ययान्तस्य औत्सर्गिकमेकवचनं नपुंसकलिङ्गं च भवति । नाम्नस्तु परतो रूपबन्तस्य पुंल्लिङ्गत्वं प्रायो भवति,क्वचित्तु क्लीबत्वमपि । पण्डितरूपः,एवं प्रशस्तो=वैयाकरणः=वैयाकरणरूपः, पटुतमरूपः,पटुतररूपः । पः पुंवद्भावार्थः,—अतिशयेन शोभना=शोभनरूपा, एवं दर्शनीयरूपा ॥१०॥

## अतमबादेरीषदसमाप्ते [१]कल्पप्-देश्यप्-देशीयर्

## ॥७।३।११॥

म० वृ०—त्यादेश्चेति वर्त्तते । सम्पूर्णता पदार्थानां [२]समाप्तिः, सा किञ्चिदूना ईषदसमाप्तिः । तद्विशिष्टेऽर्थे वर्त्तमानात्त्याद्यन्तात् नाम्नश्च तमबाद्यन्तवर्जितात् , 'कल्पप् देश्यप् ,[३]देशीयर्' भवन्ति । ईषदसमाप्तं पचति=पचतिकल्पम् , पचतिदेश्यम् , पचतिदेशीयम् । एवं [४]पचतःकल्पम् , [५]पचन्तिकल्पम् ,पक्ष्यतिकल्पम् , अपाक्षीत्कल्पम्[६] । [७]इदमेव त्यादिग्रहणं ज्ञापकं शेषस्तद्धितप्रत्ययो नाम्न एव भवति । ईषदसमाप्तः पटुः=पटुकल्पः, पटुदेश्यः [पटुदेशीयः]; कारककल्पः [कारकदेश्यः]; [ईषदसमाप्तं कृतम्=] कृतकल्पम् ,भुक्तदेश्यम् , ईषदसमाप्तो गुडो=गुडकल्पा द्राक्षा, गुडदेश्या [गुडदेशीया]; चन्द्रकल्पं मुखम् [एवं तैलकल्पा प्रसन्ना] । गुडादिधर्माणां माधुर्यादीनां द्राक्षादिष्वीषदसमाप्तत्वाद् गुडादित्वेनेषदसमाप्ता द्राक्षादय एवमुच्यन्ते । कल्पबाद्यन्तम् ( नाम ) उपमेये [८]वर्त्तमानमुपमेयलिङ्गसङ्ख्यम्[९] । बहुप्रत्ययपूर्वं तु प्रकृतिलिङ्गसङ्ख्यं भवति स्वभावात् । अतमबादेरिति किम् ? यदा प्रकर्षादिविशिष्टस्येषदसमाप्तिविवक्षा भवति तदा तमबादिभ्यः कल्पबादयः प्राप्नुवन्त्यतस्ते मा भूवन् । यदा त्वीषदसमाप्तस्य प्रकर्षादयो विवक्ष्यन्ते तदा कल्पबाद्यन्तेभ्यस्तमबादयो भवन्त्येव, यथा— पटुकल्पतरः, एवं पटुकल्परूपः[१०] ॥११॥

---

अव०—[१]'कल्पप् देश्यप्' इत्यत्र प् पुंवद्भावार्थः, तेन—दर्शनीयकल्पा, दर्शनीयदेश्या । [२]'समाप्तिरुच्यते इत्यर्थः । [३]'देशीयर्' इत्यत्र रकारो 'रिति' (३।२।५८) इत्यत्र विशेषणार्थः । ईषदसमाप्ता पञ्चमी=पञ्चमदेशीया, अत्र 'तद्धितः स्वरवृद्धि०' ( ३।२।५५) इत्यादिना पुंवद्भावो निषिद्धोऽपि 'रिति' (३।२।५८ ) इति सूत्रेण पुंवद्भावो भवति इत्यर्थः । [४]ईषदसमाप्तं पचतः = पचतःकल्पमित्यत्र 'प्रत्यये' ( २।३।६ ) इत्यनेन सकारो न भवति, अव्ययपर्युदासेन नाम्नो ग्रहणात् । [५]ईषदसमाप्तं पचन्ति । [६]त्याद्यन्तानां क्रियाप्रधानत्वात् तस्याः क्रियायाः साध्यत्वेन लिङ्गसङ्ख्याभ्यामयोगात् कल्पबादिप्रत्ययान्तस्य औत्सर्गिकमेकवचनं नपुंसकलिङ्गं च भवति इत्यक्षरबलात् पचतिकल्पम् पचतःकल्पमित्यादिषु एकवचनमेव नपुंसकत्वमेव ( च ) भवति । [७]नाम्नोऽनाम्नो वा परतस्तद्धितो भवतीति कुत्रापि न व्याख्यानमस्ति, अतो नाम्नस्त्यादेश्च तद्धितो भविष्यति; किं पूर्वत्र अत्र च सूत्रे त्यादिग्रहणेन ? इत्याह— इदमेवेत्यादि । [८]द्राक्षामुखाद्युपमेये वर्त्तमानम् । उपमेयस्य द्राक्षामुखादेर्लिङ्गसङ्ख्यां कल्पबाद्यन्तः शब्द आश्रयतीत्यर्थः । [९]उपमेयलिङ्गसङ्ख्यमित्यस्याग्रे— बहुप्रत्ययपूर्वं तु प्रकृतिलिङ्गसङ्ख्यं भवति स्वभावात् । शब्दशक्तिरेषा यदुत स्वार्थिकाः प्रत्ययाः केचित् प्रकृतिलिङ्गान्यतिवर्त्तन्ते=मुञ्चन्ति, यथा— Aकुटीरः, Bशुण्डारः, Cशमीरुः, Dशमीरः, Eदैवतम् , Fऔपयिकम् , Gऔषधम् , Hवाचिकम् । केचित्तु नातिवर्त्तन्ते=न मुञ्चन्ति,—यावकः, मणिकः,वृहतिका,मृत्तिका,गोणीतरी, व्याघ्रकोशी । Aह्रस्वा कुटी=कुटीरः, Bह्रस्वा शुण्डा=शुण्डारः ; 'कुटीशुण्डाद्रः' ( ७।३।४७ ) इति रः । C—Dह्रस्वा शमी-'शम्या रुरौ' (७।३।४८) इति

---

★"पलाण्डुः सुकन्दकः द्वे पलाण्डोः, 'कान्दा' इति प्रसिद्धस्य" इत्यमरकोशस्यामरविवेकाभिधवृत्तौ । 'पलाण्डुः कन्दविशेषः' इति हैमलिङ्गानुशासने, तदीयदुर्गपदप्रबोधवृत्तौ —'कन्दविशेष इति लोके 'डुंगली' इति प्रसिद्धिः" इति ।

रुः, रः । Eदेव एव=देवता,'देवात्तल्' (७।२।१६२), ततो देवतैव=दैवतम्, 'प्रज्ञादिभ्योऽण्'(७।२।१६५)। Fउपाय एव=औपयिकम्,'उपायाद् ह्रस्वश्च'(७।२।१७०) इकण्, ह्रस्वश्च। Gओषधिरेव-'श्रोत्रौषधि०' (७।२।१६६) इत्यण्। Hसन्दिष्टा वाक्=वाचिकम्, 'वाच इकण्' (७।२।१६८)। [१०]एवं पटुदेश्यतमः, पटुदेश्यतरः, पटुदेश्यरूपः ॥११॥

## नाम्नः प्राग्बहुर्वा ॥७।३।१२॥

म० वृ०-ईषदसमाप्तेऽर्थे वर्त्तमानान्नाम्नो 'बहुः' प्रत्ययो वा स्यात्, स च प्राक् पूर्वमेव [प्रकृतेः पूर्वमेव, प्रकृतेर्न परस्तात्]। ईषदसमाप्तः पटुः=बहुपटुः, बहुभुक्तम्, बहुपीतम्, [१]बहुगुडो द्राक्षा, बहुचन्द्रो मुखम्[२]। नामग्रहणं त्याद्यन्तनिवृत्त्यर्थम्[३]। त्याद्यन्तेषु सावकाशाः कल्पबादयो बहुना मा बाधिषत इति वावचनम्। तेन पक्षे तेऽपि भवन्ति ॥१२॥

अव०-[१]ईषदसमाप्तो गुडो=बहुगुडो द्राक्षा। [२]एवं बहुतैलं प्रसन्ना मदिरा। [३]त्यादिरित्यधिकारनिवृत्त्यर्थम् ॥१२॥

## न तमबादिः कपोऽच्छिन्नादिभ्यः ॥७।३।१३।

म० वृ०-छिन्नादीन् वर्जयित्वाऽन्यस्मान्नाम्नो यः कप् तदन्तात् [कप्प्रत्ययान्तात्] [१]'तमबादिर्न' भवति [किंतु वाक्यमेव]। एषां मध्येऽयं प्रकृष्टः पटुकः, अनयोर्मध्ये प्रकृष्टः पटुकः। [प्रकर्षादिमतः] कुत्सितादिविवक्षायां तमबाद्यन्तेभ्यः कप् भवत्येव,- एषां मध्येऽयमतिशयेन पटुः=पटुतमः,कुत्सितः पटुतमः= [२]पटुतमकः, [३]पटुरूपकः, पटुकल्पकः, ,पटुदेश्यकः। कप इति किम्? कुटीरतमः। अच्छिन्नादिभ्य इति किम्? कुत्सितोऽल्पोऽज्ञातो वा छन्नः= छिन्नकः, एषामयमतिशयेन छिन्नकः=छिन्नकतमः, छिन्नकतरः, छिन्नकरूपः, छिन्नककल्पः। [४]छिन्नादयः प्रयोगगम्याः ।१३।

अव०-[१]तमप्, तरप्, रूपप्, कल्पप्, देश्यप्,देशीयर् एते तमबादयः प्रत्ययाः। [२]'कुत्सितात्पाज्ञाते' (७।३।३३) इति कप्। (एवं) पटुतरकः। [३]प्रशस्तः पटुः-रूपप्, कुत्सितः पटुरूपः= पटुरूपकः। [४]छिन्नभिन्नादयः ॥१३॥

## अनत्यन्ते ॥७।३।१४॥

म० वृ०-[न अत्यन्तमनत्यन्तम्, तस्मिन्] अनत्यन्तेऽर्थे यः कप् तदन्तात् 'तमबादिर्न' स्यात्। छिन्नाद्यर्थं वचनम्। अनत्यन्तं छिन्नं [१]छिन्नकम्, भिन्नकम्, इदमेषां प्रकृष्टं छिन्नकम्, अनयोः प्रकृष्टं छिन्नकम्, भिन्नकम्। यदा तु प्रकर्षवतोऽनत्यन्तविशिष्टविवक्षा भवति तदा तमबाद्यन्तात् 'क्तात्तमबादेश्चानत्यन्ते' (७।३।५६) इति कप् भवत्येव,- [२]छिन्नतमकम्, छिन्नतरकम् ॥१४॥

अव०-[१]अनत्यन्तं छिन्नं छिन्नकमिति वाक्ये 'क्तात्तमबादेश्चानत्यन्ते (७।३।५६)' इत्यनेन कप्, तत इदमेषामित्यादि प्रत्ययकारणे वाक्यं ज्ञातव्यम्। [२]प्रथममिदमेषां प्रकृष्टं छिन्नं=छिन्नतमम् (इति) तमप्, पश्चात् अनत्यन्तं छिन्नतमं=छिन्नतमकम्। एवं छिन्नतरकम्, भिन्नतमकम्, भिन्नतरकम् ॥१४॥

## यावादिभ्यः कः ॥७।३।१५॥

म० वृ०-याव इत्यादिभ्यः स्वार्थे 'कः'प्रत्ययः स्यात्। याव एव=यावकः, [मणिरेव] मणिकः ॥१५॥

अव०-याव, मणि, अवि, अस्थि, लात्र, पात्र, पीत, स्तब्ध, ज्ञात, अज्ञात, पुण्य, नित्य, सत्वन्, दशार्ह, वयस्, चन्द्र, जानु, भूत, भिक्षु इति यावादिराकृतिगणः। तेन अभिन्नतरकं बहुतरकमित्यादि सिद्धम् ॥१५॥

## कुमारीक्रीडनेयसोः ॥७।३।१६॥

म० वृ०-कुमारीणां यानि क्रीडनानि तद्वाचिभ्य ईयसुप्रत्ययान्तेभ्यश्च, स्वार्थे 'कः' स्यात्। कन्दुरेव=कन्दुकः, उत्कण्ठकः इत्यादि[१]। ईयसु,- श्रेयानेव=श्रेयस्कः,[२] ज्यायस्कः[३] ॥१६॥

अव०—¹कन्दुकः दडओ, ※ उत्कण्ठकः, कुल्हडकः, गिरिकः=दडओ,★ समुद्गकः 卐 सडंडो, दोलैव दोलिका, हिण्डोलकः, भ्रमरकः, शृङ्गकम् इति आदिशब्दात् प्रयोगाः । ²अयं प्रशस्यः, अयमनयोर्मध्ये ( प्रकृष्टः ) प्रशस्य=श्रेयान्, 'गुणाङ्गा०' (७।३।९) इति ईयस्, 'प्रशस्यस्य श्रः' ( ७।४।३४ ) 'श्र' इत्यादेशः । ³वृद्धः, अनयोर्मध्ये प्रकृष्टो वृद्धः—ईयस्, 'वृद्धस्य च ज्यः' ( ७।४।३५ ) इत्यनेन वृद्धशब्दस्य 'ज्य' इत्यादेशः, 'ज्यायान्' (७।४।३६) इति सूत्रेण ईयस्प्रत्ययस्य ईकारस्य आकार आदेशः, ज्यायानेव=ज्यायस्कः ॥१६॥

## लोहितान्मणौ ॥७।३।१७॥

म० वृ०—लोहितात् मणौ वर्त्तमानात् स्वार्थे 'कः' स्यात् वा । ¹लोहितको मणिः । ²लिङ्गविशिष्टस्यापि ग्रहणात् ³लोहिन्येव, लोहिनिका मणिः, ⁴लोहितैव लोहितिका मणिः । वाधिकारात् [ महावाधिकारात् ] न भवत्यपि,-लोहितो मणिः ॥१७॥

अव०—¹सूत्रोदाहरणे लोहित इत्येव शब्दः, लोहित एव लोहितको मणिः । ²"लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहण"मिति न्यायात् लोहिनी लोहिता इति शब्दद्वयं गृह्यते, ततो लोहिनिका लोहितिका मणिः इति प्रयोगद्वयं सिद्धम् । ³रोहित इति शब्दो रक्तेऽर्थे वर्त्तते, रोहितः, लत्वे तु लोहितः, 'श्येतैतहरितभरतरोहिताद्वर्णात्तो नश्च' ( २।४।३६ ) इत्यनेन ङी वा भवति, यत्र ङी तत्र रोहिततकारस्य नकारः, लोहिनी इति शब्दो निष्पन्नः । ⁴पक्षे लोहिता,आप् । मणाविति किम् ? लोहिता गौः ॥१७॥

## रक्तानित्यवर्णयोः ॥७।३।१८॥

म० वृ०—रक्ते लाक्षादिद्रव्यान्तरेण वर्णान्तरमापादिते अनित्ये च वर्णे वर्त्तमानाल्लोहितात् 'को' वा स्यात् । रक्ते,-लोहित एव लोहितकः । अनित्यवर्णे,-लोहितकमक्ष्णो रूपं कोपेन, लोहितकमक्षि कोपेन¹ । वाधिकाराद् [ महावाधिकाराद् ] न भवत्यपि,-लोहिता लोहिनी वा कोपेन । अनित्यग्रहणं किम् ? लोहित इन्द्रगोपकः ॥१८॥

अव०—'रक्तानित्यवर्णयोः' इति सूत्रेऽपि पूर्वसूत्रवत् लिङ्गविशिष्टस्यापि ग्रहणात् A लोहिनिका शाटी, B लोहितिका पटी इति प्रयोगद्वयं ज्ञेयम् । A लोहिनिका इत्यत्र के कृते आपि कृते 'ङ्यादीदूतः के' ( २।४।१०४ ) इति ह्रस्व इकारः । B लोहितिका इत्यत्र तु 'इच्चापुंसोऽनित्०' ( २।४।१०७ ) इत्यनेन आकारस्य इकारः । ¹अत्रापि लोहिनिका, लोहितिका कन्या कोपेन इत्यपि प्रयोगद्वयं ज्ञातव्यम् । साधनिका पूर्ववत्कर्त्तव्याऽनयोः । ननु रक्ते वस्तुनि अनित्य एव वर्णो भवति, यथा हरिद्रादौ, तस्मात् अनित्यवर्णे एव प्रत्ययः सिध्यति, किमर्थं रक्तानित्यवर्णयोरित्यत्र रक्तग्रहणमित्याह— नित्योऽपि रक्तो वर्णोऽस्ति । नित्योऽपि इति कोऽर्थः ? यावदाश्रयः तावत्स्थायीत्यर्थः । अयं विशेषो 'रक्तानित्य०' इति सूत्रे बोद्धव्यः । तथा सत्येवाश्रयद्रव्ये अपयन् अपगच्छन् विनश्यन् इहानित्य उच्यते, अन्यथा रक्तग्रहणस्याऽऽनर्थक्यात् ॥१८॥

## कालात् ॥७।३।१९॥

म० वृ०—कालशब्दात्कज्जलादिना रक्ते अनित्यवर्णे चार्थे [वर्त्तमानात्] 'कः' स्यात् वा । रक्ते,-काल एव कालकः पटः, अनित्यवर्णे,— कालकं मुखं विषादेन [चिन्तया विलक्ष्येण वा ] । वाधिकारान्न भवत्यपि,—कालः पटः, कालं मुखम् ॥१९॥

## शीतोष्णादृतौ ॥७।३।२०॥

म० वृ०—शीतोष्णाभ्यामृतौ वर्त्तमानाभ्यां 'कः' स्याद्वा । [शीत एव=] शीतकः ऋतुः, [उष्ण एव= ] उष्णक ऋतुः । ऋताविति किम् ? शीतो वायुः, उष्णः स्पर्शः ॥२०॥

※ तदुक्तं श्रीहैमलिङ्गानुशासनस्य दुर्गपदप्रबोधाख्यवृत्तौ—"कन्दुक इति दडओ" । साम्प्रतं तु 'दडो' इति लोकभाषा ।

★ "गिरिरिति इह गिरिशब्देन 'दडओ' इत्युच्यते" इति हैमलिङ्गा० दुर्गपदप्रबोधवृत्तौ ।

卐 इदानीं 'दाबडो' इति लोकभाषा ।

## लून-वियातात् पशौ ॥७।३।२१॥

म० वृ०–लूनवियातशब्दाभ्यां पशौ वर्त्तमानाभ्यां स्वार्थे वा 'कः' स्यात्। [ लून एव= ] लूनकः, वियातकः पशुः। पशाविति किम् ? लूनो यवः, वियातो बटुः ॥२१॥

---

अव०–'लूनवियात०' इति सूत्रे केचित् विह्यानशब्दादपि कप्रत्ययमिच्छन्ति,–विगतं ह्यानं गमनं अस्य (इति विह्यानः, विह्यान एव= विह्यानकः पशुः, क्षीणरेता इत्यर्थः। अयं विशेषो ज्ञेयः ॥२१॥

## स्नाताद्वेदसमाप्तौ ॥७।३।२२॥

म० वृ०–स्नातशब्दाद्वेदसमाप्तौ गम्यमानायां 'कः' स्यात्। वेदं समाप्य स्नातः=स्नातकः। वेदसमाप्ताविति किम् ? तीर्थस्नातः ॥२२॥

## तनु-पुत्रा-ऽणु-बृहती-शून्यात् सूत्र-कृत्रिम-निपुणा-ऽऽच्छादन-रिक्ते ॥७।३।२३॥

म० वृ०–तनु,पुत्र, अणु, बृहती, शून्य एभ्यो यथासङ्ख्यं सूत्र,कृत्रिम,निपुण,आच्छादन,रिक्त इत्यर्थेषु स्वार्थे'कः'स्यात्। [१]तनु सुत्रम्=तनुकं भङ्गादिमयं कल्पादि च। [२]कृत्रिमः पुत्रः=पुत्रकः। कृत्रिम इति किम् ? औरसः[३]। [४]अणुकः। निपुण इति किम् ? अणुर्व्रीहिः। [५]बृहतिका आच्छादनविशेषः। आच्छादन इति किम् ? बृहती छन्दः, बृहती ओषधिः। [६]शून्य एव=शून्यकः। रिक्ते इति किम् ? शुने हितं=शून्यम् ॥२३॥

---

अव०–[१]तनुशब्दात्सूत्रेऽर्थे को भवतीति सर्वत्र सम्बन्धः कार्यः। तन्वेव=तनुकम्, भङ्गो धान्यभेदः, तदादिमयं भण( ? तृण )सूत्रादि अथवा कल्पव्यवहारनिशीथादि। सूत्रे इति किम् ? तनुर्वंशः। [२]पुत्रशब्दात्कृत्रिमेऽर्थे। तक्षादिव्यापारनिष्पादितो घटितरूपः कृत्रिमः पुत्रो ज्ञातव्यः। [३]उरसा कृतः=औरसः, 'उरसो याणौ' (६।३।१६९)। [४]अणुशब्दान्निपुणेऽर्थे। अणुरेव=अणुकम्,निपुणो निष्णातोऽणुः=अणुकः इत्थमेव वाक्यं कार्यम्। [५]बृहतीशब्दात् आच्छादनेऽर्थे। बृहतिका इत्यत्र 'ङ्यादीदूतः के' ( २।४।१०४ ) इति ह्रस्वः। बृहतिका इत्यत्र कप्रत्ययं विनाऽर्थानवगमात् [अर्थापरिज्ञानात् ] नित्य एव कप्रत्ययविधिः, न विकल्पेन। तथा सूत्राद्योऽर्थाः प्रत्ययमन्तरेण न प्रतीयन्ते इति तद्विषये तन्वादि( सर्व )शब्देभ्यो नित्य एव कप्रत्ययविधिः इति केचिदाहुः। एवं पूर्वसूत्रेऽपि ज्ञातव्यम्। [६]शून्यशब्दात् रिक्तेऽर्थे कः स्यात्। रिक्तः प्रज्ञासमृद्धिकलादिभिः, तस्मिन् रिक्ते। (शून्य इत्यत्र) 'शुनो वश्चोदूत्' (७।१।३३ ) इत्यनेन यः, वकारस्य ऊत् ॥२३॥

## भागेऽष्टमाञ्ञः ॥७।३।२४॥

म० वृ०–अष्टमशब्दाद्भागेंऽशे वर्त्तमानात् स्वार्थे 'ञो वा' स्यात्। अष्टम एव=आष्टमो भागः। भाग इति किम् ? अष्टमो जिनश्चन्द्रप्रभः ॥२४॥

## षष्ठात् ॥७।३।२५॥

म० वृ०–षष्ठाद्भागे स्वार्थे 'ञो वा' स्यात् [षष्ठ एव=] षाष्ठो भागः। भाग इति किम् ? षष्ठो जिनः पद्मप्रभः। [योगविभाग उत्तरार्थः] ॥२५॥

## माने कश्च ॥७।३।२६॥

म० वृ०–[१]माने भागेऽर्थे षष्ठात् 'कः चकारात् ञश्च' वा स्यात्। [षष्ठ एव=] षष्ठकः, षाष्ठो भागः मानं चेत्। मान इति किम् ? षाष्ठः[२] ।२६।

---

अव०–[१]मीयते येन तन्मानम्, तस्मिन् मानरूपे भागेऽर्थे षष्ठशब्दात 'कः ( चकाराद् ञश्च )' प्रत्ययः स्यात् इति सूत्रार्थो व्याख्येयः। [२]षष्ठ एव षाष्ठो भागोऽन्यः। इत्यु ( ? इति प्रत्यु )दाहरणं ज्ञेयम्, 'षष्ठात्' (७।३।२५) इति ञः ॥२६॥

## एकादाकिन् चासहाये ॥७।३।२७॥

म० वृ०–एकशब्दाद् [१]असहायार्थवाचिन'आकिन् चकारात् कश्च' स्यात्। एक एव=एकाकी, [ एक एव=]एककः। असहाय इति किम् ? एके ( अन्ये ) आचार्याः, [२]एको द्वौ बहवः ॥२७॥

---

अव०–[१]सह एतीति सहायः, 'तन्व्यधीण्०'

(५।१।६४) इति णप्रत्ययः। [२]'एको द्वौ बहव' इत्यत्र एकत्वसङ्ख्याया द्वित्वादिप्रतियोगिता एव Aविवक्षितास्ति, न त्वसहायता। B अत एव 'एको' इत्यस्याग्रे द्वौ बहव इति दर्शितम्। A प्रतियोगी प्रतिपक्षी। Bद्वित्वादिसङ्ख्याप्रतियोगिताज्ञापनाय ॥२७॥

## प्राग् नित्यात् कप् ॥७।३।२८॥

म० वृ०—नित्यशब्दसंकीर्त्तनात् [१]प्राग् येऽर्थास्तेषु द्योत्येषु कप्प्रत्ययोऽधिकृतो ज्ञेयः। अश्वकः [२]। पुं पुंवद्भावार्थः—[३]दारदिका। एके आचार्याः, एको द्वौ बहवः। प्राग् नित्यादित्यवध्यर्थम्। [४]अन्यथापवादबाधितो नोत्तरत्रानुवर्त्तेत, परतोऽपि अनुवर्त्तेत ॥२८॥

---

अव०—[१]अग्रतो वक्ष्यमाणं 'नित्यं ञ्ञिनोऽण्' (७।३।५८) इति सूत्रं यावदित्यर्थः। [२]कुत्सितोऽल्पोऽज्ञातो वा अश्वः। [३]दरद्, दरदां राज्ञी=दारदी. 'पुरुमगधकलिङ्ग०' (६।१।११६) इत्यण्, 'द्रेरञणोऽप्राच्य०' (६।१।१२३) स्त्रियामणो लुप्, पुनर्दरद् इति शब्दो जातः, कुत्सिता दरद् इति वाक्ये दारदिका, 'प्राग् नित्यात्कप्' (७।३।२८) इति कप्, 'क्यङ्मानिपित्तद्धिते' (३।२।५०) इत्यनेन अणलोपनिवृत्तिरूप एव पुंवद्भावः कल्पनीयः, तदनन्तरम् 'आत्' (२।४।१८) इत्यनेन आप्, 'अस्यायत्तत्०' (२।४।१११) इति इत्वम्। यदा त्वपत्येऽण् क्रियेत तदा 'गोत्रं च चरणैः सह' इति जातित्वे 'स्वाङ्गान्ङीर्जातिश्च०' (३।२।५६) इत्यनेन पुंवद्भावनिषेधः स्यात्। [४]अकादिभिरपवादसूत्रैः ॥२८॥

## त्यादिसर्वादेः स्वरेष्वन्त्यात्पूर्वोऽक् ॥७।३।२९॥

म० वृ०—त्याद्यन्तस्य सर्वादीनां च स्वरेषु=स्वराणां मध्ये योऽन्त्यः स्वरस्तस्मात् पूर्वोऽ'क्' स्यात्। प्राग् नित्यात्कपोऽपवादः। कुत्सितमल्पमज्ञातं वा पचति=पचतकि[१]। सर्वादि,- सर्वके, [विश्वके] सर्वकस्मै, [२]यकत्पिता, [३]त्वकत्पिता, [४]मकत्पिता, परमसर्वके, परमविश्वके। तदन्तस्यापि सर्वादित्वमस्तीत्यत्राप्यक् ॥२९॥

---

अव०—[१]एवं कुत्सितमल्पमज्ञातं वा (पचतः=) पचतकः, पचन्ति=पचन्तकि। [२]यदग्रे पितृ,यकश्चासौ पिता च अथवा कुत्सितादिविशिष्टस्य यस्य पिता=यकत्पिता, अथवा यकस्य पिता=यकत्पिता, 'त्यादिसर्वादे'रित्यनेन अक्। स्वरेष्वन्त्यादिति किम्? त्याद्यन्तात् सर्वादेश्च पूर्वमको मा भूत्। स्वरेष्वन्त्यात् इत्यस्य हि अभावे 'त्यादिसर्वादेः पूर्वोऽक्' इति सूत्रं भवेत्ततोऽयमेवार्थः स्यादित्यर्थः। पूर्व इति किम्? परो मा भूत्। [३]त्वकत्पिता [४] मकत्पिता इत्यत्र युष्मद्, अस्मद्; अग्रे पितृशब्दः, तवकः पिता=त्वकत्पिता, ममकः पिता=मकत्पिता, अथवा कुत्सितस्य तव पिता=त्वकत्पिता, कुत्सितादिविशिष्टस्य मम पिता=मकत्पिता। बहुव्रीहिवर्जोऽन्यः समासः कार्यः, बहुव्रीहौ तु 'ऋन्नित्यदितः' (७।३।१७१) इत्यनेन कच् स्यात्। 'त्वमौ प्रत्ययोत्तरपदे०' (२।१।११) इत्यनेन युष्मदस्मत्स्थाने [यथासंख्यं] त्व म इत्यादेशौ ॥२९॥

## युष्मदस्मदोऽसोभादिस्यादेः ॥७।३।३०॥

म० वृ०—युष्मद् अस्मद् इत्येतयोः सकाराद्योकारादिभकारादिवर्जितस्याद्यन्तयोः स्वरेष्वन्त्यात् पूर्वो-'ऽक्' स्यात्। युष्मदस्मदोः स्वरेष्वन्त्यात् पूर्वस्य [पूर्वसूत्रस्य] अपवादः। [१]त्वयका, [२]मयका; [३]त्वयकि, [मयकि] युष्माककम्, [अस्माककम्] [४]परमत्वयका। युष्मदस्मद इति किम्? तकया, यकया, सर्वकेण, [विश्वकेन] इमकेन, [अमुकेन, इमकैः] भवकन्तौ, [४] भवकन्तः। असोभादिस्यादेरिति किम्? युष्मकासु, [अस्मकासु] युवकयोः, [आवकयोः] युवकाभ्याम्, [आवकाभ्याम्] युष्मकाभिः [अस्मकाभिः] ॥३०॥

---

अव०—पूर्वं [१]त्वया [२]मया इति पदं प्रसाध्य ततः कुत्सितादिविशिष्टेन त्वया=त्वयका, कुत्सितादिविशिष्टेन मया=मयका इति वाक्ये कृते, 'युष्म-

दस्मदो०'इति सूत्रेण अक् टाविभक्तेः पूर्वम् । [3]एवं त्वयकीत्यादयपि साध्यम् । तथा [4]परमश्चासौ त्वं च परमत्वम्, एवं) परमश्चासावहं च परमाहम्, तेन परमत्वया, परममया; कुत्सितादिविशिष्टेन परमत्वया=परमत्वयका, एवं कुत्सितादिविशिष्टेन परममया=परममयका। अत्रापि प्राग्वत् तदन्तस्यापि सर्वादित्वमिति योजनीयम्, ततोऽक्। [5]"भवकन्तौ, भवकन्तः'; अत्र 'ऋदुदितः' (१।४।७०) इति नोऽन्तः। भवकन्तौ भवकन्त इत्युदाहरणाग्रे विशेषोऽयं ज्ञातव्यः,- केचित् भवत्शब्दस्यापि स्याद्यन्तस्यान्त्यस्वरादेः पूर्वमकमिच्छन्ति, तन्मते कुत्सितेन भवता=भवतका, कुत्सिताय भवते=भवतके कुत्सितात् भवतः=भवतकः, कुत्सिते भवति=भवतकि इत्यपि उदाहरणावली वृद्धसम्मताऽस्ति ।।३०।।

## अव्ययस्य को द् च ।।७।३।३१।।

म० वृ०-प्राग् नित्याद् येऽर्थास्तेषु द्योत्येष्वव्ययशब्दस्य स्वरेष्वन्त्यात् स्वरात् पूर्वमक्, तद्योगे यत्ककारान्तमव्ययं [अव्ययशब्दः] तस्य द् इत्यन्तादेशश्च स्यात्। कपोऽपवादः। कुत्सितमल्पमज्ञातं वा उच्चैरुच्चकैः, [नीचैस्] नीचकैः, धिक् धकिद्, पृथक् पृथकद्। चकारोऽन्वाचये, तेन सर्वस्याव्ययस्याक् स्यात्, [1]ककारान्तस्य तु अक् द् अन्तादेशश्च। योगविभागः[2]त्यादेःद् इत्यादेशाभावार्थः-[3] अशाशक्, अकि,-अशाशकक् ।।३१।।

---

अव०-[1]अक् द् द्वयमपि भवति।[2] 'त्यादे'रिति, त्यादेः सर्वादेश्च पूर्वसूत्रेण 'त्यादिसर्वादेः स्वरेष्वन्त्यात्'० (७।३।२९)इत्यनेनाक् भवत्येव। [3]'शक्लृ'-ट्शक्तौ' यङ्, द्वित्वम्, ततो यङो लुप्, ह्यस्तनीदिव्, 'व्यञ्जनाद् देः सश्च दः'(४।३।७८ इत्यनेन दिव् लुप्यते, अशाशक् इति सिद्धम्, अकि तु क्रियमाणे अशाशकक् इति भवति ।।३१।।

## तूष्णीकाम् ।।७।३।३२।।

म० वृ-तूष्णीमो मकारात्पूर्वं 'का' इत्यागमो निपात्यते। प्राग् नित्यादकोऽपवादः। तूष्णीकामास्ते तूष्णीकां तिष्ठति ।।३२।।

---

अव०-कुत्सितमल्पमज्ञातं वा तूष्णीम् ।।३२।।

## [1]कुत्सित-ऽल्पा[2]-ऽज्ञाते[3] ।।७।३।३३।।

म० वृ०-कुत्सिताल्पाज्ञातोपाधिकेऽर्थे यथायोगं कबादयः प्रत्यया भवन्ति। कुत्सितोऽल्पोऽज्ञातो वा अश्वोऽश्वकः,[4] खरकः, घृतकम्, तैलकम्। [5]पचतकि, भिन्धकि। सर्वके, विश्वके, [6]उच्चकैः, (नीचकैः) तूष्णीकाम्। कथं कुत्सितकः, अल्पकः, अज्ञातकः? कुत्सादीनां भेदोपपत्तेः[7]कुत्सादिशब्देभ्योऽपि कुत्सिताद्यर्थे प्रत्ययो भवति, प्रकृष्टतर इत्यादौ प्रकर्षभेदे तरबादिवत्। राधकः, पूर्णकः, शूद्रक इत्यादौ सत्यामपि संज्ञायां कुत्सायोगात् [8]कुत्सिते इत्येव कप्। व्याकरणकेन नाम त्वं गर्वितः [9]इत्यादावक्षेपणमपि [आक्रोशनमपि] कुत्सितमेव। [10]नह्यकुत्सितेनावक्षिप्यते ।।३३।।

---

अव०-कुत्सितया तया=तकया, कुत्सितया यया=यकया; सर्वत्र पूर्वेणाक्। [1]कुत्सितं निन्दितमुच्यते। [2]अल्पं महत्प्रतियोगि, महत्प्रतिपक्षमित्यर्थः। [3]अज्ञातं प्रकृत्युपात्तधर्मव्यतिरेकेण केनचिन्नरेण स्वकीयत्वेन धर्मेण अनिश्चितम्, सर्वथा त्वज्ञाते हि प्रयोगाऽयोगात्। [4]अश्वकः, खरकः, घृतकम्, तैलकम्; एषु चतुर्षु 'प्राग् नित्यात्कप्'(७।३।२८) इत्यनेन कप् भवति। [5]पचतकि, भिन्धकि, सर्वके, विश्वके; एषु चतुर्षु 'त्यादिसर्वादेः'० (७।३।२९) इत्यनेन अक्। [6]उच्चकैः (नीचकैः) द्वयोः 'अव्ययस्य को द् च' (७।३।३१) इति अक्। [7]कुत्सित, अल्प, अज्ञात इत्यादिनामप्रसिद्धकुत्सिताल्पाज्ञातगुणवाद-शब्देभ्यः। [8]कुत्सिते इत्येव इत्यस्यायम्भावः- अन्यैः कैश्चिद् "अज्ञाते कुत्सिते चैव, संज्ञायामनुकम्पने; तद्युक्तनीतावप्यल्पे, बाल्ये ह्रस्वे च कः स्मृतः ॥१॥ इत्युक्तं तदिह न वक्तव्यम्। कुत्सिते एवार्थे कप्, कुत्सायोगात्, न संज्ञार्थे।[9]व्याकरणं कुत्सनं वैया-

करणस्तु कुत्सित इति व्याकरणात् कथं कप् प्रत्यय इत्याशङ्कयाह–इत्याद्यवक्षेपणमपीत्यादि । [१०]अकुत्सितः=अनिन्दितः पुरुषो जनैर्न अवक्षिप्यते=न पराभूयते ॥ ३३ ॥

## अनुकम्पा-तद्युक्तनीत्योः ॥७।३।३४॥

म० वृ०–अनुकम्पायां तद्युक्तायां च नीतौ गम्यमानायां यथायोगं 'कवादयः' स्युः । पुत्रकः, [१]वत्सकः, बालकः, बुभुक्षितकः, शनकैः, स्वपितकि, [स्वपिषकि] जल्पतकि, एहकि, अनुकम्पमान एवं प्रयुङ्क्ते.–पुत्रक एहकि, उत्सङ्गके उपविश, कण्टकस्ते लग्नकः, [४]हन्त ते गुडकाः, [४]हन्त ते धानकाः [अद्धकि] । अत्र उपविश, असि, तिष्ठ, ओदनं भोक्ष्यसे (हन्त ते) एष्वनभिधानान्न भवति । [६]नक [७]त्वकं पुत्रक [८]पश्यसकि, असकौ [अक्] काकको [कच्] वृक्षके [कप्] उच्चकैः [अक्] [९]प्रणिलीयते; अत्राभिधानाद् भवति ॥३४॥

अव०–[१]अनुकम्पा कारुण्येन परस्यानुग्रह उच्यते । [२]तथा तयाऽनुकम्पया युक्ता नीतिः=तद्युक्तनीतिः । नीतिः सामदामभेददण्डानां प्रयोगः । तत्रानुकम्पायां सामदाने एव, न भेददण्डौ ; तयोर्भेददण्डयोरनुकम्पाया अप्रयोगात् इत्यक्षरार्थे अनुकम्पायां तद्युक्तायामित्यादिसूत्रार्थव्याख्यानं मन्तव्यम् । तथा अनुकम्पा तन्नीतिश्च प्रयोक्तृधर्मौ ज्ञातव्यौ । [३]अनुकम्पितो वत्सो=वत्सकः । एवमग्रेऽपि । अत्र कवन्तात् विभक्तिः । [४]हन्त ते गुडकाः, [४]हन्त ते धानकाः अद्धकि= भक्षय ; अद् धातु , पञ्चमीहि, 'हुधुटो हेर्धिः'(४।२। ८३) इति हिस्थाने धि ; अत्र उदाहरणद्वये गुडेन मिश्रा धाना इति विग्रहे 'ते लुग्वा' (३।२।१०८) इति सूत्रेण उत्तरपदलोपे गुडका इति प्रयोगः, पूर्वपदलोपे तु धानका इति प्रयोगः,धानागुडशब्दलोपे कृते 'अनुकम्पातद्युक्तनीत्योः' (७।३।३४)' इत्यनेन कप् भवति, धानका इत्यत्र तु धानाशब्दः, कपि सति 'इच्चापुंसोऽनित्०' (२।४।१०७) इत्यादिसूत्रेण ह्रस्वः, धानका इति सिद्धम् । [६]नक्शब्दः न इति लिख्यते, 'अव्ययस्य को द् च' (७।३।३१) इत्यनेनान्त्यस्वरात्पूर्वमक् । [७]'त्वकम्' इत्यत्र त्वम्, 'युष्मदस्मदोऽसोभा०' (७।३।३०) इत्यनेन अक् । [८]पश्यसि इत्यत्र 'त्यादिसर्वादेः०' (७।३।२९) इति अक्, पश्यसकि इति प्रयोगः । हे पुत्रक त्वकं=त्वम् नक पश्यसकि, न पश्यसीत्यर्थः । [९]'प्रणिलीयते' इत्यत्र 'अकखाद्यषान्ते पाठे वा' (२।३।८०) इत्यनेन णकारः ॥३४॥

## अजातेर्नॄनाम्नो बहुस्वरादियेकेलं वा ॥७।३।३५॥

म० वृ०–तद्युक्तनीताविति नानुवर्त्तते[१] । [२]मनुष्यनाम्नो बहुस्वरादनुकम्पायाम्[३] 'इयेकेला' भवन्ति वा, यदि मनुष्यनाम जातिशब्दो न भवति। अनुकम्पितो देवदत्तो=[४]देवियः, देविकः, देविलः । वाश्चनात् [५]कबपि,–देवदत्तकः , जिनदत्तकः । अजातेरिति किम् ? महिषकः, वराहकः, गर्दभकः । एते जातिशब्दा मनुष्यनामानि च । अजातेरिति प्रायिको निषेध इत्यन्ये,-[६]व्याघ्रिलः, [७]सिंहिलः । नृग्रहणं किम् ? [अनुकम्पितो देवदत्तः=]देवदत्तकः, देवदत्त इति नामा हस्ती कश्चित् ॥३५॥

अव०–[१]'नानुवर्त्तते' किमिति ? अनुकम्पायादेव प्रत्ययविधानात्, सूत्रे नृनाम्न इत्युक्ते सति नृनाम्न हि अनुकम्पैव घटते,न तन्नीतिः । [२]नृनाम्न इत्यस्यार्थः । [३]गम्यमानायाम् । [४]अनुकम्पितो देवदत्तो=देवियः, देविकः,देविलः ; एवमनुकम्पितो जिनदत्तो=जिनियः, जिनिकः, जिनिलः ; 'अजातेर्नॄनाम्नो०' इत्यनेन इयादिप्रत्यये कृते 'द्वितीयात्स्वरादूर्ध्वम्' (७।३।४१) इत्यनेन दत्त इति शब्दो लुप्यते । [५]'अनुकम्पातद्युक्त०' (७।३।३४) इत्यनेन कप् । [६]व्याघ्रिलः, [७]सिंहिल ; अत्र व्याघ्र सिंह इत्येवंविधा द्विस्वरैव प्रकृतिर्विज्ञेया, न तु व्याघ्रदत्त सिंहदत्त इत्यनेकस्वरा ; द्विस्वरयोरेव व्याघ्रसिंहयोरनयोर्जातिवाचित्वात् ॥३५॥

## वोपादेरडाकौ च ॥७।३।३६॥

म० वृ०–उपपूर्वादजातिरूपान्नृनाम्नो बहुस्व-

रादनुकम्पायाम् ' अडाकौ ' चकारात् ' इयेकेला ' वा भवन्ति। अनुकम्पित उपेन्द्रदत्तः=[१]उपडः,उपकः, उपियः, उपिकः, उपिलः । पक्षे कबपि– उपेन्द्रदत्तकः ॥३६॥

**अव०**–[१]उपपन्न इन्द्रदत्तः=उपेन्द्रदत्तः, ततोऽनुकम्पित उपेन्द्रदत्तः=उपडः, 'वोपादे०' इत्यनेन अडाकादिप्रत्ययाः, तदनन्तरम् 'आतोऽनेन्द्रवरुणस्य' ( ७।४।२९ ) इति ज्ञापकात् अकृतसन्धेरेव द्वितीयात्स्वरादूर्ध्वम्' ( ७।३।४१ ) इत्यनेन इन्द्रदत्त इति शब्दो लुप्यते ॥३६॥

## ऋवर्णोवर्णात्स्वरादेरादेर्लुक् प्रकृत्या च ॥७।३।३७॥

**म० वृ०**–ऋवर्णान्तात् उवर्णान्ताच्च परस्यानुकम्पायां विहितस्य स्वरादेस्तद्धितप्रत्ययस्यादेर्लुक् स्यात् । तच्च ऋवर्णोवर्णान्तं लुकि सति प्रकृत्या तिष्ठति, न विकारमापद्यते इत्यर्थः । [१]मातृयः,मातृकः, मातृलः ; [२]पितृयः, [३]वायुयः, वायुकः, वायुलः; [४]भानुयः, भानुकः, भानुलः । प्रकृतिभावाद्रेफा-[५] [६]वादेशौ न भवतः । ऋवर्णोवर्णादिति किम् ? [७]देवियः, अनुकम्पितो वागाशी=[८]वाचियः, वाचिकः,वाचिलः।आदेरिति किम् ? सर्वस्य मा भूत् ।३७।

**अव०**–[१]अनुकम्पितो मातृदत्तो=मातृयः, मातृकः, मातृलः । [२]अनुकम्पितः पितृदत्तः=पितृयः, पितृकः, पितृलः । [३]अनुकम्पितो वायुदत्तो=वायुय इत्यादि । [४]अनुकम्पितो भानुदत्तो=भानुयः । एषु सर्वत्र 'अजातेर्नृनाम्नो०' (७।३।३५) इत्यनेन इयादिप्रत्ययः, ततो 'द्वितीयात्स्वरा०'(७।३।४१) इत्यनेन दत्तशब्दस्य लोपः । [५]'ऋतो रस्तद्धिते' ( १।२।२६ ) इत्यनेन रेफप्राप्तिः । [६]'अस्वयंभुवोऽव्' ( ७।४।७० ) इति अवप्राप्तिः । [७]अनुकम्पितो देवदत्तः । [८]वाच् , आशिस् : आशासनमाशीः. 'क्रुन्सम्पदा०' (५।३।११४) क्विप् , 'आङः' ( ४।४।१२० ) इति इस् , वाचा आशीर्यत्र. अनुकम्पितो Aवागाशीः=वाचियः, 'षड्वर्जैकस्वरपूर्वपदस्य स्वरे' ( ७।३।४० ) इत्यनेन आशिस् लुप्यते । A'घुटस्तृतीयः' ( २।१।७६ ) इति गकारः ॥३७॥

## लुक्युत्तरपदस्य कप्न् ॥७।३।३८॥

**म० वृ०**–[१]नृनाम्नो यदुत्तरपदं तस्य 'ते लुग्वा' ( ३।२।१०८ ) इति लुकि सति ततः 'कप्न्' स्यात् , अनुकम्पायाम्[२] । कबादीनामपवादः । [३]देवकः । प् पुंवद्भावार्थः । न् इति 'इच्चापुंसोऽनि०' (२।४।१०७) इत्यत्र [४]पर्युदासार्थः,–अनुकम्पिता देवी=देवका, अत्र कप्नि सति पित्त्वात्पुंवद्भावे नित्त्वान् आप्परेऽपि ककारे न इत्वम् । उत्तरपदस्येति किम् ? [५]दत्तिका ॥३८॥

**अव०**–[१]मण्डकप्लुतिन्यायेनात्र 'नृनाम्न' इत्यनुवर्त्तते । [२]गम्यमानायाम् । [३]देवदत्त इति शब्दः, देवदत्तो=देवः, 'ते लुग्वा' ( ३।२।१०८ ) इत्यनेन उत्तरपदस्य दत्त इति शब्दस्य लोपः, तदनन्तरमनुकम्पितो देवो देवकः इति वाक्यं कृत्वा 'लुक्युत्तरपदस्य कप्न्' इत्यनेन कप्न् क्रियते । [४]परि-समन्तात् उदासः=पर्युदासः, कोऽर्थः ? निषेधार्थः । [५]देवदत्ता=दत्ता, 'ते लुग्वा' (३।२।१०८ ) इत्यनेन पूर्वपदस्य देव इति शब्दस्य लोपः, ततोऽनुकम्पिता दत्ता=दत्तिका, सूत्रे उत्तरपदलोपे कप्न् विहितः, अत्र तु पूर्वपदलोपः इति पूर्वसूत्रेण 'अनुकम्पातद्युक्त०' ( ७।३।३४ ) इत्यनेन कप् भवति, 'अस्यायत्तन्०' (२।४।१११) इति इत्वम् ॥३८॥

## लुक् चाजिनान्तात् ॥७।३।३९॥

**म० वृ०**–अजिनशब्दान्तान्नृनाम्नोऽनुकम्पायां [गम्यमानायां] 'कप्न्' तद्योगे उत्तरपदस्य 'लुक्' च स्यात् । [१]व्याघ्रकः, [२]सिंहकः, [३]कृष्णकः, [४]व्याघ्रका, [५]सिंहका ॥३९॥

**अव०**–[१]व्याघ्राजिनो व्याघ्रमहाजिनो वा नाम मनुष्यः, सोऽनुकम्पितो व्याघ्रकः । [२]सिंहकः। एवं शरभाजिनः, [३]कृष्णाजिन इत्यादि । शरभकः, कृष्णकः । तथा [४]अनुकम्पिता व्याघ्राजिना:, एवं [५]सिंहाजिना ,'लुक् चा०'इत्यनेन कप्न् , उत्तरपदस्य

लुक् च । 'आतो नेन्द्रवरुणस्य' ७।४।२९) इति ज्ञापकादकृतसन्धेरेवोत्तरपदस्य लोपविधिः ॥३९॥

## षड्वर्जैकस्वरपूर्वपदस्य स्वरे ॥७।३।४०॥

म० वृ०–षड्वर्जमेकस्वरं पूर्वपदं यस्य तत्सम्बन्धिन उत्तरपदस्यानुकम्पायां विहिते स्वरादौ प्रत्यये परे [1]'लुक्' स्यात् । [2]उत्तरसूत्रापवादः । [3]वाचियः, वाचिकः, वाचिलः । षड्वर्जेत्यादीति किम् ? [4]उपडः, उपकः, उपलः; [5]षडियः, षडिकः, षडिलः ॥४०॥

अव०–[1]उत्तरपदं लुप्यते इत्यर्थः । [2]'द्वितीयात् स्वरा०'(७।३।४१) इत्यस्य । [3]वाच्, आशिस्; अनुकम्पितो वागाशीः अथवा अनुकम्पितो वाग्दत्तो=वाचियः, 'अजातेर्नृनाम्न०' ( ७।३।३५ ) इयेकेलाः, ततः 'षड्वर्जैक०' इत्यनेन आशिस्दत्तयोर्लोपः । [4]उपेन्द्रेण दत्तः=उपेन्द्रदत्तः, उपेन्द्रदत्तोऽनुकम्पितः=उपडः, उपकः, उपलः ; एषु 'द्वितीयात् स्वरा०' (७।३।४१) इत्यनेन लुप् । [5]षड् अङ्गुलयो यस्य, अनुकम्पितः षडङ्गुलिः । अत्राप्युत्तरेण लुप् । (अथ विस्तरेण-) षडिय इत्यादौ षष्, अङ्गुलि; षडङ्गुलयो यस्य स षडङ्गुलिः,'धुटस्तृतीयः'(२।१।७६) इति ड् ; अनुकम्पितः षडङ्गुलिः=षडियः, अत्रोत्तरेण 'द्वितीयात्स्वरा०' ( ७।३।४१ ) इत्यनेन सूत्रेण 'ङ्गुलि' इत्यक्षरद्वयं लुप्यते, तथा च अवर्णेवर्णस्य' ( ७।४।६८ ) इति षड् इति शब्दस्य अकारलोपस्य 'स्वरस्य परे प्राग्विधौ ( ७।४।११० ) इति न्यायात् स्थानिवद्भावात् पदत्वस्याऽनिवृत्तेस्तृतीयत्वं डकारो न निवर्त्तते । तथा षड्वर्जनादेव च पदत्वे सन्धिविधावपि अकारलुकः स्थानित्वनिषेधो न भवतीत्यर्थः ॥४०॥

## द्वितीयात्स्वरादूर्ध्वम्[1] ॥७।३।४१॥

म० वृ०–अनुकम्पायां कृते स्वरादौ प्रत्यये परे प्रकृतेर्द्वितीयात्स्वरादूर्ध्वं शब्दरूपस्य लुक् स्यात् अनुकम्पित उपेन्द्रदत्तः=[2]उपडः [ अड ], उपकः [अकः ], उपियः [इय ], उपिकः [इकः ], उपिलः [इलः], [3]पितृयः, वायुयः ॥४१॥

अव०–[1]ऊर्ध्वग्रहणं सर्वलोपार्थम् । [2]उपड इत्यादिषु उप, इन्द्रदत्त ; अनुकम्पित उपेन्द्रदत्त इति वाक्ये अडाकादिप्रत्ययेषु सर्वेषु अकृतसन्धेरेव इन्द्रदत्तस्य 'द्वितीयात्स्वरा०' इत्यनेन लुक् क्रियते, एवं हि कृते 'सन्ध्यक्षरात्तेन' (७।३।४२) इत्यस्य अप्राप्तिः, 'अवर्णेवर्णस्य' (७।४।६८) इति अकारलोपः, 'स्वरस्य परे प्राग्विधौ' ( ७।४।११० ) इति न्यायादकारलोपस्थानिवद्भावात् पकारस्य न तृतीयत्वम् । [3]अनुकम्पितः पितृदत्तः, 'ऋवर्णोवर्णा०' ( ७।३।३७ इति इयः) ॥४१॥

## सन्ध्यक्षरात्तेन ॥७।३।४२॥

म० वृ०–अनुकम्पायां कृते स्वरादौ प्रत्यये प्रकृतेर्द्वितीयात् सन्ध्यक्षररूपात्स्वरादूर्ध्वं शब्दरूपस्य तेन द्वितीयेन सन्ध्यक्षरेण सह 'लुक्' स्यात् । अनुकम्पितः कुबेरदत्तः=कुबियः, कुबिकः, कुबिलः ; एवममियः,[1] अमिकः, अमिलः । सन्ध्यक्षरादिति किम् ? गुरुयः, गुरुकः, गुरुलः ॥४२॥

अव०–[1]अमोघशब्दः, अथवा अमोघदत्तः, यद्वा अमोघजिह्वः, अनुकम्पितोऽमोघः अमोघदत्तः अमोघजिह्वः=अमियः ॥४२॥

## शेवलाद्यादेस्तृतीयात् ॥७।३।४३॥

म० वृ०–[शेवलाद्या आदयो यस्य] शेवलादेः पूर्वपदस्य नाम्नोऽनुकम्पाविहिते स्वरादौ प्रत्यये तृतीयात्स्वरादूर्ध्वं 'लुक्' स्यात् । [1]शेवलियः, शेवलिकः, शेवलिलः ; एवं [2]सुपरियः, सुपरिकः, सुपरिलः[3]; [4]वरुणियः, वरुणिकः । तथा[5] शेवलिक इत्येव, शेवलयिक इति न भवति । [6]सुपरिक इत्येव, न तु सुपर्यिकः । शेवल, सुपरि, विशाल, वरुण, अर्यमन् इति शेवलादिगणः ॥४३॥

अव०–[1]अनुकम्पितः शेवलदत्तः=शेवलियः । [2]अनुकम्पितः सुपरिदत्तः=सुपरियः । (एवम्) [3]अ-

नुकम्पितो विशालदत्तो=विशालियः। [३]अनुकम्पितो वरुणदत्तो=वरुणियः। तथा [४]शेवलिक इत्यत्र शेवल, इन्द्रदत्त ; अनुकम्पितः शेवलेन्द्रदत्तः, इकप्रत्ययः, अत्र अकृतसन्धेरेव इन्द्रदत्त इत्यक्षरचतुष्टयं लुप्यते, तेन शेवलिक इत्येव प्रयोगोऽभीष्टः, न तु शेवलयिकः, अत्र सन्धौ कृते शेवलयिक इत्यनिष्टं रूपं स्यात्। एवं [५]सुपरिक इत्येव प्रयोग इष्टः, न तु सुपर्यिकः। सुपरिश्चासावाशीर्दत्तश्च। सुष्ठु पिपर्त्तीति सुपरि, सुपरि इति पूर्वपदं नामस्य ॥४३॥

## क्वचित्तुर्यात् ॥७।३।४४॥

म० वृ०–अनुकम्पायां स्वरादौ प्रत्यये क्वचिल्लक्ष्यानुसारेण तुर्यात्तुर्थात् स्वरादूर्ध्वं 'लुक्' स्यात्। [१]बृहस्पतियः, एवं [२]प्रजापतियः, प्रजापतिकः, प्रजापतिलः। अकृतसन्धेरित्येव पूर्ववत्। तेन प्रजापतिक इत्येव, नतु प्रजापत्यिकः क्वचिद्ग्रहणादिह नहि,–अनुकम्पित उपेन्द्रदत्तः=उपडः, उपकः,उपियः, उपिकः, उपिलः ॥४४॥

---

अव०–[१]अनुकम्पितः बृहस्पतिदत्तः। [२]अनुकम्पितः प्रजापतिदत्तः, (अथवा) अनुकम्पितः प्रजापत्याशीर्दत्तः ॥४४॥

## पूर्वपदस्य वा ॥७।३।४५॥

म० वृ०–अनुकम्पाविहिते स्वरादौ परे पूर्वपदस्य 'लुग्वा' स्यात्। [१]दत्तियः,दत्तिकः, दत्तिलः। वावचनाद्यथाप्राप्तम्–[२]देवियः ॥४५॥

---

अव०–[१]अनुकम्पितो देवदत्तः, 'अजातेर्नृनाम्नो०' (७।३।३५) इति इयादिप्रत्ययः। ते 'लुग्वा' इति पूर्वं लुकि बहुस्वरत्वाभावात् इयादिप्रत्ययो न स्यादिति वचनं–'पूर्वपदस्य वा' इति सूत्रं कृतम्। [२]'द्वितीयात्स्वरा०' (७।३।४१) इत्यनेन दत्तशब्दलोपः ॥४५॥

## ह्रस्वे ॥७।३।४६॥

म० वृ०–ह्रस्वेऽर्थे वर्त्तमानाच्छब्दाद्यथायोगं 'कबादयः' स्युः। ह्रस्वः पटः=पटकः, शाटकः। ह्रस्वं पचति=पचतकि,ह्रस्वाः सर्वे=सर्वके, उच्चकैः। संज्ञायामपि ह्रस्वत्वयोगात् कप्, [१]स 'ह्रस्वे' इत्येव सिद्धः– वंशकः, वेणुकः, नडकः, चरकः ॥४६॥

---

अव०–[१]येऽपि केचित् संज्ञायां कप्प्रत्ययं विदधति तेऽपि ह्रस्वत्वोपाधिकायां संज्ञायामिति व्याख्यान्ति। तस्मात्संज्ञायामप्यनेनैव 'ह्रस्वे' इति सूत्रेण कप् सिद्ध इत्यर्थः ॥४६॥

## कुटीशुण्डाद्रः ॥७।३।४७॥

म० वृ०–आभ्यां ह्रस्वेऽर्थे 'रः' स्यात्। कपोऽपवादः। ह्रस्वः कुटी=कुटीरः, शुण्डारः ॥४७॥

---

अव०–केचित्तु कुटीस्थाने कुटीं पठन्ति-कुटीरः ॥४७॥

## शम्या रु-रौ ॥७।३।४८॥

म० वृ०–शमीशब्दात् ह्रस्वेऽर्थे 'रुरौ' भवतः। शमीरुः, शमीरः ॥४८॥

---

अव०–ह्रस्वा शमीति वाक्यम् ॥४८॥

## कुत्वा डुपः ॥७।३।४९॥

म० वृ०–कुतूशब्दाद् ह्रस्वे 'डुपः' स्यात्। ह्रस्वा कुतूः=कुतुपः ॥४९॥

---

अव०–कुतूरिति चर्ममयं तैलाद्यावपनम्,✽ कोऽर्थः? तैलादिभाजनमुच्यते ॥४९॥

## कासूगोणीभ्यां तरट् ॥७।३।५०॥

म० वृ०–आभ्यां ह्रस्वेऽर्थे 'तरट्' स्यात् [ टो ङ्यर्थः ]। [१]कासूतरी, [२]गोणीतरी। पुंल्लिङ्गमपि दृश्यते इत्येके– कासूतरः, गोणीतरः ॥५०॥

---

अव०–[१]ह्रस्वा कासूः=कासूतरी, कासूः शक्तिनामायुधम्। [२]ह्रस्वा गोणी, गोणी धान्यावपनम्, लोके छाटी इति रूढिः ★॥५०॥

---

✽ आवपनं भाजनमित्येकार्थः।

★ "गोणी धान्यभाजनविशेषः" इति हैमलिङ्गानुशासनविवरणे, "धान्यभाजनविशेष इति लोके गुणि छाटी इति वा प्रसिद्धिः" इति तदीयदुर्गपदप्रबोधवृत्तौ।

## वत्सोक्षाश्वर्षभाद्ध्रासे पित् ॥७।३।५१॥

म० वृ०–वत्स उक्षन् अश्व ऋषभ( इति )एभ्यः शब्दप्रवृत्तिनिमित्तस्य स्वार्थस्य ह्रासे गम्यमाने'तरट्' स्यात्, स च पित्। ह्रसितो वत्सो=[1]वत्सतरः, [2]एवमुक्षतरः, [3]अश्वतरः [ वेसरः ], [4]ऋषभतरः। प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तस्य ह्रासे भवति। इह मा भूत्– कृशो वत्सो = वत्सतरः। पित्करणं पुंवद्भावार्थम्– ह्रसिता वत्सा=वत्सतरी, अश्वतरी ॥५१॥

अव०–[1]वत्सः प्रथमवयस्को गौः, तस्य ह्रासो द्वितीयवयःप्राप्तिः। तथा [2]उक्षा द्वितीयवयास्तरुणः, तस्य ह्रासस्तृतीयवयःप्राप्तिः। [3]अश्वेन अश्वायां जातोऽश्वः जात्यतुरङ्गमः, तस्य ह्रासो गर्दभपितृकता। आशुगमनाद्वा अश्वः, तस्य ह्रासो गमने मन्दता। सर्वथाऽपि=प्रकारद्वयेऽपि अश्वतरशब्दो जातिशब्दः, कोऽर्थः? वेसर इत्यर्थः। तथा [4]ऋषभोऽनड्वान् बलीयान्, तस्य ह्रासो भारवहने मन्दशक्तिता ॥५१॥

## वैकाद् द्वयोर्निर्द्धार्ये डतरः ॥७।३।५२॥

म० वृ०–एकशब्दाद् द्वयोर्मध्ये [1]निर्द्धार्ये वर्त्तमानाद् 'डतरो वा' स्यात्। [2]एकतरो भवतोः कठः,[3] पटुः, गन्ता, चैत्रो दण्डी वा। वावचनमगर्थम्[4]। एकको भवतोः कठः पटुर्वा। महाविभाधिकारान्न भवत्यपि [डतरः],–एको भवतोः पटुः। द्वयोरिति किम्? एकोऽत्र ग्रामे प्रधानम् ॥५२॥

अव०–[1]समुदायादेकदेशो जातिगुणक्रियासंज्ञाद्रव्यैर्निष्कृष्यः=वस्तुवृत्त्या निष्कास्य बुद्ध्या पृथक् क्रियमाण एकदेशो निर्द्धार्य उच्यते, न तु सर्वथा समुदायादेकदेशस्य पृथक्करणम्। निर्द्धारणमिति अपरपर्यायः। [2]अयमनयोर्मध्ये एक एकतरः। [3]एकतरो भवतोः कठः। अत्र हि कठो जात्या कठः तदितररूपात् समुदायाद्वस्तुवृत्त्या निष्कास्य बुद्ध्यैव पृथक्कृतोऽस्ति, न तु सर्वथा साक्षात्; समुदायस्य भङ्गप्रसङ्गात्। 'सप्तमी चाविभागे०' ( २।२।१०९ ) इति सप्तमी। [4]अगर्थम्=अककारणम्। पक्षेऽकोऽपि। निर्द्धार्ये इति किम्? एकोऽनयोर्ग्रामयोः स्वामी, सम्बन्धेऽत्र षष्ठी, न तु निर्द्धारणे ॥५२॥

## यत्तत्किमन्यात् ॥७।३।५३॥

म० वृ०–यद् तद्-किमन्येभ्यो द्वयोरेकस्मिन्निर्द्धार्येऽर्थे 'डतरः' स्यात्। यतरो भवतोः कठः पटुर्गन्ता वा ततर आगच्छतु, कतरोऽन्यतरो भवतोः कठः पटुर्वा। महाविभाधिकारान्न भवत्यपि,- यो भवतोः पटुः स आयातु, एवं कः [भवतोः पटुः], अन्यो भवतोः पटुः ॥५३॥

अव०–द्वयोरित्येव– योऽत्र ग्रामे प्रधानं स आगच्छतु ॥५३॥

## बहूनां प्रश्ने डतमश्च वा ॥७।३।५४॥

म० वृ०–यद्-तद्-किमन्येभ्यो बहूनां मध्ये निर्द्धार्येऽर्थे [वर्त्तमानेभ्यः] प्रश्नविषये 'डतमो वा' स्यात्। चकाराद् डतरश्च। यतमो यतरो वा भवतां कठः ततमस्ततरो वा आगच्छतु। कतमः कतरो वा भवतां कठः। [1]प्रमाणान्तरात् प्रतिपत्तौ [ ज्ञाने सति] बहूनामप्रयोगे (अपि) प्रत्ययो भवति, यथा– बहुष्वासीनेषु कश्चित् कञ्चित् पृच्छति कतमो मैत्रः, कतरो मैत्रः; अन्यतमोऽन्यतरो वा भवतां कठः[2]। वावचनमगर्थम्,–यको भवतां कठः सक आयातु, अन्यक एषां कालापः। किमस्तु साकः [3]कादेश उक्तः इति किमः प्रयोगो न दर्शितः। महाविभाधिकारान्न भवत्यपि,–यो भवतां कठः स आयातु। प्रश्न इति किम्? क्षेपे मा भूत्,–को भवतां कठः, कुत्सित इत्यर्थः। प्रश्नग्रहणं किमो विशेषणम्, नान्यस्यासम्भवात् ॥५४॥

अव०–[1]वाक्ये उपात्ताच्छब्दरूपात्प्रमाणादन्यत् प्रकरणप्र·······(त्यक्षा)दिकं प्रमाणं प्रमाणान्तरम्, तस्मात्। [2]अन्यतरो वा भवतां कठः इत्यस्याग्रे "शुचिवल्कवीतवपुरन्यतमस्तिमिरच्छिदामिव गिरौ भवतः" (किराते)। वृद्धस्तु व्याधितो वा राजा मातृबन्धुकुल्यगुणवत्सामन्तानामन्यतमेन क्षेत्रे बीजमुत्पादयेत्। [3]'किमः कस्तादौ च'(२।१।४०) इति सूत्रे॥

## वैकाद् ॥७।३।५५॥

म० वृ०-एकशब्दाद् बहूनामेकस्मिन्निर्द्धार्येऽर्थे 'डतमो वा' स्यात्। एकतमो भवतां कठः पटुर्वा। वावचनादगपि-एककः। महाबाधिकारान्न भवत्यपि-एको भवताम्। पृथग्योगो डतरनिवृत्त्यर्थः ॥५५॥

## क्तात्तमबादेश्चानत्यन्ते ॥७।३।५६॥

म० वृ०-क्तान्तात्केवलात् तमबाद्यन्ताच्चानत्यन्तेऽर्थे [क्तान्तात्] 'कप्' स्यात्। [1]क्रियायाः स्वेनाश्रयेण [2]साकल्येनानभिसम्बन्धो[3]ऽनत्यन्तता। अनत्यन्तं भिन्नं=भिन्नकम्, [4]भिन्निका[4] घटी। तमबाद्यन्तात्,-भिन्नतमकम्, [5] भिन्नकल्पकम् ॥५६॥

अव०-[1]क्रियायाः स्वाश्रयो नाम यत्रासौ क्रिया समवेता मिलिता उत्पद्यते। [2]साकल्यं क्रियासमवायिकारणस्य काष्ठादेरवयवबाहुल्येन निःशेषता सम्पूर्णता। [3]तयाऽभिमतः सम्बन्धोऽभिसम्बन्धः, न अभिसम्बन्धः=अनभिसम्बन्धोऽव्याप्तिः। [4]एवमनत्यन्तं छिन्नं=छिन्नकम्। [4]अनत्यन्तं भिन्ना=भिन्निका।(एवं) छिन्निका रज्जुः। [5]एवं भिन्नतरकम्। तमबाद्यन्तेषु क्तान्तता नास्तीति तमबादिग्रहणम्। तथा सूत्रे "क्तात् तमबादेश्चे"त्यत्र असमासः तमबादेरित्यत्रापि क्तात् इत्यस्य सम्बन्धार्थः। तेनेह न भवति,-अनत्यन्तं शुक्लतमम्, अनत्यन्तं भिन्नतमम् ॥५६॥

## न सामिवचने ॥७।३।५७॥

म० वृ०-[सामि अव्ययशब्दः] सामि अर्द्धः। सामिवचने उपपदेऽनत्यन्तेऽर्थे क्तान्तात् केवलात् केवलात्तमबाद्यन्ताच्च 'कप् न' स्यात्। सामि अनत्यन्तं भिन्नम्, एवं कृतम्, भुक्तम्, पीतम्। भिन्नतमम्, भिन्नतरम्। वचनग्रहणं [1]पर्यायार्थम्। अर्द्धं, नेम, शकल, खण्डमित्यादि। अन्ये तु समासे एवोदाहरन्ति,-[2]सामिकृतम्, [3]अर्द्धकृतम् ॥५७॥

अव०-[1]"पर्यायार्थम्', तथाहि- अर्द्धमनत्यन्तं भिन्नम्, नेममनत्यन्तं भिन्नम्, शकलमनत्यन्तं भिन्नम्, खण्डमनत्यन्तं भिन्नमिति पर्यायोदाहरणानि। [2]सामिकृतमित्थमेव समासः, सामि कृतमित्येवोदाहरणम्। [3]अर्धं च तत् कृतम्=अर्द्धकृतम्, 'विशेषणं विशेष्येणैकार्थं कर्मधारयश्च'(३।१।९६) इति समासः ॥५७॥

## नित्यं ञञिनोऽण् ॥७।३।५८॥

म० वृ०-ञ ञिन् इति प्रत्ययान्तात् 'स्वार्थे नित्यमण्' स्यात्। [1]नित्यग्रहणान्महाविभाषा निवृत्ता। [2]व्यावक्रोशी, [3]व्यावहासी वर्त्तते। ञिन्,-[4]साङ्कोटिनम्, [5]सांराविणम् ॥५८॥

अव०-'[1]बाह्यात्' (६।१।११) इत्यतो यो वाधिकारः स नित्यग्रहणात् निवृत्तः। [2]व्याङ्पूर्वकः क्रुशधातुः, परस्परमाक्रोशनं=व्यावक्रोशः, 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) इत्यनेन ञः, व्यावक्रोश एव=व्यावक्रोशी, 'नित्यं ञ०' ७।३।५८) अण्, 'वृद्धिः स्वरे०' (७।४।१) इति वृद्धिः। एवं[3] व्यवहसनं=व्यवहासः,व्यवहास एव (व्यवहासी)। [4]सम्पूर्वकुटः, समन्तात् कोटः- 'अभिव्याप्तौ भावेऽनञिन्' (५।३।९) इत्यनेन ञिन्, तदनन्तरं 'नित्यं ञञिनोऽण्' (७।३।५८) इत्यण्, वृद्धिः। [5]एवं सांराविणमित्यपि ॥५८॥

## विसारिणो मत्स्ये ॥७।३।५९॥

म० वृ०-विसारिन्शब्दान्मत्स्ये वर्त्तमानात्स्वार्थे ऽण् स्यात्। [1]वैसारिणो मत्स्यः ॥५९॥

अव०-[1]विसरतीति विसारी, ग्रहादित्वाण्णिन्, मत्स्यश्चेत् वैसारिणः, विसार्येव वैसारिणो मत्स्यः ॥५९॥

## पूगादमुख्यकाञ्ञ्यो [1]द्रिः ॥७।३।६०॥

म० वृ०-नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगाः। पूगवाचिनो नाम्नः 'स्वार्थे ञ्यः' स्यात्, स च द्रिसंज्ञः, यदि पूगवाचि नाम

'सोऽस्य मुख्यः' (७।१।१९०) इति विहितकप्रत्ययान्तं न भवति । [2]लौहध्वज्यः, लौहध्वज्यौ, लोहध्वजाः[3] । [4]शैब्यः, शैब्यौ, शिबयः[5] । अमुख्यकादिति किम् ? देवदत्तकः[6] पूगः ॥६०॥

अव०–[1]मुख्येऽर्थे कः=मुख्यकः, न मुख्यकः=अमुख्यकः, तस्मात् । [2]लोहध्वज एव=लौहध्वज्यः, लोहध्वजावेव=लौहध्वज्यौ, लोहध्वजा एव=लोहध्वजाः । अलौकिकं वाक्यमन्यथा न प्राप्नोति, महाबाधिकारस्य निवृत्तत्वात् । [3]'पूगादमुख्या०' (७।३।६०) इत्यनेन ञ्यः, स च द्रिसंज्ञः, द्रिसंज्ञत्वात् बहुत्ववाक्ये 'बहुष्वस्त्रियाम्' (६।१।१२४) इत्यनेन ञ्यो लुप्यते । [4]शिबस्यापत्यं शैबिः, 'अत इञ्' (६।१।३१), शैबिरेव शैब्यः, शैबी एव शैब्यौ, शैबय एव शिबयः । [5]अत्र ञ्यो लुप्यते । [6]देवदत्तो मुख्योऽस्य– 'सोऽस्य मुख्यः' (७।१।१९०) इत्यनेन कः प्रत्ययः ॥६०॥

## व्रातादस्त्रियाम् ॥७।३।६१॥

म० वृ०–नानाजातीया अनियतवृत्तयः शरीरायासजीविनः सङ्घा व्राताः । व्रातवाचिनो नाम्नोऽस्त्रियां [वर्त्तमानात्] स्वार्थे 'ञ्यः' स च द्रिसंज्ञः स्यात् । व्रैहिमत्यः, व्रैहिमत्यौ, व्रीहिमताः । अस्त्रियामिति किम् ? व्रीहिमता स्त्री[1] ॥६१॥

अव०–एवं[1] कपोतपाका, अत्र 'अजादेः' इत्याप् ।६१।

## शस्त्रजीविसङ्घाञ्ञ्यड् वा ॥७।३।६२॥

म० वृ०–शस्त्रजीविनां यः सङ्घस्तद्वाचिनः स्वार्थे वा ञ्यट् स्यात्, स च द्रिसंज्ञः । [1]शाबर्यः, [2]शाबर्यौ, शबराः, [3]पुलिन्दाः, [4]कुन्तयः । पक्षे शबरः, पुलिन्दः । शस्त्रजीवीति किम् ? [5]मल्लः, मल्लौ, मल्लाः ;[5] शयण्डः, शयण्डाः[6] । सङ्घादिति किम् ? सम्राट्, [7]वागुरः, [वागुरौ] वागुराः ; नैते श्रेणिबद्धा इति न सङ्घाः । टो ङ्यर्थः–शाबरी, पौलिन्दी, कौन्ती[8] ॥६२॥

अव०–शबराः शस्त्रजीविसङ्घः । [1]शबर एव । [2]शबरौ एव । [3]शबरा एव । अत्रापि बहुत्वे ञ्यो लुप्यते । [4]कुन्तेरपत्यं बहवो माणवकाः–'दुनादिकुर्विन्०' (६।१।११८) इति ञ्यः, 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप्, पुनः कुन्तिशब्दः, कुन्तयः शस्त्रजीविसङ्घः, कुन्तिरेव कौन्त्यः), कुन्ती एव (कौन्त्यौ), कुन्तय एव (कुन्तयः), 'शस्त्रजीवि०' (७।३।६२) इति ञ्यट्, पुनः 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यट् लुप्यते । [5]मल्लाः सङ्घः । [6]शयण्डा नाम योद्धृविशेषाः, लोके चउकडिया इति प्रसिद्धिः । [7]वागुराऽस्यास्तीति 'अभ्रादिभ्यः' (७।२।४६) इति अः प्रत्ययः । [8]कुन्तेरपत्यं बहवो माणवकाः, ते शस्त्रजीविसङ्घः, संहतिरूपतया स्त्रीत्वविशिष्टोऽपि अत्र सङ्घो विवक्षितः, 'दुनादिकुर्विन्०' (६।१।११८) ञ्यः, 'कुन्त्यवन्तेः स्त्रियाम्' (६।१।१२१) इत्यनेन ञ्यो लुप्यते, 'नुजातेः' (२।४।७२) इति ङी, तदनन्तरं 'शस्त्रजीविसङ्घा०' (७।३।६२) इत्यनेन ञ्यट्, 'अवर्णेवर्णस्य' (७।४।६८) ई लुप्यते, पुनः 'अणञेये'० (२।४।२०) इति ङी, 'व्यञ्जनात्तद्धितस्य' (२।४।८८) इति तद्धितयकारस्य ङ्यां परे लोपः क्रियते ॥६२॥

## वाहीकेष्वब्राह्मणराजन्येभ्यः ॥७।३।६३॥

म० वृ०–वाहीकेषु यः शस्त्रजीविसङ्घः ब्राह्मणराजन्यवर्जितस्तद्वाचिनः स्वार्थे 'ञ्यट्' नित्यं स्यात्, स च द्रिसंज्ञः । [1]कुण्डीविशाः, क्षुद्रकाः, [2]मालव्यः, मालव्यौ, मालवाः । अब्राह्मणराजन्येभ्य इति किम् ? [3]गौपालिः, [4]गौपाली ; [5]राजन्यः, राजन्यौ । स्त्रियां [6]राजन्या । ब्राह्मणप्रतिषेधे ब्राह्मणविशेषप्रतिषेधः, न हि ब्राह्मणशब्दवाच्यो वाहीकेषु शस्त्रजीविसङ्घोऽस्ति । राजन्ये तु स्वरूपस्य विशेषस्य च प्रतिषेधः । तदर्थमेव [वाहीकेषु इत्यत्र] बहुवचनम् ॥६३॥

अव०–[1]कुण्ड्यां विशन्ति–'नाम्युपान्त्य०' (५।१।५४) इति कः, कुण्डीविशाः शस्त्रजीविसङ्घो वाहीकदेशे, कुण्डीविश एव कौण्डीविश्यः, कुण्डीविशावेव कौण्डीविश्यौ, कुण्डीविशा एव कुण्डीविशाः । 'वाहीके०' (७।३।६३) इति सर्वत्र ञ्यट् । बहुत्वे तु 'बहुष्वस्त्रियाम्' (६।१।१२४) इति ञ्यट्

लुप्यते । एवं [२]मालव्य इत्यादिष्वपि पूर्ववत् सर्वं कर्त्तव्यम् । [३]गां पालयतीति गोपालः, 'कर्मणोऽण्'(५।१।७२),गोपालस्यापत्यं=गौपालिः,'अत इञ्' (६।१।३१),गौपालिः(इति)अत्र प्रथमासिः,[४]गौपाली (इति) अत्र औ,'इदुतोऽस्त्रेरीदूत्'(१।४।२१) ईत्। [५]राज्ञोऽपत्यम्- 'जातौ राज्ञः' (६।१।९२) इत्यनेन यः प्रत्ययः, 'अनोऽस्य ये' (७।४।५१) प्रतिषेधात् 'नोऽपदस्य तद्धिते' (७।४।६१) इति न भवति। [६]ञ्यटि तु सति ङी स्यात्। वाहीकेष्विति किम्? शबराः शस्त्रजीविसङ्घः, शबरः, शबरौ; पुलिन्दः, पुलिन्दौ ॥ ६३ ॥

## वृकाट्टेण्यण् ॥७।३।६४॥

म० वृ०-वृकात् शस्त्रजीविसङ्घवाचिनः स्वार्थे 'टेण्यण्' स्यात्, स च द्रिः। वार्केण्यः,वार्केण्यौ, वृकाः । वार्केणी स्त्री । शस्त्रजीविसङ्घादित्येव-कामक्रोधौ मनुष्याणां खादितारौ वृकाविव ॥६४॥

---

प्रव०-'वृकाट्टे'० इति सूत्रेऽयं विशेषो लिख्यते,-उदाहरणेषु वाहीकत्वे नित्यमवाहीकत्वे तु विकल्पेन ञ्यटि प्राप्ते वचनमिदम्। एवं 'यौधेयादेरञ्' (७।३।६५) इत्यादिकमुत्तरसूत्रत्रयमपि ॥ ६४ ॥

## यौधेयादेरञ् ॥७।३।६५॥

म० वृ०-[१]यौधेयादिभ्यः शस्त्रजीविसङ्घवाचिभ्यो-'ऽञ्'स्यात्स च द्रिः यौधेयः। [२]यौधेयौ, यौधेयाः; [३]शौक्रेयः, [४]घार्त्तेयः । [५]अञ्वचनं 'सङ्घघोषाङ्कलक्षण'० ६।३।१७२) इति अणर्थम्। तेन यौधेयस्य सङ्घादिर्यौधेय इति भवति ॥६५॥

---

प्रव०-[१]'द्रेरञणोऽप्राच्यभर्गादेः' (६।१।१२३) इति तद्धितप्रथमपादे सूत्रे भर्गादिगणोऽस्ति, भर्गादिगणप्रान्ते च यौधादिगणः उक्तः, तथाहि-यौधेयः, शौक्रेयः, शौभ्रेयः, घार्त्तेयः, धार्त्तेयः, ज्यावनेयः इति यौधादिगणः । [२]युधाशब्दः, युधाया अपत्यं बहवः कुमाराः, ते शस्त्रजीविसङ्घः स्त्रीत्वबहुत्वविशिष्टो विवक्षितः, 'द्विस्वरादनद्याः' (६।१।७१) इत्यनेन एयण्, यौधेय इति शब्दो निष्पन्नः। [३]शुक्रस्य शुभ्रस्यापत्यम्-'शुभ्रादिभ्यः' (६।१।७३) इत्यनेन एयण्, शौक्रेयः शौभ्रेयः इति शब्दौ । [४]घृतायाः घृताया अपत्यं बहवः कुमाराः-'द्विस्वरा०' (६।१।७१) इत्यनेन एयण्, ज्यावनायाः अपत्यम्-'ङ्याप्त्यूङः' (६।१।७०) इत्यनेन एयण् । तदनन्तरं यौधेय एव यौधेयः, यौधेयावेव यौधेयौ; यौधेया एव 'यौधेयाः। एवं शौक्रेय इत्यादिष्वपि वाक्यानि । यौधेयादेरञ्' (७।३।६५) इत्यनेन अञ्प्रत्ययः। एषु 'द्रेरञणोऽप्राच्यभर्गादेः' (६।१।१२३) इति अञ्लोपप्रतिषेधः, ततः पुनरपि यौधेयानामयं सङ्घादिः इति वाक्ये 'सङ्घघोषाङ्कलक्षणेऽञ्यञिञः' (६।३।१७२) इत्यनेन अञन्तात् अण् क्रियते। [५]अत्र पर आह-ननु अणेव विधीयताम्, किमञ्विधानेन? इत्याह-अञ्वचनमित्यादि, अञ्प्रत्ययानन्तरं 'सङ्घघोषाङ्क०' (६।३।१७२) इत्यादिना यथा अण् भवति एतदर्थमत्र सूत्रे अञ् विहितः, अन्यथा 'गोत्राददण्डमाणव०' (६।३।१६९) 'इत्यादिना अकञ् स्यात् । पुनः परः प्राह-ननु यौधेयादयः सङ्घवचनाः कथं गोत्रं भवन्ति ? उच्यते, भर्गाद्यन्तर्गणो यौधेयादिगणः, तत्र 'द्रेरञणोऽप्राच्यभर्गादेः' (६।१।१२३) इति सूत्रे येऽपत्यप्रत्ययान्ताः शब्दास्ते गोत्रं भवन्ति, औपगवादिशब्दवत् । अपत्यं हि गोत्रम्। अपत्यप्रत्ययान्ताश्च "प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानां ग्रहण"-मिति न्यायात् स्वार्थिकोऽपि प्रत्ययोऽपत्यग्रहणेन गृह्यते। अत्र च इदमेव अञ्वचनं लिङ्गम् ॥६५॥

## पर्श्वादेरण् ॥७।३।६६॥

म०वृ०-पर्शु इत्यादिभ्यः शस्त्रजीविसङ्घार्थेभ्यः 'स्वार्थेऽण्' स्यात्स च द्रिः। [१]पार्शवः, पार्शवौ, [२]पर्शवः; [३]राक्षसः,[राक्षसौ] रक्षांसि। स्त्रियां [४]पर्शूः। [पर्शु, रक्षस्, असुर, वह्लिक, वयस्, वसु, मरुत्, सत्वन्, सत्वन्तु, दशार्ह, पिशाच, अशनि, कार्षापण इति पर्श्वादिगणः] ॥६६॥

---

प्रव०-[१]पर्शोरपत्यं बहवो माणवका इति वाक्ये 'पुरुमगधकलिङ्ग०' (६।१।११६) इत्यण्,

'शकादिभ्यो द्रेर्लुप्' ( ६।१।१२० ) इत्यनेन अण् लुप्यते, ते शस्त्रजीविसङ्घः पर्शुरेव पार्शवः, पर्शू एव पार्शवौ इति वाक्ये 'पर्श्वादेरण्' इत्यनेन अण्, 'अस्वयंभुवोऽव्' ( ७।४।७० ) इत्यवादेशः, पार्शवः पार्शवौ इति सिद्धौ । [२]अथ बहुत्वे पर्शोरपत्यानि बहवो माणवकाः, ते शस्त्रजीवी स्त्रीत्वविशिष्टः सङ्घो विवक्षितः, 'पुरुमगध०' (६।१।११६) इत्यण्, 'द्रेरञणोऽप्राच्य०' (६।१।१२३) इति अणो लोपः, ततः 'पर्श्वादेरण्', 'बहुष्वस्त्रियाम्' (६।१।१२४) अणो लोपः । [३]रक्षांसि शस्त्रजीविसङ्घः, स्वार्थे अनेन 'पर्श्वादेरण्' इति सूत्रेण अण्, प्रथमं रक्षसोऽपत्यमिति वाक्ये 'ङसोऽपत्ये' (६।१।२८) अण्, ततः स्वार्थे इत्यादिकं ज्ञेयम् । [४]पर्शू इत्यत्र पर्शोरपत्यं बहवो माणवकाः, अत्र स्त्रीत्वविशिष्टः सङ्घो विवक्षितः, 'पुरुमगध०' (६।१।११६) इत्यण्, 'शकादिभ्यो द्रेर्लुप्' ( ६।१।१२० ), इत्यनेनाणलोपः, ततः स्वार्थे 'पर्श्वादेरण्', 'द्रेरञणो०' इत्यनेनाणो लुप्, 'उतोऽप्राणिनश्च०'(२।४।७३) इत्यादिना ऊङ्, पर्शूः इति सिद्धम् ॥६६॥

## [१]दामन्यादेरीयः ॥७।३।६७॥

म०वृ०–दामनि इत्यादिभ्यः शस्त्रजीविसङ्घेभ्यः स्वार्थे 'ईयः' स्यात्, स च द्रिः । [२]दामनीयः, दामनयः ॥६७॥

अव०–[१]दामनि, औलपि, औपलि, वैजवापि, औदकि, आच्युतन्ति, काकन्दि, काकन्दकि, ककुन्दि, ककुन्दकि, शाक्रन्तपि, सार्वसेनि, बिन्दु, तुलभा, मौञ्जायन, औदमेघि औपबिन्दवि, सावित्रीपुत्र, कौण्ठोपरथ, कौण्ठारथ, दाण्डकि, कौष्ठकि, जालमानि, जारमाणि, ब्रह्मगुप्त, ब्राह्मगुप्त, जानकि इति दामन्यादिगणः । [२]दमनशब्दः, दमनस्यापत्यं बहवः कुमाराः, ते शस्त्रजीविसङ्घः इति वाक्ये 'अत इञ्' ( ६।१।३१ ), दामनिशब्दः, दामनिरेव, दामनीयः, दामनी एव दामनीयौ, दामनय एव दामनयः ;'दामन्यादेरीयः' । सर्वत्र बहुत्वे तु 'बहुष्वस्त्रियाम्'(६।१।१२४) इति ईयो लुप्यते ॥६७॥

## श्रुमच्छमीवच्छिखावच्छालावदूर्णावद्विदभृदभिजितो गोत्रेऽणो यञ् ॥७।३।६८॥

म०वृ०–शस्त्रजीविसङ्घेति निवृत्तम् । श्रुमत्, शमीवत्, शिखावत्, शालावत्, ऊर्णावत्, विदभृत्, अभिजित् इत्येतेभ्यो गोत्रे योऽण् तदन्तेभ्यः [ अणन्तान् परतः ] स्वार्थे यञ् स्यात्, स च द्रिसंज्ञः । [१]श्रौमत्यः, [श्रौमत्यौ] श्रौमताः । श्रीमच्छब्दादपि केचिदिच्छन्ति,–[२]श्रैमत्यः,श्रैमत्यौ,श्रैमताः । [३]शामीवत्यः, [शामीवत्यौ] शामीवताः । शैखावत्यः, [शैखावत्यौ] शैखावताः । शालावत्यः, [शालावत्यौ] शालावताः । ऊर्णावत्यः, [ ऊर्णावत्यौ ] ऊर्णावताः । वैदभृत्यः, वैदभृत्यौ, वैदभृताः । [४]आभिजित्यः, आभिजित्यौ, आभिजिताः । गोत्रग्रहणं किम् ? श्रौमतम्, आभिजितो मुहूर्त्तः, आभिजितः स्थालीपाकः [ अभिजिद् देवता अस्य– 'देवता' (६।२।१०१) इत्यण् ] । [५]अपत्यप्रत्ययान्तात्स्वार्थिकोऽयं यञ् अपत्ये एव वर्त्तते इति तदाश्रयः आयनणादिकोऽपि प्रत्ययो [६]भवति, यथा–श्रौमत्यायनः[७], आभिजित्यायनः, [८]श्रौमतकः, [९]आभिजितकः, [१०]श्रौमतकम्, [११]श्रौमतम्, आभिजितम् ॥६८॥

अव०–[१]श्रुमतोऽपत्यं=श्रौमतः,'ङसोऽपत्ये' ६।१।२८), श्रौमत एव=श्रौमत्यः, अत्रापि प्राग्वत् एकत्वद्वित्वबहुत्वेषु वाक्यं कृत्वा 'श्रुमच्छमी०' इत्यादिना यञ्, बहुत्वे तु 'यञञोऽश्यापर्णान्त०' (६।१।१२६) इत्यादिना यञ् लुप्यते, तत्र श्रौमत इति भवति प्रयोगः । [२]एवं श्रैमत्यः,श्रैमत्यौ,श्रैमताः (इति) अत्रापि ज्ञातव्यम् । [३]एवं शमीवतोऽपत्यम्–'ङसोऽपत्ये' (६।१।२८) अण्, तदनन्तरं स्वार्थे यञ् । एवं सर्वेषु उदाहरणेषु शब्दसिद्धिः कर्त्तव्या । [४]अभिजिता चन्द्रयुक्तो मुहूर्त्तः=आभिजितः; 'चन्द्रयुक्तात्काले०' (६।२।६) इति अण् । [५]"प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानां ग्रहणं भवती"ति न्यायात् स्वार्थिकप्रत्ययोऽपि अपत्यार्थसम्बन्धे भवति इत्यर्थः । [६]स्वार्थिकप्रत्ययात् परत इत्यर्थः ।[७]श्रुमतोऽपत्यम्, अण्, ततः श्रौमत एव=श्रौमत्यः, यञ्,

यञोऽनन्तरं श्रौमत्यस्यापत्यं युवा=श्रौमत्यायनः, 'यञिञः' (६।१।५४) इति सूत्रेण आयनण् कार्यः। [८]श्रौमत्यस्यायं=श्रौमतकः, 'गोत्राददण्डमाणव०' (६।३।१६९) इति अकञ्। ......................... ([९]अभिजितस्यायमाभिजितकः)। [१०]श्रुमत इदम्-'तस्येदम्' ............(इति श्रौमतम्), श्रौम............ (तानां समूहः) श्रौमतकम्, आभिजितकम्, 'गोत्रोक्षवत्स०' (६।२।१२) इत्यनेन अकञ्। ......................... (?)। [११]श्रौमत्यस्य संघादि श्रौमतम्, 'संघघोषाङ्क०' (६।३।१७२) इत्यनेन अण्, 'शकादिभ्यो द्रेर्लुप्' (६।१।१२०) इत्यनेन यञो लोपः॥ ६८॥

## समासान्तः ॥७।३।६९॥

म० वृ०—अधिकारोऽयमापादपरिसमाप्तेः। अतः परं ये प्रत्ययास्ते समासस्यान्ता अवयवा भवन्ति (इति)तद्ग्रहणेन गृह्यन्ते। [१]प्रयोजनं बहुव्रीह्यव्ययीभावद्विगुद्वन्द्वसंज्ञाः[२]। सुजम्भे [३]सुजम्भानौ स्त्रियौ। [४]उपधुरम्, [५]उपशरदम्; [६]द्विधुरी, [७]वाग्दृषदिनी।६९।

अव०—[१]प्रयोजनं बहुव्रीहीत्यादि यदुक्तम् तत्र यथाक्रमं सुजम्भे इत्याद्युदाहरणानि। सुजम्भे इति बहुव्रीहिग्रहणेन ग्रहणमिति प्रयोजनम्। उपधुरम्, उपशरदम्; अत्र अत्समासान्तस्याव्ययीभावग्रहणेन ग्रहणात् विभक्तीनाममभावः सिद्धः। द्विधुरी,अत्र अत्समासान्तस्य द्विगुग्रहणेन ग्रहणात् ङी सिद्धः। वाग्दृषदिनी, अत्रात्समासान्तस्य द्वन्द्वग्रहणेन ग्रहणात् इन् सिद्धः।[२]उपलक्षणं चेदम्,तत्पुरुषकर्मधारयादिसंज्ञा अपि प्रयोजनमित्यर्थः। [३]जम्भशब्दोऽभ्यवहार्थवचनो दंष्ट्रावचनो वा, उभयत्रापि पुंस्त्रीलिङ्गः, जम्भः, जम्भा वा। रचना इयम्– सु, जम्भः,जम्भा; शोभनो जम्भो जम्भा वा ययोः ते सुजम्भे, सुजम्भानौ;'सुहरित्तृणसोमाज्जम्भात्' (७।३।१४२) इति सूत्रेण अन् समासान्तः, ततः 'ताभ्यां वाप् डित्'(२।४।१५) इति सूत्रेण (विकल्पेन) डाप् कर्त्तव्यः, प्रथमाद्विवचनमौः, 'औरीः' (१।४।५६।इति) औस्थाने ई, सुजम्भे, सुजम्भानौ; अत्र अनः समासान्तस्य बहुव्रीहिसमासग्रहणेन ग्रहणात् 'ताभ्यां वाप् डित्' इत्यनेन डाप्ङीप्रत्ययविकल्पः सिद्धः, एवं च त्रैरूप्यम्– सुजम्भे, अत्र डाप्; सुजम्भ्यौ, अत्र ङी; पक्षे सुजम्भानौ; सुजम्भे, सुजम्भ्यौ, सुजम्भानौ स्त्रियौ इति त्रैरूप्यम्। [४]धुरः समीपमुपधुरम्, 'धुरोऽनक्षस्य' (७।३।७७) इति अत् समासान्तः। [५]शरदः समीपम्=उपशरदम्,'शरदादेः'(७।३।९२) अत्,(उपशरदम्) इत्यत्र प्रथमासिः, 'अमव्ययीभावस्यातो०' (३।२।२) इत्यनेन सिस्थाने अम्। [६]द्वयोर्धुरोः समाहारः=द्विधुरी, 'धुरोऽनक्षस्य' (७।३।७७) इति अत्, 'द्विगोः समाहारात्०' (२।४।२२) इत्यनेन ङी। [७]वाक् च दृषच्च– 'चवर्गदषहः०'(७।३।९८) इति अत्, वाग्दृषदमस्यास्ति–'प्राणिस्थादस्वाङ्गा०' (७।२।६०) इति इन्। ॥६९॥

## न किमः क्षेपे ॥७।३।७०॥

म० वृ०—क्षेपे निन्दायां यः किम्शब्दस्तस्मात् परे ये ऋगादयः यानुपादाय समासान्तो विधास्यते तदन्तात्समासाद्वक्ष्यमाणः 'समासान्तो न' भवति। [१]किंधूः, या न तथा गुर्वी; किंराजा, यो न रक्षति; किंसखा, योऽभिद्रुह्यति [द्रोहं कुरुते]; किंधूः शकटम्, [२]किमक्षिर्विप्रः। किम इति किम्? कुराजः [कुत्सितो राजा–'राजन्सखेः' (७।३।१०६)]। क्षेप इति किम्? केषां राजा=किंराजः, किंसखः [किंगवः] ॥७०॥

अव०–[१]का कुत्सिता धूरस्य=किंधूः, किंधूरित्यत्र 'धुरोऽनक्षस्य'(७।३।७७) इत्यस्य प्राप्तिः। (एवं) किंगौर्यो न वहति, अत्र 'गोस्तत्पुरुषाद्' (७।३।१०५) इत्यस्य विषयेऽट् न भवति। [२]के–कुत्सिते अक्षिणी अस्य=किमक्षिः, अत्र 'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) इत्यनेन प्राप्तोऽपि टो न भवति ॥७०॥

## [१]नञ्तत्पुरुषात् ॥७।३।७१॥

म० वृ०—नञ्तत्पुरुषाद्वक्ष्यमाणः 'समासान्तो न' स्यात्। न ऋक्=अनृक्, ['ऋक्पूःपथ्यपोऽत्' (७।३।७६) इति प्राप्तिः] अराजा, अपन्थाः।

[२]अपथमिति पथशब्दस्य, यथा-[३]कुपथम् । तत्पुरुषादिति किम् ? [४]अधुरं शकटम्, [५]अराजं वर्त्तते ॥७१॥

अव०–[१]तामुत्तरपदप्रधानतां पृणाति इति तत्पुरुषः, 'विदिपृभ्यां कित्' (उ० ५५८) इत्युणादिसूत्रेण कित् उषप्रत्ययः, नञा तत्पुरुषः=नञ्तत्पुरुषः, तस्मात् । [२]न पथः=अपथम्, ❀'पथः सङ्ख्याव्ययोत्तरः' इति नपुंसकत्वम् । [३]कुपथमित्यत्र पथिन्शब्दपर्यायः पथ इति शब्दोऽप्यस्ति । कुत्सितः पथः कुपथम्, 'पथः सङ्ख्याव्ययोत्तरः' इति लिङ्गपाठात् नपुंसकत्वमेव भवति । यदि च कुपथमित्यत्र पथिन्शब्दः स्यात्; तदा कुत्सितः पन्थाः इति वाक्ये 'काऽक्षपथोः' (३।२।१३४) इति सूत्रेण कुशब्दस्य का इत्यादेशः प्रवर्त्तेत । [४]न विद्यते धूरस्य शकटस्य=अधुरं शकटम् । अपथोऽयमुद्देश इत्यपि (प्रत्युदाहरणं) ज्ञेयम्, न विद्यते पन्था यत्र=अपथः, 'ऋक्पूः०' (७।३।७६) अत । [५]राज्ञामभावः=अराजम्, 'विभक्तिसमीप०' (३।१।३९) इत्यनेनाव्ययीभावः, 'अनः' (७।३।८८) इत्यनेन अत् ॥७१॥

## पूजास्वतेः प्राक् टात् ॥७।३।७२॥

म० वृ०–पूजायां यौ स्वती ताभ्यां परे ये ऋगादयस्तदन्तात्समासाद् 'बहुव्रीहेः काष्ठे टः' (७।३।१२५) इति टप्रत्ययात् प्राग् यः समासान्तो वक्ष्यते स न भवति । [१]सुधूः, [२]अतिधूः, [३]सुराजा, [४]अतिराजा; सुसखा, अतिसखा; सुगौः, अतिगौः । पूजाग्रहणं किम् ? अतिक्रान्तो राजानमतिराजः । प्राक् टादिति किम् ? [५]स्वङ्गुलं काष्ठम् ॥७२॥

अव०–[१]शोभना धूः । [२]पूजिता धूः अतिधूः । [३]शोभनो राजा । [४]अतिशयितो राजा । [५]शोभना अङ्गुलयो यस्य, 'बहुव्रीहेः०' (७।३।१२५) इति टः ॥७२

## बहोर्डे ॥७।३।७३॥

म० वृ०–डे–डप्रत्ययविषये प्रसङ्गो यत्र ततो बह्वन्तात् समासान्तो [ 'प्रमाणीसङ्ख्या०' (७।३।१२८) इति डः] डः [१]कच् न स्यात् । [आसन्ना बहवो येषां ते] [२]आसन्नबहवः, [३]उपबहवः । बहोरिति किम् ? [४]द्वित्राः ॥७३॥

अव०–[१]कचोऽपवादस्य 'प्रमाणीसङ्ख्या०' (७।३।१२८) इति डप्रत्ययस्य निषेधे कच् मा प्रासाङ्क्षीदिति आशयेन आह कच्चेति । [२]आसन्नबहवः, [३]उपबहवः; अत्र 'बहुगणं भेदे' (१।१।४०) इत्यनेन बहुशब्दस्य सङ्ख्यावद्भावात 'प्रमाणीसङ्ख्याड्डः' (७।३।१२८) इत्यनेन डप्राप्तिः । उप समीपे बहु येषां ते उपबहवः, 'अव्ययम्' (३।१।२१) इति समासः । [४]द्वौ वा त्रयो वा प्रमाणमेषाम् 'प्रमाणीसङ्ख्या०' (७।३।१२८) इति डः । द्वित्रा इत्यस्याग्रे ड इति किम् ? प्रिया बहवोऽस्य=प्रियबहुकः, 'शेषाद् वा' (७।३।१७५) इत्यनेन कच् ॥७३॥

## इच् युद्धे ॥७।३।७४॥

म०वृ०–युद्धे यः [१]समासो विहितस्तस्माद् [२]'इच्' [३]समासान्तः स्यात् । [४]केशाकेशि, [५]दण्डादण्डि, [६]मुष्टामुष्टि, [७]अस्यसि ॥७४॥

अव०–[१]अव्ययीभावः । [२]तस्मादव्ययीभावसमासात् परत इच् । [३]चकारः 'इच्यस्वरे दीर्घ०' (३।२।७२) इत्यत्र विशेषणार्थः । [४]केशेषु च केशेषु च मिथो गृहीत्वा कृतं युद्धं केशाकेशि । [५]दण्डैश्च दण्डैश्च मिथः प्रहृत्य कृतं युद्धं दण्डादण्डि । [६]मुष्टया च मुष्टया च मिथः प्रहृत्य कृतं युद्धम् । [७]असिना च असिना च मिथः प्रहृत्य कृतं युद्धम् । सर्वत्र 'तत्रादाय मिथ०' (३।१।२६) इच् समासान्तः, 'इच्यस्वरे दीर्घ०' (३।२।७२) इत्यनेन पूर्वपदस्य आकारः ॥७४॥

## [१]द्विदण्ड्यादिः ॥७।३।७५॥

म०वृ०–द्विदण्डि इत्यादयः समासा 'इजन्ताः साधवो' भवन्ति । द्वौ दण्डावस्मिन् प्रहरणे [२]द्विदण्डि प्रहरति, [३]उभाबाहु, [४]उभयाबाहु, उभौ हस्तावस्मिन् पाने उभाहस्ति पिबन्ति, एवमुभयाहस्ति,

❀ श्रीहैमलिङ्गानुशासने नपुंसकलिङ्गप्रकरणेऽष्टमश्लोके ।

[५]उभाकर्णि शृणोति, [६]उभयाकर्णि, अन्ते वासोऽस्मिन् स्थाने अन्तेवासि तिष्ठति, अन्तेवासी गुरोरिति ताच्छीलिकान्तोऽन्य एव शब्दः, संहितानि पुच्छान्यस्मिन् सरणे संहितपुच्छि धावन्ति, एकः पादोऽस्मिन् गमने [७]एकपदि गच्छति, समानौ पादावस्मिन् [८]सपदि गच्छति । क्रियाविशेषणाच्चान्यत्र न भवति,-द्वौ दण्डावस्यां शालायां=द्विदण्डा ॥ ७५ ॥

अव०-[१]'द्विदण्डयादिसूत्रोक्तोदाहरणेषु' तिष्ठद्ग्विo' ( ३।१।३६ ) इत्यनेन अव्ययीभावसमासः । [२]द्विदण्डि इत्यत्र निपातनात् 'इच्यस्वरे दीर्घ आच्च' (३।२।७२) इत्यनेन आत्व-दीर्घत्वे अपि न भवतः । [३]उभौ बाहू [४]उभये बाहू अस्मिन्, निपातनात् इच्लोपः । एवमुभापाणि, उभयापाणि; उभाञ्जलि, उभयाञ्जलि ; उभावञ्जली अस्मिन्, उभयेऽञ्जली अस्मिन् ।[५]उभौ कर्णौ,[६]उभये कर्णौ अस्मिन् श्रवणे । [७]एकपदि [८]सपदि इत्यत्र निपातनादेव विभक्तिलुचि पादस्य पद्भावो भवति, सपदीत्यत्र च समानशब्दस्य निपातनादेव सभावो भवति । सपदि इत्यस्याग्रे आच्य पादौ आच्यपदि शेते आचनपूर्वम् आच्य, कोऽर्थः ? प्रसार्य, पादौ प्रसार्य शेते; एवं प्रोह्यपदि अश्वं हस्तिनं वाहयति,प्रोह्य कोऽर्थः ? विवक्षितस्थानं प्रापय्य ॥७५॥

## ऋक्पूःपथ्यपोऽत् ॥७।३।७६॥

म०वृ०-ऋक्, पुर्, पथिन्, अप् इत्येतदन्तात् समासात् 'अत् समासान्तः' स्यात् । [१]अर्धर्चः, [२]उपर्चम्, सवर्च्चं सूक्तम् । पुर्,-[३]श्रीपुरम्, [४]त्रिपुरम् । पथिन्,-[जलस्य पन्थाः] जलपथः, [५]उपपथम्, [६]प्रतिपथम्, विशालपथं नगरम् । अप्,-[७]द्वीपम्, [८]समीपम्, प्रतीपम्, बह्वपं तडागम् ॥७६॥

अव०-[१]ऋचोऽर्द्धम्=अर्द्धर्चः । [२]ऋचः समीपम्=उपर्चम्, 'राजदन्तादिषु' ( ३।१।१४९ ) इति पूर्वनिपातः★ । एवमुच्चारितर्चः । [३]श्रियाः पूः अथवा श्रीश्चासौ पूश्च श्रीपुरम् । एवं विष्णुपुरम्, विष्णस्य पूः विष्णुश्चासौ पूश्चेति वा । [४]तिसृणां पुरां समाहारस्त्रिपुरम् । [५]पथः समीपम्=उपपथम् । [६]पन्थानं प्रति=प्रतिपथम् । पुरपथशब्दाभ्यां सिद्धे पुर् पथिन् इत्येतयोरुपादानमेतद्विषये प्रयोगनिवृत्त्यर्थम् । [७]द्विधा गता आपो अस्मिन्निति द्वीपम्,'द्व्यन्तरनवर्णोपसर्गा०' (३।२।१०९) इत्यनेन अपस्थाने ईप् इत्यादेशः । [८] एवं समीपादिषु ॥७६॥

## धुरोऽनक्षस्य ॥७।३।७७॥

म०वृ०-धुरन्तात्समासात् 'अत् समासान्तः' स्यात्, [१]सा चेद् धूरक्षसम्बन्धिनी न भवति । [राज्यस्य धूः] राज्यधुरा,[२]द्विधुरी, [३]त्रिधुरी, उपधुरम्, महाधुरं शकटम् । अनक्षस्येति किम् ? अक्षधूः ॥७७॥

अव०-[१]सा चेद् 'धूरित्यस्यायं भावः,-अक्षस्य चक्रस्य सम्बन्धिनी, शब्दद्वारकमेतत्, नार्थद्वारकम्; तेन महाधुरं शकटमिति सिद्धम् । [२]द्वयोर्धुरोः समाहारः,[३]तिसृणां धुरां समाहारः ;'तद् बहुल'-मिति 卐वचनात् स्त्रीत्वे सति 'द्विगोः समाहारात्' (२।४।२२) ङी ॥७७॥

## सङ्ख्यापाण्डूदक्कृष्णाद् भूमेः ॥७।३।७८॥

म० वृ०-सङ्ख्यावाचिभ्यः पाण्डूदक्कृष्णशब्देभ्यश्च परो यो भूमिशब्दस्तदन्तात् समासात् 'अत्' स्यात् । [१]द्विभूमम्, [२]त्रिभूमम्, [३]द्विभूमः प्रासादः । [४]पाण्डुभूमम्, [५]पाण्डुभूमो देशः, [६]उदग्भूमः, [७]कृष्णभूमो देशः ॥७८॥

अव०-[१]द्वयोः भूम्योः समाहारः=द्विभूमम् । [२]तिसृणां भूमीनां समाहारः=त्रिभूमम् । [३]द्वे भूमी अस्य =द्विभूमः प्रासादः । [४]"भूमोऽसङ्ख्यात एकार्थः"●

★ चिन्त्यमिदम्, 'प्रथमोक्तं प्राक्' (३।१।१४८) इत्यनेन निर्वाहात् ।

卐 श्रीहैमलिङ्गानुशासनविवरणे उपान्त्यश्लोके ।

● श्रीहैमलिङ्गानुशासने नपुंसकलिङ्गप्रकरणेऽष्टमश्लोके ।

इति लिङ्गपाठात् पाण्डुभूमम्, उदग्भूमम्, कृष्णभूममित्यत्र नपुंसकत्वं सिद्धम्। [४]पाण्डुः भूमिरस्य। [५]एवमुदिची भूमिः=उदग्भूमम्। [६]कृष्णा भूमिरस्य=कृष्णभूमो देशः। (एवम्) कृष्णा भूमिः=कृष्णभूमम् ॥७८॥

### उपसर्गादध्वनः ॥७।३।७९॥

म० वृ०–धातुयोगे यः प्रादिरुपसर्गः, तस्मात्परादध्वन्शब्दाद् 'अत्' स्यात्। [१]प्राध्वं शकटम्, [२]उपाध्वम्, निरध्वम् [३] ॥७९॥

अव०–[१]प्रगतमध्वानं=प्राध्वं शकटम्।(एवम्) प्रगतोऽध्वानम्=प्राध्वो रथः। [२]उपक्रान्तमध्वानम्=उपाध्वम्। [३]एवमत्यध्वम् ॥७९॥

### समवान्धात्तमसः ॥७।३।८०॥

म० वृ०–समवान्धेभ्यः परो यस्तमस् तदन्तात् 'अत्' [ समासान्तः ] स्यात्। [१]सन्तमसम् [२]अवतमसम्, [३]अन्धतमसम् ॥८०॥

अव०–[१]सततं तमः=संतमसम्, अथवा सततं तमसा=संतमसम्, 'प्रात्यवपरि०' (३।१।४७) इत्यादिना तत्पुरुषः, यदि वा सततं तमोऽस्मिन्=संतमसम्। एवमग्रेऽपि। [२]अवहीनं तमोऽवहीनं तमसा वा, अवहीनं तमोऽस्मिन्निति वा अवतमसम्। [३]अन्धशब्दः, अन्धं करोति इति अन्धयति, 'णिज् बहुलम्०' (३।४।४२) इति णिच्, अन्धयतीति अच् प्रत्ययः, अन्धं च तत्तमश्च=अन्धतमसम्, अन्धं तमोऽस्मिन्निति वा अन्धतमसम्, अन्धश्च तमश्च=अन्धतमसमन्धतमसे वा इति प्रयोगद्वयं समाहारे इतरेतरे च ॥८०॥

### तप्तान्ववाद्रहसः ॥७।३।८१॥

म०वृ०–रह इत्यप्रकाश्यं विजनं वा। तप्त, अनु, अव इत्येतत्पूर्वो यो रहःशब्दस्तदन्तात् 'अत्' [समासान्तः] स्यात्। [१]तप्तरहसम्, [२]तप्तरहसः, [३]अनुरहसम्, [४]अनुरहसः, [५]अवरहसम्, अवरहसः [६] ॥८१॥

अव०–[१]तप्तं कोऽर्थः ? तप्ताऽत्र इवाऽनधिगम्यं रहः=तप्तरहसम्। [२]तप्तं रहोऽस्येति तप्तरहसः। [३]अनुगतं रहोऽनुगतं रहसा वा=अनुरहसम्। [४]अनुगतं रहोऽस्येति अनुरहसः। [५]अवहीनं रहोऽवहीनं रहसा वा=अवरहसम्, 'प्रात्यवपरि'० (३।१।४७) इति समासः। [६]अवहीनं रहोऽस्येत्यवरहसः ॥८१॥

### प्रत्यन्ववात् सामलोम्नः ॥७।३।८२॥

म० वृ०–प्रति अनु अव इत्येतत्पूर्वौ यौ सामन्-लोमन्शब्दौ तदन्ताद् 'अत्' स्यात्। [१]प्रतिसामम्, [२]प्रतिसामः; एवमनुसामम्, अनुसामः; अवसामम्, अवसामः। [प्रतिलोमम्] प्रतिलोमः [प्रतिगतं लोमोऽस्य] [अनुलोमम्] अनुलोमः [अवलोमम्] अवलोमः ॥ ८२ ॥

अव०–[१]प्रतिगतं साम=प्रतिसामम्। [२]प्रतिगतं सामास्य=प्रतिसामः। एवमनुसामम्, अनुसामः; अवसामम्, अवसामः। लोम,–प्रतिलोमम्, प्रतिलोमः; अनुलोमम्, अनुलोमः; अवलोमम्, अवलोमः इति परिणा उदाहरणानि ज्ञेयानि। तथाऽव्ययीभावसमासे तु परत्वाद्विकल्पः– साम साम प्रति, 'योग्यतावीप्सा'० (३।१।४०) इत्यनेन समासः अथवा साम्नोऽभिमुख्यम्, 'लक्षणेनाभि'० (३।१।३३) इत्यनेन समासः, प्रतिसाम, प्रतिसामम्; सामानु, अथवा साम्नः समीपम्, 'समीपे' (३।१।३५) इति समासः, यदि वा साम्ना तुल्यायामम्, 'दैर्ध्येऽनुः' (३।१।३४) इति समासः वा, अनुसाम, अनुसामम्। एवं प्रतिलोम, प्रतिलोमम्; अनुलोम, अनुलोमम्। प्रत्यन्वेति किम् ? निर्गतं निष्क्रान्तं वा साम्नः निःषाम वचनम्, निर्दुस्सोः (२।३।३१) इति षत्वम्, निर्लोमा पुरुषः ॥ ८२ ॥

### ब्रह्महस्तिराजपल्याद्वर्चसः ॥७।३।८३॥

म० वृ०–ब्रह्म–हस्ति–राज[१]–पल्येभ्यः परो (यो) वर्चस् तदन्ताद् 'अत्' स्यात्। वर्चस्तेजो बलं वा, [ब्रह्मणो वर्चः=] ब्रह्मवर्चसम्, हस्तिवर्चसम्, राजवर्चसम्, पल्यवर्चसम्। ब्रह्मादिभ्य इति किम् ?

नृपाः [२]सोमार्कवर्चसः । कथं [३]त्विषिमान् [४]राजवर्चस्वी ? समासान्तविधेरनित्यत्वात् । एतच्च 'ऋक्पूः-पथ्यपोऽत्' (७।३।७६) इति निर्देशात् सिद्धम्[५]।८३।

अव०-[१]'कटकृतं स्थानकं पल्यमुच्यते, अथवा पलालवर्त्तिकृतं वा धान्यभाजनं खूरकरूपं पल्यम्, हस्तिविधा ❀धा पिण्डः।[२]सोमार्कवत् वर्चो येषां ते। [३]त्विषिरस्यास्ति। [४]राजवर्चोऽस्यास्तीति। [५]अन्यथा ★ अत्रापि अप्शब्दाद् अत् प्रत्ययः स्यात् ॥८३॥

## प्रतेरुरसः सप्तम्याः ॥७।३।८४॥

म० वृ०-प्रतिशब्दात् परो य उरस् सप्तम्यन्तः तदन्ताद् 'अत्' [समासान्तः] स्यात्। [१]प्रत्युरसम्। सप्तम्या इति किम् ? [२]प्रत्युरः ॥८४॥

अव०-[१]उरसि वर्त्तते प्रत्युरसम्, अत्र विभक्त्यर्थेऽव्ययीभावः; उरसि प्रतिष्ठितं वा प्रत्युरसम्, अत्र तु 'प्रात्यवपरि'० (३।१।४७) इति तत्पुरुषः, परं बाहुलकात्। [२]प्रतिगतं उरः=प्रत्युरः, उरः प्रति वा प्रत्युरः; 'लक्षणेनाभि'० ३।१।३३) इति समासः ॥ ८४ ॥

## अक्ष्णोऽप्राण्यङ्गे[१] ॥७।३।८५॥

म० वृ०-[अक्षिशब्दान्तात् समासात् 'अत्' समासान्तो भवति; अप्राण्यङ्गे] चेदक्षिशब्दः प्राण्यङ्गे न वर्त्तते । [२]लवणाक्षम्, पुष्कराक्षम्, [३]गवाक्षः, [४]रुद्राक्षम्, [५]महिषाक्षो गुग्गुलः, [६]कबराक्षम् । अप्राण्यङ्ग इति किम् ? अजस्याक्षि=] अजाक्षि, वामाक्षि ॥८५॥

अव०-[१]प्राणा विद्यन्ते यस्य स प्राणी, 'अतोनेक०' (७।२।६) इति इन्, प्राणिनोऽङ्गम् (=प्राण्यङ्गम्), न प्राण्यङ्गमप्राण्यङ्गम्, तस्मिन्। ········ ······················ । [२] लवणस्याक्षि=लवणाक्षम्, अथवा लवणमक्षीव=लवणाक्षम्, 'उपमेयं व्याघ्रा'० (३।१।१०२) इति समासः। [३]गोरक्षीव=गवाक्षः। [४]रुद्रस्याक्षीव=रुद्राक्षम्। [५]महिषस्याक्षीव महिषाक्षः। [६]कबरमक्षीव=कबराक्षम्, अश्वानां मुखप्रच्छादनं बहुछिद्रकम् ॥८५॥

## सङ्कटाभ्याम् ॥७।३।८६॥

म० वृ०-सम् कट इतिपूर्वादक्षिशब्दाद् 'अत्' स्यात्। प्राण्यङ्गार्थं वचनम्। [१]समक्षम्, [२]कटाक्षः ॥८६॥

अव०-[१]सङ्गतमक्ष्णा=समक्षम्, समीपमक्ष्णो वा समक्षम्। [२]कटस्याक्षि=कटाक्षः ॥८६॥

## प्रतिपरोऽनोरव्ययीभावात् ॥७।३।८७॥

म० वृ०-प्रति, परस्, अनु इतिपूर्वो योऽक्षिशब्दस्तदन्तादव्ययीभावसमासाद् 'अत्' स्यात्। [१]प्रत्यक्षम्, [२]परोक्षम्, [३]अन्वक्षम्। कथं प्रत्यक्षोऽर्थः परोक्षः कालः इत्यादेरव्ययीभावस्य सत्त्ववचनता ? उच्यते, [४]अभ्रादेराकृतिगणत्वादप्रत्ययेन भविष्यति। अक्षशब्देनेन्द्रियपर्यायेण सिद्धे प्रत्यादिभ्यः परस्याक्षशब्दस्याव्ययीभावे प्रयोगो मा भूदिति वचनम् ।८७।

अव०-[१]अक्षिणी प्रति=प्रत्यक्षम्। [२]परसमानार्थः परस्शब्दोऽव्ययम्, अक्ष्णोः परं=परोक्षम्, अत्ययेऽव्ययीभावः। [३]अक्ष्णः समीपम्। [४]प्रत्यक्षमत्रास्ति इति परिणा ॥८७॥

## अनः ॥७।३।८८॥

म० वृ०-अन् इत्यन्तादव्ययीभावाद् 'अत्' स्यात्। उपराजम्, [उपतक्षम्, आत्मन्यधि=] अध्यात्मम्, [१]प्रत्यात्मम् ॥८८॥

अव०-[१]आत्मानं प्रति, 'लक्षणे'० (३।१।३३) अव्ययीभावः ॥८८॥

## नपुंसकाद्वा ॥७।३।८९॥

म० वृ०-अन्नन्तं यन्नपुंसकं तदन्तादव्ययीभावाद् 'अत्' स्याद्वा [प्रतीतं कर्म=] प्रतिकर्म्मम्, प्रतिकर्म्म, प्रतिसामम्, प्रतिसाम; अनुलोमम्, अनुलोम। पूर्वेण नित्ये प्राप्ते विकल्पः ॥८९॥

❀ हस्त्याहार इत्यर्थः। तदुक्तं श्रीहैमलिङ्गानुशासनविवरणे- "विधा गजान्नमृद्धिः विधानं वेतनं च"।

★ 'ऋक्पूःपथ्यपोत्' (७।३।७६) इति सूत्रेऽपीत्यर्थः।

## गिरि-नदी-पूर्णमास्याग्रहायण्यपञ्चमवर्ग्याद्वा[1] ॥७।३।९०॥

अव०–गिरि, नदी, पौर्णमासी, आग्रहायणी इत्येतच्छब्दान्तात् पञ्चमरहिता ये वर्ग्यास्तदन्ताच्चाव्ययीभावाद् 'अत्' स्यात् वा । अन्तर्गिरि, [2]अन्तर्गिरम् ; उपगिरि, [3]उपगिरम् ; उपनदम् ,[4] उपनदि ; उपपूर्णमासम् , उपपूर्णमासि ; उपाग्रहायणम् , उपाग्रहायणि । [5]अपञ्चमवर्ग्ये.– उपस्रुचम् , उपस्रुक् ॥९०॥

अव०–[1]पञ्चमवर्ग्ये, वर्गे भवाः–'दिगादिदेहांशाद्यः' (६।३।१२४) इति यः प्रत्ययः, पञ्चमाश्च ते वर्ग्याश्च पञ्चमवर्ग्याः । [2]गिरेरन्तः=अन्तर्गिरम् , पारेमध्येऽग्रेऽन्तः षष्ठ्या वा' (३।१।३०) । [3]गिरेः समीपम् । [4]नद्याः समीपम् , 'क्लीबे' (२।४।९७) ह्रस्वः । [5]उपस्रुचम् , उपस्रुक् ; अधिस्रजम् , अधिस्रक् ; मरुतं प्रति=प्रतिमरुतम् , प्रतिमरुत् ; उपदृषदम् ,उपदृशन्; उपसमिधम् , उपसमिद् ,उपककुभम् ,उपककुब् ;एतान्युदाहरणानि अपञ्चमवर्ग्यविषये ज्ञातव्यानि ॥९०॥

## सङ्ख्याया नदी-गोदावरीभ्याम् ॥७।३।९१॥

म० वृ०–सङ्ख्यावाचिशब्दात्परौ यौ नदीगोदावरीशब्दौ तदन्तादव्ययीभावाद् 'अत्' स्यात् । [पञ्च नद्यः समाहृताः] [1]पञ्चनदम् ; द्विगोदावरम् [द्वयोर्गोदावर्योः समाहारः, 'सङ्ख्या समाहारे' (३।१।२८) इति समासः] । इह नदीग्रहणं नित्यार्थम् ॥९१॥

अव०–[1]पञ्चानां नदीनां समाहारः इति वाक्ये पञ्चनदम् ॥९१॥

## शरदादेः ॥७।३।९२॥

म० वृ०–शरदाद्यन्तादव्ययीभावाद् 'अत्' स्यात् । [1]उपशरदम् , [2]उपत्यदम् । अत्रापञ्चमवर्ग्यान्तपाठो नित्यार्थः ॥९२॥

अव०–[1]शरदः समीपम् । (एवम्) प्रतित्यदम् । [2]त्यस्य समीपम्=उपत्यदम् । शरद्,त्यद्, तद्, यद् , किंयत् ,हिरुक् हिमवत् ,उपसद्, सदस् , अदस् , अतस् , मनस् , विपाश् , दृश् , विश् ,उपानह्, अनडुह् , चतुर् , दिव् इति शरदादिगणः ॥९२॥

## जराया जरस् च ॥७।३।९३॥

म०वृ०–जराशब्दादव्ययीभावाद् 'अत्' स्यात् ,तद्योगे जराशब्दस्य 'जरस्' इत्यादेशश्च । [1]उपजरसम् ॥९३॥

अव०–[1]जराया उप समीपम् । प्रतिजरसमित्यपि ॥

## सरजसोपशुनानुगवम् ॥७।३।९४॥

म० वृ०–सरजस उपशुन अनुगव इत्यदन्ता [अव्ययीभावसमासाः] निपात्यन्ते । [1]सरजसमभ्यवहरति[2], [3]उपशुनं तिष्ठति, [4]अनुगवम् ; दैर्घ्यादन्यत्र नात् ,– [5]अनुगु यानम् ॥९४॥

अव०–[1]सह रजसा=सरजसम् , साकल्येऽव्ययीभावः ।[2]'अभ्यवहरति',भुङ्क्ते इत्यर्थः । [3]शुनः समीपम्=उपशुनम् , अत् , निपातनाद् वकारस्य उत्वम् । तथा [4]गामन्वायतम्=अनुगवम् , 'दैर्घ्येऽनुः' (३।१।३४) इत्यव्ययीभावः । [5]गवां पश्चात् अनुगु ।९४।

## जातमहद्वृद्धादुक्ष्णः[1] कर्मधारयात् ॥७।३।९५॥

म० वृ०–जात-महद्- वृद्धेभ्यः परो य उक्षन् तदन्तात् कर्मधारयाद् 'अत्' स्यात् । [2]जातोक्षः,महोक्षः, वृद्धोक्षः ॥९५॥

अव०–[1]उक्षन् , पञ्चमीङसिः, 'अनोऽस्य' (२।१।१०८) इति अकारलोपः । [2]जातश्चासावुक्षा च=जातोक्षः । एवमग्रेऽपि । कर्मधारयादिति किम् ? जातस्योक्षा=जातोक्षा, एवं महोक्षा, वृद्धोक्षा ॥९५॥

## स्त्रियाः पुंसो द्वन्द्वाच्च ॥७।३।९६॥

म० वृ०–स्त्रीशब्दात्परो यः पुम्स्शब्दस्तदन्ताद् द्वन्द्वात्कर्मधारयाच्च 'अत्' स्यात् । [1]स्त्रीपुंसम् , स्त्रीपुंसौ ; कर्मधारयात् ,– [2]स्त्रीपुंसः शिखण्डी, स्त्रीपुंसं विद्धि राक्षसम् ॥९६॥

अव०–[1]स्त्री च पुमांश्चेति द्वन्द्वसमासः ।(एवम्)

स्त्रीपुंसौ। [२]स्त्री चासौ पुमांश्च स्त्रीपुंस इति कर्मधारयः। कौरवपक्षीयः कश्चिद्देवनामा द्रुपदः पुत्रः शिखण्डी। द्वन्द्वादिति किम्? स्त्रियाः पुमान्=स्त्रीपुमान् ॥९६॥

## ऋक्सामर्ग्यजुष-धेन्वनडुह-वाङ्मनसा-ऽहोरात्र-रात्रिंदिव-नक्तंदिवा-ऽहर्दिवोर्वष्ठीव-पदष्ठीवा-ऽक्षिभ्रुव-दारगवम् ॥७।३।९७॥

म० वृ०—ऋक्सामादयो द्वन्द्वा 'अदन्ता' निपात्यन्ते'। [१]ऋक्सामे, [२]ऋग्यजुषम्, [३]धेन्वनडुहौ, [वाक् च मनश्च=] वाङ्मनसे, [अहश्च रात्रिश्च] [४]अहोरात्रः, पुण्याविमावहोरात्रौ, [५]रात्रिंदिवम्, रात्रिंदिवानि पश्यति, [६]नक्तंदिवम्, [७]अहर्दिवम्, ऊर्वष्ठीवम्, पदष्ठीवम्, अक्षिभ्रुवम्, दारगवम्॥९७

अव०–[१]ऋक् च साम च। [२]ऋग् च यजुश्च। [३]धनुश्च अनड्वांश्च। 'ऋक्साम०' इति सूत्रे धेन्वनडुहग्रहणमसमाहारार्थम्, तेन धेन्वनडुहौ धेन्वनडुहाः इति भवति, न धेन्वनडुहम्। समाहारे तु उत्तरसूत्रेणैव सिद्धम्। [४]'अहोरात्रम्', अत्र 'अह्नः' (२।१।७४) इत्यनेन 'न' इत्यस्य रुः, 'घोषवति' (१।३।२१) इत्यनेन रकारस्थाने उः। [५]रात्रिश्च दिवा च=रात्रिंदिवम्, [६]नक्तं च दिवा च=नक्तंदिवम्; निपातनादुभयप्रयोगे पूर्वपदस्य मोऽन्तः। [७]अहश्च दिवा च=अहर्दिवम्। ननु अहन्शब्ददिवाशब्दौ तुल्यार्थौ, तयोश्च "उक्तार्थानामप्रयोग" इति न्यायात् "समानामर्थेनैकशेषः" इत्यनेनैकशेषारम्भाद्वा द्वन्द्वो नोपपद्यते, सत्यम्, पर्यायशब्दयोरपि वीप्सायां निपातनात् द्वन्द्वो भवति। अहर्दिवम् (इति) कोऽर्थः? अहरहरित्यर्थः। ॥ ७॥

## चवर्ग-द-ष-हः समाहारे ॥७।३।९८॥

म० वृ०—चवर्गदकारषकारहकारान्तात् द्वन्द्वात् समाहारे वर्त्तमानाद् 'अत्' स्यात्। [१]वाक्त्वचम्, [२]वाक्समुच्छम्, श्रीस्रजम्, सम्पद्विपदम्, वाक्त्विषम्, छत्रोपानहम्, गोगोदुहम्। [३]छत्रोपानहिनी इति द्वन्द्वलक्षणो मत्वर्थीय इन्। समाहारे इति किम्? प्रावृट्शरद्भ्याम्। द्वन्द्वादित्येव– पञ्चवाक् [४]॥ ९८॥

अव०–[१]वाक् च त्वक् च। [२]'उच्छैन् विवासे' उछ्, क्विप् प्रत्ययः, न क्विप्, क्विपि सति 'अनुनासिके च' ० (४।१।१०८) इति छस्य शप्राप्तिः स्यात्, वाक् च समुच्च। [३]छत्रं चोपानच्च=छत्रोपानहम्, 'चवर्ग' ० इति अत् समासान्तः, छत्रोपानहमस्यास्ति, 'प्राणिस्थादस्वाङ्गा' ० (७।२।६०) इति इन्, ततो ङी। अत्प्रत्ययस्य समासान्तत्वेन द्वन्द्वसमासावयवत्वात् इन् भवतीत्यर्थः। [४]पञ्च वाचः समाहृताः, 'सङ्ख्या समाहारे' (३।१।२८) इति सूत्रेण सङ्ख्यापूर्वो द्विगुरयम् ॥९८॥

## द्विगोरन्नह्नोऽट् ॥७।३।९९॥

म० वृ०–अन्नन्तात् अहन्शब्दान्ताच्च द्विगोः समाहारे वर्त्तमानात् 'अट्' समासान्तो भवति। [१]पञ्चतक्षी, [२]पञ्चतक्षम्; [३]शतराजी, [४]शतराजम्; [५]द्व्यहः, [६]त्र्यहः। द्विगोरिति किम्? [७]सन्तक्षाणः, [८]समह्नः। समाहारे इत्येव– [९]द्व्युक्षा, [१०]त्र्युक्षा, [११]द्व्यह्नः, [१२]त्र्यह्नः ॥९९॥

अव०–[१]पञ्च तक्षाणः समाहृताः=पञ्चतक्षी, [२]पञ्चतक्षम्; 'द्विगोरन्न' ० (७।३।९९) इति अट्, "द्विगुरन्नावन्तान्तो" ★ इति लिङ्गपाठात् विकल्पेन स्त्रीत्वं भवति। एवं [३]शतस्य राज्ञां समाहारः=शतराजी, [४]शतराजम्। [५]द्वयोरह्नोः समाहारो=द्व्यहः, [६]त्रयाणामह्नां समाहारः=त्र्यहः, 'द्विगोरन्न' ० इति अट्। सर्वत्र 'नोऽपदस्य तद्धिते' (७।४।६१) इत्यनेनान्त्यस्वरादिलोपः। [७]समाहृतास्तक्षाणः संतक्षाणः, [८]समाहृतान्यहान्यस्य=समह्नः इत्यत्र 'सर्वांशसङ्ख्या' ० (७।३।११८) इत्यनेन अट्, तथा अहन्

★ श्री हैमलिङ्गानुशासने स्त्रीलिङ्गप्रकरणे पञ्चमश्लोके।

इत्यस्य अह्न आदेशः । [8]द्वाभ्यामुक्षाभ्यां क्रीतो=द्व्युक्षा, एवं[10]त्र्युक्षा. अत्र 'मूल्यैः क्रीते' (६।४।१५०) इति इकण्, 'अनाम्न्य'० (६।४।१४१) इति लुप् । [11]द्वयोरह्नोर्भवो=द्व्यह्न, एवं[12]त्र्यह्नः, अत्र भवे अण्विषये 'सर्वांशसङ्ख्या'० (७।३।११८) इत्यनेननाट् अहन इत्यस्य अह्न आदेशश्च, अणि हि कृते 'द्विगोरनपत्ये'० (६।१।२४) इति अणो लोपः॥९९।

## द्वि-त्रेरायुषः ॥७।३।१००॥

म० वृ०–द्वित्रिभ्यां परो यो आयुःशब्दस्तदन्ताद् द्विगोः समाहारे–'ऽट्' स्यात् । [1]द्व्यायुषम्, त्र्यायुषम्[2] ॥१००॥

---

अव०–[1]द्वयोरायुषोः समाहारः । समाहारे इत्येव– द्वे आयुषी प्रिये यस्य (स) द्व्यायुःप्रियः, त्रीण्यायूंषि प्रियाणि यस्य (स)त्र्यायुःप्रियः ; उत्तरपदे द्विगुत्वम् ।[2]"त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषंयद् देवेषु त्र्यायुषं तन्नोऽस्तु त्र्यायुष"मिति यजुर्वेदे ऋगियम् ॥१००॥

## वाञ्जलेरलुकः ॥७।३।१०१॥

म० वृ०–द्वित्रिभ्यां परो योऽञ्जलिस्तदन्ताद् द्विगो–'रट्' वा स्यात्, यदि स द्विगुस्तद्धितलुगन्तो न भवति । [1]द्व्यञ्जलम्, द्व्यञ्जलिः ; [2]त्र्यञ्जलम्, त्र्यञ्जलिः ; [3]द्व्यञ्जलमयम्, [3]द्व्यञ्जलिमयम्, [3]द्व्यञ्जलरूप्यम्, [3]द्व्यञ्जलिरूप्यम् ; [4]द्व्यञ्जलप्रियः, द्व्यञ्जलिप्रियः । अलुक इति किम् ? [5]द्व्यञ्जलिर्घटः, त्र्यञ्जलिर्घटः । द्विगोरित्येव–[6]द्व्यञ्जलिः, [7]द्व्यञ्जलिकः ॥१०१॥

---

अव०–[1]द्वयोरञ्जल्योः समाहारो द्व्यञ्जलम्, एवं[2]त्र्यञ्जलम् ; अत्राट् । [3]द्वाभ्यामञ्जलिभ्यामागतम्, 'नृहेतुभ्यो रूप्यमयटौ वा' (६।३।१५६) इति रूप्यमयटौ । [4]द्वावञ्जली प्रियौ यस्य स द्व्यञ्जलप्रियः । [5]द्वाभ्यामञ्जलिभ्यां क्रीतम्, 'मूल्यैः क्रीते'(६।४।१५०) इकण्, 'अनाम्न्य'० (६।४।१४१) इति लुप् ।[6]द्वयोरञ्जलिः=द्व्यञ्जलिः । [7]द्वावञ्जली अस्य=द्व्यञ्जलिकः ॥१०१॥

## खार्या वा ॥७।३।१०२॥

म० वृ०–प्रथग्योगाद् द्वित्रेरिति निवृत्तम् । [1]खारीशब्दान्तात् द्विगोरलुको[2]–'ऽट्' स्याद्वा । [3]द्विखारम्, पक्षे [4]द्विखारि ; एवं [5]पञ्चखारम्, पञ्चखारि ; द्विखारमयम्, द्विखारीमयम्, पञ्चखाररूप्यम्, पञ्चखारीरूप्यम् ; [द्वे खार्यौ प्रिये अस्य=द्विखारप्रियः, द्विखारीप्रियः, [द्वे खार्यौ धनमस्य] द्विखारधनः, द्विखारीधनः, । द्विगोरित्येव– उपखारि, अधिखारि ॥१०२॥

---

अव०–[1]खन्यते इति खारी, 'द्वारशृङ्गारभृङ्गारकह्लारकान्तारकेदारखारडादयः' (उणा० ४११) इत्युणादिसूत्रेण आरट्प्रत्ययः, स च डित् । टकारो ङ्यर्थः । [2]'खार्या वा' इति सूत्रेऽर्थे 'द्विगोरलुको' इत्युक्तं यत् तत्र अलुक इत्यस्य प्रत्युदाहरणं न भवति, विशेषाभावात् । तथाहि– यतः तद्धितलुकि कृतायां अट्प्रत्ययाभावेऽपि 'ङ्यादेर्गौणस्य०' (२।४।९४) इति ङीप्रत्ययस्य लुकि सत्यां द्विखारः द्विखारमिति प्रयोगद्वयं पुंनपुंसकयोः । स्त्रियां तु 'परिमाणात्तद्धितलुकि०' (२।४।२३) इत्यादिना ङीप्रत्यये कृते द्विखारी इति स्त्रीलिङ्गे भवति । द्वे खार्यौ मानमस्याः स्यादिति वाक्ये 'मात्रट्' (७।१।१४५) इत्यनेन मात्रट् प्रत्ययः, 'द्विगोः संशये च' (७।१।१४४) इत्यनेन मात्रट लुप्यते, तदनन्तरं 'परिमाणात्तद्धित०' इत्यनेन ङी, द्विखारी इति प्रयोगसिद्धिः । एतच्च त्रैरूप्यमटि कृतेऽकृतेऽपि भवति इति भावः । इदन्तात् खारि इति शब्दात् ङीप्रत्यये खारी इत्येके । तदा त्वस्त्येव विशेषः । यतः तद्धितलुकि इदन्ता प्रकृतिरवतिष्ठते खन्यते–'कुद्रिकुद्रयादयः'(उणा०६९५) इत्युणादिसूत्रेण निपातनात् आरिप्रत्ययः, स च डित्, खारि इति शब्दसिद्धिः, [3]द्वयोः खार्योः समाहारो=द्विखारम्, अत्र अट्, पक्षे[4]द्विखारि, अत्र 'क्लीबे' (२।४।९७) इत्यनेन ह्रस्वः, द्विखारि इति सिद्धम्, मतान्तरे द्विखारि इति

पुंलिङ्गे, ❀ अत्र च 'गोश्चान्ते०' ( २।४।९५ ) इति ह्रस्वः, द्विखारी इति स्त्रीलिङ्गे, अत्र च 'गोश्चान्ते०' इति ह्रस्वः, 'इतोऽक्त्यर्थात्' (२।४।३२) इति ङीः, द्विखारी इति सिद्धम्। [४]एवं 'पञ्चखारम्', पञ्चानां खारीणां समाहारः, अत्राट्, पक्षे [५]पञ्चखारि, 'क्लीबे' (२।४।९७) ह्रस्वः। अत्रापि मतान्तरे रूपद्वयं ज्ञेयं पूर्ववत् । पञ्चखारिः इति पुंस्त्वे पञ्चखारी इति स्त्रीत्वे द्रष्टव्यम् ॥१०२॥

## वार्धाच्च ॥७।३।१०३॥

म०वृ०—अर्द्धशब्दात्परो यः खारीशब्दस्तदन्ताच्च समासादलुको-'ऽट्' स्याद्वा। 'समेंऽशेऽर्द्धं नवा' (३।१।५४) इत्यर्द्धशब्दे (यः) प्रतिपदं समासः ["लक्षणप्रतिपदोक्तयो"-रिति न्यायात् ] उक्तस्तत्रायं विधिः [ अट्प्रत्ययो भवतीत्यर्थः ] । अर्द्धं खार्याः=[१]अर्द्धखारम्, [२]अर्द्धखारी। चकारो द्विगोरनुकर्षणार्थः, तेनोत्तरत्र द्वयमप्यनुवर्त्तते[३] ॥ १०३॥

प्रव०—[१]'अर्धखारम्' इत्यत्र "परलिङ्गो द्वन्द्वोऽशी" इति लिङ्गपाठवचनात् ★ क्लीत्वं किं न भवतीत्याह सूरिः,-अदन्तस्य विधानसामर्थ्यात् न स्त्रियां वृत्तिः। [२]अर्धखारी इत्यत्र तु अंशिसमासवर्जनात् 'गोश्चान्त०' २।४।९६) इत्यनेन न ह्रस्वः। [३]उत्तरत्र=उत्तरसूत्रे 'नावः'(७।३।१०४) इत्यत्र 'अर्द्धात्' इति 'द्विगोः' इति च द्वयमनुवर्त्तते ॥१०३॥

## नावः ॥७।३।१०४॥

म०वृ०—अर्द्धात्परो यो नौशब्दस्तदन्ताद् द्विगोश्च नौशब्दान्तात् लुको'ऽट्' स्यात्। अर्द्धं नावः =(अर्धनावम्) [१]अर्धनावी । द्विगोः,-[२]द्विनावम्, [३]पञ्चनावम्;[४]द्विनावमयम्,[५]द्विनावरूप्यम्,[६]द्विनावप्रियः, [६]द्विनावधनः। अलुक इत्येव-[७]द्विनौः। द्विगोरित्येव- द्वयोर्नौः=द्विनौः ॥१०४॥

प्रव०—[१]अर्धनावम् अर्द्धनावी इत्यत्र "अर्द्धपूर्वपदनाव" इति वचनात् 卐 स्त्रीक्लीबत्वम्। [२]द्वयोर्नावोः समाहारो=द्विनावम् । [३]पञ्चानां नावां समाहारः। [४]द्वाभ्यां नौभ्यामागतम्, 'नृहेतु०' (६।३।१५६) मयट्रूप्यौ । [५]द्वे नावौ प्रियेऽस्य। [६]द्वे नावौ धनमस्य। [७]द्वाभ्यां नौभ्यां क्रीतः, 'मूल्यैः क्रीते' (६।४।१५०) इकण्; अनाम्न्य०' (६।४।१४१) इकण्लोपः ॥१०४॥

## गोस्तत्पुरुषात् ॥७।३।१०५॥

म० वृ०—गोशब्दान्तात्तत्पुरुषादलुको-'ऽट्' स्यात् । [राज्ञो गौः=] राजगवः, [ राज्ञो गौः= ] राजगवी; [१]पुङ्गवः, [२]स्त्रीगवी; [ गामतिक्रान्तः ] अतिगवः, अतिगवी, [३]पञ्चगवम्, [४]पञ्चगवमयम्, [४]पञ्चगवरूप्यम्, पञ्चगवधनः । अलुक इत्येव-[५]पञ्चगुः ॥ १०५ ॥

प्रव०—[१]पुमांश्चासौ गौश्च=पुङ्गवः। [२]स्त्री चासौ गौश्च=स्त्रीगवी। [३]पञ्च च ते गावश्च=पञ्चगवम् । [४]पञ्चभ्यो गोभ्य आगतम्। [५]पञ्चभिर्गोभिः क्रीतः, 'मूल्यैः क्रीते' ( ६।४।१५० ) इकण्, 'अनाम्न्य०' (६।४।१४१) इति ॥१०५॥

## राजन्सखेः ॥७।३।१०६॥

म० वृ०—पृथग्योगादलुक इति निवृत्तम् । राजन् सखि इत्येतदन्तात्तत्पुरुषाद् 'अट्' स्यात् । देवराजः, [२]महाराजः, [३]अतिराजः, [४]अतिराजी, [५]पञ्चराजी, [६]पञ्चराजः, पञ्चराजी, पञ्चराजप्रियः। राजसखः, महासखः, अतिसखः, अतिसखी, पञ्चसखम्, [७]पञ्चसखः, पञ्चसखी, पञ्चसखप्रियः । राजन्निति नान्तनिर्देशादनकारान्ते नाट्, [मद्राणां राज्ञी=] मद्रराज्ञी, [महती चासौ राज्ञी च=] महाराज्ञी ॥१०६॥

❀ ये केचित् द्विगुसमाहारे पुंस्त्वमपीच्छन्ति, तन्मतमाश्रित्येदं ज्ञेयम्। स्वमते तु "अन्यस्तु सर्वो नपुंसकः" इति नपुंसकत्वमेव। एवमेवाग्रे "द्विखारी इति स्त्रीलिङ्गे" इत्यत्रापि बोध्यम्।

★ श्रीहैमलिङ्गानुशासने परलिङ्गप्रकरणे प्रथमश्लोके।

卐 श्रीहैमलिङ्गानुशासने स्त्रीक्लीबलिङ्गप्रकरणे तृतीयश्लोके।

अव०–[1]देवानां राजा=देवराजः । [2]महांश्चासौ राजा च=महाराजः । [3]अतिक्रान्तो राजानमतिराजः । [4]अतिक्रान्ता राजानम्=अतिराजी । [5]पञ्चानां राज्ञां समाहारः=पञ्चराजी । [6]पञ्चभी राजभिः क्रीतः=पञ्चराजः, 'मूल्यैः'० ( ६।४।१५० ) इकण् ,'अनाम्न्य'०(६।४।१४१) इति। एवं पञ्चसखिशब्देन सह समासः । [7]पञ्चभिः सखीभिः क्रीतः=पञ्चसखः, इकण् , 'अनाम्न्य'० इति लुप् । 'राजन्सखेः'इति सूत्रे विशेषोऽयं लिख्यते– सखीशब्दादीकारान्तात् अटि सत्यसति वा न रूपभेदः । तथाहि-पञ्चानां सखीनां समाहार इति वाक्ये 'क्लीबे' (२।४।९७) इत्यनेन ह्रस्वे कृते ततः सखिशब्दादिदन्तादेव 'राजन्सखेः' इत्यनेनाटि कृते पञ्चसख इति रूपं सिद्धम् । तथा सखीमतिक्रान्त इति वाक्ये कृते सखीशब्दात् 'राजन्सखेः' इत्यनेनाटः प्राप्त्यभावे 'गोश्चान्ते'० (२।४।९६) इति ह्रस्वे कृते सखि इति इदन्तात् अट् प्राप्नोत्येव । तथा पञ्चानां सखी इत्यपि वाक्ये कृतेऽटि अडभावेऽपि तत्पुरुषस्योत्तरपदप्रधानत्वात् पञ्चसखी इत्येव रूपम् । तथा पञ्च सख्यः प्रिया यस्येति वाक्ये 'गोश्चान्ते'० (२।४।९६) ह्रस्वे 'राजन्सखेः' इत्यनेनाटि कृते 'अवर्णेवर्णस्य' (७।४।६८) इति इकारलोपे पुनरपि 'अणञेये'० (२।४।२०) इत्यनेन ङी शकटाभिप्रायेण, यतः तेन शकटेन वाक्यस्यापि नामत्वं विहितमस्ति, अतः पञ्चसखीप्रिय इति रूपं बभूव । यदा तु अट् नानीयते तदापि पञ्चसखीप्रिय इत्येव रूपम् । एवमन्यदपि रूपाभेदहेतुकमूह्यम् ॥१०६॥

## राष्ट्राख्याद् ब्रह्मणः ॥७।३।१०७॥

म० वृ०–राष्ट्रवाचिनः परो यो ब्रह्मन् तदन्तात् तत्पुरुषाद्'अट्' स्यात् । [1]सुराष्ट्रब्रह्मः, [2]काशिब्रह्मः । राष्ट्राख्यादिति किम् ? देवब्रह्मा नारदः ॥१०७॥

---

अव०–[1]सुराष्ट्रेषु ब्रह्मा=सुराष्ट्रब्रह्मः । [2]काशिषु ब्रह्मा=काशिब्रह्मः । यः सुराष्ट्रेषु वसति स सौराष्ट्रिको ब्राह्मणः, सुराष्ट्रब्रह्म इत्यर्थः । एवं काशिब्रह्मः, अवन्तिब्रह्मः । आख्यग्रहणं राष्ट्रवाच्यर्थम् ॥१०७॥

## कु-महद्भ्यां वा ॥७।३।१०८॥

म० वृ०–कु महत् इत्येताभ्यां परो यो ब्रह्मन् तदन्तात् तत्पुरुषाद्'अट्' वा स्यात् । [1]कुब्रह्मः, कुब्रह्मा ; महाब्रह्मः, महाब्रह्मा ; पापो महांश्च ब्राह्मण एवमुच्यते ॥१०८॥

---

अव०–[1]महान् ब्रह्मा, महांश्चासौ ब्रह्मा च इति वा ॥१०८॥

## ग्रामकौटात्तक्ष्णः ॥७।३।१०९॥

म० वृ०–ग्रामकौटाभ्यां परो यस्तक्षन्शब्दस्तदन्तात्तत्पुरुषाद्'अट्' स्यात् । [1]ग्रामतक्षः, [2]कौटतक्षः ॥१०९॥

---

अव०–[1]ग्रामश्च तक्षा च=ग्रामतक्षः, ग्रामसाधारण इत्यर्थः । [2]कुटी=शाला, तस्यां भवः=कौटः,कौटस्तक्षा=कौटतक्षः,यः स्वगृहे एव कर्म करोति स्वतन्त्रः न कस्यचिदायत्तः स कौटतक्षः ॥१०९॥

## गोष्ठातेः शुनः ॥७।३।११०॥

म० वृ०–गोष्ठातिभ्यां परो यः श्वन् तदन्तात् तत्पुरुषाद्'अट्'स्यात् । [1]गोष्ठश्वः, [2]अतिश्वो वराहः अतिजवनः, अतिश्वः सेवकः सुष्ठु स्वामिभक्तः, अतिश्वी सेवा, अतिनीचेत्यर्थः ॥११०॥

---

अव०–[1]गोष्ठे श्वा=गोष्ठश्वः । [2]अतिक्रान्तः श्वानम्=अतिश्वः ॥११०॥

## प्राणिन उपमानात् ॥७।३।१११॥

म० वृ०–प्राणिवाचिन उपमानात् परो यः श्वन् तदन्तात्तत्पुरुषाद् 'अट्' स्यात् । [1]व्याघ्रश्वः, [2]सिंहश्वः । प्राणिन उपमानादिति पूर्वपदविज्ञानादिह नाट् [वानरः श्वेव=] वानरश्वा । प्राणिन इति किम् ? [फलकमिव श्वा] फलकश्वा । उपमानग्रहणं किम् ? मैत्रश्वा[3] ॥१११॥

---

अव०–[1]व्याघ्र इव व्याघ्रः, व्याघ्रश्चासौ श्वा च व्याघ्रश्वः,[2]सिंह इव सिंहः,सिंहश्चासौ श्वा च सिंहश्वः, 'उपमेयं व्याघ्राद्यैः साम्यानुक्तौ' (३।१।१०२) इति

समासः, (अथवा) मयूरव्यंसकादित्वात् समासः प्रथमोक्तत्वेन उपमेयशब्दस्य श्वन् इत्यस्य पूर्वनिपाते प्राप्ते'प्राणिन उपमानात्'इति वचनात् श्वन्शब्दस्य परनिपातो भवति। [3]मैत्रस्य श्वा मैत्रश्चासौ श्वा चेति वा। प्राणी उपमानभूतो यः श्वा (शब्दः) तदन्तात्तत्पुरुषादिच्छन्त्येके,-व्याघ्रः श्वेव=व्याघ्रश्वः, एवं सिंहश्वः, पुरुषश्वः। तन्मते वानरश्वा इत्यत्र समासान्तविधेरनित्यत्वादट् समासान्तो न भवति ॥१११॥

## अप्राणिनि ॥७।३।११२॥

म० वृ०-अप्राण्यर्थे उपमानवाची यः श्वा तदन्तात्तत्पुरुषाद्'अट्' स्यात्। [1]आकर्षश्वः, [2]फलकश्वः। अप्राणिनीति किम्? [वानरः श्वेव=] वानरश्वा। उपमानादिति किम्? आकर्षश्वा[3] ।११२।

अव०-[1]श्वेव श्वा, आकर्षश्चासौ श्वा च= आकर्षश्वा, द्यूतकारोपकरणविशेषे आकर्ष इत्युच्यते, आकर्ष्यते शारा अस्मिन् इत्याकर्षः, 'व्यञ्जनाद् घञ्' (५।३।१३२)। 'प्राणिन उपमानात्' (७।३।१११) इति पूर्वसूत्रे उपमानादिति पूर्वपदस्य विशेषणम्, इह तु 'अप्राणिनि' इति सूत्रे शुन इत्यस्य। [2]श्वेव श्वा, फलकश्चासौ श्वा च=फलकश्वः। [3]आकर्षे श्वा,(एवं) फलके श्वा, कोऽर्थः? शारिः। कुक्कुरवच्छारेऽपि श्वन्शब्दो रूढो नोपमानम् ॥११२॥

## पूर्वोत्तरमृगाच्च सक्थ्नः ॥७।३।११३॥

म० वृ०-पूर्वोत्तरमृगेभ्यः उपमानवाचिभ्यश्च परो यः सक्थिशब्दस्तदन्तात्तत्पुरुषाद् 'अट्' स्यात्। [1]पूर्वसक्थम्, [2]उत्तरसक्थम्, [3]मृगसक्थम्; उपमानात्,-फलकसक्थम्[4] ॥११३॥

अव०-[1]पूर्वं सक्थि, अथवा सक्थ्नः पूर्वं =पूर्वसक्थम्, 'पूर्वापरप्रथम'० (३।१।१०३) इत्यनेन तत्पुरुषकर्मधारयसमासः। [2]उत्तरं सक्थि सक्थ्नः उत्तरं वा=उत्तरसक्थम्, 'पूर्वापराधरोत्तर'० (३।१।५२) इति समासः। [3]मृगस्य सक्थि। [4]फलकमिव फलकम्, फलकं च तत् सक्थि च= फलकसक्थम्, व्याघ्रश्वादिवत् समासः ॥११३॥

## उरसोऽग्रे ॥७।३।११४॥

म० वृ०-अग्रं मुखं प्रधानं वा। तत्र वर्त्तमानो य उरस्शब्दस्तदन्ताद्'अट्' स्यात्। [1]अश्वोरसं दृश्यते, सेनायाः अश्वा मुखमित्यर्थः। [2]अश्वोरसं वर्जयेत्, अश्वानां मुखमप्रदेशमित्यर्थः। [3]अश्वोरसम्, अश्वानां प्रधानमित्यर्थः। एवं हस्त्युरसम्। अग्रे इति किम्? अश्वोरसि आवर्त्तः ॥११४॥

अव०-[1]अश्वाश्च ते उरश्च=अश्वोरसम्। [2]अश्वानामुरः। [3]अश्वानामुरः ॥११४॥

## सरोऽनोऽश्मायसो जाति-नाम्नोः ॥७।३।११५॥

म० वृ०-सरस् अनस् अश्मन् अयस् इत्यन्तात्तत्पुरुषाद्'अट्'स्यात् जातौ वाच्यायां नाम्नि च विषये। इदं च यथासम्भवं विशेषणम्। [1]जालसरसम्, [2]मण्डूकसरसम; एवं नाम्नी सरसी। [उपगतमनः] उपानसमित्यत्रविशेषस्य संज्ञा जातिर्वा। महानसमिति पाकस्थानस्य संज्ञा[3]। [4]गोनसम् जातिः। स्थूलाश्मः, अमृताश्मः, कनकाश्मः; [5]एतेऽश्मजातिविशेषाः। कालायसम्, [6]लोहितायसम्; अयोजातिविशेषौ। जातिनाम्नोरिति किम्? परमसरः, सदनः, सदश्मा। कथं [7]बिन्दुसरः, बकसरः; ? नैषा संज्ञा, रूढ्यात्र संज्ञाविज्ञानं सूर्पनखीवत् ।११५।

अव०-[1]जालप्रधानं सरो जालसरसम्। [2]मण्डूकप्रधानं सरः। [3]अथवा महानसमिति राज्ञ उपस्थितं-ढौकनं तस्य संज्ञा इत्येके। [4]गवामनः (इव= गोनसम्), सर्पजातिविशेषः। [5]पिण्डाश्म इत्यपि संज्ञा जातिर्वा। [6]लोहितायसमिति नाम इत्येके प्राहुः। [7]प्रसिद्धिवशादेव बिन्दुसर एवमुच्यते, न तु एतदेव नाम-अभिधानं तडागस्य ॥११५॥

## अह्नः ॥७।३।११६॥

म० वृ०-अहन्शब्दात्तत्पुरुषाद् 'अट्' स्यात्। परमाहः, उत्तमाहः, एकाहम्, [1]पुण्याहम्, [2]सुदिनाहम् ॥११६॥

अव०-[1]पुण्यं च तदहश्च=पुण्याहम्। "पुण्या-

हृदेहौ" ❀ इति लिङ्गपाठात् पुन्नपुंसकत्वं पुण्याह-शब्दस्य । तथा [२]शोभनं निर्दोषकल्याणगुणोपेतं दिनं दिनकरश्चन्द्रो वा अभ्राद्यनुपहतोऽस्मि-न्नहनि इति सुदिनम्, सुदिनमहः=सुदिनाहम्, "खलं भुवि तथा लक्षं वेध्येऽहः सुदिनैकतः"★इति लिङ्गपाठात् सुदिनाहशब्दस्य नपुंसकत्वम् ॥११६॥

## सङ्ख्यातादहश्च वा ॥७।३।११७॥

म०वृ०–सङ्ख्यातशब्दात्परो योऽहन् तदन्तात्तत्पुरुषाद् 'अट्',तस्य चाहन्शब्दस्य अह्न इत्यादेशो वा स्यात् । [सङ्ख्यातमहः=] सङ्ख्याताह्नः, सङ्ख्याताहः । चकार उत्तरत्राह्नादेशस्याट्सन्नियोगशिष्टत्वार्थः। अन्यथा ह्यटोऽपवादोऽह्नादेशो विज्ञायेत । तथा च स्त्रियां ङीर्न स्यात् ॥११७॥

अव०–अह्नादेशार्थं 'सङ्ख्यातादहश्च' इति वचनं कृतम् ,अट् च (? तु) पूर्वेणापि सिद्धोऽस्ति । चकार इत्यादि (?) ॥११७॥

## सर्वा-ऽशसङ्ख्याऽ-व्ययात् ॥७।३।११८॥

म०वृ०–सर्वशब्दादंश एकदेशस्तद्वाचिभ्यः सङ्ख्यावाचिभ्यः अव्ययेभ्यश्च परो योऽहन् तदन्ताद्'अट्' अहन्शब्दस्य नित्यमह्नादेशश्च स्यात् । [ सर्वमहः=] सर्वाह्णः, अंश,-[१]पूर्वाह्णः,[२] अपराह्णः, [३]सर्वाह्णः । [४]मध्याह्नः, [५]सायाह्नः । सङ्ख्या,–द्व्यह्नः[६] पटः,द्व्यह्नी अष्टका, त्र्यह्नः, त्र्यह्नी, [७]द्व्यह्नप्रियः, [८]द्व्यह्नजातः । अव्यय,–[९]अत्यह्नः,[१०]अत्यह्नी कथा,[११]निरह्नी वेला, [१२]व्यह्नः, [१३]व्यह्नी ॥११८॥

अव०–[१]पूर्वमहः=पूर्वाह्णः , [२]अपरमह्नोऽपराह्णः, अट् , अहन् इत्यस्य अह्न इत्यादेशः, 'अतोऽह्नस्य' (२।३।७३) इति अहन् इत्यस्य नकारस्य णत्वम्। [३]सर्वाह्णः इत्यत्रापि णत्वम् । [४]मध्यमह्नः=मध्याह्नः । [५]सायमह्नः=सायाह्नः,'सर्वांशसङ्ख्या०' (७।३।११८) इत्यनेन (अट्),'सायाह्नादयः'(३।१।५३) इत्यनेन निपातः सायम्शब्दस्य साय इति । [६]द्वयोरह्नोर्भवः । [७]द्वे अहनी प्रिये यस्य । द्वे [८]अहनी जातस्य=द्व्यह्नजातः, 'कालो द्विगौ च'० (३।१।५७) इति तत्पुरुषः । [९]अतिक्रान्तमह्नोऽत्यह्नः । [१०]अहरतिक्रान्ता=अत्यह्नी कथा। (एवं) निष्क्रान्तोऽह्नो=निरह्नः । [११]निष्क्रान्ताऽह्नो=निरह्नी वेला । [१२]विगतमह्नो=व्यह्नः । [१३]विगताऽह्नो=व्यह्नी ॥११८॥

## सङ्ख्यातैक-पुण्य-वर्षा-दीर्घाच्च रात्रेरत् ॥७।३।११९॥

म० वृ०–सङ्ख्यात एक पुण्य वर्षा दीर्घ इति शब्देभ्यश्चकारात् सर्वांशादिभ्यश्च परो यो रात्रिशब्दस्तदन्तात्तत्पुरुषाद् 'अत्' प्रत्ययः समासान्तः स्यात् । [सङ्ख्याता रात्रिः=]संख्यातरात्रः,[१]एकरात्रः,पुण्यरात्रः, [वर्षाणां रात्रिः]वर्षारात्रः, दीर्घरात्रः, [सर्वा रात्रिः=] सर्वरात्रः, अंशरात्रः,अपररात्रः, द्वितीयरात्रः, संख्या,-[२]द्विरात्रः,[द्वे रात्री प्रिये ऽस्य=] द्विरात्रप्रियः,द्विरात्रजातः । अव्यय,–[ अतिक्रान्ता रात्रिः ] अतिरात्रः, [ निष्क्रान्तो रात्रेः= ] नीरात्रः, नीरात्रा । अटि प्रकृते सत्यपि यत् अत् विधानं तत् स्त्रियां ङ्यभावार्थम् ॥११९॥

अव०-[१]"एकाद्रात्रः समाहारे"इति [हैमलि०]पाठात् पुंनपुंसकत्वम्– एकरात्रमपि । [२]द्वयो राञ्योः समाहारो द्विरात्रः,एवं त्रिरात्रः । (एवम्) द्वयो रात्र्योर्भवो द्विरात्रः, एवं त्रिरात्रः ; द्विरात्रा,त्रिरात्रा; 'भवे'(६।३। १२३) अण् , 'द्विगोरनपत्ये'०(६।१।२४) अणलोपः । 'सङ्ख्यातैक०' सूत्रे यत् एकग्रहणं कृतं तत् सङ्ख्याग्रहणेन अनेन एकस्याग्रहणार्थम् । तेन 'सर्वांशसङ्ख्याऽव्ययात्' (७।३।११८) इति पूर्वसूत्रे सङ्ख्याशब्देन एकशब्दस्याग्रहणं भवति । अन्यथा 'सर्वांशसङ्ख्याव्ययात्' (७।३।११८) इत्यत्र सङ्ख्याग्रहणेन एकशब्दस्य ग्रहणे सति 'एकाह्नः' इति प्रयोगः स्यात् । वैयाकरणानां तु 'एकाह'मिति इष्टमस्ति, एकमहः, एकाहम् ; 'अह्नः' (७।३।११६) इति सूत्रेण अट् प्रत्ययः ॥११९॥

## पुरुषायुष-द्विस्ताव-त्रिस्तावम् ॥७।३।१२०॥

❀ श्रीहैमलिङ्गा० पुंक्लीबलिङ्गप्रकरणे पञ्चत्रिंशत्तमश्लोके । ★ श्रीहैमलिङ्गा० नपुंसकलिङ्गप्रकरणेऽष्टमश्लोके ।

म० वृ०-एतेऽप्रत्ययान्ता निपात्यन्ते । [पुरुषस्यायुः] पुरुषायुषम्, [1]द्विस्तावा, [2]त्रिस्तावा वेदिः; वेद्यामनयोः प्रयोगः ॥१२०॥

अव०-[1]द्वौ वारौ द्विः, 'द्वित्रिचतुरः सुच्' (७।२।११०), द्विस्, तावती, द्विस्तावती इति वाक्ये द्विस्तावा, एवं [2]त्रिस्तावती=त्रिस्तावा; निपातनात् अती इति लुप्यते । प्रकृतिविकृती इति नाम्ना यागविशेषौ, ततः प्रकृतौ यज्ञविशेषे यावती वेदिः तावती द्विगुणा विकृतिनामयज्ञविशेषे । (एवं प्रकृतौ) यावती वेदिः तावती त्रिगुणा भवति (विकृतौ) यज्ञे । अन्यत्रापि दृश्यते,- द्विस्तावोऽग्निः, त्रिस्तावोऽग्निः ॥१२०॥

## श्वसोऽवसीयसः ॥७।३।१२१॥

म० वृ०-श्वस् इति शब्दात्परो यो वसीयस्शब्दस्तदन्तात्तत्पुरुषाद् 'अत्' स्यात् । [1]श्वोवसीयसं कल्याणम् ॥१२१॥

अव०-[1]वसुमत् शब्दः, अयमेषां प्रकृष्टः (वसुमान्), 'गुणाङ्गा०' (७।३।९) इति ईयसुप्रत्ययः, 'विन्मतोर्णीष्ठेयसौ लुप्' (७।४।३२) इत्यनेनान्त्यस्वरादेर्मतोश्च लोपे वसीयस् इति शब्दः, शोभनं वसीयः=श्वोवसीयसम् ॥१२१॥

## निसश्च श्रेयसः ॥७।३।१२२॥

म० वृ०-निस्शब्दात् श्वस्शब्दाच्च परो यः श्रेयस्शब्दस्तदन्तात्तत्पुरुषाद् 'अत्' स्यात् । निश्चितं श्रेयो=निःश्रेयसं निर्वाणम्, [शोभनं श्रेयः=] श्वःश्रेयसम् ॥१२२॥

## नञव्ययात्सङ्ख्याया डः ॥७।३।१२३॥

म० वृ०-नञोऽव्ययाच्च परो यः सङ्ख्याशब्दस्तदन्तात्तत्पुरुषात् 'डः' समासान्तः स्यात् । [न दश इति वाक्ये] अदशाः, [न नव=] अनवाः, न्यूना दश न्यूना नव इत्यर्थः । नञ्पूर्वः सङ्ख्याशब्दः स्वभावात् हीनतायां दृश्यते । अव्यय,-[1]निस्त्रिंशः खड्गः, [2]निस्त्रिंशानि वर्षाणि, [3]निस्त्रिंशान्यहानि, [4]निःपञ्चाशानि । नञव्ययादिति किम्? गोत्रिंशत् । [अव्ययद्वारेण सिद्धेऽपि] नञ्ग्रहणं [पूर्वोक्तेन सूत्रेण] 'नञ्तत्पुरुषात्' (७।३।७१) इति प्रतिषेधे प्राप्ते प्रतिप्रसवार्थम् ॥१२३॥

अव०-[1]निर्गतस्त्रिंशतोऽङ्गुलिभ्यो=निस्त्रिंशः खड्गः, निस्त्रिंश इव क्रूरकर्मा निस्त्रिंशः खलः । [2]त्रिंशतो निर्गतानि निस्त्रिंशानि वर्षाणि । [3]एवं निस्त्रिंशान्यहानि, [4]निःपञ्चाशानि । तत्पुरुषादिति किम्? न विद्यन्ते त्रयो यस्य सोऽत्रिः, शोभनास्त्रयोऽस्य=सुत्रिः, निर्गतास्त्रिंशदस्य=निस्त्रिंशत् । अत्र तत्पुरुषाधिकाराभावे 'पूजास्वतेः०' (७।३।७२) इत्यनेन प्रतिषेधे सत्यपि विशेषविधित्वादेष्वपि उदाहरणेषु डः प्रत्ययः स्यात् ॥१२३॥

## सङ्ख्या-ऽव्ययादङ्गुलेः ॥७।३।१२४॥

म० वृ०-सङ्ख्याया अव्ययाच्च परो योऽङ्गुलिस्तदन्तात्तत्पुरुषाद् 'डः' स्यात् । [1]द्व्यङ्गुलम्, द्व्यङ्गुलप्रियः । अव्यय,-[2]निरङ्गुलम्, [3]अत्यङ्गुलम् । तत्पुरुषादित्येव- उपाङ्गुलिः, पञ्चाङ्गुलिर्हस्तः । कथमात्माङ्गुलम्, प्रमाणाङ्गुलम्, उत्सेधाङ्गुलम्? अङ्गुलशब्दः प्रमाणवाची प्रकृत्यन्तरम् । यथा स्वेनाङ्गुलप्रमाणेनाङ्गुलानां शतं पुमान्[4] ॥१२४॥

अव०-[1]द्वयोरङ्गुल्योः समाहारो=द्व्यङ्गुलम्, एवं त्र्यङ्गुलम्, 'सङ्ख्याव्यया०' इति डः; अथवा द्वे अङ्गुली प्रमाणमस्य इति वाक्ये 'प्रमाणान्मात्रट्' (७।१।१४०) इत्यनेन मात्रट्, 'द्विगोः संशये च' (७।१।१४४) इत्यनेन मात्रट् लुप्यते, ततः समासान्तो डः, एवमपि द्व्यङ्गुलम् त्र्यङ्गुलं प्रयोगः । [2]निर्गतमङ्गुलेः । [3]अङ्गुलमतिक्रान्तम् । [4]हस्तोऽङ्गुलचतुर्विंशत्या इत्यपि पुराणप्रयोगः ॥१२४॥

## बहुव्रीहेः काष्ठे टः ॥७।३।१२५॥

म० वृ०-अङ्गुल्यन्ताद् बहुव्रीहेः काष्ठे वर्त्त-

मानात् 'टः' समासान्तः स्यात् । [1]द्व्यङ्गुलम्, चतुरङ्गुलम्, पञ्चाङ्गुलम्, [2] अङ्गुलसदृशावयवं धान्यकण्टकादीनां विक्षेपणकाष्ठमेवमुच्यते । बहुव्रीहेरिति किम्? [उपाङ्गुलि] [3]अत्यङ्गुला यष्टिः । काष्ठे इति किम्? पञ्चाङ्गुलिर्हस्तः ॥१२५॥

अव०–[1]द्वे अङ्गुली यस्य द्व्यङ्गुलम् । एवं त्र्यङ्गुलम्, चतुरङ्गुलम्, पञ्चाङ्गुलम् । [2]एवं दीर्घाङ्गुली यष्टिः, तीक्ष्णाङ्गुली यष्टिः । अयं विशेषो 'बहुव्रीहेः०' इति सूत्रे । [3]अङ्गुलमतिक्रान्ता अत्यङ्गुली, 'सङ्ख्याव्ययादङ्गुलेः' (७।३।१२४) इति डः । अङ्गुलि इति इकारान्तनिर्देशादङ्गुली इति ईकारान्तशब्दात् टो न भवति, यथा द्वावङ्गुलीसदृशाववयवौ यस्य तत् द्व्यङ्गुलीकम्; 'ऋन्नित्यदितः' (७।३।१७१) इत्यनेन कच्, द्व्यङ्गुलीकं दारु इत्यत्र 'न कचि' (२।४।१०५) इत्यनेन ह्रस्वाभावः ॥१२५॥

## सक्थ्यक्ष्णः स्वाङ्गे ॥७।३।१२६॥

म० वृ०–स्वाङ्गवाची यः सक्थिशब्दोऽक्षिशब्दश्च तदन्ताद् बहुव्रीहौ 'टः' स्यात् । [1]दीर्घसक्थः; गौरसक्थः; गौरसक्थी । विशालाक्षः, विशालाक्षी; कमलाक्षः, कमलाक्षी; [2]स्वक्षः । स्वाङ्ग इति किम्? दीर्घसक्थि शकटम्, स्थूलाक्षिरिक्षुः[3] । बहुव्रीहेरित्येव–सदक्षि ॥१२६॥

अव०–[1]दीर्घं सक्थि अस्य=दीर्घसक्थः । एवमन्येऽपि । [2]शोभनमक्षि अस्य । (एवम्) स्वक्षी । [3]अप्राणिस्थत्वादस्वाङ्गताऽत्र ॥१२६॥

## द्वि-त्रेर्मूर्ध्नो वा ॥७।३।१२७॥

म० वृ०–द्वित्रिभ्यां परो यो मूर्धन् तदन्ताद् बहुव्रीहेः 'टः' स्यात् वा । द्विमूर्धः, द्विमूर्धा; त्रिमूर्धः, त्रिमूर्धा; द्विमूर्धी स्त्री ॥१२७॥

अव०–बहुव्रीहेरित्येव–द्वयोर्मूर्धा द्विमूर्धा ॥१२७॥

## [1]प्रमाणी-सङ्ख्याड्डः ॥७।३।१२८॥

म० वृ०–प्रमाणीशब्दान्तात् सङ्ख्यावाचिशब्दान्ताच्च बहुव्रीहेः 'डः' स्यात् । स्त्री प्रमाणी येषां ते स्त्रीप्रमाणाः कुटुम्बिनः, भार्याप्रमाणाः श्रेणयः, [3]कल्याणप्रमाणः । सङ्ख्या,– द्वित्राः, पञ्चषाः, द्विदशाः, त्रिदशाः, [4]आसन्नदशाः, [5]अदूरदशाः, [6]उपदशाः, [7]उपगणाः । सङ्ख्यान्तस्य प्रतिपदोक्तस्य बहुव्रीहेर्ग्रहणादिह डो न भवति,– [8]अत्रिः, सुत्रिः, प्रियपञ्चानः, प्रियषषः ॥१२८॥

अव०–[1]प्रमाणशब्देन सिद्धे प्रमाणीशब्दान्तात् कजभावार्थम् 'प्रमाणीसङ्ख्याड्डः' (७।३।१२८) इति वचनं कृतम् । 'ऋन्नित्यदितः' (७।३।१७१) इत्यनेन कच्प्राप्तिः । [2]श्रेणयः प्रकृतिलोका ❀ उच्यन्ते । [3]कल्याणी प्रमाणमस्य । [4]आसन्ना दश येषां येभ्यो वा ते आसन्नदशाः, नव वा एकादश वा इत्यर्थः; [5]अदूरदशा इत्यपि; 'आसन्नादूराधिक'० (३।१।२०) इत्यनेन बहुव्रीहिः । [6]उप समीपे दश येषां ते उपदशाः, नव एकादश वा, [7]एवमुपगणाः, 'अव्ययम्' (३।१।२१) इत्यनेन बहुव्रीहिः । [8] न विद्यन्ते त्रयोऽस्य ॥१२८॥

## सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरश्रैणीपदा-ऽजपद-प्रोष्ठपद-भद्रपदम् ॥७।३।१२९॥

म०वृ०–सुप्रातादयो बहुव्रीहौ 'डान्ता' निपात्यन्ते । [1]सुप्रातः पुमान्, [2]सुश्वः, [3]सुदिवः, [4]शारिकुक्षः, [5]चतुरस्रः, [6]एणीपदः, अजपदः, प्रोष्ठपदः, भद्रपदः ॥१२९॥

अव०–[1]शोभनं कर्म प्रातरस्य=सुप्रातः । [2]शोभनं कर्म श्वोऽस्य=सुश्वः । [3]शोभनं कर्म दिवा अस्य=सुदिवः । [4]शारेरिव कुक्षिरस्य=शारिकुक्षः । [5]चतस्रोऽस्रयः यस्य=चतुरस्रः । [6]एण्या इव पादौ यस्य ॥१२९॥

## पूरणीभ्यस्तत्प्राधान्येऽप् ॥७।३।१३०॥

❀ प्रकृतिशब्दः शिल्पिवाची, शिल्पिनां गणः श्रेणिरुच्यते । तदुक्तमभिधानचिन्तामणिकोशे-"कारुस्तु[1] कारी[2] प्रकृतिः,[3] शिल्पी[4] श्रेणिस्तु तद्गणः" ।

म० वृ०-पूरणप्रत्ययान्तः स्त्रीलिङ्गशब्दः पूरणी। तदन्ताद् बहुव्रीहे-'रप्' प्रत्ययः समासान्तः स्यात्, तत्प्राधान्ये=तस्याः पूरण्याः प्राधान्ये,(यदि)समासेनोच्यमानोऽर्थः प्रधानं भवति । [1]कल्याणीपञ्चमा रात्रयः, एवं कल्याणीदशमाः, कल्याणीतुर्याः,कल्याणीतुरीयाः । पूरणीभ्य इति किम् ? द्वितीयाकल्याणीकाः[2]। स्त्रीत्वनिर्देश इति किम् ? कल्याणपञ्चमका दिवसाः[3]। तत्प्राधान्य इति किम् ? कल्याणपञ्चमकः पक्षः । पकारो 'नाप्प्रियादौ' (३।२।५३) इति पर्युदासार्थः ॥१३०॥

अव०-[1]कल्याणी पञ्चमी रात्रिर्यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । एवं कल्याणीदशमा रात्रयः, कल्याणीतुर्याः, कल्याणीतुरीयाः, कल्याणीद्वितीया रात्रयः । अत्र रात्रयः समासार्थः, तासु रात्रिषु पञ्चमीदशम्यादितिथयोऽपि रात्रित्वेनानुप्रविष्टा इति प्रधानम् । [2]द्वितीया भार्या कल्याणी यासां भार्याणां ताः द्वितीयाकल्याणीकाः । अत्र पूरणीप्रत्ययत्वात् 'तद्धिताककोपान्त्य'० (३।२।५४) इति पुंवद्भावप्रतिषेधः, 'शेषाद्वा' (७।३।१७५) इति कच् । [3]कल्याणः पञ्चमो येषु । एवं कल्याणद्वितीयकान्यहानि इत्यपि ज्ञेयम् । 'पूरणीभ्य०' इत्यत्र बहुवचनं व्याप्त्यर्थम् । तेन कल्याणीपञ्चमा रात्रय इत्यादिषु 'ऋन्नित्यदितः' (७।३।१७१) इति परोऽपि कच् न भवति ॥१३०॥

## नञ्-सु-व्युप-त्रेश्चतुरः ॥७।३।१३१॥

म० वृ०-नञ्-सु-व्युपत्रिभ्यः परो यश्चतुर्शब्दस्तदन्ताद् बहुव्रीहे-'रप्' स्यात् । [1]अचतुरः, [2]सुचतुरः, [3]विचतुरः, [4]उपचतुराः, [5]त्रिचतुराः । समासान्तविधेरनित्यत्वादिह नाप्,- [6]त्रिचत्वाः, [7]उपचत्वाः ॥१३१॥

अव०-[1]अविद्यमानानि अदृश्यानि वा चत्वारि यस्य स अचतुरः । [2]सुदृश्यानि शोभनानि वा चत्वारि यस्य स सुचतुरः । [3]विसदृशानि विगतानि वा चत्वारि यस्य स विचतुरः । [4]चत्वारः समीपे येषां संख्येयानां ते उपचतुराः । [5]त्रयो वा चत्वारो वा=त्रिचतुराः । [6]त्रयश्चत्वारो यस्य स त्रिचत्वाः उन्मुग्धः । [7]उपगताश्चत्वारो येन स उपचत्वाः ॥१३१॥

## अन्तर्बहिर्भ्यां लोम्नः ॥७।३।१३२॥

म० वृ०-अन्तर्बहिस्भ्यां परो यो लोमन् तदन्ताद् [बहुव्रीहेः] 'अप्' स्यात् । [1]अन्तर्लोमः, बहिर्लोमः [2]प्रावारः ॥१३२॥

अव०[1]अन्तर्लोमान्यस्य । [2]प्रावार इत्यत्र "वृगो वस्त्रे" (५।३।५२) इति विकल्पसामर्थ्यात् 'भावाकर्त्रोः' (५।३।१८) इति घञ् भवति ॥१३२॥

## भान्नेतुः ॥७।३।१३३॥

म० वृ०-भान्नक्षत्रवाचिशब्दात्परो यो नेतृशब्दः तदन्ताद् बहुव्रीहे-'रप्' स्यात् । [1]मृगनेत्राः, पुष्यनेत्रा रात्रयः। नेत्रशब्देनैव सिद्धे नेतृशब्दात् कच् मा भूदिति वचनम् ॥१३३॥

अव०-[1]मृगो नेता आसां रात्रीणां ताः मृगनेत्राः । एवं पुष्यनेत्राः ॥१३३॥

## नाभेर्नाम्नि ॥७।३।१३४॥

म० वृ०-नाभ्यन्ताद् बहुव्रीहे-'रप्' स्यान्नाम्नि[1] । [2]पद्मनाभः, हेमनाभः, [3]वज्रनाभः, हिरण्यनाभः। नाम्नीति किम् ? [4]विकसितवारिजनाभिः । [नाभेरधः=] अधोनाभं प्रहृतवानित्यव्ययीभावेऽपि तिष्ठद्ग्वादिषु तथा पाठात् सिद्धम् ॥१३४॥

अव०-[1]अवन्तेन शब्देन चेत् संज्ञा गम्यते । [2]पद्मं नाभावस्य=पद्मनाभः । एवमूर्णनाभः, ऊर्णा नाभौ यस्य स ऊर्णनाभः, 'ङ्यापो बहुलम्'० (२।४।९९) इति ह्रस्वः । [3]वज्रनाभः इत्यत्र यदि 'पूर्वपदस्थान्ना०'(२।३।६४) इति णत्वं स्यात् तदा संज्ञा न प्रतीयेत इति न णत्वम् । क्षुभ्नादित्वाद् णत्वनिषेधः । [4]विकसितं च तत् वारिजं च, विकसितवारिजवन्नाभिरस्य ॥१३४॥

## नञ्बहोर्ऋचो माणवचरणे ॥७।३।१३५॥

म० वृ०–नञ्बहुभ्यां परत ऋच्शब्दा-'दप्' स्याद्यथासंख्यं माणवे चरणे च वाच्ये। अनृचो माणवः, बह्वृचश्चरणः ॥१३५॥

अव०–'ऋक्पूःपथ्यपोऽत्' (७।३।७६) इत्येव सिद्धे नियमार्थमिदं 'नञ्बहो०' इति वचनम् ।१३५।

## नञ्-सु-दुर्भ्यः सक्ति-सक्थि-हलेर्वा ॥७।३।१३६॥

म० वृ०–नञ्सुदुर्भ्यः परे ये सक्तिसक्थि-हलिशब्दास्तदन्ताद् बहुव्रीहे-'रप्' वा स्यात्। [१]असक्तः, असक्तिः, सुसक्तिः, दुःसक्तः, दुर्सक्तिः। एवमसक्थः, असक्थिः इत्यादि। [२]अहलः, अहलिः, सुहलः, सुहलिः, दुर्हलः। नञ्सुदुर्भ्य इति किम्? [३]गौरसक्थी स्त्री, बहुहलिः पुरुषः। हलसक्तशब्दाभ्यां सिद्धे कजभावार्थं वचनम्। तेन अहलक इत्यादि न भवति ॥१३६॥

अव०–[१]'षञ्जं सङ्गे' सञ्जनं=सक्तिः, अविद्यमाना सक्तिरस्य=असक्तः। [२]अहल इति हलशब्देनापि सिद्धे यत् सूत्रे हलि इत्युपादानं तदेवं ज्ञापयति अहल इत्यत्र न केवलं समासान्तहलिशब्दान्न कच्, हलशब्दादपि कच् न भवति। [३]गौरं सक्थि अस्याः, 'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) इति टः ॥१३६॥

## प्रजाया अस् ॥७।३।१३७॥

म० वृ०–नञादिभ्यः परो यः प्रजाशब्दस्तदन्ताद् बहुव्रीहेः 'अस्प्रत्ययः' समासान्तः स्यात्। अप्रजाः, अप्रजसौ, अप्रजसः, एवं सुप्रजसौ, दुःप्रजसौ ॥१३७॥

## मन्दा-ऽल्पाच्च मेधायाः ॥७।३।१३८॥

म० वृ०–मन्दाल्पाभ्यां परतो मेधाशब्दाद् [बहुव्रीहेः] 'अस्' स्यात्। मन्दमेधाः, मन्दमेधसः; अल्पमेधाः, अमेधाः, सुमेधाः, दुर्मेधाः ॥१३८॥

## जातेरीयः सामान्यवति ॥७।३।१३९॥

म० वृ०–जातिशब्दान्ताद् बहुव्रीहे-'रीयः' समासान्तः स्यात्, सामान्यवति=सामान्याश्रयेऽन्यपदार्थे वाच्ये। ब्राह्मणो जातिरस्य [१]ब्राह्मणजातीयः, एवं[२] क्षत्रियजातीयः, दुर्जातीयः, नानाजातीयः, किञ्जातीयः। सामान्यवतीति किम्? [३]बहुजातिर्ग्रामः अजातीय इत्यत्र तु सामान्यवानेवान्यपदार्थः। प्रतिषेधस्तु नञर्थः। कथं [४]पितृस्थानीयः, गुरुस्थानीयः; ? स्थानीयं दुर्गमितिवत् स्थीयतेऽस्मिन्निति स्थानीयमधिकरणप्रधानेन स्थानीयशब्देन भविष्यति ॥१३९

अव०–[१]सामान्यं ब्राह्मणत्वादिः जातिरेव ब्राह्मणजातीय इत्यत्रोदाहरणे ब्राह्मणशब्देन ब्राह्मणजातिः कोऽर्थः? ब्राह्मणत्वमुच्यते। एवं [२]क्षत्रियजातीय इत्यादिष्वपि भावना कार्या। [३]बहुजातिर्ग्रामः, अत्र ग्रामो न सामान्यवान्, किन्तु तत्स्था ग्रामस्थाः पुरुषा उच्यन्ते। [४]बहुलमिति सूत्रेणाधिकरणेऽपि अनीयः प्रत्ययः, स्थानीयमित्येवं निष्पाद्य पितेव स्थानीयः पितृस्थानीयः, एवं गुरुरिव स्थानीयो गुरुस्थानीयः ॥१३९॥

## भृतिप्रत्ययान्मासादिकः ॥७।३।१४०॥

म० वृ०–भृतौ वर्त्तमानात् शब्दात् यः प्रत्ययः कृतस्तदन्तात्परो यो मासशब्दस्तदन्ताद् 'इकः' समासान्तः स्यात्। [१]पञ्चकमासिकः, [२]सप्तकमासिकः, [३]विंशकमासिकः, [[४]त्रिंशकमासिकः] [५]शत्यमासिकः, [६]शतिकमासिको भृत्यः ॥१४०॥

अव०–भृतिग्रहणं किम्? वर्षासु भवो वार्षिकः, वार्षिकमासकः, 'शेषाद्वा' (७।३।१७५) कच्। प्रत्ययग्रहणं किम्? भृतिर्मासोऽस्य भृतिमासकः। [१]पञ्चन्शब्दः, पञ्च द्रम्मादि भृतिरस्य पञ्चकः, 'सोऽस्य भृतिर्वस्नांशम्' (६।४।१६८) इति सूत्रोक्त-यथाविहितमिकणादयो भवन्तीत्यक्षरबलात् 'सङ्ख्याडतेश्च'० (६।४।१३०) इत्यनेन कप्रत्ययः, एवं [२]सप्तकः, ततः पञ्चको मासोऽस्य कर्मकरस्य पञ्चकमासिकः, एवं सप्तकमासिको भृत्यः कर्मकरः। एवं सर्वत्र। [३]विंशत्या क्रीतं विंशकम्, [४]एवं त्रिंशता क्रीतं त्रिंशकम्; 'त्रिंशद्विंशतेर्डकोऽसंज्ञायामार्हदर्थे'

(६।४।१२९) इत्यनेन इकः,ततो त्रिंशको मासोऽस्ये-त्यादि। [४]शतेन क्रीतं शत्यम्, [५]शतेन क्रीतं शतिकम् ; अथवा शतमर्हतीति शत्यः, शतिकः ; 'शतात्केवलादतस्मिन्येकौ'(६।४।१३१)इत्यनेन यः, इकः ; शत्यः शतिको मासोऽस्य शत्यमासिकः [ शतिकमासिको भृत्यः] ॥१४०॥

## [१]द्विपदाद्धर्मादन् ॥७।३।१४१॥

म० वृ०–धर्मशब्दान्ताद् द्विपदाद् बहुव्रीहे–'रन्' समासान्तः स्यात् । [२]साधुधर्म्मा, [३]क्षत्रियधर्म्मा, [४]अनन्तधर्मा, विनाशधर्मा, [५]साक्षात्कृतधर्माणः । द्विपदादिति किम् ? [६]परमस्वधर्म्मः ॥१४१॥

अव०–[१]द्वे पदे यत्र बहुव्रीहौ स तथा,तस्मात् । [२]साधूनामिव धर्मोऽस्य=साधुधर्मा । [३]क्षत्रिय इव धर्मोऽस्य । [४]अनन्तो धर्मोऽस्य । [५]असाक्षात्कृतः साक्षात्कृतः, अत्र ' साक्षादादिश्च्व्यर्थे ' ( ३।१। १४) इत्यनेन गतिसंज्ञोऽयं शब्दः, 'गतिकन्यस्तत्पुरुषः' (३।१।४२) इत्यनेन तत्पुरुषसमासः, ततः साक्षात्कृतो धर्मो येषां ते साक्षात्कृतधर्माणः । केचिद् 'द्विपदाद्धर्मा'-दिति सूत्रे विकल्पमिच्छन्ति । तन्मते कल्याणधर्म्मा,कल्याणधर्मकः ; तद्धर्मा,तद्धर्मकः ; विपरीतधर्मा, विपरीतधर्मकः इति प्रयोगा भवन्ति । इह कस्मान्न भवति परमः स्वधर्मोऽस्य=परमस्वधर्मः? तत्राह–प्रत्यासत्तेर्द्विपदस्य बहुव्रीहेः (इत्यादि), सूत्रे धर्मादिति भणनात् यदि धर्मशब्द एवोत्तरपदं भवति तदा अन् स्यात् । अत्र तु स्वधर्म इत्येवोत्तरपदमिति न भवति । [६]परमः स्वो धर्मोऽस्य=परमस्वधर्मः ॥१४१॥

## सु-हरित-तृण-सोमाज्जम्भात्[१] ॥७।३।१४२॥

म०वृ०–सु-हरित-तृण-सोमेभ्यः परो यो जम्भस्तदन्ताद् बहुव्रीहे-'रन्'स्यात् । [२]सुजम्भा,[३]हरितजम्भा, [४]तृणजम्भा, [५]सोमजम्भा ॥१४२॥

अव०–[१]जम्भशब्दोऽभ्यवहार्यवचनो दंष्ट्रावचनो वा, उभयत्र पुंस्त्रीलिङ्गः । [२]शोभनो जम्भो जम्भा वाऽस्य । अभ्यवहार्ये– [३]हरितं जम्भो जम्भा वाऽस्य , दंष्ट्रार्थे तु हरितवत् जम्भो जम्भा वाऽस्य । एवं [४]तृणं जम्भो जम्भा वाऽस्य,तृणवत् जम्भो जम्भा वाऽस्य । [५]सोमो जम्भो जम्भा वाऽस्य,सोम इव जम्भो जम्भा वाऽस्य । स्वादिभ्यः इति किम् ? चारुजम्भः,पतितजम्भः ॥१४२॥

## दक्षिणेर्मा [१]व्याधयोगे ॥७।३।१४३॥

म० वृ०–दक्षिणेर्मा इति शब्दोऽनन्तो निपात्यते, व्याधेन योगे सति । [२]दक्षिणेर्मा मृगः । व्याधयोग इति किम् ? दक्षिणेर्मं शकटम्, [३]दक्षिणेर्मः पशुः ॥१४३॥

अव०–[१]व्याधेन मृगमारकेन योगः । [२]ईर्मं बहु व्रणं वा उच्यते, दक्षिणमङ्गमीर्ममस्य, अथवा दक्षिणेऽङ्गे ईर्ममस्य । [३]दक्षिणमीर्मं बहु व्रणं वा यस्य ॥१४३॥

## सुपूत्युत्सुरभेर्गन्धादिद् गुणे ॥७।३।१४४॥

म० वृ०–सु-पूत्युत्-सुरभिभ्यः परो यो गन्धशब्दो गुणे वर्त्तते तदन्ताद् बहुव्रीहे–'रित्'समासान्तः स्यात् । शोभनो गन्धो गुणोऽस्य सुगन्धि चन्दनम्, पूतिगन्धि करञ्जम्, [वृक्षविशेषः] उद्गन्धि कमलम्, सुरभिगन्धि द्रव्यम् । स्वादिभ्य इति किम् ? तीव्रगन्धं हिङ्गु, उद्गन्धा वचा । गुण इति किम् ? [शोभना गन्धा कुष्ठादयोऽस्य=] सुगन्ध आपणिकः । इत् इत्यत्र तकार उच्चारणार्थः ॥१४४॥

अव०–उत्तरत्र'वागन्तौ'(७।३।१४५) इति सूत्रे [ आगन्तोः ] वावचनादिह 'सुपूत्युत्०' सूत्रे स्वाभाविकशब्दात् प्रत्ययो भवतीत्यर्थः ॥१४४॥

## वागन्तौ ॥७।३।१४५॥

म० वृ०–स्वादिभ्यः पर आगन्तावाहार्ये गुणे वर्त्तते यो गन्धशब्दस्तदन्ताद् बहुव्रीहेर्वा 'इत्'स्यात् सुगन्धि, सुगन्धं वा शरीरम्, [ पूतिर्गन्धोऽस्य=] पूतिगन्धि, पूतिगन्धं जलम्, उद्गन्धिः, उद्गन्ध

आपणः, सुरभिगन्धि सुरभिगन्धो वा पवनः ।१४५।

### वाऽल्पे ॥७।३।१४६॥

म० वृ०–अल्पेऽर्थे यो गन्धशब्दस्तदन्ताद् बहुव्रीहेर्वा 'इत्' स्यात् । सूपस्य गन्धो मात्राऽस्मिन् सूपगन्धि, सूपगन्धं भोजनम् , अल्पसूपमित्यर्थः । एवं [१]दधिगन्धि, दधिगन्धं वा भोजनम्[२] ॥१४६॥

अव०–[१]दध्नो गन्धो मात्राऽस्मिन् भोजने करम्बलक्षणे ।[२](एवम् ) माल्यगन्धिः माल्यगन्धो वा उत्सवः । 'वाल्पे' (७।३।१४६) इति सूत्रे सूपगन्धीत्याद्युदाहरणेषु सर्वेषु असामानाधिकरण्येऽपि उष्ट्रमुखादित्वाद् बहुव्रीहिः ॥१४६॥

### वोपमानात् ॥७।३।१४७॥

म०वृ०–उपमानात्परो यो गन्धस्तदन्ताद् 'इत्' स्याद्वा । [१]उत्पलगन्धि, उत्पलगन्धं वा मुखम् ।१४७

अव०–[१]उत्पलस्येव गन्धोऽस्य । एवं करीषगन्धि करीषगन्धं वा शरीरम् ॥१४७॥

### पात्पादस्याहस्त्यादेः ॥७।३।१४८॥

म० वृ०–हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य बहुव्रीहौ 'पाद्' इत्यादेशः समासान्तः स्यात् । व्याघ्रस्येव पादावस्य=व्याघ्रपाद् । अहस्त्यादेरिति किम् ? हस्तिन इव पादावस्य=हस्तिपादः, अश्वपादः ॥१४८॥

अव०–हस्तिन् , अश्व, कटोल, कटोलक, कण्डोल, कण्डोलक, गण्डोल, गण्डोलक, गण्ड, महेला, दासी, गणिका, कुसूल, कपोत, जाल, जल इति हस्त्यादिगणः ॥१४८॥

### कुम्भपद्यादिः ॥७।३।१४९॥

म० वृ०–कुम्भपद्यादिशब्दाः कृतपात्समासान्ताः [ बहुव्रीहयः ] ङयन्ता एव निपात्यन्ते । [१]कुम्भपदी, शतपदी । येऽत्रोपमानपूर्वास्तेषां पूर्वेण, सङ्ख्यापूर्वाश्च ये तेषामुत्तरेण सिद्धे, यदिह वचनं तेन'वा पादः'(२।४।६) इति ङीविकल्पो न भवति[२] ॥१४९॥

अव०–[१]कुम्भाविव पादावस्याः=कुम्भपदी, एवं जालपदी, एकपदी, शतपदी, सूत्रपदी, स्थूणापदी, मुनिपदी, शितिपदी, आर्द्रपदी, गोधापदी, कलसीपदी, दासीपदी, विष्णुपदी, कृष्णपदी, कुणिपदी,गुणिपदी, द्रोणपदी,सकृत्पदी, सूकरपदी, शुचिपदी, सूचिपदी, विपदी, अपदी, निष्पदी, अष्टापदी, अशीतिपदी इति कुम्भपद्यादिगणः । शतं पादा यस्याः सा शतपदी । सूत्रवत् पादौ यस्याः सा सूत्रपदी । स्थूणावत् पादौ यस्याः सा । एवं गोधावत् पादौ यस्याः। कलसीवत् पादौ यस्याः। दासीवत् पादौ यस्याः। विष्णुवत् पादौ यस्याः । अष्टौ पादा यस्याः अष्टापदी । अत्र संज्ञायां गम्यमानायां'नाम्नि'(३।२।७५)सूत्रेण दीर्घः। असंज्ञायां तु निपातनाद्दीर्घो भवति । [२]विकल्पो न भवतीत्यस्याग्रे कथमेकपादिति ? केचिदिहैकपदीशब्दं न पठन्ति, तत उत्तरसूत्रेण 'सुसङ्ख्यात्' ( ७।३।१५०) इत्यनेन भविष्यति ॥१४९॥

### सुसङ्ख्यात् ॥७।३।१५०॥

म० वृ०–सुपूर्वस्य सङ्ख्यापूर्वस्य ( च ) पादशब्दस्य बहुव्रीहौ 'पाद्' आदेशः स्यात् । [१]सुपात् , द्विपात्[२] , चतुष्पात् । स्त्रियां तु 'वा पादः' (२।४।६) इति पक्षे ङी–[३]सुपदी, सुपात् ; [४]द्विपदी, द्विपात् ; [५]त्रिपदी, त्रिपाद् ॥१५०॥

अव०–[१]शोभनौ पादावस्य । [२](एवम् ) त्रिपात् । [३]शोभनौ पादावस्याः । [४]द्वौ पादावस्याः । [५]त्रयः पादा अस्याः । 'सुसङ्ख्यात्'(७।३।१५०) पाद इत्यस्य पाद् आदेशः । ङयां परे 'यस्वरे पादः पद०' (२।१।१०२) इत्यनेन पद् इत्यादेशः ॥१५०॥

### वयसि दन्तस्य दतृ ॥७।३।१५१॥

म०वृ०–सुपूर्वस्य संख्यापूर्वस्य च दन्तशब्दस्य बहुव्रीहौ वयसि गम्यमाने 'दतृ' इत्यादेशः समासान्तः स्यात् । [१]सुदन् कुमारः,[२]सुदती कुमारी,[३]द्विदन् बालः,[४]षोडन् ।वयसीति किम् ? सुदन्तो [५]दाक्षिणात्यः, द्विदन्तः कुञ्जरः । ऋकारो [६]ङी-[७]नोऽन्तार्थः ॥१५१॥

अव०–[1]शोभना: सुसंस्थाना: सुजाता: समस्ता वा दन्ता अस्य सुदन्। [2] एवं सुदती। [3]द्वौ दन्तावस्य द्विदन्। एवं त्रिदन्। [4]षड् दन्ता अस्य षोडन्, 'एकादशषोडशषोड०' ( ३।२।९१ ) इति सूत्रेण ष् इत्यस्य उत्वं दकारस्य डकारश्च, षोडन् इति सिद्धम्। [5]दक्षिणा, दक्षिणस्यां भवो दाक्षिणात्य:, 'दक्षिणापश्चात्पुरसस्त्यण्' ( ६।३।१३ ) इति त्यण्, 'कौण्डिन्यागस्त्ययो:०' (६।१।१२७) इति निर्देशात् पुंवद्भावस्य अभाव:। [6]'अधातूदृदित:' ( २।४।२ ) इति ङी। [7]'ऋदुदित:' ( १।४।७० ) इति नोऽन्त: ॥१५१॥

## स्त्रियां नाम्नि ॥७।३।१५२॥

म० वृ०–बहुव्रीहौ स्त्रियां स्त्रीलिङ्गे नाम्नि विषये दन्तशब्दस्य 'दतृ' आदेश: स्यात्। [अय इव दन्ता अस्या:] अयोदती, फालदती, परशुदती : एवं नामा काचित्। स्त्रियामिति किम्? चक्रदन्त:, नागदन्त:। नाम्नीति किम्? समदन्ती, स्निग्धदन्ती ['नासिकोदरौष्ठ०' (२।४।३९) इति ङी] ॥१५२॥

## श्यावा-ऽरोकाद्वा ॥७।३।१५३॥

म० वृ०–श्यावा-ऽरोकाभ्यां परो यो दन्तशब्दस्तस्य 'दतृ' आदेशो वा स्यात्, नाम्नि। [1]श्यावदन्, श्यावदन्त:; [2]अरोकदन्, अरोकदन्त: ॥१५३॥

---

अव–[1]श्यावा: कपिशा दन्ता अस्य। [2]अरोका निर्दीप्तयो निश्छिद्रा वा दन्ता अस्य ॥१५३॥

## वाऽग्रान्त-शुद्ध-शुभ्र-वृष-वराहा-ऽहि-मूषिक-शिखरात् ॥७।३।१५४॥

म० वृ०–अग्रान्तेभ्य: शुद्धादिशब्देभ्यश्च परो यो दन्तशब्दस्तस्य 'दतृ' आदेशो वा स्यात्। [1]कुड्मलाग्रदन्, कुड्मलाग्रदन्त:; [2]शिखराग्रदन्, शिखराग्रदन्त:; [3]शुद्धदन्, शुद्धदन्त:; शुभ्रदन्, शुभ्रदन्त:; [वृषस्येव दन्ता अस्य=] वृषदन्, वृषदन्त:; [वराहस्येव दन्ता अस्य=] वराहदन्, वराहदन्त:; अहिदन्, अहिदन्त:; मूषिकदन्, मूषिकदन्त:; [4]शिखरदन्, शिखरदन्त: ॥१५४॥

---

अव०–अत्र सूत्रे योगविभागात् नाम्नीति निवृत्तम्। [1]कुड्मलस्याग्रं=कुड्मलाग्रम्, कुड्मलाग्रमिव दन्ता अस्य=कुड्मलाग्रदन्। [2]शिखरस्याग्रं=शिखराग्रम्, शिखराग्रा दन्ता अस्य शिखराग्रदन्। [3]शुद्धा दन्ता अस्य। [4]"पक्वदाडिमबीजाभं माणिक्यशिखरं विदु:" ॥१॥ शिखरवत्–रक्तमाणिक्यवत् दन्ता अस्य ॥१५४॥

## सम्प्राज्जानोर्ज्ञुज्ञौ ॥७।३।१५५॥

म० वृ०–सम्प्राभ्यां परस्य जानुशब्दस्य 'ज्ञु ज्ञ' इत्यादेशौ समासान्तौ भवत:। [1]संज्ञु:, संज्ञ:; [2]प्रज्ञु:, प्रज्ञ:। वचनभेदाद्यथासङ्ख्याभाव: ॥१५५॥

---

अव०–[1]सङ्गते जानुनी अस्य=संज्ञु:, संज्ञ:। [2]प्रगते प्रवृद्धे प्रणते प्रकृष्टे वा जानुनी अस्य=प्रज्ञु: प्रज्ञ: ॥१५५॥

## वोर्ध्वात् ॥७।३।१५६॥

म० वृ०–ऊर्ध्वशब्दात् परस्य जानुशब्दस्य बहुव्रीहौ 'ज्ञुज्ञौ' भवतो वा। [1]ऊर्ध्वज्ञु:, ऊर्ध्वज्ञ:, ऊर्ध्वजानु: ॥१५६॥

---

अव०–[1]ऊर्ध्वे जानुनी अस्य=ऊर्ध्वज्ञु:, ऊर्ध्वज्ञ:, ऊर्ध्वजानु: ॥१५६॥

## सुहृद्-दुर्हृन्मित्रा-ऽमित्रे ॥७।३।१५७॥

म० वृ०–सु-दुर्भ्यां परस्य हृदयस्य यथासंख्यं मित्रे-सख्यौ अमित्रे-शत्रौ चाभिधेये [वाच्ये] 'हृद्' इत्यादेश: समासान्तोऽयं निपात्यते। [1]सुहृत् मित्रम्, [2]दुर्हृदमित्र:। मित्रामित्र इति किम्? सुहृदयो मुनि:, दुर्हृदयो व्याध: ॥१५७॥

---

अव०–[1]शोभनं हृदयं यस्य=सुहृत्। [2]दुष्टं हृदयं यस्य=दुर्हृत् ॥१५७॥

## धनुषो धन्वन् ॥७।३।१५८॥

म० वृ०–धनुस्शब्दस्य 'धन्वन्' इत्यादेशः समासान्तः स्यात् । [1]शार्ङ्गधन्वा, [2]पिनाकधन्वा [रुद्रः], [3]अजकावधन्वा [ रुद्रः ], [4]गाण्डीवधन्वा [अर्जुनः] ॥१५८॥

अव०–[1]शृङ्गस्येदं शार्ङ्गम्, शार्ङ्गं धनुरस्य शार्ङ्गधन्वा । [2]पिनष्टीति पिनाकः,'पिषेः पिन्-पिण्यौ च' (उणा० ३६) इत्युणादिसूत्रेण आकप्रत्ययः, पिषेः पिन् च, पिनाकं धनुर्यस्य । [3]अजा एवाजकाः,अजका अस्य सन्ति-'मण्यादिभ्यः' ( ७।२।४४ ) इति वः, 'घञ्युपसर्ग०' (३।२।८६) इति दीर्घः अजकावं धनुरस्यास्ति, रुद्रः । [4]"गाण्डीवधनुषः [ अर्जुनस्य ] खेभ्यो [ इन्द्रियेभ्यः ] निश्चचार हुताशनः" कथमत्र धन्वन् आदेशो न भवतीत्याह- संज्ञात्वविवक्षायां 'वा नाम्नि' ( ७।३।१५९ ) इत्युत्तरसूत्रेण विकल्पो भविष्यति ॥१५८॥

## वा नाम्नि ॥७।३।१५९॥

म० वृ०–धनुःशब्दस्य 'धन्वनादेशो' बहुव्रीहौ स्यान्नाम्नि विषये वा । [ शतं धनूंषि यस्य स ] शतधन्वा, शतधनुः । [पुष्पाण्येव धनुर्यस्य स] पुष्पधन्वा, पुष्पधनुः ॥१५९॥

## खर-खुरान्नासिकाया नस् ॥७।३।१६०॥

म० वृ०–खरखुराभ्यां परस्य नासिकाशब्दस्य 'नस्' इत्यादेशः समासान्तः स्यात् नाम्नि [ संज्ञाविषये ] [1]खरणाः, [2]खरणसौ ; [3]खुरणाः, खुरणसौ ॥१६०॥

अव०–[1]खरा नासिका अस्य अथवा खरस्येव नासिकाऽस्य=खरणाः । [2]खरा नासिकाऽनयोः= खरणसौ । [3]खुर इव नासिकाऽस्य=खुरणाः, 'पूर्वपदस्थान्नाम्न्यगः' ( २।३।६४ ) इत्यनेन नकारस्य णत्वम् ॥१६०॥

## अस्थूलाच्च नसः ॥७।३।१६१॥

म० वृ०–स्थूलवर्जितात् पूर्वपदात् खरखुराभ्यां (च) परस्य नासिकाशब्दस्य बहुव्रीहौ'नस्'इत्यादेशः स्यान्नाम्नि । [1]द्रूणसः, [2]वार्ध्रीणसः, [3]गोनसः, [4]कुम्भीनसः, [5]खरणसः, [6]खुरणसः । अस्थूलादिति किम् ? [7]स्थूलनासिकः । नाम्नीत्येव–[8]तुङ्गनासिकः कथं [9]गोनासः ? नासाशब्देन भविष्यति ॥१६१॥

अव०–[1]द्रुरिव नासिकाऽस्य=द्रूणसः । [2]वध्र्यास्येयं=वार्ध्री, 'तस्येदम्' ( ६।३।१६० ) अण्, 'अणञेये०' ( २।४।२० ) इति ङी, वार्ध्रीव नासिकाऽस्य, 'पूर्वपदस्था०' (२।३।६४) इति णत्वम्, 'तद्धितः स्वरवृद्धि०' ( ३।२।५५ ) इत्यादिना पुंवद्भावाभावः । [3]गोरिव नासिकाऽस्य=गोनसः ।[4]कुम्भीव नासिकाऽस्य=कुम्भीनसः । [5]खरणसः, [6]खुरणसः ; एतयोः पूर्ववद् वाक्यम् । [7]स्थूला नासिका यस्य स स्थूलनासिकः, 'गोश्चान्ते०' ( २।४।९६ ) इति ह्रस्वः, स्थूला इत्यत्र 'परतः स्त्री पुंवत्०' ( ३।२।४९ ) इति पुंवद्भावः । [8]तुङ्गा नासिकाऽस्य । [9]गोरिव नासाऽस्य । अस्थूलाच्च इत्यत्र चकारः पूर्वसूत्रेण'खरखुरा०' इत्यनेन अस्य'अस्थूला०'इत्यस्य बाधानिवृत्त्यर्थः ॥१६१॥

## उपसर्गात् ॥७।३।१६२॥

म० वृ०–उपसर्गात्परस्या नासिकाया बहुव्रीहौ 'नसः' स्यात् । [2]प्रणसम्, [3]उन्नसं मुखम् । असंज्ञार्थं वचनम् ॥१६२॥

अव०–[1]धातुयोगे यः प्रादिरुपसर्गसंज्ञः तस्मात् उपसर्गात् । [2]प्रगता अथवा प्रवृद्धा नासिकाऽस्य= प्रणसम् । [3]उन्नता उद्गता वा नासिकाऽस्य=उन्नसं मुखम् । प्रणसमित्यत्र 'नसस्य' (२।३।६५) इत्यनेन णत्वम् ॥१६२॥

## वेः खु-ख्र-ग्रम् ॥७।३।१६३॥

म०वृ०–वेरुपसर्गात्परस्या नासिकायाः खु ख्र ग्र इत्यादेशाः समासान्ता भवन्ति ।[1]विखुः, [2]विख्रः, [3]विग्रः । उपसर्गादित्येव–[4]विनासिकः ॥१६३॥

अव०–[1]विगता नासिकाऽस्य(यस्य ?)स विखुः । [2]विगता नासिका यस्य स विख्रः । [3]विगता नासिका

यस्य स विग्रः । [४]वेः पक्षण इव नासिकाऽस्य ॥१६३॥

## जायाया जानिः ॥७।३।१६४॥

म० वृ०-जायाशब्दस्य 'जानि'रित्यादेशः समासान्तो बहुव्रीहौ स्यात । [१]युवजानिः, [२]प्रियजानिः, [३]अनन्यजानिः ॥१६४॥

---

अव०-[१]युवतिर्जाया यस्य स युवजानिः, 'परतः स्त्री पुंवत्०' (३।२।४९) इत्यनेन पुंवद्भावः, तिप्रत्ययलोपः। एवं [२]प्रिया जायाऽस्य=प्रियजानिः। (एवं) शोभना जायाऽस्य=शोभनजानिः, वधूर्जायाऽस्य=वधूजानिः। [३]नान्या जायाऽस्य। सर्वत्र 'परतः स्त्री पुंवत्०'(३।२।४९)इत्यनेन पुंवद्भावः ॥१६४॥

## व्युदः काकुदस्य लुक् ॥७।३।१६५॥

म० वृ०-व्युद्भ्यां परस्य काकुदस्य [ तालु ] बहुव्रीहौ [२]'लुक्' समासान्तः स्यात्। [१]विकाकुत्, उत्काकुत् ॥१६५॥

अव०-[१]विगतं काकुदं तालु अस्य विकाकुत्। [२]दकारमध्यस्थ अकारो लुप्यते इति लुगादेशः समासान्त इत्यस्य व्याख्यानम् ॥१६५॥

## पूर्णाद्वा ॥७।३।१६६॥

म० वृ०-पूर्णात्परस्य काकुदस्य 'लुक्' समासान्तो वा स्यात्। [पूर्णं काकुदमस्य=] पूर्णकाकुत्, पूर्णकाकुदः ॥१६६॥

## ककुदस्यावस्थायाम् ॥७।३।१६७॥

म० वृ०-अवस्थायां [वयसि] गम्यमानायां [१]ककुदस्य 'लुक्' समासान्तः स्याद् बहुव्रीहौ। [२]असञ्जातककुद् बालः [ वत्सो वा ], [३]पूर्णककुद् युवा, स्थूलककुद् बलवान्[४] । अवस्थायामिति किम् ? श्वेतककुदः । ककुच्छब्देनैव सिद्धे ककुदशब्दस्यास्मिन् विषये प्रयोगनिवृत्त्यर्थं वचनम् ॥१६७॥

---

अव०-[१]स्कन्धः शृङ्गं वृषभस्य कुहटि(:)इत्यपि। [२]न सञ्जातं ककुदं शृङ्गं स्कन्धः शृङ्गं कुहटिर्वास्य। [३]एवं पूर्णं ककुदमस्य=पूर्णककुद् । [४]एवं यष्टिवत ककुदमस्य यष्टिककुद्, नातिस्थूलो नातिकृशो यस्य ककुदः स यष्टिककुद्; तथा सन्नं जीर्णं ककुदमस्य=सन्नककुद् कृशः, पन्नककुद् वृद्धः इति विशेषप्रयोगाः ॥१६७॥

## त्रिककुद्गिरौ ॥७।३।१६८॥

म० वृ०-त्रिशब्दात्परस्य ककुदस्य गिरौ वाच्ये बहुव्रीहौ 'ककुत्' इत्यादेशो निपात्यते। [१]त्रिककुत् पर्वतः ॥१६८॥

---

अव०-[१]त्रीणि ककुदानि ककुदाकाराणि शिखराण्यस्य पर्वतस्य। 'त्रेर्गिरा'विति सिद्धे निपातनं पर्वतविशेषप्रतिपत्त्यर्थम्। तेनान्यस्मिन् विषये त्रिककुद इत्येव भवति ॥१६८॥

## स्त्रियामूधसो न् ॥७।३।१६९॥

म० वृ०-स्त्रियां वर्त्तमानस्य ऊधस्शब्दस्य 'न्' इत्यादेशः समासान्तः स्याद् बहुव्रीहौ। [१]कुण्डोध्नी, [२]घटोध्नी, महोध्नी गौः[३] । स्त्रियामिति किम् महोधाः मेघः ॥१६९॥

---

अव०- [१]कुण्डमिवोधोऽस्याः=कुण्डोध्नी । [२]घट इव ऊधोऽस्या घटोध्नी। [३](एवम्) पीवरमूधोऽस्याः पीवरोध्नी ॥१६९॥

## इनः कच् ॥७।३।१७०॥

म०वृ०-इन्नन्ताद् बहुव्रीहेः स्त्रियां वर्त्तमानात् 'कच्' समासान्तः स्यात्। [१]बहुदण्डिका सेना। [२]"अनिनस्मन्ग्रहणान्यर्थवतानर्थकेन च तदन्तविधिं प्रयोजयन्ति" । [३]बहुस्वामिका,[४]बहुवाग्मिका पुरी। स्त्रियामित्येव- बहुदण्डी,बहुदण्डिको राजा। चकारो 'न कचि' (२।४।१०४) इत्यत्र विशेषणार्थः ॥१७०॥

---

अव०-[१]बहवो दण्डिनोऽस्यां सेनायां सा बहुदण्डिका। [२]"अनि'-नित्यादेरयमर्थः,-यत्र क्वापि सूत्रे अनिनस्मन्प्रत्ययानुद्दिश्य कार्यं प्रोक्तमस्ति, तत्र ते अनिनस्मन्प्रत्ययाः कर्त्तारः तदन्तविधिं प्रयोजयन्ति, कोऽर्थः ? ग्राहयन्ति। भा-

वार्थोऽयम् , तथाहि- अन् इन् अस् मन् इति स्वरूपेण सार्थका मुख्या। कनप्रत्ययेऽन् निरर्थको गौणः। विन्ग्मिन्प्रत्यये (प्रत्यययोः?) इन् अनर्थको गौणः। एवं नसाद्यादेशेऽस् अनर्थको गौणः। इति यत्राऽनादिप्रत्ययानाश्रित्य कार्यं सूत्रे उक्तमपि तत्र अनादि ( प्रत्ययाः ) सार्थका अपि निरर्थका गौणा अपि ग्राह्याः। अनादिप्रत्ययेषु केवलेषु तदन्तेष्वपि प्रत्ययाश्रितं सर्वं कार्यं प्रवर्त्तते इत्यक्षरबलात् [3]बहुस्वामिका,[4]बहुवाग्मिका ; अत्र गौणेनन्तादपि कच् सिद्धः ॥१७०॥

## ऋन्नित्यदितः ॥७।३।१७१॥

म० वृ०—ऋकारान्तान्नित्यं दिदादेशो यस्मात्तदन्ताच्च 'कच्' समासान्तो बहुव्रीहौ स्यात्। ऋत ,- बहुकर्तृकः। नित्यं दित ,–बहुकुमारीकः[1]। नित्यग्रहणं किम्? पृथुश्रीः, पृथुश्रीकः ; लम्बभ्रूः[2]। पूर्वसूत्रे स्त्रियां विधिरिति योगविभागः ॥१७१॥

अव०–[1]एवं बहुब्रह्मबन्धूको ग्रामः।[2]'शेषाद्वा' (७।३।१७५) इति कः–लम्बभ्रूकः। केचिन्नित्यदितां ङ्यूदन्तानामेव कचमिच्छन्ति। तन्मते बहुतन्त्रीः बहुतन्त्रीकः इति 'शेषाद्वा' (७।३।१७५) इति विकल्पः ॥१७१॥

## दध्युरःसर्पिर्मधूपानच्छालेः[1] ॥७।३।१७२॥

म० वृ०—दधि उरस् सर्पिस् मधु उपानह् शालि इत्यन्ताच्छब्दाद् बहुव्रीहेः 'कच्' स्यात्। प्रियदधिकः, [2]प्रियोरस्कः, [3]प्रियसर्पिष्कः, प्रियमधुकः, प्रियोपानत्कम्, [ 'नहाहोर्धतौ' (२।१।८५) ] प्रियशालिकः ॥१७२॥

अव०–[1]उपानच्छालेरित्यत्र 'नहाहोर्धतौ' इति हस्य त्, 'प्रथमादधुटि०' (१।३।४) इति शस्य छः, 'तवर्गस्य०' (१।३।६०) इति तस्य च्। [2]प्रियमुररस्य=प्रियोरस्कः, 'प्रत्यये' (२।३।६) इति सूत्रेण रस्य सकारः। [3]बहूनि (? प्रियाणि) सर्पींषि अस्य, 'सो रुः' (२।१७२) सस्य रुः, 'नामिनस्तयोः षः' (२।३।८) इत्यने रकारस्य षः ॥१७२॥

## पुमनडुन्नौपयोलक्ष्म्या एकत्वे ॥७।३।१७३॥

म०वृ०–एकत्वविषये पुम्स् अनडुह् नौ पयस् लक्ष्मी (इति) शब्दास्तदन्ताद् बहुव्रीहेः 'कच्' स्यात्। [1]प्रियपुंस्कः, प्रियानडुत्कः, प्रियनौकः, प्रियपयस्कः, प्रियलक्ष्मीकः। एकत्वे इति किम्? द्विपुमान् , द्विपुंस्कः ; एवं बह्वनड्वान् , बह्वनडुत्कः , बहुनौः, बहुनौकः ; बहुपयाः, बहुपयस्कः ; बहुलक्ष्मीः, बहुलक्ष्मीकः ; 'शेषाद्वा' (७।३।१७५) इति विकल्पः[2]॥१७३॥

अव०–[1]प्रियः पुमानस्य=प्रियपुंस्कः, अत्र 'पदस्य' ( २।१।८९ ) इति सूत्रेण पुम्स्शब्दस्य स् लुप्यते ; ततः पुम् इति शब्दः, 'पुमोऽशिट्यघोषे०' (१।३।९) इति सूत्रेण अनुस्वारपूर्वो रकारो म् इत्यस्य स्थाने, 'पुंसः' (२।३।३) इति सूत्रेण रकारस्य सकारः। [2]सर्वेषु उदाहरणेषु। केचिल्लक्ष्मीशब्दाद् द्वित्वबहुत्वयोरपि नित्यं कचमिच्छन्ति। अपरे तु तुल्ययोगेऽपि, यथा सलक्ष्मीको विनाशितः। स्वमते तु 'सहात्तुल्ययोगे' (७।३।१७८) इति निषेधात् कच् न भवति ॥१७३॥

## नञोऽर्थात् ॥७।३।१७४॥

म०वृ०–नञ्परो योऽर्थशब्दस्तदन्ताद् बहुव्रीहेः 'कच्' स्यात्। न विद्यतेऽर्थोऽस्य=अनर्थकं वचः। नञ इति किम्? [ अपगतोऽर्थो यस्मात् तत् अपार्थम्, 'शेषाद्वा' (७।३।१७५] अपार्थम् , अपार्थकम् ॥१७४॥

## शेषाद्वा ॥७।३।१७५॥

म०वृ०–यस्माद् बहुव्रीहेः समासान्तः प्रत्यय आदेशो वा न विहितः तस्माच्छेषात् 'कच्' वा स्यात्।[1]बहुखट्वकः , बहुखट्वः ; बहुमालकः, बहुमालः ; बहुवीणकः, बहुवीणः। शेषादिति किम्? [2]प्रियपथः, व्याघ्रपात्। असति शेषग्रहणे पक्षे परत्वात् कच् स्यात् ॥१७५॥

अव०–[1]बह्व्यः खट्वा अस्मिन्=बहुखट्वकः, 'परतः स्त्री पुंवत्०'(३।२।४९) इति बह्वी इत्यत्र पुंवद्भावः–बहु, 'नवापः' ( २।४।१०६ ) इति सूत्रेण

खट्वा इत्यत्र ह्रस्वः । एवं सर्वोदाहरणेषु । [२]'ऋक्पू:पथ्यपोऽत्' (७।३।७६) ॥१७५॥

## न नाम्नि ॥७।३।१७६॥

म० वृ०–नाम्नि संज्ञाविषये 'कच् न' स्यात् । [१]बहुदेवदत्तो नाम ग्रामः, विश्वदेवो नाम नरः, पद्मश्री', एवंनामा स्त्री[२] ॥१७६॥

अव०–[१]बहवो देवदत्ता अस्मिन् ग्रामे । [२]एवंनामा स्त्री इत्यस्याग्रे श्वेताश्वतरिः स्त्री पुरुषो वा इत्युदाहरणं ज्ञेयम् । ह्रसिनाऽश्वा अश्वतरी, 'वत्सोक्षाश्वर्षभाद्ध्रासे पित्'(७।३।५१) इति तरट्, ततो ङी, 'क्यङ्मानि०' ( ३।२।५० ) इति पुंवद्भावः, श्वेताऽश्वतरी यस्य यस्या वा,'गोश्चान्ते०' (२।४।९६) इति ह्रस्वः ॥१७६॥

## ईयसोः ॥७।३।१७७॥

म० वृ०–ईयस्वन्तात् समासात् 'कच् न' स्यात् । [१]बहुश्रेयान् । लिङ्गविशिष्टस्यापि ग्रहणात् [२]बहुश्रेयसी, बहुप्रेयसी पुरुषः ॥१७७॥

अव०[१]–प्रशस्य,अयं प्रशस्यः,अयं प्रशस्यः, अयमनयोर्मध्ये प्रकृष्टः प्रशस्यः=श्रेयान् , 'गुणाङ्गाद्वेष्ठेयसू' (७।३।९) इति ईयस् ,'प्रशस्यस्य श्रः'(७।४।३४)इति श्र इत्यादेशः, बहूनि श्रेयांसि यस्य । एवं प्रेयान् , बहवो प्रेयांसो यस्य स बहुप्रेयान् बहुमित्रः । [२]बहुश्रेयसी इत्यत्र 'अधातूदृदितः' (२।४।२) ङी, बह्व्यः श्रेयस्यो यस्य,एवं [३]बह्व्यः प्रेयस्यो यस्य,स बहुश्रेयसी पुरुषः, बहुप्रेयसी पुरुषः ; अत्र 'गोश्चान्ते०' (२।४।९६) इत्यनेन ह्रस्वो न प्राप्नोति, अंशिसमासान्तस्य ईयस्वन्तस्य बहुव्रीहौ ङ्यन्तस्य ह्रस्वप्रतिषेधकरणात् , इति 'गोश्चान्ते०' (२।४।९६) इत्यत्र प्रोक्तम् ॥१७७॥

## सहात्तुल्ययोगे [१] ॥७।३।१७८॥

म० वृ०–तुल्ययोगे यः सहशब्दः [२]सामर्थ्यात्तदादेर्बहुव्रीहेः 'कच् न' स्यात् । [३]सपुत्र आगतः, सपुत्रः स्थूलः, सपुत्रो गोमान् । सहादिति किम् ? श्वेताश्वको मैत्र आगतः । तुल्ययोग इति किम् ? [४]सलोमकः, [५]सपक्षकः, [६]सकर्मकः ॥१७८॥

अव०–[१]'सहात्तुल्य०' इति सूत्रे किञ्चिल्लिख्यते– वर्त्तन्ते पूर्वोत्तरपदानि अस्मिन् समासे इति वर्त्तिः, 'चिदिवृनेर्वा' ( उ०६१० ) इत्युणादिसूत्रेण इप्रत्ययः, वर्त्तिः समास उच्यते, तस्य पदानामर्थः पदार्थः, वर्त्तिपदार्थस्य पुत्रादेर्वृत्त्यर्थेन पित्रादिना सह क्रियागुणजातिद्रव्यैः साधारणसम्बन्धस्तुल्ययोग उच्यते । [२]यद्यपि 'विशेषणमन्तः' (७।४।११३) इति न्यायात् सहान्ताद् इति व्याख्यानं युक्तम् , तथापि 'सहस्तेन' (३।१।२४) इति सूत्रे सहशब्दः प्रथमान्त , प्रथमान्तत्वात् 'प्रथमोक्तं प्राक्' ( ३।१।१४८ ) इत्यनेन प्राग् निपातभावात् सहान्तत्वं न सम्भवत्येव इति सामर्थ्यात्तदादेरिति व्याख्यानं सूत्रार्थे कृतमिति भावः । [३]सह पुत्रेण सपुत्रः, 'सहस्तेन' ( ३।१।२४ ) इत्यनेन बहुव्रीहिसमासः । [४]सह विद्यमानानि लोमान्यस्य सलोमकः । [५]सह विद्यमानेन पक्षेण वर्त्तते । [६]सह विद्यमानेन कर्मणा वर्त्तते । अत्र सहशब्दो विद्यमानार्थो न तु तुल्ययोगे । 'शेषाद्वा' ( ७।३।१७५ ) इति कः ॥१७८॥

## भ्रातुः स्तुतौ ॥७।३।१७९॥

म० वृ०–भ्रात्रन्तात्समासात् 'कच् न' स्यात् , स्तुतौ=प्रशंसायां गम्यमानायाम्[१] । [२]सुभ्राता । ([३]कल्याणभ्राता) [४]प्रियभ्राता, बहुभ्रात्ता ॥१७९॥

अव०–[१]भ्रातुः समासार्थस्य वा प्रशंसायां वाच्यायाम् । [२]शोभनो भ्राता । [३]कल्याणः [४]प्रियो वा भ्राता अस्य ॥१७९॥

## नाडीतन्त्रीभ्यां स्वाङ्गे ॥७।३।१८०॥

म०वृ०– स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तात् समासात् 'कच् न' स्यात् । [१]बहुनाडिः कायः, बहुतन्त्रीर्ग्रीवा । स्वाङ्ग इति किम् ? बहुनाडीकः स्तम्बः, बहुतन्त्रीका वीणा ॥१८०॥

अव०–[१]नाडी नडि इति शब्दद्वयम् , तत्र नाडि इत्यत्र 'इतोऽक्त्यर्थात्' (२।४।३२) इति ङीः, बह्व्यो नाड्योऽस्मिन् काये स बहुनाडिः, 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । [२]'तस्ततन्द्रितन्त्र्यविभ्य

ईः' ( उणा० ७११ ) उणादिसूत्रेण तन्त्रीशब्दो धमन्यर्थे, बह्व्यः तन्त्र्योऽस्यां ग्रीवायाम्, अत्र ङ्यान्ताभावान्न ह्रस्वः। 'नाडीतन्त्रीभ्यां स्वाङ्गे' (७।३।१८०) इति सूत्रे पारिभाषिकं न स्वाङ्गम्, किन्तु स्वमात्मीयमङ्गं स्वाङ्गमिह गृह्यते, आत्मा चेहान्यपदार्थः, तस्याङ्गमवयवः,तस्मिन्, ईदृशे स्वाङ्गे वाच्ये इति व्याख्यान्ति केचित्। तन्मते बहुनाडिः (स्तम्बः), बहुतन्त्रीर्वीणा इति, प्रत्युदाहरणं तु एवं ज्ञेयम्– बहुनाडीकः कुविन्दः, बहुतन्त्रीको नट इति। नाडी नालिका। स्वमते (?) ॥१८०॥

## निष्प्रवाणिः ॥७।३।१८१॥

म०वृ०–निष्प्रवाणिरिति 'कजभावो' निपात्यते। [1]निष्प्रवाणिः पटः कम्बलो वा, तन्त्रादचिरोद्धृत इत्यर्थः। निर्गतः प्रवाण्या निष्प्रवाणिरिति तत्पुरुषेण सिद्धे बहुव्रीहौ कज् मा भूदिति वचनम् ॥ १८१ ॥

अव०–'[1]वेंग् तन्तुसन्ताने' 'आत्सन्ध्यक्षरस्य' (४।२।१) वा प्रपूर्वम्, प्रोयतेऽस्यामिति प्रवाणी, अनट्, 'स्वरात्' (२।३।८५) इति णत्वम्, ततो ङी, प्रवाणी इति शब्दः, तन्तुवायशलाका प्रवाणी, निर्गता प्रवाणिरस्मात् (?प्रवाण्यस्मात्) इति निष्प्रवाणिः, 'निर्दुर्बहिरा०' (२।३।९) इत्यनेन रस्य षत्वम्, 'गोश्चान्ते०'(२।४।९६) ह्रस्वः। अथवा 'वेंग् तन्तुसन्ताने' वा,ऊयते अस्यामिति वानिः,'वीयुसुवहागिभ्यो निः'(उ०६७७) इत्यस्यादि(?इत्युणादि)-सूत्रेण निः प्रत्ययः,····दि····र्दा उच्यते(?)प्रभृता वानिः प्रवाणिः, 'पूर्वपदस्था०' (२।३।६४) इति णत्वम्, निर्गता प्रवाणिस्तन्तुभ्योऽस्य पटस्येति निष्प्रवाणिः सदश इत्येके ॥१८१॥

## सुभ्र्वादिभ्यः ॥७।३।१८२॥

म० वृ०–सुभ्रू इत्यादिभ्यः 'कच् समासान्तो न' भवति। [1]सुभ्रूः, [2]लेखाभ्रूः [3]कोमलोरूः, वरोरूः पीवरोरूः। जातिवचनत्वादूङन्ता एते। एवं ह्यामन्त्र्ये सौ ह्रस्वो भवति-, हे सुभ्रु ! हे वरोरु ! बहुवचनमाकृतिगणार्थम्। तेन करभोरूः, संहितोरूः इत्यादयो भवन्ति ॥ १८२ ॥ सप्तमाध्यायतृतीयपादः। ग्रन्थाग्र—३७९ ॥

अव०–भ्रू शब्दवत् भ्रु शब्दोऽप्यस्ति। [1]शोभने भ्रू-भ्रमणे यस्याः सा सुभ्रूः,[2]लेखावत् भ्रु र्यस्याः सा लेखाभ्रूः, जातिवचनत्वात् स्वभावात् ऊङन्तावेव। अत्र हि ऊङः प्राक् 'शेषाद्वा'(७।३।१७५) इति कचि प्राप्ते प्रतिषेधोऽयम्। ननु ऊङ्यपि कृते 'नित्यदिद्'–द्वारेण कचः प्रसङ्गः, न, 'नित्यदित' इत्यत्रोत्तरपदत्वस्यैव नित्यदितो ग्रहणात्। [3]कोमलौ वा ऊरू यस्याः ॥१८२॥ अवचूरिश्लोक–६४६, अक्षर ३ ऊणा।

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने सप्तमाध्यायस्य तृतीयः पादः ॥

★ ★ ★

॥ अर्हम् ॥

# ॥ सप्तमोऽध्यायः ॥

## [ चतुर्थः पादः ]

★

**वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते ॥७।४।१॥**

म० वृ०–ञिति णिति च तद्धिते प्रत्यये परे पूर्वो यः प्रकृतिभागस्तस्य स्वरेषु-स्वराणां मध्ये य आदिस्वरस्तस्य [आदिस्वरस्य] 'वृद्धिरादेशः' स्यात्। [ञिति-] दाक्षिः, [१]कार्ष्णिः, [२]चौलिः। [३][णिति-] [४]शैवः, [५]भार्गवः,औपगवः, [६]आयः स्थालीपाकः ॥१।

अव०–[१]कृष्णस्यापत्यं कार्ष्णिः, एवं निचाकोरपत्यं नैचाकविः, 'ऋषिवृष्ण्य०' (६।१।६१) इति बाधको बाह्वादीञ्। [२]चूलाया अपत्यम्, बाह्वादीञ्। [३]अथ णिति,- (एवम् कपटोरपत्यं=कापटवः, 'ङसोऽपत्ये' (६।१।२८) अण्। [४]शिवस्यापत्यं=शैवः, 'शिवादेरण्' (६।१।६०)। [५]भृगोरपत्यं =भार्गवः, ऋष्यण्। [६]श्रीर्देवता अस्य=आयः,'देवता' (६।२।१०१) इत्यण् ॥१॥

**केकय-मित्रयु-प्रलयस्य यादेरिय् च ॥७।४।२॥**

म० वृ०–केकय मित्रयु प्रलय इत्येषां ञ्णिति तद्धिते परे स्वरेष्वादेः स्वरस्य 'वृद्धिः' यादेश्च शब्दस्य 'इय्' इत्यादेशः स्यात्। [१]कैकेयः, [२]मैत्रेयिकया श्लाघते, [३]प्रालेयं हिमम् ॥२॥

अव०–[१]केकयस्यापत्यं कैकेयः, 'राष्ट्रक्षत्रिया०' (६।१।११४) इत्यादिनाऽञ्। [२]मित्रयोर्भावो मैत्रेयिका,'गोत्रचरणात् श्लाघात्याकारप्राप्त्यवगमे'(७।१।७५) इति अकञ्, तत आप्, 'अस्या'० (२।४।१११) इति इत्वम्। [३]प्रलयादागतं=प्रालेयम्,'तत आगते' (६।३।१४९) इत्यण्,आदौ स्वराणां वृद्धिः,शब्दमध्ये यकारस्य एकादेशस्य (? यकारादेः) अंशस्य स्थाने इय् इत्यादेशश्चाभूत् ॥२॥

**देविका-शिंशपा-दीर्घसत्र-श्रेयसस्तत्प्राप्तावाः ॥७।४।३॥**

म० वृ०–देविका शिंशपा दीर्घसत्र श्रेयस् इत्येषां स्वरेष्वादेः स्वरस्य ञ्णिति परे [२]तत्प्राप्तौ-वृद्धिप्रसङ्गे 'आकारः आदेशः' स्यात्। [३]दाविकं जलम्, [४]शांशपः स्तम्भः, [५]दार्घसत्रम्, [६]श्रायसं द्वादशाङ्गम्। तत्प्राप्ताविति किमर्थम्? [सुदेविकायां भवः=] सौदेविक इत्यत्र निषेधार्थम्, पूर्वोत्तरदेविकादिपदानामपि [आकारः] यथा स्यादित्येवमर्थं च। अन्यथा हि देविकादीनां केवलानामेव[७] स्यात् ।३।

अव०–[१]आ इत्यस्याग्रे प्रथमासिः। [२]तस्या वृद्धेः प्राप्तिः=तत्प्राप्तिः,. तस्याम्। [३]दीव्यन्ति देवा अस्यामिति देवका, 'नाम्नि पुंसि च' (५।३।१२१) इति णकः, आप्, 'अस्यायत्'० (२।४।१११) इति इत्वम्, देविकायां भवं दाविकम्, 'भवे'(६।३।१२३) अण्। तथा देविकाकुले भवाः=दाविकाकुलाः शालयः। पूर्वदेविका नाम प्राच्यग्रामस्तत्र भवः पूर्वदाविकः, अत्र'प्राग्ग्रामाणाम्' (७।४।१७)इत्युत्तरपदवृद्धिप्राप्तिः। [४]शिंशपाया विकारः=शांशपः,'विकारे'(६।२।३०)इत्यण्। (एवं) शिंशपास्थले भवाः=शांशपास्थलाः शालयः। पूर्वशिंशपा नाम प्राच्यग्रामस्तत्र भवः=पूर्वशांशपः। [५][दीर्घसत्रे भवम्=] दार्घसत्रम्। [६]श्रेयोऽधिकृत्य कृतं श्रायसम्, 'अमोऽधिकृत्य ग्रन्थे' (६।३।१९८) इत्यण्। [७]"ग्रहणवता नाम्ना०" इति न्यायात् ॥३॥

**वहीनरस्यैत् ॥७।४।४॥**

म०वृ०–[१]वहीनरस्य ञ्णिति स्वरेष्वादेः स्वरस्य 'ऐकारः आदेशः'स्यात्। [१]वैहीनरिः, [२]वैहीनरम् ॥४

अव०–[१]वहीनरस्यापत्यं=वैहीनरिः,'अत इञ्' (६।१।३१)। [२]वहीनरस्येदं=वैहीनरम्। विहीनर इति शब्दस्य आदिस्वरेकारस्य वृद्धौ ऐत्वे कृते सिद्ध्यति,

वहीनरस्य वाहीनरिर्मा भूदिति वचनम् । वहीनरशब्देन कञ्चुकी उच्यते ॥४॥

## [1]य्वः पदान्तात्प्रागैदौत् ॥७।४।५॥

म० वृ०–ञ्णिति परे [2]इवर्णोवर्णयोस्तत्प्राप्तौ–वृद्धिप्रसङ्गे तयोरेव यौ यकारवकारौ पदान्तौ ताभ्यां प्राग् यथासंख्यम् "ऐत् औत् इत्यागमौ" भवतः । यकारात्प्रागैकारः, वकारात्प्राग् औकार इत्यर्थः । [3]वैयाकरणः,[4]नैयायिकः,[5]नैयासिकः,[6]वैयासनम्, [7]सौवागमिकः, [8]सौवश्वः । परत्वान्नित्यत्वाच्च वृद्धेः प्रागेव सर्वत्रानेनैदौतौ । य्व इति किम् ? [9]सौपर्णेयः । पदान्तात् इति किम् ? [10]याताश्छात्राः । तत्प्राप्तावित्येव–[11]दाध्यश्विः, माध्वश्विः ॥५॥

अव०–[1]इ, उ, इश्च उश्च=यु, पञ्चमीङसिः, सन्धौ सति य्वः इति रूपं भवति । [2]यद्यपि स्वरमात्रस्थानिका वृद्धिः, तथापीह सूत्रे य्व इति ग्रहणादिवर्णोवर्णयोस्तत्प्राप्तौ इत्यादि । [3]व्याकरणं [4]न्यायं [5]न्यासं वेत्त्यधीते वा,–'तद्वेत्त्य'० (६।२।११७) 'न्यायादेरिकण्' (६।२।११८) । [6]व्यसनशब्दः, व्यसने भवम्, 'भवे' (६।३।१२३) अण् । [7]स्वागमशब्दः, स्वागमं वेत्त्यधीते वा, 'न्यायादेरिकण्' । [8]शोभनोऽश्वः=स्वश्वः शब्दः, स्वश्वस्यायं सौवश्वः, 'तस्येदम्'(६।३।१६०) इत्यण् । (एवम्) स्वश्वस्यापत्यं सौवश्विः, 'अत इञ्' (६।१।३१) । ननु वैयाकरणाद्युदाहरणेषु सर्वेषु शब्दसिद्धिकाले एव यत्ववत्वभावात् इवर्णोवर्णौ न स्तः, (तत्) कथं वृद्धिप्राप्तिः ? सत्यम्, 'आतो नेन्द्रवरुणस्य'(७।४।२९)इत्यत्र ज्ञापयिष्यते–"पूर्वोत्तरपदकार्ये कृते पश्चात् सन्धिः कार्यो" इति वृद्धिरूपे पूर्वपदकार्ये कृते यत्वमिति वृद्धिप्राप्तिः । तत्प्राप्तौ च सत्यामेतत्सूत्रसामर्थ्याद् वृद्धिं बाधित्वा यत्ववत्वे भवतः । तदनन्तरमैदौताऽऽगमौ भवतः । [9]सुपर्ण्याः सुपर्णाया वा अपत्यं=सौपर्णेयः, 'ङ्याप्त्यूङः'(६।१।७०) एयण् । [10]याता इति, 'इंण्क् गतौ' (इति) इ, एतीति यन्, शतृ, 'क्विणोरब्'० (४।३।१५) इत्यादिना इणो यत्वम्, यत इमे इति वाक्यम्, 'तस्येदम्' (६।३।१६०) अण्, यत इमे याता इति वाक्यकाले यद्यपि यत्वं दृश्यते, तथापि इ, अत्, ङस्, अण् इत्येव दृश्यम्, यतः "अन्तरङ्गानपि विधीन् बहिरङ्गा लुब् बाधते" इति हेतोः 'क्विणोरब्'०'(४।३।१५) इति यत्वम् 'ऐकार्थ्ये' (३।२।८) इति सूत्रेण क्रियमाणया ङसो लुपा बाध्यते इति याता इत्यत्र 'ऐकार्थ्ये' (३।२।८) इत्यनेन ङसो लुप्, लुपि कृतायां च 'ञ्णिति'(४।३।५०) इत्यनेन वृद्धिप्राप्तिः । ततोऽन्तरङ्गत्वात् वृद्धिं बाधित्वा यत्वमभूत् । एषा युक्तिर्वैयाकरण इत्यादिषूदाहरणेष्वपि ज्ञातव्या । [11]दधिप्रियोऽश्वः=दध्यश्वः, मयूरव्यंसकादित्वात्समासः ॥५॥

## द्वारादेः ॥७।४।६॥

म० वृ०–द्वारादीनां यौ यकारवकारौ तयोः समीपस्य स्वरेष्वादेः स्वरस्य वृद्धिप्राप्तौ ताभ्यामेव प्राग् "ऐत् औत्"(इत्येतौ)आगमौ भवतः ञ्णिति । [1]दौवारिकः,[2]सौवरः,[3]सौवः,[4]सौवस्तिकः,[5]सौवम्, [6]सौवाध्यायिकः, [7]सौवग्रामिकः, [8]दौवारपालिकः, [9]सौवर्गमनिकः ॥६॥

अव०–[1]द्वारे नियुक्तो=दौवारिकः, 'तत्र नियुक्ते' (६।४।७४) इति इकण् । [2]स्वरमधिकृत्य कृतो ग्रन्थः=सौवरः, 'अमोऽधिकृत्य'० (६।३।१९८) इत्यण् । [3]स्वर्भवः=सौवः, 'भवे' (६।३।१२३) अण्, 'प्रायोऽव्ययस्य' (७।४।६५) इत्यन्त्यस्वरादिलोपः । [4]स्वस्तीत्याह=सौवस्तिकः, 'प्रभूतादिभ्यो ब्रुवति' (६।४।४३) इतीकण्, अव्युत्पन्नोऽयं स्वस्तिशब्दः । [5]स्वस्येदं=सौवम् । [6] स्वश्चासावध्यायश्च=स्वाध्यायः, स्वाध्यायेन जयति=सौवाध्यायिकः, 'तेन जितजय'० (६।४।२) इति इकण् । [7]स्वग्रामे भवः=सौवग्रामिकः, 'अध्यात्मा'० (६।३।७८) इकण् । [8]तथा विशेषोऽयम्–'श्वादे'० (७।४।१०) इति वक्ष्यमाणसूत्रोक्तप्रतिषेधात् द्वारादिपूर्वाणामपि शब्दानां "ऐदौत्" भवतः– द्वारपालशब्दः, द्वारपालस्यापत्यं =दौवारपालिः, 'अत इञ्' (६।१।३१), ततः द्वारपाल्या अपत्यं=दौवारपालिकः, रेवत्यादित्वादिकण् । (एवं) स्वराध्याये भवः=सौवराध्यायः, 'भवे' (६।३

१२३)अण् । [१]स्वर्गमनमाह=सौवर्गमनिकः, प्रभूतादित्वादिकण् । (एवं)श्वदंष्ट्रायां भवः=शौवादंष्ट्रो मणिः । द्वार, स्वर, स्वर्, स्वस्ति, स्वादुमृदु, व्यल्कस, श्वस्, श्वन्, स्फयकृत, स्व, स्वाध्याय, स्वग्राम इति द्वारादिगणः । अत्र गणे स्वशब्द इति पाठेनैव सिद्धे स्वाध्यायस्वग्रामपाठात् स्वापतेयं स्वाजन्यं स्वार्थिक इत्यत्र न भवति । स्वपतौ साधु,–'पथ्यतिथिवसतिस्वपतेरेयण्'(७।१।१६) । स्वजनस्य भावः कर्म वा,- 'पतिराजान्त०'(७।१।६० इति ट्यण् ) । स्वार्थः प्रयोजनमस्य=स्वार्थिकः ॥६॥

## न्यग्रोधस्य केवलस्य ॥७।४।७॥

म० वृ०–न्यग्रोधशब्दस्य केवलस्य(यो)यकारस्तस्य सम्बन्धिनः स्वरेष्वादेः स्वरस्य वृद्धिप्राप्तौ, तस्मादेव यकारात्(प्राग्)ऐ इत्यागमः स्यात्, ञ्णिति । [१]नैयग्रोधो दण्डः, कषायो वा । केवलस्येति किम् ? [२]न्याग्रोधमूलाः शालयः, [३]न्याग्रोधकः ॥७॥

अव०–[१]न्यग्रोधस्य विकारो=नैयग्रोधो दण्डः, नैयग्रोधः कषायः ;'प्राण्यौषधि०'(६।२।३१) इत्यण् । [२]न्यग्रोधमूले भवाः=न्याग्रोधमूलाः शालयः । [३]न्यग्रोधाः सन्त्यस्मिन्, ऋश्यादित्वाच्चातुरर्थिकः कः, न्यग्रोधकम्, न्यग्रोधके भवो न्याग्रोधकः । अत्राह परः– ननु 'सप्तम्या निर्दिष्टे०'(७।४।१०४) इति न्यायात् न्यग्रोधमूल न्यग्रोधक इत्यनयोर्मूलशब्दकप्रत्ययाभ्यां न्यग्रोधशब्दस्य व्यवधानात् प्राप्तिरेव नास्तीत्याह सूरिः– इदमपि सूत्रं द्वारादीनां तदादिविधिज्ञापकम् । तथाहि-न्यग् रोहतीति न्यग्रोध इति व्युत्पत्तिपक्षे केवलस्यैव इति नियमार्थम्, अव्युत्पत्तिपक्षे तु विध्यर्थं वचनम् ॥७॥

## न्यङ्कोर्वा ॥ ७।४।८॥

म० वृ०–न्यङ्कुशब्दस्य यात् प्राग् वा 'ऐः' स्यात्, ञ्णिति । [१]नैयङ्कवम्, न्याङ्कवम् ॥८॥

अव०–[१]न्यञ्चतीति 'नेरञ्चः' (उ० ७२४) इति उः, 'न्यङ्कूद्गमेघा०' ( ४।१।११२ ) इति कत्वम्, न्यङ्कोरिदं=नैयङ्कवम् । व्युत्पत्तिपक्षे पूर्वेण प्राप्ते विभाषा, अव्युत्पत्तिपक्षे त्वप्राप्ते ॥८॥

## न अ-स्वङ्गादेः ॥७।४।९॥

म० वृ०–वप्रत्ययान्तस्य स्वङ्गादेश्च यः प्राग् "ऐत् औत् ञ्णिति न" भवतः । [१]व्यावक्रोशी, [२]व्यावलेखी, व्यावहासी । स्वङ्गादि,– [३]स्वाङ्गि, [४]व्याडिः, [५]स्वागतिकः, [६]व्यावहारिकः, [७]व्यायामिकी विद्या ॥९॥

अव०–[१]व्य(? व्या)वक्रोशनं=व्यावक्रोशी,'व्यतिहारेऽनीहादि०' (५।३।११६) ञः, व्यावक्रोशते(? परस्परमाक्रोशनं)व्यावक्रोशी,'नित्यं ञञिनोऽण्'(७।३।५८) । एवं [२]व्यावलेखीत्यादयोऽपि साध्याः । तथा [३]शोभनान्यङ्गानि यस्य,ततः स्वङ्गस्यापत्यं=स्वाङ्गिः । [४]व्यडस्यापत्यं=व्याडिः । [५]स्वागतमित्याह=स्वागतिकः, 'प्रभूतादि०' ( ६।४।४३ ) इकण् । [६]व्यवहारेण चरति । [७]व्यायामः प्रयोजनमस्याः=व्यायामिकी विद्या । स्वङ्ग, व्यङ्ग, व्यड, स्वागत, स्वध्वर, व्यवहार, व्यायाम इति स्वङ्गादिगणः ॥९॥

## श्वादेरिति ॥७।४।१०॥

म० वृ०–श्वनशब्द आदिरवयवो यस्य शब्दस्य तस्य श्वादेर्नाम्नो वकारात्प्राग् 'और्न' स्यात्, इति=इकारादौ ञ्णिति तद्धिते । [१]श्वाभस्त्रिः, [२]श्वाशीर्षिः, [३]श्वागणिकः, [४]श्वायूथिकः । आदिग्रहणं किम् ? श्वभिश्चरति=शौविकः । इतीति किम्? [श्वहानस्येदं=] शौवहानम् ॥१०॥

अव०–[१]श्वेव भस्त्राऽस्य, श्वभस्त्रस्यापत्यम्, 'अत इञ्' (६।१।३१) । [२]श्वेव शिरोऽस्य, श्वशिरसोऽपत्यम्, बाह्वादीञ्, 'शीर्षः स्वरे०' (३।२।१०३) इति शीर्षादेशः । (एवं) शुन इव दंष्ट्राऽस्य, श्वादंष्ट्रस्यापत्यम् (श्वादंष्ट्रिः) । [३]श्वगणेन चरति । [४]श्वयूथेन चरति । सर्वत्र 'शुनः' ( ३।२।९० ) इत्यनेन दीर्घः ॥१०॥

## इञः ॥७।४।११॥

म० वृ०–श्वादेरिञ्प्रत्ययान्तस्य ञ्णिति तद्धिते वात् (? वकारात्) प्रागौर्न भवति। [१]श्वाभस्त्रम् ॥११॥

अव०–[१]श्वेव भस्त्राऽस्य, श्वाभस्त्रस्यापत्यम् ,'अत इञ्' (६।१।३१), श्वाभस्त्रेरिदं=श्वाभस्त्रम । इकारादौ निमित्ते उच्यमानः पूर्वेण प्रतिषेधः इञन्तस्य प्रत्ययान्तरैः ( ? प्रत्ययान्तरे) न प्राप्नोतीति 'इञ' इति सूत्रं कृतम् ॥११॥

## पदस्यानिति वा ॥७।४।१२॥

म० वृ०–पदशब्दान्तस्य श्वादेर्वकारात्प्राग् 'औः' स्यात् वा, इकारादिवर्जिते ञ्णिति परे । [१]श्वापदम् , शौवापदम् ॥१२॥

अव०–श्वनशब्दस्य द्वारादिषु पाठात् तत्र तदादिविधेर्ज्ञापितत्वान्नित्यमौकारागमे प्राप्ते 'पदस्यानिति वा' इति विकल्पोऽयं कृतः इत्यर्थः । अनितीति किम् ? श्वापदेन चरति=श्वापदिकः, अत्र 'श्वादे०' (७।४।१०) इत्यनेन इति औकारनिषेधः । [१]शुन इव पदमस्य=श्वापदम् , 'शुनः' ३।२।९०) इत्यनेन दीर्घः, बाहुलकात् पुंनपुंसकः, श्वापदस्य विकारः=श्वापदम् , शौवापदम् ॥१२॥

## प्रोष्ठ-भद्राज्जाते ॥७।४।१३॥

म० वृ०–[१]वृद्धिरत्रानुवर्त्तते । प्रोष्ठभद्रशब्दाभ्यां परस्य पदशब्दस्य स्वरेष्वादेः स्वरस्य स्थाने जातेऽर्थे विहिते ञ्णिति 'वृद्धिः' स्यात् । [२]प्रोष्ठपादः, [३]भद्रपादो माणवकः । जाते इति किम् ? प्रोष्ठपदो[४] मेधः। [५]कथमूर्ध्वमौहूर्त्तिकः,गुरुलाघवम् , संहतपारार्थ्यमिति ? निपातनादिबलात् सिद्धम् , [६]अतो नार्थ उत्तरपदवृद्धिविधानेन ॥१३॥

अव०–[१]नात्र 'देविकाशिंशपा'० (७।४।२) इत्यत आकारोऽनुवर्त्तते, नापि 'वहीनरस्यैत्' (७।४।४) इत्यत ऐकारोऽनुवर्त्तते, ऐदौद्भ्यां बाधात् ; नाप्यैदौतौ , ययोरत्रासम्भवेन तत्सम्बन्धयोस्तयोरपि निवृत्तेः, इति कारणात् वृद्धिरत्रानुवर्त्तते इत्युक्तम् । [२]प्रोष्ठो गौस्तस्येव पादावस्य=प्रोष्ठपदः, 'सुप्रातसुश्वसुदिव०' (७।३।१२९) इत्यादिना डप्रत्ययः, पदभावश्च, आप् , प्रोष्ठपदाभिश्चन्द्रयुक्ताभिर्युक्तः 'चन्द्रयुक्तात्काले लुप्त्व०' (६।२।६) इत्यादिना अण् लुप् च,'ङ्यादेर्गौणस्य०' (२।४।९५) इत्यनेन आप्निवृत्तिः,पुनराप् ,प्रोष्ठपदासु जातः=प्रोष्ठपादः । [३]एवं भद्रौ पादावस्य भद्रपदः,'सुप्रात०'(७।३।१२९)इति डः,'वापादः'(२।४।६)आप् ,भद्रपदाभिश्चन्द्रयुक्ताभिर्युक्तः काल इति वाक्ये'चन्द्रयुक्तात्०' (६।२।६) इत्यण् लोपश्च, 'ङ्यादे०' ( २।४।९५ ) आप्निवृत्तिः, पुनराप् ,भद्रपदासु जातो=भद्रपादः, 'भर्त्तु०' ( ६।३।८९ ) अण् , ततो वृद्धिः । पूर्वभद्रपदा उत्तरभद्रपदा इति नक्षत्रद्वयम् । [४]प्रोष्ठपदासु भवः,–'भर्त्तु०' ( ६।३।८९ ) अण् । [५]ननु ऊर्ध्वमौहूर्त्तिकेत्याद्युदाहरणत्रये सूत्राभावे उत्तरपदवृद्धिः कथमिति पराशयः । सूरिराह,–निपातनादीत्यादि, 'सप्तमी चोर्ध्वमौहूर्त्तिके' ( ५।३।१२ ) इति ज्ञापकान्निपातनाद्वा उत्तरपदस्यैव वृद्धिः ; गुरोर्लाघवमथवा गुरुश्च गुरुत्वं लाघवं चेति, पाठबलात् उत्तरपदवृद्धिः ; संहते पारार्थ्ये संहतपारार्थ्यमिति प्रमाणग्रन्थवचनबलादुत्तरपदवृद्धिः सिद्धा ; इति उत्तरपदवृद्धिकारणे सूत्रान्तरं न कृतमिति तत्त्वम् । ऊर्ध्वं मुहूर्त्तादूर्ध्वमुहूर्त्तमिति 'नाम नाम्नैकार्थ्ये०' (३।१।१८) इत्यनेन समासः, ऊर्ध्वं मुहूर्त्ताद् भवम्=ऊर्ध्वमौहूर्त्तिकम् ,'अध्यात्मादिभ्य इकण्'(६।३।७८) । लघोर्भावः कर्म वा.–'य्वृवर्णाल्लघ्वादेः' (७।१।६९) इत्यण् । संहतश्चासौ परश्च, संहतपरस्मै इमानि इन्द्रियाणि, संहतपरार्थस्य भावः, ट्यण् , संहतपारार्थ्यम् , आत्मसिद्धित्वादिनामिदं वचनम् । अत्र संहते पारार्थ्ये संहतपारार्थ्यमिति वाक्यम् । परस्मै इदं=परार्थम् , तस्य भावः=पारार्थ्यम् , पश्चात् संहते पारार्थ्ये=संहतपारार्थ्यमित्यपि सिद्धिः । [६]इति कारणात् उत्तर(पद)वृद्ध्यर्थं विधानेन=नवीनसूत्रेण, कोऽर्थः ? किं प्रयोजनम् ? किं फलमित्यर्थः । ॥१३॥

## अंशादृतोः ॥७।४।१४॥

म० वृ०-अंशवाचिनः शब्दात्परस्य ऋतुवाचिन उत्तरपदस्यादिस्वरस्य स्थाने ञ्णिति 'वृद्धिः' स्यात् । [1]पूर्ववार्षिकः, अपरवार्षिकः । एवं [2]पूर्वनैदाघ इत्यादि ॥१४॥

अव०-[1]पूर्वा चासौ वर्षा च=पूर्ववर्षा, पूर्ववर्षासु भवः=पूर्ववार्षिकः, 'वर्षाकालेभ्यः' (६।३।७९) इतीकण् । एवमपरवार्षिकः, पूर्वशारदः, अपरशारदः ; पूर्वनैदाघः, अपरनैदाघः ; पूर्वहैमनः । पूर्वं भागान्तरं·········।[2]पूर्वं निदाघस्य, 'पूर्वापराधर०' (३।१।५२) इत्यादिनांऽशिसमासः ॥१४॥

## सुसर्वार्द्धाद्राष्ट्रस्य ॥७।४।१५॥

म० वृ०-सु-सर्वा-ऽर्द्धेभ्यः परस्य राष्ट्रवाचिन उत्तरपदस्यादिस्वरस्य ञ्णिति 'वृद्धिः' स्यात् । [1]सुपाञ्चालकः, सर्वपाञ्चालकः, अर्द्धपाञ्चालकः, सुमागधकः, सर्वमागधकः, अर्द्धमागधकः ॥१५॥

अव०-[1]शोभनाः पञ्चालाः=सुपञ्चालाः, सुपञ्चालेषु भवः=सुपाञ्चालकः, 'बहुविषयेभ्यः' (६।३।४५) इति अकञ् । एवं सर्वपाञ्चालकः, अर्द्धपाञ्चालकः, सुमागधक इत्यादीनां वाक्यप्रत्ययाः कर्त्तव्याः । [2]अर्धं पञ्चालानाम्, अर्द्धपञ्चालेषु भवः=अर्धपाञ्चालकः ॥१५॥

## अमद्रस्य दिशः ॥७।४।१६॥

म० वृ०-दिग्वाचिशब्दात्परस्य मद्रवर्जितस्य राष्ट्रवाचिशब्दस्यादिस्वरस्य ञ्णिति 'वृद्धिः' स्यात् । [1]पूर्वपाञ्चालकः, दक्षिणपाञ्चालकः, उत्तरपाञ्चालकः । अमद्रस्येति किम् ? [2]पौर्वमद्रः । दिश इति किम् ? [3]पौर्वपञ्चालकः ॥१६॥

अव०-[1]पूर्वेषु पञ्चालेषु भवः, 'बहुविषयेभ्यः' (६।३।४५) इत्यकञ्, 'दिगधिकं संज्ञातद्धित०' (३।१।९८) इति समासः । एवं दक्षिणपाञ्चालकादिषु । [2]'मद्राद्‌ञ्' (६।३।२४) । [3]पूर्वं पञ्चालानां=पूर्वपञ्चाला इत्यंशिसमासः, पूर्वपञ्चालेषुः भवः=पौर्वपञ्चालकः,'बहुविषयेभ्यः' अकञ् ॥१६॥

## प्राग्ग्रामाणाम् ॥७।४।१७॥

म० वृ०-[1]प्राग्देशग्रामवाचिनां योऽवयवो दिग्वाची ततः परस्यावयवस्य दिशः परेषां च प्राग्ग्रामवाचिशब्दानामादिस्वरस्य 'वृद्धिः' स्यात् ञ्णिति । पूर्वेषुकामशमः, अपरेषुकामशमः । बहुवचनाद् ग्रामग्रहणेन नगरमपि गृह्यते,- पूर्वकान्यकुब्जः, पूर्वपाटलिपुत्रकः । प्राग्ग्रहणं किम् ? पौर्वदेवदत्तः[2] ॥१७॥

अव०-[1]प्राग्ग्रामाणामिति सूत्रस्य सूत्रार्थाक्षरव्याख्यानं द्विखण्डशः कृत्वा कर्त्तव्यं ज्ञातव्यम् । प्राग्देशग्रामवाचिनामित्याद्यारभ्य परस्यावयवस्य इत्यन्तं प्रथमं व्याख्यानम् । दिशः परेषामित्याद्यारभ्य च वृद्धिः स्यादित्यन्तं द्वितीयं व्याख्यानं ज्ञातव्यम् । प्रथमव्याख्यानापेक्षया पूर्वकार्ष्णमृत्तिकः, अपरकार्ष्णमृत्तिकः, पूर्वेषुकामशमः,अपरेषुकामशमः इत्युदाहरणचतुष्टयं ज्ञातव्यम् । यतः पूर्वकृष्णमृत्तिकादीनि अखण्डानि प्राग्देशग्रामनामानि । अत्रोदाहरणचतुष्टये 'कोपान्त्याच्चाण्' (६।३।५६ इति) भवे वाऽण् । द्वितीयव्याख्याने तु पूर्वकान्यकुब्जः, पूर्वपाटलिपुत्रकः, अपरपाटलिपुत्रकः इत्युदाहरणत्रयम् । 'भवे' (६।३।१२३) अण्, अगन्ताच्च स्वार्थे कः । ['संज्ञा दुर्वा' (६।१।६ इत्यनेन] दुसंज्ञायां तु 'रोपान्त्यात्' (६।३।४२) इत्यकञ् । पूर्वकृष्णमृत्तिका नाम प्राक्षु ग्रामः, पूर्वा चासौ कृष्णमृत्तिका च, तत्र भवः=पूर्वकार्ष्णमृत्तिकः । पूर्वेषुकामशमी नाम प्राग्ग्रामः, पूर्वा चासाविषुकामशमी च, तत्र भवः=पूर्वेषुकामशमः । पूर्वस्मिन् कन्यकुब्जे भवः । एवं पूर्वपाटलिपुत्रकः । [2]देवदत्त इति नाम वाहीकग्रामः,पूर्वस्मिन् देवदत्ते भवः=पौर्वदेवदत्तः । (एवम्) आपरदेवदत्तः ॥१७॥

## सङ्ख्याधिकाभ्यां वर्षस्याभाविनि ॥७।४।१८॥

म० वृ०-सङ्ख्यावाचिशब्दादधिकशब्दाच्च परस्य वर्षशब्दस्यादिस्वरस्य वृद्धिर्ञ्णिति स्याच्चेत् स ञ्णित् तद्धितो भावि इत्यर्थे विहितो न भवति । [1]द्विवार्षिकः, [2]त्रिवार्षिकः, [3]अधिकवार्षिकः । अभा-

विनीति किम् ? [४]द्वैवर्षिकम्, त्रैवर्षिकं धान्यम् ॥१८॥

अव०–[१]द्वाभ्यां वर्षाभ्यां निर्वृत्तो=द्विवार्षिकः, 'निर्वृत्ते' (६।४।१०५) इति सूत्रेण इकण्, अथवा द्वाभ्यां वर्षाभ्यां भृतोऽधीष्टो वा=द्विवार्षिकः, 'तस्मै भृताधीष्टे च'(६।४।१०७)इकण्, यद्वा द्वे वर्षे भूतो=द्विवार्षिकः, 'तं भाविभूते'(६।४।१०६)इतीकण्। एवं [२]त्रिवार्षिकः, [३]अधिकवार्षिकः एतयोरपि वाक्यादिकं सर्वं ज्ञेयम्। [४]द्वे वर्षे भावि इति वाक्यम्। द्वाभ्यां वर्षाभ्यां भृतोऽधीष्टो वा कर्म करिष्यति– द्विवार्षिको मनुष्यः, कथमत्र वृद्धिः ? आह– भृताधीष्टयोः प्रत्ययः, न भाविन्यर्थे, इति वृद्धिनिषेधो न भवति, गम्यते हि अत्र भविष्यत्ता, न तु प्रत्ययार्थः, भृताधीष्टार्थे प्रत्ययोत्पत्तावपि किं करिष्यतीति सम्बन्धात् यद्यपि भविष्यत्ताऽवगम्यते,तथाप्यभाविनीति प्रत्ययविशेषणत्वात् प्रत्ययवाच्ये एव भाविन्यर्थे प्रतिषेधो भवति, न गम्यमानेऽर्थे इति परमार्थः ॥१८॥

## मानसंवत्सरस्याशाणकुलिजस्यानाम्नि ॥७।४।१९॥

म० वृ०–[मीयते परिच्छिद्यते येन तन्मानं परिमाणादि] सङ्ख्याया अधिकाच्च परस्य शाणकुलिजशब्दवर्जितस्य मानवाचिनः शब्दस्य संवत्सरशब्दस्य चादिस्वरस्य ञ्णिति 'वृद्धिः' स्यादनाम्नि=असंज्ञायाम्। सङ्ख्याधिकाभ्यां सह मानसंवत्सरस्य न यथासंख्यं वचनभेदात्। [१]द्विकौडविकः, अधिककौडविकः,[२]द्विसौवर्णिकम्, अधिकसौवर्णिकम्। तथा [३]द्विषाष्टिकः, [४]अधिकषाष्टिकः ; द्विसाप्ततिकः, तथा [५]द्विनावतिकम् ; अथ संवत्सर,- [६]द्विसांवत्सरिकः। [७]संवत्सरग्रहणात्कालो मानशब्देन न गृह्यते,तेन[८]द्वैसमिकः, ([९]द्वैरात्रिकः) त्रैरात्रिकः। अशाणकुलिजस्येति किम् ? द्वैशाणम्, द्वैकुलिजिकः। अनाम्नीति किम् ? पाञ्चलोहितिकम्, [१०]पाञ्चकलायिकम् ॥१९॥

अव०–[१]द्वौ कुडवौ प्रयोजनमस्य=द्विकौडविकः, एवं त्रिकौडविकः, अधिककौडविकः ; 'प्रयोजनम्' (६।४।११७) इतीकण्। [२]द्वाभ्यां सुवर्णाभ्यां क्रीतं=द्विसौवर्णिकम्, एवं त्रिसौवर्णिकम्, अधिकसौवर्णिकम्। [३]द्वाभ्यां षष्टिभ्यां निर्वृत्तः द्वाभ्यां षष्टिभ्यां भृतोऽधीष्टो वा अथवा द्वे षष्टी भूतो भावी वा द्विषाष्टिकः। [४]अधिकया षष्ट्या निर्वृत्तः अधिकायै षष्ट्यै भृतोऽधीष्टो वा। एवं सर्वत्राग्रेऽपि वाक्यानि। द्विषष्ट्यादिशब्दाः संख्येये काले वर्त्तन्त इति कालाधिकारविहितं प्रत्ययमुत्पादयन्ति। तथाहि– द्वे षष्टी द्वे सप्तती वा दिनानां मासानामर्द्धमासानामिति कालवर्त्तित्वं ज्ञेयम्। 'कालात्परिजय्य०' (६।४।१०४) इत्यस्मिन् कालाधिकारे विहितम् 'निर्वृत्ते' (६।४।१०५) इत्यादिसूत्रैरिकण्रूपं प्रत्ययमुत्पादयन्तीत्यर्थः। [५]द्वाभ्यां नवतिभ्यां क्रीतम्=द्विनावतिकम्, 'मूल्यैः क्रीते'(६।४।१५०) इतीकण्, तत्र 'अनाम्न्यद्विः'० (६।४।१४१) इति सूत्रेण इकण् लुप्यते,द्विनवति द्रव्यम्,तेन द्विनवतिद्रव्येण क्रीतम् ; अथवा द्वौ च नवतिश्च द्विनवती,ताभ्यां क्रीतम् ; द्वाभ्यामधिका नवतिः(द्विनवतिः)तया वा क्रीतं द्विनावतिकम्। एवं त्रिनावतिकम्। [६]द्वाभ्यां संवत्सराभ्यां भृतोऽधीष्टो वा यद्वा द्वौ संवत्सरौ भूतो भावी वा द्विसांवत्सरिकः,'रात्र्यहःसंवत्सर'० (६।४।११०) इत्यनेन वा ईनः, पक्षे 'निर्वृत्ते' (६।४।१०५) इत्यादिनाऽत्र इकण् भवति। (एवम्) त्रिसांवत्सरिकः। [७]मीयते इति व्युत्पत्त्या मानग्रहणेन कालस्यापि ग्रह इति प्राप्तिरस्ति अत उक्तम्–संवत्सरग्रहणेति। [८]द्वाभ्यां समाभ्यां निर्वृत्तः इत्यादिपूर्ववद्वाक्यानि। [९]तथा द्वयो रात्र्योः समाहारो द्विरात्रः, द्विरात्रेण निर्वृत्त इत्यादिवाक्यानि ; अथवा द्वयो रात्र्योर्भवो द्विरात्रः,'सङ्ख्यातैकपुण्य०' (७।३।११९) इति अत्। [१०]तद्धितान्तमिदं परिमाणविशेषस्य नाम। कलायो मालवप्रसिद्धो धान्यभेदः,तत्कणानां पञ्चानां यावत्परिमाणं भवति तन्मात्रस्य परिमाणविशेषस्येदं (कलाया इति) नाम, अत एव 'अनाम्न्य'० (६।४।१४१) इति न लुप्, पाञ्चलोहितिकम् पाञ्चकलायिकमिति पूर्वपादेषु साधितमस्ति ॥१९॥

## अर्द्धात्परिमाणस्यानतो वा त्वादेः ।७।४।२०।

म० वृ०–अर्द्धशब्दात्परस्य परिमाणवाचिनः

[1]कुडवादे ञ्णिति आदिस्वरस्य अनतोऽकाररहितस्य 'वृद्धिः' स्यात्, वा त्वादेः=परिमाणात्पूर्वस्य आदेस्तु अर्द्धशब्दस्य वृद्धिर्वा भवति। [2]अर्द्धकौडविकम्, आर्द्धकौडविकम्; अर्द्धद्रौणिकम्, आर्द्धद्रौणिकम्। अनत इति किम्? अर्द्धप्रस्थिकम्, आर्द्धप्रस्थिकम्, अर्द्धकंसिकम्, आर्द्धकंसिकम्; [3]अर्द्धचमसिकम्, आर्द्धचमसिकम्। आदिविकल्प उत्तरवृद्ध्यनपेक्ष इति वृद्धिविकल्पो भवत्येव। तथा अकारस्य वृद्धिनिषेधादाकारस्य वृद्धिर्भवत्येव- [4]अर्द्धखारीभार्यः, यद्यत्र वृद्धिनिषेधः स्यात् (तर्हि) अयं तद्धितो न वृद्धिहेतुरिति पुंवद्भावप्रतिषेधो न स्यात्, यथा अर्धप्रस्थभार्य इति ॥२०॥

प्रव०-[1]शब्दरूपस्य। [2]अर्धकुडवेन क्रीतम्। [3]चमसः पात्रविशेषः। [4]'अर्धखारीभार्यः' इत्यत्र पूर्वमर्धखार्यां भवा=अर्धखारी, 'भवे' (६।३।१२३) अण्, 'अवर्णेवर्णस्य' (७।४।६८) इति ईलोपः, आकारस्यापि वृद्ध्याकारः, ततः 'अणञेये०' (२।४।२०) इति ङी, पुनः अर्धखारी इति शब्दः सञ्जातः। अत्र पराह,-कः पुनरत्र विशेषः- सत्यामसत्यां वा वृद्धौ? उच्यते, अर्धखारी भार्या यस्य सोऽर्धखारीभार्य इति, यद्यत्र वृद्धिनिषेधः स्यात् (तर्हि) अयं तद्धितो न वृद्धिहेतुरिति पुंवद्भावप्रतिषेधो न स्यात्, यथा अर्धप्रस्थे भवा (अर्धप्रस्थी), अर्धप्रस्थी भार्या अस्य सोऽर्धप्रस्थभार्यः, अत्रानत इति भणनान्नोत्तरपदवृद्धिः, पूर्वपदस्यापि 'वा त्वादे'रिति भणनान्न भवति, ततस्तद्धितस्य स्वरवृद्धिहेतुत्वाभावान्न पुंवन्निषेधः,अत्रापि वृद्धिपक्षे पुंवन्निषेधो भवत्येव,यथा आर्धप्रस्थीभार्यः इति ॥२०॥

## प्राद् वाहणस्यैये ॥७।४।२१॥

म० वृ०-वा त्वादेरिति वर्त्तते। प्रात् परस्य वाहण इति शब्दस्य एये ञ्णिति 'वृद्धिः' स्यात्, आदेः पूर्वस्य तु प्रशब्दस्य वा वृद्धिः। [1]प्रवाहणेयः, प्रावाहणेयः। [2]तथा प्रवाहणेयीभार्य इति पूर्ववत् ॥२१॥

प्रव०-[1]प्रवाहयतीति प्रवाहणः, 'नन्द्यादिभ्योऽनः' (५।१।५२), 'णेर्वा' (२।३।८८) इति णत्वम्, ततः प्रवाहणस्यापत्यं=प्रवाहणेयः, 'शुभ्रादिभ्यः' (६।१।७३) इति एयण्। [2]तथेति कोऽर्थः? पूर्वोक्तसूत्रयुक्तिवत्,अत्रापि उत्तरपदवृद्धेः पूर्वोक्तमेव प्रयोजनम्,तेन प्रवाहणेयी भार्या यस्य स प्रवाहणेयीभार्यः, अत्रापि पुंवद्भावप्रतिषेधो भवति ॥२१॥

## एयस्य ॥७।४।२२॥

म० वृ०-प्रात्परस्य एयप्रत्ययान्तस्य वाहणशब्दस्य 'वृद्धिर्ञ्णिति' स्यात्, प्रशब्दस्य तु वृद्धिर्वा। [1]प्रवाहणेयिः, प्रावाहणेयिः [2]प्रवाहणेयकम्, प्रावाहणेयकम्। [3]बाह्यतद्धितनिमित्ता वृद्धिः [4]एयाश्रयेण विकल्पेनाऽशक्या बाधितुमिति सूत्रारम्भः ॥२२॥

प्रव०-पूर्वेणादिविमुक्तः पक्षोऽस्य सूत्रस्य विषयः(?)। [1]प्रवाहणेय इति शब्द एयण्प्रत्ययान्तः प्रकृतिः, प्रवाहणेयस्यापत्यं युवा=प्रवाहणेयिः, प्रावाहणेयिः; 'अत इञ्' (६।१।३१),अत्र 'अब्राह्मणात्' (६।१।१४१) इत्यनेन इञो न लोपः,ब्राह्मणत्वात्। तथा [2]प्रवाहणेयस्येदं सङ्घादि=प्रवाहणेयकम्, प्रावाहणेयकम्; 'गोत्राददण्डमाणव०' (६।३।१६९) इत्यनेन अकञ्; अथवा प्रवाहणेयस्य भावः प्रवाहणेयकम्,प्रावाहणेयकम्;'ओपान्त्याद् गुरूपोत्तमा०'(७।१।७२) इति अकञ्। [3]बाह्यस्तद्धित एयव्यतिरिक्तः, तन्निमित्ता'वृद्धिः स्वरेष्वादेः०'(७।४।१) इति नित्यं विहिता। [4]एयाश्रयेण विकल्पेन कोऽर्थः? 'प्राद्वाहणस्यैये' (७।४।२१) इति पूर्वोक्तसूत्रेण विहितेन ॥२२॥

## नञः क्षेत्रज्ञेश्वर-कुशल-चपल-निपुण-शुचेः ॥७।४।२३॥

म० वृ०-नञः परेषां क्षेत्रज्ञेश्वरादीनामादिस्वरस्य ञ्णिति 'वृद्धिः' स्यात्, आदेस्तु नञो 'वृद्धिर्वा' भवति। [1]अक्षैत्रज्ञम्, आक्षैत्रज्ञम्; अक्षैत्रज्ञ्यम्, [2]आक्षैत्रज्ञ्यम्, अनैश्वरम्, आनैश्वरम्; अनैश्वर्यम्, आनैश्वर्यम्; [अकुशलस्येदम्-] अकौशलम्, आकौशलम्; अचापलम्, आचापलम्; अनैपुणम्; आनैपुणम्; [3]अशौचम्, आशौचम् ॥२३॥

अव०-[1]अक्षेत्रज्ञ्यम्, आक्षेत्रज्ञ्यमित्यादिषु ष्यण् प्रत्ययो 'नञ्तत्पुरुषा०' (७।१।५७) इत्यनेन न बाध्यते,क्षेत्रज्ञेश्वरयोर्बुधादिपाठात्। [2]न शुचिरशुचिः, अशुचेरिदम्=अशौचम्, अथवा न विद्यते शुचिरस्यासौ अशुचिः, अशुचेर्भावः कर्म वा अशौचम्,'य्वृवर्णाल्लघ्वादेः' (७।१।६९) इत्यण् ॥२३॥

## जङ्गल-धेनु-वलजस्योत्तरपदस्य तु वा ॥७।४।२४॥

म० वृ०-आदेरित्यनुवर्त्तते। वेति तु निवृत्तम्, उत्तरपदस्य वेत्यकरणात्। जङ्गल धेनु वलज इत्येतदुत्तरपदानां शब्दानामादेः पूर्वपदस्य स्वरेष्वादेः स्वरस्य ञ्णिति नित्यं वृद्धिः स्यात्, जङ्गलाद्युत्तरपदानां पुनर्वा वृद्धिः। [जङ्गलो निर्जलप्रदेशः। कुरुषु जङ्गलाः=कुरुजङ्गलाः,कुरुजङ्गलेषु भवः=]कौरुजङ्गलः, कौरुजाङ्गलः; [विश्वधेनोरिदमथवा विश्वधेनोरपत्यं विश्वधेनोरागतं वा, 'उत्सादेरञ्' (६।१।१९)]वैश्वधेनवः, वैश्वधैनवः; [सुवर्णस्य वलजं द्वारं क्षेत्रं वा, तत्र भवः] सौवर्णवलजः, सौवर्णवालजः ॥२४॥

## हृद्-भग-सिन्धोः ॥७।४।२५॥

म०वृ०-आदेरुत्तरपदस्येति च द्वयमनुवर्त्तते। हृद् भग सिन्धु इत्येवमन्तानामादेः पूर्वपदस्योत्तरपदस्य चादिस्वरस्य ञ्णिति'वृद्धिः'स्यात्। [1]सौहार्दम्, [2]दौहार्दम् [दौर्हार्दम् ?]; [3]सौहार्द्यम्, [4]दौहार्द्यम् [दौर्हार्द्यम ?]। बहुलाधिकारान्मित्रामित्रार्थयोः सुहृद् दुर्हृच्छब्दयोः सौहृदम, दौर्हृदमित्यपि भवति ['इसुसोर्बहुलम्'(७।२।१२८) इत्यतो बहुलाधिकारानुवर्त्तनात् 'युवादेरण्'(७।१६७) इत्येव भवति, नात्रोत्तरपदवृद्धिः]। सौभाग्यम्, दौर्भाग्यम्; सौभागिनेयः, [5]साक्तुसैन्धवः, [6]लावणसैन्धवः, [7]माहासैन्धवः, [8]सौरसैन्धवः ॥२५॥

अव०-[1]सौहार्दम् [2]दौहार्दम् [दौर्हार्दम् ?]इति, आद्योदाहरणे सुहृद् अथवा सुहृदयशब्दः,सुहृद इदं सुहृदयस्य वा इदम्, 'तस्येदम्' (६।३।१६०) इत्यण्, अथवा सुहृदः सुहृदयस्य वा भावः कर्म वा=सौहार्दम्, अत्र 'युवादेरण्' (७।१।६७) इत्यण्, यत्र हृदयशब्दः तत्र 'हृदयस्य हृल्लासलेखाण्ये' (३।२।९४) इति सूत्रेण हृदयशब्दस्य हृद् इत्यादेशः, सौहार्दमिति सिद्धम्, एवं दौहार्दम् [दौर्हार्दम् ?]; उदाहरणद्वये विशेषोऽयम्,- सुदुर्पूर्वकं हृदय इति शब्दं धृत्वा शोभनं दुष्टं वा हृदयं यस्य इति बहुव्रीहौ 'सुहृद्-दुर्हृन्मित्रामित्रे' (७।३।१५७) इति सूत्रेण हृदयशब्दस्य हृन् इत्यादेशो न कर्त्तव्यः, मित्रामित्रार्थाभावात्। [3]'सौहार्द्यम् [4]दौहार्द्यम्' [दौर्हार्द्यम् ?] इति प्रयोगद्वये तु सुहृद् दुर्हृद् इत्येव शब्दस्थितिः, सुहृदो भावः कर्म वा=सौहार्द्यम्, 'पतिराजान्तगुणाङ्गराजादिभ्यः'० (७।१।६०) इत्यनेन ष्यण्, उभयशब्दस्यापि वृद्धिः, सौहार्द्यम्, एवं दौहार्द्य (दौर्हार्द्यम्?)मित्यपि। यद्यत्र हृदय इति शब्दः कल्प्यते तदासौ हृदय्यमित्येव भवति, 'हृदयस्य हृल्लास०' इत्यनेन हि यप्रत्ययेऽण्प्रत्यये च हृदयस्य हृद् आदेशो विहितोऽस्ति, न ष्यणि। [5]सक्तुप्रधानाः सिन्धवः=सक्तुसिन्धवः,सक्तुसिन्धुषु भवः साक्तुसैन्धवः। एवं पानसैन्धवः, [6]लावणसैन्धवः। तथा [7]महान्तश्च ते सिन्धवश्च। [8]सुराणां सिन्धवः=सुरसिन्धवः। सर्वत्र 'कोपान्त्याच्चाण्' (६।३।५६) इति सूत्रेणाण् ॥२५॥

## प्राचां नगरस्य ॥७।४।२६॥

म०वृ०-प्राचां देशे वर्त्तमानस्य नगरान्तस्य शब्दस्यादेः पूर्वपदस्योत्तरपदस्य(च)आदिस्वरस्य ञ्णिति 'वृद्धिः' स्यात्। [1]पौण्ड्रनागरः, वैराटनागरः, गैरिनागरः ।२६।

अव०-[1]पुण्ड्राः पुरुषविशेषास्तेषां नगरम्,तत्र भवः=पौण्ड्रनागरः, 'भवे'(६।३।१२३)। एवमग्रेऽपि ॥२६॥

## अनुशतिकादीनाम् ॥७।४।२७॥

म० वृ०-अनुशतिक इत्यादिशब्दानां पूर्वोत्तरपदयोरादिस्वरस्य'वृद्धिर्ञ्णिति'स्यात्। अनुशतिकस्येदमानुशातिकम्,[अनुशतिकस्यापत्यम्,'अत इञ्' (६।१।३१)] आनुशातिकिः, राजपौरुष्यम्, [1]पारिमाण्डल्यम्, [2]प्रातिभाव्यम्, [3]सार्ववैद्यम् ॥२७॥

अव०-अनुशतिक, अनुहोड, अनुसंवत्सर, अनुसंवरण, अनुरहत्,अगारवेणु, असिहत्या, अस्य-

हत्या, अस्याहेति, अस्यहेतु, अनिषाद, अधेनु, कुरुकत, कुरुपञ्चाल, अधिदेव, अधिभूत, इहलोक, परलोक, सर्वलोक, सर्वपुरुष, सर्वभूमि, वध्योग, प्रयोग, अभिगम, परस्त्री, पुष्करसद्, उदकशुद्ध, सूत्रनड, चतुर्विद्या, शातकुम्भ, सुखशयन इति अनुशतिकादिगणः। बहुवचनमाकृतिगणार्थम्। तेन राजपौरुष्यादयष्ट्यणन्ता अत्र गणे पठ्यन्ते,-राजपौरुष्यम्, पारिमाण्डल्यम्, प्रातिभाव्यम्, सार्ववैद्यम्; प्रत्ययान्तरे तु आदेरेव वृद्धिः,यथा-राजपुरुषस्यापत्यं राजपुरुषायणिः, अत्र 'अवृद्धाद्दोर्नवा' (६।१।११०) इति आयनिञ्। [1]पारिमाण्डल्यमिति परिमण्डलमणूनां परिमाणम्, तद्योगात्परमाणवोऽपि परिमण्डलास्तेषां भावः पारिमाण्डल्यम्। [2]प्रतिभुवो भावः कर्म वा, ट्यण्,नत उभयपदवृद्धिः, 'य्यक्ये' (१।२।२५) इत्यावादेशः। [3]सर्ववेद सर्वविद्या वा शब्दः,'भेषजादिभ्य०' (७।२।१६४) ट्यण्, 'अवर्णेवर्णस्य' (७।४।६८), 'व्यञ्जनात्पञ्चमान्तस्था'० (१।३।४७) एकयकारलोपः ॥२७॥

## देवतानामात्वादौ ॥७।४।२८॥

म०वृ०-देवतार्थानां शब्दानामात्वादौ आकाराद्यन्तादेशविषये पूर्वोत्तरपदयोरादिस्वरस्य ञ्णिति 'वृद्धिः' स्यात्। [1]आग्नावैष्णवं सूक्तम्, [2]आग्निमारुतं कर्म। आत्वादाविति किम्? [स्कन्दविशाखयोरिदं=]स्कान्दविशाखम्, ब्राह्मप्रजापत्यम् ।२८।

अव०-[1]अग्निश्च विष्णुश्च देवता अस्य सूक्तस्येति आग्नावैष्णवम्, 'देवता' (६।२।१०१) इति सूत्रेण अण्, 'वेदसहश्रुतावायु'० (३।२।४१) इति सूत्रेण पूर्वपदस्य अग्नि इत्यस्य आकार अन्तादेशः, अयमात्वादौ इत्युच्यते। [2]एवमग्निश्च मरुच्च देवताऽस्य कर्मणः, 'इर्वृद्धिमत्यविष्णौ' (३।२।४३) इत्यनेन इकारोऽन्तादेशः। एवमाग्निवारुणीमनड्वाहीमालभेत। एवम् (आग्नि)सौमं कर्म इत्यपि। [3]'आत्वादौ', आत्वम्-आकारादेशत्वमादिर्यत्र, आदिशब्दात् ईत्वमित्वं च ज्ञेयम्।'वेदसहश्रुतावायुदेवतानाम्' (३।२।४१) इत्यारभ्य 'उषासोषः' (३।२।४६) इति यावत् आत्वादयो विज्ञेयाः ॥२८॥

## आतो नेन्द्र-वरुणस्य ॥७।४।२९॥

म० वृ०-आकारान्तात्पूर्वपदात्परस्य इन्द्रशब्दस्य वरुणशब्दस्य चोत्तरपदस्यादिस्वरस्य 'वृद्धिर्न' भवति। [1]आग्नेन्द्रं सूक्तम्, [2]ऐन्द्रावरुणम्। ननु इन्द्रशब्दस्य द्वौ स्वरौ, तत्राद्यः सन्धिकार्येण ह्रियते, अपरश्च 'अवर्णेवर्णस्य' (७।४।६८) इति, अतोऽस्वर एवेन्द्रशब्दः, तस्य किं वृद्धिप्रतिषेधेन? सत्यम्, किन्तु अनेनैतत् ज्ञाप्यते-बहिरङ्गमपि "पूर्वं पूर्वोत्तरपदयोः कार्यं भवति पश्चात् सन्धिकार्यम्"। [3]तेन पूर्वेषुकामशम इत्यादि सिद्धम्। इति वृद्ध्यधिकारः सम्पूर्णः ॥२९॥

अव०-[1]अग्निश्च इन्द्रश्च, तौ देवताऽस्य, 'वेदसह०'(३।२।४१)इति आत्वम्। [2]इन्द्रश्च वरुणश्च, तौ देवता अस्य=ऐन्द्रवरुणम्। एवं मैत्रावरुणम्। [3]बहिरङ्गकार्यं पूर्वं भवति पूर्वोत्तरपदयोः कार्ये कर्त्तव्ये,पश्चात् अन्तरङ्गं सन्धिकार्यं भवतीत्यर्थः।२९।

## सारवैक्ष्वाक-मैत्रेय-भ्रौणहत्य-धैवत्य-हिरण्मयम् ॥७।४।३०॥

म० वृ०-सारवादयोऽणाद्यन्ताः कृताद्यलोपादयो निपात्यन्ते। [1]सारवमुदकम्, [2]ऐक्ष्वाकः, [3]मैत्रेयः, [4]भ्रौणहत्यम्, [5]धैवत्यम्, [6]हिरण्मयम् ॥ ३० ॥

अव०-[1]सरयूशब्दः, सरय्वां नद्यां भवं=सारवम्, 'भवे' (६।३।१२३) अण्, निपातनात् अयू इति लुप्यते, 'अस्वयंभुवोऽव्' (७।४।७०)। [2]इक्ष्वाकु, इक्ष्वाकोरपत्यम्=ऐक्ष्वाकः, 'राष्ट्रक्षत्रिया'० (६।१।११४) इत्यादिना अञ्, अथवा इक्ष्वाकोरिदम्=ऐक्ष्वाकम्, 'कोपान्त्या'० (६।३।५६) इत्यण्, निपातनात् उकारलोपः। [3]मित्रयु, मित्रयोरपत्यं=मैत्रेयः, 'गृष्ट्यादेः' (६।१।८४) इत्यनेन एयञ्, निपातनात् यु इति लुप्यते। [4]भ्रूणपूर्वो हन्, भ्रूणं हतवान्=भ्रूणहा, 'ब्रह्मभ्रूणवृत्रा'० (५।१।१६१) इति क्विप्, भ्रूणघ्नो भावः कर्म वा, ट्यण्। [5]'ध्यैं चिन्तायाम्' ध्यायतीति धीवा, 'मन्वन्क्वनिप्'० (५।१।१४७) इति

कनिप्, 'यजादिवचेः'० (४।१।७९) इति य्वन् इः, 'दीर्घमत्रोऽन्त्यम्' (४।१।१०३) इत्यनेन दीर्घः,धीवन् इति शब्दः, धीव्नो भावः कर्म वा, ष्यण्, निपातनात् उभयत्रापि नकारस्य तकारः। [६]हिरण्यस्य विकारः, 'अभक्ष्याच्छादने वा मयट्' (६।२।४६), निपातनात् यकारलोपः, 'हिरण्मयम्' इति सिद्धम्। 'सारवैक्ष्वाकमैत्रेय'० इति सूत्रे विशेषोऽयम्,-ननु मित्रयुशब्दो बिदादिगणे किं न पठ्यते ? तथा च 'केकयमित्रयु'० (७।४।२) इति सूत्रेण इयादेशेनैव मैत्रेय इति सिद्धयति, किमर्थं मैत्रेय इति निपातः ? तथा यस्कादिषु 'मित्रयुशब्दो लुबर्थं पठितव्यो न भवति, मित्रयोरपत्यानि,'गृष्टयादेः' (६।१।८४) इति यञ्, 'यस्कादेर्गोत्रे' (६।१।१२५) इति सूत्रेण यञ् लुप्यते इति प्रक्रिया परिहृता भवति,'यञञोः'०(६।१।१२६) इत्यादिनैव सिद्धत्वात् ,'विदादेर्वृद्धे' (६।१।४१) इति कृताञ्लोपस्य इति भावः, अथ सूरिराह- युक्तमुक्तम्, अञि सति मित्रयूणां सङ्घो मैत्रेयकमित्यत्र 'गोत्राददण्ड'० (६।३।१६९) इति कृतमकञं बाधित्वा 'सङ्घघोषाङ्क'० (६।३।१७२) इत्यनेनाण् स्यादिति बिदादिगणे न पठ्यते ॥३०॥

## वाऽन्तमा-ऽन्तितमा-ऽन्तितो-ऽन्तिया-ऽन्तिषद् ॥७।४।३१॥

म० वृ०-अन्तमादयस्तमबादिप्रत्ययान्ताः कृततिकादिलोपादयो वा निपात्याः । [१]अन्तमः, पक्षे अन्तिकतमः; [२]अन्तितमः, अन्तिकतमः ; [३]अन्तितः, आयाति अन्तिकत आयाति ;[४]अन्तियः,[५]अन्तिक्यः ; [६]अन्तिषद्, पक्षे अन्तिकसद् ॥३१॥

अव०-अन्तति बध्नाति समीपत्वमिति अन्तिकः, 'कुशिकहृदिकमक्षिकेतिकपिपीलिकादयः' (उ० ४५) इकप्रत्ययः, अथवा अन्तोऽस्यास्तीति अन्तिकः, 'अतोऽनेकस्वरात्' ( ७।२।६ ) इत्यनेन इकप्रत्ययः । अन्तमः, अन्तिमतमः, अन्तितः, अन्तियः, अन्तिषद् इति प्रयोगपञ्चकं अन्तिकशब्देन निपात्यते । तथाहि-[१]अन्तिक इति शब्दः,अयमेषामतिशयेनान्तिकः, 'प्रकृष्टे तमप्' ( ७।३।५ ), निपातनात् तिक इति लुप्यते, अन्तम इति सिद्धम्। अन्तम इति उदाहरणे तिकलोपे कृते अन् इति अत्र 'नोऽप्रशानोऽनुस्वारा०' (१।३।८) इत्यनेन सकाराभावश्च निपात्यते । [२]अयमेषामतिशयेन अन्तिकः=अन्तितमः, तमप्, निपातनात् ककार एव लुप्यते, अन्तितम इति सिद्धम्, पक्षे अन्तिकतमः । [३]अन्तिकशब्दः, अन्तिकादागच्छति इति वाक्ये 'अहीयरुहो०' ( ७।२।८८ ) इति तस्, निपातनात् ककार एव लुप्यते, अन्तित आगच्छति सिद्धम्। [४]अन्तिक,अन्तिके साधुः=अन्तियः, 'तत्र साधौ' ( ७।१।१५ ) यप्रत्ययः, निपातनात् को लुप्यते । [५]'अवर्णेवर्णस्य'(७।४।६८) । [६]अन्तिक, षद् धातुः, अन्तिके सीदति, क्विप्, निपातनात् कलोपः, सस्य षत्वं च ॥३१॥

## विन्मतोर्णीष्ठेयसौ लुप् ॥७।४।३२॥

म० वृ०-विन्मतुप्रत्यययोर्णि इष्ठ ईयसु इति प्रत्ययेषु परेषु 'लुप्' स्यात्। [१]स्रजयति, [२]स्रजिष्ठः, [३]स्रजीयान्। मतु,-[४]त्वचयति, [५]त्वचिष्ठः, [६]त्वचीयान् ,[कुमुदान्यत्र सन्ति,'नडकुमुद०'(६।२।७४)इति चातुरर्थिको मतुः, स च डित् ,कुमुद्वन्तमाचष्टे,णिच्] कुमुदयति, कुमुदिष्ठः, कुमुदीयान्। [७]अत एव वचनादगुणाङ्गादपीष्ठेयसू[८] ॥३२॥

अव०-णि इत्युक्ते णिच्-णिग्प्रत्ययौ ग्राह्यौ। [१]स्रग् अस्यास्तीति स्रग्वी, 'अस्तपोमा०' (७।२।४७) इति विन्प्रत्ययः, स्रग्विणमाचष्टे, 'णिज् बहुलं नाम्नः०' ( ३।४।४२ ) इत्यनेन णिच्प्रत्ययः, ततो 'विन्मतो'-रित्यादिना विन्प्रत्ययो लुप्यते, पुनः स्रज् इति शब्दः, तिव्, शव्, गुणः। [२]अयमेषां स्रग्विणां मध्येऽतिशयेन स्रग्वी [ स्रजिष्ठः, [३]अयमनयोः स्रग्विणोर्मध्येऽतिशयेन स्रग्वी] स्रजीयान्, 'गुणाङ्गाद्वेष्ठेयसू' ( ७।३।९ ) इत्यनेन इष्ठेयसुप्रत्ययौ कार्यौ। एवमग्रेऽपि सर्वत्र णीष्ठेयसूनां वाक्यानि कार्याणि प्रत्ययाश्च कार्याः। [४]त्वच् विद्यतेऽस्मिन्=त्वग्वान्, मतुः, 'मावर्णा०' (२।१।९४) इति मस्य वः, त्वग्वन्तमाचष्टे। [५]अयमेषामतिशयेन त्वग्वान्=त्वचिष्ठः। [६]अयमनयोरतिशयेन त्वग्वान्=

त्वचीयान् । ⁵'अत एव वचने'–स्यादि, विन्नन्ताच मन्नन्ताच अगुणाङ्गत्वादिष्ठेयसू न प्राप्नुतः, स्रग्व्यादयो हि सम्बन्धप्रवृत्तिनिमित्ता एव, न गुणप्रवृत्तिनिमित्ता इति स्रग्व्यादिभ्योऽपि इष्ठेयसू न प्राप्नुतः ( इत्याह- ) अत एव वचनेति । ⁶निर्दिश्यमानत्वात् प्रत्ययमात्रस्य लुप् इत्यक्षराणि अत्र ज्ञातव्यानि ॥३२॥

## अल्पयूनोः कन्वा ॥७।४।३३॥

म० वृ०–अल्प युवनशब्दयोः 'कन्' इत्यादेशो वा णि इष्ठ ईयसु (इत्येतेषु)परेषु स्यात् । ¹कनयति, कनिष्ठः, कनीयान् ; पक्षे ¹अल्पयति ²अल्पिष्ठः, अल्पीयान् ; ³यवयति, ⁴यविष्ठः, ⁴यवीयान् ॥३३॥

अव०–¹अल्पमाचष्टे, णिच् । ²अयमेषामतिशयेनाल्पः=अल्पिष्ठः । ³युवन् शब्दः, युवानमाचष्टे, णिच् , 'स्थूलदूर०'(७।४।४२) इति वक्ष्यमाणसूत्रेण वन् इति लुप्यते, यु इत्यस्य गुणश्च ; यवयति । ⁴अयमेषामतिशयेन युवा=यविष्ठः । यविष्ठः ⁴यवीयान् इत्यत्र वचनसामर्थ्यात् अगुणाङ्गादपि इष्ठेयसू भवतः , अन्यथा 'स्थूलदूर०' (७।४।४२) इत्यनेनान्तस्थादेरवयवस्य लुबपि न स्यात् , इष्ठेयसोरभावात् । एवमुत्तरत्रापि द्रष्टव्यम् ॥३३॥

## प्रशस्यस्य श्रः ॥७।४।३४॥

म० वृ०–प्रशस्य इति शब्दस्य णीष्ठेयसुषु परतः 'श्र' इत्यादेशः [सस्वरः श्रः आदेशः] स्यात् । श्रयति, श्रेष्ठः, श्रेयान् ॥३४॥

## वृद्धस्य च ज्यः ॥७।४।३५॥

म० वृ०–वृद्धशब्दस्य प्रशस्यशब्दस्य च णीष्ठेयसुषु परतो 'ज्य' इत्यादेशः स्यात् । ज्ययति, ज्येष्ठः ॥३५॥

अव०–सस्वर एव ज्य आदेशः, सस्वरत्वे ज्येष्ठ इत्यत्र फलम् । वृद्धशब्दः, प्रशस्यशब्दश्च ; वृद्धमाचष्टे , प्रशस्यमाचष्टे ; प्रशस्यं करोति वा ; णिच् , वृद्धस्य ज्य आदेशः, प्रशस्यापि ज्यः, पश्चात् 'अवर्णेवर्णस्य'(७।४।६८) इति सूत्रेण न अकारलोपः, 'त्र्यन्त्यस्वरादेः' (७।४।४३) इति (अपि) न प्रवर्त्तते, 'नैकस्वरस्य' ( ७।४।४४ ) इति निषेधात् , इति ज्य श्र (इति)आदेशौ सस्वरावेव,ज्येष्ठः श्रेष्ठः एतौ सिध्यतः, यतः श्रः ज्य इत्यादेशौ सस्वरावेव, तेन श्रेष्ठः, श्रेयान् , ज्येष्ठः इति सिद्धम् ;एषु हि 'अवर्णेवर्णस्य' (७।४।६८) 'त्र्यन्त्यस्वरादेः' ( ७।४।४३ ) इति सूत्रद्वयमपि न प्रवर्त्तते । 'नैकस्वरस्य' (७।४।४४) इति सूत्रे सर्वं कारणं वक्ष्यते इति ॥३५॥

## ज्यायान् ॥७।४।३६॥

म० वृ०–ज्यादेशात्परस्य ईयसोरीकारस्य आकारादेशो निपात्यते । ¹ज्यायान् , ज्यायसी ॥३६॥

अव०–¹अयमनयोरतिशयेन प्रशस्यो वृद्धो वा=ज्यायान् ॥३६॥

## बाढा-ऽन्तिकयोः साध नेदौ ॥७।४।३७॥

म० वृ०–बाढान्तिकशब्दयोर्णीष्ठेयसुषु परतो यथासङ्ख्यं साध नेद इत्यादेशौ भवतः । ¹साधयति, ²साधिष्ठः, ³साधीयान् ; नेदयति, नेदिष्ठः, नेदीयान् ॥३७॥

अव०–¹बाढमाचष्टे, णिच् । ²साधिष्ठः, इष्ठप्रत्ययः, ³साधीयान् ; उभयत्रापि 'त्र्यन्त्यस्वरादेः' ( ७।४।४३ ) इति अकारलोपः । साध नेद (इति)आदेशौ अकारान्तावेव,समानलोपित्वात् ङपरे णौ सन्वदादिकार्याभावफलार्थम् ॥३७॥

## प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध-वृन्दारकस्येमनि च प्रा-स्था-स्फा-वर-गर-बंह-त्रप-द्राघ-वर्ष-वृन्दम् ॥७।४।३८॥

म० वृ०–प्रियादीनां यथासम्भवमिमनि णीष्ठेयसुषु च परेषु यथासङ्ख्यं प्रा इत्यादयः आदेशा भवन्ति । प्रियस्य प्रा,–¹प्रेमा, ²प्रापयति, ³प्रेष्ठः, ⁴प्रेयान् । स्थिरस्य स्था,-स्थेमा, स्थापयति, स्थेष्ठः, स्थेयान् । स्फिरस्य स्फा,- स्फापयति,स्फेष्ठः, स्फेयान् । उरोर्वर् ,- वरिमा,वरयति, वरिष्ठः,,वरीयान् । गुरोर्गर् ,-गरिमा,गरयति, गरिष्ठः, गरीयान् । बहुलस्य बंह् ,- बंहिमा,बंहयति, बंहिष्ठः,बंहीयान् ।

तृप्रस्य त्रप्,- त्रपिमा, त्रपयति, त्रपिष्ठः,त्रपीयान् । दीर्घस्य द्राघ्,- द्राघिमा, द्राघिष्ठः,द्राघीयान् । वृद्धस्य वर्ष्,- वर्षिमा, वर्षयति, वर्षिष्ठः, वर्षीयान् । वृन्दारकस्य वृन्द्,- वृन्दिमा, वृन्दयति, वृन्दिष्ठः वृन्दीयान् ॥३८॥

अव०–[1]प्रियस्य भावः=प्रेमा, प्रियशब्दस्थाने प्रा इत्यादेशः । एवमग्रेऽपि व्याख्येयम् । [2]प्रियमाचष्टे, णिच् । [3]अयमेषामतिशयेन प्रियः=प्रेष्ठः, [4]अयमनयोरतिशयेन प्रियः प्रेयान् ; 'गुणाङ्गाद्वे०' (७।३।९) इति इष्ठः, ईयस् । एवमग्रेऽपि वाक्यानि । कश्चित् करोत्यर्थे णौ सति प्रा स्था(इति)आदेशं नेच्छति । तन्मते प्रिययति, स्थिरयति । स्फिरशब्दस्य पृथ्व्यादिगणपाठाभावात् वर्णदृढादेरपि प्राप्त्यभावाच्च न इमन् । बरादिशब्दानां सर्वेषामकार उच्चारणार्थ एव सूत्रे पठ्यते ॥३८॥ [७।४।३९।

## पृथु-मृदु-भृश-कृश-दृढ-परिवृढस्य ऋतो रः

म० वृ०–पृथ्वादीनामृकारस्य इमनि णीष्ठेत्यादिषु च 'र' इत्यादेशः स्यात् । प्रथिमा, प्रथयति, प्रथिष्ठः, प्रथीयान् । म्रदिमा, म्रदयति, म्रदिष्ठः, म्रदीयान् । भ्रशिमा, भ्रशयति, भ्रशिष्ठः, भ्रशीयान् । क्रशिमा क्रशयति, क्रशिष्ठः, क्रशीयान् । द्रढिमा, द्रढयति, द्रढिष्ठः, द्रढीयान् । परिव्रढिमा, परिव्रढयति[1] ॥३९॥

अव०–पृथुमृदुभ्यां 'पृथ्वादेरिमन्वा' (७।१।५८) इमन्, शेषेभ्यस्तु 'वर्णदृढाभ्य०' (७।१।५९) इत्यनेन इमन् । केचित् वृढशब्दस्यापि रत्वमिच्छन्ति,–व्रढिमा, व्रढयति, व्रढिष्ठः, व्रढीयान् । पृथ्वादीनामिति किम् ? ऋजिमा, ऋजयति, ऋजिष्ठः, ऋजीयान् ; कृष्णिमा, कृष्णयति, कृष्णिष्ठः, कृष्णीयान् । ऋत इति किम ? सर्वस्य मा भूत् । [1] एवम् ) परिव्रढिष्ठः, परिव्रढीयान् ॥३९॥

## बहोर्णीष्ठे भूय् ॥७।४।४०॥

म० वृ०–बहुशब्दस्य णीष्ठयोः परयो-'र्भूय्' इत्यादेशः स्यात् । भूभावापवादः । [बहुमाचष्टे=] भूययति, भूयिष्ठः, बहोराख्यानं=भूयनम् [1]॥४०॥

अव०–[1]बहोराख्यानमिति वाक्यं णिच्प्रत्ययस्य अनट्प्रत्ययस्यापि सम्भवति । अथवा बहुमाचष्टे इति वाक्ये णिचं कृत्वा ततो 'बहोर्णीष्ठे भूय्' इत्यनेन भूय् इत्यादेशः, ततो भूय्यते इति भूयनम्, अनट् ॥४०॥

## भूर्लुक् चेवर्णस्य ॥७।४।४१॥

म०वृ०–बहुशब्दस्य [1]'ईयसौ' इमनि च परे 'भू' इत्यादेशः स्यात्, ईयस्विमनोरिवर्णस्य च 'लुक्' स्यात् । भूयान्, भूयांसौ, भूयांसः, [ 'पृथ्वादेरिमन्वा' (७।१।५८ ] भूमा । [2]भू ऊ इत्यूकारप्रश्लेषादवादेशो न भवति ॥४१॥

अव०–[1]"प्रियस्थिर०' (७।४।३८) इति सूत्रादिमन्, णि, इष्ठ, ईयस् च एते चत्वारोऽनुवर्त्तन्ते, तेषु च णीष्ठयोः पूर्वसूत्रे गृहीतत्वात् पारिशेष्यात् अत्र इमनीयस्प्रत्यययोरेव 'भूर्लुक् च०' इति सूत्रं प्रवर्त्तते इत्यत्र 'ईयसौ ईमनि चे'-ति व्याख्यातम् । [2]ननु 'भूर्लुक् च०' इत्यनेन भू इत्यादेशविधानादेव 'अस्वयं भुवोऽव्' ( ७।४।७० ) इत्यनेनाव् न भविष्यति, भूमा (इति) अत्र च पदत्वात्, अपदे च उक्तोऽवादेश इत्यत्रापि अव् न भविष्यति, उच्यते, भ्वादेशस्य चरितार्थत्वात् भूयान्, भूयांसौ, भूयांसः, एषु आवादेशः स्यादेव इति भूश्चासौ ऊश्च इति ऊकारप्रश्लेषेण व्याख्यानं कर्त्तव्यम् ॥४१॥

## स्थूल-दूर-युव-ह्रस्व-क्षिप्र-क्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः ॥७।४।४२॥

म० वृ०–स्थूलादीनां यथासम्भवमिमनि णीष्ठेयसुषु च परेषु 'अन्तस्थादेरवयवस्य लुक् नामिनश्च गुणः' स्यात् । स्थूल,-स्थवयति, स्थविष्ठः, स्थवीयान् । दूर,-दवयति, दविष्ठः, दवीयान् । युवन्,-यवयति, यविष्ठः, यवीयान् । ह्रस्व,-ह्रसिमा ह्रसयति, ह्रसिष्ठः, ह्रसीयान् । क्षिप्र,-क्षेपिमा, क्षेपयति, क्षेपिष्ठः, क्षेपीयान् । क्षुद्र,-क्षोदिमा, क्षोदयति, क्षोदिष्ठः, क्षोदीयान् । केचित् स्थूलदूरयूनां

करोत्यर्थे णौ अन्तस्थालोपं गुणं च नेच्छन्ति, स्थूलं करोति=स्थूलयति, दूरयति, युवयति ॥४२॥

अव०-ह्रस्वादिशब्देभ्य एव परतः पृथ्व्यादि त्वादिमन् भवति, न स्थूलदूरयुवन्शब्देभ्यः, अप्राप्तेः । 'स्थूलदूर०' इति सूत्रे विशेषोऽयम्- नामिन इति किम् ? ह्रस्वक्षिप्रक्षुद्राणां सकारपकारदकाराणां गुणो मा भूत्, तथाहि-"सर्वमुखस्थानमवर्ण"-मित्येकदेशेन अवयवेन प्रत्यासत्त्या सकारदकारयोर्गुणोऽर् प्राप्नोति, अथवा सकारदकारयोः "लृवर्णतवर्गलसा दन्त्याः" इति न्यायादल् इति गुणः प्राप्नोति, रश्रुतेर्लश्रुतिरिति भावात्, पकारस्य तु "उवर्णपवर्ग०" इति न्यायात् उकारो गुणः स्यादिति नामिन इति कृतम् । 'अन्त्यस्वरादेः' ( ७।४।४३ ) इत्युत्तरेणान्त्यस्वरादेः 'स्थूलदूर०' (७।४।४२) इत्यनेनाथौदन्तस्थाया लोपे सिद्धे अन्तस्थादेरिति किमर्थम् ? ★ अत्रोच्यते, 'येन नाप्राप्ति' ❀ न्यायेनान्त्यस्वरादिलोपं बाधित्वा 'स्थूलदूर०'(७।४।४२) इत्यनेनान्तस्थाया एव लोपो मा भूदित्येवमर्थमन्तस्थादेरिति कृतमिति भावः ॥४२॥

## अन्त्यस्वरादेः ॥७।४।४३॥

म० वृ०-तृप्रत्ययस्य अन्त्यस्वरादेश्चावयवस्य इमनि ण्यादौ च परे 'लुक्' स्यात् । कर्तृमन्तमाचष्टे=[१]करयति, करिष्ठः, करीयान् । कर्त्तारमाचष्टे [२]करयति । तथा मातयति भ्रातयतीत्यत्र त्वनर्थकत्वात् तृशब्दस्य न लुक् । [३]पटिमा, [४]पटयति, पटिष्ठः, पटीयान् । [५]विमनिमा, [६]सन्मनिमा ॥४३॥

अव०-[१]कर्त्ताऽस्यास्ति, कर्तृमत् शब्दः, कर्तृमन्तमाचष्टे, णिज्, 'विन्मतोर्णीष्ठ०' (७।४।३२) इत्यनेन मतुलुप्यते, तदनन्तरं 'अन्त्यस्वरादेः' (७।४।४३) इत्यनेन तृप्रत्ययस्य लोपः । एवं वसवयतीत्यत्रापि । करयतीत्यत्र तृप्रत्ययस्य लोपे कृते तन्निमित्तको गुणोऽर् इति न निवर्त्तते, 'स्थानीवावर्णविधौ' (७।४।१०९) इति स्थानित्वात् । तथा [२]कर्तृशब्दः, कर्त्तारमाचष्टे, णिज्, अत्रापि तृप्रत्ययो लुप्यते, ततः कर् इति रूपं जातम्, तिव्, शव्, गुणः, करयति इति सिद्धम् । [३]पटु, पटोर्भावः, पृथ्वादिभ्य इमन्, अत्र 'अन्त्यस्वरादेः' इत्यनेनान्त्यस्वरादिलोपः पटिमा इति सिद्धम् । [४]पटुमाचष्टे=पटयति, णिज्, अत्र पूर्वं वृद्धिः क्रियते, उकारस्य औः, ततः 'अन्त्यस्वरादेः' इति औः लुप्यते, यद्वा औ ( इत्यस्य ) आवि कृतेऽपि अन्त्यस्वरादेः आव् इत्यस्य लोपः । [५]विमनस्, [६]सन्मनस् ; विमनसो भावो=विमनिमा, सन्मनसो भावः=सन्मनिमा ; 'वर्णदृढा०'(७।१।५९) इमन्, ततोऽन्त्यस्वरादिलोपः । केचित्तु अनेकस्वरशब्दस्यान्त्यस्वरादिलोपं विकल्पेन इच्छन्ति, लुबभावपक्षे णौ यथासम्भवं नामिनश्च गुणं चेच्छन्ति । पयस्विनमाचष्टे=पययति, णिज्, 'विन्मतो०' (७।४।३२) इत्यनेन विन्लोपः,पक्षे पयसयति ; पयिष्ठः,पयसिष्ठः ; पयीयान्, पयसीयान् ; तथा वसुमत्शब्दः, वसुमन्तमाचष्टे, णिज्, 'विन्मतो०' ( ७।४।३२ ) मतुः लुप्यते, वसयति, पक्षे गुणः- वसवयति, वसिष्ठः, वसविष्ठः ; वसीयान्, वसवीयान् इति मतान्तरे ॥४३॥

## नैकस्वरस्य ॥७।४।४४॥

म० वृ०-एकस्वरशब्दस्य योऽन्त्यस्वरादिरवयवस्तस्य इमनादौ परे 'लुग् न' भवति । [१]स्रजयति, [२]स्रजिष्ठः, [३]स्रुचयति । एकस्वरस्येति किम्? [४]वसयति, वसिष्ठः, वसीयान् । इमनि चेत्येव- [अस्यापत्यम्=] इः, [इो देवताऽस्य= ] इः, [श्रिये हितः=][५]श्रीयः । [६]योगविभागाद् 'अवर्णेवर्णस्य'(७।४।६८) इति लोपस्यापि प्रतिषेधः, तेन श्रेष्ठः, श्रेयान् ॥४४॥

★ अन्त्यस्वरस्य तावत् 'अन्त्यस्वरादेः' इत्यनेन लुपि सत्यामन्तस्थामात्रमेवावशिष्यते, ततोऽत्रादिग्रहणं निरर्थकमिति अन्तस्थादेरित्यस्य स्थाने 'अन्तस्थायाः' इति वक्तव्यमिति प्रश्नाशयः ।

❀ "येन नाऽप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः" इति न्यायेन ।

अव०–[1]स्रग्विणमाचष्टे,'विन्मतो०'(७।४।३२) विन्लोपः । [2](एवं) स्रजीयान् , अयमनयोरतिशयेन स्रग्वी । [3]स्रु ग्वन्तमाचष्टे, णिच् । एवं स्रु चिष्ठः, स्रु चीयान् । [4]वसुमन्तमाचष्टे,णिच् ,वसयति । [5]'श्री-यः', 'तस्मै हिते' ( ७।१।३५ ) ईयः । [6]'अन्त्यस्वरादेर्नैकस्वरस्य' इत्येकमेव वचनं किमर्थं न कृतमिति पराशयः , सूरिराह–योगविभागेत्यादि , योऽयं योगविभागः 'अन्त्यस्वरादेः' (७।४।४३) 'नैकस्वरस्य' (७।४।४४) इति पृथक् पृथक् सूत्रं कृतम् तेन श्रेष्ठः, श्रेयान् , ज्येष्ठः इति सिद्धम् । अत्र हि योगविभागबलात् 'अवर्णेवर्णस्य' (७।४।६८) इति प्रवृत्तिप्रतिषेधः (अपि) सञ्जातः ॥४४॥

## दण्डिहस्तिनोरायने ॥७।४।४५॥

म० वृ०–दण्डिन्-हस्तिन्शब्दयोरन्त्यस्वरादेरायन[1] इति प्रत्यये परे 'न लुक्'स्यात् । 'नोऽपदस्य०' (७।४।६१) इति प्राप्तौ प्रतिषेधोऽयम् । [2]दाण्डिनायनः, [3]हास्तिनायनः ॥४५॥

अव०-[1]आयनण् ।[2]दण्डिनो[3]हस्तिनोऽपत्यम्, नडाद्यायनण् । आयने इति किम् ? दण्डिनां समूहो=दाण्डम् , 'श्वादिभ्योऽञ्' (६।२।२६) ।४५।

## वाशिन आयनौ ॥७।४।४६॥

म० वृ०–वाशिन्शब्दस्यान्त्यस्वरादेरायनिञ्-प्रत्यये परे 'न लुक्' स्यात् । [ वाशिनोऽपत्यम् , 'अवृद्धाद्दोर्नवा' ( ६।१।११० ) इत्यायनिञ् ] वाशिनायनिः ॥४६॥

## एये जिह्माशिनः ॥७।४।४७॥

म० वृ०–जिह्माशिन्शब्दस्यान्त्यस्वरादेरेयप्रत्यये परे 'लुग् न' स्यात् । जैह्माशिनेयः ॥४७॥

अव०–जिह्माशिनोऽपत्यम् , शुभ्रादित्वादेयण् ।४७।

## ईनेऽध्वात्मनोः ॥७।४।४८॥

म० वृ०–अध्वन् आत्मन् (इति) शब्दयोरन्त्यस्वरादेरीनप्रत्यये परे'लुग् न'स्यात् । [1]अध्वनीनः, [2]आत्मनीनः ॥४८॥

अव०–[1]अध्वानमलङ्गामी=अध्वनीनः, 'अध्वानं येनौ' ( ७।१।१०३ ) ईनः । [2]आत्मने हितः= आत्मनीनः, 'भोगोत्तरपदात्मभ्यामीनः' (७।१।४० ) इति ईनः ॥४८॥

## इकण्यथर्वणः ॥७।४।४९॥

म० वृ०–अथर्वन्शब्दस्यान्त्यस्वरादेरिकणि परे 'लुग् न' स्यात् । [1]आथर्वणिकः ॥४९॥

अव०–[1]अथर्वाणं वेत्त्यधीते वा=आथर्वणिकः, न्यायादित्वादिकण् ॥४९॥

## यूनोऽके ॥७।४।५०॥

म०वृ०–युवन्शब्दस्यान्त्यस्वरादेरकञ्प्रत्यये 'लुक् न' स्यात् । [1]यौवनिका । अक इति किम् ? [2]यौविकम् ॥५०॥

अव०–[1]यूनो भावो=यौवनिका, चौरादित्वादकञ् , वृद्धिः, ततः आप् , 'इच्चापुंसो०' ( २।४।१०७) इति इः । [2]तथा युवा प्रयोजनमस्य=यौविकम् , 'प्रयोजनम्' ( ६।४।११७ ) इति इकण् , 'नोऽपदस्य तद्धिते' (७।४।६१) न् लुप्यते ॥५०॥

## अनोऽट्ये[1] ये ॥७।४।५१॥

म० वृ०–अन् इत्यन्तस्य शब्दस्यान्त्यस्वरादेः ट्यवर्जे यप्रत्यये परे 'लुग् न' स्यात् । [2]सामन्यः, [3]मूर्द्धन्यः, [4]ताक्षण्यः । अट्य इति वचनात् सानुबन्धोऽपि प्रत्ययो गृह्यते । अट्य इति किम् ? [5]राज्यम् , दौरात्म्यम् ॥५१॥

अव०–[1]न ट्योऽट्यः । [2]सामनि साधुः । [3]मूर्द्धनि भवः, 'दिगादिदेहांशाद् यः' (६।३।१२४) । [4]तक्ष्णोऽपत्यं=ताक्षण्यः, 'कुर्वादेर्ञ्यः'(६।१।१००) । [5]राज्ञो भावः कर्म वा, 'पतिराज०' (७।१।६०) इति ट्यण् ॥५१॥

## अणि ॥७।४।५२॥

म० वृ०–अन् इत्यन्तस्य शब्दस्यान्त्यस्वरादेरणि परे 'लुग् न' स्यात् । [1]सामनः, [2]कार्म्मणम् , [3]पार्वणः ॥५२॥

अव०–[1]साम देवताऽस्य=सामनः । [2]सन्दिष्टं कर्म= कार्मणम् , 'कर्मणः सन्दिष्टे' ( ७।२।१६७) इत्यण् । [3]पर्वणि भवः= पार्वणः ॥५२॥

## संयोगादिनः ॥७।४।५३॥

म० वृ०–संयोगात्परो य इन् तदन्तस्यान्त्यस्वरादेरणि परे 'लुग् न' स्यात् । [1]शाङ्खिनः, [2]चाक्रिणः, [3]वाज्रिणः, माद्रिणः । अनपत्येऽणि उत्तरेण सिद्धत्वादपत्यार्थोऽयमारम्भः ॥५३॥

प्रव०–[1]शङ्खोऽस्यास्तीति इन्. शङ्खिनोऽपत्यम् । एवं [2]चक्रिणो [3]वज्रिणोऽपत्यम् ॥५३॥

## गाथि-विदथि-केशि-पणि-गणिनः ॥७।४।५४॥

म० वृ०– गाथ्यादीनामिन्नन्तानामन्त्यस्वरादेरणि परे 'लुग् न' स्यात् । [1]गाथिनः, [2]वैदथिनः, [3]कैशिनः, पाणिनः, गाणिनः ॥५४॥

प्रव०–[1]गाथाऽस्यास्तीति गाथी, 'शिखादिभ्य इन्' (७।२।४), गाथिनोऽपत्यं=गाथिनः । [2]विदथश्छन्दविशेषोऽस्यास्तीति । [3]केशा अस्य सन्ति,'अतोऽनेक०' (७।२।६) इन् ॥५४॥

## अनपत्ये ॥७।४।५५॥

म० वृ० इन्नन्तस्यापत्यादन्यत्रार्थे योऽण् तस्मिन् परेऽन्त्यस्वरादेः 'लुग् न' स्यात् । [1]साङ्कोटिनम्, [2]सांराविणम्, [3]गार्भिणम्। (अणीत्येव) [4]दाण्डम् [5]चाक्रम् ॥५५॥

प्रव०–[1]सम्पूर्वः कुटत् कुटण् वा धातुः, समन्तात् कोटः=सङ्कोटः, संकूटः; 'अभिव्याप्तौ भावेऽनञिन्' (५।३।९०) इत्यनेन ञिन्, वृद्धिः, साङ्कोटिनं साङ्कूटिनं वर्त्तते इति वाक्ये 'नित्यं ञिनोऽण्' (७।३।५८) इति सूत्रेण अण्, 'अनपत्ये' इत्यनेनान्त्यस्वरादिलोपनिषेधः । एवं [2]सांराविणमित्यपि, समन्ताद्रावः । [3]गर्भिणी, गर्भिणीनां समूहः=गार्भिणम्, 'भिक्षादेः' (६।२।१०) इत्यण्, 'जातिश्च णि०' (३।२।५१) इति पुंवद्भावः । (एवम्) गुणिन इदं=गौणिनम् । [4]दण्डिनां समूहो=दाण्डम्, [5]चक्रिणां समूहः, श्वादिभ्योऽञ्' (६।२।२६) इत्यञ् ॥ ५५ ॥

## उक्ष्णो लुक् ॥७।४।५६॥

म० वृ०–उक्षन्शब्दस्यानपत्येऽणि परे-'ऽन्त्यस्वरादेर्लुक्' स्यात् । उक्ष्ण इदम्=औक्षं पदम् ॥५६॥

## ब्रह्मणः ॥७।४।५७॥

म० वृ०–ब्रह्मन्शब्दस्यानपत्येऽणि परेऽन्त्यस्वरादे-'र्लुक्' स्यात् । ब्रह्मण इदं=ब्राह्ममस्त्रम् ,[ब्रह्मा देवताऽस्य=] ब्राह्मो मन्त्रः । योगविभाग उत्तरार्थः॥५७॥

## जातौ ॥७।४।५८॥

म० वृ०–ब्रह्मन्शब्दस्य जातौ वाच्यायामनपत्ये एवाणि परेऽन्त्यस्वरादेर्लुक् स्यात् । ब्राह्मी ओषधिः । पूर्वेण ['ब्रह्मणः' इति सूत्रेण सिद्धे] [1]जातावनपत्ये एवेति नियमार्थं वचनम् , [2]तेनोत्तरसूत्रेणापत्येऽन्त्यस्वरादेर्न लुक्–ब्राह्मणः । जाताविति किम् ? [3]ब्राह्मो नारदः ॥ ५८ ॥

प्रव०–[1]''जातावनपत्ये एवे''-त्यादि, व्यक्तिवाचिनस्तु ब्रह्मन्शब्दादपत्येऽणि परे ब्राह्म इत्येव भवति, उत्तरेण 'अवर्मणो मनोऽपत्ये' (७।४।५९) इत्यनेनान्त्यस्वरादेर्लोपात् । 'जातौ' इति सूत्राकरणे तु ब्राह्मण इति न सिध्येत इत्यभिप्रायः । ननु ब्रह्मणा प्रोक्तो ग्रन्थो ब्राह्मणम् , 'तेन प्रोक्ते' (६।३।१८१) इति सूत्रेण अण्, ततो'ऽणि' (७।४।५२) इति सूत्रेणान्त्यस्वरादिलोपनिषेधेऽपि ब्राह्ममस्त्रमितिवत् 'ब्रह्मणः' (७।४।५७) इति सूत्रेणान्त्यस्वरादिलोपो (कथं) न भवति ?(उच्यते) ब्राह्मणाच्छंसी' (३।२।११) 'वेदेन्ब्राह्मणमत्रैव' ( ६।२।१३० इति ) निर्देशबलात् । [2]'अवर्मणो मनोऽपत्ये' (७।४।५९) इत्युत्तरसूत्रेण । [3]ब्रह्मणोऽपत्यम् ॥५८॥

## अवर्मणो मनोऽपत्ये ॥७।४।५९॥

म० वृ०–वर्मन्वर्जितस्य मन् इत्यन्तस्य शब्दस्यापत्यार्थेऽणि परेऽन्त्यस्वरादेर्लुक् स्यात् । [1]सौषामः, माद्रसामः । अवर्मण इति किम् ? चाक्रवर्मणः ॥५९॥

प्रव०–[1]शोभनं सामाऽस्य=सुषामा,'निर्दुस्सोः सेधसन्धिसाम्नाम्' (२।३।३१) इति सूत्रेण सस्य षः, ततः सुषामणोऽपत्यं=सौषामः ॥५९॥

## हितनाम्नो वा ॥७।४।६०॥

म० वृ०–हितनामन्शब्दस्यापत्येऽणि अन्त्यस्वरादेः 'लुग् वा' स्यात् । [ हितनाम्नोऽपत्यं= ] हैतनामः, हैतनामनः ॥६०॥

## नोऽपदस्य तद्धिते ॥७।४।६१॥

म० वृ०-नकारान्तशब्दानामपदसंज्ञकानां तद्धिते परेऽन्त्यस्वरादे-'र्लुग्' स्यात् । [1]मैधावः, [2]मायावः, [3]आग्निशर्मिः, [4]द्व्यहः, [5]त्र्यहः, [6]हास्तिकम् । अपदस्येति किम् ? मेधाविरूप्यम्[7] ॥६१॥

अव०-[1]मेधाविनोऽपत्यम् ।[2]मायाविनोऽपत्यम् । [3]'बाह्वादिभ्यो गोत्रे' ( ६।१।३२ ) इञ् । [4]द्वयोरह्नोः समाहारः, [5]त्रयाणामह्नां (समाहारः),'द्विगोरन्नह्नोऽट्' ( ७।३।९९ ) इत्यट् , ततो ' नोऽपदस्य तद्धिते ' इत्यन्त्यस्वरादिलोपः । [6]हस्तिनां समूहः, 'कवचि'० (६।२।१४) इति इकण् ।[7]मेधाविन आगतम् ,'नृहेतुभ्यो रूप्य'० (६।३।१५६) ॥६१॥

## कलापि-कुथुमि-तैतलि-जाजलि-लाङ्गलि-शिखण्डि-शिलालि-सब्रह्मचारि-पीठसर्पि-सूकरसद्म-सुपर्वणः ॥७।४।६२॥

म० वृ०-कलाप्यादीनां नान्तानामपदसंज्ञकानां तद्धिते परेऽन्त्यस्वरादे-'र्लुक्' स्यात् । [1]कालापाः, [2]कौथुमाः, [3]तैतलाः, [4]जाजलाः, [5]लाङ्गलाः, [6]शैखण्डाः, [7]शैलालाः, [8]साब्रह्मचाराः, [9]पैठसर्पाः, [10]सौकरसद्माः, [11]सौपर्वाः ॥६२॥

अव०-'कलापि'० इति सूत्रे किञ्चिल्लिख्यते,- अत्र सूत्रे ये कलाप्यादय इन्नन्ताः शब्दास्तेषाम् 'अनपत्ये'(७।४।५५) इत्यनेनान्त्यस्वरादिलोपनिषेधे प्राप्ते, तथा शिखण्डिपीठसर्पिशब्दयोरपत्येऽपि 'संयोगादीनः' (७।४।५३) इत्यन्त्यस्वरलोपे प्राप्ते, तथा सूकरसद्मसुपर्वन्शब्दयोस्तु 'अणि' (७।४।५२) इत्यनेनान्त्यस्वरादिलोपे प्राप्ते 'कलापि'० इति सूत्रं कृतमित्यर्थः । [1]कलापिना प्रोक्तं वेदमधीयते= कालापाः । [2]कुथुमं मृगाजिनमस्यातीति कुथुमी, कुथुमिना प्रोक्तम् (अधीयते) । एवं [3]तेतलं [4]जजलं [5]लाङ्गलमस्यास्ति, इन् , तेतलिना जजलिना लाङ्गलिना प्रोक्तमधीयते, तैतली जाजली लाङ्गली इति नाम्ना ह्याचार्याः,तत्कृतो ग्रन्थोऽप्युपचारात्तच्छब्देनोच्यते, तमधीयते इति 'तेन प्रोक्ते'(६।३।१८१) इत्यण् । [6]शिखण्डिन इमे । अथवा शिखण्डिनोऽपत्यानि ।[7]शिलालिनोऽपत्यानि ।[8]एवं सब्रह्मचारिण इमेऽपत्यानि वा । [9]पीठसर्पिणः [10]सूकरसद्मनः [11]सुपर्वण इमेऽपत्यानि वा ॥६२॥

## वाऽश्मनो विकारे ॥७।४।६३॥

म० वृ०-अश्मन्शब्दस्यापदस्य विकारार्थे तद्धितेऽन्त्यस्वरादे-'र्लुग्' वा स्यात् । [1]आश्मः, आश्मनः ॥ ६३ ॥

अव०-[1]अश्मनो विकारः, 'विकारे' (६।२।३०) इति अञ् ॥६३॥

## चर्म्म-शुनः कोश-सङ्कोचे ॥७।४।६४॥

म० वृ०-चर्मन्शुनोरपदभूतयोर्यथासंख्यं कोशे सङ्कोचे चार्थे तद्धितेऽन्त्यस्वरादे-'र्लुक्' स्यात् । [1]चार्मः कोशः, कोशादन्यत्र चार्मणः । [शुनोऽयम्=] शौवः सङ्कोचः, सङ्कोचादन्यत्र शौवनः॥६४॥

अव०-[1]चर्मणो विकारः,'विकारे'(६।२।३०) । कथं शुनो विकारोऽवयवो वा शौवं मांसं पुच्छं वा ? अत्र 'हेमादिभ्योऽञ्'(६।२।४५),'नोऽपदस्य तद्धिते' (७।४।६१) इति अन्लुप् , एवं सिद्धिः ॥६४॥

## प्रायोऽव्ययस्य ॥७।४।६५॥

म० वृ०-अव्ययस्यापदसंज्ञकस्यान्त्यस्वरादेस्तद्धिते परे प्रायेण'लुक्'स्यात् । स्वर्भवः=[1]सौवः,बहिर्जातो=[2]बाह्यः, [3]बाहीकः, [4]सायंप्रातिकः, [5]पौनःपुनिकः, [6]पौनःपुन्यम् ,[7]औपरिष्टः, [8]पारतः, [9]एकैकश्यम् । प्रायोग्रहणं प्रयोगानुसरणार्थम् , तेनेह [10] न स्यात् ,- [11]आरातीयः, [12]शाश्वतिकः,[13]शाश्वतः, पार्थक्यम् ॥६५॥

अव०-[1]'द्वारादेः'(७।४।६) इति औः आगमः । [2]बहिर्जातो बाह्यः,[3]बाहीकः ; 'बहिषष्टीकण् च' (६।१।१६) इति ञ्यः टीकण् च । [4]सायंप्रातर्भवः सायंप्रातिकः,[5](पुनः)पुनर्भवः=पौनःपुनिकः,'वर्षाकालेभ्यः' (६।३।८०)इकण् , अनभिधानादव्ययलक्षणस्तनट् न

भवति। [६]पुनःपुनरित्येतस्य भावः=पौनःपुन्यम् त्र्यण्। [७]ऊर्ध्व,ऊर्ध्वा दिक् ऊर्ध्वो देशः ऊर्ध्वकालो वा रमणीयः, 'ऊर्ध्वाद्रिरिष्टात्'० (७।२।११४) इति रिष्टात्प्रत्ययः, ऊर्ध्वशब्दस्य च'उप' इत्यादेशः,उपरिष्टात् इतिशब्दः, उपरिष्टादागतः=औपरिष्ट इति वाक्यम्, 'तत आगते' (६।३।१४९) इत्यण्। [८]परत आगतः=पारतः, 'तत आगते' अण्। [९]एकं ददाति,'वीप्सायाम्'(७।४।८०) इत्यनेन द्वित्वम्, एकमेकम्, एकमेकं ददाति, 'प्लुप् चादावेकस्य स्यादेः' (७।४।८१) इत्यनेन पूर्वैकशब्दे अमो लुप्, एकैकशब्दः, 'बह्वल्पार्था०' (७।२।१५०) इति शस्, एकैकशो भावः=एकैकश्यम्। [१०]अन्त्यस्वरादेर्लोपो न भवति। [११]आरात्शब्दः, आराते भवः,'दोरीयः' (६।३।३२)। [१२]शश्वत् शब्दः, शश्वत् भवः, 'वर्षाकालेभ्यः' ६।३।८०) इतीकण्। [१३]शाश्वत इत्यत्र 'भर्तुसन्ध्यादेरण्' (६।३।८९)। अपदस्येत्येव-शंयुः, शुभंयुः ॥६५॥

## [१]अनीनादट्यह्नोऽतः ॥७।४।६६॥

म० वृ०-ईनादट्वर्जिते तद्धिते परेऽपदस्याह्नो योऽकारस्तस्य 'लुक्' स्यात्। [२]आह्नम्, [३]आह्निकम्। अनीनादटीति किम्? [४]द्व्यहीनः, [५]त्र्यहीणः, अति[६]-,[७]अन्वहम्,[८]प्रत्यहम्।[९]अटि,-[१०]द्व्यहः, [११]उत्तमाहः, [१२][ परमाहः, ][१३]पुण्याहम्, [१४]सुदिनाहम् ॥६६॥

अव०[१]ईन, अत्, अट्, नञ्पूर्वम्, ईनश्च अच्च अट् च=ईनादट्, न विद्यन्ते ईनादट्प्रत्यया यत्र सोऽनीनादट्, तस्मिन् अनीनादटि। [२]अह्नां समूहः=आह्नम्, 'खादिभ्योऽञ्' (६।२।२६)। [३]अह्ना निर्वृत्तमाह्निकम्, 'निर्वृत्ते' (६।४।१०५) इति इकण्। [४]द्वाभ्यामहोभ्यां भृतोऽधीष्टो वा द्व्यहीनः,अथवा द्वे अहनी भूतो भावी द्व्यहीनः। एवं [५]त्र्यहीणवाक्यम्। 'रात्र्यहःसंवत्सर०' (६।४।११०) इत्यादिना ईनप्रत्यय एव, न 'सर्वांशसङ्ख्या'०(७।३।११८) इति अट् समासान्तः।[६]अति कोऽर्थः? अप्रत्यये। [७]अहरहरनु=अन्वहम्। [८]अहरहः प्रति=प्रत्यहम्, 'योग्यतावीप्सार्थ'० (३।१।४०) इत्यनेनाऽव्ययीभावसमासः, 'नपुंसकाद्वा' (७।३।८९) इत्यनेन अत् समासान्तः। [९]अटि कोऽर्थः? अट्प्रत्यये। [१०]द्वयोरह्नोः समाहारो=द्व्यहः, एवं त्र्यहः, 'द्विगोर'० (७।३।९९) अट्। [११]उत्तमं च तदहश्च। [१२]एवं परमं च तदहश्च। [१३]पुण्यं च तदहश्च। [१४]एवं सुदिनाहम्। एषु चतुर्ष्वपि 'अह्नः' (७।३।११६) इति अट्, 'नोऽपदस्य तद्धिते' (७।४।६१) इत्यन्त्यस्वरादिलोपः ॥६६॥

## विंशतेस्तेर्डिति ॥७।४।६७॥

म०वृ०-विंशतेरपदस्य यस्तिकारस्तस्य 'लुक्' स्यात्तद्धिते डिति परे। [१]विंशकः, [२]विंशं शतम्, [३]एकविंशम्, [४]विंशः, [५]एकविंशः ॥६७॥

अव०-[१]विंशत्या क्रीतो=विंशकः, 'त्रिंशद्विंशतेर्डकोऽसंज्ञायामार्हदर्थे' (६।४।१२९) डकः।[२]विंशतिरधिकाऽस्मिन्=विंशं शतम्, [३]एकविंशतिरधिकाऽस्मिन्=एकविंशम्, अधिकं तत्सङ्ख्यमस्मिन् शतसहस्रे,'शतिशद्दशान्ताया डः' (७।१।१५४) इत्यनेन डः। [४]विंशतेः पूरणो = विंशः, [५]एवमेकविंशः, 'सङ्ख्यापूरणे डट्' (७।१।१५५) ॥६७॥

## अवर्णेवर्णस्य ॥७।४।६८॥

म०वृ०-अवर्णान्तस्य इवर्णान्तस्य चापदस्य तद्धिते परे 'लुक्' स्यात्। निर्दिश्यमानत्वादवर्णेवर्णयोरेव। दाक्षिः, [१]चौडिः, [२]बालाकिः। इवर्ण,-[३]नाभेयः, [४]रौहिणेयः, [५]वात्सप्रेयः। अपदस्येत्येव-शुक्लतमः, [६]ऊर्णायुः, [७]शुचितरः ॥६८॥

अव० [१]चूडाया अपत्यम्, बाह्वादित्वात् इञ्। [२]बलाकायाः अपत्यम्। [३]नाभेरपत्यं =नाभेयः, 'इतोऽनिञः' (६।१।७२) एयण्। [४]रोहिणी, 'ङ्याप्त्यूङः' (६।१।७०) एयण्। [५]वत्सं प्रीणातीति वत्सप्रीः, तस्या अपत्यं=वात्सप्रेयः, 'चतुष्पाद्भ्य एयञ्' (६।१।८३) वात्सप्रेयः। 'संयोगात्' (२।१।५२) इत्यनेन इयुवादेशौ न भवतः, परत्वात् अनयोः सूत्रयोः (? अनेन सूत्रेण) लोप एव भवति ॥६८॥

## अकद्रूपाण्ड्वोरुवर्णस्यैये ॥७।४।६९॥

म० वृ०—कद्रूपाण्डूवर्जितस्य उवर्णान्तस्य एये तद्धिते 'लुक्' स्यात् । [1]कामण्डलेयः, [2]जाम्बेयः । अकद्रूपाण्ड्वोरिति किम् ? [3]काद्रवेयः, [4]पाण्डवेयः । उवर्णान्तस्येत्येव—[5]वैमात्रेयः ॥६९॥

अव०—[1]कमण्डल्वा अपत्यम्, [2]जम्ब्वा अपत्यम्, 'ङ्याप्त्यूङः' (६।१।७०) एयण्, कामण्डलेयः, जाम्बेयः । [3]कद्रोरपत्यम्, [4]पाण्डोरपत्यम्, 'शुभ्रादिभ्यः' (६।१।७३) । [5]विमातुरपत्यम्, 'शुभ्रादिभ्यः' [इत्येयण् ] ॥६९॥

## अस्वयंभुवोऽव् ॥७।४।७०॥

म० वृ०—स्वयम्भूवर्जितस्योवर्णान्तस्यापदस्य तद्धिते 'अव्' इत्यादेशः स्यात् । औपगवः, [1]माण्डव्यः, [2]पिचव्यः कर्पासः, बाहविः । अस्वयम्भुव इति किम् [3]स्वायम्भुवः ॥७०॥

अव०—[1]मण्डोरपत्यं वृद्धं=माण्डव्यः, 'गर्गादेर्यञ्' (६।१।४२) । [2]पिचुभ्यो हितः, 'उवर्णयुगादेर्यः' (७।१।३०) । [3]स्वयं भवतीति स्वयम्भूः, स्वयम्भुवोऽपत्यं=स्वायम्भुवः, 'ङसोऽपत्ये' (६।१।२८) अण्, 'धातोरिवर्णोवर्ण'० (२।१।५०) इत्यनेन उवादेशः, अथवा स्वयम्भुवोऽयम्=स्वायम्भुवः, 'तस्येदम्' (६।३।१६०) इत्यण् ॥७०॥

## [1]ऋवर्णोवर्णदोसिसुसशश्वदकस्मात्त इकस्येतो लुक् ॥७।४।७१॥

म० वृ०—ऋवर्णान्तात्, उवर्णान्तात्, दोस् शब्दात्, इसन्तात्, उसन्तात् शश्वदकस्मात्-शब्दवर्जितात् तकारान्ताच्च परस्य इकप्रत्ययस्य सम्बन्धिन 'इतः=इकारस्य लुक्' स्यात् । [2]मातृकम्, [3]पैतृकम्, [4]शाबरजम्बुकः, [5]दौष्कः । [इसन्त-] [6]सार्पिष्कः । त [तकारान्त]-[7]औदश्वित्कः । शश्वदकस्माद्वर्जनं किम् ? [8]शाश्वतिकम्, [9]आकस्मिकम् । इसुसोः प्रत्यययोर्ग्रहणादिह न भवति,-[10]आशिषिकः, [11]औषिकः । [12]माथितिकः, अत्रापि तान्तत्वस्य लाक्षणिकत्वान्न भवति ॥७१॥

अव०—[1]शश्वच्च अकस्माच्च=शश्वदकस्मात्, न शश्वदकस्मात्=अशश्वदकस्मात्, अशश्वदकस्माच्च तत् त च=अशश्वदकस्मात्त, पश्चात् ऋवर्णादिभिः सह द्वन्द्वसमासः, तस्मात् । [2]मातुरागतम्, [3]पितुरागतम्; 'ऋत इकण्'(६।३।१५२)। [4]शाबरजम्ब्वां भवः=शाबरजम्बुकः, 'उवर्णादिकण्' (६।३।३९) इकण्, 'गोश्चान्ते'० (२।४।९६) इत्यनेन ह्रस्वः । [5]दोर्भ्यां तरति, इकण्, 'नामिनस्तयोः षः' (२।३।८) इति सस्य षत्वम् । [6]सर्पिः पण्यमस्य=सार्पिष्कः,'नामिन'० (२।३।८) ष् । (एवम्) धनुः प्रहरणमस्य=धानुष्कः । [7]उदश्विता घोलतक्रेण संस्कृत ओदन औदश्वित्कः, 'संस्कृते' (६।४।३) इकण् । [8]शश्वत्, शश्वद् भवं=शाश्वतिकम्, 'भर्तुसन्ध्यादेरण्' (६।३।८९) इत्यण् प्राप्तोऽपि अत एव वर्जनबलात् 'वर्षाकालेभ्यः' (६।३।८०) इतीकण्; [9]अकस्माद् भवम्=आकस्मिकम्, अध्यात्मादित्वादिकण्, उभयत्रापि 'प्रायोऽव्ययस्य' (७।४।६५) इत्यत्र प्रायोग्रहणान्नान्त्यस्वरादिलोपः । [10]आङ्पूर्वः शास्धातुः, आशासनमाशीः, 'क्रुत्सम्पदादिभ्यः क्विप्' (५।३।११४), 'आङः' (४।४।१२०) इति सूत्रेण आसः स्थाने इस् इत्यादेशः, ततः सस्य षत्वम्, आशिष् इति शब्दः, आशिषा चरति आशिषिकः, अत्र धातुस्थाने इस्, न प्रत्ययः । [11]तथा वस्धातुः, क्विप्, 'यजादिवचेः किति' (४।१।७२) इति य्वृत्, उस् इति निष्पन्नः, सस्य षत्वम्, उषा चरति औषिकः, 'चरति' (६।४।११) इति इकण् । [12]मथितं पण्यमस्य=माथितिकः, 'तदस्य पण्यम्' (६।४।५४) इकण् ॥७१॥

## असकृत् सम्भ्रमे ॥७।४।७२॥

म० वृ०—भयादिभिश्चित्तव्याक्षेपात् प्रयोक्तुः त्वरणं सम्भ्रमः । तस्मिन् सम्भ्रमे द्योत्ये यत्प्रवर्तते पदं वाक्यं वा तदसकृदनेकवारं प्रयुज्यते । अहिरहिः, अहिरहिरहिः, बुध्यस्व बुध्यस्व, बुध्यस्व बुध्यस्व बुध्यस्व । सम्भ्रमे वीप्सायां वा पदं वाक्यं

वाऽसकृत् प्रवर्त्तते न पदावयवः इति नासावस-[1]कृत् [2]द्विर्वा भवति। तच्च पदं वाक्यं [3]परिनिष्पन्नं सत्तत्र[4] प्रवर्त्तते नापरिनिष्पन्नमिति कृतेषु यत्वादिकार्येषु तदसकृत् द्विर्वा भवति नाकृतेषु। तथा कृतद्विर्वचनानामपि रूपार्थयोरभेदेन स्थानिवद्भावेन चैकपदत्वात् [5]कौतस्कुतः, [6]पौनःपुन्यम्, [7]पौनःपुनिकः इत्यादिषु तद्धितः सिद्धः ॥७२॥

---

अव०–[1]अनेन सूत्रेणासकृत्, [2]वक्ष्यमाणसूत्रैस्तु द्विर्वचनम्। [3]विभक्तिप्रत्ययादिभिः परिनिष्पन्नं सिद्धं सत् [4]तत्र सम्भ्रमे वीप्सायां(वा)प्रवर्त्तते, कोऽर्थः? प्रयुज्यते इत्यर्थः। [5]कुतः, पूर्वम् 'असकृत्सम्भ्रमे' इत्यनेन द्विर्वचनं क्रियते, कुतस् कुतस् इति, ततः कुतः कुत आगत इति तद्धितवाक्ये 'भ्रातुष्पुत्रकस्का'० (२।३।१४) इति गणपाठसामर्थ्यात् निपातनादागतेऽर्थे 'तत आगते'(६।३।१४९) इत्यनेन अणेव भवति, न तु 'क्वेहामात्रतस'० (६।३।१६) इत्यनेन त्यच्, कुतः कुत आगतः कुतःकुतस्त्यः; अणि वृद्धिः, ततः 'भ्रातुष्पुत्र'० इत्यनेन रेफस्य स्थाने सकारः कौतस्कुत इति सिद्धम्। [6]पुनर् शब्दः, 'असकृद्'० इति द्विर्वचनम्, पुनर् पुनर्, पुनःपुनरित्यस्य भावः=पौनःपुन्यम्, ट्यण्; [7]पुनःपुनर्भवः=पौनःपुनिकः, 'वर्षाकालेभ्यः' (६।३।८०) इकण्, 'प्रायोऽव्ययस्य' (७।४।६५) इति अन्त्यस्वरादिलोपः ॥७२॥

## भृशा-ऽऽभीक्ष्ण्या-विच्छेदे द्विः प्राक् तमबादेः ॥७।४।७३॥

म० वृ०–[1]क्रियायाः साकल्यम्=[2]अवयवक्रियाणां कार्त्स्न्यं [सामस्त्यं] भृशार्थः। [प्रधानक्रियाया] पौनःपुन्यमाभीक्ष्ण्यम्। क्रियान्तरैरव्यवधानमविच्छेदः। एषु [भृशादिषु] द्योत्येषु यत्पदं वाक्यं वा तत् तमबादिप्रत्ययेभ्यः प्रागेव द्विरुच्यते। भृशे,– लुनीहि लुनीहि इत्येवायं लुनाति, अधीष्वाधीष्वेत्येवायमधीते। आभीक्ष्ण्ये,–[3]भोजं भोजं याति, भुक्त्वाभुक्त्वा गच्छति। अविच्छेदे,–पचति पचति, अधीते अधीते, प्रपचति प्रपचति, सत्करोति सत्करोति, अलङ्करोति अलङ्करोति। भृशादयश्च क्रियाधर्मा इति क्रियापदमेवात्र[4] द्विर्भवति। क्रियाविशेषणस्यापि क्रियात्वेनाध्यवसायाद् [अभेदोपचारात्] भृशादियोगे द्विर्वचनं भवति, यथा– पुनः पुनः पचति, भूयो भूयः पचति, वारं वारं भुङ्क्ते, मुहुर्मुहुः पिबति, स्तोकं स्तोकं चलति। यदा तु क्रियारूपता न विवक्ष्यते तदा 'नवा गुणः सदृशे रित्' (७।४।८६) इति सादृश्ये द्विर्वचनं भवति,–मन्दं मन्दं तुदति, स्तोकं स्तोकमस्तमयते[5]। भृशाभीक्ष्ण्यार्थयोर्यङिति यङन्तमुक्तार्थत्वान्न द्विरुच्यते, यदा तु भृशार्थे यङ् तदाभीक्ष्ण्यार्थाभिव्यक्तये [6]द्विर्वचनं भवति– पापच्यते पापच्यते[7] इति। प्राक् तमबादेरिति किम्? पचतिपचतितमाम्, [8]तराम्। अत्र तमबादेरातिशायिकात् पूर्वमेव द्विर्वचनम्, पश्चात्तमबादिः, अन्यथा ह्यनियमः स्यात् ॥७३॥

---

अव०–[1]क्रियाया इत्यत्र जात्यपेक्षया एकवचनम्। [2]साकल्यमेव प्रकटयति, साकल्यमिति कोऽर्थः? अवयवेत्यादि। [3]अभीक्ष्णं भोजनं पूर्वं=भोजम्, 'ख्णम् चाभीक्ष्ण्ये' (५।४।४८) इति ख्णम्। [4]बृहद्वृत्तौ "क्रियापदमेवात्र सम्बध्यते" (इति) पाठः, सम्बध्यते कोऽर्थः? द्विर्वचनेन सह क्रियापदस्य सम्बन्धः। [5]शनैः शनैः गच्छति, मन्दं मन्दं वदति इत्याद्यपि। मन्दं मन्दमिति नेदं क्रियाविशेषणम्, किन्तु मन्दं मन्दमिति कोऽर्थः? मन्दसदृशमित्यर्थः। यदा तु आभीक्ष्ण्ये यङ् तदा भृशाभिव्यक्तये द्विर्वचनं न भवति, शब्दशक्तिस्वाभाव्यात्। [7]पापच्यते पापच्यते इत्यक्षरार्थे यदा पुनस्तत्प्रतिपादनाय कोऽर्थः? भृशार्थे यङन्तस्याभीक्ष्ण्यार्थप्रतिपादनाय पञ्चमी विधीयते तदा तस्याः पञ्चम्या द्विर्वचनसहायाया एवाभीक्ष्ण्यार्थप्रतिपादने सामर्थ्यं भवति, क्त्वाख्णमोरिव- भुक्त्वा भुक्त्वा भोजं भोजं गच्छतीत्यादिवत्, इति द्विर्वचनमपि भवति, यथा पापच्यस्व पापच्यस्वेति। [8]पचतिपचतितराम्॥ ७३॥

## नानावधारणे ॥७।४।७४॥

म० वृ०–नानाभूतानां भेदेनेयत्तापरिच्छेदो नानावधारणम्। तस्मिन् यत् पदरूपं तद् द्विरुच्यते

योगविभागात्तमबादेरिति नानुवर्त्तते । अस्मात्कार्षापणादिह भवद्भ्यां माषं [1]माषं देहि, द्वौ द्वौ, त्रीन् त्रीन् देहि । एषु कार्षापणसम्बन्धिनो माषा न साकल्येन दित्सिताः [दातुमिष्टाः], किं तर्हि ? प्रत्येकं माषमात्रमेव द्वावेव त्रय एव वा इति न वीप्साऽस्ति ॥७४॥

अव०–[1]माषं माषं देहीति कोऽर्थः ? प्रत्येकं माषमात्रं देहि, नाधिकमित्यर्थः ॥७४॥

## आधिक्या-ऽऽनुपूर्व्ये ॥७।४।७५॥

म० वृ०–आधिक्यं प्रकर्षः । आनुपूर्व्यं क्रमानुल्लङ्घनम् । एतयोर्यच्छब्दरूपं तद् द्विरुच्यते । आधिक्ये,– [1]नमो नमः, कन्या दर्शनीया कन्या दर्शनीया,[2] [3]मह्यं रोचतेतराम् मह्यं रोचतेतराम् । आनुपूर्व्ये,–[4]मूले मूले स्थूलाः, अग्रे अग्रे सूक्ष्माः, ज्येष्ठं ज्येष्ठमनुप्रवेशय, कनिष्ठं कनिष्ठमानय ॥७५॥

अव०–[1]अधिकं नम इत्यस्यार्थो मन्तव्यः । [2](एवम्) अहो दर्शनीया अहो दर्शनीया, मह्यं रोचते मह्यं रोचते, एष तवाञ्जलिः एष तवाञ्जलिः । [3]'मह्यं रोचतेतराम्', अत्र पूर्वमातिशायिकस्तरप्, पश्चाद् द्विर्वचनं भवति । [4]मूलाद्यानुपूर्व्येण एषामुदाहरणानां स्थौल्यादय इत्यर्थः । अग्रमध्यमूलानि त्रयो भागाः, तत्रैकमेव मुख्यमग्रं मूलं च; अन्येषां भागानामपेक्षाकृतोऽग्रमूलव्यपदेशः । अधोसंनिविष्टमपेक्ष्य अग्रव्यपदेशः । उपरिसंनिविष्टमपेक्ष्य मूलव्यपदेशः । न चैकरूपं भागानां स्थौल्यं सौक्ष्म्यं वा, किं तर्हि ? यथामूलमुपचीयते स्थौल्यम्, यथा अग्रं सौक्ष्म्योपचय इति वीप्सा नास्ति । एवं ज्येष्ठत्वकनिष्ठत्वयोरप्यापेक्षिकत्वाद् वीप्सा नास्तीति वचनम् । एवं पूर्वसूत्रमपि ॥ ७५ ॥

## डतर-डतमौ समानां स्त्रीभावप्रश्ने ॥७।४।७६॥

म० वृ०–समानां केनचिद् गुणेन तुल्यतया सम्प्रधारितानां स्त्रीलिङ्गस्य भावस्य प्रश्ने यत् डतरान्तं डतमान्तं च शब्दरूपं तद् द्विरुच्यते । उभाविमावाढ्यौ, कतरा कतराऽनयोराढ्यता[1] ? कतमा-कतमाऽनयोराढ्यता[2] ? सर्वे इमे आढ्याः, यतरा यतरा एषां विभूतिः ततरा ततरा कथ्यताम्, यतमा एषां सम्पत् ततमा ततमा कथ्यताम् । डतरडतमाविति किम् ? उभाविमावाढ्यौ, काऽनयोराढ्यता ? स्त्रीग्रहणं किम् ? उभाविमावाढ्यौ, कतरदनयोराढ्यत्वम् ? कतमोऽनयोर्विभवः ? । भावग्रहणं किम् ? उभाविमौ लक्ष्मीवन्तौ,कतराऽनयोर्लक्ष्मीः ? । लक्ष्यतेऽनया पुण्यकर्म इति लक्ष्मीः, इयं स्त्री भवति, न भाव इति । प्रश्न इति किम् ? उभाविमावाढ्यौ, यतराऽनयोराढ्यता ततरा श्रूयताम् ॥७६॥

अव०–[1]किं दैवकृता उत पौरुषकृता आढ्यता इत्यर्थः । [2]किं साधनसम्बन्धकृता उतान्यसम्बन्धकृता आहोस्विदुभयसम्बन्धकृता आढ्यता, कतमा कतमा अनयोराढ्यतेत्यस्यायमर्थः । एवं सर्वे इमे आढ्याः, कतरा कतरा एषामाढ्यता ? कतमा कतमा एषामाढ्यता इत्यपि ॥७६॥

## पूर्वप्रथमावन्यतोऽतिशये ॥७।४।७७॥

म० वृ०–अन्यतोऽतिशये-तदर्थस्य प्रकर्षे द्योत्ये पूर्वप्रथमशब्दौ द्विरुच्येते । [1]तमादेरपवादः । [2]पूर्वं पूर्वं पुष्प्यन्ति, प्रथमं प्रथमं पच्यन्ते; अन्येभ्यः [3]पूर्वतरं पुष्प्यन्ति, प्रथमतरं पच्यन्ते इत्यर्थः ❀ ॥

अव०–[1]तमप् (इति) तमादेः । [2]जम्बीरादेः सकाशात् आम्रादयः पूर्वं पूर्वं पुष्प्यन्ति । पूर्वं पूर्वं पुष्प्यन्ति इत्यादीनामयं भावार्थः,-एषूदाहरणेषु स्वव्यापारोपेक्षो(अन्यव्यापाराऽपेक्षया ?)ऽतिशयो गम्यते, तथाहि– न तावदिमे जम्बीराद्याः किशलयिताः

❀ अस्य सूत्रस्य वृत्तौ तदवचूरौ वा कथमप्यलिखितं प्रत्युदाहरणं तदर्थश्च बृहद्वृत्तित उल्लिख्यते—अन्यत इति किम् ? पूर्वतरं पुष्प्यन्ति, पूर्वतरं पच्यन्ते । अत्र स्वव्यापारापेक्षयाऽतिशयो गम्यते, न तावदिमे किशलयिता यावत्पुष्पिताः, न तावदिमे पुष्पिता यावत्पक्वा इति । अतिशय इति किम् ? पूर्वम्, प्रथमम् ।

यावदाम्रादयः पुष्पिता इति । न तावदिमे जम्बीराद्याः पुष्पिताः यावदिमे आम्रादयो हि पक्वा इति । अन्येभ्यः [3]पूर्वतरं पुष्प्यन्तीत्यत्र मतान्तरेण तरप् भवति, अलौकिकमर्थकथनमात्रं वा । 'पुष्पच् विकसने' इति दैवादिकः पुष्प्यन्ति इति प्रयोगः ॥७७॥

## प्रोपोत्सं पादपूरणे ॥७।४।७८॥

म० वृ०—प्र उप उत् सम् इत्युपसर्गा द्विरुच्यन्ते, यदि पादः पूर्यते ।

[1]"प्रप्रशान्तं [2]कषायाग्ने,-रुपोपप्लववर्जितम् ;
उदुज्ज्वलं तपो यस्य, संसंश्रयत तं जिनम्" ॥

पादपूरण इति किम् ? प्रणम्य सच्छासनवर्धमानम् ॥७८॥

अव०—[1]प्रशम्यते स्म=प्रशान्तम् । [2]कषायाग्नेरिति पञ्चमीङसिः ॥७८॥

## सामीप्येऽधोऽध्युपरि ॥७।४।७९॥

म० वृ०—[1]सामीप्ये विवक्षिते अधस् अधि उपरि इति द्विरुच्यन्ते । अधोऽधो ग्रामम् , अध्यधि ग्रामम् , उपर्युपरि दुःखानि । सामीप्ये इति किम् ? अधः पन्नगाः, [2]अधिब्रह्मदत्ते पञ्चालाः, [3]उपरि चन्द्रः ॥७९॥

अव०—[1]सामीप्यं देशकृता कालकृता प्रत्यासत्तिः । [2]ब्रह्मदत्तस्वामिनः पञ्चालाः स्वा इत्यर्थः, 'स्वेशेऽधिना' (२।२।१०४) सप्तमी । [3]उपरि चन्द्रस्याग्रे कथमुपशिरसो घटः ? अत्रौत्तराधर्यमात्रं विवक्षितम् , सदपि सामीप्यं न विवक्षितमिति द्विर्वचनं न भवति । यथायथमिति मकारान्तमव्ययं यथास्वमित्यर्थे आश्रीयते इति ★ ॥७९॥

## वीप्सायाम् ॥७।४।८०॥

म० वृ०—[द्रव्येण] पृथक्सङ्ख्यायुक्तानां बहूनां सजातीयानामर्थानां साकल्येन प्रत्येकं क्रियया गुणेन द्रव्येण जात्या वा युगपत् प्रयोक्तुर्व्याप्तुमिच्छा [1]वीप्सा । वीप्सायां [2]यच्छब्दरूपं तद् द्विरुच्यते । वीप्सा च स्याद्यन्तेष्वेव भवतीति [3]तेषामेव द्विर्वचनम् । वृक्षं[4] वृक्षं सिञ्चति, [5]ग्रामो ग्रामो रमणीयः, [6]गृहे गृहे अश्वाः, [7]योद्धा योद्धा क्षत्रियः । तथा [8]रूपं रूपं पश्यति, शुक्लं शुक्लमानयति, [9]क्रियां क्रियामारभते । व्यापकधर्मस्यापि व्याप्येनाभेदोपचारात् भेदे सति [10]व्यापकान्तरापेक्षायां वीप्सा भवति,-स एवान्योऽन्यः सम्पद्यते, नवो नवो भवति जायमानः । आढ्यतरमाढ्यतरमानय, अत्र द्विर्वचनात् प्रागातिशायिकः ॥८०॥

अव०—'वीप्सायाम्' इति प्रवाहसूत्रम् , प्रायः सर्वत्र 'वीप्सायाम्' इति सूत्रेणैव द्विर्वचनं क्रियते । ननु वृक्षं वृक्षं सिञ्चतीत्यादौ वीप्सायां बहवोऽर्थाः प्रतीयन्ते, तत्र बहुषु बहुवचनं प्राप्नोति । उच्यते, पृथक्सङ्ख्यायुक्तानामिति सूत्रार्थवचनात् परिगृहीतैकत्वादिसङ्ख्यानां पदार्थानां वीप्सया योगः इति तस्याः ( एकत्वादि सङ्ख्यायाः परित्यागो न भवतीति पुनः समुदायात् वृक्षं वृक्षमितिरूपात् बहुवचनं न भवतीत्यर्थः । [1]वीप्सा भवतीति सम्बन्धः । [2]भृशत्वाऽऽभीक्ष्ण्ये तु धातोरेव द्विर्वचनं भवति । [3]स्याद्यन्तशब्दानामेव । [4]वृक्षमिति क्रियोदाहरणम् । [5]ग्राम इति गुणोदाहरणम् । [6]गृहे इति द्रव्योदाहरणम् । [7]योद्धेति जातेरुदाहरणम् । [8]क्रियया गुणो व्याप्यते, अत्रोदाहरणद्वयमिदम् । [9]अत्र क्रियया क्रिया व्याप्यते । [10]सम्पद्यते इत्यादिक्रियायापेक्षम [ ? क्रियापेक्षायाम् ] । 'वीप्सायाम्' इति सूत्रे विशेषोऽयम् ,-जात्येकशेषेतरेतरयोगक्रमाभिधानेषु सत्यामपि व्याप्तौ यथोक्तलक्षणवीप्साया अभावान्न द्विरुक्तिः । तथाहि सम्पन्नो यवः, सम्पन्ना यवाः । जातेरेकत्वात् बह्वर्थाभिधानं नास्ति । अस्मिन् वने वृक्षाः शोभनाः, अत्र 'स्यादाव०' (३।१।११९) इत्येकशेषे साकल्येन व्याप्तिर्नास्ति । तथाहि—कतिपयेष्वपि वृक्षेषु शोभनेष्वयं प्रयोगो भवति । एवमितरेतरयोगेऽपि । अस्मिन् वने धवखदिरपलाशाः शोभना इति न वीप्सा विजातीयत्वात् साकल्याभावाच्च⋯⋯

★ अत्र 'इति' इत्यस्याग्रे "यथास्वे यथायथमिति नारभ्यते" इति योजनीयम् ।

( इति न द्विः ) । तथा अत्र वनेऽयं वृक्षः शोभनः अयं वृक्षः शोभन इति क्रमाभिधाने साकल्येनापि व्याप्तौ यौगपद्याभावान्न वीप्सा । अत्र वने तु सर्वे वृक्षाः शोभनाः, अत्र तु सर्वशब्देन वीप्सार्थाभिधानान्न द्विरुक्तिः, यथा तद्धितसमासाभ्यां वीप्सार्थाभिधानाद्‌ द्विरुक्तिर्न भवति । तद्धित,-द्वौ द्वौ पादौ ददाति=द्विपदिकां ददातीत्यत्र 'सङ्ख्यादेः पादादिभ्यो दानदण्डे चाकल्‌ लुक्‌ च' ( ७।२।१५२ ) इत्यनेनाकल्‌ तथाऽकारस्य लुक्‌ । एकैकं ददाति इति एकशो ददाति, अत्र 'संख्यैकार्थाद्वीप्सायां शस्‌' (७।२।१५१) इत्यनेन शस्‌, महाबाधिकारबलाच्च शस्‌ द्विर्वचनं च भवति । तत्र एकैकशो ददातीति प्रयोगः सिद्धः । वीप्सार्थद्विरुक्तिबाधकः शस्‌ इति 'संख्यैकार्था०' (७।२।१५१)इत्यत्र उक्तमस्ति, इति(तथापि?) बाधिकारबलात्‌ शस्‌ द्विरुक्तिश्च भवति । तथा समासः,-अर्थमर्थं प्रति=प्रत्यर्थम्‌ ,अत्र 'योग्यतावीप्सा०' (३।१।४०) इति अव्ययीभावः समासः, समासेन वीप्साया उक्तत्वान्न द्विरुक्तिः । एवं पङ्क्तौ पङ्क्तौ अष्टौ पदान्यस्य= अष्टापदः ॥८०॥

## प्लुप्‌ चादावेकस्य स्यादेः ॥७।४।८१॥

म० वृ०-एकशब्दस्य वीप्सायां द्विरुक्तस्यादौ य एकशब्दस्तत्सम्बन्धिनः स्यादेः 'प्लुप्‌' स्यात्‌ । पित्करणं पुंवद्भावार्थम्‌ । अत एवातद्धिते लुपि पुंवद्भावः । [1]एकैकः, [2]एकैका, [3]एकैकस्याः । [4]एकएका, [5]एकएकस्याः अत्र विरामस्य विवक्षितत्वात्‌ पुंवद्भावे सति सन्धिकार्यं न भवति, यथा अग्रे[6] अग्रे सूक्ष्माः,ऋक्‌[7] ऋगिति[8] । चकार उत्तरत्र प्लुप्‌द्विर्वचनयोः समुच्चयार्थः । इह तु द्विर्वचनं पूर्वेणैव सिद्धम्‌ , प्लुप्मात्रं विधीयते ॥८१॥

---

अव०-[1]एकैकः, अत्र एक इति प्रकृतिः, द्वित्वे एकैक इति प्रयोगः । [2]'एकैका', अत्र एका इति प्रकृतिः, द्वित्वे एकैका इति प्रयोगः । [3]'एकैकस्याः', अत्र एकस्या इति पदस्य द्वित्वम्‌ , पूर्वस्य एकस्या इति शब्दस्य विभक्तिलोपे एकैकस्या इति प्रयोगः । [4]'एकएका', अत्र एका इति मूलपदम्‌ । [5]'एकएकस्याः', अत्र एकस्या इति पदस्य द्वित्वम्‌ , 'क्यङ्मानि'० (३।२।५०) इति पुंवद्भावः········ ············(?)एकएका एकएकस्या इत्युदाहरणद्वये । [6]अग्रे इत्यत्र 'आधिक्यानुपूर्व्ये' (७।४।७५) इति द्वित्वम्‌ , [7]ऋक्‌ इत्यत्र 'आबाधे'(७।४।८५) इत्यनेन द्वित्वम्‌ । [8]यथाऽत्र न अकारलोपः गकारश्च (न) भवतीत्यर्थः ।'ऋक्‌ ऋगिति'इत्यस्याग्रे (इदं ज्ञेयम्‌-) आदिपदस्य स्यादेः प्लुप्युत्तरेणाभेदाश्रयणे स्याद्यन्तत्वात्‌ 'सर्वादयोऽस्यादौ' (३।२।६१) इति पुंवद्भावो न प्राप्नोति इति लुपः पित्त्वं विधीयते ।८१।

## द्वन्द्वं वा ॥७।४।८२॥

म० वृ०-द्वन्द्वमिति वीप्सायां द्विरुक्तस्य द्विशब्दस्यादौ स्यादेः प्लुप्‌, [1]इकारस्यामभावः, [2]उत्तरत्र इकारस्यात्वं स्यादेश्चामभावो वा निपात्यते । [3]द्वन्द्वं तिष्ठतः, द्वौ द्वौ तिष्ठतः, द्वन्द्वं युद्धं वर्त्तते, द्वयोर्द्वयोर्युद्धं वर्त्तते, द्वन्द्वं कृतम्‌ , द्वाभ्यां द्वाभ्यां [कर्तरि तृतीया] कृतम्‌ ॥८२॥

---

अव०-'द्वन्द्वं वा' अत्र प्रथमासिः, 'दीर्घङ्याब्‌'० (१।४।४५) सिलोपः । [1]पूर्वस्य द्विशब्दस्य । [2]अग्रेतनद्विशब्दस्य तु अकारः । [3]द्वन्द्वं तिष्ठतः इत्यादौ सर्वोदाहरणेषु यथासम्भवं द्वौ द्वयोः द्वाभ्याम्‌ इति विभक्त्या निष्पाद्य ततो द्वौ द्वाभ्यां द्वयोः द्वाभ्यामिति पदानां द्विर्वचनं 'द्वन्द्वं वा' इति सूत्रेण क्रियते, निपातनबलात्‌ उभयस्यापि द्विशब्दस्य स्यादिलोपः, इकारस्य तु अमभावो निपात्यते, पक्षे द्वौ द्वौ, द्वयोः द्वयोः, द्वाभ्यां द्वाभ्यामिति भवति इति सम्भाव्यते ॥८२॥

## रहस्य-मर्यादोक्ति-व्युत्क्रान्ति-यज्ञपात्रप्रयोगे ॥७।४।८३॥

म० वृ०-[1]वीप्सायामिति निवृत्तम्‌ । द्वन्द्वमिति द्विशब्दस्य द्विर्वचनम्‌ , शेषं पूर्ववत्‌ रहस्यादिषु गम्यमानेषु निपात्यते । रहस्ये,-द्वन्द्वं मन्त्रयते, रहस्यं मन्त्रयते इत्यर्थः । [2]मर्यादोक्तौ,-पशवो

द्वन्द्वं मिथुनायन्ते । [3]व्युत्क्रान्तौ,–द्वन्द्वं व्युत्क्रान्ताः । यज्ञपात्रप्रयोगे,–[4]द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । द्वन्द्वः समासः, (द्वन्द्वः) कलहः, द्वन्द्वं युद्धम्, द्वन्द्वं युग्मम्, द्वन्द्वानि [दुःखानीत्यर्थः] सहते; एषु द्वन्द्व इति शब्दान्तरम् ॥८३॥

अव०–[1]'रहस्य'० इति सूत्रे वीप्सायामिति निवृत्तमित्युक्तम्, परमुदाहरणेषु द्वन्द्वं मन्त्रयते इत्यादीनामर्थोऽयम्,–इमे जना द्वौ द्वौ भूत्वा मन्त्रयते इति अर्थो विवक्षितोऽस्ति, अतो वीप्सा गम्यमानास्ति, वीप्सां विना अर्थो न सङ्गतः इति तत्त्वं वृद्धा विदन्ति । [2]म्रियते इति मरः, अल्, मरे साधवो मर्याः, मर्य्यैरादीयते इति मर्यादा, मर्यादायामुक्तिः, तस्याम् । बृहद्वृत्तौ– आचतुरं हि इमे पशवो द्वन्द्वं मिथुनायन्ते इति युक्त्या उदाहरणम्, चतुर्भ्यामा=आचतुरम्, 'शरदादेः' (७।३।९२) इत्यत्, 'पर्यपाङ्बहिरच् पञ्चम्याः' (३।१।३२) इति समासः, मिथुनमिवाचरन्ति=मिथुनायन्ते, क्यङ् । माता पुत्रेण सह अथवा माता पौत्रेण यदि वा माता प्रपौत्रेण तत्पुत्रेण च, एवमिमे पशव आचतुरं यथा भवति एवं मैथुनं कुर्वन्तीत्यर्थः । [3]द्वौ द्वौ भूत्वा=द्वन्द्वं व्युत्क्रान्ताः, द्वौ राशी येषां ते द्विराशयः, द्विराशीनां भावो द्वैराश्यम्, द्वैराश्येन व्युत्क्रान्ताः, कोऽर्थः ? भिन्ना इत्यर्थः । [4]'द्वन्द्वम्'अत्र द्वितीयाद्विवचनम्, द्वे द्वे प्रयुनक्तीत्यर्थः । मर्यादोक्ताविल्यत्र उक्तिग्रहणं शब्दोपात्तायां मर्यादायां यथा स्यात्, प्रकरणादिगम्यमानायां मर्यादायां मा भूदित्येवमर्थम् । रहस्यादिष्विति किम् ? द्वौ तिष्ठतः ॥८३॥

## लोकज्ञातेऽत्यन्तसाहचर्ये[1] ॥७।४।८४॥

म० वृ०–लोकज्ञातेऽत्यन्तसाहचर्ये द्योत्ये द्विशब्दस्य पूर्ववद् द्वन्द्वमिति निपात्यते । द्वन्द्वं रामलक्ष्मणौ, द्वन्द्वं बलदेववासुदेवौ । लोकज्ञाते इति किम् ? द्वौ चैत्रमैत्रौ । अत्यन्तसाहचर्य इति किम् ? द्वौ युधिष्ठिरार्जुनौ । [2]द्वन्द्वमिति च सूत्रत्रयेऽपि नपुंसकं ज्ञातव्यम्, [3]अनुप्रयोगस्य नपुंसकार्थम् ॥८४॥

अव०–[1]अत्यन्तं साहचर्यम्=अत्यन्तसाहचर्यम्, 'नाम नाम्ना०' (३।१।१८) इति समासः । [2]'द्वन्द्वमिति च सूत्रत्रयेऽपि' इत्यादि, निपातनात् प्रयोगो यथा- द्वन्द्वं शोभते । [3]'अनुप्रयोगस्य' इत्यादि, द्वन्द्वं नारदपर्वतौ रमणीये इत्यादिकस्यानुप्रयोगस्य ॥८४॥

## आबाधे ॥७।४।८५॥

म० वृ०–आबाधो मनःपीडा [प्रयोक्तृधर्मः] । आबाधे वर्त्तमानं शब्दरूपं द्विरुच्यते, तत्र चादौ पूर्वपदे स्यादेर्लुप् स्यात् । ऋक् ऋक्, [ पूः पूः ] गतगतः, नष्टनष्टः, गतगता, नष्टनष्टा, नन करोमि [न करोमीत्यर्थः] । ऋगादेर्दुरुच्चारणादिना पीड्यमानः प्रयोक्ता एवं प्रयुङ्क्ते । अष्टमी अष्टमी, [1]कालिका कालिका इत्यत्र तु पूरणप्रत्ययान्तत्वात् कोपान्त्यत्वाच्च ['तद्धिताककोपान्त्य०' (३।२।५४) इत्यनेन] न पुंवद्भावः ॥८५॥

अव०–[1]काल एव कालकालकः,[काल,'गौरादि'० (२।४।१९) इति ङी, काल्येव=कालिका?] 'कालात्' (७।३।१९) इति कः, (अ)गुणवृत्तिरसौ शब्दः, गुणवृत्तित्वे तु परतः स्त्रीत्वाऽभावात् पुंवद्भावो न स्यात् । अथवा कालशब्दात् 'भाजगोणनागस्थलकुण्डकाल'० (२।४।३०) इत्यादिना ङी, कालीशब्दः, काल्येव=कालिका, 'कालात्' (७।३।१९) कः ॥ ८५ ॥

## नवा गुणः सदृशे रित् ॥७।४।८६॥

म० वृ०–गुणशब्दो मुख्यसदृशे गुणे गुणिनि च वर्त्तमानो नवा द्विरुच्यते, तत्र चादौ वर्त्तमानस्य स्यादेः प्लुप्, सा च रित् । रित्करणं प्रतिषिद्धस्यापि पुंवद्भावस्य 'रिति' (३।२।५८) इति विधानार्थम् । [1]शुक्लशुक्लं रूपम्, शुक्लशुक्लः पटः, [2]कालककालिका । वाग्रहणात् पक्षे जातीयरपि,-[3]शुक्लजातीयः, पटुजातीयः । गुण इति किम् ? अग्निर्माणवकः, गौर्वाहीकः । यः सदा गुणवाची स इह गुणशब्दो गृह्यते, अयं तूपमानात् प्राक् [प्रथमं] द्रव्यवाची, पश्चात्तु तैक्ष्ण्यजाड्यादिगुणवाचीति न द्विरुक्तिः ॥८६॥

अव०-[1]शुक्लादिसदृशं वस्तु अपरिपूर्णगुणमेवं शुक्लशुक्लं रूपमित्यादि उच्यते । [2]कालककालिका,अत्र 'रिति'(३।२।५८) इति सूत्रेण पुंवद्भावः । [3]शुक्लप्रकारोऽस्य, 'प्रकारे जातीयर्' (७।२।७५)।८६।

## प्रियसुखं [1]चाकृच्छ्रे ।।७।४।८७।।

म० वृ०-प्रियसुखशब्दावकृच्छ्रे [क्लेशाभावे] अर्थे नवा द्विरुच्येते, तत्र च आदौ शब्द(रूपस्य) स्यादेः प्लुप् । प्रियप्रियेण ददाति, प्रियेण ददाति ; सुखसुखेन, सुखेन अधीते ; अक्लेशेनेत्यर्थः ।।८७।।

अव०-[1]चकारः 'प्लुप् चादौ स्यादेः' (७।४।८१) इत्यस्यानुकर्षणार्थः, तथा च चकारानुकृष्टत्वादुत्तरत्र नानुवृत्तिः ।।८७।।

## वाक्यस्य परिवर्जने ।।७।४।८८।।

म० वृ०-वाक्यस्यावयवो यः परिशब्दो न पदस्य, स वर्जने वर्त्तमानो नवा द्विरुच्यते । परिपरि त्रिगर्त्तेभ्यो वृष्टो मेघः । वाक्यस्येति किम्? [1]परित्रिगर्त्तं वृष्टो मेघः । वर्जन इति किम् ? साधुर्देवदत्तो मातरं परि ।।८८।।

अव०-[1]'परित्रिगर्त्तम्', अत्र 'पर्यपाङ्बहिः'० (३।१।३२) इत्यव्ययीभावः ।।८८।।

## [2]संमत्यसूया[3]-कोप[4]-[5]कुत्सनेष्वा[1]द्यामन्त्र्यमादौ स्वरेष्वन्त्यश्च[11] प्लुतः ।।७।४।८९।।

म० वृ०-[6]संमत्याद्यर्थेषु वर्त्तमानस्य वाक्यस्यादिभूतमामन्त्र्यमामन्त्रणीयार्थं पदं द्विरुच्यते,तत्र द्विरुक्तौ आदौ पूर्वोक्तौ स्वरेषु स्वराणां मध्ये योऽन्त्यः स्वरः स प्लुतो नवा भवति । संमत्यादिषु बहुवचनाद् द्विर्वचने विकल्पो न सम्बध्यते । संमतौ, माणवक ३ माणवक! ,पक्षे माणवक माणवक[7]! शोभनः खल्वसि । असूयायाम् ,-माणवक ३ माणवक !, माणवक माणवक !, अभिरूपक ३ अभिरूपक !, अभिरूपक अभिरूपक ! रिक्तं ते आभिरूप्यम् । कोपे,-माणवक३ माणवक !, [ पक्षे ] माणवक माणवक !, अविनीतक ३ अविनीतक !, अविनीतक अविनीतक ! इदानीं ज्ञास्यसि जाल्म ! । कुत्सने,-[8]शक्तिके ३ शक्तिके !, शक्तिके शक्तिके ! रिक्ता ते शक्तिः[9] । आदीति किम् ? [10]भव्यः खल्वसि माणवक ! ।।८९।।

अव०-[1]आदि च तत् आमन्त्र्यं च । [2]कार्येष्वाभिमत्यं संमतिः पूजनं वा । [3]परगुणासहनमसूया । [4]कोपः क्रोधः । [5]कुत्सनं निन्दा । [6]एते प्रयोक्ता(यो)देवदत्तः तस्यैव धर्माः नाभिधेयधर्माः । [7]एवमभिरूपक३ अभिरूपक! अभिरूपक अभिरूपक! इत्यपि । स्वरेष्विति किम् ? व्यञ्जनान्तस्यापि यथा स्यात् ,कोऽर्थः?व्यञ्जनान्तस्य शब्दस्य स्वरेष्वन्त्यः स्वरः प्लुतो भवति इत्यर्थः । [8]शक्नोति स्म=शक्तः, तत आप् , शक्ता इति शब्दः, कुत्सिता शक्ता=शक्तिका, 'प्राग् नित्यात् कप्' (७।३।२८), 'अस्यायत्त'० (२।४।१११) इति इत्वम् । [9]एवं यष्टिके ३ यष्टिके !,पक्षे यष्टिके यष्टिके! रिक्ता ते शक्तिः। यष्ट्या तुल्या=यष्टिका, 'तस्य तुल्ये कः संज्ञाप्रतिकृत्योः' (७।१।१०८) इति कः । [10]'भव्यः खल्वसी'-त्यत्र माणवक इत्यामन्त्र्यं पदमस्ति, परं न आदौ, किन्तु भव्य इति आदौ पदम् । तथा [11]अन्त्यश्च इत्यत्र चकारो द्विर्वचनानुकर्षणार्थः । तथा च चानुकृष्टत्वादुत्तरसूत्रेषु द्विर्वचनं नानुवर्त्तते ।।८९।।

## भर्त्सने पर्यायेण ।।७।४।९०।।

म० वृ०-भर्त्सनं कोपेन दण्डाविष्करणम् । तत्र द्विर्वचनं सिद्धमेव, प्लुतार्थ आरम्भः । भर्त्सने वर्त्तमानस्य वाक्यस्य यदामन्त्र्यं पदं तद् द्विरुच्यते । तत्र पर्यायेण पूर्वस्यामुत्तरस्यां चोक्तौ स्वरेष्वन्त्यः प्लुतो वा स्यात् । चौर ३ चौर !, चौर चौर ३ !; चौर चौर ! [1]घातयिष्यामि त्वाम् ।।९०।।

अव०-[1]हन् , घ्नन्तं प्रयुङ्क्ते, णिग् , 'ञ्णिति घात्' (४।३।१००) ।।९०।।

## त्यादेः साकाङ्क्षस्याङ्गेन ।।७।४।९१।।

म० वृ०-भर्त्सनेऽर्थे वाक्यस्य स्वरेष्वन्त्यः

स्वरः त्याद्यन्तस्य पदस्य वाक्यान्तराकाङ्क्षस्य अङ्ग इति निपातयुक्तस्य सम्बन्धी प्लुतो वा स्यात्। [1]अङ्ग [2]कूज३ ! अङ्ग कूज ! इदानीं ज्ञास्यसि जाल्म ॥९१॥

अव०–[1]अङ्ग इति कोमलामन्त्रणे सम्बोधने, (तदग्रे) सिः,'अव्ययस्य'(३।२।७) इति लुप्। [2]"क्षीज कूज गुज गुजु अव्यक्ते शब्दे" इति धातुः, पञ्चमी-हि, 'अतः प्रत्ययाल्लुक्' (४।२।८५)। 'त्यादेः०'(७।४।९१) इति सूत्रे व्यावृत्त्युदाहरणानि,–त्यादेरिति किम्? अङ्ग मैत्र ! मिथ्या वदसि। साकाङ्क्षस्येति किम्? अङ्ग ! पच, अत्र 'सम्मत्यसूया'० (७।४।८९) इति सूत्रद्वयेन प्लुतो द्वित्वं च न भवति, यतोऽनयोः सूत्रयोरामन्त्र्ये आमन्त्रणीयेऽर्थे यत्पदं वर्त्तते तद् गृह्यते, तस्य द्वित्वादिकम्, अङ्गेति पदमामन्त्रणमेव द्योतयति, नत्वामन्त्र्यम्, अङ्ग पच इति च परं न काङ्क्षति। अङ्गेनेति किम्? मैत्र कूज! इदानीं ज्ञास्यसि जाल्म। भर्त्सने इत्येव– अङ्गाधीष्व,मोदकं ते दास्ये ॥९१॥

## [1]क्षिया-[2]ऽऽशीः-[3]प्रैषे ॥७।४।९२॥

म० वृ०–क्षियादौ वर्त्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरः त्याद्यन्तस्य पदस्य वाक्यान्तराकाङ्क्षस्य सम्बन्धी'प्लुतो'वा स्यात्। क्षियायाम्,–स्वयं ह[4] रथेन याति ३, उपाध्यायं पदातिं गमयति, [पक्षे] स्वयं ह रथेन याति, उपाध्यायं पदातिं गमयति। आशिषि,–सिद्धान्तमध्येषीष्ठाः३ [5] तर्कं च तात[6]! पक्षे अध्येषीष्ठाः;[7]पुत्रांश्च लप्सीष्ठाः३ धनं च [8]तात!। प्रैषे,- कटं च कुरु३ कुरु वा,ग्रामं च गच्छ ३ गच्छ वा ।९२।

अव०–[1]क्षिया आचारभ्रंशः। [2]आशीः प्रार्थनाविशेषः। [3]प्रैषोऽसत्कारपूर्विका व्यापारणा, दर्पादिपरवशेन भृत्यप्रेरणमित्यर्थः। ह[4] इति आचारातिक्रमेऽर्थे। [5]"अध्येषीष्ठाः',इङ्क् अध्ययने अधिपूर्वः, आशीःसिष्ठास्। [6]हे तात! त्वं सिद्धान्तं तर्कं वा व्याकरणं वा मामध्येषीष्ठाः, अध्यापयेत्यर्थः। [7]हे तात! त्वं पुत्रान् धनं च लप्सीष्ठाः, लभस्वेत्यर्थः। [8]तात, आमन्त्रणे सिः,'अदेतः स्यमोर्लुक्'(१।४।४४) ॥९२॥

## चितीवार्थे ॥७।४।९३॥

म०वृ०–इवार्थे=उपमायां वर्त्तमाने चित इति निपाते प्रयुज्यमाने वाक्यस्य स्वरेष्वन्त्यः स्वरः 'प्लुतो'वा स्यात्। अग्निश्चिद् भाया३त्, [1]भायाद्वा; राजाचिद् भूया३त,राजाचिद् भूयात्; अग्निरिव राजेत्यर्थः। इवार्थे इति किम्? कथञ्चिदाहुः, कृच्छ्रेणाहुरित्यर्थः ॥९३॥

अव०–"भांक् दीप्तौ', सप्तमीयात् ॥९३॥

## [1]प्रतिश्रवण-[2]निगृह्यानुयोगे ॥७।४।९४॥

म० वृ०–प्रतिश्रवणे निगृह्यानुयोगे च वर्त्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरः'प्लुतो' वा स्यात्। अभ्युपगमे,–गां मे देहि भोः, हन्त ते ददामि ३[3]। स्वयं प्रतिज्ञाने,–नित्यः शब्दो भवितुमर्हति ३, नित्यः शब्दो भवितुमर्हति। श्रवणाभिमुख्ये,–भो चैत्र! किं [4]मार्ष ३, किं मार्ष। निगृह्यानुयोगे,-[5]अद्य श्राद्धमित्यात्थ३, अद्य श्राद्धमित्यात्थ[6] ॥९४॥

अव०–[1]प्रतिश्रवणं परोक्तस्याभ्युपगमः, अथवा प्रतिश्रवणं स्वयं प्रतिज्ञानम्, श्रवणाभिमुख्यं वा। [2]निगृह्य स्वमतात् प्रच्याव्यानुयोगो, निग्रहपदस्याविष्करणं निगृह्यानुयोगः, उपालम्भ इति यावत्। [3]पक्षे हन्त ते ददामि। [4]मार्ष इति श्रवणाभिमुख्यद्योतको निपातः। [5]अद्य श्राद्धेति कोऽर्थः? अद्य श्राद्धमिति वादी युक्त्या स्वमतात् प्रच्याव्य एव उपालभ्यते। "[6]आत्थ', ब्रू, वर्त्तमानाति, 'ब्रूगः पञ्चानां पञ्चाहश्च' (४।२।११८) सिस्थाने थव्, ब्रूस्थाने आह,'नहाहोर्धतौ'(२।१।८५) हस्य त् ॥९४।

## विचारे पूर्वस्य ॥७।४।९५॥

म० वृ०–[1]विचारविषये संशय्यमानस्य यत्पूर्वं तस्य स्वरेष्वन्त्यः स्वरः 'प्लुतो' वा स्यात्। अहिर्नु ३ रज्जुर्नु[2] [अहिर्नु रज्जुर्नु] ॥९५॥

अव०–[1]किमिदमस्ति? किमिदमिति निरू-

पणं विचारः, संशय इति यावत्, तस्मिन् विचारविषये। [२]एवं स्थाणुर्नु ३ पुरुषो नु, स्थाणुर्नु पुरुषो नु ॥९५॥

## ओमः प्रारम्भे ॥७।४।९६॥

म० वृ०—प्रारम्भे प्रणामादे[१]रभ्यादाने[२] वर्त्तमानस्य ओमशब्दस्य स्वरेष्वन्त्यः स्वरः 'प्लुतो' वा स्यात्। ओ३म् ऋषभं पवित्रम्, ओम् ऋषभं पवित्रम्, एवम् ओ३म ऋषभमृषभगामिनं प्रणमत[३]। प्रारम्भ इति किम्? [४]ओम् ददामि ॥९६॥

अव०—[१]आदिशब्दात् स्तुतेर्ग्रहः। [२]अभ्यादाने अङ्गीकारे। (एवम्) [३]ओ३म् अग्निमीले पुरोहितम्, अग्निम् ईले=स्तौमि, किम्भूतं? पुरोहितम्, पुरोऽग्रतो धीयते भाः पुरोहितः, अथवा पुरोहितं ब्राह्मणं पुरोधसम् ईले स्तौमि, कीदृशं पुरोहितं? अग्निम्; अग्निं प्रायं कोपादिना। इदमप्युदाहरणं ज्ञातव्यम्। [४]ओम् ददामि, अत्र ओंशब्दोऽभ्युपगमे ॥

## हेः प्रश्नाख्याने ॥७।४।९७॥

म० वृ०—प्रश्नस्याख्याने पृष्टप्रतिवचने वर्त्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरो [१]हिशब्दसम्बन्धी 'प्लुतो' वा स्यात्। अकार्षीः कटं मैत्र!? अकार्षं हि३, अकार्षं हि। उत्तरेण सिद्धे नियमार्थं वचनम्। हेः प्रश्नाख्याने एव, हेः प्रश्नाख्याने वाक्यस्य स्वरेष्वन्त्यः एव प्लुत इति च ॥९७॥

अव०—[१]आख्याने उत्तरदाने द्योतकोऽयं हिशब्दः ॥

## प्रश्ने च प्रतिपदम् ॥७।४।९८॥

म० वृ०—[पदं पदं प्रति=प्रतिपदम्] प्रश्ने प्रश्नाख्याने च वर्त्तमानस्य वाक्यसम्बन्धिनः [१]पदस्य स्वरेष्वन्त्यः स्वरः 'प्लुतो वा' स्यात्। [२]अगमः पूर्वा३न् ग्रामा३न् मैत्र३!? पक्षे अगमः पूर्वान् ग्रामान् मैत्र!? प्रश्नाख्याने,-अगम३म् पूर्वा३न् ग्रामा३न् चैत्र३! अगमं पूर्वान् ग्रामान् चैत्र! ॥९८॥

अव०—[१]विभक्त्यन्तं पदम् इति वचनात् पदं प्रति योऽन्त्यः स्वरः स प्लुतसंज्ञो भवति इत्यर्थः। [२]अगम इत्यत्र गम्, अद्यतनीसिः, 'लृदिद्द्युतादि'० (३।४।६४) अङ्। प्रतिपदमिति किम्? वाक्यस्यैवान्त्यः स्वरः प्लुतो मा भूत् किन्तु पदस्य पदस्यान्त्यः स्वरो प्लुतो भवति ॥९८॥

## [१]दूरादामन्त्र्यस्य गुरुर्वैको[२]ऽनन्त्योऽपि लनृत्[३] ॥७।४।९९॥

म० वृ०—वाक्यस्य यः स्वरेष्वन्त्यः स्वरो [२]दूरादामन्त्र्यस्य पदस्य सम्बन्धी [४]गुरुर्वाऽनन्त्योऽपि [पदमध्यवर्त्ती] ऋकारवर्जितः स्वर लृकारश्च एको दूरादामन्त्र्यस्यैव सम्बन्धी स 'प्लुतो' वा स्यात्। आगच्छ भो देवदत्त३!, देवदत्त! वा [आगच्छ भो इन्द्रभूते ३!, इन्द्रभूते! वा]; [५] गुरुर्वैकोऽनन्त्योऽपि लनृत्,-सक्तून् पिब दे३वदत्त!, सक्तून् पिब देवद३त्त!; [६]आगच्छ भो [७]नृ३षभ!, नृषभ!, आगच्छ भोः क्लृ३प्तशिख!, क्लृप्तशिख!। लृकारग्रहणमनृदिति प्रतिषेधनिवृत्त्यर्थम्। अथ ऋतः प्रतिषेधे लृकारस्य कः प्रसङ्गः? उच्यते, इदमेव ज्ञापकम् "ऋवर्णग्रहणे लृवर्णस्यापि ग्रहणं" भवतीति, तेन [८]अचीक्लृपदित्यादौ ऋवर्णकार्यं लृवर्णस्यापि सिद्धम्। अनृदिति किम्? [९]कृष्णमि३त्र!, कृष्णमित्र ३!। अनृदिति गुरुर्विशेष्यते, न स्वरेष्वन्त्यः, तेनेहापि— आगच्छ भोः कर्तृ ३! [१०]कर्तृ! वा ॥९९॥

अव० [१]यत्र प्राकृतात् कोऽर्थः? स्वाभाविकात् प्रयत्नात् प्रयत्नविशेष आश्रीयमाणे सन्देहो भवति किमयं श्रोष्यति नवा इति दूरमुच्यते। [२]'नवा गुणः०' (७।४।८६) इत्यतो महाविभाषयैव प्लुतविकल्पे सिद्धे यत्पुनः-'दूरादामन्त्र्य०' (७।४।९९) इति सूत्रे वाग्रहणं कृतं तन्न विकल्पार्थं किन्तु अन्त्यप्लुतेन सह गुरोरसमावेशार्थम्, कोऽभिप्रायः? यत्र अन्त्यस्वरस्य प्लुतत्वं भवति तदा तत्र पदेऽन्त्यस्यैव, न तु गुरोः प्लुतत्वम्, यत्र च स्थाने गुरोः प्लुतत्वम् तदा तत्र गुरोरेव, न तु अन्त्यस्य स्वरस्य, तेन कलृ३प्तशिख३! इति परिणा प्रयोगो न भवति। [३]'लनृत्' इति, लनृत् कोऽर्थः? ऋकारवर्जितः

स्वरः प्रस्तावात् ऋकारः ऌकारश्च प्लुतो भवतीत्यर्थः । [४]गुरुर्वाऽनन्त्योऽपि, गुरोरेव विशेषणमिदम्। [५](एवम्) माणव कपिलक३!,माणव कपिलक! । [६]आगच्छ भो इ३न्द्रभूते!,आगच्छ भो इन्द्रभू३ते ! इत्यपि। [७]नृ, ऋषभ, ना चासौ ऋषभश्च, सन्धौ सत्यां नृ३षभ ! इति प्रयोगः। [८]'ऋतोऽत्' (४।१।३८) इत्येव सिद्धं ऋवर्णकार्यम् । अचीकॢपदित्यत्र कृपो धातोः "ऋरलृलं कृपोऽकृपीटादिषु" (२।३।९९) इति सूत्रेण ऋकारस्य ऌकारो भवति, 'ऋदृवर्णस्य' (४।२।३७)इत्यनेन ऌकारस्य गुणबाधनार्थं पुनर्ऌकारः। [९]कृष्णमि३त्र ! कृष्णमित्र३! इत्यत्र कृ इत्यस्य ऋकारस्य प्लुतत्वं मा भूत् व्यावृत्तिबलात्। [१०]कर्तृशब्दात् सम्बोधने सिः, 'अनतो लुप्' (१।४।५९) ॥९९॥

[१]हेहैष्वेषामेव[२] ॥७।४।१००॥

म०वृ०–दूरादामन्त्र्यस्य सम्बन्धिनौ यौ हे है शब्दौ [दूरार्थद्योतकौ] तयोः प्रयुज्यमानयोः तयोरेव वाक्ये यत्रतत्रस्थयोरन्त्यः स्वरः 'प्लुतो वा' स्यात् । हे३ चैत्र ! आगच्छ,आगच्छ हे३ चैत्र! ,आगच्छ चैत्र! हे३ । है३ मैत्र ! आगच्छ,आगच्छ है३ मैत्र!. आगच्छ मैत्र ! है३ ॥१००॥

प्रव०–[१]ह् इ=हे ,ह् ए=है इति पदमण्डनिका सूत्रे,ततो हश्च इश्च=हे,हश्च एश्च=है इति लाक्षणिकपदं हे है इति व्यस्तम् ,अथ समस्तं स्वाभाविकं हे है। सूत्रे ह् इ=हे , ह् ए=है, एवं शब्दरचना , सन्धौ सत्यां हे हे है है इति पदानि जातानि, तदनन्तरं हेश्च हेश्च एवं विगृह्य एकशेषे हे, द्विवचनम् , हे औ=हयौ इति सिद्धम् , हैश्च हैश्च, अत्रापि पूर्ववत् एकशेषे हायौ, है औ=हायौ इति निष्पन्नम् ,ततः पुनः हयौ च हायौ च=हेहायः, जस् , तेषु हेहैषु, तदेवं हेहै इति शब्दानां बहुत्वेऽपि स्वरूपापेक्षया द्वित्वमेवाश्रित्य वृत्तिकार आह–दूरादामन्त्र्यस्य सम्बन्धिनौ यौ हे है इति शब्दौ इत्यादि । ❀ हे है इत्यत्रावधारणस्य विषयार्थम् एषामित्यत्र ★ स्थानिनिर्देशार्थम् , ह् इ=हे, ह् ए=है इति लाक्षणिकयोरपि परिग्रहार्थं बहुवचनम् । [२]एवकारोऽन्यस्य प्लुतस्य व्युदासार्थः ॥१००॥

अस्त्रीशूद्रे प्रत्यभिवादे भोगोत्रनाम्नो वा ॥७।४।१०१॥

म० वृ०–अभिवाद्यमानो गुरुः [१]कुशलानुयोगेनाशिषा वा यद् युक्तं वाक्यं प्रयुङ्क्ते स प्रत्यभिवाद उच्यते। [२]तस्मिन् अस्त्रीशूद्रविषये वर्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरो भोःशब्दस्य गोत्रस्य नाम्नो वा आमन्त्र्यस्य सम्बन्धी 'प्लुतो वा' स्यात्। [३]अभिवादये मैत्रोऽहं भोः३ (भोः वा ), [४]आयुष्मानेधि[५] भोः३ भोः वा[६] । गोत्रे,-अभिवादये गार्ग्योऽहं भोः , कुशल्यसि गार्ग्य३ ! गार्ग्य ! वा। नाम,-अभिवादये चैत्रोऽहम् ,आयुष्मानेधि चैत्र३ चैत्र ! वा। स्त्रीशूद्रवर्जनं किम् ? अभिवादये गार्ग्यहं भोः,आयुष्मती भव [७]गार्गि ! । पुनर्वाग्रहणमुत्तरत्र वाऽधिकारनिवृत्त्यर्थम् ॥१०१॥

प्रव०–'अस्त्रीशूद्र०' (७।४।१०१) इति सूत्रे गोत्रविषये विशेषोऽयम् ,–राजन्यविशोः=क्षत्रियवैश्ययोरपि गोत्रत्वमेव,–अभिवादयेऽहमिन्द्रवर्मा भोः, आयुष्मानेधि इन्द्रवर्म३न्!इन्द्रवर्मन्! ,इन्द्रवर्मा राजन्यविशेषः,अभिवादये इन्द्रपालितोऽहं भोः,आयुष्मानेधि इन्द्रपालित३ ! इन्द्रपालित !;(इन्द्रपालितः)वैश्यः । [१]कुशलप्रश्नेन। [२]प्रत्यभिवादे। [३]"वदण् स्तुत्यभिवादनयोः' वर्त्तमाना-ए,भो तु रे(?)अहमभिवादये,प्रणमामीत्यर्थः। [४]आयुरस्यास्ति,

भूमनिन्दाप्रशंसासु, नित्ययोगेऽतिशायने ;
संसर्गेतिविवक्षायां,प्रायः मत्वादयो मताः ॥१॥

इति अतिशायने मतुः। [५]'असक् भुवि' अस् , पञ्चमीहि , 'शासस्हनः शाध्येधिजहि' (४।२।८४) इति एधि आदेशः , भव इत्यर्थः । [६]आयुष्मानेधि भोः, गुरुराह- भो मैत्र त्वमायुष्मान् एधि=भव । [७]गर्गस्यापत्यं स्त्री,-' गर्गादेर्यञ् ' (६।१।४२) ,

❀ अयं पाठोऽशुद्धः । हेहैष्वित्यवधारणस्य विषयार्थम्" इति शुद्धः पाठः ।

★ अयं पाठोऽशुद्धः । "एषामिति स्थानिनिर्देशार्थम्" इति शुद्धः पाठः ।

गार्ग्यः, 'यञो डायन् च वा' (२।४।६७) ङी, 'व्यञ्जनात्तद्धितस्य' ( २।४।८८ ) इति यकारो लुप्यते, गार्गी, सिः, 'दीर्घङ्याब्०'(१।४।४५) इति सिलोपः, 'नित्यदिद्द्विस्वराम्बार्थस्य ह्रस्वः' ( १।४।४३ ) इति ह्रस्वः ॥१०१॥

## प्रश्ना-ऽर्चा-विचारे च [1]सन्धेयसन्ध्यक्षरस्यादिदुत्परः[2] ॥७।४।१०२॥

म० वृ०–[3]सन्धेयः=सन्धियोग्यो यः कश्चित् स्वरे परे विकारमापद्यते । प्रश्नेऽर्चायां विचारे प्रत्यभिवादे च वर्त्तमानस्य वाक्यस्य सम्बन्धिनः स्वरेष्वन्त्यस्वरस्य सन्धेयसन्ध्यक्षरस्य प्लुतो भवन् इदुत्पर आत्= [4]आकारः स्यात् , स च प्रत्यासत्त्या एकारैकारयोरिकारपरः[5] ओकारौकारयोरुकारपरो[6] भवति । प्रश्ने ,– अगमः पूर्वा३न् ग्रामा३न्[7] अग्निभूता[8]३इ , पटा[9]३उ । [10]अर्चायाम् ,-शोभनः खल्वसि अग्निभूता३इ , पटा३उ । ['दूरादामन्त्र्यस्य०' (७।४।९९) इति प्लुतः] । [10]विचारे,- वस्तव्यं किं [11]निर्ग्रन्थस्य [12]सागारिका३इ उतानागारिके[13] । प्रत्यभिवादे,-आयुष्मानेधि अग्निभूता३इ [ 'अस्त्री०' ( ७।४।१०१ ) इति प्लुतः ] । सन्धेयग्रहणं किम् ? कच्चि३त् कुशल३म् भवत्यो३ः कन्ये३[14] । सन्ध्यक्षरस्येति किम् ? भद्रिकासि कुमारि३ ॥१०२॥

अव०–[1]सन्धेयं च तत् सन्ध्यक्षरं च । [2]इश्च उश्च=इदुतौ, इदुतौ परौ यस्मात् आत आकारात् । [3]सन्धियोग्यः कः ? यस्य 'ईदूदेद्०' ( १।२।३४ ) इत्यादिभिः प्रतिषेधो नास्ति । [4]आकारो भवति इति कर्तृपदमाकारः प्लुतः । [5]ए-ऐस्थाने आकारः । [6]ओ–औस्थाने आकारः । [7]'प्रश्ने च प्रतिपदम्' (७।४।९८) इति प्लुतः । [8]अग्निभूति, [9]पटु ; सम्बोधने सिः, 'ह्रस्वस्य गुणः' (१।४।४१) ए, ओ ; ततः एकारस्य ओकारस्य आकारो भवति, स च प्लुतः । पटा३उ इत्यस्याग्रे अदा३स्तस्मा३इ , अपठः३ पटा३उ ; एषु 'प्रश्ने च प्रतिपदम्' (७।४।९८) इत्यनेन प्लुतसंज्ञा । [10]'विचारे पूर्वस्य' (७।४।९५)इति प्लुतः । [11]निर्ग्रन्थस्य इत्यत्र 'कृत्यस्य वा'(२।२।८८) इत्यनेन कर्त्तरि षष्ठी अस्ति, तेन निर्ग्रन्थेन किं वस्तव्यं ? सागारिके स्थाने उत अनागारिके स्थाने निर्ग्रन्थेन वस्तव्यम् । [12]अगारं गृहमस्यास्तीति अगारिकः, 'अतोऽनेकस्वरात्' ( ७।२।६ ) इत्यनेन इकः, सह अगारिकेण वर्त्तते सागारिकः, तस्मिन् सागारिके लोकवासे । [13]तथा अगारेण चरति, [ 'चरति' ॥६।४।११। इति ] इकण् , आगारिकः, न विद्यते आगारिकोऽस्मिन् प्रदेशे तस्मिन् अनागारिके, वनपर्वतवासे इत्यर्थः । [14]कन्या , औ , 'औता' (१।४।२०) इति ए, 'ईदूदेद् द्विवचनम्' (१।२।३४) इति सन्धिनिषेधविषयम् । 'दूरादामन्त्र्य०' (७।४।९९) इति प्लुतः ॥१०२॥

## तयोर्य्वौ स्वरे संहितायाम् ॥७।४।१०३॥

म० वृ०–तयोः प्लुताकारात्परयोरिदुतोः स्थाने स्वरे परे संहितायां[1] विषये यथासंख्यं यकारवकारादेशौ भवतः । अविरामः संहिता । अगमः३ अग्निभूता३ [2]यत्रागच्छ, अगमः३ अग्निभूता३[3] यिहागच्छ, अगमः३ पटा३[4] वत्रागच्छ । स्वर इति किम् ? अग्ना३[5]इ , पटा३उ । संहितायामिति किम् ? [6]अग्ना३इ इन्द्रम् , पटा३उ उदकम् । इति प्लुताधिकारः ॥१०३॥

अव०–[1]संहितायां विषये कोऽर्थः ? सन्धिकार्यप्राप्तिविषये । विरामः परमो वर्णाऽभावः, विरामादन्यत्र संहिता । विरामे सन्धिनिषेधः, संहितायां च सन्धिर्भवति । वर्णानां परः संनिकर्षः संहिता उच्यते । विसर्ग(विराम ?)सद्भावात् सन्ध्यभावः (?)। [2]'दूरादामन्त्र्य०' (७।४।९९), इकारस्थाने यः । [3]'दूरादामन्त्र्य०' (७।४।९९) इति प्लुतः । [4]'दूरादामन्त्र्यस्य (७।४।९९)' इति प्लुतत्वम् , 'प्रश्नार्चाविचारे०' (७।४।१०२) इति आत्वम् । [5]'प्रश्ने च प्रतिपदम्' (७।४।९८) प्लुतः । [6]अग्ना३इ इन्द्रमित्यादौ 'प्रश्ने च प्रतिपदम्' (७।४।९८) इत्यनेन प्लुतत्वम् ,'प्रश्नार्चाविचारे०' (७।४।१०२) इति आत्वम् । तथा विरामविवक्षायां च सन्ध्यभावः । अग्ना३इ अत्र ,

पटा३उ अत्र इत्यति अत्र ज्ञेयम्। स्वे दीर्घत्वस्य अस्वे परे 'ह्रस्वोऽपदे वा' ( १।२।२२। इत्युक्तह्रस्वत्वस्य वा बाधनार्थं 'तयोर्य्वौ०' ( ७।४।१०३ ) इति सूत्रं कृतम् ॥१०३॥

## पञ्चम्या निर्दिष्टे परस्य ॥७।४।१०४॥

म० वृ०–[सूत्रमध्ये] पञ्चमीविभक्त्या निर्दिष्टे यत् कार्यमुच्यते तत् परस्य स्थाने स्यात्। अतो 'भिस् ऐस्' (१।४।२)– वृक्षैः। इह न भवति,-[1]मालाभिरत्र। निर्दिष्टग्रहणस्यानन्तर्यार्थत्वाद्[2] इह न भवति- दृषद्भिः ॥१०४॥

---

अव०–[1]'मालाभिः', अत्र अकारात् पूर्वं भिस् अस्ति। [2]अव्यवहितार्थत्वात्। लोके हि व्यवहितेऽपि परशब्दो दृश्यते, यथा- महोदयात्परं साकेतमिति। अतो 'भिस०'(१।४।२) इत्यादौ दिग्योगलक्षणा 'प्रभृत्यन्यार्थदिग्शब्द०' ( २।२।७५ ) इति सूत्रेण पञ्चमी विहितास्ति, तत्र पूर्वस्य परस्य च कार्यं स्यात् इति परमेव कार्यं ग्राह्यमिति नियमार्थं 'पञ्चम्या निर्दिष्टे०' इति वचनं कृतम् ॥१०४॥

## सप्तम्या पूर्वस्य ॥७।४।१०५॥

म० वृ०–[सूत्रमध्ये] सप्तम्या निर्दिष्टे यत्कार्यमुच्यते [1]तत्पूर्वस्यानन्तरस्य स्थाने स्यात्। [2]दध्यत्र, [3]मध्वत्र। निर्दिष्टाधिकारादिह न भवति [व्यवहितत्वात्]–समिदत्र ॥१०५॥

---

अव०–[1]पूर्वस्यानन्तरस्य स्थाने, कोऽर्थः? पूर्वस्याव्यवहितस्य स्थाने। [2]'इवर्णादेरस्वे स्वरे यवरलम्' (१।२।२१)। पूर्ववत् व्यवहितेऽप्यर्थे पूर्वशब्दो दृश्यते, यथा मथुरायाः पूर्वं पाटलिपुत्रम्। अस्वे स्वरे इत्यादौ तु औपश्लेषिकमधिकरणम्, उपश्लेषस्य पूर्वत्र परत्र च सम्भवादौपश्लेषिकं पूर्वं च परं च सम्भवति, तत्र परमेव ग्राह्यमिति नियमार्थं 'सप्तम्याः पूर्व०'(७।४।१०५) इति सूत्रं कृतम् ॥१०५॥

## षष्ठ्याऽन्त्यस्य ॥७।४।१०६॥

म० वृ०–षष्ठ्या निर्दिष्टे [सूत्रे] यत्कार्यमुच्यते तदन्तस्य=षष्ठीनिर्दिष्टस्यैव [1]योऽन्त्यो वर्णस्तस्य स्थाने भवति, न तु समस्तस्य। अष्टाभिः, अष्टासु ॥१०६॥

---

अव०–[1]'योऽन्त्यो वर्णः' इत्यादि यदुक्तं तत्र 'वाष्टन आः स्यादौ'(१।४।५२) इति ज्ञातव्यम्, (तत्र) अष्टन्शब्दस्य आत्वमुक्तमस्ति, परमन्त्यस्य 'न्'इत्यक्षरस्यैव आत्वम्, न तु सर्वस्य अष्टन्शब्दस्य ।१०६।

## अनेकवर्णः सर्वस्य ॥७।४।१०७॥

म० वृ०–अनेकवर्ण आदेशः षष्ठ्या निर्दिष्टस्य [1]सर्वस्यैव स्थाने स्यात्। तिसृभिः, चतसृभिः। सर्वस्येति निर्दिश्यमानापेक्षम्, तेन व्याघ्रपादित्यत्र 'पात्पादस्याहस्त्यादेः' ( ७।३।१४८ ) इति निर्दिष्टस्य पादशब्दस्य [ पाद् इत्यादेशः ] भवति, न तु समुदायस्य। 'ऋतां क्ङितीर्'(४।४।११६) किरति।१०७।

---

अव०–[1]अनेकवर्णः सर्वस्य स्थाने भवतीत्यस्य 'त्रि-चतुरस्तिसृ-चतसृ स्यादौ' (२।१।१) इत्यादीनि सूत्राणि ज्ञातव्यानि। पूर्वस्यापवादोऽयम् अनेकवर्णः०' इति योगः एवमुत्तरोऽपि'प्रत्ययस्य'इति योगः ।१०७

## प्रत्ययस्य ॥७।४।१०८॥

म० वृ०–प्रत्ययस्य स्थाने विधीयमान आदेशः सर्वस्य स्यात्। सर्वे, अष्टौ, कति ॥१०८॥

## स्थानीवावर्णविधौ ॥७।४।१०९॥

म० वृ०–स्थानं प्रसङ्गः, सोऽस्यास्तीति स्थानी आदेशी। आदेशस्थानिनोः पृथक्त्वात् स्थानिकार्यमादेशे न प्राप्नोतीत्यतिदिश्यते। आदेशः स्थानिवत् स्यात्, स्थान्याश्रयाणि कार्याणि आदेशः प्रतिपद्यते; अवर्णविधौ=यदि तानि वर्णाश्रयाणि न भवन्ति। तत्र धातुप्रकृतिविभक्तिकृदव्ययपदादेशा उदाहरणम्। तथाहि–[1]धात्वादेशो धातुवद्भवति, भविता, भवितुम्, भाव्यम्, वक्ता, वक्तव्यम्। [2]प्रकृत्यादेशः प्रकृतिवत्,-कस्मै, के, केषाम्। [3]विभक्त्यादेशो विभक्तिवत्,-वृक्षाय, राजा, पचेयम्, पचेयुः। [4]कृदादेशः कृद्वत्,-प्रकृत्य। [5]अव्ययादेशोऽव्ययवत्,-प्रस्तुत्य। [6]पदादेशः पदवत्,-धर्मो वो रक्षतु। अव-

र्णविधाविति किम् ? वर्णाश्रयो विधिर्वर्णविधिरिति समासाश्रयणात् वर्णात्परस्य विधिः, अथवा वर्णे परतो विधिः, वर्णस्य स्थाने विधिः, वर्णेन विधिः, अप्रधानवर्णाश्रयो विधिर्वर्णविधिरिति सर्वत्र प्रतिषेधो भवति । तत्र वर्णात्परस्य विधिः,–[७]द्यौः, [८]पन्थाः, [९]सः । अथ वर्णे परतो विधिः,-[१०]क इष्टः, स उप्तः[११] । वर्णस्य स्थाने विधिः,– श्रायं[१२]हविः । वर्णे व्यवधानेन विधिः,– [१३]उरःकेण,उर)(केण ; [१४]उरःपेण, उर)(पेण ; तथा [१५]व्यूढोरस्केन । अप्रधानवर्णाश्रयो विधिः,-[१६]प्रदीव्य । तथा स्थानिवर्णाश्रयकार्यप्रतिषेधाच्च आदेशवर्णाश्रयाणि स्थान्यनुबन्धाश्रयाणि च कार्याणि भवन्त्येव । आदेशवर्णाश्रयाणि,-[१७]सर्वेषाम् । स्थान्यनुबन्धाश्रयाणि,-[१८]प्रभिद्य , प्रणीय, प्रलूय । अथ कथमग्रहीत्[१९] इत्यत्र इटो दीर्घत्वे स्थानिवद्भावाद् 'इट ईति' (४।३।७१)इति सिचो लोपो भवति? वर्णविधिर्ह्येष.[२०] । [२१]उच्यते,–[२२]नायं वर्णविधिः, विशिष्टं ह्येष समुदायमवर्णमाश्रयते इटं नाम ॥१०९॥

अव०–[१] धात्वादेशो धातु'-रित्यादि, धात्वादेशः= धातोः स्थाने य आदेशः स मूलधातुरिव ज्ञातव्यः । यथा-भविता, भवितुम् , वक्ता, वक्तव्यमित्यादिषु अस्ब्रूग्धातुस्थाने 'अस्तिब्रुवोर्भूवचा०' (४।४।१) इत्यनेन भू वच् इत्यादेशौ धातुवत् भवतः,ततः 'स्थानीवावर्णे०'इत्यनेन न्यायेन तृच् , तुम् , घ्यण् , तव्यानीयादयः प्रत्ययाः सिद्धा१ । तथा[२] प्रकृत्यादेशे'-ति, मूलप्रकृतिस्थाने य आदेशः सोऽपि मूलप्रकृतिवत् ज्ञेयः। यथा कस्मै इत्यादिषु किमः कादेशेऽपि कृते 'स्थानीवा०' (७।४।१०९) इति सूत्रेण स्मायादय आदेशा भवन्ति २ । [३]'विभक्त्यादेशे'-ति, वृक्षायेत्यादिषु स्यादित्वाद्दीर्घत्वम् , राजेत्यादिपदत्वम् , पचेयम् पचेयुरत्र त्याद्यन्तत्वात् पदत्वम् ३ । [४]कृदादेशः कृद्वत् ,-यथा प्रकृत्य, अत्र क्त्वो यबादेशे कृते 'ह्रस्वस्य तः पित्कृति'(४।४।११३) इति तोऽन्तः सिद्धः४ । [५]अव्ययादेशोऽव्ययवत् , प्रस्तुत्य, अत्र 'अव्ययस्य' (३।२।७) इति सेर्लुप्५। [६]पदादेशःपदवत् ,-धर्मो वो रक्षतु, पदत्वात् सो रुत्वादि ६ । ननु अग्निर्माणवक इत्यादिवदिवग्रहणं विनापि इवार्थानुमानं भविष्यति (किमिव ग्रहणेन) इत्याह,- इवग्रहणं स्वाश्रयार्थम् , स्वस्य स्थानिस्वरूपस्य हन् इत्यस्य आश्रयणम्=स्वाश्रयः, तदर्थम् ,अन्यथा स्थानीति आदेशस्य संज्ञा विज्ञायेत । ※ तेन आहत आवधिष्ट इत्यादौ 'आङो यमहनः०' ( ३।३।८६ ) इत्यनेन उभयत्रापि आत्मनेपदं भवति । अन्यथा कोऽर्थः ? इवं विना आदेशस्य स्थानित्वे सति आवधिष्ट इत्यत्रैव वधादेशे कृते आत्मनेपदं स्यात् , न आहत इत्यत्र । [७]'द्यौः' (इति) अत्र 'दिव औः सौ'(२।१।११७) इत्यनेन व् इत्यस्य औत्वे, [८]'पन्थाः' (इति) अत्र 'पथिन्मथिन्ऋभुक्षः सौ' ( १।४।७६ ) इति न् इत्यस्य स्थाने आत्वे, [९]'सः' (इति) अत्र तु 'आद्वेरः' (२।१।४१)इति द् इत्यस्य अत्वे कृते सति स्थानिवद्भावात् 'दीर्घङ्याब्०' ( १।४।४५ ) इत्यनेन सेर्लोपः प्राप्नुयात् , परमवर्णविधाविति व्यावृत्तिबलान्न भवति सेर्लोपः । [१०]'क इष्टः', यज्धातुः, क्तः, 'यजादिवचेः०' ( ४।१।७९ ) इति य्वृत् इः । [११]'उप्तः', अत्रापि य्वृत् उ ( इति ) कृते सति स्थानिवद्भावात् 'घोषवति' ( १।३।२१ ) इति सूत्रेण रु इति स्थाने उत्वं प्राप्नुयात् , 'स' इत्यत्र तु 'एतदश्च व्यञ्जने०' (१।३।४६) इत्यनेन सेर्लोपश्च प्राप्नुयात् , परं वर्णे परतो विधिरिति वचनात् उत्वं सेर्लोपश्च न भवति । [१२]श्रीर्देवताऽस्य=श्रायं हविः, अत्र ईकारस्य वृद्धौ कृतायां स्थानिवद्भावात् 'अवर्णेवर्णस्य' ( ७।४।६८ ) इति लोपः प्राप्तो न भवति । [१३]उरस् , 'कैं गैं रैं शब्दे' उरः कायतीति उरःकः ; [१४]उरस् , "पैं ओवैं शोषणे', उरः पायतीति उरःपः, 'आतो डोऽह्वावामः' (५।१।७६) इति डः, 'सो रुः' (२।१।७२) इति सस्य स्थाने रः, उरःकेण, उर)(केण ; उरःपेण, उर)(पेण ; एषु सकारादेशानां विसर्जनीयजिह्वामूलीयोपध्मानीयानां स्थानिवद्भावप्रतिषेधात्'अलचटतवर्गशसान्तरे' इति णत्वप्रतिषेधो न भवति । तथा [१५]व्यूढ,उरस् , महत् , उरस् ; व्यूढमुरो यस्य, महदुरो यस्य ;

※ स्वाश्रयार्थमिवग्रहणात् ।

'दध्युरःसर्पिर्मधूपानच्छालेः' (७।३।१७२) इत्यनेन कच् समासान्तः, 'सो रुः' (२।१।७२), 'प्रत्यये' (२।३।६) इति सूत्रेण रकारस्थाने सः, व्यूढोरस्केन इत्यत्र 'प्रत्यये' (२।३।६) इत्यनेन यः कृतः सकारः तदाश्रयो णत्वनिषेधः, न तु मूलभूतसकाराश्रयो णत्वनिषेधः, तस्य वर्णत्वात्, वर्णाश्रये च स्थानित्वप्रतिषेधात्। [16]'प्रदीव्य प्रसीव्य' इत्यादौ 'ऊदितो वा' (४।४।४२) इत्यनेन इट् प्राप्तः सकारतकाररूपाऽप्रधानवर्णाश्रयत्वात् स्थानित्वाभावे इट् न भवतीत्यर्थः।'स्ताद्यशितो०'(४।४।३२)इति सूत्रे स्तादीति अन्यपदार्थस्याशितः प्राधान्यात् स्तोऽप्राधान्यम्। [17]सर्वेषाम्, अत्र आम्स्थाने सामादेशे कृते सकाराश्रयं कोऽर्थः? आदेशवर्णाश्रयमेत्वम्'एद् बहुस्भोसि'(१।४।२२)इत्येवं भवति। अत्रायं विशेषः,-विभक्त्यादेशो विभक्तिवदिति वचनात् सामो विभक्तित्वं स्थानिवद्भावः, यदि स्थानिवर्णाश्रयस्यैव कार्यस्य प्रतिषेधो न स्यात् तदा आदेशवर्णाश्रयस्यापि कार्यस्य प्रतिषेधे सामो विभक्तित्वाभावात् स्यादिसकाराश्रयमेत्वं न स्यादिति भावः। [18]प्रभिद्येत्यादौ क्त्वो यबादेशे कृते स्थानिवद्भावात् क्ङित्तीति गुणप्रतिषेधो भवति। यतः अनुबन्धा हि क इत्यादयोऽसन्त एवाविद्यमाना एव गुणाभावादिकं कार्यं कुर्वन्तीत्यर्थः। [19]'अग्रहीत्', ग्रह्, अद्यतनीदिव्, 'सिजद्यतन्याम्' (३।४।५३) सिच्, 'सः सिजस्तेर्दिस्योः' (४।३।६५) सिचः ईत्, 'तेर्ग्रहादिभ्यः' (४।४।३३) इट्, 'गृह्णोऽपरोक्षायां दीर्घः'(४।४।३४ इत्यनेन)इट् ईट् भवति,दीर्घस्य ईट् इत्यस्य स्थानिवद्भावात् 'इट ईति' (४।३।७१) इति सिज्लोपः कार्यः। न चायं वर्णाद्विधिः, इट इति रूपाश्रयत्वात्। [20]सिच्लोपः। [21]सूरिराह। [22]सिचो लोपः ॥१०९॥

## स्वरस्य परे प्राग्विधौ ॥७।४।११०॥

म० वृ०–स्वरस्यादेशः परे परनिमित्तके व्यवहितेऽव्यवहिते वा पूर्वस्य विधौ कर्त्तव्ये स्थानीव भवति। [1]कथयति, [2]अवधीत्, [3]स्पृहयति, [4]पादिकः, [5]पातनी, [6]रावणिः, [7]स्रंस्यते, [8]याज्यते, [9]निराद्य, [10]घात्यात्, [11]निगार्यते, [12]निगाल्यते, [13]चातुरौ। स्वरस्येति किम्? [14]अद्राक्षम्, [15]आगत्य। पर इति किम्? द्विपदिकां ददाति। प्राग्विधाविति किम्? नैधेयः, निधिकः। [निधानं निधिः, निधेरपत्यम्, 'इतोऽनिञः' (६।१।७२) एयण्; निधिना तरति,'नौ द्विस्वरादिकः'(६।४।१०),'इडेत्पुसि'०(४।३।९४) इति आकारलोपो द्विस्वरलक्षणैयेकविधौ परस्मिन् स्थानी न भवति] पूर्वस्माद्विधिः प्राग्विधिरित्यप्याश्रीयते, तेन [16]अधुक्षन्त। पूर्वसूत्रेऽवर्णविधाविति प्रतिषेधाद्वर्णविध्यर्थं वचनमिदम् ॥११०॥

अव०-[1]'कथण् वाक्यप्रबन्धे' (इति) कथ अदन्तः, णिच्,'अतः' (४।३।८२) इत्यनेन धातोरन्त्यस्य अकारस्य लोपः ★। अथ [2]'अवधीत्', हन्, दिव्, 'अद्यतन्यां वा त्वात्मने' (४।४।२२) हन्स्थाने वध इति अकारान्तादेशः, 'अतः' (४।३।८२) अलोपः, अत्र अकारलोपस्य स्थानिवद्भावात् 'व्यञ्जनादेर्वोपान्त्यस्यातः' (४।३।४७) इति वृद्धिर्न भवति। [3]स्पृहयतीत्यत्रापि अकारलोपस्य स्थानिवद्भावादुपान्त्यलघोर्गुणो न भवति। [4]पादाभ्यां तरति=पादिकः, 'अवर्णेवर्णस्य'(७।४।६८) इति अकारलोपः, अस्य स्थानिवद्भावात् 'यस्वरे पादः पद्'० (२।१।१०२) इत्यनेन पद्भावो न प्राप्नोति, पाद् इत्यस्य पद् इत्यादेश उक्तोऽस्ति, तत्र न पाद इति अकारान्तस्य। [5]पात्यतेऽनया, 'करणाधारे' (५।३।१२९) अनट्, अत्र 'अनोऽस्य' (२।१।१०८) इति लुग् न भवति। [6]रवणस्यापत्यं=रावणिः, 'अत इञ्' (६।१।३१), अत्र 'नोऽपदस्य'० (७।४।६१) इत्यन्त्यस्वरादिलोपो न भवति। [7]'स्रंस्यते', स्रंस्, णिग्,वर्त्तमानाते, क्यः, अत्र 'णेरनिटि' (४।३।८३) इति णिग्लोपः, णिलुकः स्थानिवद्भावादुपान्त्यनलोपो न भवति, उपान्त्याभावात्। [8]'याज्यते', यज्, णिग्, अत्रापि णिग्लोपे णिगः स्थानिव-

★ अत्राल्लुकः स्थानिवद्भावाद् 'ञ्णिति' इत्यनेन उपान्त्यलक्षणा वृद्धिर्न भवति।

द्भावात् ण्वन्न भवति, नित्याऽणिगन्तयजादेर्ग्रह-णात्। [8]निराद्य, समाद्य ; अत्र अद् धातुः, निर्-संपूर्वम्, णिग्, क्त्वा, अत्रापि णिग्लोपस्य स्था-निवद्भावात् 'यपि चादो जग्ध्' (४।४।१६) इति जग्धादेशो न भवति, णिगा धातुप्रत्यययोर्व्यवहित-त्वात्। [10]'घात्यात्', हन्, णिग्, आशीःक्यात्, अत्रापि णिगि सति 'हनो वध आशि०' (४।४।२१) इत्यनेन वधादेशो न भवति, 'ञ्णिति घात्' (४।३।१००) इति घात् भवति। [11]निगार्यते, [12]निगा-ल्यते ; गृ, णिग्, वृद्धिः आर्, ते, क्य, णिग्लोपः, स्थानिवद्भावात् णिगि सति 'नवा स्वरे' (२।३।१०२) इति पक्षे लत्वं सिद्धम्। [13]चातुरौ, आन-डुहौ ; चतुर्, अनडुह् ; चतुर्णामिमौ=चातुरौ,अन-डुहामिमौ=आनडुहौ ;'तस्येदम्'(६।३।१६०), वृद्धिः आः, अकारविश्लेषः, 'ऐदौत्सन्ध्यक्षरैः' (१।२।१२ इति औत्वम्, औत्वस्य स्थानिवद्भावात् 'वाः शेषे' (१।४।८२) इत्यनेन 'वा' इति न भवति। तथा पादे इत्यत्र अकारविश्लेषे 'अवर्णस्येवर्णादि'० (१।२।६) इति एत्वम्, एत्वस्य स्थानिवद्भावात् पद् इत्या-देशो न भवति। उभयजन्यत्वेऽपि अन्यतरव्यपदे-शात् औत्वैत्वयोः परनिमित्तत्वं ज्ञातव्यम्। अवीवद-द्वीणाम् अत्र णिग्द्वयम्, णिजात्याश्रयणादुपान्त्यस्य ह्रस्वो न भवति। द्वाभ्यामित्यत्र तु निमित्तापेक्षया प्राग्विधौ आत्वे क्रियमाणेऽत्वस्य न स्थानित्वम्, 'वैकत्र द्वयोः' (२।२।८५) इति निर्देशात्। [14]'अद्रा-क्षीम्', दृश्, अद्यतनीताम्, सिच्, अद्,'स्पृशादि-सृपो वा' (४।४।११२) इति अकारागमः, 'व्यञ्जना-नामनिटि' (४।३।४५) इति वृद्धिः आ, 'धुड्ह्रस्वा'० (४।३।७०) इति सिचो लोपः, 'यजसृजमृज०' (२।१।८७) इति शस्य षः, 'तवर्ग'० (१।३।६०) इति तस्य टः, सिच्लोपो न स्वरादेशः इति 'षढोः कस्सि' (२।१।६२) इति कत्वे स्थानी न भवति। [15]आगत्येत्यत्र पञ्चमलोपः तोऽन्ते……कर्त्तव्ये स्थानी न भवति। द्वौ पादौ ददाति=द्विप-दिकां ददाति, 'सङ्ख्यादेः पादादिभ्यो दानदण्डे चाकल् लुक् च' (७।२।१५२) इति अकल्प्रत्ययः, अन्त्याकारस्य लोपः, आप्, 'अस्यायत्तत्'० (२।४।१११) इति, अत्र अकारलोपस्य परनिमित्तकत्वात् स्थानित्वाभावे 'यस्वरे पादः पद'० (२।१।१०२) इत्यनेन पादस्य पद् इत्यादेशो भवति। [16]दुह्, अद्यतन्यन्त, अद्, 'हशिटो नाम्युपान्त्याददृशोऽ-निटः सक्' (३।४।५५), 'स्वरेऽतः' (४।३।७५) इत्यनेन सकोऽकारलोपः, 'भ्वादेर्दादेर्घः' (२।१।८३) हस्य घः, 'गडदबादेः'० (२।१।७७) इत्यनेन दस्य धः, 'अघोषे प्रथमो'० (१।३।५०) इति घस्य कः, 'नाम्यन्तस्थाकवर्ग'० (२।३।१५) इति सस्य षः, अधुक्षन्तेत्यत्र 'स्वरेऽत' (४।३।७५) इति अलोपस्य परमपि 'अनतोऽन्तोऽदात्मने' (४।२।११४) इत्युक्त-मदादेशं प्रति स्थानिवद्भावः प्राप्तोऽपि न भवति ॥११०॥

## न सन्धि-ङी-य-क्वि-द्वि-दीर्घा-ऽसद्विधावस्क्लुकि ॥७।४।१११॥

म० वृ०-पूर्वेणातिप्रसक्तः स्थानिवद्भावः प्रति-षिध्यते। सन्धिविधौ, ङीविधौ, यविधौ, क्विविधौ, द्वित्वविधौ, दीर्घविधौ स्क्लुग्वर्जितेऽसद्विधौ च स्वरस्यादेशः स्थानीव न भवति। 'लि लौ' (१।३।६५) इति यावत्सन्धिविधिः [तृतीयपादे 'लिलौ' इति सूत्रं यावत्सन्धिकार्याणि ज्ञातव्यानि, तत्र सन्धिकार्ये स्वरादेशः स्थानी न भवति=स्थानिव-द्भावो न भवतीत्येवं सर्वत्र ज्ञेयम्]। तत्र [1]वियन्ति, [2]तानि सन्ति, [3]तौ स्तः, [4]वैयाकरणः। निमित्तापेक्षया प्राग्विधिरिष्यते,तेन नयनम्, लव-नम्। [सन्धिकार्ये उदाहरणे- नयनं लवनम्, अत्र गुणस्य स्वरस्यादेशस्य स्थानित्वनिषेधात् अयवा-देशौ सिद्धौ, स्थानित्वे हि सति इयुवादेशौ स्या-ताम्]। ङीविधौ,-[5]बिम्बम्। यविधौ,-[6]कण्डूतिः। क्विविधौ,-[7]द्यूः, [8]लौः। द्वित्वविधौ,-द्ध्यत्र, मध्वत्र। दीर्घविधौ,-शामंशामम्, [शमंशमम्] अशामि, [अशमि] शंशामंशंशामम्, [शंशमंशंशमम्] अशंशामि [अशंशमि। असदधिकारे विधिः= असद्विधिः, तत्र- यायष्टिः, पापक्तिः, याष्टिः,पाक्तिः।

[यज्, भृशं यजते, यङ्, यायजिषीष्ट इत्याशास्यमानः एवं पापचिषीष्ट इत्याशास्यमानः 'तिक्कृतौ नाम्नि' (५।१।७१) तिक्, यज्, पच्, णिग्, याज्यते पाच्यते इति तिक्, अकारणिगलोपयोः स्थानित्वनिषेधात् पत्वं कत्वं च सिद्धम् ] स्कलुग्विधेः प्रतिषेधः किम् ? [६]सुकूः, काष्ठतक् [काष्ठं तक्षयति, क्विप्, णिलुकः स्थानित्वनिषेधाभावात् स्कोर्लुग् न भवति, संयोगान्तलोपस्तु भवत्येव, असद्विधौ स्थानित्वप्रतिषेधात् ] ॥१११॥

अव०–[१]'वियन्ति', एवमपयन्ति, इण्, वि अप पूर्वम्, अन्ति, इणश्च य्, इणो यत्वं स्वरादेशः परनिमित्तकः पूर्वविधौ 'समानानां तेन'० (१।२।१) इति दीर्घत्वे, आयन्ति (इति) अत्र 'अवर्णस्येवर्णादि'० (१।२।६) एत्वे च कर्त्तव्ये स्थानी न भवति । [२]तानि सन्ति, [३]तौ स्तः ; तानि, अग्रे सन्ति ; तौ, अग्रे स्तः ; 'असक् भुवि' अन्ति, तस् ; 'श्नास्त्योर्लुक्' (४।२।९०) अस्तेरकारलोपः, अत्र अकारलोपः स्वरादेशः तानि इत्यन्तेकारस्य 'इवर्णादे'० ( १।१।२१ ) इत्यनेन यकारे, तौ इति औकारस्य 'ओदौतोऽवाव्' (१।२।२४) इति आव् इति कर्त्तव्ये स्थानी न भवति । [४]'वैयाकरणः', एवं सौवश्वः, इत्यत्र व्याकरण इति शब्दसिद्धिप्रस्तावे वि, आ, करण ; सु, अश्व ; अत्र इकारस्य यत्वम् उकारस्य वत्वं स्वरादेशः, तस्य स्थानित्वाभावात् ऐकारागमस्य आय् औकारागमस्य आव् न भवतः । [५]बिम्ब, 'गौरादि'० (२।४।१९) ङी, 'अस्य ङ्यां लुक्' (२।४।८६) बिम्बी इति शब्दः, बिम्ब्याः फलं बिम्बम्, 'हेमादिभ्योऽञ्' (६।२।४५), 'फले' (६।२।५८) इति सूत्रेण अञ् लुप्यते, 'ङ्यादेर्गौणस्याक्विपः'० ( २।४।९५ ) इत्यनेन ङी लुप्यते, अत्र ङीलुपः परनिमित्तत्वेऽपि 'न सन्धि'० (७।४।१११) इति सूत्रेण ङी इत्यस्य स्थानित्वप्रतिषेधात् 'अस्य ङ्यां लुक्' (२।४।८६) इति अकारस्य लुक् न भवति । एवमामलकम्, पञ्चारः, पञ्चेन्द्रादयः । [६]'कण्डूतिः', कण्डूयतेः क्ति, 'अतः' (४।३।८२) इत्यकारलोपः, परनिमित्तकोऽकारलोपो न स्थानी, 'य्वोः प्वय् व्यञ्जने'० (४।४।१२१) इति यलोपे कर्त्तव्ये। [७]देवं [८]लवमाचष्टे, णिज्, 'अतः' (४।३।८२), देवयतीति लवयतीति क्विप्, ततो णिग्लोपः, क्वौ कर्त्तव्ये 'अनुनासिके च'० (४।१।१०८) इति वस्य ऊट्, ऊटि कर्त्तव्ये ण्यकारलोपौ न स्थानिवद् भवतः; लौ इत्यत्र 'ऊटा' (१।२।१३) इति औत्वम् । [९]कुरमण्, णिच्, क्विप् ॥ १११ ॥

## लुप्यय्वृल्लेनत् ॥७।४।११२॥

म० वृ०–परस्य प्रत्ययस्य लुपि सत्यां लुब्भूतपरनिमित्तकं पूर्वं कार्यं न भवति, अय्वृल्लेनत्= य्वृन् लत्वमेनत्त्व वर्जयित्वा । तद्, [सिः, 'अनतो लुप्' (१।४।५९) इति सिलोपः] अत्र स्थानिवद्भावप्रतिषेधात् त्यदाद्यत्वसत्वे [आद्वेरः' (२।१।४१) इति अत्वं 'तः सौ सः' (२।१।४२) इति सत्वम्] न भवतः । गर्गाः, कुवलम् । तथा प्लुप्यपि लुप्रूपतास्त्येव, तेन पञ्चगोणिः, अत्रेकणः प्लुपि न वृद्धिः [अत्र इकणो 'नाम्नि' (६।४।१७२) इति लुपि सति न वृद्धिः] । लुपीति वचनाल्लुकि सत्यां भवत्येव परनिमित्तकं पूर्वं कार्यम्,–गोमान्, अत्र सिलुकि तन्निमित्तं दीर्घत्वं भवति । लुपीति सप्तमीनिर्देशात् पूर्वस्य यत्कार्यं प्राप्तं तन्निषिध्यते, समुदायस्य तु भवत्येव । पयः, साम, पञ्च ; अत्र पदसंज्ञा, तथा च तन्निबन्धानि रुत्वलोपादीनि भवन्ति । कथं पापक्ति पापचीतीत्यत्र द्वित्वं ? नेदं यङि[१] निमित्ते, किन्तु यङन्तस्य[२] । अय्वृल्लेनदिति किम् ? य्वृन्,-[३]वेवेद्धि, [४]शोशवीति, [५]जरीगृहीति । निजागलीति[६] । एतद्,- [७]एनत् पश्य, एनच्छ्रितकः[८] । 'स्थानीवावर्णविधौ' (७।४।१००) इति लुपः स्थानिवद्भावेन प्राप्तानां कार्याणां प्रतिषेधार्थं वचनम् ॥११२॥

अव०–[१]यङि परे निमित्ते । [२]'सन्यङश्च' (४।१।३) इति निमित्तं विनैव सन्नन्तयङन्तयोरेव द्वित्वं धातोराद्य एकस्वराऽवयवस्य भवति । [३]व्यध्, यङ्, 'ज्याव्यधः क्ङिति' (४।१।८१) द्वित्वम्, 'आगुणावन्यादेः' (४।१।४८), 'बहुलं लुप्' (३।४।१४) । [४]'शोशवीति', टुवोश्वि गतिवृद्ध्योः श्वि, यङ्,

'वा परोक्षायङि' (४।१।९०), ग्रु,द्वित्वम् ,यङो लुप् , 'आगुणा०'(४।१।४८), तिव् ,'यङ्तुरु'०(४।३।६४) ईत् , गुणः । [४]'जरीगृहीति', ग्रह, यङ् ,'ग्रहव्रश्च'० (४।१।८४) इति गृह् ,द्वित्वम् , 'ऋतोऽत्'(४।१।३८), 'ऋमतां रीः' (४।१।५५) । [५]'निजागलीति', गॄ, गर्हितं गिलति, यङ् , 'बहुलं लुप्' (३।४।१४),गुणः, द्वित्वम् , 'आगुणा'० (४।१।४८) इति,तिव् , 'यङ्तु-रुस्तो'० (४।३।६४) ईत् , 'ग्रो यङि' (२।३।१०१) रस्य लत्वम् । [७]एतद्, द्वितीयाऽम् , 'अनतो लुप्' (१।४।५९), 'त्यदामेनदेतदो द्वितीया'० (२।१।३३) इत्यनेन एतदः स्थाने एनत् इत्यादेशः । [८]एनमेनां वाश्रितः=एनच्छ्रितकः । वेवेद्धीत्यादिषु यङादिलोपे गुणः, आ, री, एनदादयः सिद्धाः ॥११२॥

## विशेषणमन्तः ॥७।४।११३॥

म० वृ०–विशेषणं विशेष्यस्य समुदायस्यान्तोऽवयवो भवति । इह शास्त्रे [इह व्याकरणे] धात्वादिः समुदायोऽभेदेनावयवविशेषणक उपादीयते तत्र सोऽवयवस्तत्समुदायस्यान्तत्वेन नियम्यते । 'अतः स्यमोऽम्' (१।४।५७)– कुण्डं तिष्ठति, कुण्डं पश्य । इह [विशेषणमन्तः] न भवति,-तद् । ['युवर्णवृदृ०' ( ५।३।२८ ) इति अल्–] जयः, स्तवः। इह न भवति,-योगः, सेकः । इणोऽलि अय इत्यादौ [१]व्यपदेशिवद्भावाद्भवति ॥११३॥

अव०–'विशेषणमन्तः' इदं सूत्रम् 'येन विधिस्तदन्तस्य' इति सूत्रवत् ज्ञातव्यम् । तथाहि–'अतः स्यमोऽम्' (१।४।५७),अतः कोऽर्थः ? अकारान्तस्य । अथवा 'अदेतः स्यमोर्लुक्' ( १।४।४४ ) अत एतः कोऽर्थः ? अकारान्तात् एकारान्ताच्चेति,अकारोऽन्तेऽवयवो यस्य (सोऽकारान्तः),एकारोऽन्तेऽवयवो यस्य स एकारान्तः । सर्वत्र अन्तशब्दन्यासेन बहुव्रीहिसमासेन सूत्रार्थो व्याख्यायते । अथवा 'युवर्णवृदृवश०' ( ५।३।२८ ) इति सूत्रे इ उ ऋत इत्येव अस्ति, परं 'विशेषणमन्त' इति सूत्रबलात् 'इ'कोऽर्थः ? इवर्णान्तेभ्यः,'उ'कोऽर्थः ? उवर्णान्तेभ्यः,'ऋत' कोऽर्थः ? ऋकारान्तेभ्य इति सूत्रार्थव्याख्यानं विहितमस्ति। एवं सर्वत्र यत्र शब्दात् शब्दस्य(वा)अथवा धातोः परतः धातोर्वा प्रत्ययादिकार्यं क्रियते तत्र तदन्तविधिर्ज्ञेयः । बहुव्रीहिसूचितः=बहुव्रीहिसमासेन प्रकटीक्रियते । [१]इण्धातोः परतोऽल्प्रत्यये सति अय इति सिद्धम् । अत्र इकार एवास्ति न इवर्णान्तत्वं तत्कथमल् भवति ? (इत्याह–) व्यपदेशीति, इकारात्पूर्वमेकोऽक्षर आदौ कल्पनीयः, (तेन) यः सिद्धः ['आद्यन्तवदेकस्मिन्' इति न्यायेन एक एवेकार अन्तत्वेन कल्पनीयः] ॥११३॥

## सप्तम्या आदिः ॥७।४।११४॥

म० वृ०–सप्तम्यन्तस्य विशेष्यस्य यद्विशेषणं तत्तस्यादिरवयवो ज्ञातव्यः । 'इन् ङीस्वरे लुक्' (१। ४।७९)- [१]पथः, [२]पथाम् । इह न स्यात् ,-पथिषु । [३]नेनिजानि , अनेनिजम् । इह न[४],-नेनेक्ति । [५]रौति । इह न[६] स्यात् ,-अस्तवीत् पथा ॥११४॥

अव०–पूर्वस्याऽपवादोऽयं 'सप्तम्या आदिः' इति योगः । सप्तम्यन्तविशेष्यपदस्य यत् विशेषणपदं क्रियते तत् तस्य विशेषणपदस्य आदिरवयवो ज्ञेयः । यथा स्यादौ प्रत्यये परे, कीदृशे ? स्वरे व्यञ्जने वा, कोऽर्थः ? स्वरादौ व्यञ्जनादौ च इति व्याख्येयम् , न तु स्वरान्ते व्यञ्जनान्ते । 'इन् ङीस्वरे लुक्' (१।४।७९), अत्र स्वर इत्युक्ते स्वरादौ इति व्याख्येयम् । 'उत औविति व्यञ्जनेऽद्वेः' (४। १।५९), अत्र व्यञ्जनादौ इति व्याख्येयम् । [१]पथिन् , शस् ,ङसि,ङस् वा; [२]पथाम्(इत्यत्र) आम् ,'इन् ङीस्वरे लुक्' ( १।४।७९ ) इत्यनेन इनो लोपः । [३]'दुव्युक्तोपान्त्यस्य शिति०'(४।३।१४)इति गुणप्रतिषेधः । [४]गुणप्रतिषेधो न भवति । [५]रौति यौति ;अत्र 'उत औविति०'(४।३।५९) इत्यनेन औत्वम् । [६]औत्वं न भवति । 'पथा अयौत्', अत्र व्यपदेशिवद्भावाद् एकाक्षर आदौ अन्ते च कल्पनीयः । अयौत् (इति) व्यपदेशिवद्भावाद्भवति ॥११४॥

## प्रत्ययः प्रकृत्यादेः ॥७।४।११५॥

म० वृ०–यस्माद् यः प्रत्ययः [ क्रियते ] सा तस्य प्रकृतिः । प्रत्ययः [१]प्रकृत्यादेः समुदायस्य

विशेषणं ज्ञातव्यम्, न ऊनाधिकस्य। [२]मातृभोगीणः, [३]राजपुरुषः। अधिकस्य न भवति,-ऋद्धस्य राज्ञः पुरुषः। पुत्रमिच्छति=पुत्रकाम्यति। अधिकान्न भवति- महान्तं पुत्रमिच्छति। न्यूनाधिकव्यवच्छेदार्थं वचनम् ॥११५॥

अव०-[१]शब्दस्य=आदिशब्दप्रकृतिमारभ्य शब्दसमुदायस्य प्रत्ययो विशेषणं भवतीति सम्बन्धः। तदन्तत्वं च 'विशेषणमन्तः' (७।४।११३) इत्यनेनैव सिद्धम्। [२]मातृभोगः, मातुर्भोगो=मातृभोगः, मातृभोगाय=हितो मातृभोगीणः, 'भोगोत्तरपदात्मभ्यामीनः' (७।१।४०), अत्र 'तदन्तं पदम्' (१।१।२०) इति वचनात् समुदायस्य पदसंज्ञा भवति, न तु भोगीण इति क्रमस्य पदस्य, तेन एकपदत्वाण्णत्वं सिद्धम्। [३]एवं राज्ञः पुरुषो=राजपुरुषः, 'षष्ठ्यत्नाच्छेषे' (३।१।७६) इति समासः सिद्धः ॥११५॥

## गौणो ङ्यादिः ॥७।४।११६॥

म० वृ०-ङीमारभ्य ष्यं यावत् ङ्यादिः प्रत्ययः। स गौणः सन् प्रकृत्यादेः समुदायस्य विशेषणं भवति, नोनाधिकस्य। [१]अतिकारीषगन्ध्यबन्धुः। गौण इति किम्? मुख्योऽधिकस्यापि समुदायस्य विशेषणं भवति,-[२]परमकारीषगन्धीबन्धुः ॥११६॥

अव०-पूर्वेणैव सिद्धे अगौणस्याधिकपरिग्रहार्थं वचनम् 'गौणो ङ्यादिः' इति सूत्रं कृतम्। [१]करीष, गन्ध, करीषस्येव गन्धोऽस्य=करीषगन्धिः, 'वोपमानात्' (७।३।१४७) इति इच्, करीषगन्धेरपत्यं पौत्रादि वृद्धम्,-'ङसोऽपत्ये' (६।१।२८) अण्, वृद्धिः, 'अवर्णेवर्णस्य' (७।४।६८) इलोपः, कारीषगन्ध इति शब्दः, 'अनार्षे वृद्धेऽणिञो०' (२।४।७८) इति सूत्रेण अणः स्थाने 'ष्य' इत्यादेशः, तत आप्, कारीषगन्ध्या इति शब्दः, कारीषगन्ध्यामतिक्रान्तोऽतिकारीषगन्ध्यः, 'गोश्चान्ते०' (२।४।९६) इति ह्रस्वः, अतिकारीषगन्ध्यो बन्धुरस्य स अतिकारीषगन्ध्यबन्धुः, अत्र ष्यप्रत्ययेणाधिकस्याऽग्रहणात् "बन्धौ बहुव्रीहौ" (२।४।८४) इत्यनेन ष्यस्थाने इच् न भवति,बन्धौ बहुव्रीहौ' (२।४।८४) अत्र सूत्रे मुख्याबन्तष्यप्रत्ययग्रहणात् गौणस्य ष्यस्य नेच्, अत्रोदाहरणे तु गौण एव ष्योऽस्ति। [२]मुख्यष्यप्रत्ययान्तशब्दोऽपि,-परमा चासौ कारीषगन्ध्या च=परमकारीषगन्ध्या, परमकारीषगन्ध्या बन्धुरस्य=परमकारीषगन्धीबन्धुः, अत्र मुख्यस्य ष्यप्रत्ययस्य भावात् 'बन्धौ बहुव्रीहौ' (२।४।८४) इति ईच् सिद्धः ॥११६॥

## कृत्सगतिकारकस्यापि ॥७।४।११७॥

म० वृ०-कृत्प्रत्ययः प्रकृत्यादेः समुदायस्य गतिकारकपूर्वस्य अपिशब्दात्केवलस्यापि विशेषणं भवति। यथेह समासो भवति,-[१]भस्मनिहुतम्, प्रवाहेमूत्रितम्, (तथा) उदकेविशीर्णम् [गति], अवतप्तेनकुलस्थितम् [कारकोदाहरणमिदम्] इति सगतिकेन सकारकेण च क्तान्तेन सह 'क्तेन' (३।१।९२) इति सूत्रेण समासः सिद्धो भवति। तथा [२]व्यावक्रोशी [३]सांराविणमिति 'नित्यं ञिनोऽण्' (७।३।५८) इति अण् सिद्धः। 'प्रत्ययः प्रकृत्यादेः' (७।४।११५) इत्यतोऽप्राप्ते वचनम् ॥११७॥

अव०-[१]भस्मनिहुतम्, प्रवाहेमूत्रितम्; अत्र 'तत्पुरुषे कृति' (३।२।२०) इति अलुप्समासः। [२]परस्परमाक्रोशनं= व्यावक्रोशः, ★ (एवं) परस्परं हसनं=व्यावहासः; 'व्यतिहारेऽनीहा०' (५।३।११६) इति ञप्रत्ययः; [३]समन्ताद्रावः=संरावी, समन्तात् कोटः=सङ्कोटी; ततो 'नित्यं ञिनोऽण्' (७।३।५८) इति ञान्तात् ञिन्नन्ताच्च परतोऽण्, वृद्धिः, 'अनपत्ये' (७।४।५५) इत्यन्त्यस्वरादिलोपाभावः। इमानि (इदम्?) केवलोदाहरणम् ॥११७॥

## परः ॥७।४।११८॥

म० वृ०-यः प्रत्ययः स प्रकृतेः पर एव स्यात्। वृक्षः, अजा, मीमांसते, कार्यम् ॥११८॥

अव०-'पर' इति सूत्रं विना स्यादि-त्यादि-

★ "लिम्मिन्यनिणस्युक्ताः' इति (हैमलिङ्गा०) पाठाद् ञप्रत्ययान्ताः शब्दाः स्त्रिलिङ्गे एव, तथा "कृत्याः क्तानाः खल् ञिन्" इति पाठात् ञिन्प्रत्ययान्ताः शब्दा नपुंसकलिङ्गे एव प्रयुज्यन्ते इत्यत्र व्यावक्रोशः, व्यावहासः, संकोटी, संरावी इति पुंल्लिङ्गे प्रयोगाश्चिन्त्याः।

कृदादिप्रत्ययः प्रकृतेः पूर्वे वा विचाले वा स्यात्, सूत्रकरणाच्च प्रकृतेः पर एव भवति ॥११८॥

## स्पर्द्धे ॥७।४।११९॥

म० वृ०–द्वयोर्विध्योरन्यत्र सावकाशयोस्तुल्यबलयोरेकत्रानेकत्र चोपनिपातः [प्राप्तिः] [1]स्पर्द्धः । तत्र यः सूत्रपाठे परः स विधिः स्यात् । वृक्षान्, मुनीन्, यशांसि, वनानि । परस्परप्रतिबन्धेनाप्रवृत्तौ पर्याये वा प्राप्ते वचनम् ॥११९॥

---

अव०–[1]विधिसूत्रयोर्युगपत् प्राप्तिः स्पर्द्धः उच्यते । 'वृक्षान् मुनीन्' इत्यत्र 'शसोऽता सश्च'० (१।४।४९) इति सूत्रस्यावकाशः, 'यशांसि' इत्यत्र 'नपुंसकस्य शिः' (१।४।५५) इत्यस्यावकाशः । 'वनानि मधूनि' अत्र तु 'शसोऽता'० (७।४।४१) नपुंसकस्य'०.(१।४।५५) इति उभयमपि प्राप्नोति, अतः परत्वात् शिरेव, न तु 'शसोऽता'० (१।४।४९) इति सूत्रं प्रवर्त्तते । 'शसोऽता' (१।४।४९) इत्यनेन 'नपुंसक'० (१।४।५५) इति दीर्घत्वप्राप्तिरस्त्येव, परं नकारः पुंस्येव उक्तोऽस्ति, शसः स्थाने शिरपि प्राप्नोति (?) ॥११९॥

## आसन्नः ॥७।४।१२०॥

म० वृ०–इहासन्नानासन्नप्रसङ्गे यथास्वं स्थानार्थप्रमाणादिभिरासन्न एव विधिः स्यात् । तत्र स्थानेन–[1]दण्डाग्रम् । अर्थेन–[2]वातण्ड्ययुवतिः । प्रमाणेन–[3]अमुष्मै, [4]अमूभ्याम् ॥१२०॥

---

अव०–[1]कण्ठ्ययोरकारयोः कण्ठ्य एव आकारो दीर्घो भवति, न तु ईकारोकारादिकः । [2]वतण्ड, वतण्डस्यापत्यं वृद्धं स्त्री आङ्गिरसी,–'वतण्डात्' (६।१।४५) इत्यनेन यञ्, वृद्धिः, वातण्ड्य इति शब्दः, 'स्त्रियां लुप्' (६।१।४६) इति सूत्रेण यञ् लुप्यते, 'जातेरयान्त'० (२।४।५४) इति ङी, वतण्डी चासौ युवतिश्च, पुनः स्थानिवद्भावे वातण्ड्यशब्दः, अत्र वतण्डीशब्दस्य 'पुंवत्कर्मधारये' (३।२।५७) इति पुंवद्भावे कर्त्तव्ये अर्थत आसन्नो वातण्ड्यभावो भवति, (यतः) वातण्ड्य एव शब्दो भवति वतण्डी शब्दः । [3]अमुष्मै, [4]अमूभ्याम्; अत्र 'आसन्नः' इति सूत्रबलात् 'मादुवर्णोऽनु' (२।१।४७) इति सूत्रेण एकमात्रिकस्य अकारस्य स्थाने एकमात्रिक उकार एव भवति, न तु ऊकारः,'अमूभ्याम्', अत्र द्विमात्रस्य आकारस्य स्थाने ऊ इति द्विमात्रो भवति इति आसन्न इत्यर्थ उच्यते ॥१२०॥

## सम्बन्धिनां सम्बन्धे ॥७।४।१२१॥

म० वृ०–सम्बन्धिशब्दानां यत्कार्यमुक्तं तत्सम्बन्धे एव सति भवति, नान्यथा । [1]श्वशुर्यः, [संज्ञाशब्दात्तु इञेव–] [2]श्वाशुरिः, मातृष्वसा । धान्यमातुस्तु न भवति, मातृस्वसा ॥१२१॥

---

अव०–[1]श्वसुर, श्वशुरस्यापत्यं=श्वशुर्यः, 'श्वशुराद्यः' (६।१।९१) इति यः, लोके हि श्वशुरः सम्बन्धी वर्त्तते इति यः सिद्धः । यत्र च [2]श्वशुर इति कश्चित् नरः तत्र नाम्नि इञेव, यथा श्वाशुरिः ॥

## समर्थः पदविधिः ॥७।४।१२२॥

म० वृ०–समर्थपदाश्रयत्वात्समर्थः । [सङ्गतोऽर्थो यस्य स समर्थः, अथवा सङ्गतोऽर्थेन, सङ्गतश्चासावर्थश्च=समर्थः] पदसम्बन्धी विधिः(पदविधिः), तेन यः [1]पदाद्विधिः [2]यश्च [3]पदे यश्च पदस्य [4]यश्च पदयोः [5]पदानां वा [ विधिः ] स सर्वःपदविधिरेव । सर्वपदविधिः समर्थो ज्ञातव्यः[6] । तच्च सामर्थ्यं [7]व्यपेक्षा [8]एकार्थीभावश्च । अत्र व्यपेक्षायां [9]सम्बद्धार्थः [10]सम्प्रेक्षितार्थो वा पदविधिः साधुर्भवति । एकार्थीभावे तु विग्रहवाक्यार्थाभिधाने यः शक्तः सङ्गतार्थः संसृष्टार्थो वा पदविधिः (सः) साधुर्भवति । पदविधिश्च समासनामधातुकृत्तद्धितोपपदविभक्तियुष्मदस्मदादेशप्लुतरूपो भवति । तत्र समासः–द्वितीया 'श्रितादिभिः' (३।१।६२) इत्यादि, नीलोत्पलम् । तदेतत् सामर्थ्यमविशेषोक्तमपि लोकव्यपेक्षया [लोकव्यवहारेण] वृत्त्यवृत्त्योः [समासेऽसमासे] स्वभावेन विभक्तमवतिष्ठते । यत्र त्वसामर्थ्यं न तत्र समासः–पश्य धर्मम्, श्रितो मैत्रो गुरुकुलमित्यादि । अथ नामधातु– पुत्रीयति । समर्थ इति किम् ? पश्यति पुत्रमिच्छति सुखम् । कृत्,- कुम्भकारः । समर्थ इति किम् ? पश्य कुम्भम्,

करोति कटम् । तद्धित,-औपगवः । उपपदविभक्ति,-नमो देवेभ्यः,उपाध्यायश्चेदागच्छेदाशंसे युक्तोऽधीयीय । समर्थ इति किम् ? इदं नमः, देवाः शृणुत । युष्मदस्मदादेशः,-धर्मस्ते स्वम् । समर्थ इति किम् ? ओदनं पचति, तव भविष्यति [मम भविष्यति] । प्लुतः,-अङ्ग कूज३ इदानीं ज्ञास्यसि जाल्म ! ['त्यादेः साकाङ्क्षस्याङ्गेन', (७।४।९१) इति प्लुतः] । पदग्रहणाद्वर्णविधिरसामर्थ्येऽपि स्यात् ,-तिष्ठतु दध्यशान त्वं शाकेन, तिष्ठतु कुमारीच्छत्रं हर मैत्र!; (अत्र) यत्वं द्वित्वं च भवति । समासनामधातुकृत्तद्धितेषु वाक्ये व्यपेक्षा वृत्तावेकार्थीभावः । शेषेषु पुनर्व्यपेक्षैव [पदयोः परस्परापेक्षैव] सामर्थ्यं भवति । यदि समर्थः पदविधिः कथमसामर्थ्ये असूर्यंपश्या राजदाराः, न पुनर्गीयन्ते अपुनर्गेयाः श्लोकाः , श्राद्धं न भुङ्क्ते अश्राद्धभोजी, एवमलवणभोजी,सर्वश्चर्मणा कृतः सार्वचर्मीणो रथः, कृतः पूर्वं कटोऽनेनेति कृतपूर्वी कटमित्याद्या वृत्तयो भवन्ति ? असामर्थ्येऽपि बहुलाधिकाराद् 'नञ्'(३।१।५१) इतिसूत्रेणसमासः। अत्र न्यायाः पठनीयाः ॥१२२॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां श्रीसिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ सप्तमाध्यायस्य चतुर्थः पादः समाप्तः ।

इति सप्तमोऽध्यायः । ग्रन्थाग्र-३३६। तद्धितव्या करणे अध्यायद्वयम् २ अष्टौ ८ पादाः । अष्टपादसर्वाङ्कमेलने एवं ग्रन्थाग्रम्- २६७४। इति श्रीहैमव्याकरणलघुवृत्तिरियम् । संवत् १४·······

अव०-[1]"यः पदाद्विधिः इति को विषयः ? यथा 'पदाद्युगविभक्त्या'० (२।१।२१) इत्यादिभिर्ये वस्नसाद्यादेशाः पदात्परतो विधीयन्ते स पदाद्विधिरुच्यते । [2]'यश्च पदे' इति, यथा 'शकार्थवषड्०' ( २।२।६८ ) इत्यादिनाऽलं मल्लो मल्लाय इत्यत्र या चतुर्थी विहिता सा पदे विधिरित्युच्यते । [3]'यश्च पदस्य' इति, यथा अङ्ग कूज३ इत्यादौ 'त्यादेः साकाङ्क्षस्याङ्गेन' (७।४।९१) इत्यनेन प्लुतः क्रियते स पदस्य विधिरुच्यते । [4]यश्च पदयोः [5]पदानां वा विधिरित्यक्षरयोजना ज्ञातव्या । यथा नीलोत्पलम् , अत्र द्वयोः पदयोः 'नाम नाम्ना'०(३।१।१८) इति समासः । मत्तबहुमातङ्गं वनम् , अत्र बहुपदानाम् 'एकार्थं चानेकं च' (३।१।२२) इत्यनेन बहुव्रीहिः । सोऽयं पदयोर्विधिः पदानां विधिरित्युच्यते । [6]समर्थानां पदानां विधिर्वेदितव्यः इत्यर्थः । अपेक्षैकार्थीभावयोर्विशेषो लिख्यते ,- [7]प्रयुज्यमानानां शब्दानामन्योन्याऽविनाभावलक्षणा परस्पराकाङ्क्षा अपेक्षा उच्यते । [8]एकार्थीभावः=ऐकार्थ्यम् , अनेकानामर्थानामेकार्थानां भवनमेकार्थीभाव उच्यते, वाक्ये स्वस्वाभिधेयवाचिभिरपि शब्दैः समुदितैः सह विशिष्टस्यैकस्यार्थस्य प्रतिपादनमित्यर्थः । [9]'सम्बद्धार्थः', कोऽर्थः ? सम्बद्धोऽर्थो यस्य स सम्बद्धार्थः, यत्र शीघ्रमेव पदानामन्वयोऽर्थः प्रतीयते, यथा- राज्ञः पुरुषः इत्यादौ, स सम्बद्धार्थः पदविधिर्ज्ञेयः । तथा [10]सम्प्रेक्षितार्थः कष्टकल्पनया यत्र अर्थः प्रतीयते , यथा इदं क्लिष्टकाव्यं-

राजोत्पले हरिभुजामिह केशवस्य,
यस्योरसीन्दुरदनं च जटाकलापे;
शंखाम्बरोऽपि पवनादरिनाथसूनुः,
कान्ता स वोऽगतनया विपुलं ददातु ॥१॥

अस्यार्थोऽयम्- यस्य रुद्रस्य उरसि-हृदये हरिभुजां=सर्पाणाम वाताशिनां राजा शेषोऽस्ति, यस्य रुद्रस्य जटाकलापे इन्दुः यस्य च रुद्रस्य अदनं भक्षणं भोजनं वर्त्तते क ? के-मस्तके कपाले,कीदृशे ? उत्पले,पलमांसरहिते, कस्य ? शवस्य मृतकस्य,यस्य च कान्ता अगतनया गौरी, पवनात् सर्पस्तस्यारिः मयूरस्तस्य नाथः कार्त्तिको यः स सूनुः पुत्रो यस्य रुद्रस्य, एवंविधो रुद्रो खाम्बरोऽपि-दिगम्बरोऽपि शं सुखं विपुलं ददातु इति क्लिष्टकाव्ये इत्थं पदविधिः सम्प्रेक्षितार्थ इत्युच्यते ॥१२२॥

अत्र सूत्रे अवचूरिश्लोक- ६२७ अक्षर ३ ऊणा

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते मध्यमवृत्त्यवचूरिसंवलिते सिद्धहेमशब्दानुशासने सप्तमाध्यायस्य चतुर्थः पादः समाप्तः ॥

卐 इति सप्तमोऽध्यायः समाप्तः 卐

# ❀ सूत्राणामकाराद्यनुक्रमणिका ❀

सूत्रम्   सूत्राङ्कः।


अइउवर्ण–देः। १ । २ । ४१ ॥
अं अः–सर्गौ। १ । १ । ९ ॥
अं अः–शिट्। १ । १ । १६ ।
अंशं हारिणि। ७ । १ । १८२ ॥
अंशाद्दतोः। ७ । ४ । १४ ॥
अः सपत्न्याः। ७ । १ । ११९ ॥
अः सृजिदृशो० । ४ । ४ । १११ ॥
अः स्थाम्नः। ६ । १ । २२ ॥
अकखाद्य–वा । २ । ३ । ८० ॥
अकट्घिनोश्च रञ्जेः ।४।२।५०॥
अकद्रू–ये । ७ । ४ । ६९ ॥
अकमेरुकस्य । २ । २ । ९३ ॥
अकल्पात् सूत्रात् ।६।२।१२०॥
अकालेऽव्ययीभावे ।३।२।१४६॥
अकेन क्रीडाजीवे । ३ । १ ।८१॥
अक्लीबेऽध्वर्युक्रतोः ।३।१।१३९॥
अक्ष्णोऽप्राण्यङ्गे । ७ । ३ । ८५॥
अगारान्तादिकः। ६ । ४ । ७५॥
अगिलाद्गिलगिल० ।३।२।११५ ॥
अग्निचित्या। ५ । १ । ३७ ॥
अग्नेश्चेः। ५ । १ । १६४ ॥
अग्रहानुपदेशे० । ३ । १ । ५ ॥
अघञ्क्यबल–वौ । ४ । ४ । २ ॥
अघोषे प्र–टः। १ । ३ । ५० ॥
अघोषे शिटः। ४ । १ । ४५ ॥
अङ्प्रतिस्त–म्भः। २ । ३ । ४१॥
अङे हिहनो–र्वात् ।४।१।३४॥
अङ्गाङ्गिरसने णिङ् ।३।४।३८॥
अङ्स्थाच्छत्रादेरञ् ।६।४।६०॥
अच् । ५ । १ । ४९ ॥
अचः। १ । ४ । ६९ ॥
अचि । ३ । ४ । १५ ॥
अचित्तादुदेशकालात् ।६।३।२०६॥
अचित्ते टक् । ५ । १ । ८३ ॥

अच्च् प्रा–श्च ।२।१।१०४॥
अजातेः पञ्चम्याः ।५।१।१७०॥
अजातेः शीले ।५।१।१५४॥
अजातेर्नृ–वा । ७ । ३ । ३५ ॥
अजादिभ्यो धेनोः ।६।१।३४॥
अजादेः । २ । ४ । १६ ॥
अज्ञाने ज्ञः षष्ठी ।२।२।८०॥
अञ्चः। २ । ४ । ३ ॥
अञ्चोऽनर्चायाम् ।४।२।४६॥
अञ्जनादीनां गिरौ । ३ । २ ।७७॥
अञ्वर्ग–तः। १ । ३ । ३३ ॥
अञ्वर्गात्–न् । १ । २ । ४० ।
अट्यर्तिसू–र्णोः ।३।४।१०॥
अड्धातोरा–क्ता ।४।४।२९॥
अणञेयेक–ताम् ।२।४।२०॥
अणि । ७ । ४ । ५२ ॥
अणिकर्म णिक्–तौ ।३।३।८८॥
अणिगि प्राणिक० ।३।३।१०७॥
अतः। ४ । ३ । ८२ ॥
अतः कृकमि–स्य ।२।३।५॥
अतः प्रत्ययाल्लुक् ।४।२।८५॥
अतः शित्युत् । ४ ।२ ।८९ ॥
अतः स्यमोऽम् । १ । ४ । ५७ ॥
अत आः–ये । १ । ४ । १ ॥
अत इञ् । ६ । १ । ३१ ॥
अतमबादे–यर् । ७ । ३ । ११ ॥
अतिरतिक्रमे च ।३।१।४५॥
अतोऽति रोरुः। १ । ३ । २० ॥
अतोऽनेकस्वरात् ।७।२।६॥
अतो म आने ।४।४। ११४॥
अतोरिथट् । ७ । १ । १६१ ॥
अत्रोऽह्नस्य । २ । ३ । ७३ ॥
अत्र च । ७ । १ । ४९ ॥
अदश्चाद् । ४ । ४ । ९० ॥

अदसोऽकञायनणोः ।३।२।३३॥
अदसो दः सेस्तु डौ ।२।१।४३॥
अदिक्स्त्रियां० ।७।१।१०७॥
अदीर्घात्–ने । १ । ३ । ३२ ॥
अदुरुपसर्गा–नेः। २ । ३ । ७७ ॥
अदूरे एनः। ७ । २ । १२२ ॥
अदृश्याधिके । ३ । २ । १४५ ॥
अदेतः–क् । १ । ४ । ४४ ॥
अदेवासुरादिभ्यो० ।६।३।१६४॥
अदेशकालादध्या० ।६।४।७६॥
अदोऽनन्नात् ।५।१।१५०॥
अदो मुमी । १ । २ । ३५ ॥
अदोरायनिः० ।६।१।११३॥
अदोर्नदीमा–म्नः ।६।१।६७॥
अद्यतनी । ५ । २ । ४ ॥
अद्यतनी–महि ।३।३।११॥
अद्यतन्यां वा–ने ।४।४।२२॥
अद्यर्थाच्चाधारे । ५ । १ । १२॥
अद् व्यञ्जने । २ । १ । ३५ ॥
अद्व्यञ्जनात् स–लम् ।३।२।१८॥
अधण्–सः। १ । १ । ३२ ॥
अधरापराच्चात् ।७।२।११८॥
अधर्मक्षत्रत्रि–याः ।६।२।१२१॥
अधश्चतुर्थात् तथोर्धः ।२।१।७९॥
अधातुवि–म । १ । १ । २७ ॥
अधातूदृदितः। २ । ४ । २ ॥
अधिकं तत्सं–ङः ।७।१।१५४॥
अधिकेन भूयसस्ते ।२।२।१११॥
अधीष्टौ । ५ । ४ । ३२ ॥
अधेः प्रसहने । ३ । ३ । ७७ ॥
अधेः शीङ्स्थास० । २ । २ । २०॥
अधेरारूढे । ७ । १ । १८७ ॥
अध्यात्मादिभ्य इकण् ।६।३।७८॥
अध्वानं येनौ ।७।१।१०३॥

अनः । ७ । ३ । ८८ ॥
अनक् । २ । १ । ३६ ॥
अनजिरादि–तौ । ३ । २ । ७८॥
अनञः क्त्वो यप् । ३ । २ ।१५४॥
अनञो मूलात् । २ । ४ । ५८ ॥
अनट् । ५ । ३ । १२४ ॥
अनडुहः सौ । १ । ४ । ७२ ॥
अनतोऽन्तोऽदात्मने । ४ । २ ।११४॥
अनतो लुप् । १ । ४ । ५९ ॥
अनतो लुप् । ३ । २ । ६ ॥
अनत्यन्ते । ७ । ३ । १४ ॥
अनद्यतने श्वस्तनी । ५ । ३ । ५ ॥
अनद्यतने र्हिः । ७ । २ । १०१ ॥
अनद्यतने ह्यस्तनी । ५ । २ । ७॥
अननोः सनः । ३ । ३ । ७० ॥
अनन्तः प-यः । १ । १ । ३८ ॥
अनपत्ये । ७ । ४ । ५५ ॥
अनरे वा । ६ । ३ । ६१ ॥
अनवर्णा नामी । १ । १ । ६ ॥
अनाङ्माङो–छः । १ । ३ । २८॥
अनाच्छादजा–वा । २ । ४ । ४७॥
अनातो नश्चान्त-स्थ ।४।१।६९॥
अनादेशादे–तः । ४ । १ । २४ ॥
अनाम्न्यद्विः प्लुप् । ६ । ४ ।१४१॥
अनाम्स्वरे नोऽन्तः ।१।४। ६४ ॥
अनार्षे वृद्धे–ष्यः ॥२ । ४ । ७८ ॥
अनिदम्यणपवादे० । ६ । १ ।१५॥
अनियो–वे । १ । २ । १६ ॥
अनीनाद्–तः । ७ । ४ । ६६ ॥
अनुकम्पा–त्योः । ७ । ३ । ३४ ॥
अनुग्वलम् । ७ । १ ।१०२ ॥
अनुनासिके च्–ट् ।४।१।।१०८॥
अनुपदं बद्धा । ७ । १ । ९६ ॥
अनुपद्यन्वेष्टा । ७ । १ । १७० ॥
अनुपसर्गाः क्षीबो० ।४।२।८०॥
अनुब्राह्मणादिन् । ६ । २ । १२३॥
अनुशतिकादीनाम् । ७ । ४ । २७॥
अनेकवर्णः सर्वस्य ।७।४।१०७॥
अनोः कमितरि । ७ । १ । १८८॥
अनोः कर्मण्यसति ।३। ३।८१॥
अनोऽटये ये । ७ । ४ । ५१ ॥
अनोर्जनेर्डः । ५ । १ । १६८ ॥
अनोर्देशे उप् । ३ । २ । ११०॥
अनो वा । २ । ४ । ११ ॥
अनोऽस्य । २ । १ । १०८ ॥
अन्तःपूर्वादिकण् । ६।३।१३७॥
अन्तर्द्धिः । ५ । ३ । ८९ ॥
अन्तर्बहि–म्नः । ७ । ३ । १३२॥
अन्तो नो लुक् । ४ । २ । ९४ ॥
अन्यत्यदादेराः । ३ । २ । १५२॥
अन्यथैवंकथ–कात् । ५ । ४ । ५० ॥
अन्यस्य । ४ । १ । ८ ॥
अन्यो घोषवान् । १ । १ । १४ ॥
अन्वाङ्परेः । ३ । ३ । ३४ ॥
अन् स्वरे । ३ । २ । १२९ ॥
अपः । १ । ४ । ८८ ॥
अपच्चितः । ४ । ४ । ७७ ॥
अपञ्चमा–ट् १ । १ । ११ ॥
अपण्ये जीवने । ७ । १ । ११० ॥
अपस्किरः । ३ । ३ । ३० ॥
अपाच्चतुष्पा–र्थे । ४ । ४ । ९५ ॥
अपाच्चायश्चिः क्तौ । ४ । २ । ६६
अपायेऽवधिरपादा० । २ । २ । २९॥
अपील्वादेर्वहे । ३ । २ । ८९ ॥
अपोऽद् भे२। १ । ४ ॥
अपोनपादपा–तः । ६ । २ । १०५॥
अपो यञ् वा । ६ । २ । ५६ ॥
अपो ययोनिमतिचरे ।३।२।२८॥
अप्रत्यादावसाधुना ।२।२।१०१॥
अप्रयोगीत् । १ । १ । ३७ ॥
अप्राणिनि । ७ । ३ । ११२ ॥
अप्राणिपश्वादेः । ३ । १ । १३६ ॥
अब्राह्मणात् । ६ । १ । १४१ ॥
अभक्ष्याच्छादने वा० । ६।२।४६॥
अभिनिष्कामति० । ६ । ३ ।२०२॥
अभिनिष्टानः २ । ३ । २४ ॥
अभिव्याप्तौ–ञिन् । ५ । ३ । ९०॥
अभेरीश्च वा । ७ । १ । १८९ ॥
अभ्यमित्रमीयश्च । ७ । १ । १०४॥
अभ्यम्भ्यसः । २ । १ । १८ ॥
अभ्रादिभ्यः । ७ । २ । ४६ ॥
अभ्वादे–सौ । १ । ४ । ९० ॥
अमद्रस्य दिशः । ७ । ४ । १६ ॥
अमव्ययीभाव–स्याः ।३। २ ।२॥
अमा त्वामा । २ । १ । २४ ॥
अमाव्ययात् क्यन् च ।३।४।२३॥
अमूर्धमस्तका–मे । ३ । २ । २२॥
अमोऽकम्यमिचमः । ४ । २ ।२६॥
अमोऽधिकृत्य ग्रन्थे ।६।३।१९८॥
अमोऽन्तावोधसः ।६।३।७४॥
अमौ मः । २ । १ । १६ ॥
अयज्ञे त्रः । ५ । ३ । ६८ ॥
अयदि श्रद्धा–नत्रा ।५।४।२३॥
अयदि स्मृ–न्ती । ५ । २ । ९ ॥
अयमियं पुं- सौ ।२।१।३८ ॥
अयि रः । ४ । १ । ६ ॥
अरण्यात् पथि–रे । ६ । ३।५१॥
अरीहणादेरकण् ।६।२।८३॥
अरुर्मनश्च–क्यौ ।७।२।१२७॥
अरोः सुपि रः । १ । ३ । ५७ ॥
अर्डौ च । १ । ४ । ३९ ॥
अर्तिरीव्लीह्री–पुः ।४।२।२१॥
अर्धपदपदोत्तर–पठात् ।६ ।४।३७॥
अर्थार्थान्ता त् । ७ । २ । ८ ॥
अर्धपूर्वपदः पूरणः ।१।१।४२॥
अर्धात् पर–देः ।७।४।२०॥
अर्धात् पल–त् ।६।४।१३४॥
अर्धाद् यः । ६ । ३ । ६९ ॥
अर्हतस्तो न्त् च ।७।१।६१॥
अर्हम् । १ । १ । १ ॥
अर्हे तृच् । ५ । ४ । ३७॥

अर्होऽच् । ५ । १ । ९१ ॥
अलाब्वाश्च–सि । ७ । १ ।८४॥
अलुपि वा । २ । ३ । १९ ॥
अल्पयूनोः कन् वा । ७।४।३३॥
अल्पे । ३ । २ । १३६॥
अवः स्वपः । २ । ३ । ५७॥
अवक्रये । ६ । ४ । ५३ ॥
अवयवात् तयट् । ७ । १ । १५१॥
अवर्णभो–धिः । १ । ३ । २२ ॥
अवर्णस्या–साम् । १ । ४ । १५॥
अवर्णस्ये–रल् । १ । २ । ६ ॥
अवर्णादश्नो-ङ्योः ।२।१।११५॥
अवर्णेवर्णस्य । ७ । ४ । ६८ ॥
अवर्मणो–न्ये । ७ ।४। ५९ ॥
अवह्नसासंस्रोः ।५।१।६३॥
अवाक्षाश्रयो–रे ।२।३।४२॥
अवात् । ३ । ३ । ६७ ॥
अवात् । ५ । ३ । ६२ ॥
अवात् कुटा–ते ।७।१।१२६॥
अवान् तस्तम्भ्याम् ।५।३।१३३॥
अविति वा । ४ । १ । ७५ ॥
अवित्परोक्षा–रेः ।४।१।२३॥
अविदूरेऽभेः । ४ । ४ । ६४ ॥
अविवक्षिते । ५ । २ । १४ ॥
अविशेषणे–द्वः ।२।२।१२२॥
अवृद्धादोर्नवा ।६।१।११०॥
अवृद्धेर्गु ल्लति गर्ह्ये ।६।४।३४॥
अवेः संघा–टम् ।७।१।१३२॥
अवेदु ग्धे–सम् ।६।२।६ ॥
अवौ दाधौ दा । ३ । ३ । ५ ॥
अव्यक्तानु–श्च ।७।२।१४५ ॥
अव्यजात् थ्यप् । ७ । १ । ३८॥
अव्ययम् । ३ । १ । २१ ॥
अव्ययं प्रवृद्धादिभिः ।३।१।४८॥
अव्ययस्य । ३ । २ । ७ ॥
अव्ययस्य कोऽद् च ।७।३।३१॥
अव्याप्यस्य मुचे० ।४।१।१९॥
अशवि ते वा । ३ । ४ । ४ ॥
अशित्यस्सन्–टि ।४।३।७७॥
अशिरसोऽशीर्षश्च ।७।२।७॥
अशिशोः । २ । ४ । ८ ॥
अश्च वाऽमावा० ।६।३।१०४॥
अश्चैकादेः । ७ । १ । ५ ॥
अश्वत्थादेरिकण् । ६ । २ ९७ ॥
अश्रद्धामर्षे–पि ।५।४।१५॥
अश्ववडवपू–राः ।३।१।१३१॥
अश्वादेः । ६ । १ । ४९ ॥
अषडक्षा–नः ।७।१।१०६॥
अषष्ठीतृती–र्थे । ३ । २ । ११९ ॥
अष्ट और्ज–सोः ।१।४।५३।
असंभस्त्राजिनैक० ।२।४।५७॥
असंयोगादोः । ४ । २ । ८६॥
असकृत् संभ्रमे ।७।४।७२॥
असत्काण्ड–त् ।२।४।५६॥
असत्त्वाराद० ।२।२।१२०॥
असत्त्वे ङसेः ।३।२।१०॥
असदिवा–म् ।२।१।२५॥
असमानलोपे–ङे ।४।१।६३॥
असरूपोप–क्तेः ।५।१।१६॥
असहनञ्वि–भ्यः ।२।४।३८॥
असुको वाऽकि । २ । १ । ४४ ॥
असूर्योग्राद् दृशः ।५।१।१२६॥
असोङ–सिवू–टाम् ।२।३।४८॥
अस् च लौल्ये ।४।३।११५॥
अस्तपोमाया–विन् ।७।२।४७॥
अस्तिब्रुवोर्भूवचाव० ।४।४।१॥
अस्तेः सि–ति ।४।३।७३॥
अस्त्रीशूद्रे–वा ।७।४।१०१॥
अस्थूलाच्च नसः ।७।३।१६१॥
अस्पष्टाव–वा । १ । ३ । २५ ॥
अस्मिन् । ७ । ३ । २ ॥
अस्य ङ्यां लुक् ।२।४।८६॥
अस्यादेराः परोक्षायाम् ।४।१।६८॥
अस्याऽयत्त-नाम् । २।४ । १११ ॥
अस्वयंभुवोऽव् ।७।४।७०॥
अस्वस्थगुणैः । ३ । १ । ८७ ॥
अह्नपञ्चमस्य–ति ।४।१।१०७॥
अहरादिभ्योऽञ् ।६।२।८७॥
अहीयरुहो–ने । ७ । २ । ८८ ॥
अह्नः । २ । १।७४ ॥
अह्नः । ७ । ३ । ११६ ॥
अह्ना ग–नञ् । ७ । १ । ८५ ॥
आ अम्शसोऽता । १ । ४ । ७५॥
आः खनिसनिजनः । ४ । २।६०॥
आकालिक–न्ते ।६।४।१२८॥
आख्यातर्युपयोगे ।२।२।७३॥
आगुणावन्यादेः ।४।१।४८॥
आग्रहायण्यश्व–कण् ।६।२।९९॥
आङः । ४ । ४ । १२०॥
आङः क्रीडमुषः । ५ । २ । ५१॥
आङः शीले । ५ । १ । ९६ ॥
आङल्पे । ३ । १ । ४६ ॥
आङावधौ । २ । २ । ७०॥
आङो ज्योतिरुद्गमे ।३।३।५२॥
आङोऽन्धूधसोः ।४।१।९३॥
आङो यमहनः–च ।३।३।८६॥
आङो यि । ४ । ४ । १०४ ॥
आङो युद्धे । ५ । ३ । ४३ ॥
आङोरुप्लोः । ५ । ३ । ४९ ॥
आ च हौ । ४ । २ । १०१ ॥
आत् । २ । ४ । १८ ॥
आत ऐः कृञ्चौ ।४।३।५३॥
आतामाते आ–दिः ।४।२।१२१॥
आ तुमोऽत्या–त् ।५।१।१॥
आतो डोऽह्वावामः ।५।१।७६॥
आतो नेन्द्र–स्य ।७।४।२९॥
आतो णव औः ।४।२।१२०॥
आत्मनः पूरणे ।३।२।१४॥
आत्रेयाद् भारद्वाजे ।६।१।५२॥
आत्संध्यक्षरस्य । ४ । २ । १ ॥
आथर्वणिका–च ।६।३।१६७ ॥

आदितः । ४ । ४ । ७१ ॥
आदेश्छन्दसः प्र० ।६।२।११२॥
आद्यद्वितीय-षाः ।१।१।१३॥
आद्यात् । ६ । १ । २९ ॥
आद्यादिभ्यः । ७ । २ । ८४ ॥
आद्योऽश एकस्वरः ।४।१।२॥
आ द्वन्द्वे । २ । २ । ३९ ॥
आ द्वेरः । २ । १ । ४१ ॥
आधाराच्चोप-रे ।३।४।२४॥
आधारात् । ५ । १ । १३७ ॥
आधारात् । ५ । ४ । ६८ ॥
आधिक्यानुपूर्व्ये ।७।४।७५॥
आनायो जालम् ।५।३।१३६॥
आनुलोम्येऽन्वचा ।५।४।८८॥
आपत्यस्य क्यच्च्व्योः ।२।४।९१॥
आपो ङितां-याम् ।१।४।१७॥
आप्रपदम् । ७ । १ । ९५ ॥
आबाधे । ७ । ४ । ८५ ॥
आभिजनात् ।६।३।२१४॥
आमः आकम् ।२।१।२०॥
आमः कृगः । ३ । ३ । ७५॥
आमन्ताल्वाय्येत्नावय् ।४।३।८५॥
आमन्त्र्ये । २ । २ । ३२ ॥
आमयाद्दीर्घश्च । ७ । २ । ४८ ॥
आमो नाम् वा । १ । ४ । ३१ ॥
आयस्थानात् ।६।३।१५३॥
आ यात् । ७ । २ । २ ॥
आयुधादिभ्यो-देः । ५ । १ ।९४॥
आयुधादीयश्च । ६ । ४ । १८॥
आरम्भे । ५ । १ । १० ॥
आरादर्थैः । २ । २ । ७८॥
आ रायो व्यञ्जने ।२।१।५॥
आर्यक्षत्रियाद्वा । २ । ४ । ६६॥
आशिषि तु-तङ् ।४।२।११९॥
आशिषि नाथः ।३।३।३६॥
आशिषि हनः ।५।१।८०॥
आशिषीणः । ४ । ३ ।१०७ ॥
आशिष्यकन् ।५।१।७० ॥
आशिष्याशीःपञ्च० ।५।४।३८॥
आशीः क्यात्-हि ।३।३।१३॥
आशीराशा-णे ।३।२।१२०॥
आश्वयुज्या अकञ् ।६।३।११९॥
आसन्नः । ७ । ४ । १२०॥
आसन्नादूरा-र्थे । ३ । १ । २०॥
आसीनः । ४ । ४ । ११५ ॥
आसुयु-मः । ५ । १ । २० ॥
आस्तेयम् ।६।३।१३१॥
आस्यटिव्रज्यजः क्यप् ।५।३।९७॥
आहावो निपानम् ।५।३।४४॥
आहिताग्न्यादिषु ।३।१।१५३॥
आही-दूरे । ७ । २ । १२० ॥
इकण् । ६ । ४ । १ ॥
इकण्यथर्वणः । ७ । ४ । ४९ ॥
इकिश्तिव् स्वरूपार्थे ।५।३।१३८॥
इको वा । ४ । ३ । १६ ॥
इङितः कर्त्तरि । ३ । ३ । २२ ॥
इङ्कितो व्यञ्जना-त् । ५ । २ । ४४॥
इङोऽपादाने-द्वा । ५ । ३ । १९ ॥
इञापुंसो-रे । २ । ४ । १०७ ॥
इच्छार्थे कर्मणः सप्तमी ।५।४।८९॥
इच्छार्थे सप्तमीपञ्चमी० ।५।४।२७॥
इच्यस्वरे दी-श्च । ३ । २ । ७२ ॥
इच् युद्धे । ७ । ३ । ७४ ॥
इञ इतः । २ । ४ । ७१ ॥
इञः । ७ । ४ । ११ ॥
इट ईति । ४ । ३ । ७१ ॥
इट् सिजाशिषो-ने । ४ । ४ । ३६॥
इडेत्पुसि-लुक् । ४ । ३ । ९४॥
इणः । २ । १ । ५१ ॥
इणिकोर्गा । ४ । ४ । २३ ॥
इणोऽभ्रे । ५ । ३ । ७५ ॥
इतावतो लुक् । ७ । २ । १४६ ॥
इतोऽक्त्यर्थात् । २ । ४ । ३२ ॥
इतोऽतःकुतः । ७ । २ । ९० ॥
इतोऽनिञः । ६ । १ । ७२ ॥
इदंकिमीत्कीः । ३ । २ । १५३ ॥
इदंकिमो-स्य । ७ । १ । १४८ ॥
इदमः । २ । १ । ३४ ॥
इदमदसोऽक्येव । १ । ४ । ३ ॥
इदुतोऽस्त्रे-त् । १ । ४ । २१ ॥
इनः कच् । ७ । ३ । १७० ॥
इन्ङीस्वरे लुक् । १ । ४ । ७९ ॥
इन्द्रियम् । ७ । १ । १७४ ॥
इन्द्रे । १ । २ । ३० ॥
इन्ध्यसंयोगा-द्वत् । ४ । ३ । २१॥
इन्हन्-स्योः । १ । ४ । ८७ ॥
इरंमदः । ५ । १ । १२७ ॥
इर्दरिद्रः । ४ । २ । ९८ ॥
इवृद्धिमत्यविष्णौ । ३ । २ । ४३॥
इलश्च देशे । ७ । २ । ३६ ॥
इवर्णादे-लम् । १ । २ । २१ ॥
इवृध-सनः । ४ । ४ । ४७ ॥
इश्च स्थादः । ४ । ३ । ४१ ।
इषोऽनिच्छायाम् । ५ । ३ । ११२॥
इष्टादेः । ७ । १ । १६८ ॥
इसासः शासोऽङ्व्य० ।४।४।११८॥
इसुसोर्बहुलम् । ७ । २ । १२८ ॥
ईः षोमवरुणेऽग्नेः । ३ । २ ।४२॥
ईङ्गितः । ३ । ३ । ९५ ॥
ईदौ वा । २ । १ । १०९ ॥
ई च गणः । ४ । १ । ६७ ॥
ईतोऽकञ् । ६ । ३ । ४१ ॥
ईदूदे-नम् । १ । २ । ३४ ॥
ईनञ् च । ६ । ४ । ११४ ॥
ईनयौ चाशब्दे । ६ । ३ । १२९ ॥
ईनेऽध्वात्मनोः । ७ । ४ । ४८ ॥
ईनोऽह्नः क्रतौ । ६ । २ । २१ ॥
ईयः । ७ । १ । २८ ॥
ईयः स्वसुश्च । ६ । १ । ८९ ॥
ईयकारके । ३ । २ । १२१ ॥
ईयसोः । ७ । ३ । १७७॥

ईर्व्यञ्जनेऽयपि । ४ । ३ । ९७ ॥
ईशीडः–मोः । ४ । ४ । ८७ ॥
ईश्च्वाववर्ण–स्य ।४ । ३ । १११॥
ईषद्गुणवचनैः । ३ । १ । ६४ ॥
ई३वा । १ । २ । ३३ ॥
उः पदान्तेऽनूत् । २ । १ ।११८॥
उक्ष्णो लुक् । ७ । ४ । ५६ ॥
उणादयः । ५ । २ । ९३ ॥
उत औविंति व्य० ।४। ३ । ५९ ॥
उति शवर्हा–भे । ४ । ३ । २६ ।
उतोऽनडुच्चतुरो वः ।१। ४ । ८१ ॥
उतोऽप्राणिन–ऊङ् ।२। ४ । ७३॥
उत्करादेरीयः । ६ । २ । ९१ ॥
उत्कृष्टेऽनूपेन । २ । २ । ३९ ॥
उत्तरादाहञ् । ६ । ३ । ५ ॥
उत्थापनादेरीयः ।६। ४ । १२१ ॥
उत्पातेन ज्ञाप्ये । २ । २ । ५९ ॥
उत्सादेरञ् । ६ । १ । १९ ॥
उत्स्वराद्–त्रे । ३ । ३ । २६ ॥
उदः पचि–रेः । ५ । २ । २९ ॥
उदः श्रेः । ५ । ३ । ५३ ॥
उदः स्थास्तम्भः सः । १ । ३ ।४४॥
उदकस्योदः पेषंधि० ।३।२।१०४॥
उदग्ग्रामाद्य–म्नः । ६ । ३ । २५ ॥
उदङ्कोऽतोये । ५ । ३ । १३५ ॥
उदच उदीच् । २ । १ । १०३ ॥
उदन्वानब्धौ च । २ । १ । ९७॥
उदरे त्विकणाद्यूने । ७ । १।१८१॥
उदश्चरः साप्यात् । ३ । ३ । ३१ ॥
उदितः स्वरान्नोऽन्तः ।४।४।९८॥
उदितगुरोर्भा–द्दे । ६ । २ । ५ ॥
उदुत्सोरुन्मनसि । ७ । १ ।१९२॥
उदोऽनूर्ध्वे हे । ३ । ३ । ६२ ॥
उद्यमोपरमौ । ४ । ३ । ५७ ॥
उपज्ञाते । ६ । ३ । १९१ ॥
उपत्यकाधित्यके । ७ । १ ।१३१॥
उपपीडरुध–म्या । ५ । ४ । ७५ ॥
उपमानं सामान्यैः । ३। १ ।१०१॥
उपमानसहित–रोः । २ । ४ ।७५॥
उपमेयं व्याघ्रा–द्यौ ।३।१।१०२॥
उपसर्गस्यानि–ति । १ । २ ।१९॥
उपसर्गस्यायौ । २ । ३ । १०० ॥
उपसर्गात् । ७ । ३ । १६२ ॥
उपसर्गात् खल्घ० ।४।४।१०७॥
उपसर्गात् सुग्–त्वे । २ । ३ ।३९॥
उपसर्गादध्वनः । ७ । ३ । ७९ ॥
उपसर्गादस्योहो वा । ३ । ३ ।२५॥
उपसर्गादातः । ५ । ३ । ११० ॥
उपसर्गादातो–श्यः । ५ । १ ।५६॥
उपसर्गादूहो ह्रस्वः । ४ ।३।१०६॥
उपसर्गाद्दः किः । ५ । ३ । ८७ ॥
उपसर्गाद्दिवः । २ । २ । १७ ॥
उपसर्गाद् देवृ–शः । ५ । २। ६९॥
उपाजेऽन्वाजे । ३ । १ । १२ ॥
उपाज्जानुनीवि–ण । ६ ।३।१२९॥
उपात् । ३ । ३ । ५८ ॥
उपात् किरो लवने । ५ । ४ ।७२॥
उपात् स्तुतौ । ४ । ४ । १०५ ॥
उपात् स्थः । ३ । ३ । ८३ ॥
उपाद् भूषासमवाय–रे ।४।४।९२॥
उपान्त्यस्यासमा–ङे । ४ ।२।३५॥
उपान्वध्याङ्वसः । २ । २ । २१ ॥
उपायाद् ह्रस्वश्च । ७ । २ ।१७०॥
उपेनाधिकिनि । २ । २ । १०५ ॥
उप्ते । ६ । ३ । ११८ ॥
उभयाद् द्युस् च । ७ । २ । ९९ ॥
उमोर्णाद्वा । ६ । २ । ३७ ॥
उरसोऽग्रे । ७ । ३ । ११४ ॥
उरसो याणौ । ६ । ३ । १९६ ॥
उवर्णयुगादेर्यः । ७ । १ । ३० ॥
उवर्णात् । ४ । ४ । ५८ ॥
उवर्णादावश्यके । ५ । १ । १९ ॥
उवर्णादिकण् । ६ । ३ । ३९ ॥
उश्नोः । ४ । ३ । २ ॥
उषासोषसः । ३ । २ । ४६ ॥
उष्ट्रमुखादयः । ३ । १ । २३ ॥
उष्ट्रादकञ् । ६ । २ । ३६ ॥
उष्णात् । ७ । १ । १८५ ॥
उष्णादिभ्यः कालात् ।६।३।२३॥
ऊङः । ३ । २ । ६७ ॥
ऊँचोञ् । १ । २ । ३९ ॥
ऊटा । १ । २ । १३ ॥
ऊढायाम् । २ । ४ । ५१ ॥
ऊदितो वा । ४ । ४ । ४२ ॥
ऊद् दुषो णौ । ४ । २ । ४० ॥
ऊध्नः । २ । ४ । ७ ॥
ऊनार्थपूर्वाद्यैः । ३ । १ । ६७ ॥
ऊर्जो विन्व–न्तः । ७ । २ । ५१ ॥
ऊर्णाहंशुभमो युस् । ७ । २ ।१७॥
ऊर्ध्वात् पूर्शुषः । ५ । ४ । ७० ॥
ऊर्ध्वादिभ्यः कर्तुः । ५ ।१।१२६॥
ऊर्ध्वाद्रिरिष्टा–स्य । ७ । २ ।११४॥
ऊर्याद्यनु–तिः । ३ । १ । २ ॥
ऋलृति–वा । १ । २ । २ ॥
ऋशदृप्रः । ४ । ४ । २० ॥
ऋक्पूःपथ्यपोऽत् । ७ । ३ ।७६॥
ऋक्सामर्ग्य–वम् । ७ । ३ । ९७॥
ऋगृद्द्विस्वरया० ।६।२।१४४॥
ऋचः श्शसि । ३ । २ । ९७ ॥
ऋचि पादः–दे । २ । ४ । १७ ॥
ऋणाद्धेतोः । २ । २ । ७६ ॥
ऋणे प्र–र् । १ । २ । ७ ॥
ऋत इकण् । ६ । ३ । १५२ ॥
ऋतः । ४ । ४ । ७९ ॥
ऋतः स्वरे वा । ४ । ३ । ४३ ॥
ऋतां विद्यायो–न्धे । ३ । ३ ।३७॥
ऋते तृ–से । १ । २ । ८ ॥
ऋते द्वितीया च । २ । २ ।११४॥
ऋतेर्डीयः । ३ । ४ । ३ ॥
ऋतो डुर । १ । ४ । ३७ ॥
ऋतोऽत् । ४ । १ । ३८ ॥

ऋतो रः-नि । २ । १ । २ ॥
ऋतो र-ते । १ । २ । २६ ॥
ऋतो रीः । ४ । ३ । १०९ ॥
ऋतो वा तौ च । १ । २ । ४ ॥
ऋतत्तृषमृषकृश-सेट् ।४।३।२४॥
ऋत्यारु-स्य । १ २ । ९ ॥
ऋत्वादिभ्योऽण् । ६ । ४ ।१२९॥
ऋत्विज्दिश्-गः । २ । १ । ६९ ॥
ऋदुदितः । १ । ४ । ७० ॥
ऋदुदित्तरतम-ञ्च । ३ । २ । ६३॥
ऋदुपान्त्याद-चः । ५ । १ ।४१ ॥
ऋदुशनस्पु-ड्डोः । १ । ४ । ८४ ॥
ऋद्वर्णस्य । ४ । २ । ३७ ॥
ऋद्वनदीवंश्यस्य । ३ । २ । ५ ॥
ऋध ईत् । ४ । १ । १७ ॥
ऋन्नरादेरण् । ६ । ४ । ५१ ॥
ऋन्नित्यदितः । ७ । ३ । १७१ ॥
ऋफिडादीनां । २ । ३ । १०४ ॥
ऋमतां रीः । ४ । [illegible] ५५ ॥
ऋर ल्लं-षु । २ । ३ । ९९ ॥
ऋवर्णदृशोऽङि । ४ । ३ । ७ ॥
ऋवर्णव्यञ्ज-घ्यण् । ५ । १ । १७॥
ऋवर्णश्र्यूर्णुगः कितः ।४।४।५७॥
ऋवर्णात् । ४ । ३ । ३६ ॥
ऋवर्णोवर्णे-लुक् । ७ । ४ । ७१॥
ऋवर्णोवर्णा-च । ७ । ३ । ३७॥
ऋवृव्येद इट् । ४ । ४ । ८०॥
ऋश्यादेः कः । ६ । २ । ९४॥
ऋषभोपा-ञ्यः । ७ । १ । ४६॥
ऋषिनाम्नोः करणे । ५ । २ ।८६॥
ऋषिवृष्ण्यन्धककुरु० ।६।१।६१॥
ऋषेरध्याये । ६ । ३ । १४५॥
ऋषौ विश्वस्य मित्रे ।३।२।७९॥
ऋस्मिपूङ्ञ्जशौ-च्छः ।४।४।४८॥
ऋहीघ्राध्रा-र्दा । ४ । २ । ७६॥
ॠतां क्ङितीर् । ४ । ४ । ११६॥
ॠदिच्छ्वस्तम्भू-वा ।३।४।६५॥
ॡल्वादेरे-प्रः । ४ । २ । ६८ ॥
ॠस्तयोः । १ । २ । ५ ॥
लृत-वा । १ । २ । ३ ॥
लृत्याल् वा । १ । २ । ११ ॥
लृदिद्द्युतादि । ३ । ४ । ६४ ॥
लृदन्ताः-नाः । १ । १ । ७ ॥
ए ऐ ओ औ-रम् । १ । १ । ८ ॥
एः । १ । ४ । ७७ ॥
एकद्वित्रि-ताः । १ । १ । ५ ॥
एकद्विबहुषु । ३ । ३ । १८ ॥
एकधातौ कर्म-ये ।३।४।८६॥
एकशालाया इकः ।७।१।१२०॥
एकस्वरात् । ६ । २ । ४८॥
एकस्वरादनु-तः ।४।४।५६॥
एकागाराच्चौरे ।६।४।११८॥
एकात्-स्य ।७।२।१११॥
एकादशषोडश० ।३।२।९१॥
एकादाकि-ये ।७।३।२७॥
एकादेः कर्मधारयात् ।७।२।५८॥
एकार्थं चानेकं च ।३।१।२२॥
एकोपसर्गस्य च घे ।४।२।३४॥
एजेः । ५ । १ । ११८ ॥
एण्या एयञ् । ६ । २ ।३८॥
एतदश्च से । १ । ३ । ४६ ॥
एताः शितः ।३।३।१०॥
एत्यकः । २ । ३ । २६ ॥
एत्यस्तेर्वृद्धिः । ४ । ४ । ३० ॥
एदापः । १ । ४ । ४२ ॥
एदैतोऽयाय् । १ । १ । २३ ॥
एदोतः-लुक् । १ । २ । २७ ॥
एदोद् देश एवेयादौ ।६।१।९॥
एदोद्भ्यां-रः ।१।४।३५॥
एद् बहुस्भोसि । १ । ४ । ४ ॥
एयस्य । ७ । ४ । २२ ॥
एयेऽग्नायी । ३ । २ । ५२ ॥
एये जिह्माशिनः ।७।४।४७॥
एषामीर्व्यञ्जनेऽदः ।४।२।९७॥
एष्यत्यवधौ-गे । ५ । ४ । ६ ॥
एष्यदृणेनः ।२।२।९४॥
ऐकार्थ्ये । ३ । २ । ८ ॥
ऐदौत-रैः । १ । २ । १२ ॥
ऐषमःपरु-र्वे ।७।२।१००॥
ऐषमोह्यःश्वसो वा ।६।३।१९॥
ओजःसहो-ते ।६।४।२७॥
ओजोञ्जःस-ष्टः ।३।२।१२॥
ओजोऽप्सरसः ।३।४।२८॥
ओत औः । १ । ४ । ७४॥
ओतः श्ये ।४।२।१०३॥
ओदन्तः । १ । २ । ३७ ॥
ओदौतोऽवाव् ।१।२।२४॥
ओमः प्रारम्भे ।७।४।९६॥
ओमाङि । १ । २ । १८॥
ओर्जान्तस्था-र्णे ।४।१।६०॥
ओष्ठ्यादुर् ।४।४।११७॥
औता । १ । ४ । २० ॥
औदन्ताः स्वराः । १ । १ । ४॥
औरीः । १ । ४ । ५६ ॥
कंशंभ्यां-भम् ।७।२।१८॥
कंसार्धात् ।६।४।१३५॥
कंसीयात् ञ्यः ।६।२।४१॥
ककुदस्या-म् ।७।३।१६७॥
कखोपान्त्य-दोः ।६।३।५९॥
कगेवनूजनै-रञ्जः ।४।२।२५॥
कङ्कश्चञ् । ४ । १ । ४६॥
कच्छाग्निवक्त्र-दात् ।६।३।६०॥
कच्छादेर्नृ नृस्थे ।६।३।५५॥
कच्छ्वा डुरः ।७।२।५९ ॥
कटः । ७ । १ । १२४ ॥
कटपूर्वात्प्राचः । ६ । ३ । ५८ ॥
कठादिभ्यो वेदे लुप् ।६।३।१८३ ॥
कडारादयः कर्म० ।३।१।१५८॥
कणेमनस्तृप्तौ । ३ । १ । ६ ॥
कण्ड्वादेस्तृतीयः ।४।१।९॥
कतरकतमौ-भे ।३।१।१०९॥

कत्रिः । ३ । २ । १३३ ॥
कत्र्यादेश्चैयकञ् ।६।३।१०॥
कथमित्थम् । ७ । २ । १०३ ॥
कथमि सप्तमी च वा ।५।४।१३॥
कथादेरिकण् । ७ । १ । २१ ॥
कदाकर्ह्योर्नवा ।५।३।८॥
कन्थाया इकण् ।६।३।२०॥
कन्यात्रिवेण्याः–च ।६।१।६२॥
कपिज्ञातेरेयण् ।७।१।६५॥
कपिबोधा–से ।६।१।४४॥
कपेर्गोत्रे । २ । ३ । २९ ॥
कबरमणि–देः ।२।४।४२ ॥
कर्मेणिङ् । ३ । ४ । २ ॥
कम्बलान्नाम्नि । ७ । १ । ३४ ॥
करणक्रियया क्वचित् ।३।४।९४॥
करणं च । २ । २ । १९ ॥
करणाद्यजो भूते ।५।१।१५८॥
करणाधारे । ५ । ३ । १२९ ॥
करणेभ्यः । ५ । ४ । ६४ ॥
कर्कलोहि–च ।७।१।१२२॥
कर्णललाटात्कल् ।६।३।१४१॥
कर्णादेरायनिञ् ।६।२।९०॥
कर्णादेर्मूले जाहः ।७।१।८८॥
कर्तरि । २ । २ । ८६ ॥
कर्तरि । ५ । १ । ३ ॥
कर्त्तर्यनद्भ्यः शव् ।३।४।७१॥
कर्तुः क्विप्–ङित् ।३।४।२५॥
कर्तुः खश् । ५ । १ । ११७ ॥
कर्तुर्जीवपुरुषा–हः ।५।४।६९॥
कर्तुर्णिन् । ५ । १ । १५३॥
कर्तुर्व्याप्यं कर्म । २ । २ । ३ ॥
कर्तृस्थामूर्ताप्यात् । ३ । ३ । ४०॥
कर्मजा तृचा च । ३ । १ । ८३ ॥
कर्मणः संदिष्टे । ७ । २ । १६७ ॥
कर्मणि । २ । २ । ४० ॥
कर्मणि कृतः । २ । २ । ८३ ॥
कर्मणोऽण् । ५ । १ । ७२ ॥
कर्मणोऽण् । ५ । ३ । १४ ॥
कर्मण्यग्न्यर्थे । ५ । १ । १६५ ॥
कर्मवेषाद् यः । ६ । ४ । १०३ ॥
कर्माभिप्रेयः संप्रदा० ।२।२।२५॥
कलापिकुथु–णः ।७ । ४ । ६२॥
कलाप्यश्वत्थ–कः । ६ । ३ ।११४॥
कल्यग्नेरेयण् । ६ । १ । १७ ॥
कल्याण्यादेरिन् चा० ।६।१।७७॥
कवचिह्–कण् ।६। २। १४ ॥
कवर्गैकस्वरवति । २ । ३ । ७६ ॥
कषः कृच्छ्रगहने ।४।४।६७ ॥
कषोऽनिटः ।५।३।३॥
कष्टकक्षकृच्छ्र–णे ।३।४।४१॥
कसमा–र्धः ।१।१।४१ ॥
कसोमात् ट्यण् ।६।२।१०७॥
काकतालीयादयः ।७।१।११७॥
काकवौ वोष्णे ।३।२।१३७॥
काकाद्यैः क्षेपे । ३ । १ । ९०॥
काक्षपथोः । ३ । २ । १३४ ॥
काण्डाऽऽण्डभाण्डा० ।७।२।३८॥
काण्डात् प्रमा–त्रे । २ ।४।२४॥
कादिर्व्यञ्जनम् । १ । १ । १० ॥
कामोक्तावकच्चिति । ५ । ४ । २६॥
कारकं कृता । ३ । १ । ६८ ॥
कारणम् । ५ । ३ । १२७ ॥
कारिका स्थित्यादौ । ३ । १ । ३॥
कार्षापणा–वा । ६ । ४ । १३३ ॥
कालः । ३ । १ । ६० ॥
कालवेलासमये–रे ।५।४।३३॥
कालस्यानहोरात्राणाम् ।५।४।७॥
कालहेतु–गे । ७ । १ । १९३ ॥
कालाजटाघा–पे । ७ । २ । २३ ॥
कालात् । ७ । ३ । १९ ॥
कालात् तनतरतम० ।३।२।२४॥
कालात् परि–रे । ६ । ४ । १०४॥
कालाद् देये ऋणे ।३ ।३। ११३॥
कालाद् भववत् । ६ । २ । १११ ॥
कालाद् यः । ६ । ४ । १२६ ॥
कालाध्वनोर्व्याप्तौ ।२।२।४२॥
कालाध्वभा–णाम् ।२।२।२३ ॥
काले कार्ये–वत् । ६ । ४ । ९८॥
कालेन तृष्य–रे । ५ । ४ । ८२॥
काले भान्नवाऽऽधारे ।२।२।४८॥
कालो द्विगौ च मेयैः ।३।१।५७॥
काशादेरिलः । ६ । २ । ८२ ॥
काश्यपकौ–च । ६ । ३ । १८८॥
काश्यादेः । ६ । ३ । ३५ ॥
कासूगोणीभ्यां तरट् ।७।३।५०॥
कियत्तत्सर्व–दा ।७।२।९५ ॥
किंवृत्ते लिप्सायाम् ।५।३।९॥
किंवृत्ते सप्तमी–न्त्यौ ।५।४।१४॥
कियत्तद्बहोरः ।५।१ ।१०१॥
किंकिलास्त्यर्थे–न्ती ।५।४।१६॥
किं क्षेपे । ३ । १ । ११०॥
कित्याद्ये–स्याम् । ७ । ३ । ८ ॥
कितः संशयप्रतीकारे । ३ ।४। ६॥
किमः क–च ।२।१।४०॥
किमद्व्यादि–तस् । ७ । २ । ८९॥
किरो धान्ये ।५।३।७३॥
किरो लवने । ४ । ४ । ९३ ॥
किशरादेरिकट् । ६ । ४ । ५५ ॥
कुक्ष्यात्मोदरा–खिः ।५।१।९०॥
कुञ्जादेर्ञायन्यः ।६।१।४७॥
कुटादेर्ङिद्वदञ्णित् ।४।३।१७॥
कुटिलिकाया अण् ।६।४।२६॥
कुटीशुण्डाद् रः । ७ । ३ । ४७॥
कुण्ड्यादिभ्यो यलु० ।६।३।११॥
कुत्वा डुपः । ७ । ३ । ४९ ॥
कुत्सिताल्पाज्ञाते । ७ । ३ । ३३ ॥
कुन्त्यवन्तेः स्त्रियाम् ।६।१।१२१॥
कुप्यभिद्यो–म्नि।५।१।३९॥
कुमहद्भ्यां वा । ७ । ३ । १०८॥
कुमारः श्रमणादिना ।३।१।११५॥
कुमारशीर्षाण्णिन् ।५।१।२८॥

कुमारीक्रीड–सोः ।७।३।१६।।
कुमुदादेरिकः । ६ । २ । ९६ ।।
कुरुच्छुरः । २ । १ । ६६ ।।
कुरुयुगंधराद् वा । ६ । ३ । ५३ ।।
कुरोर्वा । ६ । १ । १२२ ।।
कुर्वादेर्ञ्यः । ६ । १ । १०० ।।
कुलकुक्षि–रे । ६ । ३ । १२ ।।
कुलटाया वा । ६ । १ । ७८ ।।
कुलत्थकोपान्त्यादण् । ६ ।४।४।।
कुलाख्यानाम् । २ । ४ । ७९ ।।
कुलाज्जल्पे । ७ । १ । ८६ ।।
कुलादीनः । ३ । १ । ९६ ।।
कुलालादेरकञ् । ६ । ३ । १९४।।
कुलिजाद्वा लुप् च । ६ ।४।१६५।।
कुल्मासादण् । ४ । १ । १९५ ।।
कुशलायु–याम् । २ । ३ । ९९
कुशले । ६ । ३ । ९५ ।।
कुशाग्रादीयः । ७ । १ । ११६ ।।
कुषिरञ्जेर्व्याप्ये–च ।३।४ ७४।।
कुसीदादिकट् । ६ । ४ । ३५ ।।
कूलादुद्रुजोद्वहः । ५ । १ ।१२२।।
कूलाभ्रकरी–षः ।५ । १ ।११०।।
कृगः खनट्–णे । ५ । १ ।१२९।।
कृगः प्रतियत्ने । २ । २ । १२ ।।
कृगः श च वा ।५ । ३ ।१००।।
कृगः सुपुण्य–त् ।५ । १ ।१६२।।
कृगो नवा । ३ । १ । १० ।।
कृगो यि च । ४ । २ । ८८ ।।
कृगोऽव्ययेना–मौ । ५ । ४ ।८४।।
कृग्ग्रहो–त्वात् । ५ । ४ । ६१ ।।
कृग्तनादेरुः । ३ । ४ । ८३ ।।
कृतचृतनृत–र्वा । ४ । ४ ।५० ।।
कृताद्यैः । २ । २ । ४७ ।।
कृतास्मरणा–क्षा । ५ । २ । ११ ।।
कृति । ३ । १ । ७७ ।।
कृते । ६ । ३ । १९२ ।।
कृत्यतुल्या–ऱ्या ।३।१।११४।।
कृत्येऽवश्यमो लुक् ।३।२।१३८।।
कृत्यस्य वा । २ । २ । ८८ ।।
कृत्सगति–पि । ७ । ४ । ११७।।
कृद्येनावश्यके । ३ । १ । ९५ ।।
कृपः श्वस्तन्याम् । ३ । ३ । ४६ ।।
कृपाहृदयादालुः । ७ । २ । ४२ ।।
कृभ्वस्तिभ्यां च्विः ।७।२।१२६।।
कृवृषिमृजि–वा । ५ । १ । ४२ ।।
कृशाश्वक–दिन् । ६ । ३ । १९०।।
कृशाश्वादेरीयण् । ६ । २ । ९३।।
कृष्यादिभ्यो वलच् ।७।२।२७।।
कृतः कीर्तिः । ४ । ४ । १२३ ।।
केकयमित्रयु–च । ७ । ४ । २ ।।
केदाराण्ण्यश्च । ६ । २ । १३ ।।
केवलमामक–जात् ।२।४।२९।।
केवलस–रौः । १ । ४ । २६ ।।
केशाद्वः । ७ । २ । ४३ ।।
केशाद्वा । ६ । २ । २८ ।।
केशे वा । ३ । २ । १०२ ।।
कोः कत् तत्पुरुषे ।३।२।१३०।।
कोटरमिश्रक–णे । ३ । २ । ७६ ।।
कोऽण्वादेः । ७ । २ । ७६ ।।
कोपान्त्याच्चाण् । ६ । ३ । ५६।।
कोऽश्मादेः । ६ । ४ । ९७ ।।
कौण्डिन्याग–च । ६ । १ । १२७।।
कौपिञ्जलहास्तिप० ।६।३।१७१।।
कौरव्यमाण्डूकासुरेः ।२।४।७०।।
कौशेयम । ६ । २ । ३९ ।।
क्ङिति यि शय् । ४ । ३ । १०५।।
क्तं नञादिभिन्नैः । ३ । १ ।१०५।।
क्तक्तवतू । ५ । १ । १७४ ।।
क्तयोः । ४ । ४ । ४० ।।
क्तयोरनुपसर्गस्य ।४।१।९२।।
क्तयोरसदाधारे । २ । २ । ९१ ।।
क्ताः । ३ । १ । १५१ ।।
क्ताच्च नाम्नि वा ।२।४।२८।।
क्तात्तमबादे–न्ते । ७ । ३ । ५६।।
क्तादल्पे । २ । ४ । ४५ ।।
क्तादेशोऽषि । २ । १ । ६१ ।।
क्तेटो गुरोर्व्यञ्जनात् ।५।३।१०६।।
क्तेन । ३ । १ । ९२ ।।
क्तेनासत्त्वे । ३ । १ । ७४ ।।
क्तेऽनिटश्चजोः–ति ।४।१।१११।।
क्त्वा । ४ । ३ । २९ ।।
क्त्वातुमम् । १ । १ । ३५ ।।
क्त्वातुमम्–वे । ५ । १ । १३।।
क्नः पलितासितात् ।२।४।३७।।
क्यः शिति । ३ । ४ । ७० ।।
क्यङ् । ३ । ४ । २६ ।।
क्यङ्मानिपित्–ते ।३।२।५०।।
क्यङ्षो नवा । ३ । ३ । ४३ ।।
क्यनि । ४ । ३ । ११२ ।।
क्ययङाशीर्ये । ४ । ३ । १० ।।
क्यो वा । ४ । ३ । ८१ ।।
क्रमः । ४ । ४ । ५४ ।।
क्रमः क्त्वि वा ।४।१।१०६।।
क्रमो दीर्घः परस्मै ।४।२।१०९।।
क्रमोऽनुपसर्गात् ।३।३।४७।।
क्रय्यः क्रयार्थे ।४।३।९१।।
क्रव्यात् क्रव्या–दौ ।५।१।१५१।।
क्रियातिपत्तिः–र्महि ।३।३।१६।।
क्रियामध्येऽध्व–च ।२।२।११०।।
क्रियायां क्रियार्था० ।५।३।१३।।
क्रियार्थो धातुः । ३ । ३ । ३ ।।
क्रियाविशेषणात् । २ । २ । ४१।।
क्रियाव्यतिहा–र्थे । ३ । ३ ।२३।।
क्रियाश्रयस्या–णम् ।२।२।३०।।
क्रियाहेतुः कारकम् ।२।२।१।।
क्रीडोऽकूजने । ३ । ३ । ३३ ।।
क्रीतात् करणादेः ।२।४।४४।।
क्रुत्संपदादिभ्यः क्विप् ।५।३।११४।।
क्रुद्द्रुहे–पः ।२।२।२७।।
क्रुशस्तुनः–सि ।१।४।९१।।
क्रोशयोजन–र्हे । ६।४।८६।।

क्रोष्टृशलङ्कोर्लुक् च ।६।१।५६।।
कौड्यादीनाम् । २ । ४ । ७९ ।।
क्र्यादेः । ३ । ४ । ७९ ।।
क्लिन्नाल्ल-स्य । ७ । १ । १३० ।।
क्लीबमन्ये-वा । ३ । १ । १२८ ।।
क्लीबे । २ । ४ । ९७ ।।
क्लीबे क्तः । ५ । ३ । १२३ ।।
क्लीबे वा । २ । १ । ९३ ।।
क्लेशादिभ्योऽपात् । ५ । १ । ८१।।
क्वकुत्रात्रेह । ७ । २ । ९३ ।।
क्वचित् । ५ । १ । १७१ ।।
क्वचित् । ६ । २ । १४५ ।।
क्वचित्तुर्यात् । ७ । ३ । ४४ ।।
क्वचित् स्वार्थे । ७ । ३ । ७ ।।
क्वसुष्मतौ च । २ । १ । १०५ ।।
क्विप् । ५ । १ । १४८ ।।
क्विब्वृत्तेरसुधियस्तौ ।२।१।५८।।
क्वेहामात्रतसस्त्यच् ।६।३।१६।।
क्वौ । ४ । ४ । १२० ।।
क्षत्रादियः । ६ । १ । ९३ ।।
